सोमसेनविरचितस्य रामपुराणस्य पाठसमीक्षात्मकं सम्पादनम्

विषयानुक्रमणिका

प्रथमोऽध्यायः

भूमिका

भूमिका

साहित्यं खलु मनुष्यजीवने तत्सृजनशीलतायाः परिणामः। सर्वत्रापि विश्वे साहित्यं तज्जनीय संस्कृतिसभ्यतेतिहासधर्मदर्शनादिकं दर्पणं इव प्रस्तौति। साहित्योद्याने साहित्यकारः तथैव स्वकीयं चिन्तनं चित्रयति यथोद्याने विचरणशीलानां पशुपक्षिणां भ्रमरादिकीटानां पुष्पपत्रफलितवृक्षादीनां सौन्दर्यं भवति। तत्र मानवजीवनस्य समाजशास्त्रदिशा तत्त्वज्ञानदिशा च मानवीयगुणदोषादिनां प्रस्फुरणं तथैव भवति यथा समेषां प्राणिनां हितं स्यात्।

साहित्यकारः कल्पनालोके तथैव विचरति यथा साहित्यसृष्टिः प्राकृतिकराद्धान्तानां पारिस्थितिकविनियमानां बिम्बं आदर्श इव प्रस्फुटेत्। विविधचरितनायकानां स्त्रीपुरुषपात्राणां सृजनं समाजोत्थानाय एव भवेदिति कृत्वा साहित्यं सृजति साहित्यकारः।

संस्कृतसाहित्यं अतिविशालतरं सदपि सम्पूर्णेऽपि भारते व्याप्तं दृश्यते। मानवजीवनस्य सर्वासु विधासु यत्किञ्चिदपि आवश्यकं तत्त्वं भवति तस्य बीजरूपेण विस्तारेण वा समावेशः संस्कृतसाहित्ये विद्यते।

सोमसेनविरचितरामपुराणस्य स्थानमपि रामचरिताख्यानपरम्परादिशामहत्वसंधारणादिषु वर्तते। मया खलु शोधप्रबन्धप्रलेखने अस्यैव काव्यस्य चयनं कृतं यतः वैदिकश्रमणसंस्कृत्योः रामकथाविशिष्टं साहित्यं पर्यवलोकयितुं मया प्रयत्नः जातः। भट्टारकसोमसेनविरचितस्य रामपुराणस्य पाण्डुलिपयः मया अङ्गीकृताः सम्पादनकर्मणि। अस्य ग्रन्थस्य प्रकाशनं कुतोऽपि जातमिति मया नैव ज्ञातम्। अतः तिसृणां पाण्डुलिपीनामाधारेण मया सम्पादनकर्म विधत्तम्। पाण्डुलिपेः परिशीलनं श्रमसाध्यं भवति। प्रायः पञ्चवर्षेषु पाण्डुलिपीनां पठनमध्ययनं पाठसंशोधनादिकं विधाय सम्पादनकर्म मया पूरितम्। ग्रन्थपरिचयात् प्राक् पाण्डुलिपिपरिचयः प्रदीयते।

पाण्डुलिपेरर्थः तात्पर्यञ्च

रचनाकारेण विहितं साहित्यं प्रकाशनात्पूर्वं ताडपत्रादिषु लिखितं भवति। साहित्यरचनेयं लेखकेन लिपिकारेण वा कर्गदादिषु विलिख्य स्थापिता चेत् स्यात् पाण्डुलिपिः शब्देन वक्तुं शक्यते। सम्पूर्णेऽपि भारते पाण्डुलिपयः प्राप्यन्ते। तासां पाण्डुलिपीनां पठनं सम्पादनं प्रकाशनं वा आवश्यकं कार्यम्। यतोहि मानवजातेः इतिहासः लिपीनां आविष्कारकारणानि पाण्डुलिपिषु कृतिबोधेन सह वर्तन्त एव। रचनाकारस्य मूलप्रतितः बहवः प्रतिलिपयः भवन्ति। ताः प्रतिलिपयः अपि 'पाण्डुलिपि' शब्देन एव ज्ञायन्ते। सम्प्रति भोजपत्रेषु ताडपत्रेषु काष्ठ–कर्पासतटेषु धातुखण्डेषु पाषाणखण्डेष्वपि च पाण्डुलिपयः दृग्गोचराः सन्ति। बहुलतया तु कर्गदपत्रेषु प्राप्यन्ते।

लिपीनां भाषाणाञ्च विकासकथा यदि केनापि अन्वेषकेण ज्ञातुं शक्यते चेत् तर्हि पाण्डुलिपीनां अध्ययनमावश्यकमेव। तद्विना प्रामाणिको विकासक्रमः न ज्ञातुं प्रभवतीति दिक्।

पाण्डुलिपीनां महत्वम्

यावन्महत्वं मानवसंस्कृतौ धर्मशास्त्राणां विविधसम्प्रदायां धर्माधारितपरम्पराणाम्वा विद्यते तावदेव महत्वं प्राचीनपाण्डुलिपिषु एव सञ्जातम्। इदानीं यावत् प्रकाशिताः ग्रन्थाः अपि पाण्डुलिपितः एव प्रचारभूताः सन्ति। प्रकाशितग्रन्थानामपि गुणदोषविवेचनं पाण्डुलिपिपरिशीलनेनैव विधातुं शक्यते। अतः पाण्डुलिपीनां महत्वं अपरिहार्यं ज्ञायते। बहवः अप्रकाशिताः पाण्डुलिपयः ग्रन्थागारेषु मन्दिरादिषु गृहादिषु वा असुरक्षिताः सुरक्षिताः वा सन्ति। तासु पाण्डुलिपिषु कीदृशं चिन्तनं धर्मदर्शनसाहित्येतिहासविषयकं विज्ञानं च विद्यते। ताः पाण्डुलिपिः अपठित्वा नैव ज्ञातुं शक्यते। अतः तासां अप्रकाशितपाण्डुलिपीनां पठनं विधाय तच्चिन्तनं यथा उद्घाटितं स्यात् तथा विद्यावतंसतल्लजैः विद्वद्भिः शोधछात्रैश्च प्रयत्नो विधेयः। प्राचीनाः अर्वाचीनाः वा पाण्डुलिपयः संशोधनकर्मणि अनुसंधित्सूनां कृते मूलं सशक्तं वा उपकरणभूताः अधिकरणभूताः वा ज्ञायन्ते।

पाण्डुलिपिसम्पादनं तन्महत्वञ्च

सम् उपसर्गपूर्वकात् णिजन्ताद् पद्धातोः ल्युटप्रत्ययसंयोजनात् 'सम्पादन' शब्दः व्युत्पद्यते। सम्पादनकर्मणो अर्थः नाना पाण्डुलिपिनामाधारेण प्रयुक्तभाषायाः शुद्धस्वरूपस्य निर्धारणं मूलभाषायाश्च संरक्षणं भवति। सम्पादनकर्मणि सम्पादकस्य पात्रतापि आवश्यकी भवति। यतः तद्विना केवलं यद्वा तद्वा पाण्डुलिपीनां पुनर्लेखनं सम्पादनं न भवति। सम्पादनकर्ता पाण्डुलिप्यां

प्रयुक्तलिपि–भाषा–विषयादीनां ज्ञानं समुपार्जयेत्। यतोहि तद्विना सम्पादनकर्म अप्रामाणिकं भवति। पाण्डुलिप्यां काव्यशास्त्रीया कृतिः संस्कृते स्यात् तर्हि तस्याः पाण्डुलिप्याः सम्पादनकर्ता संस्कृतभाषायाः काव्यशास्त्राणाञ्च ज्ञाता स्यात्। एवमेव अन्यत्रापि दर्शनशास्त्रादिषु संस्कृतेतरभाषादिषु विद्यमानानां पाण्डुलिपिसम्पादने ज्ञातव्यम्।

सम्पादनकर्मणि पाठसंशोधनं पाठनिर्णयपूर्वकमेव कर्तव्यं तत्र विषयज्ञानेन सह भाषायाः परिज्ञानं अपरिहार्यं भवति। पाण्डुलिपिसम्पादनस्य कृते पाठालोचनं आवश्यकं ज्ञेयम्। तस्य विविधाः प्रविधयः सन्ति। प्रक्रियानुगुणेन तेषां प्रविधीनां अनुसरणं पाण्डुलिपिसम्पादकैः विधेयम्। पाठालोचनान्तरं शुद्धपाठनिर्धारणमपि महत्वपूर्णं कार्यम्। पाठनिर्धारणप्रक्रियायां विविधाः आयामाः भवन्ति। ततः किञ्चित् प्रस्तूयते – प्रथमं पाण्डुलिपीनां संग्रहः, पाण्डुलिपीनां वर्गीकरणं, शुद्धपाण्डुलिपेश्च चयनं भवति। तदनन्तरं मूलपाठस्य निर्णयः प्रतौ विद्यमानभाषा–लिपिगुणदोषानां आधारेण सीमचीनविषयपरिज्ञानेन वा विधीयते अतः लिपेः लिपिकाराणाञ्च गुणदोषा अपि मनसि कृत्य युक्त्यवलम्बनेन शुद्धपाठस्य निर्णयः विधातव्यः। पाण्डुलिपिसम्पादकेन वैज्ञानिकसाहित्यिक विधीनां सहायेन पाठालोचनं विधेयम्। पाठालोचनस्य सामान्यतया तिस्रः प्रणालयः दृग्गोचराः भवन्ति–

१. स्वेच्छया पाठनिर्धारण प्रणाली
२. तुलनात्मक पाठनिर्धारण प्रणाली
३. वैज्ञानिक पाठनिर्धारण प्रणाली

मया एताः प्रणालीः समासृत्य यथाशक्यं पाठनिर्धारणं विधाय सम्पादनं विहितम्। पाठालोचनप्रक्रियायां एतन्महत्वपूर्णं कर्तव्यमासीत्।

पाण्डुलिपिप्राप्तिप्रयत्नः

'विद्यावारिधि' इति उपाधेः कृते मया ''सोमसेनविरचितं रामपुराणम्'' पाण्डुलिपिसम्पादनकर्मणि अङ्गीकृतम्। एतत्कृते अन्तर्जालमध्ये (I.D.J.O.) ज्ञातं यत् सोमसेनविरचितरामपुराणस्य पाण्डुलिपयः विविधस्थलेषु विद्यमानाः सन्ति। ततः उत्तरप्रदेशस्थ वाराणस्यां, मध्यप्रदेशस्य सोनागिरग्रामे अन्यच्च मध्यप्रदेशस्य बीनानगरे विद्यमानानां पाण्डुलिपीनां अवलोकनं मया कृतम्।

अन्तर्जालपुटे (I.D.J.O.) एताः पाण्डुलिपयः संरक्षिताः सत्यः उपलभ्यन्ते शोधार्थिनां कृते। अतः मया तत एव डाउनलोड प्रिन्टाउट चेति कृत्वा तिस्रः प्रतयः प्राप्ताः। तासां प्रतीनां

वर्षपर्यन्तं वाचनं विधाय तदनन्तरञ्च पाठसंधोशनं च शोधप्रविधिनां समाश्रयेण च पाठनिर्णयपूर्वकं सम्पादनकर्म विहितं चतुर्षु वर्षेषु आहत्य पञ्चवर्षाणि व्यतीतानि। अनन्तरञ्च प्रस्तावनालेखने व्यापृताऽहम्।

सम्पादने प्रयुक्तानां पाण्डुलिपीनां परिचयः

सर्वप्रथमं सम्पादितस्य सोमसेनविरचितस्य रामपुराणस्य पाण्डुलिपीनां परिचयः आवश्यकः। एतत्कृते मया श्री अनेकान्तज्ञानमन्दिरबीनातः प्राप्ता पाण्डुलिपिः मूलप्रतित्त्वेन स्वीकृता। अस्याः प्रतेः सञ्ज्ञा 'क' प्रतिः इति निर्धारिता। अनन्तरञ्च स्याद्वादमहाविद्यालयवाराणसीतः प्राप्ता पाण्डुलिपिः 'ख' प्रतित्त्वेन सञ्ज्ञिता। अनन्तरञ्च श्रीदिगम्बरजैनमन्दिरसोनागिरमध्यप्रदेशतः समुपलब्धा पाण्डुलिपिः 'ग' प्रतित्त्वेन सञ्ज्ञितेति ज्ञातव्यम्। इदानीं तासां पाण्डुलिपीनां परिचयः प्रदीयते

क प्रतेः परिचयः

प्रथमा पाण्डुलिपिरियं श्रीअनेकान्तज्ञानमन्दिरबीनानगरात् प्राप्ताऽभवत्। पाठ्यसाम्यदृष्ट्या प्राप्तप्रतिलिपेः साङ्केतिकनाम **'क'** प्रति इति निर्धारितम्। भट्टारकश्रीसोमसेनविरचितरामपुराणमेकं पद्यमयी रचना विद्यते। श्री अनेकान्तज्ञानमन्दिरपुस्तकालये अस्याः पञ्जीयनसङ्ख्या 4277 अस्ति। अस्याः लिपिकालो विक्रम संवत् 1816 अस्ति। अस्याः लिपिकारः पण्डितजीवनरामो विद्यते। प्रतिलिप्यां कुलपृष्ठाः 286 वर्तन्ते। पाण्डुलिपेः पृष्ठानामाकारः 24x10 से.मी. विद्यते। प्रतिपृष्ठे द्वादशपङ्क्तयः सन्ति। एकस्यां पङ्क्त्यां 29 तः 39 अक्षरा उल्लिखिताः सन्ति। अस्याः प्रतिलिप्याः ग्रन्थप्रशस्तौ श्लोकसङ्ख्या 7300 प्रोक्ता वर्तते। पृष्ठाः पिङ्गलवर्णीयाः (हल्का भूरा) विद्यन्ते। तत्र श्लोकाः कृष्णमसीप्रयोगेण लिखिताः। कुत्रचित् हाशियाक्षेत्रे संस्कृते एव व्याख्यापरोऽर्थः लिखितः वर्तते। 'क' प्रतिलिपि विशदाक्षरेषु स्पष्टरूपेणोल्लिखिता अतएव मया आदर्शप्रतिरूपेण प्रतिरियं स्वीकृता।

भट्टारकश्रीसोमसेनेन ग्रन्थारम्भे मङ्गलाचरणमिदमाचरितम्

श्री वीतरागाय नमः

वन्देऽहं सुव्रतं देवं पञ्चकल्याणनायकम्।
देवदेवादिभिः सेव्यं भव्यवृन्दसुखप्रदम्।।१।।

शेषान् सिद्धान् जिनान् सूरीन् पाठकान् साधुसंयुतान्।
नत्वा वक्ष्ये हि पद्मस्य पुराणं गुणसागरम्।।२।।

ग्रन्थान्ते कृतिकारोल्लेखो दृश्यते। तद्यथा तदन्तिमश्लोकाः

श्रीमूलसङ्घे वरपुष्कराख्ये
गच्छे सुजातो गुणभद्रसूरिः।
पट्टे च तस्यैव सुसोमसेनो
भट्टारकोऽभूद्विदुषां शिरोमणिः ।।२३४।।

सहस्रासप्तशतं त्रीणि वर्तन्ते भुवि विस्तरात्।
सोमसेनमिदं वक्ष्ये चिरञ्जीविरजीवितम् ।।२३५।।

ग्रन्थान्ते प्रशस्तिः

''इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते रामस्वामिनो निर्वाणवर्णनो नाम त्रयस्त्रिंशत्तमोऽधिकारः ३३ ग्रन्थसङ्ख्या ७३०० अथ सम्वत्सरेऽस्मिन् श्रीमन्नृपतिविक्रमादित्यराज्यात् सम्वत् १८१६ वर्षे शाके १६८१ प्रवर्त्तमाने श्रावणमासे शुक्लपक्षे २ गुरुवारे कृष्णगढनगरे महाराजाधिराज महाराजा श्री बहादरसिंहजी राज्ये श्रीमूलसङ्घे नन्द्याम्नाये वलात्कारगणे सरस्वतीगच्छे पण्डित्तोत्तम पण्डितजी श्रीहेमराजजी तच्छिष्य पण्डितजीश्रीतुलसीदासजी पण्डित श्रीरामचन्द्रजी तच्छिष्य पण्डितजीवनरामेण लिखितमिदं रामपुराणाख्यं शास्त्रं मङ्गलं भूयात्।।''

ख प्रतेः परिचयः

द्वितीया पाण्डुलिपिरियं स्याद्वादमहाविद्यालयवाराणसीनगरात् प्राप्ताऽभवत्। पाठ्यसाम्यदृष्ट्या प्राप्तप्रतिलिपेः साङ्केतिकनाम **'ख'** प्रति इति निर्धारितम्। भट्टारकश्रीसोमसेनविरचितरामपुराणमेकं पद्यमयी रचना विद्यते। श्री अनेकान्तज्ञानमन्दिरपुस्तकालये अस्याः पञ्जीयनसङ्ख्या 47 अस्ति। अस्याः लिपिकालो विक्रम संवत् 1838 अस्ति। अस्याः लिपिकारः ब्राह्मणदौलतरामो विद्यते। प्रतिलिप्यां कुलपृष्ठाः 283 वर्तन्ते। लिखितः पृष्ठाकारः 6 x 11 इंच विद्यते। प्रतिपृष्ठे चर्तुदशपङ्क्तयः सन्ति। एकस्यां पङ्क्त्यां 36 अक्षरा उल्लिखिताः सन्ति। अस्याः प्रतिलिप्याः ग्रन्थप्रशस्तौ श्लोकसङ्ख्या 7000 प्रोक्ता वर्तते। पृष्ठाः पिङ्गलवर्णीयाः (हल्का भूरा) विद्यन्ते। तत्र श्लोकाः कृष्णमसी प्रयोगेण लिखिताः। कुत्रचित् हाशियाक्षेत्रे संस्कृते एव व्याख्यापरोऽर्थः लिखितः वर्तते। 'ख' प्रतिलिप्यपि स्पष्टरूपेणोल्लिखिता वर्तते।

भट्टारकश्रीसोमसेनेन ग्रन्थारम्भे मङ्गलाचरणमिदमाचरितम्

श्री वीतरागाय नमः

वन्देऽहं सुव्रतं देवं पञ्चकल्याणनायकम्।
देवदेवादिभिः सेव्यं भव्यवृन्दसुखप्रदम् ।।१।।

शेषान् सिद्धान् जिनान् सूरीन् पाठकान् साधुसंयुतान्।
नत्वा वक्ष्ये हि पद्मस्य पुराणं गुणसागरम्।।२।।

ग्रन्थान्ते कृतिकारोल्लेखो दृश्यते। तद्यथा तदन्तिमश्लोका:

श्रीमूलसङ्घे वरपुष्कराख्ये
गच्छे सुजातो गुणभद्रसूरिः।
पट्टे च तस्यैव सुसोमसेनो
भट्टारकोऽभूद्विदुषां शिरोमणिः।।२३३।।

ग्रन्थान्ते प्रशस्ति:

"इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते रामस्वामिनो निर्वाणवर्णनो नाम त्रयस्त्रिंशत्तमोधिकार:।।३३।। समाप्तोयं रामपुराणग्रन्थाग्रन्थश्लोक ७००० सप्तसहस्राणि। श्रीरस्तु सम्वत् १८३८ वर्षे कार्तिकशुक्लतिथौ त्रयोदश्यां चन्द्रवासरे उत्रखाटनक्षत्रे श्रीमूलसङ्घे नन्द्याम्नाये वलात्कारगणे सरस्वतीगच्छे कुन्दकुन्दाचार्यान्वये भट्टारकश्रीदेवेन्द्रकीर्तिस्तत्पट्टे भट्टारकश्रीनरेन्द्र-कीर्तिस्तत्पट्टे भट्टारकश्रीमहेन्द्रकीर्तिस्तत्पट्टे भट्टारकश्रीखेमेन्द्रकीर्तिस्तत्पट्टे भट्टारकश्रीसुरेन्द्रकीर्ति तदाम्नाये कोटाका रामपुरावासी खण्डेलवालवंशोत्पन्न ज्ञातिवैद्यसाहजी श्रीकवलापतिजी तत्पुत्रसाहजी श्रीजयतरामजी तस्य भार्या बाईअनोपां तत्पुत्रासाहजी श्री तुलारामजी साहजी श्रीवर्द्धमानजी साहजी श्रीताराचन्दजी तुलारामस्य भार्या बाईजंगा वर्द्धमानस्य भार्या वर्द्धादेताराचन्दस्य भार्या तारमदेताराचन्दस्य पुत्र माणिकचन्दजी एतेषां मध्ये साहजी श्रीवर्द्धुरामेण चर्तुदशी उद्यापनार्थं पद्मपुराणलिखाइतं आत्मकल्याणार्थं ज्ञानावर्णीकर्मक्षयार्थं पण्डितजीश्रीसुखारामाय दत्तमिदं शास्त्रं तथा लेखकब्राह्मण-दौलतरामेण लिपिकृतम्।।श्री:।। तच्छात्रसरूपचन्दपठनार्थं वाचकानां पाठकानां मङ्गलं भूयात्।।श्री जिनो जयतितरां।।श्री।। तच्छात्र सदा सुख तच्छात्र मनसुखस्य कल्याणं भूयात्।"

ग प्रते: परिचय:

तृतीया पाण्डुलिपिरियं श्रीदिगम्बरजैनमन्दिरसोनागिरत: प्राप्ताऽभवत्। पाठ्यसाम्यदृष्ट्या प्राप्तप्रतिलिपे: साङ्केतिकनाम **'ग'** प्रति इति निर्धारितम्। भट्टारकश्रीसोमसेनविरचितरामपुराणमेकं पद्यमयी रचना विद्यते। अन्तर्जालपुटे IDJO मध्ये प्रतिलिपिसम्बन्धी प्राप्तपरिचयानुसारेण अस्या: पञ्जीयनसङ्ख्या 131 अस्ति। अस्या: लिपिकालो विक्रम संवत् 1780 अस्ति। प्रतिलिप्यां कुलपृष्ठा: 395 वर्तन्ते। प्रतिपृष्ठे पञ्चदशपङ्क्तय: सन्ति। एकस्यां पङ्क्त्यां 37 त: 44 अक्षरा उल्लिखिता: सन्ति।

अस्या: प्रतिलिप्या: ग्रन्थप्रशस्तौ श्लोकसङ्ख्या 7900 प्रोक्ता वर्तते। पृष्ठा: पिङ्गलवर्णीया:

(हल्का भूरा) विद्यन्ते। तत्र श्लोका: कृष्णमसी प्रयोगेण लिखिता:। कुत्रचित् हाशियाक्षेत्रे संस्कृते एव व्याख्यापरोऽर्थ: लिखित: वर्तते। **'ग'** प्रतिलिप्यां अक्षराणां लेखने अतिनिकटता अस्पष्टता च वर्तते अतएव मया **'ग'** प्रतिरूपे स्वीकृता।

भट्टारकश्रीसोमसेनेन ग्रन्थारम्भे मङ्गलाचरणमिदमाचरितम्

श्री वीतरागाय नमः

वन्देऽहं सुव्रतं देवं पञ्चकल्याणनायकम्।
देवदेवादिभिः सेव्यं भव्यवृन्दसुखप्रदम्।।१।।
शेषान् सिद्धान् जिनान् सूरीन् पाठकान् साधुसंयुतान्।
नत्वा वक्ष्ये हि पद्मस्य पुराणं गुणसागरम्।।२।।

ग्रन्थान्ते कृतिकारोल्लेखो दृश्यते। तद्यथा तदन्तिमश्लोका:

श्रीमूलसङ्घे वरपुष्कराख्ये
गच्छे सुजातो गुणभद्रसूरिः।
पट्टेव तस्यैव सुसोमसेनो
भट्टारकोऽभूद्विदुषां शिरोमणिः।।२३०।।

सप्तसहस्रसङ्ख्यात: नवशताधिकास्तथा।
ज्ञेया अनुष्टुप श्लोकां अस्मिन् ग्रन्थे मनोहरे ।।२३१।।

ग्रन्थान्ते प्रशस्ति:

''ग्रन्थां श्लोकसङ्ख्या ।।७९००।। इति श्री पद्मपुराणे भट्टारकश्रीसोमसेनविरचिते रामस्वामि निर्वाणवर्णनो नाम त्रयत्रिंशत्तमोधिकार:।।३३।। इति श्री पद्मपुराणग्रन्थसमाप्तम्।। शुभं भूयात्। कल्याणमस्तु।। संवत् १७८० वैशाखे।। आत्मार्थे स्तु।। पुस्तक पद्मपुराण की भट्टारकजी श्री नरेन्द्रभूषणजी कौं सुंनामलनैं चढाई ... करै सोकु ... संवत् १८४९ आश्वनि शु.११''

अनेन प्रकारेण प्राप्तपाण्डुलिपिषु श्लोकसङ्ख्याऽपि भिन्ना भिन्ना लिखिता। यथा 'क' प्रतौ ७३०० 'ख' प्रतौ ७००० 'ग' प्रतौ ७९०० श्लोकसङ्ख्या लिखिता। परन्तु पाण्डुलिपित्रयाणां सम्पादने यथार्थत: श्लोका: ७०५३ एव प्राप्यन्ते। हस्तलिखितमिदं पुराणं कुतश्चिदस्पष्टं स्पष्टञ्चेति। पौन: पुन्येन पठित्वाऽस्य वैशिष्ट्येनाहं प्रभाविताऽभवम्। पाण्डुलिप्यां पुराणमिदं पद्यमयं किन्तु

गद्यरीत्या एव लिखितमिदं प्राप्यते। श्लोकपूर्णे सति पूर्णविरामादिव्यवस्था सुव्यवस्थितरूपेण विलोक्यते। पुराणलेखने च यत्र तत्र लिपिकारभ्रान्त्या काश्चित् त्रुटय: कुतश्चिच्च पपाठा: पाठभेदा: वा जाता:। रामपुराणमिदं त्रयस्त्रिंशदधिकारेषु विभक्तम्। पद्मपुराणमवलम्ब्य लिखितमिदं रामपुराणे प्रामुख्येन रामस्य जीवनचरितं वर्णितम्।

पाठालोचनस्य प्रक्रिया: प्रविधयश्च

पाण्डुलिपीनां प्रामाणिकसम्पादनकर्मणि पाठसंशोधनस्य कार्यं अतीवमहत्वपूर्णं भवति। समेणैव च साध्यमिदं ज्ञेयम्। अत्र पाठनिर्धारणस्य प्रयोजनं प्राचीनोलब्धप्रतीनां विविधपाठेषु पाठमेकं स्वीकृत्य तदितरेषां च पाठान्तरं मत्वा पाठनिर्णय एव नास्ति किन्तु पाठनिर्धारणे सूक्ष्मेक्षिकया विचारसरिण्या विविधदृष्टिपूर्वकं पाठसंशोधनं कृत्वा पाठनिर्णयमाश्वयकं भवति। मया निम्नप्रकारेण प्रविधिं शोधप्रविधिमङ्गीकृत्य पाठसम्पादनं विहितम्। तस्य किञ्चिदेव उल्लेखः विधीयते

I. मूलपाठ:

पाठानुसन्धाने पाठालोचना एका विशिष्टा विधिरस्ति। पाठालोचनस्य प्रथमसोपानं मूलपाठोऽस्ति। पाण्डुलिपिसम्पादने मूलपाठचयनस्य महत्वपूर्णं स्थानमस्ति। लेखकेन विरचिता कृति: एव मूलपाठो भवति। यतो हि तत्पाण्डुलिपि: अत्यधिकं महत्वपूर्णं भवति। मूलपाठ: अत्यधिकोपयोगी भवति अत एव सोऽस्माभिर्संरक्षणीय:। मूलपाठस्योपयोग: निम्नलिखिताधारेणावगन्तुं शक्येत

(क) मूलपाठेन लेखकस्य लिप्या: लेखनशैल्याश्च ज्ञानं भवति येन तत्कालीन-वर्णलेखनाभ्यासस्य ज्ञानं भवति।

(ख) लेखकस्य वर्तिन्या: ज्ञानं भवति।

(ग) पाठालोचनविज्ञानस्य ध्येयं मूलपाठस्यान्वेषणं भवति येन ग्रन्थसङ्कटने सम्पादने आदर्शस्वरूप: प्रस्तोतुं शक्यते।

(घ) मूलपाठेन लेखकस्य पदप्रयोगक्षमताया: ज्ञानं भवति।

(ङ) मूलपाठेन अन्योपलब्धपाठानां मेलनेन पाठान्तराणां पाठभेदेषु वर्तिन्या: लिप्या: शब्दार्थानाञ्च विविधरूपाणां ज्ञानं भवति।

(च) मूलपाठस्य सामग्र्या: अर्थात् पृष्ठपृष्ठाङ्कनमसिलिपिलेखनचित्रहाशियाआकारे-त्यादिविविधैतिहासिकतथ्यानामुद्घाटनं भवति।

II. लिपिकारस्य लिपि:

लिपिविकासक्रमे नागरीलिप्योद्भव अष्टमी-नवमीदेशीयाशताब्द्यां ब्राह्मीलिप्याऽभवत्।

नवमीदेशीयाशताब्द्याः पूर्वार्द्धे यत्र दक्षिणभारते ग्रन्थलिप्याः नंदीनागरीलिप्योद्भवो जातः। अपरे च उत्तरभारते कुटिलशारदालिपिभ्याञ्च नागरीलिप्योदयो जातः।[1]

नागरीलिपिः विविधनामभिः ज्ञायते यथा नागरी, प्राचीननागरी, देवनागरी, प्राचीनदेवनागरी, जैनदेवनागरीत्यादि नागरीलिप्याः समकालीनमेव जैनदेवनागरीलिपिः। द्वयोः लिप्योः अक्षरेषु अधिकांशतः साम्यमेव।

जैनदेवनागरीलिपिः

विक्रमसंवत्सरस्थ नवमी शताब्द्याः उत्तरार्द्धे गुजरातप्रदेशस्य वल्लभीपुरे देवर्द्धिगणि क्षमाश्रमणस्य नेतृत्वे वल्लभी वाचनाऽभवत्। यस्यां समस्तजैनागमसाहित्यं देवनागरीलिप्यां निबद्धकरणस्य निर्णयं जातम्। प्राकृतभाषासम्मतलिपिचिह्नान् विशिष्टसंयुक्ताक्षराञ्च समायुज्य जैनग्रन्थाः लिपिबद्धाः जाताः ततएव नागरीलिपि जैनदेवनागरी इति नाम्ना प्रसिद्धा।

द्वादशशताब्द्यां यदा नवाङ्गीटीकाकाराय अभयदेवसूरये पूर्वनिबद्धप्राचीनादर्शलिपीनां पठने क्लिष्टता जाता। यतो हि भिन्नभिन्नप्रतिषु भिन्नाः भिन्नाः अक्षराः प्राप्ता अभवन्। तदा अभयदेवसूरिणा एका अक्षरपाटिका निर्मिता या विंशतिशताब्दीपर्यन्तं समानरूपेण प्रचलिता। अस्माकं रामपुराणस्य पाण्डुलिपयोऽपि देवनागरीलिप्याधारिता एव सन्ति। अतः प्रतित्रयेषु बहवः अक्षराः देवनागरीलिप्याधारितयैव मया प्राप्यन्ते। किञ्चिदिवात्र प्रस्तूयन्ते यथा

	प्राचीनपाठः		**आधुनिकपाठः**
१)	व्याघुट्या	(१७/४)	व्याघुट्य
२)	इत्युत्का	(२०/९९)	इत्युक्त्वा
३)	मुत्का	(२०/९९)	मुक्त्वा
४)	तिर्यत्त्कं/तीर्यत्त्कं	(२६/७२)	तिर्यक्त्वं
५)	सुषिनी	(२०/४०)	सुखिनी
६)	षेचर्य	(२१/८२)	खेचर्यः
७)	आषंमलं	(१/१६८)	आखण्डलम्
८)	पीमति	(२०/५०)	पीडति
९)	प्रभामंमल	(२३/७०)	प्रभामण्डल

---

१. नागरीलिप्याः प्राचीनतमो रूपः कन्नौजनगरस्य प्रतिहारवंशी राज्ञः महेन्द्रपालप्रथमस्य (विक्रम संवत् ११४ ई.) दानपत्रे प्राप्यते।

१०)	प्रेष्य	(२०/१०२)	प्रेक्ष्य
११)	पूर्वस्बानं	(२३/१९७)	पूर्वस्थानं
१२)	वंशस्बले	(२३/१९५)	वंशस्थले
१३)	वाष्पोष्ल	(३१/९)	वाष्पोष्ण
१४)	कृष्ल/कृघ्म	(१/५७)	कृष्ण
१५)	मूर्बां	(४/१५६)	मूर्छां
१६)	गघ्रे/गल्हे	(९/४१)	गल्ले
१७)	एतल्त्रग्नात्	(९/१४८)	एतल्लग्नात्
१८)	कघ्राण	(१०/३५)	कल्याण
१९)	ततोन्नजयशब्दश्च	(३/१३७)	तत्रोत्थजयशब्दश्च
२०)	सम्पृच्छ्रा	(२७/१०१)	सम्पृछ्य
२१)	पश्रुः	(४/८०)	पशुः
२२)	तामाश्रु	(७/१८)	तामाशु
२३)	आश्रु	(१/१०१)	आशु

अनेन प्रकारेण देवनागरीलिप्यानुसारेण 'ख' स्थाने 'ष', 'क्ष' स्थाने 'ष', 'थ' स्थाने 'ब', 'ड' स्थाने 'म','ल' स्थाने 'त्र', 'ण' स्थाने 'ल', 'य' स्थाने 'त्र', 'श' स्थाने 'श्र', 'ट्य' स्थाने 'ट्र', 'ल्य' स्थाने 'घ्र', 'ष्ण' स्थाने 'घ्म', 'त्थ' स्थाने 'न्न' इत्यादीनि बहूनि उदाहरणानि पाण्डुलिपिषु प्राप्यन्ते। मया आधुनिकपाठ एव मूलपाठे उद्धृतः।

(क) पाण्डुलिपिषु अज्ञानवशात् प्राप्तविविधता:

प्रतिलिपिकारः मूलपाठमनुकुर्वन् स्वलेखनपद्धत्या पुनः लिखति। बहुधा एकेनैव लिपिकेन विविधाः प्रतयः लिख्यन्ते तथापि तेष्वपि भिन्नताः सम्भाव्यन्ते। पूर्वकाले यदा मुद्रणालयाः नासन् तदा ग्रन्थाः लिपिकेन लेखापयित्वैव पठनहेतुः पाठकेभ्यः उपलब्धाः भवन्ति स्म। अस्य परिणामो भवति स्म यदज्ञानवशात् पाठे अशुद्धयः जायन्ते स्म। यथा कस्यचित् सुलेखः अस्पष्टो भवति स्म। कोऽपि ग्रन्थविषयेनऽपरिचितत्वात् अशुद्धतां करोति स्म। कस्यचिच्च शब्दकोषज्ञानं न्यूनायते स्म। अज्ञानतयाऽपि पाण्डुलिपिलेखने अनेके विकाराः उत्पद्यन्ते स्म, येषु प्रधानविकारः शब्दसम्बन्धी एव भवति स्म। कतिचिदुदाहरणानि प्रस्तूयन्ते यथा

	अशुद्धपाठः		शुद्धपाठः
१)	शीता	(१४/२०२)	सीता
२)	सूकरतां	(३१/१७९)	शूकरतां

३)	शुभग	(३१/१९६)	सुभग
४)	स्वभ्रं	(२६/६५)	श्वभ्रं
५)	सान्तरस	(२७/१४३)	शान्तरस
६)	सालवन	(२७/१९५)	शालवन
७)	शक्रेन	(१/१९३)	शक्रेण
८)	क्वनितं	(२२/७७)	क्वणितं
९)	लवेन	(३०/१५३)	लवेण
१०)	शत्रुना	(३/३)	शत्रुणा
११)	वाणमेघै	(२०/८०)	बाणमेघै
१२)	वहुष्वतीतेषु	(३/१७४)	बहुष्वतीतेषु
१३)	बाजि	(२०/८२)	वाजि
१४)	बिज्ञाय	(२५/१३)	विज्ञाय
१५)	बार्ता	(२५/१३)	वार्ता
१६)	सेषं	(२५/१३)	शेषं

अनेन प्रकारेण 'श' स्थाने 'स', 'स' स्थाने 'श', 'ब' स्थाने 'व', 'व' स्थाने 'ब', 'न' स्थाने 'ण', 'ण' स्थाने 'न' च लिखितमस्ति। मया शुद्धपाठमात्रं मूलपाठे उद्धृतम्।

(ख) पाण्डुलिपिषु प्रमादवशात् प्राप्तविविधता:

लेखकेन यत् श्लोको विरचित: तदेव लिपिकेन प्रतिलिपिकेन वा प्रतिलिप्यामनुरूपित:। तथापि प्रमादवशात् लेखनकार्ये श्लोकानां रचनाया: स्वरूपोऽशुद्धो भवति। कुत्रचित् पाठेषु श्लोकपुनरावृत्त: पङ्क्तिपुनरावृति: च प्राप्यते। वर्णलोप: पदलोप: पङ्क्तिलोप: श्लोकलोपोऽपि प्राप्यते। येन श्लोकसंरचना विघटते अर्थावगमने क्लिष्टता च भवति।

रामपुराणे लेखकेन अनुष्टुप्छन्दस: प्रयोग: कृत:। अनुष्टुप्छन्दस: लक्षणं भवति –

श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययो:।।[१]

१. वृहद् अनुवाद चंद्रिका : चक्रधर नौटियाल हंस शास्त्री, मोतीलाल बनारसीदास प्रकाशन मुम्बई, सं. २००३ पृष्ठ ५७४

यथा –

वन्देऽहं सुव्रतं देवं पञ्चकल्याणनायकम्।
देवदेवादिभिः सेव्यं भव्यवृन्दसुखप्रदम्।।१/१।।

एवं प्रकारेण अनुष्टप्छन्दसि चत्वारि चरणानि भवन्ति। रामपुराणे यत्र कुत्रापि षट्पादानां द्विपादयोश्च श्लोकाः मिलन्ति। अनेन कारेणन श्लोकानां क्रमभङ्गोऽपि जाता।

१. षट्पादश्लोकानां क्रमभङ्गश्लोकानाञ्च कतिचिदुदाहरणानि यथा –

१. क प्रतौ –

इत्युक्ते सत्परं हर्षं संप्राप्ता सदनङ्गता।
शुभे दिने ततश्च्युत्वा त्रिज्ञानधनसंयुतः।।
गर्भे देवि समुत्पन्ने दर्प्पणे प्रतिबिम्बवत्।।१/१७९।।
देवदेवादिभिस्तत्र कल्याणं गर्भकं कृतम्।
देवीभिः शतसङ्ख्यातैर्मरुदेवी च सेविताः।।१/180।।

ख प्रतौ –

देवीभिः शतसङ्ख्यातैर्मरुदेवी च सेविताः।।१/181।।

ग प्रतौ –

मुखं ते प्रविशन्तं हि वृषभं पश्य ते फलम्।
सर्वार्थसिद्धितश्च्युत्वा गर्भे तेवतरिष्यति।।
इत्युक्ते सत्परं हर्षं संप्राप्ता सदनंगता।

उपर्युक्ताः तिस्रः पङ्क्तयः अनुपलब्धाः सन्ति।

शुभे दिने ततश्च्युत्वा त्रिज्ञानधनसंयुतः।
गर्भे देवि समुत्पन्ने दर्प्पणे प्रतिबिम्बवत्।।१/177।।
देवदेवादिभिस्तत्र कल्याणं गर्भकं कृतम्।
देवीभिः शतसङ्ख्यातैर्मरुदेवी च सेविताः।।१/178।।

यथा पूर्वोल्लिखितः यदनुष्टुप्छन्दसि चत्वारि चरणानि भवन्ति। अस्मिन् परिप्रेक्ष्ये वयं पश्यामः एतस्याः समस्यायाः कारणम् –

लिपिकारः प्रमादवशात् चतुर्णां चरणानन्तरं श्लोकसंङ्ख्या न लिखितवान्। यावत् तेन ज्ञातः तावत् अग्रिमपङ्क्तिरपि लिखितासीत्। अतः तेन षट्पादानन्तरमेव श्लोकसङ्ख्या लिखिता। अस्मात् कारणात् अग्रिमश्लोके चरणद्वयमेवावशिष्टं अतः तेन तत्रैव श्लोकसङ्ख्या लिखिता। अनेन

प्रकारेण श्लोकेषु क्रमभङ्गः जात इति ज्ञायते।

अत्र यथावत् श्लोकक्रमाङ्काः एतादृशाः सन्ति –

इत्युक्ते सत्परं हर्षं सम्प्राप्ता सदनङ्गता।
शुभे दिने ततश्च्युत्वा त्रिज्ञानधनसंयुतः ।।१/१७९ ।।

गर्भे देवि समुत्पन्ने दर्प्पणे प्रतिबिम्बवत्।
देवदेवादिभिस्तत्र कल्याणं गर्भकं कृतम् ।।१/180 ।।

देवीभिः शतसङ्ख्यातैर्मरुदेवी च सेविताः।
निश्चकामस्ततो गर्भात्पूर्णे काले जिनोत्तमः ।।१/181 ।।

अपरञ्च क, ख प्रतौ षट्पादानां श्लोकाः प्राप्यन्ते।

पत्नी प्रह्लादपुत्रस्य पवनस्य मनोहरी।
पूर्वकर्मानुभावेन त्यक्ता भर्त्ता बहूदिनात्।
कृत्वा गर्भं दशास्यस्य दण्डं गतोऽनिलो यदा ।।9/128।।

'द्वाविंशति गते वर्षे तस्यां प्रीतिसमुत्सुकः।' इति पङ्क्तेः लोपत्वात् श्लोकक्रमाङ्कानां विघटनमभवत्। अत्र यथावत् श्लोकक्रमाङ्काः एतादृशाः सन्ति –

पत्नी प्रह्लादपुत्रस्य पवनस्य मनोहरी।
पूर्वकर्माऽनुभावेन त्यक्ता भर्त्ता बहूदिनात् ।।9/128 ।।

कृत्वा गर्भं दशास्यस्य दण्डं गतोऽनिलो यदा ।
द्वाविंशति गते वर्षे तस्यां प्रीतिसमुत्सुकः ।।9/129 ।।

२. अन्यच्च पाण्डुलिपिषु बहवः श्लोका अनुपलब्धाः सन्ति। कतिचिदुदाहरणानि यथा–

१. क प्रतौ एते श्लोका अनुपलब्धाः सन्ति –

कृतानुगमना सख्या छायायेवानुकूलया।
ऐत्पितुर्मन्दिरद्वारं सकृपं वीक्षिता जनैः ।।9/18 ।।

हा प्रह्लाद! वने मुक्ता मां त्वं कथं गृहे सुखी।
हा हा केतुमती देवि! करोषि न कृपां कथं ।।9/44।।

क्वचिद्गेहाः क्वचिद्स्तम्भाः वाद्यं नाटयश्च पर्वताः।
क्वचिद्वाप्यः क्वचिच्छालाः शोभन्ते तत्र कानने ।।12/85।।

अगालितं जलं तक्रं दधिकां जिह्वयहोषितम्।
सन्धानकञ्च विद्वान्नं अविज्ञातं फलं त्यजेत्।।12/126।।

युष्मद्धेतोः सुता तस्य वज्रजङ्घेन सा पृथोः।
याचिता स ददात्यत्र नातः कोपं समागतः।।30/45।।

२. ख प्रतौ एते श्लोका अनुपलब्धाः सन्ति –

सङ्घेन महता वृत्तस्तपसा कृशदेहिकः।
चतुर्ज्ञानैश्च सम्पूर्णो दयावान् क्षमयान्वितः।।15/139।।

ते दृष्ट्वा दुःखिते गाढमजस्त्रं साऽश्रुलोचने।
भरतस्य श्रियं मे ने भरतोसौ विषोपमम्।।16/99।।

उज्जयिनीपुरीस्वामी सिंहोदराभिधानकः।
तस्य सेवां सदा राजा करोति वज्रकर्णकः।।17/32।।

तमेव पादपं साऽपि प्राप्ता हंसवधूगतिः।
नतैव स्तनभारेण चन्द्रवक्रा तनूदरी।।18/27।।

किङ्कराणां यतः पत्न्यो वीराणामतिगर्विताः।
धिग्शब्दं मे प्रदास्यन्ति किन्तु कष्टमतः परम्।।23/95।।

३. ग प्रतौ एते श्लोका अनुपलब्धाः सन्ति –

यदा लङ्का ग्रहिष्यामि तदा मुकुटबन्धनम्।
करोमीति प्रतिज्ञां ते कृत्वा सनह्य निर्गताः।।4/195।।

एकः प्राह वसुर्भूपः पापात्श्वभ्रं गमिष्यति।
प्राहान्यः पर्वतस्यापि पापात्श्वाभ्रीगतिर्भवेत्।।6/178।।

तं सामीप्यागतं दृष्ट्वा महेन्द्रः प्रोत्थितो मुदा।
तौ च परस्परं प्रीत्या समालिङ्गय च हर्षितो।।8/57।।

इति सञ्चिन्त्यमानेस्मिन् चोत्पातास्तत्र दुर्दिनाः।
सञ्जाता सद्गृहे तस्य मृत्युमूलप्रसूचकाः।।25/113।।

बाणवृष्टाङ्कुशेनासौ छादितो रणवेदिना।
सप्तवारां रथाच्चापि पतितस्तेन लक्ष्मणः।।30/168।।

३. एवमेव पाण्डुलिपिषु बहवः पङ्क्तय अनुपलब्धाः सन्ति। कतिचिदुदाहरणानि यथा –

१. क/ख प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

शुभे दिने ततश्च्युत्वा त्रिज्ञानधनसंयुतः ।।1/179।।

ग प्रतौ पूर्णश्लोकः एतादृशः प्राप्यते –

इत्युक्ते सत्परं हर्षं संप्राप्ता सदनंगता।
शुभे दिने ततश्च्युत्वा त्रिज्ञानधनसंयुतः ।।1/179।।

२. क/ख प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

द्वाविंशति गते वर्षे तस्यां प्रीतिसमुत्सुकः।

ग प्रतौ पूर्णश्लोकः एतादृशः प्राप्यते –

द्वाविंशति गते वर्षे तस्यां प्रीतिसमुत्सुकः।
कृत्वा गर्भं दशास्यस्य दण्डं गतोऽनिलो यदा ।।9/129।।

३. ख प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

कम्पितानि भयादेव सिंहासनानि पूर्ववत् ।।11/26।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

मुकुटानि च देवानां नमितानि स्वयं सदा।
कम्पितानि भयादेव सिंहासनानि पूर्ववत् ।।11/26।।

४. ख प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

पञ्चाश्चर्यञ्च देवानां लोके जातं मनोहरम्।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

पञ्चाश्चर्यञ्च देवानां लोके जातं मनोहरम्।
देवैः स्वावधिना ज्ञातो जिनजन्मसमुद्भवः ।।11/27।।

५. ख प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

अपूर्वकरणे स्थित्वानिवृत्तिकरणोभवत्।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

अपूर्वकरणे स्थित्वानिवृत्तिकरणोभवत्।
तत्राद्य शुक्लध्यानं धृत्वा जिनः प्रघातयत् ।।12/55।।

६. ग प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

उत्तराशां बलाज्जित्वा नघुषोप्यागतः पुरम् ।।13/71।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

तान्सर्वांश्च वशीकृत्वा स्वपुरं सा समागता।
उत्तराशां बलाज्जित्वा नघुषोप्यागतः पुरम् ।।13/71।।

७. ग प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

सिंहकायास्ततः श्रुत्वा साहसं नघुषो नृपः।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

सिंहकायास्ततः श्रुत्वा साहसं नघुषो नृपः।
असतीयमिति ज्ञात्वा त्यक्त्वान् दूरदर्शनाम् ।।13/72।।

८. ग प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

वह्निनामनृपाज्जातौ चाश्विन्याः कुक्षिसम्भवौ ।।23/117।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

विजयार्द्धे ततश्च्युत्वारिञ्जयनगरे च तौ।
वह्निनामनृपाज्जातौ चाश्विन्याः कुक्षिसम्भवौ ।।23/117।।

९. ग प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

पुनरङ्कुशवीरेण समं युद्धति लक्ष्मणः ।।30/167।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

विराधितेन व्याघुट्य रथो नीतो रणं प्रति।
पुनरङ्कुशवीरेण समं युद्धति लक्ष्मणः ।।30/167।।

१०. ग प्रतौ एषा पङ्क्तिरनुपलब्धास्ति –

ततस्तीव्रप्रकोपेन लक्ष्मणेनाङ्कुशं प्रति।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

ततस्तीव्रप्रकोपेन लक्ष्मणेनाङ्कुशं प्रति।
प्रेरितं चक्ररत्नं तं परीत्य पुनरागतम् ।।169।।

४. एवमेव पाण्डुलिपिषु प्राप्तपङ्क्तिष्वपि कुत्रचिद् पदानां लोपाः सन्ति। कतिचिदुदाहरणानि यथा –

१. क प्रतौ 'न' इति पदलोपे सति प्राप्ता पङ्क्तिः –

तां मोचितुं हि शक्तौ कुम्भकर्णविभीषणौ।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

तां मोचितुं हि शक्तौ **न** कुम्भकर्णविभीषणौ।
दशास्य आगतस्तावच्छ्रुतवान् पूर्वजां कथाम्।।6/9।।

२. क प्रतौ 'कुर्वन्' इति पदलोपे सति प्राप्ता पङ्क्तिः –

पक्षमासोपवासादीन् स मधुपिङ्गलः।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

पक्षमासोपवासादीन् **कुर्वन्** स मधुपिङ्गलः।
चम्पापुरं समायातो बहिरुद्यानसंस्थितः।।6/163।।

३. क प्रतौ 'च' इति पदलोपे सति प्राप्ता पङ्क्तिः –

ऋग्वेदं ततो श्यामं यजुर्वेदं तथा परम्।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

ऋग्वेद**ञ्च** ततो श्यामं यजुर्वेदं तथा परम्।
महाकालस्य दैत्यस्य मुखात्सर्वं प्रकल्पितम्।।6/245।।

४. क प्रतौ 'मां' इति पदलोपे सति प्राप्ता पङ्क्तिः –

स्पर्शितुं न योग्यस्त्वं पापाचारी दुरात्मकः।।21/9।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

धिग् धिग् क्व तव साम्राज्यं धिग् लक्ष्मी तव पापिनी।
मां स्पर्शितुं न योग्यस्त्वं पापाचारी दुरात्मकः।।21/9।।

५. ख प्रतौ 'पश्य' इति पदलोपे सति प्राप्ता पङ्क्तिः –

युष्मत् पुत्रस्य यं सर्वभ्रान्तिविनाशकः।।9/4।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

दर्शितश्च तदा तस्यै वलयो जनया मुदा।
युष्मत्पुत्रस्य **पश्या**ऽयं सर्वभ्रान्तिविनाशकः।।9/4।।

६. ख प्रतौ 'कला' इति पदलोपे सति प्राप्ता पङ्क्तिः –

ततस्तेन हृता बाला विज्ञानभूषिता।।14/103।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

पूर्वजन्मयोः प्रीत्या सङ्गोत्राप्यभवत्परः।
ततस्तेन हृता बाला **कला**विज्ञानभूषिता।।14/103।।

७. ख प्रतौ 'गच्छता' इति पदलोपे सति प्राप्ता पङ्क्तिः -

अश्वारूढेन तेनाऽथ तृणसद्मनि।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते -

अश्वारूढेन तेनाऽथ **गच्छता** तृणसद्मनि।
स्थिता चित्तोत्सवा दृष्ट्वा ततः कामेन पीडितः ।।14/109।।

८. ख प्रतौ 'पवनः' इति पदलोपे सति प्राप्ता पङ्क्तिः -

प्रभूत तेजस्वी पवनोऽथ प्रतापवान् ।।2/3।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते -

अमृतोऽतः सुभद्रोथ भद्रसूर्यस्तथाशशी।
प्रभूत तेजस्वी **पवनः** पवनोथ प्रतापवान् ।।2/3।।

५. एवमेव पाण्डुलिपिषु श्लोकपुनरावृत्तयः सन्ति। कतिचिदुदाहरणानि यथा–

१. ख प्रतौ श्लोकपुनरावृत्तिः प्राप्यते -

ततो मुक्तिशिला ज्ञेया चन्द्रमण्डलसन्निभा।
तत्र तिष्ठन्ति सिद्धाश्च जरामृत्युविवर्जिताः ।।31/150।।

२. ग प्रतौ त्रयश्लोकानन्तरं पुनश्च प्राप्यते -

रावणोऽथातिकोपेन वरुणं प्रतिनिर्गतः।
विद्याधरान् समानेतुं दूताः सम्प्रेषितास्तदा ।।9/229।।

३. ग प्रतौ एषः श्लोकः प्राप्यते -

कण्ठेस्य कुरु मालां त्वं यद्यस्ति तव चेतसि।
तत्र तां विमुखां ज्ञात्वा वरमन्यं निदर्शयत् ।।4/128।।

एतदेव श्लोकः एकश्लोकाग्रे पुनश्च लिखितः-

कण्ठेस्य कुरु मालां त्वं यद्यस्ति तव चेतसि।
तत्र तां विमुखं गत्वा मग्रे चलति कन्यकाम् ।।4/130।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते -

कण्ठेस्य कुरु मालां त्वं यद्यस्ति तव चेतसि।
तत्र तां विमुखां ज्ञात्वा वरमन्यं निदर्शयत् ।।4/129।।

४. ग प्रतौ एतौ श्लोकौ प्राप्येते –

एवं कलकलां कृत्वा देवानः भस् संस्थिताः।
गृहस्थान्नवभक्षका स्वेच्छया चेष्ट कुर्वति हनिष्यामस्तदा वयं।।227।।
एवं कलकलं कृत्वा देवानां भवसंस्थिताः।
तच्छ्रुत्वा भयमापन्ना मिथश्चक्रविचारणाम्।।1/228।।

तदन्यप्रत्योः पूर्णश्लोकौ एतादृशौ प्राप्येते –

यूयम् योगीश्वरा जाताः गृहस्थान् इव भक्षकाः।
स्वेच्छया चेष्टं कुर्वीत हनिष्यामस्तदा वयम्।।1/229।।
एवं कलकलां कृत्वा देवा नभसि संस्थिताः।
तच्छ्रुत्वा भयमापन्ना मिथश्चक्रविचारणाम्।।1/230।।

५. ग प्रतौ श्लोकपुनरावृत्तिः प्राप्यते –

ततो दूतेन गत्वा तत् रावणाय निवेदितम्।
प्रकोपेन ततः प्राह रावणो मूढमानसः।।24।।

६. एवमेव पाण्डुलिपिषु लिखितश्लोकेषु अतिरिक्तपदान्यपि प्राप्यन्ते –

१. क प्रतौ 'च' इति अतिरिक्तपदं प्राप्यते –

स्त्रीभिश्च मुञ्चितौ यातौ स्वस्वस्थानं **च** तदा च तौ।।4/104।।

तदन्यप्रत्योः पूर्णश्लोकः एतादृशः प्राप्यते –

परस्पराभिघातेन यष्टिमुष्टादिपीडितौ।
स्त्रीभिश्च मुञ्चितौ यातौ स्वस्वस्थानं तदा च तौ।।4/104।।

२. ग प्रतौ 'सेवाया' इति अतिरिक्तपदः प्राप्यते –

सङ्गं परनरस्यास्य महापापस्य कारणम्।
तस्मात् भज स्वभर्तारं **सेवाया** नलकूवरसञ्ज्ञकम्।।7/74।।

अन्यप्रतिषु पूर्णश्लोकः एतादृशः प्राप्यते –

सङ्गं परनरस्यास्य महापापस्य कारणम्।
तस्मात् भज स्वभर्तारं नलकूवरसञ्ज्ञकम्।।7/74।।

३. क प्रतौ नववर्णयुक्तो प्रथमपादः प्राप्यते –

सहस्रासप्तशतं त्रीणि वर्तन्ते भुवि विस्तरात्।
सोमसेनमिदं वक्ष्ये चिरञ्जीविरजीवितम्।।३३/२३५।।

४. ग प्रतौ नववर्णयुक्तो प्रथमपादः प्राप्यते –

पंचाणुव्रतशिक्षाव्रत चतुर्गुणव्रतत्रयम्।
एते द्वादशपर्यन्तश्रावक द्वितीयो मतः।।12/133।।

७. एवमेव पाण्डुलिपिषु लिखितश्लोकेषु अतिरिक्तपङ्क्तिः अपि प्राप्यते –

१. प्रतित्रयेषु अतिरिक्तपङ्क्तिः प्राप्यते –

क्षुधादिपीडितानां वा त्रायस्व शरणागतान्।
अकृष्टपच्यशस्येन भूमिः सर्वत्र शोभते।
पाकविधिमजानीताः प्रजाः दुःखेन पीडिताः।।1/198।।

२. ख प्रतौ नवमेऽधिकारे द्विचत्वारिंशत् पृष्ठक्रमाङ्के अतिरिक्तपङ्क्तिः प्राप्यते –

तदा सापि दुःखाक्रांता मार्गं गच्छति शनैर्शनैः।

८. पाण्डुलिपिषु लघु–गुरुमात्राणां त्रुटयोऽपि दृश्यन्ते। तद्यथा

	अशुद्धपाठः	**शुद्धपाठः**
१)	भग्नि (ग/१/४७)	भग्नी
२)	प्रभूर्विभु/प्रभुर्विभु (क,ख/२/५)	प्रभुर्विभू
३)	तदेव (ख/४/१५८)	तदैव
४)	प्रसादं (क,ख/९/१७९)	प्रासादं
५)	भगनीं (क/६/२५)	भगिनीं
६)	भगीरथ/भगिरथ (क,ख/३०/१३०)	भागीरथ

पाण्डुलिपिप्रतिषु मात्राप्रयोगेऽपि देवनागरीलिप्याः प्रभावो दृश्यते। कतिचिदुदाहरणानि प्रस्तूयन्ते यथा–

	प्राचीनपाठः	**आधुनिकपाठः**
१)	स्क्तिः (ख/३/१२३)	स्तुतिः
२)	श्र त्वा (ख/२२/३४५)	श्रुत्वा
३)	स्क्त (ख/३/१२३)	स्तु
४)	शृणु (ख/२१/२)	श्रुणु
५)	जलत्र ीडा (ग/३/१२२)	जलक्रीडा
६)	त्र व्यो (ग/३३/१२५)	क्रव्यो

७)	ध्र वं (ख/३२/१२५)	ध्रुवं
८)	दीर्क्ष (ख/३२/१)	दीक्षां
९)	र्ककुंद्या (ग/३२/१५)	काकुन्द्या
१०)	जयजर्यरावं (ख/१५/११०)	जयजयारावं

अनेन प्रकारेण मूलधातुरूपं प्रपश्य पाण्डुलिपिसम्पादनकार्ये अशुद्धपाठान् शुद्धं कृत्वा मूलपाठरूपेण शुद्धपाठोद्धृतोऽस्ति।

९. एवमेव परसवर्णसन्धेः प्रयोगोऽपि मया कृतः। 'अनुस्वारस्य ययि परस्वर्णः' इति सूत्रानुसारेण अनुस्वारस्य स्थाने परसवर्णस्य प्रयोगः मूलपाठतया कृतः। यथा –

१)	रत्नकं	(२/५०)	स्थाने	रत्नकम्
२)	संख्यानि	(१/२४२)	स्थाने	सङ्ख्यानि
३)	पल्यंकं	(२/८९)	स्थाने	पल्यङ्कम्
४)	भुंक्ते	(३/९६)	स्थाने	भुङ्क्ते
५)	भुंज्यते	(३/९७)	स्थाने	भुञ्ज्यते
६)	संचिंत्य	(५/५१)	स्थाने	सञ्चिन्त्य
७)	संजातं	(७/९१)	स्थाने	सञ्जातम्
८)	श्रृंगं	(२२/३९)	स्थाने	श्रृङ्गम्
९)	संतोष्य	(२२/१३७)	स्थाने	सन्तोष्य
१०)	लंकां	(२३/१३७)	स्थाने	लङ्कां
११)	नृत्यंते	(२४/१६७)	स्थाने	नृत्यन्ते
१२)	चांबिके	(२७/७२)	स्थाने	चाम्बिके
१३)	नैर्ग्रंथ्यं	(२८/९०)	स्थाने	नैर्ग्रन्थ्यम्
१४)	लवणांकुशौ	(३२/१२)	स्थाने	लवणाङ्कुशौ
१५)	मोहबंधनं	(३३/१२५)	स्थाने	मोहबन्धनम्

१०. एवमेव पाण्डुलिपिसम्पादनकार्ये मया पूर्वरूपसन्धिः अर्थात् 'एङ् पदान्तादति' वृत्यानुसारेण अवग्रहस्य प्रयोगः स्वीकृतः। यथा –

१)	नागोसौ (२/६८)	स्थाने	नागोऽसौ

२) स्वाभावोयं (१/१९)	स्थाने	स्वाभावोऽयं
३) कुर्कुटाख्येभवत्फणी (२/८५)	स्थाने	कुर्कुटाख्येऽभवत्फणी
४) लोकेस्ति (६/१६५)	स्थाने	लाकेऽस्ति
५) भूदाभ्यां (३/४१)	स्थाने	भूदाऽऽभ्यां
६) जातोहोधुना (३/१४४)	स्थाने	जातोऽहोऽधुना
७) पुरनार्योतिचंचला (३३/१३३)	स्थाने	पुरनार्योऽतिचञ्चला
८) कृष्णोयं (२८/३)	स्थाने	कृष्णोऽयम्
९) संज्ञेथ (२८/९)	स्थाने	सञ्ज्ञेऽथ
१०) विभीषणागमं (२३/५१)	स्थाने	विभीषणाऽऽगमम्
११) यदारभ्यो (५/३)	स्थाने	यदाऽऽरभ्यो
१२) ममासंख्येय (१७/४९)	स्थाने	ममाऽसङ्ख्येय
१३) वागालिते (१८/११९)	स्थाने	वाऽगालिते

अनेन प्रकारेण पाण्डुलिपि-सम्पादनकार्ये अवग्रहचिह्नानां प्रयोगः कृतः।

III. पाठालोचने शब्दार्थयोः महत्वम् –

डॉ. सत्येन्द्रानुसारेण पाठालोचनं यथार्थपाठनिर्धारणस्य प्रक्रियायां पाठ्यग्रन्थ-स्यैवाङ्गमस्ति। पाठालोचनं केवलं भाषाविज्ञानस्यैव विषयो नास्ति अपितु तस्य साहित्यिक-महत्वमप्यस्ति। अतएव पाठालोचनस्य सम्बन्धः शब्दार्थाभ्यां वर्तते। अनया दृष्ट्र्या सम्पादनस्य द्वयोः प्रक्रिययोः उपयोगो भवति –

- प्रथमं वैज्ञानिकसम्पादनम्
- द्वितीयं साहित्यिकसम्पादनञ्च

वैज्ञानिकसाहित्यिकसम्पादनप्रक्रिययोः मौलिकविभिन्नतां विनाऽपि अद्यतनीयवैज्ञानिक-सम्पादनं शब्दं प्रति अधिकं महत्वं ददाति साहित्यिकसम्पादनञ्च अर्थं प्रति अधिकं महत्वं ददाति। अस्मिन् सन्देहो नास्ति यत् शब्दस्य अर्थस्य च सत्त्वं परस्परं असम्प्रक्तं नास्ति। तथापि मूलतः अर्थस्य ग्रहणं विना प्राचीनकाव्यानां सम्पादनं निर्भ्रान्तं न भवति।[१] एतेभ्यः कारणेभ्यः शब्दार्थयोः द्वयोः महत्वं अस्माभिः स्वीक्रियते।

---

१. सामान्य पाण्डुलिपि विज्ञान, महावीरप्रसाद शर्मा, अपभ्रंश साहित्य अकादमी, श्री दगम्बर जैन अतिशय क्षेत्र, श्री महीवीरजी, २००३, पृ. १४७

IV. पाठालोचनस्य प्रणाल्यः –

पाठालोचनस्य तिस्रः[1] प्रणाल्यः सन्ति –

(क) स्वेच्छया पाठनिर्धारण–प्रणाली

(ख) तुलनात्मक–प्रणाली

(ग) वैज्ञानिक–प्रणाली

(क) स्वेच्छया पाठनिर्धारण–प्रणाली

इयं पाठालोचनस्य सामान्यप्रणाली अस्ति। पाण्डुलिप्याः सम्पादने या प्रतिः प्राप्ताऽभवत् तत्प्रत्याधारेण एव सम्पादनग्रन्थे स्वबुद्धया एव अशुद्धयः निष्कास्यन्ते। स्वबुद्धिप्रमाणेन स्वेच्छया पाठनिर्धारण–प्रणाली द्वारा ग्रन्थसम्पादनं भवति।

(ख) तुलनात्मक–प्रणाली

एषा प्रणाली तुलनात्मिका स्वेच्छया पाठनिर्धारण प्रणाली उच्यते। अनेन न्यूनतमप्रतिद्वयस्य तुलनात्मकमध्ययनं कृत्वा पाठभेदं प्राप्यते। तयोः अन्तःसाक्ष्याधारेण बहिःसाक्ष्याधारेण च मूलपाठस्य निर्णयं कर्तुं शक्यते। तात्पर्यमिदं यत्–

i) अन्तःसाक्ष्यदृष्ट्या अर्थात् सन्दर्भप्रसङ्गानुसारेण अर्थावबोधनीया

ii) बाह्यसाक्ष्यदृष्ट्या अर्थात् व्याकरणात्मकवैशिष्ट्येन भाषिकवैशिष्ट्येन च

यः पाठः शुद्धः समुचित उपयुक्तो वा ज्ञायते तदेव पाठं मूलपाठरूपेण स्वीक्रियते। अशुद्धपाठान्तराश्च पादटिप्पण्यां सूच्यन्ते।

द्वयधिकप्रतिलिपिषु ये विविधाः पाठान्तराः प्राप्ताः भवन्ति तेषु कविसापेक्षः श्रेष्ठतमो भावयुक्तो वा कः पाठो भवेदिति निश्चीयते अस्मिन्निर्णये काठिन्यं भवति। प्राप्तपाठान्तरेषु कोऽपि पाठान्तरः न्यूनो न प्रतिभासते तदा कमपि उत्कृष्टपाठं मूलपाठरूपेण लिखति।

(ग) वैज्ञानिक–प्रणाली

एतां प्रणालीं वैज्ञानिकचरणमपि उच्यते। अस्मिन् वैज्ञानिकचरणे प्राप्तविविधहस्तलेखानां प्रतिलिपीनां वा तुलना क्रियते। तुलनात्मकप्रक्रियायां प्रत्येकस्यां प्रत्यां प्राप्तत्रुटिषु साम्यं वैषम्यञ्च निरीक्ष्यते। त्रुटिसाम्य–वैषम्यनिरीक्षणाधारेण प्राप्तसमस्तहस्तलेखानां पाण्डुलिपीनां प्रतिलिपीनां च वंशवृक्षनिर्माणं क्रियते। वंशवृक्षाधारेण आदर्शमूलपाठस्य च निर्धारणं क्रियते।[2]

---

१. पाण्डुलिपि विज्ञान, सत्येन्द्र, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, प्रथम संस्करण १९७८, द्वितीय संस्करण १९८९, पृ. २२४–२२९ २. तदैव, पृ. २२५–२२६

मया उपर्युक्तासु पाठालोचनप्रणालीषु पाठसम्पादनाय प्रणालीद्वयोरुपयुक्ता।

i) स्वेच्छया पाठनिर्धारण–प्रणाली

ii) तुलनात्मक–प्रणाली

अस्मिन् शोधकार्ये रामपुराणग्रन्थस्य तिसृणां प्रतिलिपीनां शोधकार्यं पाठालोचनेन तुलनात्मकप्रणाल्या पाठनिर्धारणस्य प्रक्रियया कृतम्।

१. क प्रतौ लिखितश्लोक: –

नभः सञ्चारिणी कामदायिनी कामगामिनी।
दुर्निवारा जगत्कम्पा प्रज्ञप्तिर्भावरूपिणी।।5/100।।

नभः सञ्चारिणी काम अणिमा लघिमा क्षोभ्या।
संवाहिनी सुरध्वंसी कुमारी वधकारिणी।।5/101।।

ख/ग प्रतौ लिखितश्लोक: –

अणिमा लघिमा क्षोभ्या मनस्तम्भनकारिणी।
संवाहिनी सुरध्वंसी कुमारी वधकारिणी।।5/101।।

अत्र तुलनात्मकप्रणाल्यां अन्त:साक्ष्यदृष्ट्या नभ:सञ्चारिणीविद्याया: वर्णनं १०० श्लोकेक्रमाङ्के कृतम्। अत: १०१ श्लोकेक्रमाङ्के मनस्तम्भनकारिणी विद्याया: वर्णनमुचितं स्यात्। अतएव मनस्तम्भनकारिणी विद्यावाचक ख/ग प्रते: श्लोक: मूलपाठे लिखित: अन्यश्च क प्रते: शलोक: अन्तटिप्पण्यां लिखित:।

२. क प्रतौ लिखितश्लोक: –

शशीपूर्वो रजोवल्यां च्युत्वाऽभूत्कुलपुत्रक:।
कुलन्धरोऽपर: पुष्पभूतिपुत्र: पुरोधस:।।3/48।।

ख/ग प्रतौ लिखितश्लोक: –

शशीपूर्वो रजोवल्यां च्युत्वाऽभूत्कुलपुत्रक:।
कुलन्धरोपर पुत्रं भूतिपुष्प परोधस:।।3/48।।

अत्र तुलनात्मकप्रणाल्या अन्त:साक्ष्यदृष्ट्या प्रतित्रयेषु मेलयित्वा ख/ग प्रत्यो: श्लोक: मूलपाठे: उद्धृत:।

३. क प्रतौ लिखितश्लोक: –

षण्णवतिसहस्राणि नारीणां रूपसम्पदाम्।
चतुर्भिरधिकाशीति लक्षा गजास्तथावरा।।12/183।।

ख प्रतौ लिखितश्लोक: –

षण्णवतिसहस्राणि नारीणां रूपसम्पदाम्।
चतुर्भिरधिकाशीति गजा जातस्तथावरा: ।।12/183।।

ग प्रतौ लिखितश्लोक: –

षण्णवतिसहस्राणि नारीणां रूपसम्पदाम्।
चतुर्भिरधिकाशीति गजास्तथा रथावरा ।।12/183।।

अत्र तुलनात्मकप्रणाल्या अन्त:साक्ष्यदृष्ट्या चतुर्भिरधिकाशीति लक्षा गजास्तथा रथा: इतिमूलपाठे कृतम्। यतोहि अत्र नारायणस्य वैभवस्य चतुराशीति लक्षानां गजानां रथानां च वर्णनं कृतम्।

अथानन्तरं आवश्यकतानुसारेण अर्थावबोधदृष्ट्यैव कुत्रचित् स्वेच्छया पाठनिर्धारणप्रणाली अपि उपयुक्ता।

१. क प्रतौ लिखितश्लोक:

गोमयंत्रीण्यमत्राणि भक्षणीयं न चेत्तु वा।
सर्वस्य ग्रहणं वास्य वा मल्लमुष्टिकात्रयम्।।2/66।।

ख प्रतौ लिखितश्लोक:

गोयंत्रीण्यमत्राणि भक्षणीयं न चेत्तु वा।
सर्वस्य ग्रहणं वास्य वा मल्लमुष्टिकात्रयम्।।2/66।।

ग प्रतौ लिखितश्लोक:

गोमयत्रीण्यमत्राणि भक्षणीयं न चेत्तु वा।
सर्वस्य ग्रहणं वास्य वा मल्लमुष्टिकात्रयम्।।2/66।।

अत्र प्रतित्रयेषु लिखितश्लोकेषु अर्थसाम्याभावात् स्वेच्छया पाठनिर्धारणप्रणाल्या एतादृश: श्लोक: मूलपाठे लिखित: –

गोमयत्रीण्यश्नातु स भक्षणीयं न चेत्तु वा।
सर्वस्य ग्रहणं वाऽस्य वा मल्लमुष्टिकात्रयम्।।2/66।।

प्रतित्रयेषु च लिखितश्लोका: अधिकारान्तटिप्पण्यां सूचिता:।

२. क/ख प्रतौ लिखितश्लोकः –

प्राप्ता क्रमेण **व्यंधाद्रौ** सुर्नदी नर्मदातटम्।
सन्ध्यायाः समये तत्र स्थापितं बलमुत्तमम्।।6/99।।

ग प्रतौ लिखितश्लोकः –

प्राप्ता क्रमेण **वंध्याद्रौ** सुर्नदी नर्मदातटम्।
सन्ध्यायाः समये तत्र स्थापितं बलमुत्तमम्।।6/99।।

अत्र विन्ध्याचलप्रदेशस्य वार्ताप्रसङ्गात् मूलपाठे विन्ध्याद्रौ इति पाठः स्यात्। अतः प्रतित्रयेषु लिखितपदान् अन्तटिप्पण्यां लिखितवती मूलपाठे च एतादृशः श्लोकः स्वीकृतो मया–

प्राप्ता क्रमेण **विन्ध्याद्रौ** सुर्नदी नर्मदातटम्।
सन्ध्यायाः समये तत्र स्थापितं बलमुत्तमम्।।6/99।।

३. प्रतित्रयेषु लिखितश्लोकेषु सर्वत्र **श्रवणत्वं** इत्येवमुल्लिखितम्। कतिचिदुदाहरणानि यथा –

अन्यदाऽथ विबुद्ध्यात्मा **श्रवणत्वं** समाश्रितः।
ईशानकल्पे चेन्द्रत्वं सुमित्रः प्राप्तवान् सुखी।।७/३४।।

परमं दुःखितः सोऽपि धनदत्तोध्वखेदितः।
अन्यदास्तं गते भानौ **श्रवणा**श्रममाश्रितः।।३१/१८२।।

अथ भोगादिनिर्विण्णः कदाचिद्रतिवर्द्धनः।
श्रवणत्वं तव तस्य भानोरन्तिकमग्रहीत्।।३२/४१।।

अत्र **श्रवणत्वं** पदस्थाने **श्रमणत्वं** इति पाठः स्यात्। अन्तःसाक्ष्यदृष्ट्या 'साधु' इत्यर्थे श्रमणत्वं इत्येवमुचितम्। अतएव मूलपाठे श्रमणत्वं पाठः स्वीकृतः –

अन्यदाऽथ विबुद्ध्यात्मा **श्रमणत्वं** समाश्रितः।
ईशानकल्पे चेन्द्रत्वं सुमित्रः प्राप्तवान् सुखी।।७/३४।।

परमं दुःखितः सोऽपि धनदत्तोऽध्वखेदितः।
अन्यदाऽस्तं गते भानौ **श्रमणा**ऽऽश्रममाश्रितः।।३१/१८२।।

अथ भोगादिनिर्विण्णः कदाचिद्रतिवर्द्धनः।
श्रमणत्वं तव तस्य भानोरन्तिकमग्रहीत्।।३२/४१।।

४. क प्रतौ लिखितश्लोक: -

तात मे लक्षणं शक्तेस्त्वयों धनचये ननु।
जगद्दाहे स्फुलिंगस्य किं वा वीर्यं परीक्षते।।८/१६२।।

ख प्रतौ लिखितश्लोक: -

तात मे लक्षणं शक्तेस्त्वयें धनचये ननु।
जगद्दाहे स्फुलिंगस्य किं वा वीर्यं परीक्षते।।८/१६२।।

ग प्रतौ लिखितश्लोक: -

तात मे लक्षणं शक्तेस्त्वया ननु।
जगद्दहे स्फुलिंगस्य किं वा शक्तिं किं वा वीर्यं परीक्षते।।८/१६२।।

अत: प्रतित्रयेषु लिखितश्लोकेषु अर्थावगमनं न भवति। अत: पद्मपुराणग्रन्थाधारेण श्लोक: लिखित:-

तात मे लक्षणं शक्तेस्त्वयैव जननं ननु।
जगद्दाहे स्फुलिङ्गस्य किं वा वीर्यं परीक्षते।।८/१६२।।

५. प्रतित्रयेषु सर्वत्र एतादृशौ लिखितश्लोकौ स्त:

केकामतिः सुमित्रा चाऽपराजिता मुदङ्गताः।
न दत्तं वृद्धकञ्चुक्या **सुप्रजायै** तदा तु सा।।१५/१२१।।
शान्तिजलं ततो दत्वा सन्तोषिता नृपेण सा।
विविधैर्विनयैर्वाक्यै: **सुप्रजा** प्राणवल्लभा।।१५/१२६।।

अत्र प्रतित्रयेषु सुप्रजा नामोल्लिखित: किन्तु पद्मपुराणोत्तरपुराणादिष्वपि दशरथस्य पत्नी शत्रुघ्नस्य च माता सुप्रभा नाम्ना प्रसिद्धा। अतएव मूलपाठे सुप्रभा नाम स्वीकृत:

केकामतिः सुमित्रा चाऽपराजिता मुदङ्गताः।
न दत्तं वृद्धकञ्चुक्या **सुप्रभायै** तदा तु सा।।१५/१२१।।
शान्तिजलं ततो दत्वा सन्तोषिता नृपेण सा।
विविधैर्विनयैर्वाक्यै: **सुप्रभा** प्राणवल्लभा।।१५/१२६।।

एवमेव प्रतित्रयेषु बहव: विविधता: प्राप्यन्ते। तेषां स्वेच्छया पाठनिर्धारणप्रणाल्या: तुलनात्मकपाठनिर्धारणप्रणाल्या: च माध्यमेन अन्त:साक्ष्यदृष्ट्या बाह्यसाक्ष्यदृष्ट्या च संशोध्य मूलपाठो लिखित: अशुद्धपाठाश्च अन्तटिप्पण्यां सूचिता:।

V. पाठालोचन प्रक्रिया –

पाठालोचनप्रक्रियायां निम्नबिन्दवः ध्यातव्याः भवन्ति –

(क) पाण्डुलिपिः ग्रन्थ–संग्रहो वा

(ख) तुलनान्तर्गते सङ्केतप्रणाली

(क) पाण्डुलिपि संग्रहः –

पाठसम्पादनाय सर्वप्रथमं पाण्डुलिपिसंग्रहः आवश्यकः। पाण्डुलिपिसंग्रहणाय अनेकेषु ग्रन्थभण्डारेषु, पुस्तकालयेषु, मन्दिरेषु, मठेषु च गत्वा ग्रन्थसारणीपठनमावश्यकम्। यत्र स्वविषय–सम्बन्धिपाण्डुलिपयः भवन्ति तत्र स्वयं गत्वा अथवा पत्रव्यवहारेण अन्तर्जालपुटमाध्यमेन च तत्संग्रहणं करणीयम्। सूचना एकत्रीकरणानन्तरं तान् ग्रन्थान् पाण्डुलिपीन् च तत्तत् स्थानेभ्यः प्राप्तकरणं अपेक्षितमस्ति। कुतश्चित् मूलप्रतिः प्राप्स्यते कुतश्चिच्च छायाप्रतिः। अथवा कुतश्चित् प्रतिलिपिकतृनिर्मिता प्रतिलिपिः अथवा माईक्रोफिल्म इत्येषां ग्रहणं अपि कर्तुं शक्यते। येन केन प्रकारेण तेषां सङ्ग्रहणं अत्यावश्यकम्।

मम शोधकार्यमपि पाण्डुलिपिसम्पादनपरकमस्ति। अतः सर्वप्रथमं मया पाण्डुलिपीनां संग्रहणं कृतम्। रामपुराणस्य पाठसम्पादनार्थं तिस्रः प्रतिलिपयः मया प्राप्ता अभवन्। रामपुराणस्य प्रथमा पाण्डुलिपिः मध्यप्रदेशे बीनानगरस्थित–श्री अनेकान्तज्ञानमन्दिरात् प्राप्ताऽभवत्। द्वितीया पाण्डुलिपिः उत्तरप्रदेशे वाराणसीनगरस्थित–स्याद्वादमहाविद्यालयात् प्राप्ताऽभवत्। तृतीया पाण्डुलिपिः श्रीसोनागिरजैनमन्दिरात् प्राप्ताऽभवत्। एताः सर्वाः प्रतिलिपयः अर्न्तजालपुटमाध्यमेन मह्यं प्राप्ताऽभवन् तदनन्तरं मया सर्वासां पाण्डुलिपीनां छायाप्रतयः कारिताः। तदनन्तरं एतेषु स्थानेषु मया गत्वा तदन्वेषणं च कृत्वा बीनापुस्तकालये पाण्डुलिपिः यथावद् प्राप्ताऽभवत्, वाराणसीपुस्कालयेऽपि पाण्डुलिपिः यथावद् समुपलब्धा। तत्र तस्याः पाण्डुलिप्याः नवीनपञ्जीयनसङ्ख्यापि प्राप्ताऽभवत्। सोनागिरपुस्तकालये पाण्डुलिपिः प्राप्ता नाऽभवत्। अर्न्तजालपुटमाध्यमेन सोनागिरसम्बन्धिपाण्डुलिप्याः यद्विवरणं प्राप्तमभवत् तत्सर्वं मया प्रतिपरिचये प्रदत्तम्।

पाठसम्पादने पाठभेदो विशिष्टकार्यमस्ति। पाठभेदतुलनायै ग्रन्थान् संग्रह्य तासां रचनाकारदृष्ट्या स्थानापेक्षया, कालक्रमानुसारेण शुद्धवर्तन्याधारेणेत्यादिविविधदृष्टिकोणैः प्रतीनां साङ्केतिकनामानि दीयन्ते।

(ख) सङ्केतप्रणाली –

पाठसम्पादने मूलपाठप्राप्त्यै पाठान्तरप्राप्त्यै च प्राप्तप्रतिलिपीनां साङ्केतिकनाम–

करणमत्यन्तावश्यकं महत्वपूर्णञ्च भवति।

साङ्केतिकप्रणाल्यः निम्नाः सन्ति –

१. प्रतिलिपिकारप्रणाली
२. स्थानसङ्केतप्रणाली
३. पाठ्यसाम्यसमूहप्रणाली
४. पत्रसङ्ख्याप्रणाली
५. पुनरुद्धारप्रणाली

उक्त प्रणालीभ्यः मया पाठ्यसाम्यसमूहप्रणाल्याः उपयोगः कृतः। यासां प्रतिलिप्यां पठने शुद्धस्पष्टाक्षराश्च वर्तन्ते, पदसमूहे दीर्घाक्षराः सन्ति, तां प्रतिलिपिमादर्शरूपेण स्वीकृत्य प्रतिलिपीनां नामसङ्केतनिर्धारणं मया कृतम्।

तथा हि

श्रीअनेकान्तज्ञानमन्दिर–बीनातः प्राप्तपाण्डुलिपेः 'क' प्रतिरिति नाम,
श्रीस्याद्वादमहाविद्यालय–वाराणसीतः प्राप्तपाण्डुलिपेः 'ख' प्रतिरिति नाम,
सोनागिरतश्च प्राप्तपाण्डुलिपेः 'ग' प्रतिरिति साङ्केतिकनाम स्वीकृतम्।

VI. आदर्शप्रत्या मूलपाठलेखनं तुलनात्मकमध्ययनञ्च –

प्राप्तपाण्डुलिपीनां नामसङ्केतनिर्धारणं कृत्वा प्रतिलिपीनां श्लोकान् पङ्क्तिशः पुनः पृष्ठेषु लिखित्वा तुलनात्मकमध्ययनं मया कृतम्। येन पाठान्तरनिर्णये सौकर्यं मेऽभवत्।

उक्तपद्धत्या मया बीनानगरतः प्राप्ता 'क' प्रतिः आदर्शरूपेण निर्धारिता यतो हि सर्वाधिकी परिष्कृता प्रतिलिपिः वर्तते। तस्याः पङ्क्तिशः प्रत्येकश्लोकं लिखित्वा अन्याभ्यश्च प्रतिलिपिभ्यः मेलनं कृत्वा मूलपाठः पाठान्तराः च ये लब्धाः तेषां तुलनात्मकपाठालोचनप्रणाल्या स्वेच्छया पाठनिर्धारणप्रणाल्या च शुद्धपाठनिर्धारणं जातम्।

यद्यपि 'क' प्रतिः आदर्शरूपेण स्वीकृता तत्रापि ये अशुद्धाः पाठाः प्राप्ताः अभवन् ते मया पाठान्तररूपेण अधिकारान्तटिप्पण्यामुद्धृताः तदन्यप्रतीनां च शुद्धपाठाः एव मूलपाठरूपेण मया स्वीकृताः।

शुद्धतानिर्धारणाय अर्थबोध–प्रसङ्ग–श्लोक–व्याकरणात्मकादिविविधदृष्टिकोणैः अन्तःसाक्ष्याधारेण बाह्यसाक्ष्याधारेण च पाठसुधारोऽपि कृतः। अनेन प्रकारेण मया मूलपाठो निर्धारितः। यत एव रामपुराणस्य पाठसम्पादनञ्च विहितः।

भारतीयपरम्परायां रामकथाश्रितप्रमुखमहाकाव्यपरम्परा

मर्यादापुरुषोत्तम: राम: तादृश: लोकप्रिय: जात: येन तस्य वर्णनं न केवलं भारतवर्षीयसाहित्ये किन्तु विश्वसाहित्येऽपि बाहुल्येन निरूपितं दृश्यते।[१] रामचरित्रस्य वर्णनं न केवलं जैनसाहित्ये अपितु वैदिकसाहित्ये[२] तथा च बौद्धसाहित्येऽपि साङ्गोपाङ्गतया समुपलभ्यते। संस्कृतप्राकृतापभ्रंशादि-षुप्राचीनभाषासु तथा च भारतस्य विभिन्नप्रान्तीयभाषास्वपि नैके ग्रन्था: रामचरित्रमधिकृत्य समुट्टङ्किता: समुपलभ्यन्ते। साहित्यस्य विभिन्ना: विधा: (काव्य-महाकाव्य-नाटकादय:) रामचरित्राधारिता: दरीदृश्यन्ते।

रामस्य जीवनं भारतीयकथासाहित्यस्य सर्वाधिकरूपेण समादरणीय: व्यापक: तथा च रोचको विषयो वर्तते।

रामकथाया: विभिन्नधारा:

प्राचीनकालादेव भारतीयपरम्परायां परम्पराद्वयं प्रसिद्धम्। एका वैदिकीपरम्परा अपरा च श्रमणपरम्परा। श्रमणपरम्परान्तर्गते बौद्धजैनपरम्परे वर्तते। अनया रीत्या तिसृणामपि परम्पराणां स्वतन्त्रमस्तित्वं वर्तते। वैदिकपरम्परायां वेदा: बौद्धपरम्परायां त्रिपिटकग्रन्था: जैनपरम्परायाञ्च आगमग्रन्था: प्रमाणभूता: स्वीक्रियन्ते।

वैदिक-बौद्ध-जैनपरम्परासु रामकथाया: रचना विभिन्नप्रकारेण जाता। तिसृष्वपि परम्परासु राम: महापुरुषत्वेन आराध्यत्वेन च स्वीकृत:। अद्य यावत् विदुषां मतमस्ति यत् रामकथाया: सर्वप्रथम आधारग्रन्थ: वाल्मीकीरामायणमेव।[३] एतदनन्तरं एषा कथा महाभारते, ब्रह्मपुराणे, पद्मपुराणे, वायुपुराणे, अग्निपुराणे च न्यूनाधिकवैभिन्न्येन सह लिपिबद्धा जाता। एतदतिरिक्तं अध्यात्मरामायणम्, आनन्दरामायणम्, अद्भुतरामायणमित्यादय: ग्रन्था: लिखिता: जाता:। एतदाधारेणैव तिब्बती रामायणम्, हिन्द-चीन-श्याम-ब्रह्मदेश-सिंघलादिदेशानाञ्च रामकथा प्रसिद्धाऽभवत्।

---

१. बुल्के महोदयस्य शोधग्रन्थ: 'रामकथा' शीर्षको 'विदेश में रामकथा' पृ. २५६-२७६

२. बुल्के. रामकथा, अध्याय १-२३

३. जैन साहित्य का इतिहास, नाथूराम प्रेमी, पृ. ९१-९२

हिन्दुपरम्परायां प्रचलिता: रामकथा:

१. वाल्मीकिरामायणम्[४] –

संस्कृतसाहित्यजगति रामायणमादिकाव्यं वाल्मीकिश्च तत्प्रणेतृतयाऽऽदिकविरभिधीयते।[५] ख्रैष्टपूर्वपञ्चमशतकात्पूर्वं प्रणीतस्यास्य ग्रन्थस्य समतां लोकप्रियतां च कर्तुं किमपि काव्यं न क्षमते।[६] रामायणे चतुर्विंशतिसहस्रपद्यानीति तत् चतुर्विंशतिसाहस्री संहिता पदेनाभिधीयते।[७]

अत्र सप्तकाण्डा: सन्ति –

१. बालकाण्ड: २. अयोध्याकाण्ड: ३. अरण्यकाण्ड: ४. किष्किन्धाकाण्ड:

५. सुन्दरकाण्ड: ६. युद्धकाण्ड: ७. उत्तरकाण्डश्च

रामायणात् प्राचीन: संस्कृतभाषानिबद्ध: काव्यलक्षणोपपन्न: कोऽपि ग्रन्थो न श्रूयते दृश्यते वा। रामायणे न केवलं युद्धमेव वर्णितमपितु रूपकोपमाद्यलङ्कारयुतायां भाषायां प्रकृतेरपि वर्णनं कृतमतो रामायणं काव्यमिति स्वीक्रियते न वीरगाथामात्रं न वा शुष्केतिहासमात्रम्। रामाधारकं वाल्मीकिकाव्यं रामायणं नितान्तं हृद्यं सातिशयशिक्षाप्रदं चास्ति।

२. महाभारते रामकथा –

महाभारते रामकथाया: चतुर्षु स्थलेषु वर्णनं कृतमस्ति।[८]

क) रामोपाख्याने (२५८ त: २७५ पर्यन्तम्)

ख) अरण्यकपर्वस्य रामकथा (३/१४७/२८–३८)

ग) द्रोणपर्वस्य रामकथा

घ) शान्तिपर्वस्य रामकथा (१२,२९,४६–५५)

उपर्युक्ता चतस्र: अपि रामकथा: अतिरिच्य रामकथाया: तथा च तस्या: पात्राणाम् उपमार्थम् उल्लेख: सम्भवत: पञ्चशताधिकस्थलेषु वर्णितोऽस्ति।[९]

---

४. वाल्मीकि रामायण (प्रथम भाग, द्वितीय भाग) प्रकाशन गोविन्द भवन कार्यालय, गीताप्रेस गोरखपुर, पंचम संस्करण सं २०४२

५. संस्कृत साहित्य का इतिहास, बलदेव उपाध्याय, शारदा मन्दिर, वाराणसी, अष्टम संस्करण, पृ. ६३

६. सं. सा. इ. – उपा. पृ. ६७

७. सं. सा. इ. – पृ. ६४ एवं वा. रा. बालकाण्ड, चतुर्थ सर्ग श्लोक २

८. रामकथा (उत्पत्ति और विकास) – बुल्के, पृ. ४८ – ४९

९. रामकथा, बुल्के

३. महारामायणम् –

ग्रन्थोऽयं आर्षरामायणं, महारामायणं, वासिष्ठरामायणं, ज्ञानवासिष्ठं, वासिष्ठं वेति नाम्ना प्रख्यातोऽस्ति। अत्र षट्प्रकरणानि सन्ति। यथा वैराग्यप्रकरणम्, मुमुक्षव्यवहारप्रकरणम्, उत्पत्तिप्रकरणम्, स्थितिप्रकरणम्, उपशमप्रकरणम्, निवार्णप्रकरणम् चेत्यादीनिप्रकरणम्। कथावस्तुनः विस्तृत्वादिदं महारायणं कथयते।[१०]

४. अध्यात्मरामायणम् –

एकनाथेन अध्यात्मरामायणं आधुनिकरामायणं (१६ शताब्दी) एका आधुनिकी रचना स्वीकृता। अत्र उमाशङ्करयोः संवादरूपे रामकथा वर्णिता। वाल्मीकिरामकथाया अत्र अनेकत्र वैशिष्ट्यं लक्ष्यते। ग्रन्थस्यास्य मुख्यप्रयोजनं वर्तते –वेदान्तदर्शनाधारेण रामायणस्य प्रतिपादनम्। रामानन्दीयवैष्णवसम्प्रदाये अस्य महती मान्यता विद्यते। अतएव अध्यात्मरामायणं साम्प्रदायिकरामायणमस्ति।[११]

५. अद्भुतरामायणम् –

अद्भुतरामायणस्य रचना अध्यात्मरामायणस्य रचनायाः किञ्चित्कालानन्तरं प्रतीयते।[१२] एषा कथा वाल्मीकिरामायणमधिकृत्यैव लिखिता परन्तु सीताजन्मतोऽद्भुता कथा अत्र वर्णिता। कालीरूपं धृत्वा तयैव रावणवधोऽत्र वर्णितः।[१३]

६. आनन्दरामायणम् –

आनन्दरामायणस्य रचना अध्यात्मरामायणानन्तरं तथा एकनाथात् पूर्वमभवत्। अत्रापि अध्यात्मरामायणमिव उमाशङ्करयोः संवादरूपेण रामकथा वर्णिता। ग्रन्थेस्मिन् रामस्य ब्रह्मस्वरूपप्रतिपादनेन सहैव तदुपसानाविधि–महत्वमपि वर्णितम्। १२२५२ श्लोकेषु ग्रन्थमिदं लिखितं कथावस्तु च १०९ सर्गेषु नवकाण्डेषु च विभक्तः।[१४] नवकाण्डाः निम्नाः सन्ति –

१) सारकाण्डः (१३ सर्ग) २) यात्राकाण्डः (९ सर्ग)

---

१०. सं. सा. इ. – उपा. पृ. ४६
११. सं. सा. इ. – उपा. पृ. ४७
१२. रामकथा – बुल्के, पृ. १६७
१३. जै. सा. इ. – प्रेमी, पृ. ९२
१४. सं. सा. इ. – उपा. पृ. ४८

३) यागकाण्डः (९ सर्ग)
४) विलासकाण्डः (९ सर्ग)
५) जन्मकाण्डः (९ सर्ग)
६) विवाहकाण्डः (९ सर्ग)
७) राज्यकाण्डः (२४ सर्ग)
८) मनोहरकाण्डः (१८ सर्ग)
९) पूर्णकाण्डः (९ सर्ग)

७. तत्त्वसंग्रहरामायणम् –

सप्तदशख्रिस्ताब्द्यां रामब्रह्मानन्दकविना विरचितेऽस्मिन् ग्रन्थे रामस्य परब्रह्मस्वरूपं प्रतिपादितमस्ति। कवेः अपरा कृतिरस्तिरामायणतत्त्वदर्पणम्।[१५]

८. भुशुण्डीरामायणम् –

ग्रन्थोऽयं आदिरामायणं तथा च मूलरामायणमिति नाम्नाऽपि ज्ञायते। अत्र भागवतकृष्णकथायाः प्रभावो दृष्टुं शक्यते।[१६]

९. मन्त्ररामायणम् –

महाभारतस्य विश्रुतटीकाकारेण नीलकण्ठकविना सप्तदशशताब्द्यां ऋग्वेदस्य मन्त्राणां सङ्कलनं विधाय तस्य रामपरकतात्पर्यमत्र प्रदर्शितम्।[१७]

१०. रामविजयम् –

रघुनाथोपाध्यायेन १८०० ख्रिस्ताब्द्यां महाकाव्यमिदं विरचितम्।[१८]

११. रामलिङ्गामृतम् –

महाकाव्यस्यास्य रचना काश्याम् अद्वैतकविना १६०८ ख्रिस्ताब्द्यां कृता। अस्मिन् अष्टादश सर्गाः सन्ति।[१९]

१२. राघवोल्लासमहाकाव्यम् –

अस्य निर्माणं अद्वैतसंन्यासिना कृतम्। कथानकस्यारम्भे रामजन्मनः कथा वर्णिताऽन्ते च

---

१५. सं. सा. इ. – उपा. पृ. ४९
१६. सं. सा. इ. – उपा. पृ. ४९
१७. सं. सा. इ. – उपा. पृ. ५०
१८. सं. सा. इ. – उपा. पृ. ५०
१९. सं. सा. इ. – उपा. पृ. ५०

अयोध्यायां प्रत्यावर्तनं वर्णितम्। सर्गत्रयमप्राप्तमस्ति, अवशिष्टाश्च नवसर्गा: प्राप्यन्ते।[२०]

१३. उदारराघवमहाकाव्यम् –

चतुर्दशशताब्द्यां साकल्यमल्लेनास्य निर्माणं कृतम्। अत्र अष्टाविंशतिसर्गा: सन्ति किन्त्वद्य नवसर्गा एव प्राप्यन्ते। शृङ्गारस्य महत्त्वमधिकं वर्णितमत्र।[२१]

१४. रघुवंशमहाकाव्यम् –

महाकविकालिदासेन प्रणीतमेतन्महाकाव्यं रामकथाश्रितमस्ति। ऊनविंशतिसर्गात्मके महाकाव्येऽस्मिन् रघोर्वंशस्य कथा निबद्धा।

१५. महाकविभट्टे: रावणवधम् –

५०० ई. त: ६०० ई. देशीया शास्त्रकाव्येषु भट्टिकाव्यं प्रसिद्धतरम्। 'दीपतुल्य:' प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्। महाकाव्यमिदं भट्टिस्वामिना प्रणीतम्। तन्नाम्नैव चास्य प्रसिद्धिरपि जाता। इदं काव्यं रावणवधनाम्नापि प्रथते। काव्येऽस्मिन् द्वाविंशति सर्गा येषु संहृत्य १६२९ मिता: श्लोका: समुल्लसन्ति।

१६. प्रवरसनेस्य सेतुमहाकाव्यम् –

देशीया ६०० ई. प्रवरसेनप्रणीतं सेतुबन्धमहाकाव्यं दशमुखवधनाम्नाऽपि संस्कृतसाहित्य–जगति सुप्रसिद्धम्। मूलरूपेण अस्य निर्माणं प्राकृत भाषायां कृतम्। महाकविप्रवरेण परं तत्र संस्कृतमहाकाव्यतत्त्वानां समुचितसमावेश: कृत:।

महाकाव्येऽस्मिन् सेतुबन्धप्रकरणात् रावणवधपर्यन्ता कथा लिखिता वर्तते। सम्प्रति अस्य सृस्कृतरूपान्तरणमपि प्राप्यते। रामकथामाश्रित्य प्रणीतमिदं महाकाव्यं रामस्य माहात्म्यं प्रदर्शयति।

महाकाव्यमिदं पञ्चदश आश्वासेषु निबद्धं वर्तते। काव्यादर्शे दण्डिनाप्युक्तम् –

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदु:।
सागर: सूक्तिरत्नानां सेतुबन्धादि यन्मयम्।।[२२]

१७. क्षेमन्द्रस्य रामायणमञ्जरी तथा दशावतारचरितम् –

व्यासदासापरनामा क्षेमेन्द्र: प्रकाशेन्द्रस्य पुत्र: सिन्धो: पौत्र: काश्मीरदेशवासी चासीत्।

---

२०. सं. सा. इ. – उपा. पृ. ५०

२१. सं. सा. इ. – उपा. पृ. ५०

२२. काव्यादर्श: १/३४

काश्मीरप्रान्तस्य अनन्तस्य सभापण्डित:। क्षेमेन्द्र: अनन्तस्य शासनकाल: १०२७ ईस्वी त: १०६४ ईस्वी पर्यन्तम्। अत: क्षेमेन्द्रस्य समय: एकादशशतकमिति निश्चित्य वक्तुं शक्येत। 'रामायणमञ्जरी तथा दशावतारचरितम्' द्वयो: रचनाकाल: १०३६ त: १०३७ ई. त: स्वीक्रियते।

१८. रघुनाथचरितं तथा रामविजय महाकाव्यम् –

रघुनाथ उपाध्यायकृत रघुनाथचरितं तथा रामविजयश्च महाकाव्ययो: रचनाकाल: १८०० ई. मन्यते।

१९. वामनभट्टबाणस्य रघुनाथचरितमहाकाव्यम् –

बाणभट्ट इव वामनभट्टबाणोऽपि वत्सगोत्रीय: विप्र आसीत्। तेलङ्गानाप्रान्तस्य शासकस्य राजकविरूपेण प्रतिष्ठितोऽयं वामनभट्ट:। रामकथामाश्रित्य त्रिंशत्सर्गसमन्वित रघुनाथाचरितारब्धं महाकाव्यमरचयत् यत्र रामस्य सम्पूर्णं जीवनवृत्तं स्वाद्भुतप्रतिभया महाकविना वर्णितम्। महाकविरयं १४२० ख्रीष्टीयकल्पे जात:। नामसाम्येव कादम्बरीकर्ता बाण एव पार्वतीपरिणयस्य रचयितेति कथनं भ्रान्तिमात्रमुलकम्। अस्य वामनभट्टबाणस्य शृङ्गारभूषणनामा भाणग्रन्थ: प्रसिद्ध:।

एतदतिरिच्य अन्येपि काव्यग्रन्था: रामकथामाश्रित्य प्राप्यन्ते यथा नाटकानि, रूपकाणि, चम्पू-काव्यानि च। नाट्यग्रन्थेषु भासकृतं अभिषेकनाटकम्, प्रतिमानाटकञ्च, भवभूतिकृतं महावीरचरितं एवं करुणारसाभियुक्तं उत्तररामचरितञ्च (अष्टमी शताब्द्या: पूर्वार्द्धम्) अनङ्गहर्षमायुराजकृत उत्तरराघवम् (सम्भवत: अष्टमी शताब्दी), दिङ्नागकृत कुन्दमाला (पञ्चमी शताब्दी) मुरारिकृत अनर्घराघवम् (६०० ई देशीया), राजशेखरकृत बालरामायणम् (दशमी शताब्दी) दामोदरमिश्रकृत हनुमान्नाटकम् (दशमी शताब्दी), शक्तिभद्रकृत आश्चर्यचूडामणि (नवमी शताब्दी) हनूमत्कृतम् महानाटकं जयदेवकृतं प्रसन्नराघवञ्च प्रसिद्धम्। चम्पूकाव्येषु भोजकृतं रामायण-चम्पू, वेङ्कटाध्वरिकृतं उत्तरचम्पूकाव्यञ्च प्रसिद्धे स्त:।

अस्यातिरिक्ते अन्यासु भारतीयभाषास्वपि रामकथाविषयकग्रन्था: लिपिबद्धा: कृता:। यथा तमिलभाषायां तमिलरामायण्, तेलुगु भाषायां डिपररामायणम्, निर्वाचोत्तररामायणम्, भास्कररामायणम्, मलयालम् भाषायां रामचरितम्, कन्नडभाषायां तोखे रामायणम्, मैरावणकालगं कश्मीरी रामायणमित्यादीनि प्रसिद्धानि।

हिन्दी भाषायामपि तुलसीदासकृत 'रामचरितमानस' इति रामकथा सर्वाधिकी प्रसिद्धा।

हिन्दीभाषायां रामकथाश्रिता: शतसङ्ख्या रचना: समुपलभ्यन्ते। प्राय: प्रत्येकभारतीयभाषायां रामकथासम्बन्धिनं विपुलं साहित्यं प्राप्यते।

बौद्धसाहित्ये रामकथा

प्राचीनकालादेव बौद्धै: रामकथा स्वीकृता। तै: रामकथायै जातकसाहित्ये स्थानं प्रदत्तम्। प्राचीनबौद्धसाहित्ये रामकथा जातकत्रये सुरक्षितम्।

१. दशरथजातकम् २. अनामकं जातकम् ३. दशरथकथानकम्

जातकत्रयेषु दशरथजातकं सर्वाधिकप्रसिद्धं महत्वपूर्णञ्च वर्तते।

१. दशरथजातकम् –

जातकमेतत् 'जातकट्ठवण्णना' इत्याख्ये ग्रन्थे प्राप्यते। ग्रन्थोऽयं पञ्चमशताब्द्या: सिंहली पुस्तकस्य पाल्यां अनुवादरूप:। बौद्धरामायणं वाल्मीकिरामायणादपि प्राचीनम्। रामकथाया: विकसितं रूपं, यत् वाल्मीकिरामायणेऽपि पठ्यते, तत् प्राचीनकालादेव बौद्धेषु प्रचलितमासीत्।अस्य सङ्केत: जातकट्ठवण्णनायां प्राप्यते।[२३]

जातकट्ठवण्णनाया: प्रत्येकस्मिन् जातके प्रथमं वर्तमानकथा कथ्यते, यस्यां निर्दिश्यते यज्जातकमेतत् तद्धि कस्मिन्नवसरे बुद्धेन प्रत्यपादि। एतदनन्तरं प्राचीनकथा कथ्यते या खलु वास्तविकतया सम्बद्धा भवति।

i) वर्तमानकथा– महात्मबुद्धेन जातकमेतत् जैतवने कथितम्। कस्यचिद् गृहस्थस्य पिता मृत: येन शोकमग्नेन तेन गृहस्थेन निखिलं स्वकीयं कर्तव्यं त्यक्तम्। एतद् ज्ञात्वा बुद्धेन सह गृहस्थो भणित: यत् पौराणिकसमये स्वपितृमरणावसरे पण्डित: लेशमात्रमपि शोकं न करोति स्म। एतदनन्तरं दशरथस्य मरणावासरे रामस्य धैर्योदाहरणं प्रदानाय बुद्ध: दशरथजातकं श्रावितवान्।

ii) अतीतकथा– काशीनरेशदशरथस्य ज्येष्ठमहिष्या: सन्तानत्रयमासीत्। तत्र पुत्रद्वयं रामपण्डितो लक्ष्मणश्च। तथा एका पुत्री सीता। अस्या: महिष्या: मृत्यूपरान्तं अपरा महिषी ज्येष्ठमहिषीत्वेन तेन समादृता। तस्या: द्वितीयमहिष्या: भरतनामक: सुतो जात:। भरतजन्मन: प्रसन्नतायां राज्ञा महिष्यै वरमेकं प्रदत्तम्। राज्ञी रामलक्ष्मणस्याधिकारं तथा च राज्यं भरताय दातुमिच्छति स्म। राज्ञ्या: षड्यन्त्रभयात् दशरथेन रामलक्ष्मणौ द्वादशवर्षं यावत् वनवासाय प्रेषितौ।

२३. रामकथा – बुल्के, अ. ६ अनु. ८३

द्वावपि स्वभगिनीं नीत्वा हिमालयं गतवन्तौ। नववर्षानन्तरं दशरथस्य मृत्युः जातः। तदा भरतेन राज्याधिकारः न स्वीकृतः।

अमात्यगणेन सह राममानेतुं भरतः प्रयातः। तत्र गत्वा पितुः मरणस्य वार्तां श्रावितवान्। एतच्छ्रुत्वा सीतालक्ष्मणौ शोकाकुलौ आस्ताम् परन्तु रामपण्डितो न शोकाकुलो जातो न वा तेन रोदनं कृतं (रामपण्डितो नेव सोचि न रोदि।) रामेण द्वादशवर्षावधिं असमाप्य पुनः काशीगमनं अस्वीकृतम्। अतः रामस्य चरणपादुकां सिंहासनोपरि संस्थाप्य राज्यशासनं भरतेन प्रारब्धम्। द्वादशवर्षावधिं समाप्य रामः काशीं प्रविष्टः। तदा तस्य राज्याभिषेको जातः। सीतया सह विवाहः कृतः। षोडशसहस्रवर्षं यावत् शासनमकरोत्।

समीक्षा–

i) दशरथजातके रामायणवत् राजधानी अयोध्या न स्वीकृता अपितु वाराणसी स्वीकृता।

ii) सर्वाधिकं आश्चर्यकरः वृतान्तः वर्तते यद् सीता रामस्य भगिनीत्वेन प्ररूपिता। तथा च तस्याः विवाहोऽपि रामेण सह वर्णितः।

किन्तु इतिहासः प्रमाणयति यत् तस्मिन् समये शाक्यां राजपरिवारेषु राजवंशानां शुद्धतारक्षणाय भात्रा सहेव भगिन्याः विवाहः सम्पाद्यते स्म। तस्मिन्समये एषा एका परम्परा आसीत्।[२४]

जैनागमेष्वपि भोगभूम्यां उत्पन्नयुगलेषु विवाहस्य शाश्वती परम्परा कथिता। अस्याः कथायाः अनन्तरं बुद्धः जातकस्य सामञ्जस्यं स्थापयन् कथयति – महाराज शुद्धोधन एव महाराजः दशरथः आसीत्। महामाया एव रामस्य माता आसीत्। यशोधरा एव सीता आसीत्। आनन्दः भरतः आसीत् तथा च बुद्धः स्वयं रामपण्डितः आसीत्।

२. अनामकं जातकम् –

जातकमेतत् 'लियेऊ तू त्सी किंग' इत्याख्ये ग्रन्थे प्राप्यते (चीनी त्रिपिटकस्य तैशो संस्करणं क्रमाङ्कः १५२)।[२५] 'कांग–सेंग–हुई' कृत ग्रन्थोऽयं तृतीयशताब्द्याः चीनीभाषायामनुवादरूपः प्राप्यते। अस्य भारतीय मूलपाठः तु अप्राप्य एव।

---

२४. जै. सां. इ. – प्रेमी, पृ. ९३

२५. रामकथा – बुल्के, पृ. ५८

अनामकं जातके कस्यापि मूलपात्रस्य उल्लेखो नास्ति। परन्तु रामसीतयोर्वनवास:, सीतापहरणं, जटायुवृतान्तं बालिसुग्रीवयोर्युद्धं सेतुबन्धं सीताया: सतीत्वपरीक्षा इत्यादय: सङ्केततया प्राप्यन्ते।

कथायां वाल्मीकिरामायणत: किञ्चिद् भेद: प्राप्यते यत् विमाताकारणात् रामाय वनवासो न प्रदत्त: अपितु स्वमातुलकृताक्रमणकारणात् समस्तजीवरक्षायै राम: स्वयमेव राज्यं त्यक्त्वा वनवासं स्वीकरोति। अत्र रामात् (बोधिसत्वेन) भयीभूत्वा बालिराज्ञ: पलायनोल्लेख: वर्तते न तु बालिवधोल्लेख: कृत:।

३. दशरथकथानकं –

चीनी त्रिपिटकान्तर्गते 'त्सा–पौ–त्संगं–किंग' नामक १२१ अवदानानां संग्रहो विद्यते।[२६] संग्रहोऽयं ४७२ ई. मध्ये चीनीभाषायां अनुदितोऽभवत्। अप्राप्य मूलभारतीयग्रन्थरचना द्वितीयाशताब्द्यानन्तरं अभवत्। अस्मिन् संग्रहे 'दशरथकथानकं' प्राप्यते।

अस्मिन् कथानके सीतादेव्य: अथवा राजकुमारी सीताया: उल्लेखो नास्ति। केवलं विमातु: छलेन भरत: राज्याभिषेकाय तथा च राम: वनवासाय नृपेणादिष्ट:। अनेन दु:खेन दशरथो मृत्युं चापि प्राप्तवान्। भरत: तत्समये विदेशे एवासीत्। अयोध्यां पुनरागमने स: स्वमातु: छलेन घृणित: सन् पुनश्च वनं गतं रामं राज्यभारं स्वीकर्तुं प्रार्थयति परन्तु रामेण पितुराज्ञामनुपालयन् द्वादशवर्षाणां वनवास: एव स्वीकृत: राज्यमस्वीकृतम्। द्वादशवर्षाणां वनवासं पूर्णयित्वा अयोध्यापुनरागमने भरतस्य निवेदनात् स राज्यं स्वीकृतवान् तथा च अयोध्यायां सर्वत्रैव सुख–शान्ति–समृद्धीणां विस्तारमभवत्। अनेन प्रकारेण दशरथकथानके मात्रदशरथस्य मुख्यतयैव सर्ववृतान्तं निरूपितम्। अत्र सीताया: कुत्रापि उल्लेखो नाभवत् येन रामकथा असम्पूर्णा एव प्रतीयते। सीताया: अभावात् रामसीताविवाह प्रसङ्ग:, सीताहरणं, सीतान्वेषणं, युद्धविस्तार: एवं सीताग्निपरीक्षाया: विवरणं नेह प्राप्यते।

अनेन प्रकारेण समग्रदृष्ट्या बौद्धसाहित्ये राम: गौतमबुद्धस्यावताररूपेण प्रतिष्ठित:। तथा च तेषां जन्म, सीतया सह विवाह:, विमातु: छलेन वनवासप्राप्ति:, सीतापहरणं, सीतान्वेषणं, सेतुबन्ध:, युद्धविजय: सीताया: सतीत्वपरीक्षा इत्यादय: बहव: प्रसाङ्गानां संकेता: प्राप्यन्ते।

---

२६. चीनी त्रिपिटक, तैशो संस्करण क्रमाङ्क: २०३ (हिन्दी अनुवाद : नागरी प्रचारिणी पत्रिका, वर्ष ५४, पृ. २८६–८९)

जैनपरम्परायां प्रचलिता: रामकथा:

जैनसाहित्ये रामकथाया: स्रोतद्वयं प्राप्यते।

१. विमलसूरिकृतं पउमचरियं   २. गुणभद्रकृतम् उत्तरपुराणम्

१. विमलसूरिकृतं पउमचरियं –

i) पउमचरियं –

जैनपरम्परायां विमलसूरिणा 'पउमचरियं' लिखित्वा सर्वप्रथमं रामकथा प्रकटिता।[२७] कविमतानुसारेण रामकथाया: वर्णनं पूर्वाचार्यपरम्पर्या प्रचलितमासीत्। विमलसूरिणा पउमचरियस्य उपोद्घाते लिखितमेतत् –

णामावलिय णिबद्धं आयरिय परम्परागमं सव्वं।
वोच्छामि पउमचरियं अहाणुपुव्विं समासेण।।८।।[२८]

अर्थात् यन्नामावलीनिबद्धमस्ति तथा च आचार्यपरम्परायामागतं पद्मचरितं आनुपूर्व्यानुसारेण संक्षेपेण वक्ष्याम्यहम्। विमलसूरिणा लिखितं यत् नारायणबलदेवयो: वृतान्तं तत् पूर्वसाहित्ये (पुव्वगएँ,११८.११८) समुपलब्धमस्ति। विमलसूरिणापि स्वगुरुजनेभ्य: एव रामकथा श्रुता। इदानीं पूर्वसाहित्यमलुप्तं मन्यते।

कवेरुक्त्यनुसारेण विमलसूरे: समय: वीरनिर्वाणसम्वत् ५३० अर्थात् विक्रम संवत् ६० विद्यते। परन्तु भाषाधारेण डॉ. याकोबी इत्यादय: विद्वांस: पउमचरियं तृतीये वा चतुर्थे वा शतके लिखितं स्यादिति वदन्ति।[२९] ग्रन्थोऽयं प्राचीनजैनप्राकृतभाषायां लिखितमस्ति। प्राकृतभाषायां चरितकाव्यस्य आद्यग्रन्थकर्तृरूपेण विमलसूरे: स्थानं सर्वेषु अग्रगण्यं मन्यते।[३०] 'पउमचरियं' आधारीकृत्य रविषेणाचार्येण ६६० ईस्वीये संस्कृते पद्मचरितं रचितं तच्च 'पद्मपुराण' नाम्ना लोके ख्यातम्।[३१]

पउमचरियं ग्रन्थस्य कथानिरीक्षणे सति कथायामस्यां निम्नाङ्किता: तथ्या: प्रतिभासन्ते–

---

२७. पउमचरियं, प्रथमोद्देश:

२८. पउमचरियं, उद्देश १/८

२९. 'इनसाइक्लोपीडिया ऑफ ग्लिजीन एण्ड एथिक्स' भाग ७ पृ. ४३७ और मोडर्न रिव्यु दिसम्बर सन् १९१४

३०. तीर्थङ्कर: म. उ. आ. प. भाग २ पृ. १५४–१५५

३१. माणिकचन्द्र जैन ग्रन्थमाला, क्र. २९–३०, पउमचरियं, बम्बई, वि. सं. १९८५

ग्रन्थोऽयं दिगम्बरसम्प्रदायेन सम्बन्धितोऽस्तीति द्योतते। यतस्तस्य ग्रन्थस्य प्रथमोद्देशे कथावतारवर्णनस्य प्रसङ्गे गाथेयं निम्नप्रकारेण प्राप्यते –

वीरस्स पवरठाणं विउलगिरिमत्थए मणभिरामे।
तह इन्दभूइ कहियं सेणिय रण्णस्य णीसेसं।।३४।।

अर्थात् यदा भगवतः महावीरस्य समवशरणं विपुलाचले आसीत् तदा मगधनरेशश्रेणिको तत्रागच्छत् तथा तेन पृष्टे सति इन्द्रभूतिगौतमगणधरः रामकथां निगदितवान्। कथावतारस्य एषा पद्धतिः विशेषरूपेण जैनसम्प्रदायस्य ग्रन्थेषु प्राप्यते। एषा पद्धतिः दिगम्बरसम्प्रदायसम्बन्धसूचिका अस्ति।[३२]

कुत्रचित् गौतमगणधरस्य स्थाने 'सुधर्मस्वामी' इति नाम प्राप्यते।[३३] परन्तु श्वेताम्बरसम्प्रदायग्रन्थेषु 'सुधर्मस्वामिना जम्बूस्वामिनं प्रति उक्तम्' एषा कथनपद्धतिः मुख्यरूपेण प्राप्यते। अतः कथनपद्धत्या निश्चीयते यत् 'पउमचरियं' दिगम्बरग्रन्थः स्यात्।

ii) पद्मचरितम् –

रविषेणाचार्येण संस्कृतभाषायां कृतं पद्मचरितं दिगम्बरजैनकथासाहित्ये बहुप्राचीनतमो ग्रन्थो विद्यते, यदिदानीं पद्मपुराण' नाम्ना प्रसिद्धम्। पद्मपुराणेऽपि पउमचरियं ग्रन्थसदृशमेव कथावस्तु-प्रतिपादनशैली-उद्देश-पर्वाणाम्वा समानान्तनामादीनि प्राप्यन्ते। अधिकांशपद्येषु अर्थसाम्यत्वात् पद्मपुराणं पउमचरियमेव प्रतीयते।

परन्तु रविषेणाचार्येण पद्मचरितस्य आधारः श्री कीर्तिधरमुनिना पद्ममुनेः चरितं उद्दिष्टमिति स्वीकृतः न तु विमलसूरिकृतं 'पउमचरियं' इति।

स्वयं रविषेणाचार्येण पद्मचरितस्याधारः प्रथमपर्वस्य ४१-४२ श्लोकद्वये कथितः-

वर्द्धमानजिनेन्द्रोक्तः सोऽयमर्थो गणेश्वरम्।
इन्द्रभूतिं परिप्राप्तः सुधर्मं धारिणीभवम्।।४१।।
प्रभवः क्रमतः कीर्तिं ततोऽनुत्तरवाग्मिनम्।
लिखितं तस्य सम्प्राप्य रवेर्यत्नोऽयमुद्गतः।।४२।।

---

३२. कुमारपालना समयनुं एक अपभ्रंश काव्य नाम्ना लेखे श्वेताम्बरविद्वान श्री मोहनलाल दलीचन्द्रजी देसाई अपि स्वीकृतवान्।

३३. श्रेणिक प्रश्नमुद्धिश्य, सुधर्मा गणनायकः। यथोवाच ममाप्येतदुच्यते मोक्षलिप्सया।। – छत्रचूडामणि

अर्थात् श्रीवर्द्धमानजिनेन्द्रेणोक्तोऽयमर्थः इन्द्रभूतिगौतमगणधरमाध्यमेन धारिणीपुत्रसुधर्माचार्याय प्राप्तोऽभूत्। तस्मिन् क्रमे एव प्रभवाय प्रभवानन्तरं अनुत्तरवाग्मिने श्रेष्ठवक्त्रे वा कीर्तिधराचार्याय रामचरितं प्राप्तमभवत्। तदनन्तरं तेन लिखितं ग्रन्थं प्राप्य रविषेणाचार्यस्य प्रयत्नोऽयं प्रकटीभूतः पद्मचरितमिति काव्ये मया।

तथा ग्रन्थान्तेऽपि १२३ पर्वस्य १६६ श्लोके ईदशमेवोल्लिखितम् -

निर्दिष्टं सकलैर्नतेन भुवनैः श्रीवर्द्धमानेन यत्
तत्त्वं वासवभूतिना निगदितं जम्बोः प्रशिष्यस्य च।
शिष्येणोत्तरवाग्मिना प्रकटितं पद्मस्य वृतं मुनेः
श्रेयः साधुसमाधिवृद्धिकरणं सर्वोत्तमं मङ्गलम्।।१६६।।

अर्थात् समस्तभूतेन नमस्कृतश्रीवर्द्धमानजिनेन्द्रेण पद्ममुनेः यच्चरित्रमुक्तं तदैव इन्द्रभूतिगौतमगणधरमाध्यमेन सुधर्माचार्याय जम्बुस्वामिने चोक्तम्। तदैव अग्रे गत्वा तेषामेव शिष्येणोत्तरवाग्मिना अर्थात् श्रेष्ठवक्त्रा श्रीकीर्तिधरमुनिना प्रकटमभवत्।[३४] पद्ममुनेः चरितमिदं साधुसमाधेः वृद्धिस्वरूपं सर्वोत्तमं मङ्गलस्वरूपं कल्याणस्वरूपमस्ति।

पद्मचरितग्रन्थकर्तृरविषेणाचार्येण स्वसङ्घविशेषस्य गणगच्छस्य अथवा स्थानादिकस्योल्लेखो न कृतः परन्तु सेनान्त नाम्नः अनुमीयते यत् सम्भवतोऽयं सेनसङ्घसम्बन्धी आचार्यो भवेत्। पद्मचरितस्य १२३ पर्वस्य १६७ श्लोकस्योत्तरार्द्धे लिखितोऽयं श्लोकः -

आसीदिन्द्रगुरोर्दिवाकरयतिः शिष्योऽस्य चार्हन्मुनिः।
तस्माल्लक्षणसेनसन्मुनिरदः शिष्यो रविस्तु स्मृतम्।।१६७।।

तस्यां गुरुपरम्परायां इन्द्रसेनः दिवाकरसेनः अर्हत्सेनः लक्ष्मणसेनः च उल्लिखिताः सन्ति। लक्ष्मणसेनस्य शिष्य एव रविषेणोऽस्ति। रविषेणाचार्येण पद्मचरितस्य रचनाकालः १२३ पर्वस्य १८१ श्लोके सूचितः -

द्विशताभ्यधिके समा सहस्रे समतीतेऽर्द्धचतुर्थवर्षयुक्ते।
जिनभास्करवर्द्धमानसिद्धे चरितं पद्ममुनेरिदं निबद्धम्।।१८१।।

अर्थात् भगवन्महावीरस्यनिर्वाणानन्तरं १२०३ वर्षषण्मासातीते पद्ममुनेः चरितमिदं निबद्धम्। ७३४ वि. सं. पद्मचरितस्य रचना पूर्णा जाता।

---

३४. पद्मपुराणम्, आधार, पृ. २२

अनेन उत्तरवर्तिना उद्योतसूरिणा स्वकृत्यां कुवलयमायां (वि.सं. ८३५) पद्मचरितकर्तुः रविषेणाचार्यस्य स्मरणं कृतम्।[३५] तथा च हरिवंशपुराणकर्त्रा जिनसेनाचार्येणापि (वि.सं.८४०) रविषेणाचार्यं स्मृतम्।[३६]

iii) पउमचरिउ –

स्वयम्भूकविना अपभ्रंशभाषायां 'पउमचरिउ' ग्रन्थो विरचितः। रविषेणाचार्यकृतं पद्मचरितमाधृत्यैव ग्रन्थो विरचितः। रविषेणाचार्यस्य पद्मचरितग्रन्थे ग्रन्थपरम्परायाः यदाधारमुद्दिष्टं तमैवाधृत्य स्वयम्भूकविनापि निम्नाङ्किताः श्लोकाः विरचिताः।

वद्धमाण–मुह–कुहर–विणिग्गय। रामकहा–णइ एह कमागय।।१।।
पुच्छइ इन्द्रभूइ–आयरिएं। पुणु धम्मेण गुणालङ्करिएं।।७।।
पुणु पहवें संसाराराएं। कित्तिहरेण अणुत्तरवाएं।।८।।
पुणु रविसेणायरिय–पसाएं। बुद्धिएँ अवगाहिय कइराएं।।९।।

अर्थात् एषा रामकथा सरिता वर्द्धमानजिनेन्द्रस्य मुखकन्दर्या अवतीर्णाभवत्। तदनन्तरं इन्द्रभूत्याचार्याय ततश्च गुणालङ्कृतसुधर्माचार्याय ततश्च प्रभवाय ततश्चानुत्तरवाग्मिने श्रेष्ठवक्त्रे कीर्तिधराय प्राप्ताऽभवत्। तदनन्तरं रविषेणाचार्यप्रसादेन तस्यामेव रामकथासरितायामवगाह्य स्वयम्भूकविना 'पउमचरिउ' लिख्यते।

रामकथापरम्परामनुसृत्य जाताः परिज्ञाताश्च मुख्याः रचनाः निम्नलिखिततालिकायां उद्धृताः सन्ति–[३७]

(क) प्राकृतसाहित्ये –

१. विमलसूरिकृतं पउमचरियं (प्रथमतः चतुर्थ शताब्दी)
२. शीलाकाचार्यकृतं चउपन्नमहापुरिसचरियस्यान्तर्गते रामलक्खणचरियं (नवमी शताब्दी)
३. भद्रेश्वरकृतं कहावल्यान्तर्गते रामायणं (एकादश शताब्दी)
४. भुवनतुंगसूरिकृतं सीयाचरियं[३८] रामलक्खणचरियं[३९] च।

---

३५. जुहि कए रमणिज्जे वरंग पउमाणचरिय वित्थारे। कहव ण सल्लाहणिज्जे ते कइणो जडियरविसेणे।।४।।
३६. कृतपद्मोदयोद्योता प्रत्यहं परिवर्तिता। मूर्तिः काव्यभवा लोके खेरिव खेः प्रिया।।३४।।
३७. रामकथा (उत्पत्ति और विकास) – बुल्के हिन्दी परिषद् प्रकाशन, प्रयाग विश्वविद्यालय, तृ. सं, ११७१ ई.
३८. जिनरत्नकोश, पृ. ४४२
३९. जिनरत्नकोश, पृ. ३३१

(ख) संस्कृतसाहित्ये –

१. रविषेणकृतं पद्मचरितं (सप्तमी शताब्दी) प्राचीनतमो जैनसंस्कृत-पद्मपुराणग्रन्थम्।
२. हेमचन्द्रकृतं त्रिषष्ठिशलाकापुरुषचरितान्तर्गते रामायणम्। (द्वादश शताब्दी)
३. हेमचन्द्रयोगशास्त्रस्य टीकान्तर्गते सीतारावणकथानकम्।
४. जिनदासकृतं रामायणं रामदेवपुराणो वा। (पञ्चदश शताब्दी)
(एम. विन्टरनित्स, हि.ई.लि., भाग-२, पृष्ठ-४९६)
५. पद्मदेवविजयगणिकृतं रामचरितम्। (षोडश शताब्दी)
(राजेन्द्रलालमिश्रः, नोरिसस संस्कृतमैन्युस्क्रिप्ट्स, भाग-१०, पृष्ठ-१३४)
६. सोमसेनकृतं रामचरितम्। (षोडश शताब्दी)
७. सोमप्रभाचार्यकृतं लघुत्रिषष्ठिशलाकापुरुषचरितम्।
८. मेघविजयगणिवरकृतं लघुत्रिषष्ठिशलाकापुरुषचरितम्।(सप्तदश शताब्दी)

(ग) अपभ्रंशसाहित्ये –

१. स्वम्भूदेवकृतं पउमचरिउ। (अष्टम शताब्दी)[४०]
२. रइधूकृतं पद्मपुराणं। (पञ्चदश शताब्दी)

(घ) कन्नडसाहित्ये –

१. नागचन्द्रकृतं पम्परामायणं। (एकादश शताब्दी)
२. कुमुदेन्दुकृतं रामायणम्। (षोडश शताब्दी)
३. देवप्पकृतं रामविजयचरितम्। (षोडश शताब्दी)
४. देवचन्द्रकृतं रामाकथावतारः। (अष्टादश शताब्दी)
५. चन्द्रसारवर्णीकृतं रामायणं। (एकादश शताब्दी)

२. गुणभद्रकृतम् उत्तरपुराणम्

i) उत्तरपुराणम् –

जैनसाहित्ये रामकथायाः पृथक्स्वरूपं सर्वप्रथमं गुणभद्राचार्यकृत-उत्तरपुराणे प्राप्यते। गुणभद्राचार्यः कर्नाटकप्रान्तस्य निवासी आसीत् जिनसेनाचार्यस्य च शिष्यासीत्। जिनसेनाचार्येण महापुराणस्य प्रथमभागे आदिपुराणे (पूर्वार्धे उत्तरार्द्धे च) श्रमणसंस्कृतेः, महापुरुषाणां नाभिरायादिक-कुलकराणां,

---

४०. भारतीय विद्या भवन, बम्बई सं. २००९

वृषभादिक-तीर्थङ्कराणां, भरतादि चक्रवर्तीनाञ्च श्रेष्ठपरम्परागतेतिहासस्य सुविस्तृतवर्णनं कृतम्। परन्तु जिनसेनाचार्यः स्वकृतिमसमाप्यैव दिवङ्गतोऽभवत्।

जिनसेनाचार्यस्य प्रमुखशिष्येषु गुणभद्राचार्योऽभवत्। गुणभद्राचार्येण स्वगुरुं प्रति पुण्यकर्तव्यमवगम्य स्वगुरोः भावनानुसृत्य ८९७ ई. सं. मध्ये ग्रन्थोऽयं पूर्णीकृतः। गुणभद्राचार्यस्य शिष्येन लोकसेनाचार्येण अस्य काव्यग्रन्थस्य प्रतिष्ठा कारिता।

अथानन्तरं महापुराणस्य द्वितीयभागः 'उत्तरपुराण' इत्यस्य रचना बङ्कापुरनगरेऽभवत्। उत्तरपुराणे द्वितीय-अजितनाथादितः त्रयोविंशति तीर्थङ्कराणां, सगराद्येकादशचक्रवर्तीनां, नवबलभद्राणां, नवनारायणानां नवप्रतिनारायणानां च जायमानानां विशिष्टपुरुषाणां कथानकाः लिखिताः।

उत्तरपुराणे न केवलं पौराणिककथानकमात्रमेव अपितु सैद्धान्तिकदृष्ट्या सम्यग्दर्शनादि-विषयाणां संसारबंधमोक्षसम्बन्धिनां विवेचनं कृतम्। दार्शनिकदृष्ट्या च सृष्टिकर्तृत्वादिसमस्यानां समाधानमपि कृतम्।

उत्तरपुराणे अष्टमबलभद्ररामस्य अष्टमनारायणलक्ष्मणस्य अष्टमप्रतिनारायणरावणस्य चरित्रं ६७,६८ पर्वे १११७ श्लोकेषु लिखितम्।[४१]

उत्तरपुराणे वर्णिता रामकथा विमलसूरिकृतरामकथायाः वाल्मीकिकृतरामकथायाश्च भिन्ना वर्तते। अस्याः वैशिष्ट्यमिदं वर्तते यद्दशरथः काशीनरेशो आसीत्। सीता रावणमन्दोदर्योः पुत्रीरूपेण स्वीकृता।[४२]

यद्यपि गुणभद्राचार्यस्य रामकथायाः आधारो अज्ञात इव वर्तते तथापि गुणभद्राचार्यः विमलसूरेः संघदासस्य च वर्णितपरम्पर्या परिचितो आसीत्।

जिनसेनाचार्यः आदिपुराणे आधाररूपेण कविपरमेश्वरस्य गद्य-पद्यकथायाः उल्लेखमकरोत्। यतोहि गुणभद्राचार्योऽपि जिनसेनाचार्यस्यैव रचनामेव पूर्णीकृतवान्। अतएव सम्भवतया गुणभद्राचार्योऽपि कविपरमेश्वरस्य कथामाधृत्यैव उत्तरपुराणे रामकथा निगदितवान्।

कविपरमेश्वरस्य रचना सम्प्रतिरप्राप्तास्ति परन्तु तिब्बतीरामायणे तदन्यग्रन्थेष्वपि च सीता मन्दोदर्याः पुत्रीरूपेण स्वीकृता। सम्भवतः रामकथायाः स्वरूपमिदं तदा जनसाधारणे प्रचलितं भवेत्। तथा च तदेव स्वरूपं कविपरमेश्वरेण गुणभद्राचार्येण च जैनपरम्परान्तर्गते निबद्धमकरादिति वक्तुं शक्यते।

---

४१. स्याद्वाद ग्रन्थमाला नं. ८, इन्दौर, सं. १९७५

४२. उत्तरपुराण, गुणभद्र, पर्व ६८, श्लोक १

नाथुरामप्रेमी महोदय: रामकथाया: आधारसम्बन्धे लिखति यत्तदुल्लिख्यते किञ्चित् – ''गुणभद्राचार्यात् पूर्वं विमलसूरिण: इव कस्यापि अन्याचार्यस्य जैनधर्मानुकूलं सोपपत्तिकं विश्वसनीयञ्च स्वतन्त्ररूपेण रामकथावृत्तं लिखितं स्यात् यत् गुणभद्राचार्याय गुरुपरम्पर्या प्राप्तं स्यात्।''

जैनपरम्परायां यद्यपि परम्पराद्वयमेव प्रचलितम् तथापि विमलसूरिकृतपरम्पराया एव अधिकं महत्त्वमास्ते। उत्तरपुराणे वर्णिता रामचरित्रकथा परम्परा यद्यपि प्रसिद्धिं न प्राप्तवती तथापि अनेककविभ्य: उत्तरपुराणस्य कथामाधृत्य काव्यरचना: कृता:।

आचार्यगुणभद्रस्वीकृतरामकथापरम्पराया: मुख्या: रचना: निम्नलिखिततालिकायामुद्धृता: सन्ति–

(क) संस्कृतसाहित्ये –

१. गुणभद्रकृतम् उत्तरपुराणम् (नवमी शताब्दी)[४३]

२. कृष्णदास– कविकृतं पुण्यचन्द्रोदयपुराणम् (षोडश शताब्दी)

(ख) प्राकृतसाहित्ये –

१. पुष्पदन्तकृतं महापुराणम् (दशमी शताब्दी)

(ग) कन्नडसाहित्ये –

१. चामुण्डरायकृतं त्रिषष्ठिशलाकापुरुषपुराणम् (दशमी शताब्दी)

२. बन्धुवर्माया: जीवनसम्बोधनम् (१२०० ई.)

३. नागराजकृतं पुण्याश्रवकथासार: (१३३१ ई.)

उत्तरपुराणस्य कथावैशिष्ट्यम्

१. सीता रावणमन्दोदर्यो: पुत्री आसीत्।

२. दशरथ: काशीनरेशोऽऽसीत् न तु अयोध्यानरेश:।

३. सीताया: लोकापवादस्य निर्वासनस्य च उल्लेखोऽत्र नास्ति।

४. लक्ष्मणस्य मृत्यु: रामस्य मृत्यो: समाचारात् परं नाभवत् अपितु असाध्यरोगेण जात:।

५. कैकय्या: हठधर्मिताया: रामवनवासस्य उल्लेखो न विद्यते।

६. स्वर्णमृगस्य पृष्ठे रामस्य धावनानन्तरं रावण: रामवेशं धारयित्वा सीतामपहृत्य लङ्कामानयत्।

७. लक्ष्मणेन बालिवध: कृत:।

८. अत्र सीताया: अष्टपुत्राणां वर्णनं वर्तते परन्तु लवकुशयो: नाम नास्ति।

---

४३. भारतीय ज्ञानपीठ, काशी सं. १९५४

मतभेद: किमर्थम् ?

पउमचरियमित्यस्य उत्तरपुराणस्य च कथायामीदृशो मतभेद: किमर्थम्? अस्मिन् विषये पं. नाथूराम प्रेमी महोदय:[४४] प्रस्तौति पउमचरिय-पद्मचरितयो: कथाया: अधिकांशभागो रामायणकथासदृशो वर्तते। दशरथ: काशीनरेश आसीदिति कथानकं बौद्धजातके (दशरथजातके) प्राप्यते। उत्तरपुराणवत् तस्मिन्नपि सीतानिर्वासन लवकुशयो: जन्मादिप्रसङ्गा: न प्राप्यन्ते। अर्थात् भारतवर्षे प्रचलिताया: रामकथाया: परम्पराद्वयं त्रयं वा यत् विद्यते। ता: परम्परा: जैनसम्प्रदायेऽपि प्रचीनकालादेव प्रचलिता: जाता: इति ज्ञायते।

तथ्यमिदं यत् पउमचरियमित्यस्य उत्तरपुराणस्य च रामकथाया: धाराद्वयं पृथक् पृथक् स्वतन्त्ररूपेण निर्मिता तथा च ता: अग्रे प्रवहन्त्य: सत्य: अद्यापि प्रचलिता:।

धाराद्वये गुरुपरम्पराया: भेदोऽपि भवितुं शक्यते। एका परम्परा एकेन स्वीकृता द्वितीया च अपरेणेति । अस्यां दशायां गुणभद्र: पउमचरियमित्यस्य धारया परिचित: सन्नपि तस्या अनुसरणं न कृतं स्यात् यद् सा परम्परा अस्माकं गुरो: परम्परा नास्ति।

रामकथाया: व्यापकप्रसार:

पूर्वोल्लिखितरामकथाया: विभिन्नधाराणामध्ययनेन स्पष्टं अस्ति यत् रामकथा जनमानसस्य हृदयेषु समाहिता आसीत्, अस्ति, इतोपि रामकथानामेतासाम् अस्तित्वं स्पष्टं वर्तते। प्रत्येकधारया संयुक्त: व्यक्ति: अद्यापि उदाहरणस्वरूपेण स्वपरम्परानुगुणं कथाया: चरित्राणामेव प्रसङ्गोपस्थिति: करोति। चेदत्र मूलकारणम् अयं वर्तते यत् भारतीय संस्कृति: आदर्शवादस्य सिद्धान्तेन सम्बद्धा अस्ति तथा च रामकथाया: प्रत्येकं पात्रं अस्मान् आदर्शस्वरूपाय प्रेरयति।

सोमसेनविरचितस्य रामपुराणस्य कथानकम्

रामपुराणस्य कथानकं वर्ण्यविषयं वा निम्नाङ्कितषड्भागेषु विभज्य अवगन्तुं शक्नुमः।

यदा राजा श्रेणिकः एकस्मिन् दिवसे भगवतः महावीरस्य प्रमुखशिष्येन गणधरेण वा गौतमस्वामिना रामकथायाः यथार्थस्वरूपं ज्ञातुं जिज्ञासते तदा जिज्ञासासमाधानाय गौतमगणधर रामस्य चरित्रं वर्णयति। प्रारम्भे विद्याधरलोकस्थ राक्षसवंशस्य वानरवंशस्य च वर्णनमस्ति। (1-2 सर्ग)

1. विद्याधरलोकस्थ राक्षसवंशः –

रत्नश्रवा इति राक्षसराज्ञ: केकस्याश्च चतस्र: सन्ततय: आसन् (1) दशमुख: (रावण:)

---

४४. जै. सा. इ. पृ. १५

(2) भानुकर्णः (कुम्भकर्णः) (3) चन्द्रनखा (सूर्पणखा) (4) विभीषणश्च। यदा रत्नश्रवा स्वपुत्रमवलोकयति स्मः तदा बालकः एको रत्नजटितहारयुक्तो आसीत्। रत्नमालायामस्य बालकस्य दशमुखानि प्रतिबिम्बितानि अभवन्। अतः बालकस्य दशमुखः दशाननः वा नामकरणमभवत्।

तद्रत्नेषु नवस्वेव तन्मुखं प्रतिबिम्बितम्।
ततो दशास्य इत्यस्याभिधानं राक्षसैः कृतम्।।५/७४।।

युवावस्थायां दशाननः मातृष्वसेयं वैश्रवणमपश्यत् तस्य वैभवमालोक्य आश्चर्यचकितो प्रभावितो च अभवत्। सोऽपि अन्यभातृणा सह तपस्यां कृतवान् तथा बहूनां विद्यानामधिपतिः अभवत्। विद्यासिद्ध्यां सत्यां रावणस्य शुभविवाहो मन्दोदर्या षड्सहस्रकन्याभिश्च सहाभवत्। रावणेन विद्यया एकं रमणीयं स्वयंप्रभनगरस्य रचना कृता। तस्मिन् नगर एव तेषां सर्वेषां निवासो आसीत्। तत्पश्चात् रावणः यमराजं तथा च वैश्रवणं पराजित्य पुष्पकविमानेन लङ्कानगर्यां प्रवेशं प्राप्तवान्। (5 सर्ग)

एकदा रावणः दूतमाध्यमेन बालिराज्ञः भगिनीं श्रीप्रभां प्रति विवाहप्रस्तावं प्रेषितवान्। अपरञ्च बालिः स्वयमागत्य रावणाय नमस्कृत्य मित्रतां स्वीकुर्यादिति प्रस्तावं प्रेषितवान्। तदा बालिः वीतरागिणं जिनवरं व्यतिरिच्य नान्यं कमपि नमस्करोमीत्युक्त्वा जैनेश्वरीदीक्षां अङ्गीकरोति। स्वसाम्राज्यं लघुभातृसुग्रीवाय समर्पयति। सुग्रीवराज्ञा स्वभगिन्याः श्रीप्रभायाः विवाहं दशाननेन सह कृत्वा मैत्रीञ्च स्वीकृत्य किष्किन्धानगरस्याधिपत्यं स्वीकृतम्।

एकदा बालिमुनिः कैलाशपर्वतस्योपरि तपः कुर्वन्नासीत्। ततः दशाननो विद्वेषपूर्वकं कैलाशपर्वतमेव उत्थापितवान्। तदा बालिमुनिना विचारितं यत् अनेन कार्येण जगतः जीवेभ्यः कष्टमभविष्यत्। अतः बालिमुनिः पादाङ्गुष्ठेन पर्वतं अनोदयत्। दशाननोऽपि पर्वतेन विनुद्य अत्यन्त तीव्रस्वरेण अरुदत्। अतएव दशाननस्य नाम ''रावणः'' इति जगति प्रसिद्धिमलभत।

खञ्च सर्वकष्टेन कृत्वा रावितवान् जगत्।
यतस्ततो गतः पश्चाद्रावणाख्यां समस्ततः।।51।।

अनन्तरं रावणस्य अतिशयभक्तिभावेन क्षमाशीलबालिमुनिना रावणः क्षन्तव्यः। धरणेन्द्रेण च रावणाय अमोघविजया शक्तिः प्रदत्ता। रावणस्य अनेकानि युद्धवर्णनानि सन्त्यस्मिन् रामपुराणे रावणस्य सहस्रकिरणेन, नलकुंवरेण, इन्द्रेण, यमेन, वरुणेन, इत्याद्यनेकराजभिः सह युद्धोऽभवत्। एते सर्वे देवाः नासन् किन्तु लोकपालादिनाम्ना नियुक्ताः विद्याधरनृराजान एवासत्।

खरदूषणो अपि विद्याधरवंशस्य राजकुमार एव। यः रावणस्य भगिन्या चन्द्रनखया सह विवाहमकरोत्। तयोः पुत्री अनङ्गपुष्पया सह वानरवंशी हनुमान् विवाहमकरोत्। तथा पुत्रशम्बूकस्यापि विस्तृतवर्णनमिहास्ति।

रावण: प्रसिद्धमान्यतानुसारेण राक्षसः नासीत् राक्षसवंशी विद्याधरो मनुष्य एव आसीत्। रावणोऽपि धर्मोपासक: आसीत्। तीर्थयात्रामन्दिरजीर्णोद्धारपूजादयादानतपश्चर्येत्यादिषु कार्येषु तत्परो आसीत्। स अन्यायानीतिरूपकुशासनस्य विरोधी आसीत्। यथा - नलकुंवरलोकपालशासित दुर्लङ्घ्यपुरस्य शालस्य साधनोपायं नलकुंवरस्य भार्या उपरंभा जानाति स्मः। उपरम्भायै रावणः अत्यधिकप्रियः आसीत्। यतस्तया रावणाय प्रेमप्रस्ताव: प्रेषित: तथा मायामयीकोटभेदोऽपि वर्णित: तथापि रावेणन तस्यै नलकुंवरेन सह विश्वासघातो न करणीय इति स्वीकृतम्।

सङ्गं परनरस्यास्य महापापस्य कारणम्।
तस्मात् भज स्वभर्तारं स्वसेव नलकुंवरम्।।७/७४।।

अथानन्तरं यदा रावण: मेरुयात्रां प्रति निर्गतवान्। तदा अनन्तवीर्यमुनिना केवलज्ञानं लब्धम्। अनन्तवीर्य-केवलिनः उपदेशेन रावण: प्रभावितोऽभूत्तस्तेन ''विरक्तपरनारीभिः सह रमणं संसर्गो व नैव कर्त्तव्य इति प्रतिज्ञा कृता।'' तद्यथा

तेन प्रतिज्ञां धृतम्

तस्मादेकं गहीष्यामि किञ्चिच्च फलदायकम्।
या नेच्छेत्परनारी मां तां न गृह्णामि शक्तितः।।८/२६।।

विद्याधरलोकस्थ **वानरवंशः** -

वानरवंशोत्पत्तिविषये श्रीकण्ठविद्याधरस्य अमरप्रभविधाधरस्य च नाम अग्रगण्यमिति। वानरवंशे एव प्रह्लादस्य पुत्रपवनञ्जयस्य हनुमानिति पुत्रस्योत्पत्ते: विस्तृतवर्णनं विद्यते रामपुराणे पवनञ्जयाञ्जनयो: पुत्रस्य नाम 'श्रीशैल' इति आसीत्। यथा

जन्म लेभे यतः शैले शैलं वा चूर्णयत्ततः।
श्रीशैल इति नामास्य चक्रे मात्रा ससूर्य च।।९/१६९।।

तथा हनुमान् इति नाम जगति प्रसिद्धमभवत्। तदुक्तम् यत् -

पुरे हनुरुहे यस्माज्जातः संस्कारमाप्तवान्।
हनुमानिति तेनागात्प्रसिद्धिञ्च महीतले।।९/१७०।।

यदा हनुमान् वरुणरावणयोर्युद्धे वरुणराजानं पराजित्य समागतस्तदा रावणेन प्रसन्नतया चन्द्रनखाया: पुत्र्या सह हनुमत: विवाह: कृत: । अन्येऽपि बहवो विवाहा: हनुमतोऽभवत्। हनुमान् चतुर्विंशतिकामदेवेषु अष्टादशमो कामदेव आसीत्।

2. रामसीतयोः जन्म तथा वैवाहिकप्रसङ्गाः –

रामकथायाः वर्णनं जनकस्य दशरथस्य च वंशावल्याः वस्तुतः प्रारभ्यते। हरिवंशोत्पत्तिः दशम–तीर्थङ्करशीतलनाथस्य कालात् प्रारभ्य मुनिसुव्रतनाथस्य कालपर्यन्तं प्रचलिता। जनककनकभ्रातृद्वयस्य जन्म हरिवंशे एव अभवत्। (१०–१३)

अपरञ्च इच्छ्वाकुवंशे समुद्भूतः राजा अनरण्यस्य पुत्रः राजा दशरथः प्रसिद्धः। दशरथस्य अपराजितया तथा सुमित्रया सह विवाहानन्तरं एकं कथानकं प्रसिद्धमस्ति यत् –

एकदा नारदेन दशरथपार्श्वे गत्वा समाचारः प्रदत्तः यत् विभीषणः तव मरणहेतौ संकल्पितोऽस्ति। यतोहि सागरबुद्धिनिमित्तज्ञानिना सूचितं यत् जनकपुत्रीसीतायाः निमित्तात् दशरथस्य पुत्रेण तव भ्रातुः रावणस्य मरणं सुनिश्चितमस्ति।

निमित्तज्ञानिना निवेदितमिदं यत् –

दशरथस्य पुत्राणां हस्ते मृत्युस्तव प्रभोः ।।१४/७।।
जनकस्य सुता सीता निमित्तादतिदुर्घटात् ।।१४/८।।

नारदेन इदमेव कथानकं जनकायापि वर्णितम्। इमां वार्तां श्रुत्वा उभौ राजानौ स्व–स्वराज्यं विमुञ्च्य अन्यत्र पृथिव्यामुपरिभ्रमणं अकुरुताम्। मन्त्रिभिः सह विचारविमर्शेण दशरथजनकयोः प्रतिरूपौ निर्माप्य प्रासादे स्थापितौ। विभीषणेन आगत्य सजीवसदृशी प्रतिमायाः शिरच्छेदं कृतम्।

भ्रमन्तौ राजानौ जनकदशरथौ च कौतुकमंगलनगरं प्राप्तवन्तौ। तत्र कैकय्याः स्वयंवरायोजनं प्रचलति स्म। पूर्वसंस्कारवशाद् कैकयी दशरथं स्वीकृतवती। एतद्दृष्ट्वा अन्ये राजानः क्रोधयुक्ता अभवन्। दशरथस्य अन्यरुष्टराजाभिः सह युद्धमभवत्। यस्मिन् कैकयी अतियत्नतः दशरथस्य रथं सञ्चालितवती। विवाहानन्तरं युद्धं जित्वा यदा द्वावपि स्व–स्व राजधानीनगर्यां पुनरागच्छताम्। गृहं पुनरागत्य दशरथेन कैकय्याः रथसञ्चालनस्य कुशलतायाः कृते प्रसन्नं भूत्वा वरमेकं प्रदत्तम् तदा कैकयी अवदत् – ''यथासमये वरस्य उपयोगं करिष्यामीति।''

दशरथस्य चत्वारः पुत्राः प्रसिद्धाः जाताः। यथा – अपराजितायाः रामः प्रसिद्धः, सुमित्रायाः लक्ष्मणः, कैकय्याः भरतः तथा सुप्रभायाः शत्रुघ्नोऽभवत्।

सीतोत्पत्तिविषये बहव्यः धारणाः प्रसिद्धाः

रामपुराणानुसारेण सीता रावणस्य पुत्री आसीत्। रावणेन च पुत्रीं सीतां पूर्वजन्माऽनुवैरिणीं ज्ञात्वा मारीचसहाय्येन दूरदेशे महीतले क्षेपायितम्। तदनन्तरं अग्रिमप्रभातकाले लाङ्गलपद्धतौ सा कन्या सीता जनकाय लब्धा। (१४/१६९–१८२)

ततः प्रभृति राजा जनक रानी विदेहायाः च एका पुत्री सीता प्रसिद्धा तथा एकः पुत्रः भामण्डलोऽपि प्रसिद्धः।

रामेण म्लेच्छविजयं कृत्वा जनकस्य स्वदेशसंरक्षणे अतिसहायतां कृतम्। तदा जनकाय रामस्य निपुणतायाः शूर-वीरतायाः युद्धकौशलस्य च ज्ञानमभवत्। यत्परिणामस्वरूपेण रामसीतयोः वाग्दानमभवत्। अस्मादतिरिच्य रामस्य श्रेष्ठतायाः परिचयः सीतायाः स्वयम्वरेऽप्यभवत् यदा रामः वज्रावर्तधनुर्चापं उन्नतवान्। रामसीतयोः विवाहः सानन्दः सम्पन्नोऽभवत्।

लक्ष्मणोऽपि सागरावर्तधनुर्चापं उन्नतवान् अतः प्रसन्नतया चन्द्रावर्धनः चपलवेगो वा विद्याधरो राजा लक्ष्मणस्य विवाहं अष्टादशकन्याभिः सह कारितवान्। राजा कनकेनापि भरताय स्वपुत्री लोकसुन्दरी अर्पिता।

अथानन्तरं दशरथः वैराग्यं प्राप्तवान्। अतो दशरथो रामस्य राज्याभिषेकं कृत्वा वनगमनाय उद्यतोऽभूत्। दशरथं दीक्षायै उद्यतं दृष्ट्वा भरतोऽपि दीक्षायै उद्यतोऽभूत्। दशरथभरतयोः द्वयोरेव दीक्षायै उत्सुकतां दृष्ट्वा कैकयी अतिव्याकुला अभूत्। सा चिन्तितवती यत् पतिपुत्रयोः द्वयोरपि दीक्षाग्रहणे सति अस्मिन् प्रासादे मम किं प्रयोजनम्?

अतः सा स्मृतवती यत् विवाहानन्तरं यदैकं वरं राज्ञा मह्यम् प्रदत्तम् तेन वरनिमित्तेन अहं भरतस्य राज्याभिषेकस्य स्वीकृतिं प्राप्य भरतं राज्यवैभवे रामयित्वा दीक्षाग्रहणात् रोद्धुं शक्नोमि। एतद् विचार्य कैकयी दशरथेन वरं याचितवती -

देहि पुत्रस्य मे राज्यमेति तं याचतेऽधुना।
किमप्याकूतमापन्ना निरपेक्षा मनस्विनी।।16/20।।

कैकय्याः याचितवरेन दशरथः अत्यन्तव्याकुलाऽतीवचिन्तितमना जातः। इदानीं किं कर्तव्यम्? इति समस्यापन्नऽभवत् तथा राममकथयत्

मर्यादा न च नामेयं यद्विहायाऽग्रजं क्षमम्।
राज्यलक्ष्मीवधूत्सङ्गां कनीये प्राप्यते सुते।।16/23।।
न वेद्मि तदहं चिन्तावार्तान्तरस्थितः।।16/25।।

तदा रामः पुत्रस्य कर्तव्यं कथयित्वा पितरं शोकान्निवारयति

पुनाति त्रायते चायं पितरं योऽतिशोकतः।
एतत् पुत्रस्य पुत्रत्वं प्रवदन्ति मनीषिणः।।16/29।।

पित्रे सत्यव्रतरक्षणाय प्रेरयति

तात रक्षात्मनः सत्यं त्यजास्मत्प्रतिचिन्तनम्।
शक्रस्यापि श्रिया किं मे त्वया कीर्तिमुपागते।।16/27।।

यदा दशरथ: स्थिरचित्तो भूत्वा भरतस्य राज्याभिषेकस्य निर्णयं कृतवान्। परन्तु भरतोऽपि राज्यपदं अस्वीकृतवान्। तदा राम एव भरतं पितुराज्ञां पालयितुं प्रेरयति। लिखितमस्ति यत् –

तातेन भ्रातरुक्तं यत्कोऽन्यस्तद्गदितुं क्षमः।
न हि सागररत्नानामुत्पत्तिः सरसो भवेत्।।16/41।।

अनेन प्रकारेण अग्रजभ्रातृरामस्य आदेशं स्वीकृत्य भरतः नृपपदं स्वीकृतवान्। राम: पित्राज्ञापालनाय स्वयं वनं गन्तुमुद्यतोऽभूत्। एतच्छ्रुत्वा रामस्य भार्या सीता तथा अनुजभ्राता लक्ष्मणोऽपि रामेण सह वनमगच्छताम्।

रामादीनां वनगमनानन्तरमेव दशरथः दीक्षां धृत्वा मुनिपदमङ्गीकरोति। पश्चात्तापिनी कैकयी भरतं रामादीनां प्रत्यागमनाय अनुरोधयति प्रार्थयति वा।

तस्मादानय तौ क्षिप्रं समं ताभ्यां महासुखम्।
सुचिरं पालय क्षोणीमेवं सर्वं विराजते।।16/104।।

कैकय्याः अनुरोधेन भरतादय: सर्वे प्रमुखाः जनाः वनं गत्वा रामादिभिः अयोध्यां प्रत्यागमनाय प्रार्थयन्ते।

कैकयी आत्मन: अपराधं स्वीकृत्य रामेण कथयति यत्

पुत्रोतिष्ठ पुरं यामः कुरु राज्यं सहानुजः।
ननु त्वया विहीनं मे सकलं विपिनायते।।16/123।।
भरत: शिक्षणीयोऽयं तवाऽत्यन्तमनीषिणः।
स्त्रैणेन नष्टबुद्धेर्मे क्षमस्व दुरनुष्ठितम्।।16/124।।

तदा रामः माताकैकयीं सम्बोधयति यत् –

उक्तं तातेन यत्सत्यं तत्कर्त्तव्यं त्वया मया।
भरतेन च दुष्कीर्तिर्माभूदस्य जगत्त्रये।।16/126।।

तथा रामः उदारचित्तेन पुनः भरतस्य राज्यमभिषेचयति –

इत्युक्त्वा पुनरप्यस्य पद्मो राज्याभिषेचनम्।
चकार कानने रम्ये समक्षं सर्वभूभृत्ताम्।।16/128।।

अन्ते भरत: रामस्य सर्वाज्ञां स्वीकृत्य एकां प्रतिज्ञां प्रणीतवान् यत् रामप्रत्यागमनपश्चात्

सः दीक्षां ग्रहिष्यति।

अग्रतोऽवग्रहं तस्य चकार भरतः सुधी।
पद्मदर्शनमात्रेण करिष्ये मुनितामिति।।16/135।।

अनेन प्रकारेण रामादीनां वनयात्रा प्रारभ्यते।

3. वनभ्रमणम् –

यात्रायाः प्रारम्भे चित्रकूटवनस्य मनोहरं रमयीणञ्च वर्णनमस्ति। ततः अग्रिमयात्रायां अनेकासु नगरीषु ते विरमितवन्तः विरोधिनृपांश्च सर्वान् विजितवन्तः। यथा

- वीतरागिजिनाय एव नमस्कारं करिष्यामीति नियमधारिणः वज्रकर्णस्य विरोधिनं सिंहोदरं विजितवन्तः।
- म्लेच्छनृपरुद्रभूतिं विजितवान् येन कल्याणमालायाः पिता बालिखिल्यः कारावासे निपातितः। अस्मिन् विजयक्रमे लक्ष्मणाय क्रमशः कल्याणमालायाः, वनमालायाः रतिमालायाः जितपद्मायाः प्राप्तिः अभवत्। लक्ष्मणः तान् सर्वान् आश्वासयति यत् अयोध्याप्रत्यागमनसमये सर्वान् स्वनगरं नेष्यसि।
- कपिलबाह्मणेन सह मेलनमभवत्। देशभूषण-कूलभूषणमुन्योः उपसर्गनिवारणमभूत्। तथा रामाज्ञया वंशस्थलपर्वते वंशपुरनरेन्द्रेण सुरप्रभेण अनेकानां जिनमन्दिराणां निर्माणं कृतम्। ततः रामस्य उपकारस्वरूपे वंशस्थलगिरेः नाम एव ''रामटेक'' इति प्रसिद्धोऽभवत्।

  रामः स्थितो यतस्तत्र तस्माद्रामगिरिः स्मृतः।
  प्रतिष्ठा यागतैर्ल्लोकैस्तदाख्यां सिद्धितां गताः।।19/119।।

ततः निर्गमनात् रामादयः दण्डकारण्ये प्राविशन्। तत्र दिगम्बरमुनेः अनुद्दिष्टाहारविधेः आहारमभवत्। मुनिना जटायुपक्षिणः पूर्वभवान् ज्ञात्वा साधर्मीवात्सल्यगुणेन मैत्रीभावेन तेन सह वनभ्रमणमकरोत्।

4. सीतापहरणं तथा सीताऽन्वेषणम् –

दण्डकवने नगरनिर्माणयोग्यभूमिमन्वेषणाय यदा लक्ष्मणः इतस्ततः भ्रमति स्म तदा सुगन्धिभिराकृष्ट्य यस्मिन् स्थाने गतवान् तत्र चन्द्रनखाखरदूषणयोः पुत्रः शम्बूकः सूर्यहास-खड्गसिद्धये द्वादशवर्षेभ्यः साधनारतो विद्यते स्म। यदा शम्बूकः साधनायां सफलोऽभवत् सूर्यहासखड्गञ्च प्रकटमभवत्। तदैव संयोगवशाद् लक्ष्मणोऽपि तत्रैव आगतवान्। खड्गं प्रपश्य तस्य तीक्ष्णता परीक्षणाय पार्श्वस्थितं बंसजालं छेदितवान्। लक्ष्मणेन अज्ञातभावेन बंसजालमध्ये स्थितशम्बूकस्यापि शिरच्छेदितम्। तत्समये एव शम्बूकस्य माता चन्द्रनखा तत्र आगतवती। पुत्रस्य

मृत्युं दृष्ट्वा अत्यन्तविलापं कृतवती। विलापावस्थायामेव वने मूढवत् यत्र तत्र विचरितवती।

भ्रमन्ती सती सा अत्यन्तरूपसौन्दर्ययुक्तौ रामलक्ष्मणौ अपश्यत्। पुत्रशोकं विस्मृत्य कामपीडिता भूत्वा आसक्तिवशात् रामलक्ष्मणौ प्रति विवाहप्रस्तावं करोति। रामलक्ष्मणयोरनासक्तिं दृष्ट्वा स रुष्टाऽभवत्। स्वपतिपार्श्वे गत्वा पुत्रमृत्युसमाचारं प्रस्तौति स्म। शोकानलेन प्रदीप्तः खरदूषणः युद्धाय प्रणयनमकरोत्। रावणाय अपि युद्धाय आमन्त्रणं प्रेषितवान्।

खरदूषणेन सहलक्ष्मण: एव युद्धमकरोत्। रामाय इदं निवेदितम् यत् –

संरक्ष राजपुत्री त्वं प्रत्यरातिं व्रजाम्यहम्।
ज्ञेया च सिंहनादेन मम यद्यापदुद्भवेत्।।20/77।।

खरदूषणस्य युद्धे सहायतार्थं रावणो आगत:। वने रामेण सह सीतां अवलोक्य तत्समये एव रावण: सर्वं नीतिनियमादिकं विस्मृतवान्। स सीतां प्रति अत्यन्तासक्तोऽभवत्। प्रीतियुक्तचित्तो भूत्वा स सीताप्राप्तयै यथाशक्तिं प्रयासरतोऽभवत्। सोऽवलोकिनीविद्यया ज्ञातवान् यत् लक्ष्मण: सिंहनादमाध्यमेन यदा रामं संकेतयिष्यति तदैव राम: लक्ष्मणस्य युद्धे सहायतार्थं गमिष्यति।

अनेन प्रकारेण स रावण: सिंहनादं कृत्वा रामं लक्ष्मणसहायतार्थं युद्धं प्रति प्रेषितवान् स्वयं च सीतामपहृत्य लङ्कां गतवान्। युद्धभूम्यां यदा लक्ष्मणः रामं दृष्टवान यत् सिंहनादं विना मिथ्यासिंहनादं श्रुत्वैव भ्रातारामः सीतां एकाकिनीं व्यतिरिच्य अत्रागत: तदा तु अवश्यमेव किमपि अनिष्टस्य आशङ्का सम्भाव्यते। आशङ्कितरामस्य पुनरागमने यथार्थत: सीता तत्र नासीत्। वने यत्र तत्र सर्वत्र सीतान्वेषणेऽपि सीता न प्राप्ता।

रामो अत्यन्तदुःखी अभवत् –

त्वद्वियोगान्मृतं मां त्वं पश्यसि किं प्रिये वद।
मयि तव महाप्रीति: सर्वेन्द्रिसुखदायिनी।।20/129।।

क्रोधादुत्तेजितमना भूत्वा कथयति –

रन्ध्रं प्राप्य वने भीमे हा केनास्मिन् दुरात्मना।
हरिता जानकी कष्टं हतो दुष्करकारिणा।।20/135।।

सीताया: वियोगे स: मूढमानसवत् वने भ्रमन् सर्वेभ्य: पृच्छति स्म

भो भो सिंहा मृगा व्याला गावो द्विजा गजा वृकाः।
भवद्भि: सात्र दृष्ट्वा त्वं वदन्तु मां साम्प्रतम्।।20/136।।

अत्र राम: सीतावियोगादत्यन्तदु:खी आसीत् तत्र वानरवंशी सुग्रीवो राजा अपि स्वपत्नी–

वियोगे आकुलित आसीत्। मायावी साहसगतिविद्याधर: सुग्रीवरूपं धृत्वा तस्य पत्न्यां राजवैभवेषु च अधिकारं कृतवान्।

अत: सुग्रीवराजा अपि राज्यनिष्कासितो भूत्वा वनमागत्य रामशरणाश्रितो भूत्वा रामेण सह मैत्रीमकरोत्। रामोऽपि मित्रवत्सलो भूत्वा तमाश्वासितं यदुक्तञ्च –

रामोऽवोचत् तमाहूय सुग्रीवं वानरध्वजम्।
मायाविनञ्च निर्घाट्य तुभ्यं दास्यामि भूपदम्।।21/171।।

अथानन्तरं रामेण साहसगतिविद्याधरं मारयित्वा सुग्रीवाय तस्य राज्यं समर्पितम्। सुग्रीव: तु पत्नीं प्राप्य सुखी अभवत् सीतावियोगे दुखितरामाय भूतलेऽस्मिन् कुत्रापि सुखानुभूति: न भवति स्म। तत्पश्चात् सुग्रीवस्याज्ञया विद्याधरा: समस्तभूतले सीतान्वेषणे प्रतिबद्धा: अभवन्।

सुग्रीवाय एकदिवसे कम्बूद्वीपे रत्नजटीविद्याधर: अमिलत्। स उक्तवान् –

ततो रावणराजस्तां नीत्वा नभसि गच्छति।
मयोक्तं तत्र हे पापिन! सीतेयं रामवल्लभा।।22/48।।

त्रिखण्डाधिपतिरावणमहाराज्ञ: नाम श्रुत्वा सर्वे विद्याधरा: रावणेन युद्धं साक्षात् मृत्युनिमित्तकं मत्वा युद्धस्य विचारं तयक्तवन्त:।

तथापि जाम्बूनदनरोत्तमेन रावण विजयस्य रहस्यमेकमुद्घाटितम् –

रावणेन पुरा पृष्टोऽनन्तवीर्यो मुनीश्वर:।
आत्मनो मरणं कस्य हस्ते देव भविष्यति।।22/119।।
तेनोक्तं सिद्धशिलां य उद्धरेत्स्वपराक्रमात्।
स एव हन्यते त्वां हि चक्रेण चाऽमुना दृढम्।।22/120।।

एतच्छ्रुत्वैव सर्वे जना: विद्याधरविमानेभ्य: सिद्धशिलां यान्ति। तत्र लक्ष्मणः अत्यन्तपराक्रमं प्रदर्शयति–

कृत्वा सिद्धान्नमस्कारं बद्धा वस्त्रपरीकरं।
लक्ष्मण: स्वभुजाभ्यां तामुद्धरच्च जयारवै:।।22/125।।

लक्ष्मणस्य पराक्रमं दृष्ट्वाऽपि सर्वे विद्याधरा: भीतमानसा: आसन्। अतएव तै: पवनपुत्रहनुमन्तं रावणं अवबोधयितुं नियुक्तम्। येन विभीषणसहाय्येन हनुमान् लङ्कांपुरीं गत्वा रावणं अवबोधितवान् सीतया च सह मेलनं कृत्वा प्रत्यागतवान्।

हनुमान् लङ्कायात्रायां स्वमातामहं महेन्द्रं विजितवान्। मात्रा अञ्जनया सह मिलित्वा मातुलमपि रामपार्श्वे प्रेषितवान्।

अग्रे गत्वा दधिमुखनगरे मुनिद्वयस्य उपसर्गनिवारणं कृतम्। दधिमुखनगरस्य राजा तिसृभिः कन्याभिः सह मिलितः। तासाञ्च विवाहः साहसगतिविद्याधरस्य घातकेन रामेण सह निश्चितमभूत्। तानपि रामं प्रति वने एव प्रेषितवान्।

तेन लङ्कांनगर्यां प्रवेशार्थं मायामयीकोटभङ्गीकृतं यत् सीतापहरणानन्तरं रावणाज्ञया लङ्कायाः सुरक्षायै विनिर्मितम्। तत्र कोटरक्षाधिकारिणं वज्रमुखं मारयित्वा तस्य पुत्रिणा लङ्कासुन्दरिणा सह विवाहमकरोत्।

अथानन्तरं विभीषणेन सह सम्मेलनमभवत् तथा रावणस्य अनैतिकतायाः सीतापहरणस्य दुःखदवार्तालापो अभवत्। पश्चात् सीतादर्शनाय अशोकवनं गत्वा हनुमान् पश्यति यत् –

वामकरकपोलस्था मुक्तकेशी कृशोदरी।
शोकवह्निसमावाष्पा रूपलावण्यभूषिता।।22/257।।
सेव्यमाना बहुस्त्रीभिर्जलपूरितलोचना।
रोहिणीव सती सीता दृष्टा तेन हनुमता।।22/258।।

अनुभवति यच्च –

सोऽवोचन्मनसीदं स्वे सीतागुणानुरञ्जिता।
सत्यं रोदति रामोऽस्या सद्गुणैश्चित्तव्याकुलः ।।22/259।।

हनुमान् सीतया वार्तालापं करोति मुद्रिका च प्रददाति –

ततोऽसौ भ्रमराकारं स्वयं भूत्वा सुमुद्रिकां।
सीतायाः क्षिप्तवानङ्के वृक्षस्योपरिसंस्थितः।।22/260।।

सीतायाः दर्शनं प्राप्य स्वजीवनं धन्यमनुभवति। तदुक्तञ्च –

श्रीशैलोऽसौ ततः प्राह तव दर्शनदर्शनात्।
फलितं पुण्यवृक्षं मे ततः सर्वं भविष्यति।।22/279।।

हनुमान् सीतया भोजनग्रहणाय प्रार्थयति। सीता प्रतिज्ञां कृतवती यत् रामागमनस्य प्रथमसङ्केते प्राप्ते एव सा भोजनग्रहणं करिष्यसि। भोजनान्तरं हनुमान् सीतायै स्वस्कन्धमारोप्य राघवसमीपं प्रत्यागमनस्य प्रस्तावं करोति परन्तु सीतालोकापवादभयात् नाऽऽगता। तथोक्तं –

तत्राऽऽगन्तुमयुक्तं मे रामस्यानुज्ञया विना।
लोकोऽयं परमो मूर्खश्चापवादं करिष्यति।।22/305।।
चूडारत्नमिदं वीर गृहाण रघुभूभृते।
मत्प्रत्यकरं देहि वाक्याच्च त्वमिदं वद।।22/306।।

वैदेह्या ध्रीयते प्राणास्तवदर्शनवाञ्छया।
त्वां विना मेऽत्र सर्वेऽपि प्रभो जानाहि बान्धवा।।22/307।।

प्रत्यागमनसमये हनुमान् लङ्कायां उपद्रवं करोति। इन्द्रजित् हनुमन्तं बध्वा रावणसम्मुखं प्रस्तौति यदा तदा हनुमान् रावणं वदति।

परस्त्रीतस्करः पापी श्वभ्रं यास्यति रावणः।
तेन समं भवन्तोऽपि व्रजिष्यथ हि नारकम्।।22/342।।
नाशकाले हि सर्वेषां बुद्धिर्नाशोऽत्र जायते।
त्यक्त्वा सारं सदाचारं दुराचारं रमन्ति ते।।22/343।।

एतद् कथयित्वा स्वबन्धनानि त्रोटयित्वा रावणप्रासादं ध्वंसीकृत्य सीतायाः सन्देशः रामं प्रति नयति।

5. **युद्धम्**

रावणेन युद्धाय रामलक्ष्मणौ द्वावपि आतुरौ आस्ताम्। अतः लक्ष्मणाज्ञया सुग्रीवादयः सर्वे विद्याधराः युद्धहेतोः कटिबद्धा अभवन्। शुभतिथिं प्रपश्य ते सर्वे युद्धहेतवे प्रस्थानं कृतवन्तः

मार्गशीर्षस्य कृष्णायां पञ्चम्यामुत्तमे दिने।
नानावाक्यैश्च युक्तास्ते गच्छन्ति शकुनैः शुभैः।।23/12।।

रामादयः लङ्कागमनहेतोः विद्याधरविमानेषु संतिष्ठ्य प्रस्थानं कृतवन्तः। लङ्कायात्रायां सर्वप्रथमं नलेन वेलन्धरद्वीपस्थितं समुद्रराजानं विजितं तथा समुद्रराज्ञया लक्ष्मणाय चतस्रः कन्याः अर्पिताः। अनेकान् राज्ञः पराजित्य रामादयः सर्वे लङ्कां आगच्छन्ति। दूतमाध्यमेन एतत् समाचारं रावणसभायां सूचितम्। तदा विभीषणेन रावणाय नीतिनियमानुपदिष्टवान्। सीतां रामं प्रति सम्मानं प्रेषयितुं लङ्कायां सुखपूर्वकं राज्यनिर्वहनस्य विनयमकरोत्। विनयपूर्वकमेव तदुक्तम् –

त्वं लङ्केशो जगत्स्वामी न्यायमार्गप्रवर्तकः।
देहि सीताञ्च पद्माय त्यज दुष्टं दुराग्रहम्।।23/29।।
पापाद्रङ्कायते राजा तस्मात्पापं परित्यज।
कुरु सारं सदाचारं परस्त्रीसङ्गवर्जितम्।।23/36।।

रावणः आवेशेन विभीषणस्य अपमानं कृत्वा तं देशनिष्कासनस्यादेशमददात्। विभीषणोपि स्वसमस्तसेनासाम्राज्यं ग्रहीत्वा हंसद्वीपे रामस्य शरणमायाति स्म।

विभीषणं रामस्योन्मुखं आगच्छन् दृष्ट्वा रामः वज्रावर्तधनुः तथा लक्ष्मणः सागरावर्तधनुः

हस्ते ग्रहीतवन्तौ। दूतमाध्यमेन विभीषण: तान्नमस्कृत्य कथयति –

कृत्वा वैरं समं भ्रात्रा तव शरणमागत:।
रक्ष देव कृपां कृत्वा राक्षसेशं विभीषणम्।।23/52।।

तदा राम: जाम्ब्वाद्यामन्त्रिण: सत्यज्ञापनार्थं निवेदयति। मन्त्रिसमूहे समुपस्थित: समुद्रमति: वदति यत् हे राम!

तवपुण्यानुसारेण सर्वसुन्दरमेव परिणमति। तथा विभीषणस्य प्रशंसा करोति –

धर्मपक्षी सदाचारी वर्तते स विभीषण:।।23/54।।
विरुद्धो बन्धुना सार्द्धं जातोऽस्ति तस्य निश्चित:।
तव पुण्यानुसारेण सुन्दरं किं न जायते।।23/55।।

विभीषणस्य यथासत्यस्वरूपं ज्ञात्वा प्रसन्नतया रामेण विभीषणेन सह मैत्री कृता। विभीषणं स्वकीयं लङ्कासाम्राज्यं तथा च सम्पूर्णमपि राक्षसद्वीपं दातुं वचनमकरोत्। तदैव सीताया: भ्राताभामण्डलोऽपि युद्धहेतवे रामस्य पार्श्वे आगतवान्। अनेन प्रकारेण रामस्य सैन्यसमूहो वर्द्धित:।

अथानन्तरं रावणस्य 4000 अक्षौहिणीसेनाया: विस्तृतवर्णनं कृतम्। रावणस्य सैन्यसमूहो रामसैन्यसमूहात् अतिविशालतमो आसीत्।

अथ रामरावणयोर्युद्धं प्रारम्भ्यते। अत्यन्तदुष्करेऽस्मिन् युद्धे सर्वप्रथमनलनीलौ पूर्ववैरसंस्कारवशात् हस्तप्रहस्तौ मारितवन्तौ। पश्चात् हनुमतः मालिना सह युद्धमभवत् येन मालि: मूर्च्छाङ्गत: तथा व्रजोदर: मरणमाप्नोत्। जम्बूमालिना हनुमान् मूर्च्छितोऽभवत्। पुनर्सञ्ज्ञां सम्प्राप्य हनुमानेन वज्रदण्डप्रहारेण जम्बूमाले: मरणं कृतम्। जम्बूमाले: मरणं पश्य राक्षसा: हनुमन्तं परिबाधितवान्। अन्ये वानरवीरा: सहायतार्थमागच्छन् परन्तु कुम्भकर्ण: निद्राशक्त्या सर्वान् वानरवीरान् अचेतयत्। सुग्रीव: प्रतिबोधिनीविद्यया सर्वेभ्य: जागृतं कृतवान्। एतत्प्रपश्यन् इन्द्रजित् सुग्रीवेण योद्धुमागत:। सुग्रीवेण तं कथितम् यत् –

अन्यायकारिणां सिद्धिर्दृष्टा कार्यस्य न क्वचित्।

मेघनाथभामण्डलयोर्युद्धं वज्रनक्रविराधितयोर्युद्धं मारीचमहेन्द्रयोर्युद्धं शूकेन सह नलनीलयोर्युद्धमभवत्। युद्धे इन्द्रजितमेघवाहनाभ्यां सुग्रीवभामण्डलौ नागपाशेन कृतबद्धौ। कुम्भकर्णेन हनुमान् जर्जरीकृत:। तदानीं विभीषणेन सुग्रीवभामण्डलौ तथा अंगाङ्गदाभ्यां हनुमान् रक्षिता:। यतोहि सुग्रीवभामण्डलौ द्वावपि नागपाशेन सम्बद्धौ आस्ताम् अतएव राम: महालोचननामकं गरुडेन्द्रं स्मृतवान् येन वंशस्थलपर्वते देशभूषणकुलभूषणयो: उपसर्गनिवारणसमये रामं कथितम् यत् –

"कष्टे मां समर" ।।23/182।।

गरुडेन्द्रेण रामाय सिंहवाहिनीहलमुशलादयः अनेकाः शक्तयः प्रदत्ताः। तथा लक्ष्मणाय गारुडीत्यादयः। गारुडीशक्त्या सुग्रीवभामण्डलौ नागपाशेन मुक्तौ जातौ। अपरे दिवसे रावणविभीषणयोः इन्द्रजिल्लक्ष्मणयोः तथा कुम्भकर्णरामयोः युद्धोऽभवत्। तदा रामलक्ष्मणाभ्यां शक्रजितकुम्भकर्णौ नागपाशेन बन्धयित्वा मूर्च्छितौ कृतौ। विराधितेन मेघनाथो नागपाशेनैव मूर्च्छितः कृतः। तथा रामाज्ञया त्रयः एव बन्धनागारे बन्धिनः जाताः। अनन्तरं रावणस्य त्रिशूल-प्रहारेण लक्ष्मणः विभीषणं रक्षितवान्। तदा तीव्रकोपेन रावणेन यत् कैलाशे धरणेन्द्रेण प्रदत्ता तया अमोघशक्त्या लक्ष्मणस्य हृदयविघातनं कृतम्। येन लक्ष्मणो मूर्च्छितोऽभवत्। तदा रामरावणयोः युद्धं प्रारभत् परन्तु रामस्य कोपयुक्तात्यन्ततीव्रबाणवृष्ट्या रावणो व्याकूलो भूत्वा स्वपुरङ्गतः। रावणः स्वान्तःपुरसभायां उपविश्य बन्धनागारे जातान् बान्धवान् प्रति सुशोकं कृतवान् -

हा भ्रात! हा सुतौ! दुःखाद्बन्धने पतिता कथम्।
भवतामाश्रयाद्युद्धे जयं प्राप्याम्यहं सदा।।24/46।।
अधुना सकलं कार्यं नाशं जातं परं मम।
इत्यादि विविधं दुःखं करोति रावणप्रभुः।।24/47।।

अत्र रामोऽपि लक्ष्मणमूर्च्छ्या शोकयुक्तो आसीत् -

मूर्च्छितं लक्ष्मणं दृष्ट्वा मृतमिव नरोत्तमम्।
मूर्च्छां सम्प्राप्य रामोऽपि पतितो गतसञ्ज्ञकः।।24/50।।
सञ्ज्ञां प्राप्योपचारैः सः शोकं करोति राघवः।
हा हा वत्स विदेशे त्वं त्यक्त्वा मृतोऽसि मां कथम्।।24/51।।
कुतः सीता कुतो माता कुतस्तातः कुतो धनम्।
गते भाग्ये च तत्सर्वं गतं भ्रातस्त्वया समम्।।24/52।।

तदानन्तरं तस्यां रात्रौ रामदर्शनाभिलाषी शशिप्रभविद्याधरेण लक्ष्मणस्य जीवितोपायं वर्णितम्। हनुमान् भामण्डलाङ्गदाभ्यां सह औषधिस्वरूपां विशल्यां एव आनीतम्। विशल्याकरनीरेण लक्ष्मणेन सह अन्यसर्वान् मूर्च्छितान् योद्धान् जीवितवन्तः। पश्चात् लक्ष्मणविशल्ययोः विवाहसम्पन्नोऽभूत्।

तत्र शोकाकुलरावणाय मारीचादिभिः प्रमुखराजाभिः विचारं प्रकटितम् -

सन्नश्यति यदा पुण्यं तदा नश्यति वैभवः।
यत्र तत्र च सर्वत्रास्माकं क्षयं च दृश्यते।।25/4।।

तस्या हेतोः कथं कार्यं क्षत्रियाणां क्षयं प्रभो।
परस्त्रीसङ्गपापेन वंशनाशो विधीयते।।25/6।।

राजानः न्याय-नीति-नियमाननुसरयितुं प्रेरितवन्तः। तदा सर्वान् सचिवान् सन्तुष्ट्य ससंभ्रमी रावणः वृद्धदूतकेन रामाय सन्धिप्रस्तावं प्रेषयति -

देवाह रावणो धीमान् त्रिखण्डेशो जगत्पतिः।
मुञ्च मे भ्रातरं पुत्रौ कुरु सन्धिं मया समम्।।25/16।।
जानक्याशां परित्यज्य कन्यकानां शतत्रयम्।
संगृह्यतां मया दत्तमर्द्धराज्यञ्च साम्प्रतम्।।25/17।।

तदा रामेणापि उक्तं यत् -

ततो जगाद पद्माभश्चान्या स्त्रीसम्पदादिभिः।
अन्यद्रव्यैर्विना सीतां नास्ति मेऽत्र प्रयोजनम्।।25/18।।
तस्मात्प्रयच्छ सीतां मे मोचामि तव बान्धवान्।
अरण्येऽहं गमिष्यामि सुखेन भुञ्ज सम्पदः।।25/19।।

रामेण सन्धिप्रस्तावास्वीकारेण रावणः बहुचिन्तनोपरान्ते एतन्निश्चितवान् यत् सर्वं परित्यज्य बहुरूपविधायिनी विद्यासिद्धिः कर्त्तव्या। तस्याः सिद्धे सति मत्सर्वं कार्यं सिद्धं भविष्यति।

फाल्गुनशुक्लपक्षस्य अष्टम्यां तिथौ मन्त्रसिद्ध्यर्थं रावणः शान्तिनाथमन्दिरे संस्थितः। तद्दिनादेव अष्टाह्निकामहापर्व प्रारभत्। अष्टाह्निकामहापर्वणः युद्धविरामो अभवत्। अतः रामपक्षे अपि सर्वे जनाः नन्दीश्वरव्रतमुपेत्य चार्हतपूजां कुर्वन्ति स्म। तथापि वानरसैनिकेभ्य रावणस्य साधनायां अनेकाः विघ्नाः कृताः परन्तु ते सर्वे प्रयासाः असिद्धाः जाताः। रावणाय बहुरूपिणीविद्या सिद्धा जाता। विद्यापरीक्षणं कृत्वां रावणः हर्षपूरितमनसा सीतायै स्वस्य बहुरूपत्वं दर्शितुं वनं प्रत्यगच्छत्।

सीतायै स्वस्वरूपमदर्शयन् रावणस्य मनसि सहसा परिवर्तनोऽभूत्। मानशिखरेण अवतीर्य सीतया न्यायनीतिपूर्वकं वार्तालापमकरोत्

त्वां हृत्वा पापिना नीता मयात्र दुष्टचेतसा।
तथापि हि त्वया धीर्यं न मुक्तं शीलसम्भवम्।।25/101।।
मयापि गृहितं पूर्वं गुरोरग्रे वरं व्रतम्।
शक्त्या नाहं ग्रहिष्यामि परस्त्रीं पापकारिणीम्।।25/102।।

ततस्तव व्रतं सारं फलितं देवि सर्वथा।
अद्य प्रभृति मे पुत्री भवेत्त्वं नान्यथा सुते।।25/103।।

बहुरूपिणीविद्यायाः विशालस्वरूपमवलोक्य सीता स्वचेतसि भीताभूत्। अतो रावणं प्रति सा अकथयत् –

ततो जगाद वैदेही सत्यं तातोऽसि त्वं यदि।
तदा मा हन सङ्ग्रामे मद्बन्धुपतिदेवरान्।।25/104।।

अथानन्तरं रावणः स्वगृहमच्छत् तथा विचारं कृतवान् –

सजीवौ रामलक्ष्मीशौ धृत्वा सङ्गरमध्यगौ।
सीतां रामाय दास्यामि तदा कीर्तिर्भवेन्मम।।25/107।।

अग्रिमदिवसे यदा रावणः सभामध्ये उपविष्टः तदा बहवः मृत्यमूलप्रसूचकाः उत्पाताः सञ्जाताः। इत्याद्युत्पातकान् दृष्ट्वा सर्वे भयभीताः आसन्।

आशङ्कितमना मन्दोदरी अपि रावणं प्रति सन्देहं प्रकटयति –

आवाभ्यां या वने त्यक्ता पुत्रीयं सैव जानकी।
प्रसूतिसमये देव ततो योग्या न ते भवेत्।।25/129।।
शकुना दृश्यन्ते दुष्टास्तव प्रभो रणं प्रति।
ममात्र चास्ति सन्देहो उभयोः को जयिष्यति।।25/133।।
बलिनारायणौ जातौ पद्मलक्ष्मणसञ्ज्ञकौ।
त्वं प्रतिवासुदेवो हि तस्मात्त्यज्याभिमानताम्।।25/134।।
पूर्वं हि मरणं प्राप्ताः सप्तापि प्रतिकेशवाः।
अष्टमस्त्वं हि विख्यातो बुद्धिवांश्च पराक्रमी।।25/135।।

रावणो मन्दोदरीं सन्तोष्य युद्धे गतम् तथा तत्र मयराज्ञा सह रामस्य युद्धं प्रारभत। तदा रामबाणेन संछिन्नं मयं दृष्ट्वा दशाननः स्वयं योद्धुं समुद्यतः। ततो लक्ष्मणवीरः दशाननस्य सम्मुखे आगतः। दशाननलक्ष्मणयोः भीषणं युद्धम् अभवत्। अन्ते रावणेन बहुरूपिणी विद्यया भयङ्कररूपं कृतम्। लक्ष्मणेन एकादशाह्निपर्यन्तं सहस्रकोटिसङ्ख्यातानि रूपाणि छेदितानि। तेन बाणौघै बहुरूपिणीविद्या जर्जरा जाता। तस्याः सर्वं तनु छिन्नभिन्नं भयप्रदञ्च जातम्। रावणप्रभुं नत्वा सा विद्या पलायितवती।

तदा स्वस्य यथार्थरूपेण संस्थितो रावणः क्रोधेन दीप्तो भूत्वा शत्रुमस्तकछेदनाय

सुदर्शनचक्रं सम्पूज्य चाक्षिपत्। परन्तु चक्रो लक्ष्मणचक्रवर्तिनः हस्ते संस्थितोऽभवत् –

त्रिःपरीत्याथ लक्ष्मीशं तस्य हस्ते च संस्थितम्।
स्वैरं पुण्यानुसारेण खेचराणां सुखप्रदम्।।26/105।।
सत्यमेतौ च लोकेऽस्मिन् सञ्जातौ बलकेशवौ।
तद्दृष्ट्वा रावणोऽवोचच्चिन्तायुक्तः स्वचेतसि।।26/107।।

तदा लक्ष्मणचक्रेश्वरः रावणाय पुनः अवबोधयति –

अद्यापि देहि पद्माय सीतां सन्त्यज्य गर्वकम्।
नत्वा रामं मया दत्तं कुरु राज्यं नभश्चर।।26/111।।

परन्तु रावणः तु प्रतिनारायणः सिद्धो जातः। अतः मरणकाले रावणस्य मानोन्नतं आसीत्। अतः स तु इदानीमपि स्वशक्त्या एव युद्धाय समुद्यतो आसीत्। तदा तु लक्ष्मणेन क्रोधेन अग्निज्वालासमं दीप्तं चक्रं सम्भ्राम्य रावणं प्रति चिक्षेपितम्।

सम्भिन्ने हृदये वीरः पतितोऽसौ दशाननः।
भूमौ यथा च कन्दर्पो रतिदेव्या उरुस्थले।।26/117।।

दशवक्रस्य प्रतिचक्रिणः मृत्युं दृष्ट्वा सर्वे सुभटाः जनाः पलायितवन्तः। रामाज्ञया सर्वे बन्धीजनाः कुम्भकर्णादयः मोचितवन्तः। तथा ते सर्वे राक्षसकुमाराः विरक्ता भूत्वा दिगम्बरदीक्षां ग्रह्णन्ति स्म। मन्दोदरी, चन्द्रनखादयाः अष्टसहस्रयुवतयः शोकेन सन्तप्तो भूत्वा प्रासादं परित्यज्य आर्यिकाः अभवन्।

अथानन्तरं लङ्कायां प्रविश्य रामः सर्वप्रथमं सीतया साकं मिलति। देवगणाः अपि पुष्पवृष्ट्या सीतायाः निर्मलचारित्रस्य साक्ष्यं कुर्वन्ति। रामलक्ष्मणौ रावणस्य प्रासादे निवसतौ भरतराज्ञः आज्ञापालनं कुर्वन्तौ लङ्कायामपि सुखपूर्वकेन षड्वर्षं निवसतः स्म।

6. **उत्तररामचरितम् –**

नारदमुनिः लङ्कायामागत्य रामलक्ष्मणाभ्यां पुत्रवियोगाद्दुःखिताया अपराजितायाः सुमित्रायाश्च अवस्थां विवृणोति। येन रामलक्ष्मणौ साकेतप्रत्यागमनस्य निश्चयं कृतवन्तौ।

अयोध्यां प्रत्यागमने भरतराजा पूर्व-प्रतिज्ञापूर्वकेन दीक्षां धृतवान्। माता कैकयी अपि आर्यिकादीक्षां गृहीतवती। अस्मिन्नेव क्रमे त्रैलोक्याडम्बरगजस्यापि वर्णनमासीत् यः भरतराज्ञः पूर्वभवे सुहृदासीत्।

तदुपरान्ते रामलक्ष्मणयोः अयोध्यायां राज्याभिषेकस्य दिग्विजयस्य च वर्णनमस्ति।

बलभद्ररामस्य 8000 भार्याः आसन् येषु सीता-प्रभावती-श्रीदामा-रतिमण्डिनी च प्रमुखा आसन्। नारायणलक्ष्मणस्य 16000 भार्याः आसन् येषु विशल्यादयः अष्टप्रमुखाः देव्याः आसन्।

शत्रुघ्नः पूर्वसंस्कारवशात् राजामधुं विजित्य मथुरायाः शासनं स्वीकरोत्। रामराज्यं न्यायनीतिपूर्वकं प्रचलति स्म तदैव नगरजनेभ्यः सीतायाः लोकापवादं श्रुत्वा संभग्नमानसः श्रीरामः चेतसि व्याकुलो भूत्वा अचिन्तयच्च -

न चेत्त्यजामि तां सीतां तदा लोके भवेन्मम।
वंशे कलङ्क एवात्र यावच्चन्द्रदिवाकरौ।।29/78।।

लोकापवादस्य पीडया रामोऽपि अन्यथाचिन्तयतन् कथयति यत् -

स्त्रीचरित्रञ्च को लोके जानाति चपलस्थितिम्।
अनयापि कृतं तत्र किं कृत्यं दुष्टचिन्त्यताम्।।29/84।।
रावणरूपमालोक्याऽऽसक्ता जातास्ति जानकी।
ततः कलङ्किता लोकैर्नान्यथा दूषणं भवेत्।।29/85।।

एवं सीतां प्रति अन्यथा विचिन्त्य रामः सीतां परित्यक्तुं विचारयति। सेनापति-कृतान्तवक्रमादिशति यत् तीर्थयात्राप्रवाक्येन गर्भवतीसीतां सिंहनादवने त्यक्त्वा पुनरागच्छतु।

यदा सीतामेकाकिनीं त्यक्त्वा कृतान्तवक्रः अयोध्यां प्रत्यागच्छति स्म तदा जानक्या रामाय सन्देशः प्रेषितः -

लोकोक्त्याहं यथा त्यक्ता तथा मा त्यज राघव।
जैनधर्मं सुनिर्दोषं स्वर्गमोक्षसुखप्रदम्।।29/118।।

सीता मनसि अचिन्तयच्च -

दोषो नास्ति रघुनाथो लोका दुर्जनवाचकाः।
तदाऽपवादतो भीतः साधूनामीदृशी गतिः।।29/140।।

अथानन्तरं पुण्ययोगेन हरिवंशज राजावज्रजङ्घः तत्रागत्य सीतां पुण्डरीकपुरे आनयत्। तत्रैव अनङ्गलवणः मदनाङ्कुशश्च द्वे पुत्रे अभवताम्। तयोः शिक्षापालनं सर्वमेव तत्रैवाभवत्।

यदैकदा नारदः सीतायाः कुशलतां ज्ञापयितुं पुण्डरीकपुरमागतवान् तदा लवकुशाय ''रामलक्ष्मणवत् सम्पद्वृद्धेः'' आशीर्वादः प्रदत्तः। तदा लवकुशेन स्वमातुः पूर्वसर्ववृतान्तं ज्ञातम्। तौ द्वावपि रामलक्ष्मणाभ्यां युद्धं कृतवन्तौ। यदा सङ्गरे पक्षद्वयेषु एकोऽपि पराजितो न जातः तदा नारदेन पितृपुत्रयोः सम्मेलनं कारितम्।

सुग्रीवहनुमद्विभीषणादीनां विशेषानुरोधेन रामेण सीतायै अयोध्याऽऽगमनाय आमन्त्रणं प्रेषितम्। परन्तु सकललोकप्रत्याय दिव्यवह्निप्रवेशस्य प्रस्तावोऽपि प्रेषितः।

अयोध्याऽऽगमने रामसीतयोः गम्भीरवार्तालापोऽभवत्। रामाज्ञया महेन्द्रोद्याने एव दिव्यवह्निकुण्डः निर्मितः।

रामः स्वचेतसि संलापयति –

अहो साक्षाद्यमागारं वह्निकुण्डं कथं सती।
प्रविशति सुतौ त्यक्त्वा मुक्ताशां सर्ववस्तुनि।31/86।।

सीता वृषभादीन् जिनान्नमस्कृत्य वह्निकुण्डे प्रवेशयति स्वात्मानं परन्तु तदैव गगनस्थदेवाः विचारितवन्तः –

गगनस्थास्तदा शक्राः प्रोचुः चेतसि सादराः।
माहात्म्यं यदि शीलस्य दर्शयिष्यामि नो जनान् ।।31/99।।
अनाचारं करिष्यन्ति लुप्त्वा शीलव्रतं जनाः।
इति सञ्चिन्त्य कुण्डेऽस्मिन् कृता जलस्य निर्झराः।।31/100।।

अनेन प्रकारेण सीता अग्निपरीक्षायां सफला जाता। विशालाग्निकुण्डो अतितीव्रप्रवाहमयो जलनिर्झरे परिणमितो जातः। अनेन सर्वजनेभ्यः शीलप्रभावस्य ज्ञानमभवत्। तत्पश्चात् भोगेन विरक्तो भूत्वा पृथ्वीमत्यार्यिकया दीक्षामङ्गीकृत्य तप अकरोत्। तत्र महेन्द्रोद्याने एव सकलभूषणमुनेः समवशरणे राम–लक्ष्मण–सीता–रावण–विभीषणस्य पूर्वभवानां सम्बन्धवर्णनमस्ति। तपोबलेन सीता इदानीं अच्युतस्वर्गे प्रतीन्द्ररूपेण सुशोभते।

अथानन्तर एकस्मिन् दिवसे रत्नचूल–मृगचूलदेवाभ्यां रामलक्ष्मणयोः स्नेहपरीक्षणं कृतम्। लक्ष्मणाय कौतुकवशात् ताभ्यामुक्तं यत् रामस्य मरणं जातम्। तदा शोकातुर लक्ष्मण 'हा' इत्युक्ते मात्रे दिवङ्गतोऽभूत्। नारायणलक्ष्मणो राजवैभवभोगेषु आसक्तिवशात् तृतीयनरके गतः।

लक्ष्मणमृत्युं दृष्ट्वा लवकुशवैराग्यभावमाप्तवान्। परन्तु रामः षण्मासपर्यन्तं लक्ष्मणदेहेन एव मुग्धमानसवत् संलापयति। तदा विभीषणादीनां सम्बोधनेन रामः यथासत्यं स्वीकृतवान्–

कस्य माता पिता कस्य बान्धवा धनयौवनम्।
सर्वं विनश्वरं लोके तस्मात्त्याज्यं महात्मभिः।।३३/११०।।

तथा जटायुकृतान्तवक्रदेवाभ्यां सम्बोधनेन रामः संसारं व्यतिरिच्य दीक्षामङ्गीकृतवान्। भगवतः रामस्य दिव्यदेशनाव्याजेन सर्वेषां भवान्तराणां वर्णनं कविना कृतम्। सप्तदश–सहस्रवर्षाणामायुष्यं जीवित्वा मांगीक्षेत्रतः मुक्तिवधूमङ्गीकृतवान्।

पउमचरियमित्यादिभि: रामपुराणस्य तुलना

पउमचरियं काव्यत: रामपुराणस्य तुलना

(१) तीर्थङ्करमाता गर्भात् पूर्वरात्रे: अन्तिमप्रहरे स्वप्नान् पश्यति तेषां सङ्ख्या दिगम्बर–सम्प्रदाये षोडश श्वेताम्बरसम्प्रदाये च चर्तुदश इति मन्यते। पउमचरियग्रन्थे दिगम्बरमान्यतानुसारेण स्वप्ने ''सिंहासनम्'' स्थाने ध्वजेति लिखितम्। 'मीनयुगलं' स्वप्नमनोनुपस्थित:।

पउमचरियं इति ग्रन्थे पञ्चदशस्वप्ना: एव उल्लिखिता:।

वसह गय सीह वरसिरि दामं ससि रवि झयं च कलसं च।
सर सायरं विमाणं वरभवणं रयणकूडडग्गी।।३/६२।।

रामपुराणे तीर्थङ्करस्य ऋषभदेवस्य गर्भावतारपूर्वात् माता मरुदेवी अपि षोडशस्वप्नान् अद्राक्षीत्। जागरणानन्तरं मात्रा मरुदेव्या अलङ्कारेभ्य सुसज्जितो भूत्वा भर्तुरन्ते गत्वा महासुखफलप्रदानि षोडशस्वप्नानि वर्णितानि।

ततश्च वृषभाकारं प्रविशन्तं मुखे वरम्।
अपश्यत्स निनादेन तूर्यस्य जागृता सती।।१/७१।।

वारणं वृषभं सिंहं कमलापुष्पमालिके।
शशाङ्कं सूर्यबिम्बञ्च मीनयुग्मं घटद्वयम्।।१/७३।।

पद्माकरं समुद्रञ्च सिंहासनं मनोहरम्।
विमानं देवलोकस्य तथा भवनवासिनः।।१/७४।।

रत्नाराशिञ्च निर्धूमां वह्निज्वालां शुभार्थदाम्।
एतेषां सत्फलं ब्रूहि शश्वत्त्वं कृपयान्वितः।।१/७५।।

(२) पउमचरियं इति ग्रन्थे द्वितीयोद्देशे अष्टकर्मविनाशेन केवलज्ञानोत्पत्ति: वर्णिता। यथोक्तम्–

अह अट्ठ कम्म रहियस्स तस्स झाणोवजोगजुत्तस्स।
सयलजगजोयकरं केवलणाणं समुप्पण्णम्।।२/३०।।

रामपुराणे मुनिपद्माभमपि चत्वारि घातिकर्मक्षयादेव केवलज्ञानं तथा अष्टकर्मविनाशनेन मोक्ष: वर्णित:। यथोक्तञ्च –

घातिकर्माणि चत्वारि गतानि प्रलयं तदा।
सञ्जातं केवलज्ञानं लोकालोकप्रकाशकम्।।३३/१५९।।

तथा च

सञ्छिद्य शेषकर्माणि ध्यानयोगाज्जिनेश्वरः।
प्राप्तः शिवास्पदं रामः शाश्वतं गुणसागरम्।।३३/२१३।।

(३) पउमचरियं इति ग्रन्थे ऋषभदेवस्य पुत्रयोः भरतबाहुबलिनोः सेनायाः सेनापतीनां विचारविमर्श्यानन्तरं केवलं दृष्टिमल्लयुद्धयोः एव उल्लेखः प्राप्यते।[1] अस्मिन् जलयुद्धं न वर्णितम्।

रामपुराणे दृष्टिमल्लजलयुद्धानां वर्णनं प्राप्यते।

मन्त्रिवर्गैः समालोक्य त्रियुद्धे नियमः कृतः।
दृष्टिमल्लपयोर्युद्धे यो भग्नो न भवेन्नृपः।।१/२७९।।

अनेन प्रकारेण पउमचरियं इति ग्रन्थे रामपुराणे च विविधताः प्राप्यन्ते।

पद्मपुराणात् रामपुराणस्य तुलना

१. पद्मचरिते अयोध्यानगर्यां इच्छ्वाकुकुले ययातिराज्ञः सुरकान्ताराज्ञ्याः वसुपुत्रजन्म-कथानकं वर्णितम्।

विनीतायां महानासीदिक्ष्वाकुकुलभूषणः।
ययातिर्नाम राजास्य सुरकान्तेति भामिनी।।१/११/१३।।
वसुर्नामाभवत्तस्य गुरोर्योग्यः स चार्पितः।।१/११/१४।।

रामपुराणे सुस्वस्तिकावतीपुरे हरिवंशे विश्ववसुनृपस्य श्रीमती राज्ञ्याः वसुपुत्रजन्मकथानकं वर्णितम्।

भरते धवले देशे सुस्वस्तिकावतीपुरे।
विश्ववसुर्नृपस्तत्र हरिवंशशिखामणिः।।६/१७२।।
श्रीमती वनिता तस्य वसुर्नाम्ना तयोः सुतः।
उपाध्यायोऽभवत्तस्य नाम्ना क्षीरकदम्बकः।।६/१७३।।

२. पद्मचरिते विंशतिमो तीर्थङ्करमुनिसुव्रतनाथस्य पिता भूपसुमित्रः माता राज्ञीपद्मावतीति नाम्ना प्रसिद्धा।

पद्मावतीति जायास्य पद्मनेत्रा महाद्युतिः।
शुभलक्षणसम्पूर्णा पूर्णसर्वमनोरथा।।१/२१/१२।।

---

१. पउमचरियं : ४/४३

रामपुराणे मुनिसुव्रतनाथस्य पिता राजा सुमित्रः माता राज्ञीसोमा इति नाम्ना प्रसिद्धा।

सोमाख्या तस्य भार्यास्ति शीलगुणविभूषणा।
रूपाख्या स्वामिभक्ताश्च सम्यक्त्वगुणसंयुता।।१०/७५।।

३. पद्मचरिते राजा मुनिसुव्रतः पुत्रसुव्रताय राज्यभारं समर्प्य दीक्षामङ्गीकृतवान्।

दत्वा सुव्रतसंज्ञाय राज्यं पुत्राय निस्पृहः।
प्रणताशेषसामन्तमण्डलं सुखपालनम्।।१/२१/३१।।

रामपुराणे राजामुनिसुव्रतः पुत्रविजयाय राज्यभारं समर्प्य दीक्षामङ्गीकृतवान्।

तदा विजयपुत्राय दत्वा राज्यं नृपार्चितम्।
दीक्षाया हेतवे स्वामी निर्गन्तुञ्च समुद्यतः।।१२/२६।।

४. पद्मचरिते मिथिलानरेशजनकस्य मातुः विदेहायाश्च सीताभामण्डलौ यमलसन्तानौ आस्ताम्। तत्र वर्णितम् -

गर्भञ्च तौ विदेहाया विधिना परियोजितौ।
पश्य कर्मानुभावस्य विचित्रमिति चेष्टितम्।।२/२६/११२।।
काले नाथ सुतं देवी प्रसूता युगलशुभम्।
सुतं दुहितरं चान्ते जहार पृथुकं सुरः।।२/२६/१२१।।

रामपुराणे मिथिलानरेशजनकगृहे भामण्डल एव जन्ममलभत्। सीता निदानबन्धपूर्वकं रावणगृहे जन्ममलभत्। यथोक्तम् -

तस्मिन्नेवाभवत्काले मन्दोदर्यां च रावणात्।
स्वर्गादागत्य सद्गर्भः पुर्वजन्मानुवैरतः।।१४/१७०।।

तदनन्तरं रावणसुता सीता लाङ्गलपद्धतौ जनकसुतारूपेण प्रसिद्धाऽभवत्।

५. पद्मचरिते नारायणलक्ष्मणस्य जीवनायुः ११५६० वर्षाणि वर्णितम् -

एकादशसहस्राणि तथा पञ्चशतानि च।
अब्दानां षष्टिरन्या च साम्राज्यं येन सेवितम्।।३/११९/४९।।
योऽसौ वर्षसहस्राणि प्राप्य द्वादशभोगिताम्।
ऊनानि पञ्चविंशत्या वितृप्तिरवरं गतः।।३/११९/५०।।

रामपुराणे लक्ष्मणायुः वर्णितः -

सुद्वादशसहस्राणि वर्षाणि लक्ष्मणस्य च।
आयुष्यं परमं सौख्यं भोगसम्पत्तिदायकम्।।३३/२१६।।

६. पद्मचरिते लक्ष्मणः तृतीयनरके बालुकाप्रभायां गतः।

अथ संस्मृत्य सीतेन्द्रो लक्ष्मीधरगुणार्णवम्।
प्रतिबोधयितुं वाञ्छन् प्रतस्थे बालुकाप्रभाम्।।१२३/१।।

रामपुराणे लक्ष्मणः चतुर्थे नरके पङ्कप्रभायां गतः।

विकृतिं त्यक्तसीतेन्द्रो गतो यत्रास्ति लक्ष्मणः।
चतुर्थे नरके घोरे महादुखस्य चास्पदे।।३३/१६१।।

अनेन प्रकारेण पद्मपुराणे रामपुराणे च विविधताः प्राप्यन्ते।

उत्तरपुराणात् रामपुराणस्य तुलना

१. उत्तरपुराणे काशीदेशे वाराणसीनगरे राज्ञः दशरथस्य शासनं सुशोभते स्म। सुबालायाः संयोगेन रामचन्द्रः नामकः प्रथमपुत्रोऽभवत्।

वाराणसीपुराधीशो राज्ञो दशरथश्रुतेः।
सुतः सुबालासञ्ज्ञायां शुभस्वप्नपुरस्सरम्।।६७/१४८।।

रामपुराणे अयोध्यायां दशरथस्य शासनं सुशोभिते स्म –

अयोध्यायां नृपो जातश्चानरण्यो रघोः सुतः।
पृथ्वीमतीति भार्यास्य शीलादिगुणभूषिता।।१३/१०७।।
मासमात्रे जनितेऽस्मिन् दशरथे नृपश्रियम्।
क्षिप्त्वानन्तरं येनासौ चानरण्योऽभवन्मुनिः।।१३/११०।।

तथा राज्ञः दशरथस्य अपराजितायाः पद्मनामकः पुत्रोऽभवत् –

दिवसे चाथ सम्पूर्णेऽपराजिता सुलक्षणम्।
असूत बालकं रम्यं सूर्यमूर्तिमिवापरम्।।१४/५९।।

२. उत्तरपुराणे रामचन्द्रस्यायुः त्रयोदशसहस्राणि वर्षाणि अस्तीति उल्लेखः –

कृष्णपक्षे त्रयोदश्यां फाल्गुने मास्यजायत।।६७/१४९।।
त्रयोदशसहस्राब्दो रामनामानताखिलः।।६७/१५०।।

रामपुराणे रामचन्द्रस्यायुः सप्तदशसहस्राणि वर्षाणि यावत् प्रदर्शितम् –

सप्तदशसहस्राणि वर्षाणि राघवस्य वै।
ज्ञेयं हि परमायुश्च सुखसन्ततिसम्पदम्।।३३/२१५।।

३. उत्तरपुराणे राज्ञः दशरथस्य द्वितीया भार्या कैकेयी आसीत्। तस्याः लक्ष्मणनाम्नः पुत्रोऽभवत्। यथोक्तञ्च –

तत एव महीभर्तुः कैकेय्यामभवत्पुरः ।।६७/१५० ।।

षड्गुणद्विसहस्राब्दजीवितो लक्ष्मणाह्वयः ।।६७/१५२ ।।

रामपुराणे राज्ञः दशरथस्य द्वितीया भार्या सुमित्रा प्रसिद्धा। तस्याः लक्ष्मणनाम्नः पुत्रोऽभवत्। यथोक्तञ्च –

सुमित्राऽपि तथा बालं प्रसूता शुभलक्षणम्।

शत्रुगृहेषु चोत्पाताः सञ्जाताः प्रभयप्रदाः ।।14/62 ।।

४. उत्तरपुराणे भरतशत्रुघ्नयोः द्वयोः भ्रातृयोः मातुः नाम नोल्लिखितः –

तत्रास्य देव्यां कस्याञ्चिदभवद्भरताह्वयः।

शत्रुघ्नश्चान्यदप्येकं दशाननबधाद्यशः ।।६७/१६५ ।।

रामपुराणे भरतस्य माता केकामती तथा शत्रुघ्नस्य माता सुप्रभा स्पष्टरूपेणोल्लिखिता–

तथा केकामती बालमसूतभरताभिधम्।

सुषुवे सुप्रभापुत्रं शत्रुघ्नं शत्रुबाधकम् ।।14/65 ।।

५. उत्तरपुराणे सीताविवाहविषयेऽचिन्तयन् जनकेन वैदिकयज्ञनिमित्तेन रामलक्ष्मणौ निमन्त्रितौ। तथा आगमने सति प्रसन्नतया रामाय सीता अर्पिता।

निर्वर्त्याभिमतं यज्ञविधानं तदनन्तरम्।

महाविभूतिभिः सीतां ददौ रामाय भूपतिः ।।६८/३४ ।।

रामपुराणे रामलक्ष्मणाभ्यां मलेच्छविजयवर्णनं उद्धृतम्। ततो रामस्य वीरतायाः उपकारज्ञापनार्थं स्वस्य पुत्री सीता रामाय अर्पिता।

रामेण बहुलो मेऽत्रोपकारो धीमता कृतः।

तस्मै पुण्यपुरुषायोपकरिष्याम्यहं च किम् ।।१४/२०२ ।।

ममास्ति कन्यका रम्या तस्मै दास्यामि तां वराम्।

इत्युक्ता कल्पिता सीता दातुं रामाय पुण्यतः ।।१४/२०३ ।।

६. उत्तरपुराणे नारदकथनेन रावणः सीतामपहर्तुं उत्तेजितोऽभवत् –

त्वामनादृत्य योग्यां ते त्रिखण्डाखण्डसम्पदम्।

स्त्रीरत्नं स्वात्मजां लक्ष्मीमिवादान्मिथिलाधिपः ।।६८/९९ ।।

रावणेन कथितम् –

तामाहरिष्ये तौ हन्तुं तदुपायं विचिन्तय ।।६८/११४ ।।

रामपुराणे रावणः खरदूषणस्य युद्धसहायतार्थं दण्डकवनमागतम्। तत्र रामसंयुक्तां सीतां

दृष्ट्वा तां प्रति अत्यन्तमोहितोऽभवत्–

तत्राग्रे रामसंयुक्तां रूपलावण्यभूषिताम्।
सीतां दृष्ट्वा च कामाग्निपीडितोऽभूत्स रावणः।।२०/८५।।

७. उत्तरपुराणे रामचन्द्रो सीताकुतूहलपूर्णाय मणिनिर्मितं मृगमानेतुं गतवान् –

इति सीतावचः श्रुत्वा विनेतुं तत्कुतूहलम्।
तदा निनीषया गत्वा रामो वामे विधौ विधीः।।६८/१९९।।

रामपुराणे रामचन्द्रः सिंहरवं श्रुत्वा लक्ष्मणसहायतार्थं युद्धस्थलं प्रति गतवान् –

तं च सिंहरवं श्रुत्वा स्फुटं लक्ष्मणभाषितम्।
प्रीत्या रतिमयः पद्मो व्याकुलीभूतमानसः।।20/97।।

८. उत्तरपुराणे रावणः रामरूपं धृत्वा सीतां मणिमृगस्य पार्श्वे आनयनव्याजेन पुष्पकविमाने संस्थापयित्वा लङ्कामानयति।

अथातो रामरूपेण परिवृत्तो दशाननः।
सीतामित्वा पुरो धृत्वा प्रहितो हरिणो मया।।६८/२०४।।
इत्यवादीत्तदाकर्ण्य सा मायाशिविकाकृति।
विमानं पुष्पकं मोहादारुरोह धरा सुता।।६८/२०७।।

रामपुराणे रामे युद्धे गते सति रावणः बलपूर्वकं सीतामपहृत्य पुष्पकविमानेन लङ्कामानयति।

कामदाहगृहीतात्मा विस्मृताऽशेष धर्मधीः।
आरोपयितुमारेभे पुष्पकं गगनस्थितम्।।20/102।।
ततो निर्विघ्नमारोप्य पुष्पकं जनकात्मजाम्।
जानतः सङ्गतं कामं रावणः स्वेच्छया ययौ।।20/108।।

९. उत्तरपुराणे अपहृतसीतान्वेषणं दशरथस्वप्नमाध्यमेन एवाऽभवत् –

गृहीत्वा रोहिणीं राहौ प्रयाते गगनान्तरम्।
एकाकिनं तुषारांशुं भ्राम्यन्तं समलोकिषि।।६८/२४८।।
पुरोहितमसौ चाह सीतामद्य दशाननः।।६८/२४९।।

रामपुराणे सीतान्वेषणे बहुप्रयत्नाः जाताः। पश्चात् कम्बुद्वीपस्थितरत्नजटीविद्याधरेण स्वयं सीतापहरणस्य प्रसङ्गो रामाय निवेदितः –

सत्यं प्रभो मया दृष्टा सीता त्वद्गतमानसा।
लङ्केन्द्रेण हृता बाला नियमात्पापबुद्धिना।।22/59।।

१०. उत्तरपुराणे लोकापवादकथानकं सीतापरित्यागित्यादयानां वार्ता नोपलभ्यते। रामपुराणे सीतानिर्वासनस्य कथानकं प्राप्यते –

लोकापवादभीत्यात्र कानने जहि जानकीम्।
यद्यपि रूपशीलाद्या तथापि मे न रुच्यते।।29/106।।

११. उत्तरपुराणे लक्ष्मणः असाध्यरोगेण दिवङ्गतोऽभवत् –

दुःसाध्येनामयेनाऽसौ माघे मास्यसितेऽन्तिमे।
दिने तेनागमच्चक्री पृथ्वीं पङ्कप्रभाभिधाम्।।६८/७०१।।

रामपुराणे रामस्य कृत्रिमशोकसमाचारं श्रुत्वैव 'हा' इति अत्यन्तव्याकुल-चित्तत्वाद्दिवङ्गतोऽभवत्।

इत्युक्ते निश्चयं कृत्वा चित्तव्याकुललक्ष्मणः।
हाहेति वचनं प्रोच्य मृतः प्राणविसर्जनात्।।३३/४१।।

अनेन प्रकारेण उत्तरपुराणे रामपुराणे च विविधताः प्राप्यन्ते।

रविषेणाचार्यकृते पद्मपुराणे सीताजन्मसम्बन्धीनि विविधमतानि

यद्यपि देवी सीता भारतीयजनमानसस्य श्रद्धापात्रं विद्यते तथापि तस्याः जन्मसम्बन्धिवृत्तं विविधमतेषु भिन्नं भिन्नमेव मताः प्रचलितम्। अतएव विविधमतभेदानां सङ्कलनं निम्नाङ्कितरूपेण अत्र प्रस्तूयते –

१. सीता जनकस्य पुत्री आसीत् –

अस्योल्लेखः महाभारते, हरिवंशे च उद्धृतरामकथायां, पउमचरियं ग्रन्थे, पउमचरिउ ग्रन्थे, पद्मपुराणे आदिरामायणे च प्राप्यते।

२. सीता पृथिव्याः पुत्री वर्तते –

अस्योल्लेखः वाल्मीकीरामायणे वर्तते तदाधृत्य अन्यासु रामकथासु चैवमेव प्राप्यते। वाल्मीकिरामायणस्य उत्तरीयपाठे जनकस्य मेनकायाश्च मानसी पुत्री रूपेणापि वर्णिता।

३. सीता रावणस्य सुता अस्ति –

अस्योल्लेखः उत्तरपुराणे, रामपुराणे, विष्णुपुराणे, महाभागवतपुराणे, काश्मीरीरामायणे, तिब्बतीरामायणे, खोतानीरामायणे च विद्यते।

४. सीता पद्मात् उत्पन्नाभवत् – अद्भुतरामायणे एतल्लिखितम्।

५. सीता ऋषीणां रक्तसम्पर्कात् मन्दोदरीगर्भात् उत्पन्नाभवत् – दशावतारचरिते एतद् वर्णितम्।

६. सीता अग्निना प्रकटिताभवत् – आनन्दरामायणे एतदुद्धृतम्।

७. सीता दशरथस्य सुता अस्ति –

एषा कथा दशरथजातककथायां, जावायाः रामकेलिङ्गे, मलयस्य सेरिरामे, हिकायत महाराजरावणे चोल्लिखिता।

सोमसेनः तत्कर्तृत्वञ्च

रामपुराणग्रन्थस्य रचयिता भट्टारकसोमसेनो वर्तते। सोमसेनः सेनगणस्य पुष्करगच्छस्य च भट्टारकपरम्परायाम् अभवत्। सेनगणस्य तत्पूर्वाचार्याणां नामोऽपि 'सेनान्तः' प्राप्यते यथा लक्ष्मणसेनः तथा लक्ष्मणसेनस्य शिष्यः रविषेणः प्रख्यातः।

अस्मिन् नामपरम्परायामेव सोमसेनस्य गुरुः गुणभद्रोऽभूत्। तथा गुणभद्राचार्यस्य अपरनाम गुणसेनोऽपि प्रसिद्धोऽभवत्।

सोमसेनभट्टारकस्य शिष्यो अभयपण्डितोऽपि कविश्रेष्ठः विद्वान् विशिष्टश्रेण्यामग्रणी आसीत्। अभयपण्डितो रविव्रतकथायाः रचनाकारो वर्तते।

सोमसेनभट्टाकरस्य पितृजन्मस्थानजीवनमित्याद्यज्ञातम्। तथापि सोमसेनस्य पट्टावल्यां यत्किञ्चत् प्राप्यते तदुल्लिख्यते –

विबुधविविधजनमनइन्दीवरविकासन पूर्णशशिसमानानां सोमसेन भट्टारकाणाम्।[१]

त्रिवर्णाचारस्य रामपुराणस्य च प्रशस्त्यामपि सोमसेनेन स्वपरिचयं एवमेव प्रदत्तम्। द्वयोः ग्रन्थयोः प्रशस्तिपुष्पिकायां साम्यं दृश्यते। यथा –

श्रीमूलसङ्घे वरपुष्कराख्ये
गच्छे सुजातो गुणभद्रसूरिः।
पट्टे च तस्यैव सुसोमसेनो
भट्टारकोऽभूद्विदुषां शिरोमणिः।।
– रामपुराण ३४/२३३

१. भट्टारक सम्प्रदाय, लेखाङ्क ३४, शाके १५६१

श्रीमूलसङ्घे वरपुष्कराख्ये
गच्छे सुजातो गुणभद्रसूरिः।
तस्यात्र पट्टे मुनिसोमसेनो
भट्टारकोऽभूद्विदुषां वरेण्यः।।
-त्रिवर्णाचार प्रशस्ति २१३

स्थितिकाल: –

सोमसेनस्योपदेशात् शक संवत् १५६१ फाल्गुनशुक्लपञ्चमी तिथौ पार्श्वनाथसम्भवनाथभगवतो: प्रतिमयो: प्रतिष्ठापना कृता।[२]

सोमसेनो विक्रमसंवत्सरस्य सप्तदशशताब्द्या: जन्म ललाभेति।

१- सोमसेनभट्टारकेन वि. सं. १६५६ मध्ये रविषेणकृतं पद्मचरितमाधृत्य रामपुराणं लिखितम्।

२- सोमसेनभट्टारकेन वि. सं. १६६६ मध्ये 'शब्दरत्नप्रदीप:' नाम्ना संस्कृतकोशं लिखितम्।

३- सोमसेनभट्टारकेन १६६७ विक्रमसंवत्सरस्य कार्तिकपूर्णिमायां 'त्रिवर्णाचार:' ग्रन्थ: पूर्णकृत:।

अतएव सोमसेनस्य कालो विक्रमसंवत्सरस्य सप्तदशशताब्द्या: उत्तरार्द्ध: स्पष्ट: प्रतिभासते।

रचना: –

सोमसेनभट्टारकस्य तिस्र: रचना: प्रसिद्धा:।

१. रामपुराणम् – रामपुराणग्रन्थोऽयं वराटदेशस्य जित्वरनगरे रचित:। रामपुराणे मर्यादापुरुषोत्तमस्य अष्टमबलभद्रस्य श्रीरामचन्द्रस्य कथा वर्तते। पद्मपुराणग्रन्थमाधृत्य तस्य संक्षिप्तरूपेण रामपुराणं लिखितम्।

अस्य कथावस्तु त्रयस्त्रिंशदधिकारेषु विभक्त:। प्रत्येकस्मिन्नधिकारे अनुष्टुप् श्लोकानां मुख्यता अस्ति तथापि अन्तिमोपसंहाररूपश्लोकेषु इन्द्रवज्रोपजाति, शार्दूलविक्रीडितेत्यादिनां प्रयोग: वर्तते।

२. शब्दरत्नप्रदीप: – ग्रन्थोऽयं संस्कृतभाषायां शब्दकोशो वर्तते। शब्दकोशे शब्दानां अर्था: तु कथिता: एव, तेन सह तेषां प्रकृति-प्रत्यय-लिङ्ग-समासादयोऽपि निर्दिष्टा:।

---

२. शाके १५६१ वर्ष प्रमाथीनामसंवत्सरे फाल्गुन सुदि द्वितीया मूलसङ्घे सेनगणे पुष्करगच्छे भट्टारक श्रीसोमसेनेनोपदेशात् प्रतिष्ठितम्। - भट्टारक सम्प्रदाय, लेखाङ्क ४२

शब्दरत्नप्रदीपस्य प्रशस्त्यां सोमसेनेन स्वं 'अभिनवभट्टारकः' इति कथितम्। प्रशस्ति निम्नप्रकारेण विद्यते –

शुभमस्तु कल्याणं।। संवत् १६६६ शाके १५३१ वर्षे श्रावण कृष्णव तिथि प्रतिपदा।।१।। शुक्रवासरे ग्रन्थलिखिते गोपिचन्द उदयपुरस्थाने तिष्ठन्त्ये।। कल्याणं भवेत् अभिनव भट्टारक श्रीसोमसेनस्येदं पुस्तकम्।।[3]

३. त्रिवर्णाचारः – धर्मरसिकत्रिवर्णाचारग्रन्थे धर्मार्थकामविषयत्रयाणां विषयाणां वर्णनं कृतम्। अस्य ग्रन्थोपरि वैदिकधर्मस्य पूर्णप्रभावो दृश्यते।

जुगलकिशोरमुख्तारमहोदयेन स्वग्रन्थपरीक्षायां अस्य समालोचनं कृतम्।

धर्मार्थकामाय कृतं सुशास्त्रं
श्रीसोमसेनेन शिवार्थिनापि।
गृहस्थधर्मेषु सदा रता ये
कुर्वन्तु तेभ्यासमहो सुभव्याः।।२१३।।

३. भट्टारक सम्प्रदाय, लेखाङ्क ४०

द्वितीयोऽध्यायः

पाण्डुलिपेः
मूलपाठः

श्री वीतरागाय नमः

प्रथमोऽधिकारः

वन्देऽहं सुव्रतं देवं पञ्चकल्याणनायकम्।
देवदेवादिभिः सेव्यं भव्यवृन्दसुखप्रदम्॥1॥

शेषान् सिद्धान् जिनान् सूरीन् पाठकान् साधुसंयुतान्।
नत्वा वक्ष्ये हि पद्मस्य पुराणं गुणसागरम्॥2॥

वन्दे वृषभसेनादीन् गणाधीशान् यतीश्वरान्।
द्वादशाङ्गं श्रुतं यैश्च[1] कृतं मोक्षस्य हेतवे॥3॥

वन्दे समन्तभद्रं तं श्रुतसागरपारगम्।
भविष्यत्समये योऽत्र तीर्थनाथो भविष्यति॥4॥

कुन्दकुन्दमुनिं वन्दे चतुरङ्गुलचारणम्।
कलिकाले कृतं येन वात्सल्यं सर्वजन्तुषु॥5॥

आचार्यजिनसेनाख्यं वन्दे ग्रन्थस्य सिद्धये।
सिद्धान्तत्रयकर्तारं मोक्षमार्गोपदेशकम्॥6॥

पूज्यपादप्रभाचन्द्राकलङ्कादीन्[2] यतीश्वरान्।
नमामि धर्मतीर्थस्य कर्तॄन् प्राणिहितङ्करान्[3]॥7॥

रविषेणं महाचार्यं वन्दे शास्त्राधिपारदम्।
यत्प्रसादात्करोम्यत्र पुराणं रामसञ्ज्ञकम्॥8॥

गुणभद्रं यतिं वन्दे सर्वजीवदयापरम्।
महापुराणकर्त्तारं ज्ञातारं सर्वसंवरम्[४]॥9॥

चारुकीर्तिमुनीन्द्रञ्च वन्दे श्रेष्ठार्थसिद्धिदम्।
समाधिशीलसम्पन्नं हिताऽहितोपदेशकम्॥10॥

वन्देऽहं भानुमुन्याख्यं त्रिकालं योगमुक्तिदम्।
सप्तशतमुनीन्द्रैश्च सेव्यपादद्वयोऽभवत्[5]॥11॥

महेन्द्रकीर्तियोगीन्द्रौ नमामि कलिचारणौ ।
तयोः[6] पादान् प्रसेवन्ते यत्यादिनरपुङ्गवाः[7] ।।12।।
सरस्वतीं नमाम्यादौ जिनेन्द्रमुखसम्भवाम् ।
द्वादशाङ्गस्फुरद्रूपां मोक्षस्थानसुखप्रदाम् ।।13।।
वक्तृश्रोतृकथालक्ष्म ग्रन्थादौ ग्रन्थसिद्धये ।
कथ्यते सूरिभिर्धीरैस्तत्त्वज्ञैस्तत्त्वबोधकैः ।।14।।
वक्ता भवेच्च शास्त्रस्य क्षमावान् शीलभूषणः ।।
वेत्ता षट्दर्शनानाञ्च शास्त्राणां वर बुद्धिमान् ।।15।।
व्रतसंयमसम्पूर्णो दयावान् गुणसागरः ।
स्मराम्यऽहं गुणांस्तस्य शास्त्रविस्तारहेतवे ।।16।।
गुणान् गृह्णन्ति तद्वन्तो लोके ये सन्ति साधवः ।
तेषां पादा[8] मम स्वाऽन्ते तिष्ठन्तु ग्रन्थसिद्धये ।।17।।
यद्यप्यस्ति मम ग्रन्थे किञ्चिच्छब्दादिदूषणम् ।
तथापि तेऽत्र कुर्वन्तु शोधनं साधवो नरः ।।18।।
दुर्जनानां स्वभावोऽयं परनिन्दनतत्पराः ।
तस्माद्दूरेण संत्याज्या दुर्जना विबुधैर्जनैः ।।19।।
यद्यप्यस्ति कथा शुद्धा तथापि दुर्जनो नरः ।
तां दूष्यति स्वभावेन नीचानामीदृशी गतिः ।।20।।
चतुर्दशाऽत्र वै सन्ति श्रोतारः शास्त्रहेतवे[9] ।
उत्तमा मध्यमा नीचास्त्रिविधा लोकवर्तिनः ।।21।।
गोहंसमृच्छुकाजाहिमहिषचालिनीशिलाः ।
कंकछिद्रघटो दंशमार्जाररसजलौकसः।।22।।
गोहंसमृच्छुकाः श्रेष्टा मध्यमाश्चाजशिलाघटाः ।
शेषा नीचाः परिप्रोक्ताः धर्म्मशास्त्रे विवर्जिताः ।।23।।
यत्र जिनकथालापाश्च कुर्वन्त्यादि सम्भवाः ।
पूजाधर्मदयादानसत्यशीलसुभावनाः ।।24।।

ध्यानवैराग्यसम्पत्तिः जीवतत्त्वविचारणाः ।
एभिश्च सत्कथा ज्ञेया[10] अन्याश्च विकथाः स्मृताः[11]।।25।।

धन्यास्ते पुरुषा रम्या ये शृण्वन्ति कथां वराम्।
त्रिषष्टिपुरुषाणान्तु तत्त्वधर्मविदां सदा ।।26।।

इत्याद्युक्तं कथालक्ष्म गुरुणाञ्च नमस्क्रिया।
अथ वक्ष्ये कथां रम्यां रामचन्द्रस्य पावनीम्।।27।।

यदुक्तं रविषेणेन विस्तरेण महात्मना।
तदेवाऽत्र च संकोच्य पुराणं प्रोच्यते मया।।28।।

गुणभद्रमुनीन्द्रस्य पुराणात्किञ्चिदुद्धृता[१२]।
कथा मयाऽविरोधेन पूर्वाचार्यस्य सन्ततेः।।29।।

कुलकृतां समुत्पत्तिर्वृषभस्यादिचक्रिणः।
मारीचिनः त्रिदण्डित्वं कथ्यते क्रमतो मया।।30।।

नम्योर्वैताढ्यराज्यञ्च ब्राह्मणस्य च स्थापनम्।
विद्याधरं महावंशं संजयन्तकथानकम्।।31।।

अजितस्य पुराणञ्च सगरस्यापि चक्रिणः।
मेघवाहनराज्यञ्च भीमराक्षसवर्णनम्।।32।।

राक्षसस्य महावंशं लङ्कापुरनिवेशनम्।
पुर्य्याः पाताललङ्कायाः स्थापनं च खगागमः।।33।।

सगरस्यानुजां षष्टिसहस्राणां भवान्तरम्।
भागीरथस्य निर्वाणं रक्षःसन्तानवर्णनम्[१३]।।34।।

वासुपूज्यकाले च श्रीकण्ठो[१४] वानरान्वयः[१५]।
विद्युत्केशसमाख्यातं सुकेशकिष्कुराज्यकम्।।35।।

इन्द्रस्य राज्यसम्प्राप्तिर्मालिनो मरणं पुनः।
रत्नश्रवःसमुत्पत्तिः केकस्युद्वाहवर्णनम्।।36।।

रावणादित्रिबन्धूनां नखायाश्च समुद्भवः।
विद्यायाः साधनं सिद्धिरनावृतप्रसन्नता।।37।।

मन्दोदर्यामहालाभं कन्यानां षट्सहस्रत: ।
इन्द्रजिन्मेघनादाख्यपुत्रयो: पुनरुद्भव: ।।38 ।।
वैश्रवणे महद्युद्धं हरिषेणकथान्तरम् ।
जगद्भूषणनाम्नश्च गजस्याऽपि प्रसाधनम् ।।39 ।।
यमेन सह संग्रामो बालिनश्च समुद्भव: ।
चन्द्रनखाया हरणं बालियुद्धं तथा पुन: ।।40 ।।
कैलासोद्धरणं तत्र मुनिबालिप्रपूजनम् ।
नागात् शक्तिपरिप्राप्तिस्तारासुग्रीवसङ्गम: ।।41 ।।
खरदूषणभृत्यत्वं रेवायां जिनपूजनम् ।
सहस्रार्जुनयुद्धञ्च महाकाल: कथा पुन: ।।42 ।।
वसुराजकथात्वं च मरुतो यज्ञभङ्गता ।
नारदस्य कथासङ्गो मधोराख्यानमेव च ।।43 ।।
रम्भाया: प्राप्यभेदञ्च नलकूवरबन्धनम् ।
शक्रराजजयञ्चैव सकृन्निर्वाणसङ्गम: ।।44 ।।
त्रिखंडविजयं कृत्वा लंकायां रावणागम: ।
शीलव्रतस्य ग्रहणं रावणेनांतवीर्यत: ।।45 ।।
पवनञ्जयस्याऽञ्जनाया विवाहो वरुणाह्व: ।
अञ्जनाया वने वासो भवांतरविवर्णनम् ।।46 ।।
हनूमतश्च संभूति: पवनस्य समागम: ।
हनुमद्वरुणयो[१६]राजिर्दसास्यभग्नीजोद्वह:[१७] ।।47 ।।
सुग्रीवस्य सुतप्राप्ति: कर्णकुम्भलराज्यकम् ।
सुव्रतस्य तथागर्भं जन्मदीक्षा च केवलम् ।।48 ।।
त्रिषष्टिपुरुषाणाञ्च कीर्तनं मोक्षसंभवम् ।
जनकस्य समुत्पत्तिर्हराविक्ष्वाकुवंशक: ।।49 ।।
वज्रबाहुसमाख्यानं सुकौशलकथानकम् ।
नघुषस्य[१८] महाख्यानं सौदासस्य च सत्कथाम् ।।50 ।।

दशरथस्य चोत्पत्तिः कन्यात्रितयलाभकम् ।
सभायां नारदप्राप्तिस्तस्य वाक्यात्तु निर्गमः ।।51 ।।
विभीषणेन मरणं कृत्रिमौ जनकारथौ ।
कैकय्याप्तिर्दशरथेः तस्यै वरप्रदानता ।।52 ।।
रामादिचतुःपुत्राणां संभवो क्रीडनं पुनः ।
भामंडलभवाख्यानं जनके तस्य संभवः ।।53 ।।
देवाऽपहारतो दैवात् रथनूपुरक्रीडनम् ।
जनकस्य विलापञ्च सीतासंभूतिः रावणात् ।।54 ।।
जनकेन ततो लब्ध्वा सीता यज्ञै हलाग्रतः ।
रामेण म्लेच्छजयनं जनकेन सुताऽर्पणम् ।।55 ।।
सीतानारदवैषम्यं सीताचित्रप्रदर्शनम् ।
जनकस्यापहरणं चन्द्रगतिनृपेण च ।।56 ।।
राधावेधस्य सीताया भामंडलप्रकोपनम् ।
जातिस्मरत्वं तस्यैव कुटुम्बप्राप्तिता पुनः ।।57 ।।
रथस्य कनकस्याऽपि जनकस्य भवान्तरम् ।
वैराग्यं दशरथस्याऽपि राज्यञ्च भरतस्य च ।।58 ।।
रामस्य च वने वासो वज्रकर्णस्य स्थापनम् ।
बालिखिल[१९] विमोच्यं च रामपुर्य्यां निवेशनम् ।।59 ।।
मोक्षाप्तिः कपिलस्याऽपि वनमालासमागमः ।
लाभं विजयसुन्दर्याः[२०] पद्मालाभस्तथैव च ।।60 ।।
कुलदेशभूषणाख्यानं गरुडप्रभमोहनम् ।
दण्डकाऽरण्यप्रावेश्यं[२१] मुनौ दानप्रदानकम् ।।61 ।।
जटाविहंगमित्रत्वं तस्याऽपि भवसंकथा ।
शंबूकस्य वधाख्यानं नखाया मोहकोपनम्[२२] ।।62 ।।
सीताव्याहरणं तत्र खरदूषणवधस्तथा ।
पक्षिणः स्वर्गगमनं रामलक्ष्मणरोदनम् ।।63 ।।

विट्सुग्रीवविध्वंसः सुग्रीवो राज्यस्थापनम्[२३]।
रत्नस्य जटिनोदंतं हनुमदागमः[२४] पुनः ।।64।।
कोटिशिलापरिक्षेपो हनू[२५] लंकाविनिर्गमः।
महेन्द्रेण सहायुद्धं लंकासुंदरीलाभकः ।।65।।
सीतां मुद्राप्रदानञ्च शक्रजिद्युद्धबंधनम्।
रावणप्रतिबोधश्च लंकादाहस्तथैव च ।।66।।
चूडारत्नञ्च रामेऽदात् रामप्रस्थानमुत्तमम्।
समुद्रखचरे युद्धं सुवेल विजयं तथा ।।67।।
हंसराजस्य युद्धञ्च त्वंगदपरिप्रेक्षणम्।
दशास्यभीषणोद्भिन्नं मंदोदरीप्रबोधनम् ।।68।।
दशास्यबलप्रस्थानमक्षोहिणीप्रमाणकम्।
हस्तप्रहस्तमरणं तयोर्भवनिबन्धनम् ।।69।।
प्रभामण्डलसुग्रीवबन्धनञ्च दशास्यजैः।
सिंहगरुडयोर्विद्या प्राप्तिश्च रामलक्ष्मणः ।।70।।
इंद्रजित् कुंभकर्णस्य बन्धनं रामलक्ष्मणौ।
लक्ष्मणे शक्तिबन्धश्च विशल्यायाः समागमः ।।71।।
साधनं बहुरूपिण्या रामदूतप्रकल्पनम्।
रामरावणयोर्युद्धं दशास्यलक्ष्मणयोरपि ।।72।।
लक्ष्मणे चक्रसम्प्राप्तिर्दशास्यमरणं पुनः।
विभीषणविलापञ्च प्रीतिंकरकथानकम् ।।73।।
मंदोदर्या विलापञ्च रामाद्यैश्च प्रबोधनम्।
दशास्यदाहदिवसे सुबलस्य च केवलम् ।।74।।
इंद्रजिन्मेघनादानां भवांतरनिबोधनम्।
तेषां दीक्षा च निर्वाणं मंदोदर्या विदीक्षणम्[26] ।।75।।
नृस्त्री[27]षष्टिसहस्राणां दीक्षणं तद्दिवाऽपि च।
सीतायाः रामसंयोगं रामलंकाप्रवेशनम् ।।76।।

त्रिखण्डराज्यसम्प्राप्तिः सीतानिष्कासनम् तथा ।
लवाङ्कुशसमुत्पत्तिस्तयोर्दिग्विजयं पुनः ।।77।।
रामलक्ष्मणयोर्भङ्गं[28] मयदैत्यगतिं तथा[29] ।
सीताया दिव्यदीक्षेव केवलं तद्दिने मुनेः ।।78।।
दशास्यरामसीतानां लक्ष्मणस्य भवांतरम् ।
विभीषणस्य सुग्रीवबालिनोर्भवपद्धतिः ।।79।।
लवस्य च कुशस्याऽपि त्वारणाऽच्युतशक्रयोः ।
भामण्डले वज्रपातो दैवाल्लक्षणपंचता[30] ।।80।।
लवादिकुशयोर्दीक्षा रामषण्मासमोहनम् ।
लक्ष्मणस्य च दाघश्च त्वतिथेराज्यसत्पदम् ।।81।।
रामदीक्षाऽभिसम्बन्धोऽच्युतेन्द्रेण परीक्षणम् ।
रामस्य केवलज्ञानं समवसृतिमंडनम् ।।82।।
अच्युतेन्द्रेण मोहश्च लक्ष्मणस्य च कर्षणम् ।
रामचंद्रस्य निर्वाणं रामायणमिदं मतम् ।।83।।
विंशाधिकं द्विशतं च त्वधिकाराः मता बुधैः ।
द्वात्रिंशत्संधयोऽप्यत्र क्रमात् सूत्रानुसारतः ।।84।।
विघ्नौघानलजीमूतसंतानधनवर्धनम् ।
कर्म्मघ्नं मोक्षदं दिव्यं रामायणपुराणकम्[31] ।।85।।
जंबूद्वीपेऽथ विख्याते भरते मगधाऽभिधे ।
देशे राजगृहं पौरं पुरंदर पुरोपमम् ।।86।।
अस्ति तत्र महीपालः श्रेणिकः सुरराजवत् ।
चेलिनी महिषी तस्य रूपलावण्यमंडिता ।।87।।
पुत्रपौत्रादिसंयुक्तो भुंक्ते भोगाननेकधान् ।
सभायां चैकदा धर्मी स्थितोऽस्ति सिंहविष्टरे ।।88।।
तदोक्तं वनपालेन विपुले विपुलाचले ।
समागमं जिनेन्द्रस्य वीरस्य संघसंयुतम् ।।89।।

तदुक्त्वा सम्मुखं गत्वा सत्पादान्नतो नृपः।
ददावङ्गस्थवस्त्रादीन् वनपालाय संमुदा।।90।।
संता नंदभेरी च निर्गतो बहुसंभ्रमात्।
हस्त्यश्वरथपादातिवेष्टितोऽतिमहोत्सवः।।91।।
परिवर्गेण संयुक्तः समवशरणं गतः।
संपूज्य श्रीजिनं देवं स कृतवान् संस्तुतिं पराम्।।92।।
उपविष्टो मनुष्यस्य कोष्ठे[32] सद्धर्म्मवत्सलः।
श्रुता जिनोदिता तेन कथा सधर्म्मसंगिनी।।93।।
हस्तयुग्मञ्च संयुज्य भूपोऽथ प्राह गौतमम्।
चतुर्ज्ञानगुणाधीशं नत्वा स्तुत्वा पुनः पुनः।।94।।
स्वामिन् ब्रूहि कृपां कृत्वा पुराणं रामदेवजम्।
मत्संदेहविनाशाय प्राप्तये शिवशर्मणः।।95।।
वदन्ति रावणो मूढा राक्षसो मांसभक्षकः।
स्वर्गस्थान् देवदिक्पालान् कारागारे निवेशयत्।।96।।
स्वर्गस्थांश्च क्व ते देव रावणः क्वेति मानुजः।
देवानां महती शक्तिर्मानुजाः शक्तिवर्जिताः।।97।।
कुंभकर्णोऽथ षण्मासान् शेतेऽसौ निद्रयाऽन्वितः।
तत उत्थीयमानश्च भुंक्तेऽश्वान् गजादिकान्।।98।।
सुग्रीवाद्याः नखैः पुच्छैः संयुतास्ते लवंगमाः।
पवनाद् वानरी पुत्रो वानरो हनुमानभृत्।।99।।
इंद्रो रक्षति गेहस्थान् गर्द्धभान् रावणालये।
यमो वहति वा कुंभान् वह्निः पच्यति[33] धान्यकम्।।100।।
संमार्ष्टि पवनो गेहं वरुणः कोटपालकः।
ब्रह्मा पठति वेदांश्च समागत्याशु तद्गृहे।।101।।
अन्ये च सकला देवा भृत्यकर्मनियोजिताः।
इत्यादि विपरीतं च कथयंत्यधमा नराः।।102।।

तत्संदेहं निराकर्तुं वद नाथ पुराणकम् ।
यथा सुखी भविष्यामि संसारेऽहं कृपापरः[34] ।।103।।

गणधरस्ततः प्रोचे श्रृणु श्रेणिक! भूपते! ।
पुराणं रामदेवस्य पवित्रं पापनाशनम् ।।104।।

अनंते लोकमध्येऽस्मिन् त्रिविधा लोकसंस्थितिः ।
अधोमध्योर्ध्वभागेन कटिहस्तनराकृतिः ।।105।।

मध्यलोकस्य मध्येऽस्ति जंबूद्वीपोऽतिसुंदरः ।
लक्ष्ययोजनविस्तीर्णो लवणाऽर्णववेष्टितः ।।106।।

सुलक्षयोजनोत्तुंगो मध्ये मेरुर्विराजते[35] ।
उभयोः पार्श्वयोस्तस्य विदेहौ पूर्वपश्चिमौ ।।107।।

सदैव सदृशकालस्तत्र चक्रजिनादिकैः ।
कोटि पूर्वं परं चायुः धनुः पंचशतां तनुः ।।108।।

दक्षिणोत्तरयोश्चैवं भरतैरावतौ तथा ।
षड्विधास्तत्रकालाः स्र्युस्तेषु प्रथम उच्यते ।।109।।

कोटाकोटेश्च चत्वारः सागरास्तस्य संस्थितिः ।
त्रिकोशमनुजास्तत्र पल्यत्रितयजीविताः ।।110।।

कल्पवृक्षफलाहाराः स्वभावमृदुमानसाः ।
तेषां मरणवेलायां पुत्रपुत्र्योश्च संभवः ।।111।।

एकोनपंचाशदुच्चैः[36] तयोस्तारुण्यसंभवः ।
जयापात्यौ[37] च तावेव जायेत[38] भोगतत्परौ ।।112।।

तृतीयेदिवसे तत्र भोजनं वदरप्रमम्[39] ।
नानाभोगविनोदैश्च मोदन्ते सुखतो नराः ।।113।।

सिंहेभमहिषाश्वाद्याः परित्यक्तविरोधकाः ।
स्फटिकसदृशा भूमिः सरोवाप्यादिसंश्रिताः ।।114।।

दशधा कल्पवृक्षाश्च सन्ति तत्र सुखप्रदाः ।
आहारगेहवाद्यादींस्तेभ्यो ददाति सर्वदा ।।115।।

द्विरुक्त:[40] सुखमाख्योयं कालस्तावत्प्रकीर्त्तितः।
विलयो मनुजानां तु कर्पूरविलयोपमः।।116।।
एवं द्वितीयकालोऽपि त्रिकोटाकोटिसागरः।
द्विकोशमानवास्तत्र पल्यद्वितीयजीविताः।।117।।
द्वितीयदिवसे भुक्तिर्बिभीतकफलप्रमा[41]।
क्षिकाजृंभणमात्रेण[42] मृत्युस्तेषां प्रजायते।।118।।
मरणानन्तरं स्वर्गं याति ते भोगभूमिजाः।
आहारोऽस्ति निहारो न सर्वेषां भोगभूमिषु।।119।।
सुखमाख्यो ह्ययं कालो जिनेन परिभाषितः।
एवं तृतीयकालोऽपि द्विकोटाकोटिसागरः।।120।।
एककोशनरास्तत्र पल्यमेकञ्च जीवितम्।
भुक्तिः प्रतिदिनं तेषां धात्रीफलसमं भवेत्।।121।।
कालस्य तृतीयस्यान्ते पल्यस्य चाष्टमेंऽशके।
मंदेषु कल्पवृक्षेषु श्रृणु कौलकरीं स्थितिम्[43]।।122।।
पूर्णमास्याश्च संध्यायां पूर्वपश्चिमयोर्दिशि।
चंद्रार्कौ च जनैर्दृष्टौ शुचौ भीताश्च ते जनाः।।123।।
प्रतिश्रुतिरिति प्राख्यस्तदा कुलकरोऽभवत्।
अष्टादशशतोत्सेधः धनुःकायः[44] प्रकीर्तितः।।124।।
जीवितं तस्य पल्यस्य दशमो भाग उच्यते।
तस्य पार्श्वे गता लोकाश्चंद्रसूर्यभयातुराः।।125।।
तांस्तदा तेन संप्रोक्तं स्वरूपं चंद्रसूर्ययोः।
भयं कुर्वीतेमा लोका नेमौसाध्वसकारकौ।।126।।
इदं तु तद् वचः श्रुत्वा लोका निर्भयतां गता।
कोटिवर्षे ततोऽतीते द्वितीयोऽभूच्च सन्मतिः।।127।।
त्रयोदशशतान्येव धनुरुत्सेधकायकः।
पल्यस्य शतमो भाग आयुरस्य सुखावहम्।।128।।

तदा दृष्ट्वा जनैर्व्योम्नि तारका द्युतिकारकाः।
आगताः सन्मतेः पार्श्वे भयं संहर्तुमात्मनः।।129।।

पंचधा ज्योतिषां भेदा स तान् प्रत्युक्तवान् परान्।
सूर्यचंद्रमसादींश्च शुभाऽशुभफलप्रदान् ।।130।।

तच्छ्रुत्वा सुखिनो भूताः प्रजा भयेन वर्जिताः।
असंख्यकोटि संख्याब्देऽतीते क्षेमङ्करोऽभवत्।।131।।

कुलकरस्तृतीयस्तु सोष्टशतधनुस्तनु।
पल्यसहस्त्रभागानामेकभागोस्य जीवितम् ।।132।।

कालेऽस्मिन् पशवः सर्वे जनान् धावन्ति मारितुम्।
पार्श्वे तस्य गतान् लोकान् वदति स्म दयापरः।।133।।

सिंहव्याघ्रमृगादीनां विश्वासः क्रियते न हि।
इति श्रुत्वा जना जाताः सुखिनो भयवर्जिताः।।134।।

ततो वर्षे गते भूरि क्षेमंधरोऽभवत्तदा।
पादोनाऽष्टशतं चापं विग्रहो ग्रहवर्जितः।।135।।

दशसहस्रभागानां पल्यस्यैकांशजीवितम्।
अत्यंतक्रूरतां जाताः पशवो मारितुं तदा।।136।।

प्रोक्तं जनांश्च तेनाऽत्र यष्टिमुष्ट्रादिबाधनैः।
निवार्या व्याघ्रसिंहाद्या इति प्रजाः सुखंगताः।।137।।

ततश्च पंचमो जातो मनुः सीमंकराभिधः।
पंचाशदधिकं सप्तशतचापधनुर्धरम् ।।138।।

पल्यस्य लक्षभागानामेकभागोस्य संस्थितिः।
स्तोका कल्पद्रुमाजातास्तदा क्लिश्यन्ति मानवाः।।139।।

सीमां कृत्वा तदा तेन दत्ताः कल्पमहीरुहाः।
लोकास्तु सुखिनो जाताः स्वस्वस्थानं समाश्रिताः ।।140।।

ततो षष्टो मनुर्जातः सीमंधर इति श्रुतिः।
पल्यस्य दशलक्षाणामेकभागोऽस्यजीवितम् ।।141।।

पंचविंशाधिकं सप्तशतधनुस्तनुर्मतम् ।
तेन सीमा कृता कल्पवृक्षेषु कंटकैर्वृताः ।।142।।
ततश्च सप्तमो जातो नाम्ना विमलवाहनः ।
पल्यस्य कोटिभागानामेकभागोऽस्य संस्थितिः ।।143।।
सप्तशतं धनुर्देहं कलाविज्ञानकौशलम् ।
जनानां दर्शितं तेनाऽऽरोहणं[45] गजवाजिषु ।।144।।
ततोऽष्टमो मनुर्जातश्चक्षुष्मानिति नाम भाक् ।
पल्यस्य दशभागानामेकभागोऽस्य जीवितम् ।।145।।
पंचविंशतिचापोनसप्तशतधनुस्तनुः ।
तस्य काले तनूजानां जननादन्तरक्षणम् ।।146।।
पितॄणां जीवितं दृष्ट्वा भीताश्चेतसि सञ्जनाः[46] ।
प्रोक्तं तेन जनानां त्वहो मा गछन्तुसाध्वसम् ।।147।।
स्थास्यन्ति जनकाः काले कियदऽग्रे कलौ मुदा ।
यशस्वी चेति सन्नामा ततोऽभून्नवमो मनुः ।।148।।
पल्यस्य शतकोटीनामेकभागोऽस्य जीवितम् ।
पंचाशदधिकं षट् शतं चापतनुर्धरा[47] ।।149।।
तस्मिन् काले दिनान्यत्र कानिचित् पितरौ स्थितौ ।।
तेनाऽपि बोधितो लोकः सर्वभयनिवारितः ।।150।।
ततश्च दशमो जातोऽभिचंद्राभिः परोदयः ।
सहस्रकोटिभागानां पल्यस्यैकांशजीवितः ।।151।।[48]
पंचविशाधिकः षट् शत् चापोन्नततनुः ।
तस्मिनकाले सुतैः सार्द्धं क्रीडन्तो पितरौ मुदा ।।152।।
भयं नास्ति कलौ लोक इत्युक्तवान् कुलंकरः ।
चंद्राभाख्यो मनुर्जात एकादशोऽतिसुंदरः ।।153।।
दशसहस्रकोटीनां पल्यस्यैकांशजीवितम् ।
षट्शतं चापदेहोऽसौ कलाविज्ञानपारगः ।।154।।

कालेऽस्मिन् कानिचिद्वर्षाणि जनित्रौ[49] संस्थितौ मुदा।
मनुनोक्तं कलौ लोका भयं मा कुरु तत्वतः।।155।।

ततो जातो मरुद्देवो रूपलावण्यमंडितः।
पल्यस्य लक्षकोटीनामेकभागोस्य जीवितम्।।156।।

षटशतं पंचविंशोनधनुः कायः प्रकीर्तितः।
जलवाहननावाद्या जनानां तेन दर्शिताः।।157।।

त्रिदशमो मनुर्जातस्ततो नाम्ना प्रसेनजित्।
दशलक्षसुकोटीनां पल्यस्यैकांशसंस्थितिः।।158।।

पंचाशदधिकं पंचशतधनुस्तनुः परम्।
जरायुर्वेष्टितो बालो निर्गत उदरात्ततः।।159।।

जरायु:पटलं तेन संत्यक्तं बालके स्थितम्[50]।
ततः प्रजाः सुखी जाता अर्भकशुभदर्शनात्।।160।।

नाभिराजस्ततो जातः कोटिपूर्वपरा स्थितिः।
पंचविंशाधिकं पञ्चशतचापतनून्नतिः।।161।।

नाभिनालं तनूजानां छेदितं तेन धीमता।
कालेऽस्य घनमेघानां वृष्टिर्जाता मनोहरा।।162।।

सर्वधान्यस्य निष्पत्तिर्नदीसागरसंभवः।
पुत्रपौत्रेण संयुक्ताः प्रजासुखसमन्विताः।।163।।

पंचदशम उत्कृष्टो वृषभाख्यो मनुः परः।
षोडशमोऽतिविख्यातो भरताख्यो भवन्मनुः[51] ।।164।।

एते पितृ समाज्ञेयाः प्रजानां कुलकारिणः।
शुभैः कर्मभिरुत्पन्नास्त्रिज्ञानलोचनान्विताः।।165।।

अथ चतुर्थकालस्य प्रवेशे शक्रनिर्मितम्।
साकेताख्यं पुरं रम्यं नाभिराजोऽस्य भूपतिः।।166।।

मरुदेवीति तस्याऽस्ति शुभलक्षणलक्षिताः।
उभयोः परमा प्रीतिः पूर्वपुण्याऽनुसारिणी।।167।।

सर्वार्थसिद्धितश्च्युत्वा जिनोऽत्राऽवतरिष्यति।
षण्मासांश्च ततः पूर्वमाखण्डलसमाज्ञया।।168।।
धनदेनांगणं तस्य पूरितं रत्नवृष्टिभिः।
महावाद्यनिनादैश्च गीतस्तवननर्तनैः।।169।।
इंद्राज्ञा परितुष्टाभिर्देवीभिः परिसेविता।
मरुदेवी शुभा भाति शक्रगेहे शची यथा।।170।।
एकदा मृदुशय्यायां सुप्ता देवी सुखं स्थिताः।
अद्राक्षीत्षोडशस्वप्नान् महासुखफलप्रदान्।।171।।
ततश्च वृषभाकारं प्रविशन्तं मुखे वरं।
अपश्यत्स निनादेन तूर्यस्य जागृता सती।।172।।
कृत्वाऽलङ्कारमङ्गस्य भर्तुरन्ते ससंभ्रमाः।
गत्वाऽवदच्च तान् स्वप्नान् सुखदान् षोडशप्रमान्।।173।।
वारणं वृषभं सिंहं कमला पुष्पमालिके।
शशाङ्कं सूर्यबिंबञ्च मीनयुग्मं घटद्वयम्।।174।।
पद्माकरं समुद्रञ्च सिंहासनं मनोहरम्।
विमानं देवलोकस्य तथा भवनवासिनः।।175।।
रत्नराशिं च निर्धूमां वह्निज्वालां शुभाऽर्थदाम्।
एतेषां सत्फलं ब्रूहि शश्वत्त्वं कृपयान्विताः।।176।।
नाभिराजस्ततः प्राह तिष्टतेह फलं श्रृणुः।
त्रिलोकाऽधिपतिः पुत्रः शक्रसेव्यो भविष्यति।।177।।
मुखं ते प्रविशन्तं हि वृषभं पश्य ते फलम्।
सर्वार्थसिद्धितश्च्युत्वा गर्भे तेऽवतरिष्यति।।178।।[52]
इत्युक्ते सत्परं हर्षं संप्राप्ता सदनं गता।[53]
शुभे दिने ततश्च्युत्वा त्रिज्ञानधनसंयुतः।।179।।
गर्भे देवि समुत्पन्ने दर्प्पणे प्रतिबिम्बवत्।
देवदेवादिभिस्तत्र कल्याणं गर्भकं कृतम्।।180।।

देवीभिः शतसङ्ख्यातैर्मरुदेवी च सेविता।
निश्चकामस्ततो गर्भात्पूर्णे काले जिनोत्तमः।।181।।
मलस्पर्शविनिर्मुक्तः स्फटिकादिव सद्मनः।
तस्य जन्मसमुद्भूतं ज्ञात्वा शक्रः समागतः।।182।।
ततस्तमङ्कमारोप्य समारूढो गजाधिपम्।
अवापादीश्वरं मेरौ सर्वदेवैः समन्वितः।।183।।
पाण्डुकं वनसञ्ज्ञायां शिलायां सिंहविष्टरे।
संस्थाप्य जिननाथं तं पूजां करोति शुद्धधीः।।184।।
हेमैः कुम्भैः समानीतैः क्षीराब्धिवारिभिर्भृतैः।
महोत्सवशतैर्युक्तः कृत्वा स्नानविधिं सुराः।।185।।
वृषभोऽयमिति ख्यातिं घोषितवान् सुराधिपः।
हारादिभिरलङ्कृत्य स्तुतः स्तोत्रैर्बहूत्तमैः।।186।।
पुनरारोप्य मातंगमयोध्यापुरमागतः।
मातुरङ्के ततः शच्या स्थापितः श्रीजिनाऽर्भकः।।187।।
विधाय परमानन्दं स्वस्वस्थानं सुराः गताः।
ततस्तमम्बरैर्दिव्यैरलङ्कारैश्च भूषितम्।।188।।
दुग्धं[54] च परमामोदघ्राण[55]हार्यानुलेपनैः।
तुष्टा सा वीक्ष्य बालं स्वमङ्कस्थचारुविभ्रमम्।।189।।
आलिङ्गती मृदुस्पर्शम् कौतुकव्याप्तचेतसा।
नाभिश्च ससुतं दृष्ट्वा मेने स्वं परमद्युतिम्।।190।।
साकेतानगरे तेन कृतो जन्ममहोत्सवः।
अङ्गुष्ठामृतपानेन प्राप्तो यौवनमुत्तमम्।।191।।
वस्त्राभरणमन्नञ्च सकलं तस्य शक्रजम्।
सुधीः कच्छनरेन्द्रस्य पुत्री नाम्ना यशस्वती।।192।।
महाकच्छमहीपस्य नन्दा नामा सुता वरा।
शक्रेण ते समानीते कन्यके रूपभूषिते।।193।।

वृषभस्य कृतं ताभ्यां विवाहमङ्गलं परम्।
एकोनशतपुत्राश्च भरताद्याः परोत्सवाः।।194।।
ब्राह्मी नाम्ना च पुत्र्येका यशस्विन्यां तदाऽभवत्।
बाहुबली सुतश्चैकः पुत्रीनाम्नाऽथ सुन्दरी।।195।।
नन्दायां तौ तदा जातौ तनयौ परमोत्सवौ।
वृषभतनयाः सर्वे प्राप्ता निपुणतां पराम्।।196।
शस्त्रशास्त्रसुविद्यासु कलाविज्ञानधारिषु।
तस्मिन् काले प्रणष्टेषु कल्पवृक्षेष्वशेषतः।।197।।
क्षुधादिपीडितानां वा त्रायस्व शरणागतान्।[56]
अकृष्टपच्यशस्येन भूमिः सर्वत्र शोभते।
पाकविधिमजानीताः प्रजाः दुःखेन पीडिताः।।198।।
आगता नाभिराजस्य समीपं दीनमानसाः।
नाथं गताः समस्तास्ते प्रक्षयं कल्पपादपाः।।199।।
एवं श्रुत्वा स नाभीशो जगाद वचनम्वरम्।
ऋषभं परिपृच्छामः कारणं जीवनप्रदम्।।200।।
इत्युक्त्वा तेन साकं ताः वृषभस्यांतिकङ्गताः।
दृष्ट्वा च जनकं स्वामी सेवाञ्चक्रे[57] यथोचिताम्।।201।।
देवाऽस्मान् दुःखिनो भूतान् क्षुधादिपरिपीडनैः।
त्वं रक्षस्व कृपानाथ शरणं वज्रपञ्जरः।।202।।
तच्छ्रुत्वा वचनं स्वामी जगाद चाऽऽगतान् प्रति।
निर्माणं नगरादीनां क्षेत्रादीनाञ्च कर्षणम्।।203।।
वाणिज्यं पशुरक्ष्याञ्च शस्त्रादीनान्तु धारणम्।
शिल्पादीनि सुकर्म्माणि लेखकपाकसम्विधिम्।।204।।
जिनात्तत्सकलं[58] ज्ञात्वा प्रजा सुखेन सङ्गता।
संस्थिताः स्वान् गृहान् कृत्वा कर्मभूमिविधानतः।।205।।
काशीकुङ्कणकर्णाटबङ्गादिविषयान् बहून्।
निर्माप्याऽत्र पुरग्रामखेटकर्वटसंयुतान्।।206।।

क्षत्रिया वैश्यशूद्राश्च त्रयो वर्णाः सुनिर्मिताः।
कच्छाद्यास्तत्र देशेषु भूरक्षणे नृपाः कृताः।।207।।
उग्राख्य कुरुवंशौ द्वौ नाथश्च हरिवंशकः।
सु चत्वार इमे वंशा: स्तम्भा इव भवद्गृहे।।208।।
इक्ष्वाकुश्च स्वयं चाऽथ सोमप्रभः कुरुष्वपि।
हरिकान्तो हरेर्वंशे नाथवंशेष्वकम्पनम्।।209।।
काश्यपश्चोग्रवंशेषु इमे नृपा: जिनेशिन:।
कृताः परोपकाराय न्यायमार्गप्रवर्तिनः।।210।।
अयोध्यायां स्वयं राजा बाणारस्यामऽकम्पनः।
हस्तिनागपुरे सोमप्रभो राजा सुखावहः।।211।।
चम्पायां हरिकान्ताख्यः काश्यपो राजसद्मनि।
भरताद्या: सुताः सर्वे प्रजानां प्रतिपालका:।।212।।
कच्छसुकच्छ भूपाद्याः ज्ञानविज्ञानपारगाः।
चतुःसहस्रभूपाला: यथायोग्यं निवेशिताः।।213।।
एवं सुखेन सम्पूर्णो न ज्ञातः समयो गतः।
तेन देवाधिदेवेन भोगसम्पत्सुमध्यगः।।214।।
विंशतिलक्षपूर्वाणि कुमारकालसंस्थितिः।
त्रिषष्टिलक्षपूर्वाणि राज्यकालः प्रकीर्तितः।।215।।
अथ नीलाञ्जनाख्यायां नृत्यन्त्यां सुरयोषिति।
मृत्यौ तदैव जातायां दृष्टिञ्चकार नाभिजः।।216।।
गत प्राणां च तां दृष्ट्वा वैराग्यं प्राप्तवान् विभुः।
धिग् संसार सदाऽसार: नित्यं विनाशवत् सुखम्।।217।।
तस्मात्सर्वमिदं त्यक्त्वा खसुखं सुविनश्वरम्[59]।
सिद्धसौख्यस्य हेत्वर्थं करिष्यामि तपो वने।।218।।
तावल्लोकान्तिका देवा आगता भक्तितत्पराः।
तैर्वैराग्यं जिनेशस्य कर्तुं स्तुतिपूर्वकम्।।219।।

धन्योऽसि त्वं कृपानाथ संसारोत्तरणे तपः।
कुरु परोपकाराय चेति स्तुत्वा[60] दिवङ्गताः।।220।।
महावैराग्यसम्पन्नं जिनं ज्ञात्वा सुराधिपः।
आगत्य शिविकां धृत्वा विनयात्तत्पुरः स्थितः।।221।।
साम्राज्यं भरतादिभ्यो यथायोग्यं समर्पितः।
सुरनाथ शुभस्कंधामारूढः शिविकां ततः[61]।।222।।
विनिर्गतो जिनोगेहात् सम्प्राप्तस्तिलकं[62] वनम्।
नमः सिद्धेभ्य इत्युक्त्वा दीक्षाव्रतं समाददे।।223।।
पञ्चमुष्टिभिरालुञ्च्य केशान्सन्त्यज्य भूषणान्।
निर्ग्रन्थत्वं समासाद्य मुनिर्जातो जिनेश्वरः।।224।।
ततः केशाः सुरेन्द्रेण संक्षिप्ताः क्षीरसागरे।
दीक्षामहोत्सवं कृत्वा शक्राद्याः स्वपुरङ्गताः।।225।।
चतुः सहस्रसङ्ख्याता राजश्रेष्टास्तु तत्पराः।
जिनाकूतमजानाना विभ्रतोऽस्य सरूपताम्।।226।।
मासानामथ षट्कं स कायोत्सर्गेषु निश्चलः।
स्थितस्तावच्च ते सर्वे भग्ना परीषहादिभिः।।227।।
ततः फलादिकं ते तु यावद् गृह्णन्ति खादितुम्[63]।
तावद् देववचो जातं गगने भयदायकम्।।228।।
यूयम् योगीश्वरा जाताः गृहस्थान् इव भक्षकाः।
स्वेच्छया चेष्टं कुर्वीत[64] हनिष्यामस्तदा वयम्।।229।।[65]
एवं कलकलां कृत्वा देवा नभसि संस्थिताः।
तच्छ्रुत्वा भयमापन्ना मिथश्चक्रविचारणाम्[66]।।230।।
जिनं मुक्त्वाऽऽगताः कस्मात् दृष्ट्वा भरतभूपतिः।
हनिष्यति पुरे कोपाद् दैवात् सम्पद् हरिष्यति।।231।
आगते वा जिने राजिनिग्रहं नः करिष्यति।
तस्मादत्रैव संस्थ्येयं फलमूलादिसेवनैः।।232।

इति सञ्चिन्त्यते भूपाः जटाभस्मविभूषिताः।
विलिङ्गि[67]रूपमाश्रित्य विदधुर्वसतिं वने।।233।।
योगनिष्टस्य तस्याथ नमिविनमीमैथुनौ।
तस्तथुः पादयोर्नत्वा राज्ययौवन[68]लालसौ।।234।।
विदित्वा याच्यमानौ तावासनस्य प्रकम्पनात्।
विकृत्य वृद्धरूपेण[69] नागराजः समागतः।।235।।
प्रोचे तौ प्रति नागेशो युवयोर्यदि सम्पदि।
इच्छाऽस्ति भरतेशोऽसौ दास्यति राज्यमुत्तमम्।।236।।
देवोऽयं नग्नरूपोऽयं किं ते दास्यति निर्धनः।
सेवनीये युवाभ्यां तु भरतः कल्पद्रुमोपमः।।237।।
ततो वब्रुवतु बालौ[70] भो वृद्धग्रथिलोऽसि किम्।
त्रिलोकाधिपतिं मुक्त्वा कोऽसौ भरतभूपतिः।।238।।
ततस्तुष्टो धराधीशो जगाद तौ प्रति प्रभुः।
आगच्छन्तु मया सार्धं जिनेन्द्राऽऽज्ञा विधायिना।।239।।
ततो विमानमारोप्य तौ नीतौ धरणेशिना।
विजयार्द्धगिरिरम्यं धनर्द्धिरत्नभूषितम्।।240।।
पश्यतो गिरिराजोऽयं रजताचलनामभाक्।
भूतलादुन्नतः पञ्चविंशतियोजनप्रमः।।241।।
दशयोजनभूभागे श्रेणी दक्षिणादूत्तरे[71]।
पञ्चाशत्षष्टि सङ्ख्यानि नगराणि वसन्ति भो।।242।।
प्रति पुरं कोट्येका ग्रामसंहतिसंस्थितिः।
दक्षिणश्रेणि मध्यन्तु रथनूपुरपत्तनम्।।243।।
सिंहगारुडनामान्यौ विद्ये द्वे दत्तवांस्तयोः।
तत्र नमिपतिं चक्रुर्भोगभूमिविराजितम्।।244।।
तथोत्तरदिशि श्रेण्याम् पुरं गगनवल्लभम्।
विनमिस्तत्र भूपोऽभूद् वनभूति[72]विभूषितः।।245।।

पूर्वपुण्यात्तयोर्जाता लक्ष्मीवृद्ध्यनुगामिनी।
जिनसेवाफलं प्राप्तं ताभ्यां भुवि गतोधरे।।246।।
अनेकबलसम्पन्नौ महाविद्यासमन्वितौ।
विधाधरनृपैः सेव्यौ जातौ तत्र नराधिपौ।।247।।
अथाऽतीते च षण्मासे मध्याह्ने निर्मले दिने।
एवं चित्ते समुत्पन्नं देवस्य जगतां हितम्।।248।।
महावंशे समुत्पन्ना धीरगम्भीरशासनाः।
आहारेण विना नष्टा अहो तेषां कथं गतिः।।249।।
अतः परोपकारार्थं मुक्त्यर्थं धर्महेतुकम्।
शरीरं रक्षते धर्मो न तु प्राणप्रघातने।।250।।
इति संचिन्त्यमुक्त्यर्थं निर्गतश्चलमेरुवत्[73]।
अज्ञानिनो जनाः सर्वे न जानन्ति चरीविधिम्।।251।।
चरीहेतोः प्रतिग्रामं भ्रमति वृषभो जिनः।
वस्त्रकन्यादिकं धृत्वा प्रार्थयन्ति जना जिनम्।।252।।
षण्मासेषु गतेष्वेवं भ्रमन् हस्तिपुरे वरे।
आगतो वृषभो देवस्तत्र लोकाः ससंभ्रमाः।।253।।
गत्वा पादौ नमन्त्यस्य विनयानतमस्तकाः।
आगच्छ देव स्नानार्थं भोजनार्थञ्च मत्गृहे।।254।।
अथ प्रासादशिखरे स्थितो श्रेयान् महीपतिः।
दृष्ट्वैनं स्निग्धया दृष्ट्या पूर्वजन्म तदा स्मरन्।।255।।
यदाऽहं श्रीमती जाता भर्त्ता मे वज्रजंघवाक्।
सोऽयं मुनीन्द्रतां प्राप्तः प्रासुकाहारभुक्तिभाक्।।256।।
अथोऽयं मम गेहेऽत्र चागतः पुण्ययोगतः।
दास्याम्यस्मै महादानं भक्त्या विचारयन्निति।।257।।
आगत्य सहसा तत्र बंधुवर्गसमन्वितः।
कृत्वा प्रदक्षिणां भक्त्या नतः पादौ जिनस्य सः।।258।।
पादौ प्रक्षाल्य दत्वार्घं रसैरिक्षोर्भृतान् घटान्।
आनीय कारयामास पारणं जगतां गुरोः।।259।।

ततः प्रमुदितैर्देवैः पञ्चाश्चर्यविधिः कृतः।
भरतेनाऽपि सम्पूज्य स श्रेयान् श्रेयसीकृतः।।260।।

पुनर्गत्वा वने देवः करोति परमं तपः।
सहस्रवर्षपर्यन्तं पक्षमासाद्युपोषितैः।।261।।

शुक्लध्यानी कृतस्तस्य गते मोहे परिक्षयम्।
उत्पन्ने केवलज्ञानं लोकालोकप्रकाशकम्।।262।।

इन्द्राज्ञया कुबेरेण रम्यै: रत्नैर्विनिर्मितम्।
समवशरणं दिव्यं प्राकारैः परिवेष्टितम्।।263।।

सिंहासनस्थितस्याऽस्य समवशरणस्य च।
प्राप्तस्य गदितुं शोभं केवली केवलं प्रभु।।264।।

ततस्तमवधिज्ञानादवगम्य सुराधिपाः।
वंदितुं सपदि प्राप्ताः परिवारसमन्विताः।।265।।

ख्यातो वृषभसेनोऽस्य प्रथमोऽसौ[74] गणाधिपः।
अन्ये च श्रमणा जाता: महावैराग्ययोगिनः।।266।।

यथास्थानं ततस्तेषु शरणे समवान्विते।
यत्पादिषु निविष्टेषु गणेषु पृष्ट्वान् वृषम्।।267।।

गम्भीरं मधुरं रम्यं सर्वभाषास्वभावकम्।
जगाद भगवान् वाचं तत्वार्थं परसूचकम्।।268।।

अस्मिंस्त्रिभुवने कृत्स्ने जीवानां हितमिच्छताम्।
शरण्यं परमो धर्मस्तस्माच्च परमं सुखम्।।269।।

सुखार्थञ्चेष्टितं सर्वं तच्च धर्मनिमित्तकम्।
एवं ज्ञात्वा जना जैनं[75] कुरुध्वं धर्मसंग्रहम्।।270।।

इत्यादि देवदेवेन भाषितं धर्ममुत्तमम्।
श्रुत्वा देवमनुष्याश्च परमं मोदमागताः।।271।।

केचित्सम्यक्मतिं भेजु गृहधर्ममथाऽपरे।
अनागारव्रतं केचित् स्वशक्तेरनुगामिनः।।272।।

ततः समुद्यतं गन्तुं जिनं नत्वा सुरासुराः।
स्तुत्वा च निजधामानि गताः धर्मविभूषिताः।।273।।

यं यं देशं ससर्वज्ञः प्रयाति शुभयोगतः[76]।
योजनानां शतं तत्र जायन्ते स्वर्गविभ्रमाः।।274।।
चक्रवर्तिश्रियं तावत्प्राप्तो भरतभूपतिः।
संसाध्य सकलां भूमिमागतः स्वगृहं तदा।।275।।
वृषभस्य शतं पुत्रास्तेजस्कान्तिसमन्विताः।
श्रमणव्रतामादाय सम्प्राप्ताः परमं पदम्।।276।।
तेषु बाहुबली ख्यातः प्रतिकूलो महाबलः।
भरताऽऽज्ञाविनिर्मुक्तो युद्धार्थं स समागतः।।277।।
तयोर्गजघटाटोपसंघटखलसङ्कुलम्।
सञ्जातं परमं युद्धं बहुसत्वक्षयङ्करम्[77]।।278।।
मन्त्रिवर्गैः समालोक्य त्रियुद्धे नियमः कृतः।
दृष्टिमल्लपयोयुद्धे यो भग्नो न भवेन्नृपः।।279।।
भग्नस्तत्र त्रियुद्धेषु भरतो रणमूर्द्धनि।
चक्रं सम्भ्राम्य चिक्षेप तच्च जातं निरर्थकम्।।280।।
विषस्तं भ्रातरं दृष्ट्वा बाहूबली नरोत्तमः।
प्राप्तो वैराग्य सम्भावं श्रमणत्वं समाश्रितः।।281।।
वर्षं प्रति मया तस्था मेरुवन्निःप्रकम्पकः।
श्यामादीनाञ्च वल्लिभिर्वेष्टितः प्राप केवलम्।।282।।
ततः शिवपदं प्राप्तः आयुषः कर्मणः क्षये।
प्रथमं सोऽवसर्प्पिण्यां मुक्तिमार्गं व्यशोधयेत्[78]।।283।।
भरतस्त्वऽकरोद्राज्यं कण्टकैः परिवर्जितम्।
षड्विभागैः प्रभक्तायां सर्वस्यां भरतक्षितौ।।284।।
एवं गौतमदेवेन भाषिते श्रेणिकोऽब्रुवत्।
ब्राह्मणोत्पत्तिं मे ब्रूहि प्रभो त्वं हि कृपापरः।।285।।
आह गौतमदेवोऽपि शृणु श्रेणिकभूपते।
उत्पत्तिं कंठसूत्राणां विरोधिनां कलौ युगे[79]।।286।।
वृषभस्यैकदा चाऽथ समवशरणं वरम्।
कैलाशे चाऽऽगतं श्रुत्वा सन्तुष्टो भरतेश्वरः।।287।।

कृत्वा भोजनसामग्रीं नानापाकरसान्विताम्।
गतो भरतराजो हि यत्राऽस्ति वृषभो जिनः।।288।।

स्तुत्वा नत्वा सभास्थाने मनुष्यस्योपविष्टवान्।
श्रुत्वा धर्म्मप्रसङ्गादीन् सन्तुष्टस्तदनन्तरम्।।289।।

जगाद भरतो भूपः सभास्थितयतीन् प्रति।
आगच्छतु मम गेहं[80] यूयं भोजन हेतवे।।290।।

प्रोचे वृषभसेनोऽथ तच्छ्रुत्वा च गणेश्वरः।
यतीनां नोचितं भुक्तं तेषां निमित्तनिर्मितम्।।291।।

यतिभिः क्रियतेर्भुक्तिः प्रासुकाऽपरसद्मनि।
मनोवचनकायैश्च ज्ञातमन्नं न यज्युते।।292।।

मुनीनां देहधृत्यर्थं भोजनं कथितं जिनैः।
देहश्च प्राणधृत्यर्थं प्राणा धर्मस्य हेतवे।।293।।

धर्म्मतो लभते मोक्षो मोक्षे हि परमं सुखम्।
तस्मात्तनुञ्च संरक्ष्य क्रियते तनुकर्षणम्।।294।।

श्रुत्वा तद्वचनञ्चक्री परं मनस्यचिन्तयत्।
अहो दुर्द्धरजैनोऽयं मार्गो मोक्षप्रदायकः।।295।।

मद्गृहे बहुलं द्रव्यं कस्मै देयं यतिं विना।
मुनिस्तु निस्पृहो देहे तस्मादन्यत्करोम्यहम्।।296।।

त्रिसूत्रेण करिष्यामि चिह्नञ्च ब्रह्मवेदिनाम्।
तेभ्यो हि दीयते दानं यथेष्टं मम पुण्यदम्।।297।।

सम्यग्दृष्टिजनान् सर्वान् श्रावकव्रतधारिणः।
आमन्त्रयन्महावेगैः पुरुषैः स्वस्य सम्मतैः।।298।।

ततस्ते पुत्रकलत्रैर्बन्धुभिश्च सहागताः।
तान् दृष्ट्वा भरतोऽवादीद्यूयं नो जैनमार्गिणः।[81]।299।।

अङ्कुराः न कथं दृष्टा भवद्भिर्जीवसंयुताः।
तस्मात्तत्रैव ये जैनाः स्थितास्ते श्रावकोत्तमाः।।300।।

तांश्च त्रिषु च चिह्नेन करोमि ब्राह्मणान् वरान्।
दानं दास्यामि तेभ्योऽहं नमस्यामि नरोत्तमान्।।301।।

ब्रह्मसृष्टिं ततः कृत्वा तेभ्यो दानं ददौ नृपः।
पूजिताः भक्तिभारेण ब्रह्मज्ञानधरा यतः।।302।।

ततश्च तेन वर्गेण[82] समस्ते धरणीतले।
प्रवृत्ता याचितुं लोकं दृष्ट्वा द्रव्यसमन्वितम्।।303।।

एकदा भरतश्चक्री समवशरणे स्थितः।
वृषभं प्राह भो देव ब्रह्मसृष्टिः कृता मया।।304।।

तच्छुभमशुभं किं वा कृतं कार्यं वद प्रभो।
जिनो जगाद भो चक्रिन् विरूपं च त्वया कृतम्।।305।।

एते कलौ भविष्यन्ति जैनानां रिपवः समाः।
वेदादींश्च समुत्पाद्य करिष्यन्ति वधं महत्।।306।।

जैनधर्मं परित्यज्य करिष्यन्ति कुधर्म्मकम्।
जीवहिंसाकरं शास्त्रं वदिष्यन्ते जनं श्रुतेः।।307।।

तच्छ्रुत्वा भरतं क्रुद्धस्तान् सर्वान् हन्तुमुद्यतः।
भीतास्ते बाह्मणा नष्टा जिनस्य शरणङ्गताः।।308।।

जिनेन रक्षितास्ते हि तस्माद् बह्ममुखोद्भवाः।
इति वदन्ति ते दुष्टा अद्याऽपि ज्ञानवर्जिताः।।309।।

नृपा ये प्रथमे भग्ना वृषभस्याऽनुगामिनः।
ते च मारीचमाश्रित्य जाताः व्रतान्तराश्रिताः।।310।।

कुलिङ्गिभिश्च विषैस्तैर्जैनधर्मः कदर्थितः।
तेषां शिष्यैर्प्रशिष्यैश्च मिथ्याशास्त्रं प्रकाशितम्।।311।।

अथाऽसौ लोकमुत्तार्य प्रभूतं भवसागरात्।
कैलाशशिखरे प्राप निर्वृत्तिं वृषभो जिनः।।312।।

ततो भरतराजोऽपि प्रव्रज्यां प्रतिपन्नवान्।
संकृत्य कर्म्मणां शातिं मुक्तिस्थानङ्गतो मुनिः।।313।।

इति परमपवित्रं जैनधर्मं वरिष्ठं जिनवरमुखजातं पापतापोपनाशम्।
शिवपदसुखकल्पं सर्वकल्याणबीजं भजतु सकललोकः सोमसेनेन पूज्यम्।।314।।

इति रामपुराणे भट्टारकश्रीसोमसेनविरचिते ग्रन्थपीठिका वृषभदेवचरितवर्णनो नाम प्रथमोऽधिकारः।

❖❖❖

1. श्रुतयश्च इति ... प्रतौ
2. पूज्यपादप्रभाचन्द्रकलंकादीन् इति ग प्रतौ
3. प्राणी इति ख प्रतौ, प्राण इति ग प्रतौ
4. सर्व संचिरं इति क/ख प्रतौ
5. अभवः इति ग प्रतौ
6. ययौ ग प्रतौ
7. नरपुङ्गवान् इति ग प्रतौ
8. पादौ इति ग प्रतौ
9. शास्त्रहेतवः इति क/ख प्रतौ
10. ज्ञेयाः इति ख प्रतौ
11. स्मृता इति क प्रतौ
12. उद्धृताः इति क/ख प्रतौ
13. वर्णनाम् इति ख/ग प्रतौ
14. श्रीकंठा इति क/ख प्रतौ
15. वानराह्वयः इति ग प्रतौ
16. हनूवरुणयो इति ग प्रतौ
17. भग्निजोवह इति ख प्रतौ, भग्निजोवहः इति ग प्रतौ
18. मघुषस्य इति ग प्रतौ
19. बालिषिच्च इति क प्रतौ, बालिषी ल्च इति ग प्रतौ
20. विजयसौन्दर्या इति ग प्रतौ
21. दंडकारण्य प्रवेसं इति क प्रतौ
22. नखाख्यायाश्च मोहकम् इति क प्रतौ
23. सुग्रीवे राज्यस्थापन्- क/ख प्रतौ
24. आगमं इति क प्रतौ, आगतो इति ग प्रतौ
25. हनुमान् इति क प्रतौ, हनुमां इति ख प्रतौ
26. विचक्षणम् इति ग प्रतौ
27. नुस्त्री इति क प्रतौ, तृस्त्री इति ख प्रतौ
28. रामलक्ष्मणयो सँगम् इति ग प्रतौ
29. अपत्यालिगनं तथा इति ख/ग प्रतौ

30. पाचिता इति ग प्रतौ
31. रामायणपुरायणं पाचिता इति क/ख प्रतौ
32. कोष्ट इति ग प्रतौ
33. पचन्ति इति क प्रतौ, पंचति इति ख प्रतौ
34. कृपापर इति त्रयौ प्रतौ
35. विराज्यते इति ख प्रतौ, विराजिते इति ग प्रतौ
36. एकोनपञ्चाशतसहस्रै इति ग प्रतौ
37. जायापत्यौ इति क प्रतौ
38. जायतां पाठः स्यात् किन्तु प्रतित्रयेषु जायेत इत्येव उपलभ्यते।
39. वदराश्रमम् इति ग प्रतौ
40. द्विवरुक्तो इति पाठः सर्वप्रतिषु।
41. वीभातफलसमा इति ख प्रतौ
42. मक्षिका इति क/ख प्रतौ
43. कुलकरीस्थितिः इति ग प्रतौ
44. धुनंजयः इति ग प्रतौ
45. तेनारोहनं इति पाठः सर्वप्रतिषु।
46. संजना इति पाठः सर्वप्रतिषु।
47. चाप धनुर्धरा इति ख/ ग प्रतौ
48. एषः श्लोकः ख प्रतौ अनुपलब्धः।
49. जन पि वा इति ग प्रतौ
50. संत्यक्त बालकेस्थितिः इति ख/ग प्रतौ
51. अभवन्मुनीश्वरो मनुः इति ग प्रतौ
52. एषः श्लोकः इति ग प्रतौ अनुपलब्धः।
53. एषा पंक्ति ग प्रतौ अनुपलब्धः।
54. दिग्धं इति ग प्रतौ
55. प्रानहार्यानुलेपनैः इति क/ख प्रतौ
56. एषा पङ्क्तिः त्रयौ प्रतौ अतिरिक्ता येन कारणेन श्लोकानां क्रमभङ्गो जायते।
57. राधाचक्रे इति क/ग प्रतौ
58. जिनास्यात्सकलं इति क/ख प्रतौ, जिनास्यान्सकलं इति ग प्रतौ

किन्तु जिनात्तत्सकलं इत्येवं स्यात्।

59. इदं त्यक्ता बिनिन्द्यं हि ख सुखं सुविनश्वरं इति क प्रतौ
तस्मात्सर्वमिदं त्यक्त्वा कृतमूमाक्षयत्सुखम् इति ग प्रतौ
60. त्यक्त्वा इति ख/ग प्रतौ
61. जिनः इति ख/ग प्रतौ
62. समाप्तिलकं इति ख प्रतौ, समुपातिलकं इति ग प्रतौ
63. भक्षणम् इति ख-ग प्रतौ
64. कुर्वेते इति ख प्रतौ
65. एवं कलकलं कृत्वा देवानः नभसंस्थिताः।
गृहास्थान्नवभक्षका स्वेच्छया चेष्ट कुर्वीत हनिष्यामस्तदावयं।।
ग प्रतौ अशुद्धरुपेण श्लोकपुनरावृत्तिः प्राप्यते।
66. मिथश्चक्र विचारणाम् इति ग प्रतौ
67. कुलिंगी इति क-ग प्रतौ
68. राज्य पावन इति ख प्रतौ
69. विकृत्य जिनरूपं स ताभ्यां विद्ये वरे ददौ इति पद्मपुराणे 1/308
70. चमज्ञवब्रुवौलो इति ग प्रतौ
71. दक्षिणसूत्तरे इति क/ख प्रतौ
72. भपोह्यनंतभूतिभूषितम् इति ग प्रतौ
73. निश्चलं मंदिरोपमम् इति ग प्रतौ
74. प्रथमेयो इति क/ख प्रतौ
75. जनादेशं इति ख/ग प्रतौ
76. गतियोगत इति ख/ग
77. क्षयत्व इति क प्रतौ
78. मुक्तिमार्गंच्यशोधयत् इति क प्रतौ
79. यथा मुत्पतिभाषितं इति ग प्रतौ
80. ममागारं इति ग प्रतौ
81. तेषां दृष्टवाकुराः केचित्स्थितास्तत्रैव धर्म्मिणः इति ग प्रतौ
82. गर्वेण इति क प्रतौ

❖❖❖

द्वितीयोऽधिकार:

अथ वंशाश्च चत्वारि तेषां नामानि वक्ष्यते।
इक्ष्वाकुसोमवंशौ च हरिविद्याधरौ तथा।।1।।
भरतस्याऽऽदित्ययशस्पुत्रस्तस्माद्धृतयश:[1] ।।
ततो बलांक:[2] सुबलो महबलादतिबल:।।2।।
अमृतोऽत: सुभद्रोऽथ भद्रसूर्यस्तथाशशी।
प्रभूत तेजस्वी[3] पवन:[4] पवनोऽथ प्रतापवान्।।3।।
अतिवीर्य: सुवीर्यश्च तथादित्यपराक्रमी।
महेन्द्रविक्रम: सूर्य: शक्र धूम्नो महेन्द्रजित्।।4।।
प्रभुर्विभु[5]रविध्वंसो वीतभीर्वृषभध्वज:[6]।
गरुडाङ्को मृगाङ्कश्च तथाऽन्ये पृथिवीभृत:।।5।।
राज्यं सुतेषु निक्षिप्य निर्ग्रन्थव्रतमाश्रिता:।
सूर्यवंशसमुद्भूता: क्रमेण कथिता नृपा:।।6।।
सोमवंशे च ये जातास्तांश्च निगद्यतेऽधुना।
वृषभाच्च बाहुबली ततः सोमयशा मता:।।7।।
महाबलश्च सुबलो एवमाऽऽद्या महानृपाः।
श्रावण्यपदमाश्रित्य सम्प्राप्ता: परमं पदम्।।8।।
विद्याधरस्य वंशोऽहं वक्ष्यामि चाऽधुना श्रृणु।
नमेर्विद्याधरेन्द्रस्य रत्नमाली सुतोऽभवत्।।9।।
रत्नवज्रो मणिरथ: रत्नचित्रस्तथाऽभवत्।
वज्रजंघ: चन्द्ररथो वज्रादिसेनदंष्ट्रकौ।।10।।
वज्रध्वजो वज्रायुधो वज्र: सुवज्र वज्रभृत्।
वज्राभो वज्रबाहुश्च वज्राङ्को वज्रसुन्दर:।।11।।
वज्रास्यो वज्रपाणिश्च वज्रजानुश्च वज्रवान्।
विद्युन्मुख: सुवक्रश्च विद्युद्दृंष्टश्च तत्सुता:।।12।।

विद्युत्वान् विद्युदाभश्च विद्युद्वेगोऽथ विद्युतः।
इत्यादयः क्रमाजाता यथायोग्यं गतिं श्रिताः।।13।।
श्रेणयोरुभयो राजा विद्युत्दृढोऽथ नामतः।
सञ्जातो रत्ननूपुरे रथे[7] विद्याधराऽधिपः।।14।।
जम्बूद्वीपविदेहेऽथ सीतोदोत्तरदिक्तटे।
सुगन्धिमालिनीदेशे वीतशोके पुरे वरे।।15।।
राजा श्रीवैजयन्ताख्यः सुन्दरी तस्य भामिनी।
संजयन्तजयन्ताख्यौ जातौ पुत्रौ तयोर्वरौ।।16।।
एकदा स्वयं भूतार्थं वंदितुं गतवान्नृपः।
धर्म्मं श्रुत्वा सुपुत्राभ्यां दीक्षां जग्राह धर्मधीः।।17।।
तपोबलेन संप्राप्तः केवलज्ञानमुत्तमम्।
धरणेन्द्रादयो देवा आगता धर्म्महेतवे।।18।।
तं नागेन्द्रं समालोक्य भूपैश्वर्यादिभूषितम्।
निदानमकरोद्योगी जयन्ताख्यो हि बालधीः।।19।।
सम्प्राप्तः स तपस्तप्त्वा नागराजस्य वैभवम्।
वैजयन्तोऽथ योगीन्द्रः सम्प्राप्तः परमं पदम्।।20।।
संजयन्तोऽथ सुज्ञानी तपश्चरति मुक्तिदम्।
विद्युद्दृढस्य तत्सङ्गात् विमानं स्थम्भितं तदा।।21।।
अधोभागे मुनिं दृष्ट्वा पूर्ववैरं च संस्मरन्।
नीत्वा तं रक्षितो मध्ये नदीनां पञ्चसङ्गमे।।22।।
अहो विद्याधराः सर्वे यूयं पश्यथ राक्षसम्।
युष्मान् भक्षितुमायातं मारये रिपु[8]सङ्क्रमात्।।23।।
तस्य वचनमाकर्ण्य तैः सर्वैः क्रुद्धमानसैः।
मारितो ध्याननिष्ठोऽसौ बाणलोष्टादिताडनैः।।24।।
शुक्लध्यानेन सम्प्राप्तः शिवस्थानं महत्सुखम्।
नागेन्द्रप्रमुखा देवाः आगता धर्म्मवत्सलाः।।25।।

उपसर्गेण संयुक्तं दृष्ट्वा तस्य कलेवरम्।
क्रुद्धो नागाधिपः सर्वान् न भोगांश्च बबंध सः[9]।।26।।
[10]यावद्धिंसितुमारब्धस्तावद्भीताश्च ते जगुः।
नाऽस्माभिर्मारितो योगी विद्युद्दृढेन मारितः।।27।।
युद्धे नागोऽथ तं वध्वा यावत् क्षिप्यति सागरे।
तावदाऽऽदित्यदेवोऽस्य करं धृत्वा वचोऽवदत्।।28।।
भो नाग हेतुना केन हनस्येनं[11] च पापिनम्।
अनेन पूर्ववैरेण मारितो मुनिरुत्तमः।।29।।
वैरं हि वर्ध्यते नैवं पुनः संसारकारणम्।
एवं प्रबोध्य नागेन्द्रः कृतवान् शान्तमानसः।।30।।
सुरेन्द्रेण ततः पृष्टो देवो वैरस्य कारणम्।
देव आह भरतेऽस्मिन् नाम्ना सिंहपुरं शुभम्।।31।।
सिंहसेनो नृपस्तत्र रामदत्ताऽस्य वल्लभा।
श्रीभूतिरिति मन्त्री स्यात् पापात्मा कूटवर्त्मकः।।32।।
अहं तु सत्यवादीति लोकेभ्यो वदति कुधीः।
यदि प्रमाददोषेण मृषावादोऽत्र[12] मे मुखे।।33।।
आगतोऽहं मरिष्यामि कृत्वाऽऽत्मघातनं तदा।
इति यज्ञोपवीते च[13] वध्वासि पुत्रिकां स्थितः।।34।।
तदा प्रभृति लोकैश्च सत्यघोषोऽस्य[14] जल्पितः।
स्थापितो मन्त्रिणां मुख्यो स्थाने स नृपपुङ्गवैः।।35।।
पद्मखण्डपुरे चाऽथ श्रेष्टी सुदत्तनामकः।
भद्रमित्रः सुतस्तस्य सुमित्रायां समुद्भवः।।36।।
यानपात्रैः कदाचित्स प्रस्थितः सागरं प्रति।
सिंहपुरेऽथ वा जातः सम्पृच्छ जनकादिकान्।।37।।
पञ्चरत्नानि संक्षिप्य सुवर्णस्य करण्डके।
दत्तानि सत्यघोषस्य हस्ते हि सत्यवादतः।।38।।

धनार्थं च ततो गच्छन् रत्नदीपं परङ्गतः।
उपार्ज्य[15] धनमायाति मार्गे चौरेण लुण्ठितः।।39।।
नमस्कारबलेनाऽसौ सिंहपुरे समागतः।
तं दृष्ट्वा सत्यघोषोऽथाकरोद्बुद्धिं हि दुष्टधीः।।40।।
अहोऽद्य रजनीयामे स्वप्नोदृष्टः कुदुःखदः।
कोऽप्याह मां समागत्य देहि मे रत्नपञ्चकम्।।41।।
भो भद्राऽसौ न जाने किं फलं दास्यति दुःखजम्।
नृपादिषु तदेवोक्तं तेनाऽपि दुष्टबुद्धिना।।42।।
एतस्मिन्नन्तरे गत्वा तेन रत्नकरण्डकः।
याचितः सत्यघोषस्य पार्श्वे स्वस्य सुखाप्तये।।43।।
भद्रमित्रं ततोऽवोचत् सत्यघोषो दुरात्मकः।[16]
कुतोऽस्ति तव रत्नानां करण्डको दरिद्रिणः।।44।।
भद्रमित्रस्ततोऽवोचत् मंत्रिन् किं तव विस्मृतम्।
यानगमनवेलायां करण्डको मयाऽर्पितः।।45।।
मन्त्री प्रोचे कुतो यानं कुतो रत्नकरण्डकः।
आगतोऽसि कुतः पापी कुर्तं मां दुःखभाजनम्।।46।।
इत्युक्त्वा गलके धृत्वा निर्घाटितो गृहात्स्वयम्।
पुनर्याचति चागत्य तच्छ्रुण्वन्ति जनाः परे।।47।।
तथापि न करोत्यत्र कोपितस्य विचारणम्।
नृपगेहस्य भागेऽस्ति पश्चिमे किञ्च कद्रुमः।।48।।
तस्योपरि वदति स्म यावन्मां सा गता न वा[17]।
न करोति नृपो न्यायं सत्यघोषस्य पापिनः।।49।।
नृपस्य वल्लभा प्राह रामदत्ता नृपं प्रति।
नाऽस्ति देवग्रथिलोऽयं सत्यं याचति रत्नकम्।।50।।
न्यायं त्वं कुरु देवास्य नोचेदत्र करोम्यहम्।
इत्युक्त्वा स तथाऽनीतो नृपस्य सन्निधिं मुदा।।51।।

भद्र किं ते धनं वस्तु कस्य हस्ते समर्पितम्।
स आह देवि रत्नानां पञ्चानां मे करण्डकः।।52।।
दत्तोऽस्ति सत्यघोषस्य करे तया न चाऽन्यथा।
देव्योक्तमधुना गच्छ दास्येते रत्नपञ्चकम्।।53।।
नृपाज्ञाञ्च समासाद्य राजा राज्ञी च मन्त्रिणा।
द्यूतकर्म्मसमारब्धं महद्रहसि संस्थिताः।।54।।
जिगाय मुद्रिकां देवी श्रीभूतेश्च कुतूहलात्।
धात्र्यै निपुणमत्यै सा दत्वा तां मुद्रिकां दशा।।55।।
मुद्रिकाया अभिज्ञानाद्रत्नान्यानय चादिशत्।
सा गत्वा तद्गृहेऽभाणीत् मन्त्रिभार्यां हि सुन्दरि।।56।।
कृष्णवस्त्रेण यद्बद्धं हेमरत्नकरण्डकम्।
तद्याचते च भर्त्ता ते देहि वेगेन साम्प्रतम्।।57।।
सा जगाद न ते हस्ते दास्यामि च करण्डकम्।
ग्रहीष्यति स चाऽऽगत्य यद्यस्ति तत्प्रयोजनम्।।58।।
श्रुत्वेति वचनं तस्याः गत्वा राज्ञे निवेदितम्।
जित्वा यज्ञोपवीतं सा पुनर्धात्र्यै समर्पितम्।।59।।
गत्वा धात्र्याऽऽह हे मुग्धे वेगाद्देहि करण्डकम्।
दृष्ट्वा यज्ञोपवीतञ्च तया दत्तः करण्डकः।।60।।
परोक्षे ग्रन्थिकं दृष्ट्वा राजोचे मन्त्रिणं प्रति।
त्वामेव याचते देहि[18] चेदस्ति ते गृहे वरे।।61।।
तेनोक्तं ग्रथिलोऽयं मां रत्नानि तेन याचते।
अहं जानामि चेद्देव सुकृतं हारितं तदा।।62।।
श्रुत्वा तद्वचनं राजा परीक्षितुम् भद्रमित्रं।
दर्शयति स्म रत्नानि क्षिप्त्वा बहूनि पेटके।।63।।
स्वस्य रत्नानि भद्रेण गृहीतानि परीक्ष्य च।
हैमं करण्डकञ्चापि स्वीकृतं पटुबुद्धिना।।64।।

राजा पृच्छति सभ्यांश्च को दण्डोऽस्य च मन्त्रिणः।
तैरुक्तं त्रिविधो दण्डो विद्यते देवदोषजः।।65।।

गोमयत्रीण्यशनातु स[19] भक्षणीयं न चेत्तु वा।
सर्वस्य ग्रहणं वाऽस्य वा मल्लमुष्टिकात्रयम्।।66।।

गोमयं भक्षितुं शक्तो न जातो मल्लमुष्टिभिः।
मारितः सकलैः लोकैः पूर्ववैराऽनुभावितैः।।67।।

दुर्मृत्युना मृतो जातो धनागारे[20] महाशयः।
अतिलोभाच्च[21] नागोऽसौ रक्षति राजकं धनम्।।68।।

सत्यघोषपदे तेन भूपेन स्थापितो द्विजः।
धर्म्मिलाख्यो[22] महामन्त्री न्यायमार्गप्रवर्तकः।।69।।

भद्रमित्रोऽभवन्मन्त्री सर्वेषां मन्त्रिणां मुखः।
धर्म्ममार्गरतो नित्यं प्रजानां सुखदायकः।।70।।

एकदा वरधर्म्मी स्यात्[23] श्रुत्वा धर्म्मदयापरम्।
भद्रमित्रोऽभवज्जैनो[24] दानपूजादितत्परः।।71।।

भद्रमित्रस्य मातातः मृत्वा जाताऽतिलोभतः।
व्याघ्री वने महादुष्टा दानपूजादिवर्जनात्।।72।।

कदाचिद् वनमायातं भद्रमित्रं च खाद सा।
स मृत्वा रामदत्तायां सिंहचन्द्रो भवेत्सुतः।।73।।

द्वितीयो पूर्णचन्द्राख्यः सुतो जातोऽनुजोऽस्य च।
एकदा सिंहसेनोऽसौ तेन सर्पेण भक्षितः।।74।।

मृत्वा राजा गजो जातो दुष्टविषेण कानने।
सिंहचन्द्रेण पुत्रेण पूरितो गारुडी रुषा।।75।।

तद् गारुडदण्डाङ्को गारुडी मन्त्रशक्तितः।
आहूय सकलान्भागानित्यवोचद् दयातिगः।।76।।

यो निर्दोषो भवेत्सर्प्पः प्रविश्याऽग्नौ स गच्छतु।
अन्यथा निगृहीष्यामि ज्ञात्वा भूपतिघातकम्।।77।।

दोषमुक्ताश्च ये सर्पाः गतास्ते च यथायथम्।
राजादष्टश्च यः कालः सोऽग्निकुण्डे हि भस्मसात्॥78॥

कालकाख्ये वने जातो मृत्वा स चमरीमृगः।
यत्र नृपचरो हस्ती जातोऽस्ति लीलयान्वितः॥79॥

नाथस्य मरणं स्मृत्वा रामदत्तार्यिकाऽभवत्।
सिंहचन्द्रो मुनिर्जातः पूर्णचन्द्रो नृपास्पदे॥80॥

सिंहचन्द्रो मुनीन्द्रोऽभूत् त्रिज्ञानी वरचारणः[25]।
एकदा धर्महेतोश्च पृष्टोऽसौ रामदत्तया॥81॥

पूर्णचन्द्रः स भो स्वामिन् कदा धर्म्मं करिष्यति।
इति श्रुत्वा मुनिः प्राह श्रृणु मातः कथानकम्॥82॥

सिंहसेनो गजो जातः कदाचिन्मां निरक्ष्य सः।
मारणार्थं समायातो गगने बाधितो मया॥83॥

ततो जातिस्मरो भूत्वा जैनव्रतमजिग्रहत्।
स कदाचिन्नदीतीरे निमग्नो घनकर्दमे॥84॥

मृत्वा च मरिमृगोऽपि कुर्कूटाख्येऽभवत्फणी।
पापिना तेन सन्दृष्टो मृतो हस्ती समाधिना॥85॥

सहस्रारे समुद्भूतः श्रीधरो नामतोऽमरः।
धर्मिष्णो[26] मरणं प्राप्य मर्कटोऽत्र वनेऽभवत्॥86॥

सत्यघोषचरः सर्पः कपिना तेन मारितः।
तृतीयं नरकं प्राप्तो भुनक्ति वेदनां पराम्॥87॥

मृत्युङ्गतगजेन्द्रस्य दन्तमुक्तादिकानि च।
व्याघेनैकेन दत्तानि नीत्वा श्रेष्ठिकरे मुदा॥88॥

श्रेष्ठिना तानि दत्तानि पूर्णचन्द्राय भूभुजे।
तद्दन्तैर्भूभृता चापि पल्यङ्कं सारनिर्मितम्॥89॥

मुक्तिकानां सुहारश्च स्थापितोऽस्ति स्ववक्षसि।
इति गत्वा च मातस्त्वं सर्वं तस्मै निवेदय॥90॥

इत्युक्ते सा सती गत्वा तस्मै सर्वं निवेदितम्।
पूर्णचन्द्रः पितुर्वार्ता श्रुत्वा शोकाऽऽकुलोऽभवत्।।91।।
मुक्ताफलांश्चपल्यङ्कं पूजित्वा च स दग्धवान्।
स्वयं च श्रावको भूत्वा मृत्वा स्वर्गमसिश्रियत्।।92।।
रामदत्ताऽपि सा साध्वी शुक्रे स्वर्गे सुरोऽभवत्।
सिंहचन्द्रो मुनीन्द्रो[27]ऽपि चोर्द्ध्वग्रैवेयकङ्गतः।।93।।
अथाऽत्र दक्षिणश्रेण्यां धरणीतिलके पुरे।
अतिवेगो नृपस्तस्य वल्लभा लक्ष्मणाऽभिधा।।94।।
रामदत्ता चरस्तस्याः पूर्वकृतनिदानतः।
श्रीधराख्या सुता जाता रूपलावण्यभूषिता।।95।।
अलकापुरनाथेन दर्शकाख्येन प्रीतितः।
प्रणीता श्रीधरादेवी तयोः प्रीतिरभूत्परा।।96।।
पूर्णचन्द्रचरो देवः पूर्वकर्म्माऽनुभावतः।
यशोधराऽभिधा पुत्री श्रीधराया अभूद् वरा।।97।।
आदित्याभपुरेशस्य सूर्यावर्तस्य धर्मिणः।
राज्ञी यशोधरा जाता शशिनो रोहिणी यथा।।98।।
सिंहसेनचरो देवः सहस्राराच्युतोऽन्यदा।
पुत्रो यशोधरायाश्च रश्मिवेगोऽभिधोऽभवत्।।99।।
सूर्यावर्तो मुनिर्यातो मुनिचन्द्रयतीश्वरात्।
तपस्विन्यौ सुसञ्जाते श्रीधरा च यशोधरा।।100।।
एकदा रश्मिवेगोऽपि सिद्धकूटेऽभवद्यतिः[28]।
चारणत्वञ्च सम्प्राप्य कांचनाद्रिगुहाङ्गताः।।101।।
वन्दनार्थङ्गता साध्वी श्रीधरा च यशोधरा।
सत्यघोषचरस्तस्मात् श्वभ्रादजगरेण च।।102।।
तेनाऽपि भक्ष्यमानं तं दृष्ट्वा ताभ्यां मुनीश्वरम्।
संन्यासविधि संदत्ता सदा सौख्याशया तया।।103।।

समाधिना मृतो जातः कापिष्टेऽर्कप्रभोऽमरः।
मृत्वाऽऽर्यिकेऽपि तत्रैव ते सञ्जातौ सुरोत्तमौ।।104।।
अजगरोऽपि मृत्वातश्चतुर्थं नरकं गतः।
भुनक्ति तत्र चाऽत्यन्तं दुःखं पञ्चविधं महत्।।105।।
सिंहचन्द्रचरश्चाऽथ ग्रैवेयकाच्च्युतस्ततः।
चक्रपुरे रते देशेऽपराजितो नरेश्वरः।।106।।
श्रीमती वल्लभा तस्य रूपलावण्यभूषणा।
तयोरभूत्सुतो रम्यश्चक्रायुधोऽभिधानकः।।107।।
सिंहसेनचरोदेवश्चक्रायुधसुतोऽभवत्।
नाम्ना वज्रायुधो धीमान् कलाविज्ञानपारगः।।108।।
पृथिवीतिलके चाऽथ पुरे राजाऽतिवेगवाक्।
श्रीधराख्याचरस्तस्याऽभूत्पुत्री रत्नमालिका।।109।।
वज्रायुधेन सा नीता विवाहविधिना तदा।
तयोर्यशोधरोजीवः पुत्रो रत्नायुधोऽभवत्।।110।।
अथाऽपराजितो राजा श्रुत्वा धर्मजिनोदितम्।
चक्रायुधाय साम्राज्यं दत्वा दीक्षामजिग्रहत्।।111।।
चक्रायुधोऽपि कालेन पितुरन्ते भवद्युतिः।
केवलज्ञानमुत्पाद्य मोक्षस्थानञ्च प्राप्तवान्।।112।।
वज्रायुधोऽपि पुत्राय दत्वा राज्यमभूद्यतिः।
रत्नायुधोऽथ सद्भोगे निमग्नो मूढमानसः।।113।।
अथ मनोहरोद्याने वज्रदन्तमुनौ स्थिते।
सिद्धान्तचिन्तनायुक्तो लोकप्रेक्षाऽनुचिन्तने।।114।।
जीमूतविजयो नाम्ना राजहस्ती तदाऽशृणोत्।
क्षणाज्जातिस्मरो भूत्वा जिनभक्तोऽभवत् स्वयम्।।115।।
अगालितं जलं त्यक्तमप्रासुकञ्च भुक्तिकम्।
निशाभुक्तिं मदक्रीडां वृक्षादीनाञ्च भञ्जनम्।।116।।

तथाविधं गजं दृष्ट्वा राजा पृच्छति वैद्यकम्।
का व्याधिपीड़ितो हस्ती कंठाग्रहेण दूषितः।।117।।
मुनिर्जानाति तेनोक्तं ज्ञानी वज्रदन्ताऽभिधः।
राजा गत्वा वने प्रीत्या पृच्छति तं मुनीश्वरम्।।118।।
भो स्वामिन् हेतुना केन हस्त्याहारं करोति न।
मुनिराह भरतेऽस्मिन्नस्ति छत्रपुरं पुरम्।।119।।
प्रीतिभद्रो नृपस्तत्र सुन्दरी तस्य वल्लभा।
तयोः प्रीतिङ्करः पुत्रो जातो गुणकलानिधिः।।120।।
चित्रमतिर्नृपमन्त्री कमला तस्य भामिनी।
तयोर्विचित्रमत्याख्यः पुत्रो जातो विचक्षणः।।121।।
विचित्रमतिना सार्द्धं प्रीतिः प्रीतिङ्करस्य च।
धर्म्मरुचिमुनेः पार्श्वे तौ जातौ च मुनीश्वरौ।।122।।
क्षीरश्रवर्द्धिरुत्पन्ना प्रीतिङ्करमुनेस्तयोः।
विहरंतौ च सम्प्राप्तौ साकेताया बहिस्थलम्।।123।।
स्थितोऽसि चित्रमत्याह्वो[29] ध्यानयोगेन धर्म्मधीः।
प्रीतिङ्करमुनीन्द्रस्तु चर्यार्थमविशत्पुरम्।।124।।
वेश्यायाः बुद्धिषेणायाः सम्प्राप्तो मुनिरङ्गणम्।
वेश्या तदाह भो स्वामिन्नाऽहं दाताऽस्मि ते मुने।।125।।
मुनेः पादौ पुनर्नत्वा तया पृष्टो यतीश्वरः।
पापेनाऽस्मद्दशा केन कुले जन्मधनादिकम्।।126।।
मुनिराह शृणु पुत्रि कुज्ञानतपसा फलम्।
मिथ्यामतं ततस्त्यक्त्वा कुरु धर्म्मजिनोदितम्।।127।।
जैनी जाताऽथ[30] सा वेश्या मुनेर्वाक्यनिबन्धनात्।
मुनिर्गत्वा विचित्राय तत्सर्वञ्चं निवेदितम्[31]।।128।।
प्रीतिङ्करमुखात्सर्वं श्रुत्वा मतिविचित्रकः।
रागवेषेण चाऽन्येद्युः स गतो गणिकागृहे।।129।।

गणिका तं मुनिं दृष्ट्वा नत्वा स्तुत्वा स पूजितः।
विकारसहितं ज्ञात्वा मुनिमाह विलासिनी[32] ।।130।।
सुखं वैषयिकं भोक्तुं[33] कथं वाञ्छसि चेतसि।
ये नरा विषयारक्तास्ते गता नरकालये।।131।।
इत्यादिबहुधा बोधैः सम्बोधितोऽपि पापधीः।
पश्यति तां विकारेण दुर्गन्धां सः पुनः पुनः।।132।।
तदा निर्घाटितो गेहादागतोऽसौ राजमन्दिरम्।
मांसादिपाकविधिना गन्धमित्रो वशीकृतः।।133।।
ततो धनबलेनाऽयं बुद्धिषेणां विलासिनीम्।
रञ्जयित्वा च पापात्मा बभुंजे स्वेच्छया सुखम्।।134।।
आर्त्तध्यानात्ततो मृत्वा गजो जातो महानयम्।
श्रुत्वा त्रिलोकप्रज्ञप्तिं जातिस्मृतिमवाप सः।।135।।
तस्मात् दुःखप्रलापेन न करोत्यशनादिकम्।
गजस्याऽस्य कथां श्रुत्वा वैराग्यमभवन्नृपः।।136।।
रत्नमाला तया साकं दीक्षां प्राप्तो नराधिपः।
कृत्वा तपश्च मृत्वा तौ गतौ स्वर्गेऽच्युताऽभिधे।।137।।
रत्नाभरत्नमालाख्यौ स्वर्गे सौख्येन तिष्ठतः।
सत्यघोषचरश्चाऽथ नरकादागतः पुनः।।138।।
भ्रान्त्वा संसारवारोऽसौ सञ्जातः छत्रकेपुरे।
दारुणाऽख्यस्य भिल्लस्य पुत्रो दारुणनामकः।।139।।
एकदा तेन दुष्टेन दुष्टो वज्रायुधो मुनिः।
मारितोऽसौ शुभध्यानैः प्राप्तः सर्वार्थसिद्धिकम्।।140।।
सोऽतिदारुणभिल्लोऽगात् सप्तमं नरकङ्कलः।
अथाऽस्ति धातकीखण्डे विदेहे क्षेत्रपश्चिमे।।141।।
गन्धिलाविषयेऽयोध्यानगरी तत्र भूपतिः।
अर्हद्दास इति ख्यातः सुव्रता तस्य वल्लभा।।142।।

रत्नमालाचरस्तस्य पुत्रोऽभूद्वीतभयाभिधः ।
राज्ञोऽस्य जिनदत्ताख्या[34] द्वितीयास्ति पटाङ्गना ।।143।।
रत्नायुधचरस्तस्यां पुत्रो जातो विभीषणः ।
वीतभयेन सञ्जाता प्रीतिर्विभीषणस्य च ।।144।।
बलिनारायणौ[35] जातौ क्रमेण तौ बलाद् भुवि ।
द्वितीयं नरकं प्राप्तः पापाद्विष्णु[36]र्विभीषणः ।।145।।
तद्वियोगाद् बलभद्रो दीक्षां प्राप्य ततो बलात् ।
जातो लान्तवे स्वर्गे शुभादित्यप्रभोऽमरः ।।146।।
श्वभ्रभूमिं मया गत्वा[37] नारकी बोधितो तदा[38] ।
विविधैर्निर्मलैर्वाक्यैर्जिनोदिष्टैर्विभीषणैः ।।147।।
ऐरावतेऽथ साकेतपुरे श्रीवर्मभूपतेः ।
श्वभ्रादागत्य पुत्रोऽभूद् धर्म्मनामा विभीषणः ।।148।।
ततोऽनन्तमुनेः पार्श्वे धर्म्मबालोऽभवन्मुनिः ।
ततः फलेन सञ्जज्ञे ब्रह्मकल्पे सुरोत्तमः ।।149।।
वज्रायुधचराख्योऽसावहमिन्द्रपदं दधे ।
सर्वार्थसिद्धितश्च्युत्वा सञ्जयन्तोऽभवद्यतिः ।।150।।
स श्रीधर्म्मचरो देवो ब्रह्मस्वर्गात् समागतः ।
जयन्तोऽस्य लघुभ्राता संयमी त्वं बभूविथः ।।151।।
क्रमाद्विलुप्तसम्यक्त्वो नागराजपदं दधे ।
स त्वं निदानदोषेण सौभाग्यश्रीनिवासभूः ।।152।।
अथ भिल्लचरो जीवः सप्तमनरकाच्च्युतः ।
कुर्क्कूटकफणी भूत्वा तृतीयं नरकं गतः ।।153।।
तस्मादागत्य कुयोन्यां नानारूपेण पीडितः ।
अथेह भरते क्षेत्रे चैलावती नदीतटे ।।154।।
तापसो मृगशृङ्गाख्यो भूत्वा कुज्ञानजं तपः ।
तप्त्वा विद्युद्दृढो जातो विद्युद्दंष्ट्रस्य[39] पुत्रकः ।।155।।

अतः पूर्वाऽनुवैरेण सञ्जयन्तं यतीश्वरम्।
दृष्ट्वा क्रोधेन दुष्टेन हतो मोक्षपदङ्गतः।।156।।
तस्मादैनञ्च नागेन्द्र मा मारय कृपां कुरु।
इत्युक्त्वा आह नागेन्द्र मुञ्चामि तव वाक्यतः।।157।।
अस्य वंशे कदा मा भूद्विद्यासिद्धिः सुखप्रदा।
इत्युक्त्वा श्रापको दत्तो धरणीशेन कोपिना।।158।।
आदित्यप्रभ ऊचे तं त्वं[40] नागेन्द्र विवेकवान्।
विद्याहीनेन चाऽनेन जीवितेन मृतेन किम्।।159।।
एवं चेत् सञ्जयन्तस्य मूर्त्यग्रेऽस्य भविष्यति।
विद्यासिद्धिश्च वंशेऽस्य नाऽन्यथा देव भाष्येत।।160।।
नागस्य वचनं श्रुत्वा देवः प्राह खगं प्रति।
एवमेव कुरु त्वं हि विद्यासिद्धिर्यतो भवेत्।।161।।
एवं संबोध्य सर्वेषां देवः स्वमालयङ्गतः।
नागेन्द्रोऽपि स्वयं स्थानाङ्गते धर्म्मेण संयुतः।।162।।
विद्युद्दृढोऽथ सुज्ञानी विरक्तोऽभूद्विवेकतः।[41]
दृढरथाय पुत्राय दत्वा राज्यं तपोऽग्रहीत्।।163।।
दृढरथाद्रथाश्वश्च[42] ततश्च युधवाहनः।
अश्वध्वजः सुपद्माभः पद्ममाली ततोऽभवत्।।164।।
पद्मरथः सिंहपानो मृगधर्मा ततोऽपरो।
इत्यादि बहवो जाता विधाधरनरेश्वरः।।165।।
दत्वा राज्यं स्वपुत्रेषु यथायोग्यां गतिं श्रिताः।
एवं ते कथितो वंशो विद्याभृद्धर्म्मशालिनाम्।।166।।
विमलधर्म्मफलेन नरेश्वराः विजितधर्मकलङ्काः शिवङ्गताः।
भजतु भव्यजनो जिनधर्म्मकं सुखकरं सुरवृन्दसुसेवितम्।।167।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते वंशस्योत्पत्तिः
वर्णनो नाम द्वितीयोऽधिकारः।।

❖❖❖

1. पुत्रस्तस्माच्छत प्रमा इति ख/ग प्रतौ
2. बलाकाक: इति क प्रतौ
3. तेज तेजस्वी इति क/ख प्रतौ
4. पवनो इति क/ख प्रतौ अनुपलब्धः।
5. प्रभुर्विभू इति क प्रतौ, प्रभूर्विभु इति ख प्रतौ, प्रभुश्रवो इति ग प्रतौ किन्तु प्रभुर्विभु इतिस्यात्।
6. प्रभुश्रवोतीतभीतिसोमभीर्वृषभध्वज इति ग प्रतौ
7. रत्न इति ग प्रतौ
8. पुरि संक्रमात् इति ख प्रतौ
   युर संक्रमात् इति ग प्रतौ
9. वबंध स: इति क/ख प्रतौ
10. यावद्विसितु इति क प्रतौ, यावद्विंसतु इति ख प्रतौ
11. त्वं हनस्येनं इति क प्रतौ, चं हिनस्त्थेवं इति ग प्रतौ
12. मृषावादो तु इति ख/ग प्रतौ
13. यज्ञोपवीते स इति क/ख प्रतौ
14. सत्यघोषो हि इति क प्रतौ
15. उपार्ज्य इति पाठः स्यात् किन्तु उपार्य इति प्रतित्रयेषु उपलभ्यते।
16. पूर्वमत्यै मयागत्य अस्मि स्थानेह मन्त्रिणा इति ग प्रतौ
17. बहु इति क प्रतौ
18. दोषदेहि इति ख/ग प्रतौ
19. गोमयंत्रीण्यमत्राणि इति क प्रतौ,
    गोयंत्रीण्यमत्राणि इति ख प्रतौ,
    गोमयत्रीण्यमत्राणि इति ग प्रतौ किन्तु गोमयत्रीण्यश्नातु स इति पाठः स्यात्।
20. धानागारे इति क प्रतौ
21. अतिलोभोथ इति क प्रतौ
22. धर्म्मलाख्यो इति क प्रतौ
23. वरधर्म्मास्यात् इति प्रतित्रयेषु उपलभ्यते।
24. भद्रमित्रोभवज्जातो इति क प्रतौ
25. त्रिज्ञानोवरचारिणा इति ग प्रतौ
26. धम्मिल्त्रो इति त्रयौ प्रतौ किन्तु धर्म्मिष्णो इति पाठः स्यात्।

27. मृत्वाथ इति क प्रतौ
28. एकदा दक्षिणे श्रेणीं सिद्धकूटेभवद्यति इति ख/ग
29. स्थितो चित्रमत्याद्वो इति क प्रतौ
30. जातो इति क प्रतौ
31. एषः श्लोकः ग प्रतौ अनुपलब्धः।
32. मुनिर्मोह विलासिनी इति ख/ग प्रतौ
33. भो मुने चोर्जितं भुक्तुं इति क प्रतौ, भो मुने वांबितुं भुक्तं इति ग प्रतौ
34. बलभद्रसूत रामास्य इति ग प्रतौ
35. बलनारायणौ इति क प्रतौ
36. पापाद्विष्लु इति त्रयौ प्रतौ किन्तु पापाद्विष्णु इति पाठः स्यात्।
37. समागत्वा इति ग प्रतौ
38. बोधितोन्यदा इति क/ख प्रतौ
39. विद्युद्दंष्टस्थ इति त्रयौ प्रतौ, विद्युद्दंष्टस्य इति पाठः स्यात्।
40. आदित्यप्रभ उच्ये नं त्वं इति ख/ग प्रतौ
41. अथ विद्युत्दृढो राजा गत्वा गेहं विषेकतः इति ख/ग प्रतौ
42. दृढरथोश्चरथश्च इति क प्रतौ

❖❖❖

तृतीयोऽधिकारः

इक्ष्वाकुनामवंशेऽथा[1]योध्यायां धरणीधरः ।
राजा तस्य महादेवी श्रीनाम्ना शुभलक्षणा ।।1 ।।

तयोः पुत्रोऽभवच्छ्रीमान्नाम्नाऽथ त्रिदशञ्जयः ।
इन्दुरेखा प्रिया तस्य जितशत्रुस्तयोः सुतः ।।2 ।।

पोदनपुरनाथस्यानन्दस्य विजया सुता ।
परिणीता कुमारेण विधिना जितशत्रुना ।।3 ।।

जितशत्रुं समायुज्य साम्राज्यं त्रिदशञ्जयः ।
तपः कृत्वा शिवं प्राप्तः कैलाशधरणीधरे ।।4 ।।

अथाजितो जिनो जातस्तयोः पूर्वविधानतः ।
अभिषेकादिदेवेन्द्रैः कृतो नाभेयवर्णितः ।।5 ।।

एकदा तेन देवेन दृष्टः कमलमध्यगः ।
चञ्चरीको मृतिं यातो[2] वैराग्यमभवज्जिनः ।।6 ।।

पित्रादीनाञ्च सम्पृच्छ्य जिनो दीक्षां गृहीतवान् ।
दशसहस्रराजानो देवेन सह दीक्षिताः ।।7 ।।

षष्टोपवासयुक्ताय तस्मै देवाय पारणम् ।
बह्मदत्तो ददौ भक्त्या साकेतनगरोद्भवः ।।8 ।।

चतुर्दशसु वर्षेषु केवलमभवत्प्रभोः ।
नवतिस्तस्य सञ्जाता गणेशाः पादसंश्रिताः ।।9 ।।

जितशत्रोर्लघुभ्राता नाम्ना विजयसागरः ।
पत्नी[3] सुमङ्गला तस्य तत्सुतः सगरोऽभवत् ।।10 ।।

सोऽथ चक्रश्रियं श्रितः षट्खण्डनृपसेविताम् ।
निधाननवभिर्युक्तो भुनक्ति भोगसम्पदः ।।11 ।।

अथाऽत्रदक्षिणश्रेण्यां चक्रवाले पुरे नृपः ।
पूर्णचन्द्र इतिख्यातो विद्या नामाधिपोऽभवत् ।।12 ।।

तत्रैव तिलके पत्ने राजाऽभवत्सुलोचनः।
तस्य पुत्रः सहस्राक्षः पुत्र्युत्पलमती तथा।।13।।
सा याचिता नरेन्द्रेण पूर्णचन्द्रेण धीमता।
न ददाति ततस्तेन सुलोचनो हतो रणे।।14।।
पितुर्मरणमाकर्ण्य भीतः सहस्रलोचनः।
नीत्वा स्वभगिनीं नष्टः सगरस्यान्तिकङ्गतः।।15।।
पूर्णचन्द्रोऽथ व्याघुट्य निष्फलः स्वपुरङ्गतः।
सहस्राक्षोऽथ भग्नीं स्वां ददौ सगरभूपतेः।।16।।
सगरेणापि तुष्टेन दत्तास्तस्मै खगेश्वराः।
तैर्गत्वा पूर्णचन्द्रस्य पुरं रुद्धं चतुर्दिशि।।17।।
ततो महति सङ्गामे प्रवृत्ते जनसंक्षये।
कोपात्सहस्रनेत्रेण पूर्णचन्द्रो हतो रणे।।18।।
पूर्णचन्द्रस्य पुत्रोऽथ मेघवाहननामकः।
सम्भीत्याऽजितनाथस्य समवशरणङ्गतः।।19।।
सहस्राक्षोऽपि पृष्टेऽस्य संलग्नो मारणार्थिकः।
गतो भामण्डलं दृष्ट्वा तत्र शान्तोऽभवत्तदा।।20।।
मेघवाहेन तत्सर्वं सगराय निवेदितम्।
चरितं पूर्णचन्द्रादेर्न च दोषो मम प्रभोः।।21।।
जिनपादसमीपे तौ मुक्तवैरौ ततः स्थितौ।
तत्पित्रोश्चरितं पृष्टो गणिना श्रीजिनेश्वरः।।22।।
उवाच श्रीजिनाधीशो भरतेऽथ मरुत्पुरे[4]।
भावनो नाम सुश्रेष्ठी वल्लभा तस्य चातकी[5]।।23।
हरिदासः सुतस्तस्य चतुष्कोटिनिधीश्वरः।
पुत्राय सकलां रिद्धिं समर्प्य स च भावनः।।24।।
द्यूतादिवर्जनार्थे च शिक्ष्यामस्मै ददौ पराम्।
बुधिना च गतः श्रेष्ठी पोतेन धनतृष्णया।।25।।

इतः पुत्रेण वेश्यायां मांसादौ द्यूतमण्डले।
सुरायामतिपाने च चतुः कोट्योपि नाशिताः।।26।।
यदाऽसौ निर्जितो द्यूते तदा राज्ञो गृहङ्गतः।
हरिदासो दुराचारो द्रविणार्थं सुरङ्गया।।27।।
आनीयाऽसौ ततो द्रव्यं क्रियां सर्वांश्चकार सः।
भावनोऽप्यऽन्यदा गेहे चायातो नेक्ष्यते सुतम्।।28।।
हरिदासो गतः क्वेति तेन पृष्टा गृहाङ्गना।
साऽवोचदनया यातश्चौर्यार्थं स सुरङ्गया।।29।।
प्रस्थितश्चौर्यशान्त्यर्थं गृहाऽभ्यन्तरदत्तया।
आगच्छता च पुत्रेण कोऽपि वैरी ममेत्यसौ।।30।।
मण्डलाऽग्रेण पापेन भावनो विनिपातितः।
विज्ञातोऽसौ ततस्तेन नखश्मश्रुसतादिभिः[6]।।31।।
स्पृष्टा मम पितेत्येषः प्राप्तो दुःखञ्च च दुस्सहम्।
जनकस्य ततो मृत्युं कृत्वाऽसौ भयविद्रुतः।।32।।[7]
पर्यटन् सुबहून् देशान् यातः कालेन पञ्चताम्।
कौलेयकौ च शृङ्गालौ वृषदंसौकषौ तथा[8]।।33।।
गोकुलौ[9]महिषावेतौ जातौ च वृषभौ पुनः।
अन्योन्यस्य ततो घातं कृत्वा भ्रान्तौ च संसृतौ।।34।।
विदेहे पुष्कलावत्यां मनुष्यत्वमुपागतौ।
उग्रं कृत्वा तपस्तस्मिन्नुत्तरानुत्तरा द्वयौ।।35।।
गत्वा शतारमाजातौ[10] जनकावेतयोरिमौ।
योऽसौ भावननामासीज्जातोऽसौ पूर्णचन्द्रकः।।36।।
आसीत्तस्य तु यः पुत्रः स सञ्जातः सुलोचनः[11]।
पित्रोरेवं परिज्ञाय सञ्जातौ शान्तमूर्त्तिकौ।।37।।
चक्रवर्ती ततोऽपृच्छदेतयोश्च भवान्तरान्।
जिनं ततो जिनः प्राह शृणु सगरभूपते।।38।।

क्षेत्रेऽथ भरते चेह पुरे पद्मकनामनि ।
शाङ्खिकाख्यो हि विप्रोऽभूद्वनदेशे महाधनी ।।39।।
शश्यावलिसमाह्वानौ तस्य मैत्री[12]समन्वितौ ।
शिष्यावत्यन्तविख्यातौ धनवन्तौ गुणोत्करौ ।।40।।
मा भूदाऽऽभ्यां मम बाधा चेति सञ्चित्य चेतसि ।
तयोः करोति नो भेदं नयशास्त्रविशारदः ।।41।।
गोपालकेन संमन्त्र्य शशीमूल्यार्थमन्यदा ।
चिकीर्षु गां गृहं यावदायातो निजलीलया ।।42।।
तथैव दैवनियोगादागछन्नावलीपुरम् ।
गच्छता शशिना क्रोधान्निहतो म्लेच्छतामितः[13] ।।43।।
मृतः शशी बलीवर्दो जातो म्लेच्छेन तेन च ।
हत्वा वैराऽनुबन्धेन भक्षिता[14]मुपपादितः ।।44।।
तिर्यङ्नारक स पान्थ[15] म्लेच्छो मूषकतां गतः ।
अभूच्छश्याऽपि मार्जारस्तेन हत्वा स भक्षितः ।।45।।
भूयः संश्रित्य काश्यां तौ दास्यौ जातौ सहोदरौ ।
दास्याः संभ्रमदेवस्य कूटकार्प्पटिकाद्वयौ ।।46।।
जिनवेश्मनि तौ तेन नियुक्तौ प्रेत्यपुण्यतः ।
रूपानन्दः स्वरूपश्च जातौ भूतगणाधिपौ ।।47।।
शशीपूर्वो रजोवल्यां च्युत्वाऽभूत्कुलपुत्रकः ।
कुलन्धरोऽपरः पुष्पभूतिपुत्रः पुरोधसः[16] ।।48।।
धनार्थं तौ कदाचिच्च प्राप्तौ वैरं ततःस्थितौ ।
पुष्पभूतिं ततो हन्तुं प्रावर्त्तत कुलन्धरः ।।49।।
वृक्षमूलस्थ साधोश्च धर्मं श्रुत्वोपशान्तवान् ।
राज्ञा परीक्षितश्चाऽभूत्सामन्तः पुण्ययोगतः ।।50।।

पुष्पभूतिरिमं दृष्टवा धर्माद्विभवमागतम् ।
जैनो भूत्वा मृतो जातस्तृतीये सुरविष्टपे ।।51 ।।

कुलन्धरोऽपि तत्रैव च्युतौ तौ मन्दरावरे[17] ।
विदेहारिञ्जये[18] देशे जयत्पुर्यां नरोत्तमौ ।।52 ।।

सहस्रशिरसो भृत्यौ क्रूरामरधनुः श्रुती[19] ।
जातवत्यन्तविक्रान्तावन्तरङ्गौ सुविश्रुतौ ।।53 ।।

अन्यदा स समन्ताभ्यां प्रविष्टः काननं नृपः ।
प्रीतिरन्योन्यमैक्षिष्ट जन्मनैव विरोधिनाम् ।।54 ।।

शशिनोऽमी[20] कथं व्याला इति विस्मयमागतः ।
अविशन्स महारण्यमपश्यच्च महामुनिम् ।।55 ।।

ततो राजा समं ताभ्यां तस्य केवलिनोन्तिके ।
प्रव्रज्य निर्वृत्तिं प्रापछतारं तु गता विभौ ।।56 ।।

शशीपूर्वस्ततश्च्युत्वा जातोऽयं मेघवाहनः ।
आवलि तु सहस्राक्षौ वैरं तेनानयोरिदम् ।।57 ।।

प्रीतिर्ममाधिका कस्मात्सहस्त्रनयने प्रभो ।
इति पृष्टो जिनोऽवोचत् सगरञ्चक्रिणं प्रति ।।58 ।।

शाङ्खिकः साधुदानेन मृत्वा देवकुरु[21]ङ्गतः ।
सुधर्मे च ततश्च्युत्वा जातश्चन्द्रपुरे नरः ।।59 ।।

नरेन्द्रस्य धरादेव्यां दयितव्रतकीर्तनः ।
श्रामण्यान्नाकमारुह्य विदेहे त्ववरे च्युतः ।।60 ।।

महाघोषेण चन्द्राण्यामुत्पन्नो रत्नसञ्चये ।
पयोबलो मुनिर्भूय प्राणान्ते कल्पमाश्रितः ।।61 ।।

प्रच्युत्य भरते जातो नगरे पृथिवीपुरे ।
यशोधरनरेन्द्रेण जयायां जयकीर्तिकः ।।62 ।।

प्रव्रज्य च पितुः पार्श्वे मृत्वा विजयमाश्रितः ।
च्युत्वा ततो भवान् जातः सगरश्चक्रलाञ्छनम् ।।63 ।।

शाङ्खिकस्य भवे यस्मादावली ते प्रियोऽभवत्।
तत्पूर्वोऽयं प्रियोऽद्याऽपि सहस्राक्षस्ततस्तव।।64।।
अवगम्य जिनेन्द्रास्यादात्मपित्रोर्भवान्तरान्।
महतो धर्म संवेङ्गाज्जातौ जातिस्मरौ च तौ।।65।।
ततस्ताभ्यां जिनेन्द्रस्य कृतं स्तोत्रं बहुविधम्।
तच्छ्रुत्वा तत्र सन्तुष्टा सगराद्या[22] सुरासुराः।।66।।
अथाऽत्र पूर्णचन्द्रस्य भ्रातरौ कंशकुम्भकौ।
मृत्वा जातौ रणे भग्नौ राक्षसौ सुसमाधिना।।67।।
तत्र भीमसुभीमाख्यौ स्थितौ तौ राक्षसाऽधिपौ।
सन्तुष्टौ मेघवाहाख्यं वदतौ धर्म्मवत्सलौ।।68।।
द्वीपोऽस्ति लवणाम्भोधौ राक्षसनामतो वरः।
योजनानां शतसप्तविस्तीर्णः सुमनोहरः।।69।।
तन्मध्ये त्रिकुटाभिख्यः पर्वतोऽस्ति निधानभृत्।
योजनानां नवोत्तुङ्गः पञ्चाशद्विस्तरो मतः।।70।।
तत्र लङ्कापुरी भाति त्रिंशद्योजनविस्तरात्।
त्वां दास्यामः पुरीं तां त्वं स्थित्वा तत्र सुखी भव।।71।।
न भयं तत्र कस्याऽपि स्थितस्य ते भविष्यति।
इत्युक्त्वा मेघवाहं तं नीत्वा लङ्कां गतौ च तौ[23]।।72।।
स्थापितोऽसौ च लङ्कायां सम्प्रीत्या पूर्वजन्मनः।
सुहारो नवरत्नानां दत्तस्ताभ्यां मनोहरः।।73।।
राक्षसीति महाविद्यां दत्वा तस्मै च भाषितम्।
अत्राऽपि यदि युष्माकं भयं भवेत्तदा शृणु।।74।।
पर्वतस्याऽस्य भूमिस्थं पुरमस्ति गुहोपमम्।
पातालल‍ङ्का विख्यातमलङ्करोदयाऽभिधम्।।75।।
षट्योजनविस्तीर्णं तत्र त्वं गच्छ निर्भये।
इत्युक्त्वा तत्र संस्थाप्य तं तौ गतौ स्वमालयम्।।76।।

रक्षोभ्यां मेघवाहं तं श्रुत्वा प्राप्तं च सम्पदा।
आगताः खेचरास्तत्र सेवितुं तं खगेश्वरम् ।।77।।

बांधवा मेघवाहस्य विजयार्द्धे च ये स्थिताः।
तेऽपि सर्वे समायाता लङ्कायां सुखहेतवे ।।78।।

सकलैर्बान्धवैर्युक्तो लङ्कायां मेघवाहनः।
करोति सुखसाम्राज्यं कण्टकैः परिवर्जितम् ।।79।।

अथ किन्नरगीताख्ये[24] पुरे रतिमयूखतः।
अनुमत्यां समुत्पन्ना सुप्रभानामकन्यका ।।80।।

सा नीता मेघवाहेन विवाहविधिना मुदा।
पुत्रो जातस्तयोर्धर्म्मी महारक्षोऽभिधानकः ।।81।।

राक्षसेन कृतो वंशस्ततो राक्षसनामकः।
जातो लोके प्रसिद्धिं स न तु ते राक्षसाः स्वयम् ।।82।।

कदाचिदागतो राजा मेघवाहः खगैर्वृतः।
अजितस्यान्तिकं भक्त्या वन्दितुं तं जिनेश्वरम् ।।83।।

चतुर्विंशतितीर्थेशां द्वादशचक्रवर्तिनाम्।
प्रतिकृष्णहरीणाञ्च कथाः श्रुताः जिनाननात् ।।84।।

राज्यभारं सुते न्यस्य महारक्षस्यसौ ततः।
प्रव्राजदजितस्याऽन्ते महानिर्वेदतत्परः ।।85।।

शतदशाधिकास्तेन समञ्जाताः तपोधनाः।
महारक्षो नृपस्याऽथ भामिनी विमलाऽभिधा ।।86।।

तयोः पुत्राः समुत्पन्नास्त्रयस्त्रैलोक्यभूषणाः।
अमरोदधिभानुभ्यः परां रक्षाश्रुतिं श्रिताः ।।87।।

देवोऽजितो जिनेन्द्रोऽथ विहत्य विषयान् बहून्।
सम्मेदपर्वते रम्ये निर्वाणपदमाश्रितः ।।88।।

सगरस्याऽथ पत्नीनां सहस्राणां षड्डुत्तराः।
नवतिशतपत्नीनामभवत्तुल्यतेजसाम् ।।89।।

सुपुत्राणाञ्च पौत्राणां विभृतां शक्तिमुत्तमाम्।
जाताः षष्टिः सहस्राणां रत्नस्तम्भसमत्विषाम्।।90।।
अथाऽभूत्केवलज्ञानं चतुर्मुषाख्ययोगिनः।
सगराद्या नृपास्तत्र आगताश्च सुरासुराः।।91।।
मणिचूलसुरश्चैकः सगरः पूर्वजन्मनः।
मित्रं स सगरं दृष्ट्वा जगाद तं प्रति मुदा।।92।।
पूर्वजन्मनि आवां द्वौ स्वर्गे स्थितौ सुरोत्तमौ।
आवयोर्भाषणं तत्र परं प्रीतिनिबन्धनम्।।93।।
मोहनद्यां निमग्नोऽसि करोति पापबन्धनम्।
मोहजालञ्च सन्त्यज्य कुरु दीक्षां जिनोदिताम्।।94।।
विमुखं सगरं दृष्ट्वा मौन्यं जग्राह देवता।
एकदा विप्ररूपेण साकेतां सुर आगतः।।95।।
दृष्ट्वा सगरपुत्रान् तान् मणिचूलसुरोऽवदत्।
यो भुङ्क्तेऽत्र पितुर्लक्ष्मीं सपुरुषोऽधमो मतः।।96।।
क्षत्रियस्य सुता यूयं भुञ्ज्यन्ते सागरं धनम्।
इति श्रुत्वा मनोभीताः सगरस्य सुतास्तदा।।97।।
सभायां सगरं प्रोचुर्नत्वा ते करमस्तकाः।
देहि भो तात सेवां नो यथा वेला क्रमो भवेत्।।98।।
सगरः प्रोचु[25] भो पुत्राः किमसाध्यं ममाऽधुना।
भवद्भिः क्रियते साध्यं यूयं सुखेन तिष्ठथ।।99।।
तत आहुश्च[26] ते सर्वे काञ्चित्सेवां प्रयच्छ भो।
एवं चेन्नगकैलाशे कुरुध्वं खातिकां वराम्।।100।।
प्राप्येति पितुरादेशं ते सर्वे तत्र सङ्गताः।
कृत्वा जिनान्नमस्कारं खातिकां च खनन्ति ते।।101।।
प्रवाहो आनितः सद्यः गङ्गायाः वज्रवेदिकाम्।
संस्फोट्य रत्नदण्डेन गन्तुं मार्गो निरुद्धितः।।102।।

तावत्सगरबोधार्थं मणिचूलसुरोत्तमः ।
सर्परूपेण तान्सर्वान् मूर्च्छयामास धर्मधीः ।।103।।
भीमभागीरथौ तेषां मूर्च्छितौ न च पुण्यतः ।
पौत्रौ सगरराजस्य पितॄणां मृत्युदुःखितौ ।।104।।
अयोध्यायां समायातौ दृष्टौ तौ सचिवैस्तदा ।
शिख्यापितौ अहो पुत्रौ चक्र्यग्रे नो वदेदिति ।।105।।
सभायां तौ समागत्य जग्मतुः सगरं प्रति ।
स्थित्वा तत्रैव ते पुत्रा लुब्धास्तत् खननं[27] प्रति ।।106।।
तच्छ्रुत्वा सगरस्तुष्टो जगाद सचिवान् प्रति ।
पुत्राणां भोजनार्थं हि प्रेषणीयञ्च भोजनम् ।।107।।
तथाकृतममात्यैश्च चक्रिप्रेमाऽनुबन्धनात् ।
अनेकनृपसंवृत्तः सगरः सदसि स्थितः ।।108।।
मणिचूलो द्विजो भूत्वा मृतपुत्रकलेवरम् ।
स्कन्धे कृत्वा समागत्य जगाद सगरं वचः ।।109।।
नीतो यमेन मे पुत्रो भवति राज्यं संस्थितो ।
हस्ताद्यमस्य चानीय प्रभो देहि ममात्मजम् ।।110।।
आह चक्री विहस्येदं दीक्षां ग्रहाण भो द्विज[28]।
तपः कृत्वा यमं हत्वा चाऽऽनय तव नन्दनम् ।।111।।
नास्ति तपोऽपरं लोके संसारयममर्दकम् ।
तस्मात्कृत्वा तपः घोरं छेदय संसृतिं यमाम् ।।112।।
तदाह सगरं विप्रो यथैवं मे तथास्तु ते ।
षष्टिसहस्रं ते पुत्रा नीता यमेन स्वगृहम् ।।113।।
पुत्राणां मरणं श्रुत्वा मूर्च्छितः सगरः क्षणं ।
सचिवैः शीतलैर्द्रव्यैः सञ्ज्ञितश्चाऽवदन्नृपः ।।114।।
अहो संसारवैचित्र्यं जलबुद्बुदकप्रमम् ।
मत्वेति सकलं त्यक्ता मोक्षार्थं साधयाम्यहम् ।।115।।

भागीरथाय पौत्राय दत्तं राज्यं नृपाश्रितम्।
भीमेन सहितश्चक्री दीक्षां जग्राह धीरधीः॥116॥
केवलज्ञानमुत्पाद्य शक्रादि परिपूजितः।
भीमेन सगरो योगी ध्यानान्मोक्षङ्गतः सुखम्॥117॥
देवेन सागराः सर्वे विषेण रहिताः कृताः।
उत्थिता मूर्च्छया मुक्ता निद्रया मनुजा इव॥118॥
जनकं दीक्षितं श्रुत्वा वैराग्यात्तेऽपि दीक्षिता।
ततः कृत्वा तपो घोरं शिवस्थानं समाश्रिताः॥119॥
सगरस्याऽथ पौत्रोयं कुर्वन् राज्यं भगीरथः।
श्रुतसागरयोगीन्द्रं पृष्टवानेवमन्यदा॥120॥
पितामहस्य मे नाथ तनया युगपत्कथम्।
ते सर्वे मूर्छतां प्राप्ता मध्ये तेषामहं तु नः॥121॥
अवोचद्भगवान्सङ्घो वन्दनार्थञ्चतुर्विधः।
सम्मेदं प्रस्थितो चापदन्तिकग्रामदर्शनम्॥122॥
दृष्ट्वा तमन्तिकग्राम्ये दुर्वाचा सकलो हसन्।
कुम्भकारस्तु तत्रैको निषिध्य कृतवान्स्तुतिम्॥123॥
तद्ग्रामवासिनैकेन कृते चौर्ये स भूभृता।
परिवेष्ट्याखिलो दग्धो ग्रामो भूर्यपराधकः[29]॥124॥
भस्मसाद्भावमापन्नो यस्मिन् ग्राम्योऽत्र वासरे।
कुम्भकारो गतः क्वाऽपि मध्यचेताः निमन्त्रितः॥125॥
कुम्भकारोऽभवन्मृत्वा वाणिजः सुमहाधनः।
ग्राम्यास्तु तत्र सम्प्राप्ताश्चूडिकानां समूहताम्॥126॥
सः कुलालः पुनर्भूपो बभूव सुखभाजनः।
ग्राम्यास्तु चूडतां प्राप्ता मृत्वा तत्र पुनः पुनः॥127॥
नृपस्य हस्तिपादाऽधो मृत्वा प्राप्ता मनुष्यताम्।
धर्म्मं क्रमेण संसाध्य स्वर्गे जाताः सुरोत्तमाः॥128॥

राजाऽत्र श्रमणो भूत्वा देवो भूय[30] च्युतो भवान्।
भागीरथः[31] समुत्पन्नो ग्राम्यस्तु सगरात्मजाः।।129।।
भागीरथोऽपि तच्छ्रुत्वा दीक्षां प्राप्य शिवङ्गतः।
सगरस्य कथा प्रोक्ता प्रकृतं शृणु श्रेणिक।।130।।
लङ्कायामथ यो राजा महारक्षोऽभिधानकः।
एकदा स जलक्रीडां करोति वनितावृतः।।131।।
पद्ममध्ये मृतं दृष्टवा पद्यदं घ्राणवाहितम्।
वैराग्यं परमं प्राप्तो राजा मोक्षस्य हेतवे।।132।।
एतस्मिन्नन्तरे योगी प्राप्तोऽत्र श्रुतसागरः।
तस्माद्धर्मकथां श्रुत्वा पुनराह नरेश्वरः।।133।।
पूर्वजन्मनि मे ब्रूहि नाथ सन्देहनाशकः।
तत आह मुनीन्द्रोऽसौ भरते पोदनापुरे।।134।।
हितनामा वणिक्पुत्रो माधवी तस्य वल्लभा।
प्रीतिनामा तयोः पुत्रस्तत्रैवनगरे पुनः।।135।।
उदयाख्यो नृपो धर्म्मी तस्याऽर्हश्रीतिकामिनी[32]।
हेमरथस्तयोः सूनुस्तेनैकदा जिनगृहे।।136।।
कारिता महती पूजा जयशब्दसमन्विता।
तत्रोत्थजयशब्दश्च व्याप्तो नगरभूतले।।137।।
तच्छब्दञ्च समाकर्ण्य प्रीतिः स्वगृहसंस्थितः।
ननर्त जयशब्दञ्चाकरोद्धर्षेण पूरितः।।138।।
तेन पुण्येन मृत्वा स यक्षोऽभून्नन्दने वने।
पश्चिमेऽथ विदेहेऽस्मिन् कञ्चनाख्या पुरे शुभे।।139।।
साधूनां शत्रुभिः कर्तुमुपसर्गं प्रवर्त्तितम्।
तांश्च यक्षेण निर्घाट्य मुनीनां रक्षितं तनुम्।।140।।
तत्पुण्येन ततश्च्युत्वा विजयार्द्धे तडित्पुरे।
विद्युत्प्रभस्य पुत्रोऽभूदुदितो नाम धार्मिकः।।141।।

तत्र घोरतपः कृत्वैशाने जातः सुरोत्तमः।
एषः सञ्चव्य भूतोऽसि[33] विद्याभृद्राक्षसाधिपः।।142।।
अज्ञानेन गतः कालस्तव धर्मविवर्जितः।
अष्टदिनानि चायुस्ते वर्तन्ते चाऽधुना प्रभोः।।143।।
तच्छ्रुत्वा विकलो जातोऽहोऽधुना किङ्करोम्यहम्।
तपः कर्तुं न शक्नोमि कालः स्वल्पो यतोऽस्ति मे।।144।।
देव रक्षसि राज्यं स्वं स्थापितं चार्करक्षसि।
युवराज्यपदं न्यस्य स्वयं तु यतिना समम्।।145।।
भूत्वा पूजां जिनेन्द्राणां कृत्वा सध्यानतत्परः।
मृतः समाधिना स्वर्गे देवोऽभूद्देवसेवितः।।146।।
अथ किन्नरगीताख्ये पुरे श्रीधरनामतः।
विद्याजातां रतिजायां देवरक्षः प्रपन्नवान्[34]।।147।।
पुरे गन्धर्वगीताख्ये सुरसन्निभनामतः।
गान्धारीगर्भसम्भूतां गन्धर्वां भानुरूढवान्।।148।।
दशपुत्राः समुत्पन्ना मनोज्ञा देवरक्षसः।
देवाङ्गना सुरूपाद्या षट्कन्या गुणभूषणाः।।149।।
तावन्त एव चोत्पन्नाः पुत्राः कन्याश्च तत्समाः।
आदित्यरक्षसो वंशे कीर्तिर्व्याप्ता दिगन्तराः।।150।।
स्वनाम्ना सह नामानि महांति नगराणि वै।
निवेशितानि रम्याणि श्रेणिकैः तानि जित्वरैः।।151।।[35]
सन्ध्याकारः सुवेलश्च मनोल्हादो मनोहरः।
हंसद्वीपो हरिर्योधः समुद्रः काञ्चनस्तथा।।152।।
अर्द्धस्वर्गश्च चैतेषां निवेशादेव रक्षसाम्।
तथैव भानुपुत्रैश्च वासितानि पुराणि वै।।153।।
आवर्त विघटाम्भोदा उत्कट[36]स्फुटदुर्ग्रहाः।
तटतोयावली रत्नदीपांश्च भांति राक्षसैः।।154।।

तत्रापि खेचरैर्रम्यैर्द्वीपान्तरसमाश्रितैः।
आगत्य कृतगेहानि भानुरक्षस्य आज्ञया।।155।।
यथायोग्येषु पुत्रेषु न्यस्य राज्यस्य सम्पदः।
मुनी जातौ च वैराग्यादमरभानुरक्षसौ।।156।।
श्रीधरस्य मुनेः पार्श्वे कृत्वा घोरतरं तपः।
शुक्लध्यानेन सम्प्राप्तौ शिवस्थानं महासुखम्।।157।।
मेघवाहनभूपस्य वृद्धिरैवं महत्तरा।
जाता वंशस्य रक्षोभ्यां दत्ताशीर्वादपुण्यतः।।158।।
तेषां वंशेऽथ राजाऽभून्मनोवेगाङ्कधारितः।
राक्षसो नाम तस्यासीत् सुप्रभा नाम वल्लभा।।159।।
तयोः पुत्रौ समुत्पन्नौ सूर्यचन्द्रसमप्रभौ।
प्रथमः सूर्यगत्याख्यो वृहत्कीर्तिर्द्वितीयकः।।160।।
तयोः राज्यञ्च संस्थाप्य राक्षसोऽभूद्यतीश्वरः।
तपस्तप्त्वा शुभध्यानात्स्वर्गे जातोऽमरोत्तमः।।161।।
जाता मदनवेगाख्या का गतेरग्रवल्लभा[37]।
पुष्पनख्येति सञ्जाता बृहत्कीर्तेः सुकामिनी।।162।।
भीमप्रभाख्यः पुत्रोऽभूदादित्यादिगतेः[38] परम्।
वल्लभा तस्य सञ्जाता सहस्रमेकमुत्तमाः।।163।।
अष्टोत्तरशतं पुत्रास्तैः राज्यं प्रबलीकृतम्।
भीमप्रभः प्रवव्राज्य सङ्गतः शिवमालयम्।।164।।
भीमप्रभस्य च ज्येष्ठः पुत्रः पूजार्हनामकः।
जितसूर्यः सुतस्तस्य श्रीप्रभा तस्य वल्लभा।।165।।
सुग्रीवाख्यस्ततो जातो हरिग्रीवस्ततः परः।
श्रीग्रीवोऽतः सुमुखाख्यः सुव्यक्तोऽमृतवेगवाक्।।166।।
भानुगतिस्ततश्चिंतागतिः शक्रस्ततः सुरः।
मेघो मृगारिदन्ताख्यः[39] पविः पाविस्ततः[40]परम्।।167।।

इन्द्रजिद् भानुवर्मा च भानुर्भानुसमप्रभः।
सुरारिस्त्रिजटो भीमो मोहनो द्वारको रविः।।168।।
चकारे[41] वज्रमध्यश्च प्रमोदः सिंहविक्रमः।
चामुण्डो मारणो भीष्म द्विपवाहोऽरिमर्दनः।।169।।
निर्वाणभक्तिरुग्रश्रीरर्हद्भक्तिरनुत्तरः।
गतो भूमोऽनिलश्चन्द्रो[42] लङ्काशोको मयूरवाक्।।170।।
महाबाहु मनोरम्यो भास्कराभो बृहद्रतिः।
वृहत्कान्तोऽरिसन्त्रासश्चन्द्रावर्तो महारवः।।171।।
मेघध्वानग्रहक्षोभनक्षत्रमदनादयः।
महाविद्याबलोपेता महागुणविभूषिताः।।172।।
स्वस्वपुत्रेषु राज्यश्रीधनादिकं समर्प्यते।
दीक्षामादाय सन्तप्य यथायोग्यां गतिङ्गताः।।173।।
एवं बहूष्वतीतेषु लङ्कायां नगरेऽभवत्।
राजा मेघप्रभो नाम श्रीपद्मा तस्य वल्लभा।।174।।
कीर्तिधवलनाम्नाऽभूत्तयोः पुत्रो गुणाकरः।
संभुक्ते परमैश्वर्यं सुनासीरो यथा दिवि।।175।।
देवेन्द्रः प्रमुखैः सुरैः प्रमुदितैः कल्याणसेवागतै
श्चक्राणामधिपादिसर्वमनुजैर्भक्तिप्रयुक्तात्मभिः।
श्रीजैनेन्द्रपदारविन्दयुगलं सेव्यं सदा भक्तितः
तद्द्या[43]च्छिवसौख्यमुत्तमसुखं भव्यात्मनां प्राणिनाम्।।176।।
सकलसुखमनल्पं जायते पुण्यवृक्षात्
नृपतिपदधनाढ्यं भोगभूम्यादियुक्तम्।
कुगतिगतिविनाशं मोक्षसौख्यादाप्तिं
कुरुत सजनभव्याः सर्वजीवेषु पुण्यम्।।177।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
राक्षसवंशस्योत्पत्तिर्वर्णनो नाम तृतीयोऽधिकारः।।3।।

❖❖❖

१. अथ वंशे इति क प्रतौ

२. मृतो जातो इति ख/ग प्रतौ

३. पुत्री इति त्रयौ प्रतौ/पत्नि इति प.पु ५/७४, प्रसंगानुसारेण पत्नी स्यात्।

४. सुदृतु पुरे इति प.पु. ५/९६

५. आतकी इति प.पु. ५/९७

६. सटादिभिः इति क प्रतौ

७. एषः श्लोकः ग प्रतौ अनुपलब्धः।

८. वृषदंशौकषौ इति ग प्रतौ

९. नकुलौ इति ख/ग प्रतौ

१०. गत्वा त्राता स्म तौ जातो इति ग प्रतौ

११. सुलोचना इति ग प्रतौ

१२. मित्रि इति ख/ग प्रतौ

१३. मिति इति ग प्रतौ

१४. भक्षता इति क प्रतौ, भक्ष्यता इति ख प्रतौ

१५. तिर्थङ्गनारक पांथ स इति क/ख प्रतिद्वये

१६. कुलंधरोपर पुत्रं भूतिपुष्प परोघसः इति क प्रतौ

१७. मंदिरावरे इति क / ग प्रतौ

१८. विदेहे रञ्जये इति क/ख प्रतौ

१९. श्रुतौ इति ग प्रतौ ।

२०. शमिनोमी इति क/ख प्रतौ

२१. देवकुरं इति क/ग प्रतौ

२२. स्थिता सर्वे इति क प्रतौ

२३. तां इति ख प्रतौ

२४. किन्नगरीताख्ये इति ख प्रतौ

२५. प्रोचे इति क प्रतौ

२६.आहूय इति ग प्रतौ

२७. लुब्धास्तत् वननं इति क प्रतौ

२८. भो द्विजः इति ग प्रतौ

२९. भूर्पपराधकः इति क प्रतौ

भूर्प्पपराधकः इति क प्रतौ

३०. भूप इति ग प्रतौ

३१. भगीरथः इति क प्रतौ

भगिरथः इति ख प्रतौ

३२. तस्याह प्रीतिकामिनी इति ग प्रतौ

३३. संचर्चितो सिञ्च इति ग प्रतौ

३४. विद्याजातिं रतिवेगा देवरक्षां प्रपन्नवान् इति ग प्रतौ

३५. साकेतानि निजेपुरे इति ग प्रतौ

३६. आवर्त विकटांम्भोदा विकट इति ग प्रतौ

३७. र्क गतेर्ग्र वल्लभा – क/ख प्रतौ

३८. गतये इति ग प्रतौ

३९. मृर्गारदमनाख्यः इति प.पु.५/३९४

४०. पठि–पाठिः इति ख/ग प्रतौ

४१. चकोरे इति क प्रतौ

४२. गतभ्रमोऽनिलश्चण्डो इति प.पु.५/३९६

४३. सूद्वद्या इति क प्रतौ

सेढ्द्या इति ग प्रतौ

❖❖❖

चतुर्थोऽधिकारः

अथ वानरचिह्नानां वंशोत्पत्तिर्निगद्यते ।
विजयार्द्धे यमश्रेण्यामस्ति मेघपुरं पुरम् ।।1 ।।
तत्र राजाऽस्त्यतीन्द्राख्यः श्रीमती तस्य वल्लभा ।
श्रीकण्ठाख्यः सुतो जातः चार्वी नामा च कन्यका ।।2 ।।
अथ रत्नपुरं नाम तत्र पुष्पोत्तराभिधः ।
राजा तस्याऽभवत्पुत्रः[1] पद्मोत्तराऽभिधानकः ।।3 ।।
राजा पुत्राय श्रीकण्ठं चार्वीं स्वसामयाचता[2] ।
श्रीकण्ठेन न सा तस्मै दत्ता कर्म्मानुभावतः ।।4 ।।
कीर्तिशुभ्राय सा दत्ता रक्षसे बन्धुवाक्यतः ।
पुष्पोत्तरो हि तच्छ्रुत्वा मनसीदमचिन्तयत् ।।5 ।।
न मे पुत्रस्य वैरूप्यं न चाऽहं किं कलङ्कवान् ।
अनेन मम पुत्राय दत्ता न हि कथं स्वसा ।।6 ।।
श्रीकण्ठ एकदा राजा जिनं सम्पूज्य मन्दिरे ।
व्याघ्रुट्याऽगमदरण्ये[3] रत्नपुरसमीपके ।।7 ।।
पुष्पोत्तरस्य पद्माख्या कन्या तत्र वनगृहे ।
करोति गीतनादं सा श्रीकण्ठेनाऽपि तच्छ्रुतम् ।।8 ।।
आगतस्तत्र तां दृष्ट्वा व्याकुलोऽभूतमानसे ।
मोहिता साऽपि तं दृष्ट्वाऽन्योन्याऽऽसक्तौ च मानसौ ।।9।।
स्वविमानं समारोप्य तां पद्मां निर्गतो वनात् ।
ततः पुष्पोत्तरः क्रोधाद्धावति स्माऽस्य पृष्टितः ।।10 ।।
पुष्पोत्तरं तमायातं दृष्ट्वा श्रीकण्ठो युक्तिवित् ।
प्रविश्य शरणं लङ्कां स्वसृभर्तुरजीजनत् ।।11 ।।
ततः श्रीकीर्तिशुभ्रेण रक्षितः शरणागतः ।
भार्याया बन्धुस्नेहेन प्रीतिं तस्मिन् चकार सः ।।12 ।।
आह कीर्तिधवलं तं श्रीकण्ठो भूपतिर्महान् ।
पद्मां त्वं रक्ष गच्छामि रणाय वैरिणो मुखे ।।13 ।।

कीर्तिशुभ्रस्ततः प्राह चैवं मा ब्रूषि भूपते।
ग्रहे तिष्ठ सुखेन त्वं गच्छाम्यहं रणं प्रति।।14।।

इत्युक्त्वा स बलोपेतो निर्गतो रणहेतवे।
मार्गात्ते प्रेषितो दूतः युक्त्या पुष्पोत्तरं प्रति।।15।।

दूतो जगाद तं गत्वा शृणु राजन् विवेकतः।
कन्यानामपरे गेहे सर्वथैव हि दीयते।।16।।

किमनेन विरोधेन बहुप्राणिक्षयङ्करः।
श्रीकण्ठोऽपि कुलीनोऽस्ति रूपी धर्मी च पण्डितः।।17।।

एतस्मिन्नन्तरे दूती पद्मायाश्च समागता।
स जगाद शृणु नाथ वचनं पद्मयोदितम्।।18।।

नीता नाऽहं श्रीकण्ठेन स्वयमेव समागता।
न युद्धव्यं त्वया तात सममनेन सङ्गरे।।19।।

नारीजन्मपराधीनमेकं पुंसि नियोगता।
श्रीकण्ठेन विना नाऽन्य: पुरुष: क्रियते मया।।20।।

जन्म दातुं पिता शक्तो न तु भाग्यं समर्पितुम्।
पुष्पोत्तर इति श्रुत्वा व्याघुट्य स्वपुरङ्गतः।।21।।

पद्माश्रीकण्ठयोस्तत्र विवाहः परमोऽभवत्।
तस्मिन् कीर्तिधवलाख्यः करोति प्रीतिमुत्तमाम्।।22।।

कदाचित्स्वपुरङ्गन्तुं श्रीकण्ठोऽचिन्तयत्तदा।
चार्वीसहोदरस्नेहात्कीर्तिशुभ्रोऽवदन्मुदा।।23।।

विजयार्द्धनगे सन्ति भो भूप तव वैरिणः।
तस्मात्स्थातव्यमत्रैव कियत्कालं मया समम्।।24।।

देशाः सन्त्यद्रिमध्येऽस्मिन् भूरिशः स्वर्गसन्निभाः।
सन्ध्याकारमनोह्लादसुवेलकाञ्चनादयः।।25।।

तेषां मध्येऽस्ति ते चित्ते संगृहाण नरेश्वर।
मां मुक्त्वा[4] प्रेमसंयुक्तं कथङ्गच्छसि त्वं नृपः।।26।।

एवं नो चेदतो देशास्त्रिंशतिर्योजने[5] गते।
द्वीपोऽस्ति वानरो नाम्नाऽस्योत्तरे लवणाऽर्णवे।।27।।

यस्मिन्नवान्तरद्वीपाः सन्ति रम्याः सहस्राशः
रत्नभित्तिमयोतुङ्गः किष्कुनामाऽस्ति पर्वतः।।28।।

तत्र त्वं कुरु श्रीकण्ठनगरं स्वर्गसन्निभम्।
देशो वानरनाम्ना च वासय मङ्गलोत्तमैः।।29।।

तत्र तिष्ट स्ववर्गेण वृत्तस्त्वं भो खगेश्वर।
बहुभिः खेचरैः साकं क्रियतां राज्यनिर्भयम्।।30।।

तच्छ्रुत्वाह प्रमोदेन श्रीकण्ठः कीर्तिशुभ्रकम्।
स्थास्यामि तत्र ते प्रीत्या बन्धुवर्गसमन्वितः।।31।।

चैत्रस्य दिवसे तस्मात्प्रथमे मङ्गलार्चितः।
ययौ सपरिवारोऽसौ द्वीपं वानरलाञ्छितम्।।32।।

तत्र नाना द्रुमैर्भाति मण्डिता भोगभूसमाः।
प्रदेशाः पक्षिभिर्युक्ता नानारत्नसमुच्चयाः।।33।।

सुरम्या मनुजाकारा वानराः पुञ्छसंयुतः।
क्रीडन्ति विविधां क्रीडां क्लेशहास्यसमन्वितम्।।34।।

तान् दृष्ट्वा प्राह श्रीकण्ठः सेवकान् स्वजनान् प्रति।
आनयन्तु मृगान्नेतान्मनुजाकारधारिणः।।35।।

ततस्तै तांश्च[6] संधृत्य श्रीकण्ठाय समर्पिताः।
तदा तैर्वानरैः साकं रन्तुं प्रववृते[7] नृपः।।36।।

क्वचिद्धसन्ति नृत्यन्ति कलहन्ति रुदन्ति च।
परस्परञ्च बल्गन्ति[8] यूकान्नपनयंति[9] च।।37।।

कुर्वन्ति मैथुनां चेष्टां मुञ्चन्ति च मलादिकान्।
धावन्ति बालसंयुक्तां भक्षन्ति च फलादिकान्।।38।।

एवं हि वानरीचेष्टां दृष्ट्वा राज्ञा समर्पितः।
पालनाय जनेभ्यस्ते विनोदाय निरन्तरम्।।39।।

एवं विनोदयुक्तोऽसौ सम्प्राप्तः किष्कुपर्वते।
दृष्ट्वा तत्र समस्थानं कण्टकैः परिवर्जितम्।।40।।
गोपुरखातिकाः शालो[10] गेहानि विविधानि च।
निर्मापितानि रत्नैश्च सुवर्णरजतादिकैः।।41।।
प्रजास्चतुर्विधास्तत्र भृता स्वयं सुखेप्सया।
श्रीकण्ठः पद्मया युक्तः करोति राज्यमुत्तमम्।।42।।
तस्य पुत्रोऽभवच्छ्रीमान् वज्रकण्ठोऽभिधानकः।
कदाचिद्भार्यया युक्तः स्थितोऽसौ गोपुरे नृपः।।43।।
तदा नन्दीश्वरद्वीपं गच्छन्तः स्वर्गदेवताः।
दृष्ट्वा श्रीकण्ठभूपोऽपि स्वयं गन्तुं समुद्यतः।।44।।
विमानैर्बहुभिः सार्द्धं विद्याधरनृपैर्वृतः।
गच्छति स सुरैः सार्द्धं श्रीकण्ठो भक्तिचोदितः।।45।।
मानुषोत्तरनाम्ना च पर्वतेनाऽस्य बाधितम्।
गमनं स्वनियोगेन द्व्यर्द्धद्वीपस्य मध्यगम्।।46।।
अचिन्तयत्तदा चित्ते गतिं केन निवारिता।
नृपो नन्दीश्वरद्वीपे पूजार्थं गच्छतो मम।।47।।
अधः पश्यति यावत्स तावद्दृष्टो महीधरः।
अहो चानेन शैलेन गमनं मे निवारितम्।।48।।
जिनाननाच्छ्रुतं[11] पूर्वं मानुषोत्तरपर्वतात्।
नराणां गमनं नाऽस्ति तस्मादनेन बाधितम्।।49।।
धिगनेन नरत्वेन यस्य न स्वेच्छया गतिः।
तस्मादिदं परित्यज्य करोम्यात्मसुसाधनम्।।50।।
इति सञ्चिन्त्य साम्राज्यं वज्रकण्ठे समर्पितम्।
स्वयं यतीश्वरो भूत्वा स्वर्गे जातः सुराधिपः।।51।।
एकदा सुरनाथोऽसौ नन्दीश्वरञ्च गच्छति।
तं दृष्ट्वा वज्रकंठोऽपि स्वयं गन्तुं समुद्यतः।।52।।

तदा तेन सुरेन्द्रेण कथितमात्मवृत्तकम् ।
अहं तु त्वत्पिता पूर्वं श्रीकण्ठो नाम विश्रुतः ।।53।।
तपोबलेन देवेन्द्रपदं प्राप्तं मयाऽधुना ।
त्वमपि कुरु भो पुत्र तपोघोरं सुखप्रदम् ।।54।।
देवमुखादिति श्रुत्वा वज्रकण्ठो नरेश्वरः ।
इन्द्रवज्राय पुत्राय दत्वा राज्यमभून्मुनिः ।।55।।
तत शक्रमनो जातो मेरुस्तस्माच्च मन्दिरम्[12] ।
समीरणगतिस्तस्मात्तस्मादपि रविप्रभः ।।56।।
ततोऽमरप्रभो जातो विद्यानां परमेश्वरः ।
विद्याधरैः सदा सेव्यो रूपवान्प्रगुणाऽन्वितः ।।57।।
एकदाऽत्र स्वगैर्भूपैस्त्रिकूटेश सुताऽस्य[13] च ।
परिणेतुं समानीता नाम्ना गुणवती शुभा ।।58।।
अतो विद्याधराणाञ्च कन्यकाभिस्तदुत्सवे ।
रचितं वेदिकामध्ये मङ्गलं पञ्चवर्णजम् ।।59।।
तत्रादौ वानरपयितर्लक्षिता रत्नचूर्णकैः ।
ततश्च सर्वजन्तूनां पयितक्रमेण[14] चित्रिता ।।60।।
तदाऽमरप्रभो राजा गतस्तत्र वरोत्तमः ।
कूप्यति स्म महाक्रोधी वानरपयितदर्शनात् ।।61।।
मद्विवाहे महोत्साहे केन दुष्टेन चित्रितम् ।
क्रूररूपं प्लवङ्गानां मङ्गलं भङ्गहेतुकम् ।।62।।
तन्निग्रहं करिष्यामि नासिकाच्छेदनादिकैः ।
एतच्छ्रुत्वा गता वेगात्प्रधानपुरुषोत्तमाः ।।63।।
कोपानलं नृपं दृष्ट्वा चागता मौन्यमाश्रिताः ।
अग्रे स्थिता क्षणं पश्चाज्जगुर्नृपं प्रशान्तये[15] ।।64।।
अस्माकं विनयं राजन् कथां शृणु पुरातनीं ।
अस्मद्वंशेऽभवद्राजा श्रीकण्ठो नाम विश्रुतः ।।65।।

तेनेदं कल्पितं पूर्वं मङ्गलत्वं सुखप्रदम् ।
चित्रितञ्च ततोऽत्राऽपि वृद्धानां परिपाटितः[16] ।।66।।

तच्छ्रुत्वा शान्तमूर्तिः सन्नुचेऽमरप्रभः प्रभुः ।
एवं चेच्च करोम्येषां मस्तकमुकुटादिषु ।।67।।

इत्युक्त्वा कारितास्तेन मुकुटे वानराकृतिः ।
छत्रेषु च पताकासु द्वारेषु तोरणादिषु ।।68।।[17]

अथाऽसौ विजयार्द्धस्य श्रेण्योरुभयोरपि ।
विजित्य सकलान् भूपान् स्वमालयं समागतः ।।69।।

सुरप्रभाच्च पुत्रोऽभूद् गुणवत्यां गणोन्नतः ।
नाम्नाऽथ कपिकेतुश्च श्रीप्रभा तस्य भामिनी ।।70।।

तयोः प्रतिबलो नाम पुत्रोऽभूद्विमलस्ततः ।
एवं ते स्वस्वपुत्रेषु[18] दत्वा राज्यं तपःश्रिताः ।।71।।

श्रेयसो देवदेवस्य वासुपूज्यस्य चाऽन्तरे ।
अमरप्रभसञ्ज्ञेन कृतं वानरलक्षणम् ।।72।।

ततः प्रभृति ते सर्वे तान् पूजयन्ति देववत् ।
वानरपूजनात्सञ्ज्ञा वानरा इति विश्रुताः ।।73।।

मुनिसुव्रतकालेऽथ सञ्जातो नृपपुङ्गवः ।
महोदधिरिति ख्यातो वानराणां शिरोमणिः ।।74।।

शतमेकञ्च नारीणामस्याऽभूद्रूपसम्पदाम् ।
अष्टोत्तरशतं पुत्रास्तासां जाता मनोहराः ।।75।।

विद्युत्केशोऽथ विख्यातो लङ्कायां नृपतिस्तदा ।
महाप्रीतिरभूत्किष्कुलङ्कानगरनाथयोः ।।76।।

विद्युत्केशोऽन्यदा राजा जलक्रीडां करोति च ।
लङ्कायां बहुनारीभिः परीवृतः सरोवरे ।।77।।

श्रीचन्द्रायाश्च भार्यायाः स्तनयुग्मं विदारितम् ।
वानरेणैकदुष्टेन स्वभावचपलेन च ।।78।।

श्रीचन्द्रां रुदन्तीं दृष्ट्वा व्रणपीडाप्रपीडिताम्।
राजा तां शान्तयामास करस्पर्शं सुवाक्यतः।।79।।

ततस्तीव्रप्रकोपेन वाणमाकृष्य ताडितः।
विद्युत्केशेन दुष्टेन ज्ञानिना वानरः पशुः।।80।।

वानरोऽथ तदा गत्वा तत्रस्थमुनिसन्निधिम्।
पतितोऽतो मुनिस्तस्मै नमस्कारपदान् ददौ।।81।।

समाधिना मृतः प्राप्तः महोदधिकुमारताम्।
विद्युत्केशेन सम्प्रोक्तं कोपेन कियरान् प्रति।।82।।

हन्तव्या वानराः सर्वे युष्माभिश्चपलात्मकाः।
ततो भृत्याः समारब्धा मारितुं वानरान् मृगान्।।83।।

वने पुरस्थिताः सर्वे वानरा भीतमानसाः।
ते च कुर्वन्ति पूत्कारान् पतन्ति शस्त्रपीडिताः।।84।।

महोदधिकुमारः स ज्ञात्वा स्वाऽवधिना तदा।
आगतः कियरान् हन्तुं निर्दोषपशुमारकान्।।85।।

भूत्वा स वानराकारं वृक्षपाषाणपर्वतान्।
उन्मूल्य घ्नन्ति तान् भृत्यान् वानराणां प्रपीडिकान्।।86।।

भृत्याः पलायमानास्ते नृपस्य शरणङ्गताः।
सुरो जगाद भूपं तं रे रे त्वां मारयाम्यहम्।।87।।

विद्युत्केशोऽथ तच्छ्रुत्वा भीतो देवमिदमवदत्।
आगतोऽसि कुतः कस्त्वं मारयसि च मां कथम्।।88।।

वानरेशस्ततः प्रोचे योऽसौ त्वया हतो नृप।
वानरो दोषनिर्मुक्तः सोऽहं जातः सुरोत्तमः।।89।।

स्वभावजातिचापल्यस्तिर्यग्योनिसमुद्भवः।
वानरो मारितो यस्मात्तस्मात्त्वां मारयाम्यहम्।।90।।

ततोऽत्यन्तपरं भीतं नृपं दृष्ट्वा सुरोऽवदत्।
मा भीषीति वचः श्रुत्वा राजोचे कियरोम्यहम्।।91।।

ततो देवेन राजाऽसौ करे धृत्वाऽन्तिकं मुने।
भीतस्ताभ्यां ततो भक्त्या मुनिपादौ प्रवन्दितौ।।92।।
देवो जगाद भो योगिन् जातोऽहं त्वत्प्रसादतः।
महोदधिकुमाराख्यो भवनेषु सुरोत्तमः।।93।।
तदाश्चर्यं ततो दृष्ट्वा नृपः प्राह मुनिं प्रति।
किं करोमि प्रभीतोऽहं ततः प्रोचे मुनिर्नृपम्।।94।।
चतुर्ज्ञानोपगूढात्मा ममाऽस्त्यत्र समीपगः।
गुरुस्तस्याऽन्तिकं याम एवं धर्मसनातनः।।95।।
आचार्ये ध्रियमाणे[20] यस्तिष्ठन्नन्तिकगोचरे।
करोत्याचार्यकं मूढः शिष्यतां दूरमुत्सृजम्।।96।।
नाऽसौ शिष्यो न चाचार्यो न धर्मः स कुमार्गगः।
सर्वतो भ्रंशमायातः स्वाचारात्साधुनिन्दितः।।97।।
ततस्तस्योपकण्ठन्ते साधुनाऽधिष्टिता ययुः।
देवाश्च व्योमयानाश्च धर्मोत्कण्ठितमानसः।।98।।
गत्वा प्रदक्षणीकृत्य प्रणम्यादरतो मुनिम्।
नाऽतिदूरेण नाऽत्यन्तसमीपे स्थितिमाश्रिताः।।99।।
देवविद्याधरौ श्रुत्वा धर्मं श्रीमुनिभाषितम्।
ततो पृच्छन्तु तं प्रीत्या चात्मनो भवसन्ततिम्।।100।।
काशीदेशेऽथ श्रावस्त्या नगरस्य बहिःक्षितौ।
यशोदत्ताख्ययोगीन्द्रो ध्यानेन स्थित एकदा।।101।।
तं पूजितुं कुलीनार्था[21] आगता भक्तिसंयुताः।
ताभिर्वृतो मुनिर्दृष्टो व्याधेनैकेन पापिना।।102।।
निन्दित्वा तं मुनिं हन्तुं यावद् व्याधः समुद्यतः।
मुनीन्द्रोऽपि च तं दृष्ट्वा संपापात्क्रोधमाप्तवान्।।103।।
परस्पराऽभिघातेन यष्टिमुष्टादिपीडितौ।
स्त्रीभिश्च मुञ्चितौ यातौ स्वस्वस्थानं तदा च तौ।।104।।

मुनिनोपार्जितो धर्मः क्रोधेन तेन हारितः।
कालधर्मेण मृत्वासौ[22] सञ्जातो ज्योतिषां सुरः।।105।।

ततश्च्युत्वाऽत्र जातस्त्वं विद्युत्केशः खगाधिपः।
व्याधोऽपि संसृतौ भ्रान्त्वा वानरोऽभूद्वनोत्तरे।।106।।

पूर्ववैरेण भार्यायां तव चेष्टां विधायसः।
मृतो बाणेन देवोऽभून्नमस्कारफलादसौ।।107।।

एवं ज्ञात्वा पुनर्वैरं भवद्भ्यां क्रियते न च।
मा भूद्भूयोऽपि संसारे भवतोः परिहिंडनम्।।108।।

ततः सर्वे मुनीन्द्राद्या[23] मुनिसुव्रतसन्निधिम्।
गतास्तत्राऽपि तं नत्वा मनुष्यसदसि स्थिताः।।109।।

जिनास्याद्धर्ममाकर्ण्य विद्युत्केशो नरेश्वरः।
सुकेशाय स्वपुत्राय राज्यं दत्वाऽभवन्मुनिः।।110।।

दीक्षाग्रहणवेलायां विद्युत्केशेन वेगतः।
मित्राय प्रेषितो दूतः किष्कुपरे निवेदितुम्।।111।।

दूतेन तेन वेगेन गत्वा किष्कुपुरेशिनो।
महोदधिनरेन्द्राय प्रोक्तमिदं विनम्य च।।112।।

महोदधि महाराजन् पालय मम बालकम्।
सुकेशाख्यं तु तेनोक्तं विद्युत्केशेन ते विभो।।113।।

इति दूतमुखाच्छ्रुत्वा विद्युत्केशस्य संयमम्।
दुःखं कृत्वा कियद्वेलां पुनराह नराधिपः।।114।।

अहमपि ग्रहिष्यामि दीक्षां जिनवरोदिताम्।
मोहितोऽपि स नारीभिर्मोहं प्राप्तो नृपो न च।।115।।

प्रतिचन्द्राय पुत्राय दत्वा राज्यं नृपार्चितम्।
तपस्तीव्रतरं तप्त्वा गतोऽसौ मुक्तिमालयम्।।116।।

प्रतिचन्द्रस्य सञ्जाता जिनमतीति वल्लभा।
जातौ तयोः सुतौ नाम्ना किष्किन्धान्ध्रकरूढिकौ।।117।।

प्रतिचन्द्रोऽथ पुत्राय किष्किन्धाय ददौ श्रियम्।
यौवराज्यं कनिष्ठाय तस्मै चान्ध्रकरूढये।।118।।

स्वयं च दीक्षितो भूत्वा शिवस्थानङ्गतः परम्।
किष्कुपुरे कुमारौ तौ साम्राज्यं कुरुतो वरम्।।119।।

अथाऽस्ति दक्षिणश्रेण्यां रथनूपुरसञ्ज्ञकम्।
पुरं तत्राऽशनिवेगो राजा भूरि पराक्रमी।।120।।

विजयसिंहपुत्रोऽस्य चाऽस्ति रूपगुणान्वितः।
तत्रैवादित्यगत्याख्यं पुरमस्ति मनोहरम्।।121।।

विद्यामन्दिर[24]भूपोऽत्र वेगवतीति वल्लभा।
श्रीमालाख्या तयोः पुत्री रूपेण शारदा समा।।122।।

तस्या स्वयंवरोत्साहः प्रारब्धो तेन भूभृता।
नृपा विजयासिंहाद्या आगता वरभूषणाः।।123।।

किष्किन्धाऽन्ध्रकरूढितावप्यागतौ कुमारकौ।
मञ्चे[25] बहुविधास्तत्र रत्नहेममयाः कृताः।।124।।

तोरणदीपसंयुक्ता ध्वजमालादिभूषिताः।
उपविष्टाः स्ववर्गेण नृपास्तेषु यथायथम्।।125।।

मध्यमञ्चे समानीया कन्या रम्या निवेशिता।
मङ्गलानि च गीतानि वादित्र नर्तनादिकम्।।126।।

ततः सुमङ्गला धात्री हेमयष्टीकरस्थिता।
दर्शयति च कन्यायै क्रमेण तान्नरेश्वरान्।।127।।

रथनूपुरनाथस्य पुत्रोऽयं पश्य सुन्दरी।
नाम्ना विजयसिंहश्च महारूपी गुणाकरः।।128।।

कण्ठेऽस्य कुरु मालां[26] त्वं यद्यस्ति[27] तव चेतसि।
तत्र तां विमुखां ज्ञात्वा वरमन्यं निदर्शयत्।।129।।[28]

नभस्तिलकपत्ने शश्चन्द्रकुण्डलपुत्रकः।
मार्त्तण्डकुण्डलो नाम्ना वरैनं यदि ते मनः।।130।।

वयोऽधिकञ्च तं दृष्ट्वा विमुखाऽभूच्च कन्यका।
ततोऽन्यं तत्र सा धात्री दर्शयति वरोत्तमम्।।131।।
अयं रत्नपुराधीशो लक्ष्मीविद्याङ्गयोः सुतः।
नाम्ना विद्यासमुद्घातः सत्वरूप विवर्द्धितः ।।132।।
अधिष्टितः पुरेशोऽयं वज्रायुधः सुतो महान्।
वज्रपञ्जरनामा सः शास्त्रज्ञानविभूषकः।।133।।
एवमादिसमस्तांस्तान् विद्यालक्ष्मीसमन्वितान्।
दर्शयित्वा नृपान् धात्री स्वयं तु मौनमाश्रितान्[29] ।।134।।
सर्वान् विहाय विद्येशान् श्रीमाला कन्यका तदा।
किष्केन्धेन्द्रस्य[30]कण्ठेऽत्र चिक्षेप रत्नमालिकाम्।।135।।
ततो जयजय शब्दौ जनितौ याचकैर्जनैः।
वादित्राणाञ्च निर्घोषा नृत्यगीतादिमङ्गलम्।।136।।
ततोन्योऽन्यं निरीक्ष्यन्ति स्वमुखं श्यामतां गतम्।
कोऽयं कोऽयं वदन्त्यत्र ते नृपा गर्वपूरिताः।।137।।
दृष्टो विजयसिंहेन किष्किन्धान्ध्रकरूढिकौ।
श्रीमालया समेतौ तौ वानरचिह्नसंयुतौ।।138।।
तत आह नराधीशः कोपाद्विजयसिंहकः।
भवन्तौ वानरौ कस्मादत्रागतौ विरूपकौ।।139।।
तत्श्रुत्वा वानरः प्राहुः संक्रुद्धा गर्वचेतसाः।
वयं तु वानराः सत्यं त्वद्रूपवृक्षमर्दने।।140।।
एतच्छ्रुत्वा स्थिता देवा विजयसिंहपक्षिणः।
वानराश्च ततः क्रुधा युद्धं कर्तुं समुद्यताः।।141।।
स्तम्भान्नुन्मूल्य मञ्चस्थान् वृक्षान् पाषाणपर्वतान्।
घ्नन्तिं ते वानराधीशांस्तान्देवान्न्यायवर्जितान्।।142।।
गजागजैः रथास्तैश्च वाजिनो वाजिभिः सह।
पदातयश्च पादान्तैर्जातं युद्धं सुदारुणम्।।143।।

सुकेशो राक्षसस्तत्र तच्छ्रुत्वा शीघ्रमागतः।
किष्किन्धाऽन्ध्रकयोः पक्षे चतुर्बलेन संयुतः।।144।।

राक्षसवानराभ्याञ्च[31] मारिता देवपुङ्गवाः।
गताः पलायनं कृत्वा वर्णजर्जरदेहकाः।।145।।

ततो विजयसिंहाख्यः स्वयं योद्धुं समुद्यतः।
अन्ध्रकरूढिनाच्छिन्नं क्रोधिना वैजयं धनुः।।146।।

यावद्विजयसिंहोऽसौ गृह्णात्यन्यतरं धनुः।
अन्ध्रकरूढिना तावच्छेदितं तस्य मस्तकम्।।147।।

तद्दृष्ट्वा देवता नष्टाः प्राणां धृत्वा यतस्ततः।
ततः सुकेशकिष्किन्धावान्ध्रकः स्वपुरङ्गताः।।148।।

पुत्रस्य मरणं श्रुत्वाऽशनिवेगोऽयं मूर्च्छितः।
चन्दनैः प्राप्य सञ्ज्ञां सः क्रोधाऽनलेन दीपितः।।149।।

चतुर्बलेन संयुक्तो निर्गतो योद्धुमिच्छया।
वानरान् राक्षसान् सर्वान् तान् हनिष्यामि पापिनः।।150।।

वेष्टितं किष्कुपन्नं तदशनिवेगवैरिणा।
तच्छ्रुत्वा निर्गता योद्धुं क्रुद्धाः वानरराक्षसाः।।151।।

वानरैः राक्षसैर्भूपैर्मारिता देवता पुनः।
ततश्चाऽशनिवेगोऽसौ स्वयं योद्धुं समुद्यतः।।152।।

तयोर्लग्नं महायुद्धमन्ध्रकाऽशनिवेगयोः।
पतन्ति जन्तवो भूरि शस्त्रबाधारिपीडिताः।।153।।

तनयोऽशनिवेगस्य नाम्ना विद्युतवाहनः।
किष्किन्धेन[32] समं युद्धं करोति च बलान्वितः।।154।।

किष्किन्धेन तनुस्तस्य ताडितं[33] भिण्डिमालया।
प्राप्य मूर्च्छां पुनः सञ्ज्ञां सम्प्राप्य योद्धुमुद्यतः।।155।।

विद्युद्वाहेन दण्डेन भिन्नं किष्किन्धवक्षसाम्।
मूर्च्छां प्राप्तः सुकेशेन नीतोऽसौ किष्कुपत्तने।।156।।

तदैवाऽशनिवेगेन मारितोऽन्ध्रकभूपतिः ।
अन्ध्रके मरणं प्राप्ते भग्नास्ते कपिराक्षसाः ।।157।।

पुरं प्रविश्य ते भीता दुर्गमाश्रित्यं संस्थिताः ।
प्रबोधं प्राप्य किष्किन्धः सुकेशमाह बुद्धिमान् ।।158।।

अन्ध्रको नाऽत्र कस्माद् भो दृश्यते मम बान्धवः ।
येनाऽत्र जीयते वैरिरशनिवेगदारुणः[34] ।।159।।

लङ्केन्द्रेण ततस्तस्मै प्रोक्तमन्ध्रकमृत्युकम् ।
तच्छ्रुत्वा व्याकुलीभूतः शोकं करोति मूढधीः ।।160।।

ततोऽसौ विलयन्[35] भूरिभातृस्नेहाऽनुबन्धतः ।
सुकेशादिभिरानीतः प्रबोधमितिभाषणात् ।।161।।

किं भो शोकेन किष्किन्ध भ्राता तेऽत्राऽऽगमिष्यति ।
तस्माच्छोकं परित्यज्य शेषान् चिन्तय जीवितुम् ।।162।।

दुष्टश्चाऽशनिवेगोऽयं वेगात्सर्वान् हनिष्यति ।
तस्मादुतिष्ठ गच्छामः पातालनगरं प्रति ।।163।।

श्रीमालयाऽपि युक्त्याऽसौ बोधितः समताङ्गतः ।
उतिष्ठ नाथ गच्छामः यत्र वदति राक्षसः ।।164।।

अस्ति पातालल‍ङ्कायां स्थानं रम्यञ्च निर्भयम् ।
स्थास्यामस्तत्र सुप्रीत्या कियत्कालं कलीप्सया ।।165।।

इत्युक्ते स्वस्ववर्गे तौ सनद्धौ कपिराक्षसौ ।
किष्कुपुराद्विनिष्क्रान्तौ पातालं प्रति गच्छतः ।।166।।

विद्युद्वाहोऽथ तौ दृष्ट्वा पृष्टे लग्नोऽतिवैरतः ।
तदा निवारितः पित्राऽशनिवेगेन धीमता ।।167।।

तदा पाताललङ्कां ते प्राप्ता वानरराक्षसाः ।
तत्र तस्थुः सुखं दुःखं वहन्तो भयवर्जिताः ।।168।।

निर्घाताख्यं नृपं लङ्काराज्ये संस्थाप्य भूपतिः ।
व्याघुट्यशनिवेगोऽथ गतः स्वं रथनूपुरम् ।।169।।

अथाऽभ्रमण्डलं नष्टं दृष्ट्वा चाऽशनिवेगकः।
सहश्राराय पुत्राय दत्तं राज्यं श्रियान्वितम्॥170॥
चन्द्रकीर्तिर्मुनेः पार्श्वे श्रुत्वां धर्मं विधानतः।
समं विद्युत्कुमारेण बभूव श्रमणोत्तमः॥171॥
श्रुत्वा किष्किन्धभूपोऽथ शत्रूपशमनं परम्।
सश्रीमालो गतो मेरुं वन्दितुं श्रीजिनोत्तमम्॥172॥
प्रत्यागच्छन्नस्ततोऽपश्यद्दक्षिणोदन्वतस्तटे।
अटवीं सुरकुर्वाभां पृथ्वीकर्णतटाऽभिधाम्॥173॥
श्रीमालां चाऽब्रवीदेवं देवि पश्याऽटवीं वराम्।
अत्र स्थातुं मनश्चाऽस्ति पाताले दुःखिनो मम॥174॥
अतिक्रम्य न शक्नोमि गन्तुमेनं महीधरम्।
आलयं कल्पयाम्यत्र खेचरैरपि दुर्गम्॥175॥
इति सञ्चिन्त्य तत्रासावावतीर्णो नभस्तलात्।
पुरं निर्मापितं तत्र किष्किन्धमिति नामकम्॥176॥
स्वबान्धवैः समेतोऽसौ सुखीभूतोऽत्र तिष्ठति।
तस्माच्च सम्भवं प्राप्य श्रीमालायां सुतद्वयम्॥177॥
ज्येष्ठः सूर्यरजो[36]नाम लघुर्यक्षरजोऽभिधः।
पुत्री च सूर्यपद्माख्या जाता कमलकोमला॥178॥
अथ मेघपुरे राजा मेघाख्यो विजयाचले।
मघोन्यां[37] तेन सम्भूतो मृगारिदमनः सुतः[38]॥179॥
सूर्यपद्मा नीता तेन कुमारेण महोत्सवैः।
विवाहमङ्गलं जातं किष्किन्धनगरे वरे॥180॥
प्रतिगच्छन्नस तामूढ्वा[39] न्यवसत्कर्णपर्वते।
कर्णकुण्डलमेतेन नगरं तत्र निर्मितम्॥181॥
पातालनगरेशस्य सुकेशस्याऽत्र सूनवः।
इन्द्राण्यां जन्म सम्प्रापुः[40] क्रमेण पुरुविक्रमाः॥182॥

अमीषां प्रथमो माली सुमाली चेति मध्यमः।
कनीयान्माल्यवान् ख्यातो विज्ञानगुणभूषणाः।।183।।
सिद्धविद्यासमुद्भूत वीर्योद्धतक्रियास्ततः।
पितृभ्यां वारितास्ते च यत्नादिति पुनः पुनः।।184।।
रंतुं चेद्यात[41] किष्किन्धं पुत्राः कौमारचापलात्।
मा व्रजीष्ट[42] समीपं त्वं जातु वैदक्षिणाम्बुधैः।।185।।
ततः प्रणम्य तैः पृष्टौ पितरौ तत्र कारणम्।
अनाख्येयमिदं वत्सा[43] इति तौ विहितोत्तरौ।।186।।
सुतरामनुबन्धेन सुतैः पृष्टौ स चाटुभिः।
ततस्तेभ्यः सुकेशेन कथितं शृणुतात्मजाः।।187।।
पुर्यामशनिवेगेन लङ्कायां स्थापितः पुरः।
निर्घातो नाम दुष्टात्मा खेचरो बलवानलम्।।188।।
कुलक्रमेण साऽस्माकमागता नगरी शुभा।
रिपोस्तस्माद्भयात्त्यक्ता नितान्तमश्रुवत्प्रिया[44] ।।189।।
देशे-देशे नरास्तेन नियुक्ताः पापकर्मणा।
अवधानं सदा दत्ता अस्मच्छिद्रगवेषणे।।190।।
यत्र तत्र कुतन्त्राणि जन्त्राणि विविधानि च।
सन्ति क्षिप्तानि पापिष्टैर्वधार्थं[45] भवतां सदा।।191।।
विदित्वा रमणासक्तान् भवतो गगनाङ्गणे।
निघ्नन्ति ते पुरन्ध्रेषु कृत्वा शूलादिरोपणम्।।192।।
एवं निगदितं श्रुत्वा पितृदुःखाऽनुचिन्तनात्।
निःश्वस्य मालिना दीर्घं समुद्भूताश्रुचक्षुषा।।193।।
इयन्तं समयं तात कस्मान्नो न निवेदितम्।
अस्मात्क्रमागतां लङ्कां को भुनक्ति प्रणष्टधीः।।194।।
यदा लङ्का ग्रहिष्यामि तदा मुकुटबन्धनम्।
करोमीति प्रतिज्ञां ते कृत्वा स नह्य निर्गताः।।195।।[46]

अथाऽमङ्गलभीताभ्यां पितृभ्यां न निवारिताः।
राक्षससैन्यसंयुक्ताः प्राप्ता लङ्का बहिर्वनम्।।196।।
शत्रूणामागमं श्रुत्वा निर्घातो निर्गतस्ततः।
चतुर्बलसमायुक्तो महागर्वसमन्वितः।।197।।
ततोऽभवन्महायुद्धं सेनयोरुभयोस्तदा।
गजाश्वरथपादान्ताः पतिता घाततस्तयोः।।198।।
निर्घातमालिनोस्तत्र युद्धं जातं सुदारुणम्।
वज्रेण मालिना वैरी निर्घातो हृदि ताडितः।।199।।
निर्घाते मरणं प्राप्ते भीताः सकलदेवताः।
यथा स्वं निलयं प्राप्ता विजयार्द्धं समाश्रिताः।।200।।
प्रविष्टाऽथ लङ्कायां परिवर्गेण राक्षसाः।
मालिसुमाली मालीवान् राज्यं कुर्वन्ति सौख्यतः।।201।।
अथ हेमपुरेशस्य हेमस्य खगचारिणः।
भोगवत्यां समुत्पन्ना नाम्ना चन्द्रमतीसुताम्।।202।।
विवाहविधिना माली विवाहितो महोत्सवैः।
नानाभोगविनोदेन सुखी जातो नरेश्वरः।।203।।
प्रीतिकूटपुरेशस्य प्रीतिकान्तस्य चात्मजाम्।
प्रीतिमत्यङ्गजां लेभे सुमाली प्रीतिसञ्ज्ञिकाम्[47]।।204।।
कनकाभपुरेशस्य कनकस्य सुतां तथा।
उद्वाह कनकश्रीजां माल्यवान् कनकावलीम्।।205।।
एतेषां प्रथमा जाया एता हृदयसंश्रयाः।
अङ्गनानां सहस्रैकं प्रत्येकमधिकसंस्मृतम्।।206।।
विजयार्द्धं विना तैश्च सर्वे भूपा वशीकृताः।
लङ्कायां प्रबला जाता राक्षसाः सुखसम्पदाः।।207।।
नृपौ सुकेशकिष्किन्धौ स्वपुत्रेभ्यो नृपश्रियम्।
दत्वा धरमुनेः पार्श्वे सञ्जातौ तौ मुनीश्वरौ।।208।।

द्वादशभेदसंयुक्तं तपोघोरं विधाय तौ ।
प्राप्तौ शिवास्पदं रम्यमनन्तसुखसागरम् ।।209 ।।

देवेन्द्रवृन्दसुमुखै सुरसेव्यपादौ
मोक्षस्य सौख्यकथकः परमात्मरूपः ।
संसारवारिधितटे वृतसौख्यभारो[48]
दद्यात्स वः सुभगवन् शिवसौख्यधाम ।।210 ।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते वानरवंशवर्णनो
नाम चतुर्थोऽधिकारः ।।4 ।।

❖❖❖

१. पुत्रोः इति क प्रतौ
पुत्री इति ग प्रतौ
२. स्वसातयाचता – इति क/ख प्रतौ
स्वसातयाचतः – इति ग प्रतौ
३. गमण्पेरण्ये इति ग प्रतौ
४. मां युक्ता इति ग प्रतौ
५. त्रिंशते योजने इति ख प्रतौ
त्रिंशतो व्योजने इति ग प्रतौ
६. ततस्तैस्तेऽथ इति क प्रतौ
७. प्रवृतते इति ख प्रतौ
८. बलांति – ख / ग
९. यूकान्नयनकान्ति च इति ग प्रतौ
१०. खातिका कोट इति ग प्रतौ
११. जिनानैगम श्रुतं इति ग प्रतौ
१२. मन्दरः इति प. पु. १/६/१६१
१३. सुतायच इति ग प्रतौ
१४. कूपं इति ख/ग प्रतौ
१५. जगौ नृप प्रसांत्यते इति ग प्रतौ
१६. परिपाटिका इति ग प्रतौ
१७. ६८ तः ८३ पर्यन्तश्लोकाः इति ख प्रतौ अप्राप्ताः।
१८. तेषु स्तपुत्रेषु इति ग प्रतौ
१९. पश्रु – क/ग प्रतौ
२०. पृष्टमाने इति ग प्रतौ
२१. कुलानार्य इति ख प्रतौ
२२. मृत्वा सः इति ख/ग प्रतौ
२३. मुनीयानां इति ग प्रतौ
२४. विद्यामन्दरः – प. पु. १/६/३५८
२५. मञ्चा इति क/ख प्रतौ
२६. प्रालां इति क प्रतौ
२७. यथास्ति इति ग प्रतौ
२८. ग प्रतौ श्लोकस्य पुनरावृत्तिः

२९. मौन्यमाश्रिता इति क प्रतौ
मौन्यमाश्रिता: इति ख प्रतौ
३०. किष्कंधेन्द्रस्य इति ख प्रतौ
किष्केन्द्रस्य इति ग प्रतौ
३१. राक्षसा वानराभ्यां च इति ख प्रतौ
राक्षसावानराभ्यां च इति ग प्रतौ
३२. किष्कन्धा इति ग प्रतौ
३३. ताडिता इति ग प्रता
३४. ज्येनात्रयायते वैरीरशनिवेगदारुणा इति ग प्रतौ
३५. विजयन् इति ख प्रतौ
३६. सूर्शरजा इति क/ख प्रतौ
३७. मेघोन्यां इति ग प्रतौ
३८. मृगारिमदनः सुतः इति ख प्रतौ, मृगारिमदना पुनः इति ग प्रतौ
३९. तामूढा इति ग प्रतौ
४०. संप्राप्युः इति क / ग प्रतौ
४१. विद्यान् इति ग प्रतौ, द्वेघात इति ख प्रतौ, चेद्यात् प.पु. ६/५२९
४२. व्रजेष्व इति ग प्रतौ
व्राजिष्ट इति प. पु. १/६/५३४
४३. वत्सान् इति ग प्रतौ
४४. नितांतमश्रुवङ्गिं इति ख प्रतौ
नितांतमश्रुचत्प्रियं इति ग प्रतौ
नितांतमसुवत् प्रिया इति प. पु. १/६/५३९
४५. पापिष्टौवधार्थं इति क प्रतौ
पापिष्टैवधार्थं इति ग प्रतौ
४६. श्लोकः ग प्रतौ अप्राप्तः
४७. सञ्झिकौ इति ख प्रतौ, सञ्झिके इति ग प्रतौ
४८. तटो घृत सौख्यभारो इति ख प्रतौ, तटो वृत सौख्यधाय इति ग प्रतौ

❖❖❖

पञ्चमोऽधिकारः

विजयार्द्धेऽथ राजाऽभून्नगरे रथनूपुरे ।
सहस्रारोऽस्य भार्याऽस्ति नाम्ना मानससुन्दरी ।।1 ।।
गर्भिणीं तां नृपः प्राह पराप्रीतिनिबन्धनात् ।
दुर्बला देवि कस्मात्त्वं निवेदय ममाग्रतः ।।2 ।।
ततो देव्याह भो नाथ यदाऽऽरभ्योदरे मम ।
गर्भस्य सम्भवो जातस्तदारभ्य दिने दिने ।।3 ।।
क्रीडां शक्रस्य कर्त्तुं मे वर्तते मानसं परम् ।
तच्छ्रुत्वा तेन भूपेन तस्यै तथैव कारितम् ।।4 ।।
गजमारोप्य तां देवीं स्वयं छत्रधरोऽभवत् ।
विमानस्थाः खगा देवाः स्वर्गजा विभवाः पराः ।।5 ।।
ततोऽतीतेषु मासेषु नवसु साथ बालकम् ।
असूत क्रमतः सोऽथ सम्प्राप्तो यौवनं परम् ।।6 ।।
तस्मिन् गर्भस्थिते यस्मादिन्द्रक्रीडा प्रवर्त्तिता ।
तस्मादयं भवेच्छक्र इति पित्रा प्रकल्पितम् ।।7 ।।
रथनूपुर पत्नस्य वैजयन्तीति नामकृत् ।
इन्द्रगृहमिति नाम मन्दिरं तत्र[1] निर्मितम् ।।8 ।।
गज ऐरावतो नाम महाशुभ्रो महारदः ।
आयुधं तस्य वज्राख्यं शेषं स्वर्गसमं कृतम् ।।9 ।।
उभयोः श्रेण्ययोर्भूपाः क्षणात्तेन वशीकृताः ।
सहस्राष्टकचत्वारिसङ्ख्याता अस्य योषितः ।।10 ।।
नाट्यशाला सहस्राणि षड्विंशति प्रमान्विताः ।
सुधर्माख्या सभा तस्य त्रिंशताऽप्सरसाङ्गणाः ।।11 ।।
गणिकास्तस्य रूपाख्या चोर्वशी चातिलोत्तमा ।
नाम्ना हरण्यकेशश्च सेनापतिर्महाबली ।।12 ।।
विद्याधराः सुराः प्रोक्ता हाहाहूहूश्च नारदाः ।
मन्त्री बृहस्पतिर्नाम सर्वमस्य सुरेन्द्रवत् ।।13 ।।

महताडम्बरे युक्तः करोति राजमुत्तमम् ।
शक्राख्यं तनयं दृष्ट्वा सहस्रारो नृपः सुखी ।।14।।
लङ्कायामथमालीशो[2] महामानी बलान्वितः ।
उभयोः श्रेण्योर्भूपान् वशीकर्तुं समुद्यतः ।।15।।
गजैरश्वै रथैर्हंसैर्वालेयैर्महिषैर्वृकैः ।
मृगैर्व्याघ्रैर्विमानैश्च मयूरैः शरभैस्तथा ।।16।।
नानायानैश्च संयुक्तो विजयार्द्धनगं प्रति ।
भार्तृभ्यां सहितो माली निर्गतो गर्वपूरितः ।।17।।
सूर्ययक्षरजसौ तौ निर्गतौ सह वानरौ ।
वानरा राक्षसा: सर्वे चलिताः सैन्यसंयुताः ।।18।।
तदा कुशकुनान् दृष्ट्वा सुमाली नयकोविदः ।
ऊचे मालिनमत्रैव तिष्ठामः शृणु बान्धवः ।।19।।
वा लङ्कां प्रतिगच्छामो न त्वग्रे क्षिप्यते पदम् ।
अस्माकं कथयन्त्येते शकुनाः दुःखकारणम् ।।20।।
प्रत्युवाच ततो माली निर्गतोऽहं द्विषं प्रति ।
महाबलेन संयुक्तो निवर्त्त्यतेऽधुना कथम् ।।21।।
भवितव्यं भवत्येव नान्यथा कर्म्मणः फलम् ।
इति सम्बोध्य तान् सर्वान् प्रयाणमकरोद्बली ।।22।।
ततस्तैर्विघ्नशान्त्यर्थं कारितं पूजनादिकम् ।
क्षणान्निर्गत्य ते वीरा विजयार्द्धं नगं गताः ।।23।।
तेषामाज्ञा न यैर्भूपैर्धृतास्तेषां पुराणि वै ।
लुण्टितानि प्रकोपेन दग्धानि पीडिताः प्रजाः ।।24।।
राक्षसैर्वानरैर्भूपैः पीडिता दुर्बला वयम् ।
तच्छ्रुत्वा क्रोधसन्दीप्तः शक्रः प्राह नृपान् प्रति ।।25।।
मम चित्तोऽस्ति प्रागेव हन्तव्याः कपिराक्षसाः ।
किं पुनस्ते स्वयं प्राप्ताः सङ्गरे मुच्यते कथम् ।।26।।

अग्रे निहत्य युद्धार्थं रणभेरीं सुदारुणाम्।
सनह्य निर्गतः शक्रश्चतुर्बलसमन्वितः ।।27।।
रथरश्वैर्गजैरुष्ट्रैः सिंहैर्मेषैर्वृषैर्वृकैः।
शक्रस्य निर्गता भूपा इत्यादि वाहनैर्युताः ।।28।।
सेनयोरुभयोस्तत्र सञ्जातं कदनं महत्।
परस्पराभिघातेन मृताः सङ्ख्यविवर्जिताः ।।29।।
विद्युद्वच्चण्डवेगाख्यै र्देवैर्भग्नाः कपिध्वजाः।
ततः किष्कन्धपुत्राभ्यां मारिता देवताः पुनः ।।30।।
वानरं बलमालोक्य लोकपालाः समागताः।
तैर्मारितास्ततो नष्टास्ते दूरं वानरराक्षसाः ।।31।।
ततो माली स्वयं योद्धुमुद्यतो राक्षसां प्रति।
तेन भग्ना सुरा भूपा नानाशस्त्रैः प्रपीडिताः ।।32।।
ततः शक्रः समायातो योद्धुं वैरिभयप्रदम्।
मालिना मारितो भाले वज्रेण सुरनायकः ।।33।।
उपशम्य तु शक्रेण चक्रेण तीव्रकोपिना।
मालिनो मस्तकच्छिन्नं रत्नमुकुटभासुरम् ।।34।।
बन्धोर्मरणमालोक्य परिवर्गेण संयुतः।
रणात्पलायनं चक्रे सुमाली नययुक्तिवित् ।।35।।
लोकपालं ततः सोमं पृष्टे लग्नञ्च[3] वैरिणम्।
दृष्ट्वा मालिवता तस्य हतं वज्रेण वक्षसम् ।।36।।
तस्य मूर्छां सुरा यावत् शास्ति तावच्च ते नृपाः।
पातालनगरं प्राप्ताः कुटुम्बैः कपिराक्षसाः ।।37।।
लङ्काकिष्कन्धयोः स्थानं स्वीकृत्याशु प्रमोदवान्।
लोकपालश्च सोमोऽसौ चागतः शक्रसन्निधिम् ।।38।।
निर्जित्य कण्टकान् सर्वान् चतुर्बलसमन्वितः।
शक्रोऽयं सर्ववैभौत्या विवेश रथनूपुरम् ।।39।।

स्वर्गाभो[4] विजयार्द्धे सः राज्यं करोति शक्रवत्।
शृणु श्रेणिक भूपोऽथ लोकपालः समुद्भवः।।40।।
मकरध्वजभूपालादादित्यां सम्भवः शशी।
ज्योतिःपुरेऽथ पूर्वास्यां स्थापितः शक्रभुभुजाः।।41।।
मेघरथात् वरुण्यायां वरुणाख्यो भवः सुतः।
पश्चिमास्यां घने पत्ने स्थापितश्च महाबली।।42।।
किं सूर्यात्कनकावल्यां तनयोरभूत्कुबेरकः।
काञ्चनाख्ये पुरे रम्ये चोत्तरस्यां नियोजितः।।43।।
श्रीप्रभायां च कालाग्रे यमो नाम सुतोऽजनि।
स्थापितः किष्कुपत्ने स यमदिशि यमोपमः।।44।।
असुराख्यपुरे जाता असुरा नामदेवताः।
यक्षगीतपुरे यक्षाः किन्नराः किन्नरे पुरे।।45।।
गन्धर्वाख्ये च गन्धर्वा: ज्योतिषि ज्योतिषः सुराः।
ग्रहाश्चैवं यथायोग्यं स्थापिता नगरे पराः।।46।।
कौतुकमङ्गले पत्ने व्योमविन्दोर्नृपादथ।
नन्दवत्यां समुत्पन्ने कौशिकीकेकसीसुते।।47।।
दत्ता यक्षपुरेशाय विश्रवसे च कौशिकी।
तयोर्वैश्रवणो नाम पुत्रोऽभवत्सुलक्षणः।।48।।
पञ्चमो लोकपालोऽयमित्युक्ता शक्रभूभृता।
लङ्कायां स्थापितो मानी कुबेरो भूपतिर्महान्।।49।।
विजयार्द्धोऽभवत्स्वर्गः स्वयं तु सुरनायकः।
विधाधराः सुरा ज्ञेया इति सर्वं प्रकल्पितम्।।50।।
अथ सुमालिनः पुत्रः प्रीतिमत्यां समुद्भवः।
रत्नश्रव इति ख्यातो गुणवान्कृपयान्वितः।।51।।
एकदा स महाधर्मी विद्यां प्रसाधितुङ्गतः।
रौद्रभूतपिशाचाख्यं घनं[5] पुष्पादिके वने।।52।।

विद्यां साधत्यसौ यावत्तावत्सा तत्र केकसी।
निश्चितास्मै जिनास्याच्च नृपेण व्योमबिन्दुना।।53।।
नियुक्ता तस्य सेवायै तत्र पुष्पान्तिके वने।
करोति तस्य सेवां सोपचारैर्विविधैर्मुदा।।54।।
तदैव समये तस्य विद्यासिद्धिः समुद्भवा।
मानसस्तंभिनी ख्याता क्षणाद्दर्शितविग्रहा।।55।।
ततो विद्याप्रभावेन तस्मिन्नेव महावने।
पुरं पुष्पान्तकं नाम क्षणात्तेन निवेशितम्।।56।।
ततोऽग्रे संस्थितां कन्यां दृष्ट्वा रत्नश्रवोऽवदत्।
भो बाले कस्य पुत्री त्वमत्र किमर्थमागता।।57।।
तयोक्तं व्योमबिन्दोश्च राज्ञोऽहं दुहिता वरा।
त्वया समं विवाहार्थं पित्राऽत्र स्थापिता पराम्[6]।।58।।
इति श्रुत्वा स्वयं राज्ञा सा कन्याऽत्र परीणिता[7]।
ततस्तयोर्महाप्रीतिर्जाता प्रेमानुबन्धिनी।।59।।
बन्धुवर्गेण युक्तोऽसौ राज्यं करोति सौख्यदम्।
पुष्पान्तकपुरे रम्ये लङ्काचिन्तासमन्वितः।।60।।
एकदा मृदुशय्यायां सुप्ता देवी सुखाशिनी।
स्वप्नानां त्रयमद्राक्षीत्कैकसी गुणशालिनी।।61।।
ततः प्रभाततूर्येण प्रबुध्या सा सविस्मया।
नेपथ्यादि[8] क्रियां कृत्वा सा गता भर्तुरन्तिकम्।।62।।
अर्द्धासने स्थिताऽवोचन्नृपं रत्नश्रवं प्रति।
नाथाऽद्य पश्चिमे यामे दृष्टं स्वप्नत्रयं वरम्।।63।।
क्रोधोद्धतमहासिंहं ध्वान्तध्वसं रविं तथा।
कलापूर्णं महाचन्द्रं दृष्टवाऽहं जागृता[9] ततः।।64।।
वद नाथ फलं तेषां कल्याणसुखदायकम्।
भूपतिराह ते देवि भविष्यन्ति त्रयः सुताः।।65।।

एकस्तेषु महायोद्धा समर्थः पापकर्मणि।
द्वौ पुण्यपुरुषौ पुत्रावावयोः सुखदायकौ।।66।।
श्रुत्वेति सा च सन्तुष्टा स्ववेश्मनि गता मुदा।
ततस्ताभ्यां जिनेन्द्रस्य कृता पूजा महोत्सवैः।।67।।
गर्भस्थे प्रथमे देवी[10] महागर्वेण पूरिताः।
न च बिभेति कस्मात्सा मृगेन्द्रमिव गर्जति।।68।।
सम्पूर्णे दिवसे देवी प्रसूता बालकं वरम्।
तदा शत्रुगृहे जाता महोत्पाता भयप्रदाः।।69।।
राक्षसैश्च तदा सर्वैः जन्मोत्साहः कृतो महान्।
दृष्ट्वा बालञ्च संतुष्टा महारूपं मनोहरम्।।70।।
एकदा रम्यमाणोऽसौ तत्र स बालको गतः।
देवाभ्यां दत्तहारोऽस्ति यत्र परभयङ्करः[11]।।71।।
देवताभिः सहस्रैश्च रक्षितो हारमुत्तमः।
हस्तेन तेन बालेन धृतो वेगाद्भयं विना।।72।।
तं दृष्ट्वा राक्षसा वीरा वदन्तीदं परस्परम्।
अस्माकं नु गतं राज्यं साधिष्यत्यर्यमेव च[12]।।73।।
तद्रत्नेषु नवस्वेव तन्मुखं प्रतिबिम्बितम्।
ततो दशास्य इत्यस्याऽभिधानं राक्षसैः कृतम्।।74।।
भानुकर्णस्ततो जातो द्वितीयस्तु कियद्दिनैः।
ततश्चन्द्रनखा पुत्री पूर्णचन्द्रसमाऽभवत्।।75।।
ततो विभीषणो जातस्तृतीयस्तनयः परः।
बालक्रीडाऽपि भूमाऽभूत्तेषाञ्च[13] शुभलक्ष्मणाम्।।76।।
सौधोपर्येकदापुत्रैः समस्थिताऽस्ति केकसी।
अपश्यन् धनदं दुष्टं गच्छन्तं गगने पथि।।77।।
पुष्पान्तकविमानस्थं चतुर्बलसमन्वितम्।
वाद्यनिनादसंयुक्तं वैरिणं भगिनीसुतम्।।78।।

तदा सा रोदनञ्चक्रे महाशोकसमन्वितम्।
विभीषणस्तदा प्राह मातस्त्वं रोदसि कथम्।।79।।
दुःखिता केन दुष्टेन किमुक्तं वाथ केनचित्।
निग्रहं तं करिष्यामि हस्तपादादिछेदनैः।।80।।
देवी प्राह न केनाऽपि दुःखिताऽहं विभीषण[14]।
परन्तु कारणं चास्ति रोदनस्य महत्तरम्।।81।।
अस्मात्कुलक्रमायातं लङ्कानगरमुत्तम्।
अनेन तु कुबेरेण गृहीतं तत्स्वशक्तितः।।82।।
कोऽयमिति पुनः पृष्ठे केकसी चोचे[15] भो शृणु।
अयं मे भगिनी पुत्रो धनदाख्यो महाबली।।83।।
विजयार्द्धनगेशेन शक्रेण स्थापितः पुरः।
लङ्कायां मालिनं हत्वा गृहीतायां धनाधिपः।।84।।
अनया चिन्तया पुत्र पिता ते दुर्बलोऽभवत्।
शोकाक्रान्ताऽहमप्यत्र सदा करोमि रोदनम्।।85।।
कदाऽहं पुत्रं पश्यामि लङ्काराज्यं करे तव।
आगतं जनकस्तेऽत्र कदा सुखी भविष्यति।।86।।
विभीषणस्ततः प्राह मातः किं व्यर्थगर्वितम्।
क्व कुबेरः कुतः शक्र एते तु गल्लफुल्लकाः।।87।।
एषां गर्वं हरिष्यामि दिनैः स्वल्पैश्च पापिनाम्।
मातः किं बहुनोक्तेन मृत्युं पश्यसि वैरिणाम्।।88।।
विद्यायाः साधनं कर्तुं निर्गतास्ते त्रयस्तदा।
आज्ञां धृत्वा च पितॄणां भीमाख्यं सुवनङ्गताः।।89।।
गुहायामन्धतामस्यां संस्थितास्ते पृथक् पृथक्।
सिद्धान्नत्वा समारब्धं ध्यानमष्टाक्षरी गतम्।।90।।
दशाननस्य वेगेन विद्यासिद्धा महाबला।
अष्टाक्षरीति नाम्ना सा वरं ददाति चेप्सितम्।।91।।

तस्यै यथेप्सितं चाऽन्नं दशाननेन कल्पितम्।
पुनः साधितुमारब्धो सुविद्यां षोडशाक्षरीम्।।92।।
अनावृत्तेन यक्षेण गुहास्थेन प्रकोपतः।
तदारब्धे कुमारान् तानुपसर्गं भयप्रदम्।।93।।
व्याघ्रसिंहवृकासर्पास्तेभ्यस्तेन प्रदर्शिताः।
तथाऽपि ते दृढध्यानं न मुञ्चन्ति महात्मनः।।94।।
स्त्रीभिस्तस्याऽतिदुष्टाभिः कामचेष्टाश्च दर्शिताः।
तथा पिते दृढध्यानं न मुञ्चंति महात्मनः।।95।।
तदाऽस्य ध्यानयुक्तस्य दशाननस्य धर्मिणः।
सहस्रैकं सुविद्यानां सिद्धं जातं सुखप्रदम्।।96।।
ताः करं मुकुलीकृत्य तस्याऽग्रे भक्तितः स्थिताः।
भो प्रभो देह्यनुज्ञां नः किं कार्यं वर्तते तव।।97।।
पश्य श्रेणिक पुण्यस्य प्रभावो यो दशानने।
असम्पूर्णे गते काले विद्यासिद्धिमुपागतः।।98।।
संक्षेपेण करिष्यामि विद्यानां नामकीर्त्तनम्।
सर्वसामर्थ्यतो लब्धं भवावहितमानसः।।99।।
नभः सञ्चारिणी कामदायिनी कामगामिनी।
दुर्निवारा जगत्कम्पा प्रज्ञप्तिर्भावरूपिणी।।100।।
अणिमा लघिमा क्षोभ्या मनस्तम्भनकारिणी[17]।
संवाहिनी सुरध्वंसी कुमारी वधकारिणी।।101।।
सुविधाना[18] तमो रूपा मोहनी[19] विपुलोदरी।
शुभप्रदा रजो रूपा दिनरात्रिविधायिनी।।102।।
वज्रोदरी समाकृष्टिरदर्शन्यजरामरी[20]।
अनलस्तम्भिनी तोयस्तम्भिणी गिरिदारणी।।103।।
अवलोकन्यरिध्वंसी घोराधीरा भुजङ्गिणी।
वारुणी भुवणावध्या दारुणा मदनासनी।।104।।

भास्करी भयसम्भूतिरैशानी विजया जया।
बन्धनी मोचनी चाऽन्या वा राही कुटिलाकृतिः।।105।।
चित्तोद्भवकरी[21] शान्तिः कौबेरी वशकारिणी।
योगेश्वरा बलाच्छादी चण्डा भीतिः प्रकम्पिनी।।106।।
एवमाद्या महाविद्या पुरा सुकृतकर्म्मणा।
स्वल्पैरेव दिनैः प्राप दशग्रीवः सुनिश्चलः।।107।।
सर्वाहारातिसंवृद्धिल्लिम्भनी[22] व्योमगामिनी।
निद्राणी चेति पञ्चैतौ भानुकर्णं समाश्रिताः।।108।।
सिद्धार्था शत्रुदमनी निर्व्याघाता खगामिनी।
विद्याविभीषणं प्राप्ताश्च तस्योदयिता इव।।109।।
ईश्वरत्वं ततः प्राप्ता विद्यानां ते सुविभ्रमाः।
जन्माऽन्यदिवसं प्रापुर्महासम्मदकारणम्।।110।।
ततः पत्यापि यक्षाणां दृष्ट्वा विद्याः समागताः।
पूजितास्ते महाभूत्या दिव्यालङ्कारभूषिताः।।111।।
स्वयंप्रभमितिख्यातं नगरञ्च निवेशितम्।
मेरुशृङ्गसमस्थाऽयं[23] सद्मपङ्क्तिविराजितम्।।112।।
मुक्ताजालपरिक्षिप्त गवाक्षैर्दूरमुन्नतैः।
रत्ना जाम्बूनदस्तम्भै रचितं चैत्यवेश्मभिः।।113।।
भ्रातृभ्यां सहितस्तत्र प्रासादे गगनस्पर्शिः।
विद्याबलेन सम्पन्नः सुखं तस्थौ दशाननः।।114।।
ततोऽनावृत्तयक्षोऽसौ तुष्टो दशाननमवदत्।
जम्बूद्वीपस्य नाथोऽहं सदा रक्षामि तेऽधुना।।115।।
जम्बूद्वीपेऽत्र सर्वत्र विचर त्वं सु निर्भयः।
किञ्चित्कार्यं यदा तेऽस्ति तदा मे स्मरणं कुरु।।116।।
चिरञ्जीव स्वभातृभ्यां वर्द्धस्व सुखसम्पदा।
इत्याशीर्वादकान् दत्वा गतोऽसौ निजमालयम्।।117।।

सिद्धविद्यं दशास्यं तं श्रुत्वा ते कपिराक्षसाः।
चित्ते प्रमुदिताः सर्वे निर्गता द्रष्टुमीप्सया।।118।।
सुमालीमालिवान् सूर्यरज[24]यक्षरजस्तथा।
रत्नश्रवः सभार्यश्च पुत्रस्नेहपरायणाः।।119।।
अन्ये च स्वजना भूरि विमानैर्वाजिभिर्गजैः।
स्वदेशेभ्यः समायाताः स्वयम्प्रभपुरं वरम्।।120।।
पितृणां चरणौ भक्त्या वन्दितैः तैः कुमारकैः।
पितृभिश्च करेणैषां गात्रमस्पृशितं चिरम्।।121।।
चिरञ्जीव स्ववर्द्धस्व चेति वर्द्धापिताश्च तैः[25]।
राक्षसैर्वानरैः सर्वैरालिङ्गिता पुनः पुनः।।122।।
मज्जनादिक्रियास्तेषां पितृभ्यां कारिता मुदा।
भोजनादिविधिर्जाता सर्वेषां सुखवर्द्धिनी।।123।।[26]
भो तनयाः श्रमो जातः कुटम्बैरिति भाषितम्।
तैरुक्तं त्वत्प्रसादेन नष्टोऽस्माकं परिश्रमः।।124।।
मालिनोक्तः[27] कथां स्मृत्वा सुमाली चाऽरुदच्चिरम्।[28]
दशास्यः प्राह दुःखं त्वं मा कुरु हि पितामहः ।।125।।
ये सन्ति शत्रवो लोके तेषां गर्वञ्च सर्वथा।
हरिष्यामि रणक्षेत्रे ततोऽहं तव वंशजः।।126।।
तच्छ्रुत्वा बन्धुभिः प्रोक्तमस्माकं कुलमण्डनम्।
त्वं जातोऽसि दशवक्त्र चिरञ्जीव सुखी भव।।127।।
एवं परस्परं सर्वे सन्तुष्टाः कपिराक्षसाः।
तिष्ठन्ति भयनिर्मुक्ताः सुखिनस्तत्र संमदात्।।128।।
पुरस्याऽस्य बहिर्भूमौ चन्द्रप्रभजिनालयम्।
चन्द्रनखासमेताऽसौ सम्प्राप्तोऽथ दशाननः।।129।।
षष्टभक्तेन संसाध्य चन्द्रहास्यमसिङ्गतः।
मेरुं सुवन्दितुं धर्मास्तावच्छृणु कथान्तरम्।।130।।

अथास्ति दक्षिणश्रेण्यामसुरसङ्गीतकं[29] पुरम्।
तत्र मयो महाराजो हेमवतीति वल्लभा॥131॥
सुता मन्दोदरी नामा रूपसौभाग्यसुन्दरी।
यौवनाद्या च तां दृष्ट्वा मयश्चिन्तातुरोऽभवत्॥132॥
मन्त्रिवर्गं समापृच्छ्य दशाननाय कल्पिता।
मन्दोदरी सुता तेन मयेन हितकांक्षिणा॥133॥
ततो विमानमारुह्य मन्त्रिवर्गैः समं मयः।
स्वयंप्रभपुरं प्राप्तो भार्यापुत्रादिभिः सह॥134॥
पुरस्य नूतनत्वात्स मार्गं जानाति नो मयः।
केनचिद्दर्शिते मार्गे गच्छति च शनैर्मयः॥135॥
वने चन्द्रप्रभगेहं दृष्ट्वा ते सः प्रविष्टवान्।
तत्र चन्द्रनखां दृष्ट्वा मयः पृच्छति तां तदा॥136॥
तनया कस्य बाले त्वं[30] कस्मादत्र व्यवस्थिता।
एकाकिनी बहिर्भूमौ सत्यं ते कारणं वद॥137॥
ततः सन्मान्य तं भूपं चन्द्रनखा सलज्जका।
जगाद श्रृणु भूपालं राक्षसवंशजा त्वहं॥138॥
रत्नश्रवनृपस्याहं सुता दशाननस्वसा।
भ्राता गतोऽस्ति मे मेरुं वन्दितुं जिनपुङ्गवान्॥139॥
साधितं षष्टभक्तेन चन्द्रहास्यं महात्मना।
भ्राता मे सोऽधुना शीघ्रं पुण्यवानागमिष्यति॥140॥
यावदेवं समालापो वर्तते मधुरस्तयोः।
तेजसां मण्डलस्तावदागतोऽसौ दशाननः॥141॥
अवलोक्य समासन्नमुत्तस्थौ सम्भ्रमान्मयः।
कृत्वा यथोचिताचारमासनेषु पुनः स्थितः॥142॥
मारिचो वज्रमध्यश्च वज्रनेत्रो नभस्तडित्।
उग्रनक्रो मरुद्वज्रो[31] मेधावी सारणः शुकः॥143॥

एवमाद्या नरा भूरि सन्ति मयस्य मन्त्रिणः।
उपविष्टा यथायोग्यं कथाभिः समवर्तिनः।।144।।
सकलैस्तैस्ततः स्नात्वा पूजा जिनस्य निर्मिता।
उपविष्टा पुनस्तत्र चासनेषु यथायथम्।।145।।
दशवक्रस्ततः प्राह के यूयं किं समागताः।
ततः प्रोचे स मारीचः शृणु नाथ दशानन।।146।।
नगरं दक्षिणश्रेण्यामसुरसङ्गीतनामकम्।
मयोऽयं तस्य भूपालो दैत्यानामधिपो महान्।।147।।
तव गुणैः समाकृष्ट आगतोऽयं नराधिपः।
जन्म तु सफलं जातं भो प्रभो तव दर्शनात्।।148।।
दशाननस्ततः प्राह कृतार्थतां गतस्त्वहम्।
भवतां सदृशा धन्या मद्गेहे चागता यतः।।149।।
एवं परस्परालापैः सन्तुष्टा दैत्यराक्षसाः।
विजयार्द्धस्य संशुद्धिं पृष्टवान् राक्षसो मयम्।।150।।
शक्रादीनां भवां शुद्धिं यावदूचे प्रभुर्मयः।
तावदग्रे स्थितां कन्यां दृष्ट्वान् स दशानन।।151।।
किं रोहिणी च शची वा स्यात्पद्मावतीति रेणुकी।
इति विस्मयमापन्नो दृष्ट्वा मन्दोदरीं सतीम्।।152।।
तदा मयो मनः ज्ञात्वा दशाननमिदमवदत्।
दशास्य मम पुत्रीयमस्याः प्रभुर्भव प्रभो।।153।।
ततस्तुष्टो दशास्योऽसौ क्षणात्तां परिणीतवान्।
कुटुम्बपरिवर्गेणोत्साहो महत्तरः कृतः।।154।।
सम्भ्रमेण ततः सर्वे स्वयंप्रभपुरङ्गताः।
स्थिताः स्वस्वोचितस्थाने मयोऽपि स्थापितः क्वचित्[32]।।155।।
प्राप देवी सहस्रस्य प्राधान्यं चारुविभ्रमात्।
क्रमान्मन्दोदरी भर्तुर्गुणैराकृष्टमानसा।।156।।

अभिप्रीतेषु देशेषु स रेमे सहितस्तया।
एको भवत्यनेकश्च सर्वस्त्रीकृतसङ्गमः।।157।।
एकदाऽसौ गतो वीरो नाम्ना मेघगिरिवरम्।
तत्राऽपश्यज्जलैः पूर्णां वापीं कमलमण्डिताम्।।158।।
तत्र क्रीडा प्रसक्तानां दधतीनां परां श्रियाम्।
षट्सहस्राणि कन्यानामपश्यत्केकसीसुतः।।159।।
तं दृष्ट्वा सहसा कन्यास्त्यक्तक्रीडा बभूवतुः।
दशाननः समंताभिः समासास्य च क्रीडति।।160।।
नाम्ना पद्मावती पुत्री सर्वश्रीसर्वरूपयोः।
सुवेगायां बुधाद्भूपाज्जाताऽशोकलता सुता।।161।।
सन्ध्यायां कनकाज्जाता नाम्ना विद्युत्प्रभा सुता।
तासामेता भवेच्छ्रेष्टाः कुलवंशादिभूषिताः।।162।।
क्रीडासक्तेन तास्तेन मोहिता क्षणमात्रतः।
गन्धर्वविधिना सर्वाः परिणीता च तेन ताः।।163।।
ततः कञ्चुकिभिर्गत्वा तत्पितृभ्यः[33] प्रसूचितः।
वृतान्तो दशवक्रस्य विवाहप्रतिसम्भवः।।164।।
तच्छ्रुत्वा सर्वभूपाद्या निर्गताः क्रोधपूरिताः।
चर्तुबलेन संयुक्ताः कनकेन बुधेन च।।165।।
स्वस्योपर्यागतान् दृष्ट्वा दशास्य कोपसंयुतः।
निर्माप्य विद्यया सैन्यं तैः समं योद्धुमुद्यतः।।166।।
सेनयोरुभयोस्तावज्जातं युद्धं सुदारुणम्।
दशास्येन ततः सर्वे नागपाशेन बन्धिताः।।167।।
मोचितास्ते ततस्ताभिः सञ्जाता हर्षपूरिताः।
ततः पाणिग्रहश्चक्रे तस्य तासां च तैः पुनः।।168।।
तत्र दिनत्रयं स्थित्वा पश्चान्मन्दोदरी युतः।
भोगान् बहुविधान् भुक्त्वा ताभिः स्वयंप्रभं गतः।।169।।

अथ कुम्भपुरेशस्य महोदरस्य वल्लभा।
सुरूपाक्षी तयोः पुत्री तडिन्मालाऽभिधानका।।170।।
सा नीता भानुकर्णेन विवाहविधिना तदा।
कुम्भपुरे स्थितो यस्मात्कुम्भकर्णोऽभवत्ततः[34] ।।171।।
न शेते स च षण्मासान् कदन्नं न च भुञ्जते।
मिथ्यादृष्टिभिरज्ञानैरन्यथा कृतवान् स्वयम्।।172।।
अथास्ति दक्षिणश्रेण्यां नाम्ना ज्योतिप्रभपुरम्।
विशुद्धकमलस्तत्र राजा मय महासुकृत्।।173।।
तस्मान्नन्दनमालायामुत्पन्ना वरकन्यका।
राजीवसरसी[35] नाम्ना पतिं प्राप्ता विभीषणम्।।174।।
अथ मन्दोदरीगर्भे सञ्जात इन्द्रजित्सुतः।
कियत्काले द्वितीयोऽभून्मेघवाहनसञ्ज्ञकः।।175।।
एकदा कुम्भकर्णेन लुण्टिताः धनदप्रजाः।
धनधान्यानि वस्त्राणि नीतानि विविधानि च।।176।।
अथ वैश्रवणः क्रुद्धो ज्ञात्वा तस्य विचेष्टितम्।
सुमालिनोऽन्तिकं दूतः प्रेषितस्तेन[36] गर्विणा।।177।।
प्रविवेश ततो द्वारं प्रतिहारनिवेदितः।
नत्वोचे भूपतिं दूतो वाक्याऽलङ्कारसञ्ज्ञकः।।178।।
समक्षं दशवक्रस्य सुमालिनमिति क्रमात्।
वदतीदं कुबेरः स भवन्तं कुरु चेतसि।।179।।
पण्डितोऽसि कुलीनोऽसि लोकज्ञोऽसि महानसि।
अकार्यसङ्गभीतोऽसि देशकोऽसि सुवर्त्मनः।।180।।
एवं विधस्य ते युक्तं कुर्वन्तं शिशुचापलम्।
प्रमत्तचेतसं पौत्रं निवारयितुमात्मनः[37] ।।181।।
शान्तिर्माली वधेनैव शेषस्यास्तु कुलस्य ते।
को हि स्वकुलनिर्मूलध्वंसहेतुक्रियां भजेत्।।182।।

कुपिते मयि शक्रे वा न तेऽस्ति शरणं भुवि।
जलबुद्बुदवद् वातादचिरादेव नश्यसि।।183।।
तच्छ्रुत्वा क्षोभमायातो दशानन इदं वदत्।
कोऽसौ वैश्रवणो नाम को चेन्द्रः परिभाष्यते।।184।।
अस्मद् गोत्रक्रमायाता नगरी येन गृह्यते।
इति निर्घाटितस्तेन दूतः कुक्करवत्तदा।।185।।
गत्वा वैश्रवणायै यमवस्थानेन वेदिता।
तच्छ्रुत्वा रणभेरीं च ताडिता तेन गर्वतः।।186।।
निर्गतः[38] श्रवणो योद्धुं यक्षयोधैस्ततोवृतः।
चतुर्विधेन दण्डेन संयुक्तः परिवर्गतः।।187।।
शत्रूणामागमं श्रुत्वा दशाननोऽपि निर्गतः।
राक्षसैर्वानरैः सार्द्धं समं च मयमन्त्रिभिः।।188।।
गुञ्जाख्यपर्वते रम्ये सेनयोरभवद्रणम्।
यक्षैर्भग्नं बलं दृष्ट्वा दशास्यो योद्धुमुद्यतः।।189।।
हतास्ते दशवक्रेण यक्षाः सर्वे पलायिताः।
तद्दृष्ट्वा धनदो राजा स्वयं योद्धुं समुद्यतः।।190।।
कियत्कालञ्च युद्धा सः दशास्यस्य पराक्रमम्।
दृष्ट्वाऽवोचत्कुबेरस्तं शृणु राजन् दशानन।।191।।
मातृष्वसृसुतोऽहं ते सोदरप्रीतिसङ्गतः।
ततो बन्धुषु नो युक्तं कर्तुं युद्धञ्च साम्प्रतम्।।192।।
चक्षुः पद्मपुटासंगं क्षणिकं तनुजीवितम्।
न वेत्सि किं यतः कर्म कुरुषे भोगकारणम्।।193।।
ततो हसन्नुवाचेदं दशास्यः करुणेप्सितः।
धर्मश्रवणकालोऽयं कुबेर वर्तते न हि।।194।।
मार्गे तिष्ठ कृपाणस्य किं व्यर्थं बहुभाषसे।
कुरु वा प्रणिपातं मे तृतीयाऽस्ति न ते गतिः।।195।।

ततो वैश्रवणो भूप उवाचेति दशाननम्।
नूनमायुस्तव स्वल्पं क्रूरं येनेति भाषते।।196।।
इत्युक्त्वाऽथ कुबेरेण भग्नं दशाननं धनुः।
ततोऽसौ दशवक्रेण हतो वज्रेण वक्षसि।।197।।
मूर्च्छां प्राप्तः सभृत्यैस्तु नीतो यक्षपुरं तदा।
तं दृष्ट्वा धनदा भूपाः कृत्वा पलायनङ्गताः।।198।।
दशास्योऽपि जयं प्राप्य स्वयंप्रभपुरङ्गतः।
तदा जय जयारावाः कृताः वानरराक्षसैः।।199।।
ततो वैश्रवणो वैद्यः सम्प्राप्तः पूर्ववत्तनु।
पुनर्जन्मेति मत्वा सः प्राप्तो वैराग्यसम्पदम्।।200।।
त्यक्त्वा परिग्रहं सर्वं दीक्षां जग्राह धीरधीः।
तपो घोरतरं तप्त्वा सम्प्राप्तः परमं पदम्।।201।।
अथ तस्य कुबेरस्य विमानं पुष्पकाभिधम्।
नानाशृङ्गारसंकीर्णं दशवक्रेण स्वीकृतम्।।202।।
तद्विमानं समारुह्य दशास्यो बन्धुभिः समम्।
निर्गतो दक्षिणस्यां तु जेतुं पुण्यप्रभावतः।।203।।
दक्षिणाशामशेषं स वशीकृत्वा ततोऽन्यतः।
विजयार्द्धमहीं[39] पश्यन् स वनाद्रिसमुद्रगाम्।।204।।
अथ जिनेन्द्रगेहानि स्पृशन्ति गगनङ्गणम्।
तानि दशाननो दृष्ट्वा पृच्छति स्म सुमालिनम्।।205।।
एतानि केन गेहानि कारितानि वद प्रभो।
नमः सिद्धेभ्य इत्युक्त्वा सुमाली वचनं वदत्।।206।।
चक्रिणा हरिषेणेन कारितानि सुभक्तितः।
कीदृशो हरिषेणः किं चरित्रं तस्य श्रूयताम्।।207।।
काम्पिल्यनगरे राजा सिंहध्वजोऽस्य वल्लभा।
वप्रा नाम्ना तयोः पुत्रो हरिषेणाभिधोऽभवत्।।208।।

वप्राऽन्यदा रथं जैनं कृत्वा भ्रामितुमिच्छति।
अष्टाह्निकमहोत्साहं कर्तुमर्हति भक्तितः॥209॥
नृपस्याऽन्या महालक्ष्मी देव्यस्ति धर्मवर्जिता।
सा वदत्यत्र मे पूर्वं रथो भ्राम्यति नाऽन्यथा॥210॥
तच्छ्रुत्वा रुदन्तीं वप्रां हरिषेणोऽवदत्परम्।
कस्माद्रोदसि हे मातः किमर्थं व्याकुलात्मका॥211॥
वप्राह शृणु भो पुत्र महालक्ष्मी तु वैरतः।
बह्मरथं तु मत्पूर्वं भ्राम्यतीति मया श्रुतम्॥212॥
पुत्रोऽहं तेन दुःखेन करोमि रोदनं परम्।
यदि जैनो रथः पूर्वं भ्रमिष्यति तदा त्वहम्॥213॥
भुक्तिविधिं करिष्यामि नो चेत्प्राणांस्त्यजाम्यहम्।
तच्छ्रुत्वा हरिषेणोऽपि चिन्तया व्याकुलोऽभवत्॥214॥
माताऽतो जनकोऽतश्च कञ्च दण्डं करोम्यहम्।
इत्युक्त्वा निर्गतो गेहाद् वनं प्राप्तो भयङ्करम्॥215॥
तत्र मूलफलादीनि भुक्त्वा भ्राम्यति दुःखतः।
अथ चम्पापुरे राजा शतमन्युर्महाबली॥216॥
नागवतीति भार्याऽस्य जनमेजयस्तयोः सुतः।
पुत्री च रूपभूषाख्या नाम्नाऽस्ति मदनावली॥217॥
जनमेजयाय पुत्राय दत्वा राज्यन्तु तापसः।
शतमन्युरभूत्यापि वनमेव च तिष्ठति॥218॥
रत्नपुरनरेन्द्रेण याचिता मदनावली।
न ददाति स्वसा यावत् क्रोधेन रुन्धितं पुरम्॥219॥
यावत्तेन समं युद्धं करोति जनमेजयः।
पूर्वं रचितया तावद्दूरङ्गतः सुरङ्गया॥220॥
नष्टा तु मदनावल्या समं नागवती सती।
शतमन्योर्मठं प्राप्ता ससुता तत्र तिष्ठति॥221॥

क्रमेण हरिषेणोऽपि तत्रागत्य समाश्रितः।
हरिषेणं तदा दृष्ट्वा मोहिता मदनावली।।222।।
ततस्तामन्यथाभूतां दृष्ट्वा नागवती जगौ।
किं करोसि सुते बाले स्मर वाक्यं महामुनेः।।223।।
पूर्वं ते मुनिना प्रोक्तं यथा त्वं चक्रवर्तिनः।
भविता वनितारत्नमिति सञ्ज्ञान चक्षुषा।।224।।
निवारिताऽप्यसौ मात्रा न मुञ्चति स्वचेष्टितम्।
तापसैस्तु तदा मूढैर्हरिषेणो निराकृतः।।225।।
कुमारो निर्गतस्तस्मात्संस्मरन्मदनावलीम्।
क्वचिन्न लभते स्वास्थ्यं[40] नदीवनपुरादिषु।।226।।
इति सञ्चिन्तयल्लब्धे स्त्रीरत्नं यदि नाम तत्।
तदा त्वहं करिष्यामि जिनगृहाः पदे पदे।।227।।
पर्यटन्स बहूदेशान् प्राप्तः सिन्धुनदं पुरम्।
तं दृष्ट्वा बहिरुद्याने मोहिताः पुरयोषिताः।।228।।
अथाऽञ्जनागिरिच्छायः प्रगलद्दाननिर्झरः।
आजगाम गजस्तासां स्त्रीणामभिमुखो बलात्।।229।।
ततस्ता वनिता भीताः कस्याऽपि शरणोज्झिताः।
शरणं हरिषेणस्य सम्प्राप्ताः प्राणरक्षिणः।।230।।
ततोऽसौ कृपयायुक्तो हरिषेण इदमवदत्।
रक्षामि चाऽधुना प्राणान् तासां पुरयोषिताम्।।231।।
भिक्षुकेषु तदा क्षान्तिः कृपया हि मया कृता।
गजस्तु परमो दुष्टो निवारयामि शक्तितः।।232।।
कथितं हरिषेणेन भो भो हस्तिपक शृणु।
त्वमन्येनैव मार्गेण चालय मदहस्तिनम्।।233।।
ततो हस्तिपकेनोक्तं कोऽन्यत्र दुष्टदन्तिनम्।
नेतुं शक्तो विना त्वां हि तस्मात्त्वं चालय द्विपम्।।234।।

तच्छ्रुत्वा हरिषेणोऽसौ स्त्रियः संस्थाप्य तत्रताः।
दृढपरिकरं बध्वा सम्प्राप्तो हस्तिसन्निधिम्।।235।।
अतस्ततः समापीड्य हस्तिनं मदगर्वितम्।
क्षणान्निर्मदनं कृत्वा स चाऽऽरूढो गजाधिपम्।।236।।
पुरमध्ये समागच्छन् बालक्रीडासमन्वितः।
गवाक्षस्थित नारीभिर्दृश्यमानो महाबली।।237।।
तदा सिन्धुनदेनाऽस्मै राज्ञा दत्ताः सुकन्यकाः।
शतसङ्ख्या सुरूपाद्या निश्चिता मुनिवाक्यतः।।238।।
सुप्तोऽस्ति स गृहे शैय्यां[41] संस्मरन्मदनावलीम्।
निद्रया घूर्णमानश्च शतस्त्रीभिः समावृतः।।239।।
अथ वेगवती नाम्ना कलागुणविशारदा।
खेचराधिपकन्यायाः सखी तमहरत्[42] क्षणात्।।240।।
ततो निद्राक्षये दृष्ट्वा ह्रियमानं स्वमम्बरे[43]।
पापे हरसि मां कस्मादिति व्याहृत्य कोपतः।।241।।
मुष्टिं बबंध तां हंतुं वज्रमुद्गरसन्निभाम्।
कुपितं तञ्च दृष्ट्वा सा भीतावददिदं मुदा।।242।।
भो मूढवत्करोषि त्वं गगने हन्तुमुद्यमम्।
यथा तरूपरिस्थित्वा मूलं छिन्नति मूढधीः।।243।।
सूर्योदयपुरं चाऽस्ति तत्र शक्रधरो नृपः।
धारी नाम्नाऽस्य भार्याऽस्ति जयचन्द्रा सुता तयोः।।244।।
पुरुषद्वेषिणी जाता पितृवाक्यापकारिणी।
पश्यति पुरुषं यं यं तं तं हनति पापिनी।।245।।
यो यस्तस्या मयालिख्य पट्टके दर्शितः पुरा।
भरतस्थो नरस्याशा नाऽपि[44] तस्या रुचिस्थितः।।246।।
ततो भवान्मया तस्याः दर्शितः पट्टकस्थितः।
गाढाकल्पकशल्येन शल्यिता चेदमब्रवीत्।।247।।

कामभोगो ममाऽनेन समं यदि न जायते।
मृत्युं ततः प्रपश्येऽहं न त्वाऽन्यमधमं नरम्।।248।।
प्रतिज्ञा च पुरस्तस्या मयेयं दुष्कराः कृता।
शोकमृत्युत्कटं दृष्ट्वा तद्गुणाकृष्टचित्तया।।249।।
यदि तं नानयेच्छीघ्रं त्वन्मानसमलीम्लुचम्।
ज्वालाजटालमग्नौ च प्रविश्यामि ततः सखि।।250।।
प्रतिज्ञायेति पुण्येन प्राप्तोऽतिमहती मया[45]।
त्वत्प्रसादात्करिष्यामि प्रतिज्ञां फलसङ्गताम्[46]।।251।
सूर्योदयपुरं चैषां प्राप्ता स च निवेदितः।
आनीतः शक्रभूपाय कन्यायै च मनोहरः।।252।।
ततः पाणिग्रहश्चक्रे तयोरद्भुतरूपयोः।
विस्मयापन्नचेतोभिः स्वजनैरभिनन्दितः[47]।।253।।
सम्पादितप्रतिज्ञा च प्राप्ता वेगवती परम्।
सन्मानं राजकन्याभ्यां प्रमदञ्च तथा यशः।।254।।
त्यक्त्वा नौ धरणीवासो गृहीतः पुरुषोऽनया।
कुपितौ चेति सञ्चिन्त्य तस्या मैथुनिकौ च तौ।।255।।
अवाञ्छतां रणं कर्तुं महासाधनसंयुतौ।
दूषितावापमानेन[48] गंगाधरमहीधरौ।।256।।
ततः शक्रधरः साकं सु[49] चापाख्येन सूनुना।
हरिषेणं जगादैवं करुणासक्तचेतसः।।257।।
तिष्ठ त्वमिह जामात रणं कर्तुं व्रजाम्यहम्।
त्वन्निमित्तं रिपू क्रुद्धावुद्धतौ दुःखकारिणौ।।258।।
स्मित्वा ततो जगादासौ परकार्येषु यो रतः।
कार्ये तस्य कथं स्वस्मिन्नोदासीन्यं भविष्यति।।259।।
कुरु माम् प्रसादं मे यच्छ स्वायुधशासनम्[50]।
भटं मत्सदृशं प्राप्य स्वयं किमिति युद्ध्यसे।।260।।[51]

ततोऽमङ्गलभीतेन वाञ्छाताप्यनिवारितः[52]।
श्वसुरेण कृता सङ्गमश्वैः पवनगामिभिः।।261।।
अस्त्रैर्नानाविधैः पूर्णं सूरिसारथिनेतृकम्।
वेष्टितं योधचक्रेण हरिषेणो रथं ययौ।।262।।
तस्य चाऽनुपदं जग्मुरश्वैर्नागैश्च खेचराः।
कृत्वा कलकलं तुङ्गं शत्रुमानसदुस्सहम्।।263।।
ततो महति सङ्गामे[53] सञ्जाते शूरधारिते।
भग्नं शक्रधरं सैन्यं दृष्ट्वा वा प्रेय उत्थितः।।264।।
ततो यया दिशा तस्य प्रावर्त्तत रथोत्तमः।
तस्यां नाऽश्वो न मातङ्गो न मनुष्यो रथो न च।।265।।
शरस्तेन समं युक्तैरराति बलमाहतम्।
जगाम क्वाप्यनालोक्य पृष्टं स्खलितजिह्वकम्।।266।
पृथुवेपथवः केचिदिदमूचुर्भयार्दिताः।
कृतं गङ्गाधरणेदं भूधरेण च दुर्म्मदम्।।267।।
अयं कोऽपि रणे भाति सूर्यवत्पुरुषोत्तमः।
करानिव शरान्मुञ्चत् सर्वाशासु समं बहून्।।268।।
ध्वंसमानं ततः सैन्यं दृष्ट्वा तेन महात्मना।
गतौ क्वापि भयग्रस्तौ गङ्गाधरमहीधरौ।।269।।
ततो जातेषु रत्नेषु तत्क्षणं सुकृतोदयात्।
दशमो हरिषेणोऽभूच्चक्रवर्ती महोदयः।।270।।
तथापि परया युक्तश्चक्रलाञ्छ[54]नया श्रिया।
रहितं मदनावल्यां स्वं स मेने तृणोपमम्।।271।।
ततः संवाहयन्प्राप्तो बलं द्वादशयोजनम्।
स तापस वनोद्देशं नमयन् सर्वविद्विषः।।272।।
ततः स तापसैर्भीतैर्विज्ञाय फलपाणिभिः।
दत्वाऽर्घः पूजितो वाक्यैराशीर्द्दानपुरस्सरैः।।273।।

शतमन्युश्च पुत्रेण जनमेजयेन धीमता।
तुष्ट्या नागवत्या च सा कन्याऽस्मै समर्पिता।।274।।
विधिना च ततो जातं तयोर्विवाहमङ्गलम्।
प्राप्य चैतां पुनर्जन्म प्राप्तं मेने[55] नृपोत्तमः।।275।।
ततः कांपिल्यमागत्य युक्तश्चक्रधरश्रिया।
द्वात्रिंशतां नरेन्द्राणां सहस्राणां समन्वितः।।276।।
शिरसा मुकुटन्यस्तमणिप्रकरभासिना[56]।
ननाम चरणौ मातुर्विनीतो रचिताञ्जलिः।।277।।
ततस्तं तद्विधं दृष्ट्वा पुत्रं वप्रा दशानन! ।
सम्भूता न स्वगात्रेषु तोषाश्रुव्याप्तलोचना।।278।।
ततो भ्रमयता तेन[57] सूर्यवर्णान्महारथान्।
कांपिल्यनगरे मातुः कृतं सफलमीप्सितम्।।279।।
श्रमणः श्रावकाणाञ्च जातः परमसम्पदः।
बहवश्च परिप्राप्ताः शासनं जिनदेशितम्।।280।।
तेनामीकारिता भान्ति नानावर्णा जिनालयाः।
भूपर्वतनदीसङ्गपुरग्रामादिषून्नताः ।।281।।
कृत्वा चिरमसौ राज्यं प्रव्रज्य सुमहात्मनः।
तपः कृत्वा परं प्राप्तस्त्रिलोकाऽग्र भुवं शिवम्।।282।।
चरितं हरिषेणस्य श्रुत्वा विस्मयमागतः।
कृत्वा जिनान्नमस्कारं दशास्यः प्रस्थितः पुनः।।283।।
अथ बलं दशास्यस्य प्राप्तं सम्मेदपर्वतम्।
रात्रौ तत्र[58] समासीनं गीतवाद्यादिपूरितम्।।284।।
तदैकश्च महोत्तुङ्गः सुलक्षणसमन्वितः।
त्रासयंश्च गजानश्वां गजाधीशः समागतः।।285।।
विद्याधराश्च तं दृष्ट्वा भीताः पलायनङ्गताः।
दशाननोऽथ तं दृष्ट्वा तुष्टश्चेतसि सम्मदः।।286।।

ततो विमानमुप्सित्वा बध्वा परिकरदृढम्।
शङ्खं तस्य पुरो दध्मौ शब्दापूरितविष्टपम्।।287।।
ततः शङ्खस्वनं श्रुत्वा भीतो हस्तिमच्च्युतः।
दशास्येनेति वेगेन धृतोऽसौ गजनायकः।।288।।
आरुह्य तं गजं राजा दशाननो महाबली।
समागतः सुसेनायां हर्षचित्तो बभूव सः।।289।।
ततो विद्याधरैः सर्वैः पूजितोऽसौ गजाधिपः।
त्रिलोकमण्डनं तस्य कृतं नाम नराधिपैः।।290।।
ततः सुखेन रात्रिस्तैर्नीता धर्मकथादिकैः।
प्रभातस्य क्रियां कृत्वा सभायां तेऽत्र संस्थिताः।।291।।
तावत् कस्यचिद्दूतेन विज्ञप्तोऽसौ दशाननः।
प्राग्दशमदिनाद्राजन् पातालनगरात्परम्।।292।।
स्वस्य गोत्रक्रमायातं किष्कुनगरमुत्तमम्।
सूर्ययक्षरजसौ तौ निर्गतौ नेतुमीप्सया।।293।।
ताभ्यां गत्वा कपिद्वीपो लुण्टितश्च बलात्तव।
तच्छ्रुत्वा यमागत्य युद्धञ्चक्रे सुदारुणम्।।294।।
यमेन वानरा वीराः मारिताः क्षणमात्रतः।
सर्वे नष्टा व्रणैर्युक्ताः रक्तधाराप्रवाहिनः।।295।।
ततो यक्षरजो राजा स्वयं युद्धति बुद्धिमान्।
सोऽपि यमेन संविद्धस्ततः सूर्यरजो बली।।296।।
उत्थितः कदनं कर्तुं सोऽपि यमेन ताडितः।
बाणेन प्राप्तः मूर्च्छां स नीतो भृत्यै स्वसैन्यकम्।।297।।
निर्गत्य वानरास्तस्मादागत्य मेखलावनम्।
तिष्ठन्ति तत्र ते सर्वे व्रणपीडितदेहकाः।।298।।
यमोऽपि जीवितान् कांश्चिद्धृत्वा गतोऽस्ति वा नरान्।
स्वस्य किष्कुपरं रम्यं पापरूपो महाबलः।।299।।

वैतरण्यादिशूलानि[59] यन्त्राश्च तेन निर्मिताः।
तान् पीडयति शस्त्रेषु किष्कूद्याने च वानरान्।।300।।
अहं शाखावली[60] नाम्ना भृत्यो वानरराक्षसाम्।
व्रणेन जर्ज्जरीभूतस्तस्मात् कृत्वा पलायनम्।।301।।
आगतः शरणं तेऽहं रक्ष राजन् दशानन।
तस्य वचनमाकर्ण्य व्रणादि रक्षणं कृतम्।।302।।
चतुर्विधेन दण्डेन वेगान्निर्गत्य धीरधीः।
प्राप्तः किष्कुपरं शीघ्रं[61] क्रोधयुक्तो दशाननः।।303।।
क्षिप्ताः सन्ति भटा येऽत्र शूलादिषु सजीवकाः।
कृपया दशवक्रेण मोचितास्ते क्षणात्ततः।।304।।
तच्छ्रुत्वा यमसेनानी साटोपो नाम वीर्यवान्।
आगतौ रणभूमौ स चतुर्बलेन संयुतः।।305।।
क्षणाद्विभीषणेनाऽसौ भङ्गं नीतो यमोपमः।
एतच्छ्रुत्वा यमः पापी स्वयं योद्धुं समागतः।।306।।
क्षणाद्यमेन नीतोऽसौ भङ्गं राजा विभीषणः।
तं दृष्ट्वा दशवक्रोऽपि स्वयं योद्धुं समुद्यतः।।307।।
ततस्तौ यमसाटोपौ सनह्य युद्धतः पुनः।
दशास्यस्य ततो बाणैः सेनानी मृत्युताङ्गतः।।308।।
साटोपे मरणं प्राप्ते यमस्य सकलं बलम्।
व्याकुलितं हतं तेन दशाननेन कोपिना।।309।।
तं दृष्ट्वाऽथ यमो भीतो गतोऽसौ रथनूपुरम्।
स्वबन्धुपरिवर्गेण धृत्वा प्राणांश्च किष्कुतः।।310।।
यमो वदति भो शक्र दशास्यो हि महाबली।
मारितो धनदो येन तस्य गेहं पलायितः।।311।।
एतच्छ्रुत्वा रणं कर्तुं क्रोद्धतः शक्रउद्यतः।
मन्त्रिभिर्वारितस्तत्र कालज्ञाननिवेदिभिः[62]।।312।।

यमोऽपि मातुलप्रीत्या स्थापितो मुखरोद्गते।
पुरे शक्रेण जामात्रा भयं मा कुरु वादिना[63] ।।313।।

इन्द्रोऽपि स्वगृहं गत्वा सुभोगैः सह तिष्ठति।
बहुनारीभिः[64] सन्तृप्तौ[65] विस्मृतं शत्रुवर्द्धनम् ।।314।।

अथ किष्कुपुरे राज्ये लघु यक्षरजो महान्।
स्थापितो दशवक्रेण पूर्वस्नेहेन वंशिना ।।315।।

तथा संगृह्य किष्कन्धं पुरं सङ्ग्रामभूमिषु।
सूर्यरजो नृपो राज्ये स्थापितस्तेन धीमता ।।316।।

स्वस्य गोत्रक्रमायातं पुरं प्राप्य सुखेन तौ।
स्थितौ धर्मकथायुक्तौ निमग्नौ भोगसागरे ।।317।।

यत्र कुत्र स्थिताः सर्वे वानरास्तत्र चागताः।
दशाननसहायेन सुखिनः कपयोऽभवन् ।।318।।

अथ दशाननो राजा बन्धुवर्गसमन्वितः।
लङ्कापुरं प्रविवेश स्वस्वमालयमाश्रिताः ।।319।।

स्वयंप्रभपुरे केचित् केचित्पुष्पान्तिके पुरे।
पातालनगरे केचित् संस्थिता राक्षसा मुदा ।।320।।

नारीभिर्बहुभिः सार्द्धं बहुभोगान्निरन्तरम्।
भुक्ता ते तत्र लङ्कायां स्थिता दशाननादयः ।।321।।

धर्म[66]प्रभावेन भवन्ति सम्पदो
मोक्षस्य सौख्यानि भवन्ति धर्मात्।
जीवन्ति धर्माद्रिणमूर्द्धिमानवा
स्तस्मात्सदा साधय धर्म्मसाधनम् ।।322।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
दशाननलङ्काप्रवेशवर्णनो नाम पञ्चमोऽधिकारः ।।5।।

❖❖❖

1. देवेन इति ग प्रतौ
2. मालीशौ इति क/ख प्रतौ
3. आगच्छतञ्च इति क प्रतौ
4. स्वर्गाभै इति ख प्रतौ
   स्वर्गाभे इति ग प्रतौ
5. नादि इति क/ग प्रतौ
6. परम इति क/ख प्रतौ
7. प्रणीतवान् इति ख प्रतौ
8. सुस्नानादि इति ख/ग प्रतौ
9. दृष्ट्वा जागर्तिता इति ग प्रतौ
10. गर्भस्थो प्रथमो देवा इति ग प्रतौ
11. यत्र यत्र भयङ्कर: इति ग प्रतौ
12. साधयन्तीति मेव च इति ग प्रतौ
13. बालक्रीडापि तेमाभूत्तेषां इति ग प्रतौ, भीमाभूत्तेषां प.पु. 7/227
14. विभीषणे इति ख प्रतौ,विभीषण: इति ग प्रतौ
15. बोधे भो इति ख प्रतौ, बोधि ते इति ग प्रतौ
16. व इति ख प्रतौ
17. नभ: सञ्चाचारिणी काम अणिमा लघिमा क्षोभ्या इति क प्रतौ
18. शुभध्याना इति ग प्रतौ
19. दहनी इति क/ख प्रतौ
20. समाकृष्टारदर्शन्यजरामरा इति ग प्रतौ
21. पित्तोद्भवकरी इति ग प्रतौ
22. संवृद्धिः लंभिनी इति ग प्रतौ
23. मेरुशृङ्गनिभाऽयं इति क प्रतौ, मेरुशृङ्गसमच्छ्राय प. पु. 7/337
24. सूर्यराज्यामक्षरजस्तथा इति ग प्रतौ
25. वर्द्धापिता पुन: इति ग प्रतौ
26. अस्य श्लोकस्य त्रिश्लोकानन्तरं पुनरावृत्तिः।

27. मालिनोतः इति क/ख प्रतौ
28. चारुर्दात्वम् इति ख प्रतौ
29. सुरसङ्गीतकं इति त्रयौ प्रतौ, असुरसङ्गीतकं इति स्यात्।
30. बालेऽयं इति ख/ग प्रतौ
31. मरुद्वक्रो इति ख प्रतौ
32. कृतीति इति क प्रतौ
33. पितृसा इति ग प्रतौ
34. अभवत् इति ख प्रतौ
35. राजीवशरसी इति क प्रतौ, राज्ञा व सुरसी इति ग प्रतौ
36. प्रेष्यतस्तेनं इति क प्रतौ
37. चापलम् इति ग प्रतौ
38. निरैद्वै - इति क/ग प्रतौ
39. विजयार्धमहीं इति ग प्रतौ
40. स्वास्त्र्रं इति क प्रतौ
41. पर्यां इति ख/ग प्रतौ
42. अहरन् इति ग प्रतौ
43. स्वयंवरे इति ग प्रतौ
44. भरतस्थो नरः सः स नापि तस्या रुचौ स्थितः इति क/ख प्रतौ
45. प्राप्नाति इति ख प्रतौ, सर्वार्णि प्रापतिर्मया इति ग प्रतौ
46. फलसङ्गतम् इति ख प्रतौ, फलसम्मितः इति ग प्रतौ
47. निन्दितः इति ख प्रतौ
48. हषिता वैमानैन इति क प्रतौ, दूषिताचाऽपमानेन इति ग प्रतौ
49. सुत्वा इति क प्रतौ, स्तुत्वा इति ख प्रतौ
50. पश्य युद्धाय शासनम् इति ग प्रतौ, यच्छ युद्धाय शासनम् प. पु. 8/378
51. कुरु पूज्य प्रसादं मे यच्छ युद्धाय शासनं।
    भृत्यं मत्सदृशं प्राप्य स्वयं किमिति युद्ध्यसे ।।260।। इति क प्रतौ पृष्ठस्याधो भागे लिखितम्।
52. वाञ्छिताऽपिनिवारितः इति ग प्रतौ

53. हतति सङ्ग्रामे संयाते इति ग प्रतौ
54. कलांब इति ग प्रतौ
55. मेते इति ग प्रतौ
56. मणिप्रकरभासुरा इति ग प्रतौ
57. भ्रमयतानेन इति क/ख प्रतौ
58. तत्रो तन्न इति ग प्रतौ
59. मूलानि इति ख प्रतौ
60. माखाबल इति ख प्रतौ
61. रम्यं इति ख प्रतौ
62. निवेदतिः इति ख/ग प्रतौ
63. वादिनी इति ग प्रतौ
64. बहुनारिष्व इति ख/ग प्रतौ
65. संतृष्णो इति क/ख प्रतौ
66. स्थिति इति ग प्रतौ

❖❖❖

षष्ठोऽधिकारः

(रावणस्य दिग्विजयः)

सूर्यरजो नृपस्याऽस्य भार्येन्दु[1]मालिनी परा।
बालि[2]सञ्ज्ञस्तयोः पुत्रो जातः परमधार्मिकः।।1।।

द्व्यर्द्धद्वीपं क्षणाद्बालिस्त्रिःपरीत्य समागमत्।
किष्किन्धनगरं रम्यं महासामर्थ्ययोगतः।।2।।

अनुक्रमाच्च तस्याऽभूत्सुग्रीवाभिख्ययाऽनुजः।
ततः क्रमात्परा कन्या सञ्जाता श्रीप्रभाकया।।3।।

किष्कुपुरेऽथ सञ्जातौ नलनीलाऽभिधानकौ।
तनयौ हरिकान्तायां यक्षरजो नृपस्य च।।4।।

साम्राज्यं बालये दत्वा धर्मी सूर्यरजो नृपः।
पिहिताश्रवयोगीन्द्रपार्श्वे मुनिरभूत्तदा।।5।।

अथ बालिर्महाभोगी धृतया भार्यया समम्।
तिष्ठति शतनारीभिः सेव्यमानो महासुखी।।6।।

अथ रत्नपुरेशस्य प्रवरस्य शुभां सुताम्।
परीणेतुं गतो यावद्दशास्यस्तावदत्र तु।।7।।

लङ्कायां तस्य भगिन्यस्ति चन्द्रनखाभिधा शुभा।
हरित स्म च तं दृष्ट्वा भूपतिः खरदूषणः।।8।।

तां मोचितुं हि शक्तौ[3] न कुम्भकर्णविभीषणौ।
दशास्य आगतस्तावच्छ्रुतवान् पूर्वजां कथाम्।।9।।

आगमश्रमयुक्तोऽपि निर्गतो वेगतः पुनः।
तदा मन्दोदरी धृत्वा पादौ व्यज्ञपयत्परम्[4]।।10।।

अत्राऽलङ्कारपत्ने स्यात् चन्द्रोदरोऽभवन्नृपः।
वनिताऽस्याऽनुराधाख्या सा गर्भिण्ये कदाऽभवत्।।11।।

विजयार्द्धनगे भूपो मेघप्रभशरीरजः।
खरदूषणनामाऽभूत्तेन चन्द्रोदरो हतः।।12।।

अलङ्कारपुरं तेन गृहीतं धनगर्विणा।
दुःखीभूताऽनुराधा सा रत्नाभपर्वतङ्गता।।13।।
तत्राऽसूत वरं पुत्रं विराधिताख्यं धर्मिणः।
विराधितः कुमारः स प्रबुद्धोऽभूत्फलादिकैः।।14।।
विद्यां साधयत्येकाकी भ्रमति स्थानवर्जितः।
तस्मात्त्वं शृणु दशास्य खरदूषणभूभृता।।15।।
नीता चन्द्रनखा बाला वरं जातं शृणु प्रभो।
परस्मायेव[5] दीयन्ते कन्यानामीदृशी गतिः।।16।।
चतुर्दशसहस्राणां विद्याभृतां प्रभुस्त्वयम्।
निष्पन्नो बहुविद्याभिर्भोगी रूपी सुखी बली।।17।।
त्वं युष्मदनयोर्युद्धे संशयोपि भविष्यति।
कन्यां हरणदोषेण नाऽन्यः कोऽपि वरिष्यति[6]।।18।।
अन्यस्मिन् भवता युद्धे सहायोऽयं भविष्यति।
इत्यादि बहुधावाक्यैर्बोधितोऽसौ दशाननः।।19।।
ततो दशाननोऽवादीत्प्रिये युद्धाद्बिभेमि न।
स्थितस्त्वद्वचने किं तु शेषैरेवाऽस्मि[7] कारणम्।।20।।
प्रतिकूलमथ ज्ञात्वा बालिं जातं दशाननः।
प्रेषयामास दूतं हि तं प्रति मतिसागरम्।।21।।
दूतो गत्वाशु तं प्रोचे शृणु बालिनरेश्वर।
आज्ञापयति दशास्यो मित्राचारेण बुद्धिमान्।।22।।
आवयोश्च बहुप्रीतिश्चिरकालप्रवर्तिनी।
ततोऽत्र त्वं सभाऽऽगच्छ पादौ मे प्रणतिं कुरु।।23।।
श्रीप्रभां भगिनीं देहि मे मद्राज्ये सुखी भव।
इत्युक्ते क्रोधसञ्जातो बालिराजो महाबली।।24।।
कोऽसौ दशाननो नाम काऽसौ राक्षससन्ततिः।
इत्युक्त्वा मारितुं दूतं रब्धं[8] तावद् गतश्वसः।।25।।

कथितं दशवक्त्राय दूतेन वेगशालिना।
तदा चतुर्बलोपेतो निर्गतोऽसौ दशाननः।।26।।
दशास्यागमं श्रुत्वा बालिराजोऽपि निर्गतः।
तदा सागरवृद्ध्यादिमन्त्रिभिः परिवर्जितः।।27।।
किं देवाऽनेन पापेन व्यर्थं जीवस्य मारणम्।
दशास्येन समं प्रीतिरस्माकञ्च परम्परा।।28।।
बालिना दशवक्त्रेण समं युद्धे कृते सति।
बलीत्वमपि जीवानां भूरिनाशो भवेत्ततः।।29।।
इति श्रुत्वा स वैराग्यात् सुग्रीवाय नृपश्रियम्।
दत्वा गगनचन्द्रस्य पार्श्वे बालिरभून्मुनिः।।30।।
अत्यन्ततपसा युक्तः श्रुताऽब्धिपारलब्धकः।
व्यवहरति देशां स बहूनैकोऽपि धर्म्मधीः।।31।।
दशवक्त्राय सुग्रीवो वितीर्य श्रीप्रभां सुखी।
चकारानुमतस्तस्य राज्यमागतमन्वयात्।।32।।
विद्याधरकुमार्यो या याश्च भूमौ मनोहराः।
दशाननः समस्तास्ताः परीणिन्ये पराक्रमात्।।33।।
नित्यालोकपुरे चाथ नित्यालोकस्य वल्लभा।
श्रीदेवीति तयोर्जाता नाम्ना रत्नावली सुता।।34।।
तामेकदा परीणित्वा लङ्कां प्रति स गच्छति।
विमानं स्तम्भितं मार्गे दृष्ट्वा दशाननोऽवदत्।।35।।
केन मे स्तम्भितं यानं पश्य मारीच वेगतः।
इत्युक्ते सोऽप्यधो पश्यन् कैलाशपर्वतं वरम्।।36।।
तत्र शिलाप्रदेशस्थं मुनिं मोक्षाऽभिलाषिणम्।
दृष्ट्वा सम्प्राह मारीचः पश्य राजन् दशानन।।37।।
कीदृशोऽयं मुनिर्योगी ध्यानी मौनी दिगम्बरः।
अस्य महात्मतो यानं स्तम्भितं गगनाङ्गणे।।38।।

दशानन[9]स्तदाप्राह पश्याम्येनं महामुनिम् ।
इत्युक्तोऽवतरितो भूमौ यत्र बालिमुनीश्वरः ।।39।।

दशाननोऽथ तं दृष्ट्वा बालिं ज्ञात्वा स्ववैरिणम् ।
क्रुद्धो दुष्टस्ततः प्राह दुष्टवाक्यमिदं मुनिम् ।।40।।

रे मुने कुत्र ते ध्यानं कुक्रोधभारधारणम् ।
मुनित्वेऽपि मया सार्द्धं न त्यक्तं वैरकारणम् ।।41।।

त्वं पाखण्डी महापापी करोमि तव निग्रहम् ।
त्वां कैलाशेन संयुक्तं क्षिपाम्यब्धौ दुरात्मनम् ।।42।।

विद्याबलेन चेत्युक्त्वा धृत्वा रूपं सुरेन्द्रजम् ।
प्रविष्टः पर्वतं भित्वा पातालं पातकोद्यतः ।।43।।

उद्वर्तुं नगमारेभे लक्षहस्तैर्दशाननः ।
कलकलो महान् जातस्तदाऽतीवभयङ्करः ।।44।।

मृगजातिस्तदा भीता भीताश्च सिंहसारभाः ।
गता लता द्रुमा भग्ना त्रुटिता जलनिर्जराः ।।45।।

कम्पिता जिनगेहाश्च देववृन्दैः प्रपूजिताः ।
पक्षिणां निवहा नष्टा गता दूरं सुरा अपि ।।46।।

ज्ञानेन मुनिना ज्ञातो वृतान्तो रक्षसस्ततः[10] ।
मुनिः प्राह किमारब्धं स्वचित्तेऽनेन पापिना ।।47।।

कारिता भरतेनात्र जिनगेहा महोन्नताः ।
नश्यन्ति तांश्च रक्ष्यामि पुण्योपार्जनहेतुकान् ।।48।।

ध्यात्वाऽतिपीडितस्तेन पादाङ्गुष्ठेन पर्वतः ।
तदाऽतिभारक्रान्तेन पीडितोऽसौ दशाननः ।।49।।

भग्नपृष्टीकटीग्रीवाजानुजंघौकरौभुजौ ।
बभूव संकुचं गात्रं कूर्म्माकारो दशाननः ।।50।।

खञ्च सर्वकष्टेन कृत्वा रावितवान् जगत् ।
यतस्ततो गतः पश्चाद्रावणाख्यां समस्ततः ।।51।।

वनितास्तस्य चाकर्ण्य रोदनं चित्तविह्वला।
आगत्य पतिता पादौ मुनेश्च ध्यानधारिणः।।52।।
भो नाथ देहि चाऽस्मद्भ्यो भर्तुर्दानं[11] मनोहरम्।
ततोऽनुकम्पयाऽगुष्ठं महामुनिरश्लथत्।।53।।
पञ्चाश्चर्यं तदा जातं नभसो देवतागणात्।
रावणोऽपि तदागत्य मुनिपादौ प्रणीतवान्।।54।।
भक्त्या कृत्वा नमस्कारं बहुस्तोत्रैः स्तुतो यतिः।
क्षमयित्वा मुनीन्द्रं तं नतः पादौ पुनः पुनः।।55।।
उपकण्ठं मुनेश्चैत्यभवनं त्रपयाऽन्वितः।
विरक्तो विषयासङ्गे प्रविष्टः केकसी सुतः।।56।।
अनादरेण विक्षिप्य चन्द्रहासमसिं भुवि।
आवृत्तो निजनारीभिश्चक्रे जिनवराऽर्चनम्।।57।।
निकृष्य तरसा तन्त्री[12] भुजे वीणामवीवदत्।
जिनगीतं समारब्धं महागुणसमन्वितम्।।58।।
चतुर्विंशतितीर्थेशान् धर्मचक्रप्रवर्त्तिनाम्।
दशास्यो गीतवान् गीतं नारीभिर्नर्तनं कृतम्।।59।।
तत आसनकम्पेन धरणेन्द्रोऽवधिलोचनः[13]।
गानं श्रोतुं सुसंवाञ्छन् जिनगेहं समागतः।।60।।
पूजां कृत्वा जिनेन्द्रस्य गीतं श्रुत्वा च तुष्टवान्।
जगाद रावणं वाचां धन्योऽसि जिनभक्तिभाक्।।61।।
तव गीतेन तुष्टोऽहमागतो धरणीतलात्।
वरं वृणिष्व[14] दशास्य दास्यामि शीघ्रमीप्सितम्।।62।।
दशाननस्ततः प्राह जिनस्तोत्रात्किमुत्तमम्।
वरं ददासि नागेन्द्र तदहं याचयामि ते।।63।।
धरणीन्द्रः पुनः प्राह सत्यमुक्तं त्वया नृप।
मुक्तिकरं जिनस्तोत्रं स्वर्गसाध्ये किमद्भुतम्।।64।।

तथापि दर्शनं मेऽत्र क्वचिन्न निष्फलं भवेत्।
तस्माद्ददामि शक्तिं ते गृहाण भो दशानन।।65।।
शक्तिबाणमिदं दृष्ट्वा नश्यन्ति देवदानवाः।
मनुष्यास्तु कियन्मात्रा वराका दीनचेतसः।।66।।
इत्युक्त्वा दशवक्राय दत्वा बाणं धराधिपः।
जिनं नत्वा मुनिं स्तुत्वा गतोऽसौ निजमालयम्।।67।।
मासमात्रं दशास्योऽपि स्थित्वा कैलाशमूर्द्धनि।
मुनिपादौ पुनर्नत्वा प्रायश्चित्तं गृहीतवान्।।68।।
ततः स्वपरिवर्गेण चतुर्बलेन संयुतः।
लङ्कापुरं समायातः सुखी तत्र सदाऽभवत्।।69।।
अथ ध्यानेन शुक्लेन कर्माऽरण्यं[15] तु भस्मितम्।
बालिमुनिस्ततः प्राप्तः शिवस्थानं निरञ्जनम्।।70।।
ज्योतिपुरेऽथ राजाऽस्ति नाम्ना वह्निशिखो बली।
ह्रीदेवी वल्लभा तस्य सुताराख्या सुता तयोः।।71।।
तथा चक्रपुरे चक्राङ्कानुमत्योः सुतः परः।
साहसगतिरित्याख्यः स तां याचति कन्यकाम्।।72।।
सुग्रीवोऽपि सुतारां तां प्रार्थयति पुनः पुनः।
वह्निशिखेन भूपेन पृष्टो योगीनिमित्तकम्।।73।।
मुनिः प्राह शृणु राजन् यः साहसगतिर्नृपः।
नास्ति स तु चिरञ्जीवी सुग्रीवो बहुजीविकः।।74।।
मुनिर्वाक्यं ततो ज्ञात्वा नियतममृतोपमम्।
सुग्रीवाय सुता दत्ता कृत्वा विवाहमङ्गलम्।।75।।
ततः क्रमात्तयोः पुत्रौ जातौ रूपमनोहरौ।
अङ्गाऽङ्गदौ च नामानौ विद्यागुणैर्विभूषितौ।।76।।
अद्याऽपि नैव निर्लज्जश्चक्राङ्कस्य शरीरजः।
परित्यजति तत्राशां धिङ्मनो भवदूषिताम्।।77।।

केनोपायेन तां कन्यां लप्स्ये निर्वृतिदायिनीम्।
भविष्यामि कदा सौखीं[16] नानाभोगैस्तया समम्।।78।।
इति सञ्चिन्त्यमानोऽसौ देशांश्च विहरंस्ततः।
सस्मार शेमुषीविद्यामाकृतेः परिवर्तिनीम्।।79।।
हिमवन्तं ततो गत्वा गुहामाश्रित्य दुर्गमाम्।
आराधयितुमारेभे दुःखितः प्रियमित्रवत्।।80।।
अत्रान्तरे विनिष्क्रान्तो दिशा[17]जेतुं दशाननः।
बभ्राम धरणीं पश्यन् गिरिकान्तारभूषिताम्।।81।।
जित्वा विद्याधराधीशान् द्वीपान्तरगतान् प्रभून्।
भूयो न्ययोजयत् स्वेषु राष्ट्रेषु पृथुशासनः।।82।।
वशीकृतेषु तस्यासीत् खगसिंहेषु मानसम्।
पुत्रेष्विव महोत्साहास्तुष्यत्यानतिमात्रतः[18]।।83।।
रक्षसामन्वये योऽभूद्यो वा शाखामृगाऽन्वये।
उद्धतः खेचराधीशः सर्वं तं वशमानयत्।।84।।
सन्ध्याकाराः सुवेलाश्च हेमापूर्णाश्च योधनाः।
हंसद्वीपा वराल्हादा इत्याद्याश्च जिता नृपाः[19]।।85।।
गृहीत्वा प्राभृतान् गत्वा नेमुस्ते मूर्द्धिपाणयः।
आश्वासिताः सुवाणीभिस्तथाऽवस्थितसम्पदः।।86।।
श्रिता येऽपि सुदुर्गाणि स्थानान्यम्बरगाधिपाः।
नमितास्तेऽपि तत्पादौ शोभनैः पूर्वकर्मभिः।।87।।
अथेन्द्रजितये गन्तुं प्रवृत्तेनाऽमुना स्मृतः।
स्वसाऽत्यन्तघनस्नेहात्पारम्पर्याच्च तत्पतिः[20]।।88।।
प्रस्थितः स च तं देशं श्रुतः स्वस्रा[21] समुत्कया।
प्राप्तः स्थितः समासन्ने देशे प्रीतिसमुत्कटः।।89।।
ततश्च रमयामादौ क्षपायां शयितः सुखम्।
कैकसेज्या पुरप्रीत्या[22] बोधितः खरदूषणः।।90।।

ततो निर्गत्य तेनाऽसावलङ्कारोदयात्पुरात् ।
दशवक्त्रो महाभक्त्या पूजितः परमोत्सवैः ।।91 ।।
रावणोऽपि लघुस्वसुः प्रीत्या चक्रेऽस्य पूजनम् ।
प्रायो हि सोदरस्नेहात्परः स्नेहो न विद्यते ।।92 ।।
चतुर्दशसहस्राणि कामरूपविकारिणाम्[23] ।
दर्शितानि दशास्याय तेन व्योमविचारिणाम्[24] ।।93 ।।
दूषणाख्यस्य सेनायाः पतिरात्मसमं कृतः ।
सूरो गुणसमाकृष्टः सर्वसामन्तमानसः ।।94 ।।
हिंडाबो हैहिडो डिम्बो विकटस्त्रिजटो हयः ।[25]
माकोटः सुजटः टङ्कः किष्किन्धाऽधिपतिस्तथा ।।95 ।।
एवमाद्यैः खगाधीशैर्राजपुत्रैः समन्वितः ।
एकसहस्रसंक्षोण्या विहायस्तलचारिणाम् ।।96 ।।
सहश्रैकसुरैर्सेव्यं चक्ररत्नपुरस्सरम् ।
आरूढः पुष्पकाख्यं तद्विमानं स दशाननः ।।97 ।।
इन्द्रजिन्मेघनादश्च कुम्भकर्णो विभीषणः ।
खरदूषणभूपाद्या गच्छन्ति ते स्वलीलया ।।98 ।।
प्राप्ता क्रमेण विन्ध्याद्रौ[26] सुर्नदी नर्मदातटम् ।
सन्ध्यायाः समये तत्र स्थापितं बलमुत्तमम् ।।99 ।।
सुखेन तत्र त्रियामा नीता धर्मकथादिभिः ।
प्रभातसमये नद्यां खेलन्ति प्रमदाऽन्विताः ।।100 ।।
नदीतटस्थधूलीभि रचिते भूमिबन्धने ।
पूजां करोति जैनेन्द्रीं रावणः परिभक्तितः ।।101 ।।
अथ नदीतटे पत्नं माहिष्मत्यभिधानकम् ।
तत्र सहस्ररश्म्याख्यो राजा परमधार्मिकः ।।102 ।।
तेन राज्ञोपभोगेन बन्धिता नर्मदा नदी ।
तत्र सहस्रनारीभिः सोऽपि क्रीडति लीलया ।।103 ।।

क्रीडां कृत्वा नदीबंधो मोचितस्तेन भूभृता।
अकस्मादथ पूरेण हता पूजा समन्ततः।।104।।
क्षिप्रं दशाननो नष्टो गृहित्वा प्रतियातनाम्[27]।
क्रुद्धो जगाद किन्त्वेतदिति चाज्ञापयन्नरान्[28]।।105।।
ततोऽनुसृत्य वेगेन नरैः प्रतिनिवृत्य च।
निवेदितमिदं नाथ कोऽप्ययं पुरुषो महान्।।106।।
नारीनां वृन्दमध्यस्थः करोति जलक्रीडनम्।
दूरस्थेन नृलोकेन वेष्टितः खड्गधारिणा।।107।।
महारूपी गुणाधार इन्द्रवद्दृश्यते स्वयम्।
तेनाऽयं मोचितो बन्धो महाकौतुककारिणा।।108।।
एतच्छ्रुत्वा महाक्रोधी द्रुतमाज्ञापयन्नृपान्।
त्वरितं गृह्यतामेनं दुष्टमिति दशाननः।।109।।
दत्वा चाऽऽज्ञां पुनश्चक्रे पूजां रोधसि सत्तमाम्।
रत्नकाञ्चननिर्माणैः पुष्पैर्जिनवराकृतौ।।110।।
शेषामिव[29] दशास्याज्ञां कृत्वा शिरसि संभ्रभात्।
अधिमित्रं सुसन्नद्धाः प्रशश्रुर्व्योमगाधिपाः[30]।।111।
दृष्ट्वा परबलं प्राप्तं सहस्रकिरणः क्षणात्।
क्षुब्धः दत्वा भयं स्त्रीणां निर्जगाम जलाशयात्।।112।।
उभयोः सेनयोस्तत्र युद्धं जातं समस्तलम्।
मारितं रक्षसां सैन्यं सहस्ररश्मिना तदा।।113।।
दशाननोऽथ तच्छ्रुत्वा स्वयं योद्धुं च निर्गतः।
तदाऽस्य दशवक्रस्य सहस्रकिरणस्य च।।114।।
परस्परं महायुद्धं सञ्जातं प्राणिनाशकम्।
सहस्ररश्मिना क्रोधाद्धतो भाले दशाननः।।115।।
तन्निवार्य दशास्येन बहुबाणैः सबिन्धितः।
पतितः प्राप्य सम्मूर्च्छां सहस्रकिरणो भुवि।।116।।

तदोत्पत्य दशास्येन गृहितो नागबन्धनैः।
नीतः सहस्ररश्मी स आत्मदम्भे विधेर्वशात्[31]॥117॥

पिता बाहुरथः श्रुत्वा बद्धं पुत्रं निरम्बरः।
जंघचारणलब्धीशो महायोगी महातपाः॥118॥

आगतः पुत्रमोक्षार्थं यत्राऽस्ति स दशाननः।
दशाननेन तं दृष्ट्वा तत्पादौ तत्र वन्दितौ॥119॥

दत्तं सिंहासनं रम्यमुपविष्टो मुनिस्ततः।
सम्पूज्य चरणौ तस्य पुनराह दशाननः॥120॥

किमर्थं भो मुने नाथ यूयं प्राप्ता ममान्तिकम्।
स प्राह धर्मवृद्धिं ते संदातुमागता वयम्॥121॥

त्वं पुण्यात्मा त्रिखण्डेशो जैनधर्मप्रभावकः।
मुनीनां सेवको धर्मी नाऽस्ति तव समो भुवि॥122॥

वाक्यैस्तमिति सन्तोष्य पुनराह दिगम्बरः।
पराभिभवमात्रेण क्षत्रियाणां कृतार्थता॥123॥

सहस्रकिरणं मुञ्च ततो बन्धान्ममाऽङ्गजाम्।
अजाननं नरं कोऽपि रुष्यति नैव भूतले॥124॥

दशास्यः प्राह संजेतुं शक्रमहं तु निर्गतः।
भोगेभ्यो यदि भीतोऽत्र तत्तत्र गम्यते कथम्[32]॥125॥

तस्माद् वशीकृतस्त्वत्तुक्[33] मोचामि गुरुवाक्यतः।
मन्त्रिवर्गैः सहालोक्य मुक्तस्तेनाऽत्र तत्सुतः॥126॥

तातस्य चरणौ नत्वा चोपविष्टा महीतले।
मानीतोऽसौ दशास्येन बन्धुबुद्धया च धीमता॥127॥

तथापि रागनिर्मुक्तो जग्राह पितुरन्तिके।
दीक्षां जैनेश्वरीं धर्मी सहस्रकिरणो महान्॥128॥

दीक्षाग्रहणवेलायां प्रेषितस्तेन दूतकः।
अनरण्याय मित्रायाऽयोध्यायाञ्च निवेदितुम॥129॥

गत्वा दूतेन सम्प्रोक्तमनरण्याय भूभृते ।
दशाननस्य सम्बन्धात् सहस्ररश्मिदीक्षितम् ।।130।।

तच्छ्रुत्वा च क्षणं शोकं कृत्वा बुद्धोऽनरण्यकः ।
दशरथाय पुत्राय राज्यं दत्वाऽभवद्यतिः ।।131।।

अथ दशाननो राजा यान् यान्मानवतो नृपान् ।
शृणोति धरणीयांस्तान् तांस्तान्सर्वाननीनमत् ।।132।।

वशीकृतैश्च सन्मानं प्रापितैर्वेष्टितो नृपैः ।
पश्यन् स्फीतपुरामूर्वीं सुभौमश्चक्रभृद्यथा ।।133।।

नानादेशसमुत्पन्नैर्नानाकारैर्नृपैर्वृतः ।
नानावेषधरैर्नानाभाषैर्विविधवाहनैः ।।134।।

कारयन् जीर्णचैत्यानां संस्कारां परमांस्तथा ।
गेहान् देवाधिदेवानां जिनेन्द्राणां मनोहरान् ।।135।।

ध्वंसयन् जिनविद्वेषकारिणः खलमानवान् ।
दुर्विधान् करुणायुक्तो धनेन परिपूरयन् ।।136।।

सम्यग्दर्शनसंशुद्धान् पूजयंस्तेषु वत्सलः ।
प्रणमन् श्रमणान् भक्त्या जिनदीक्षाश्रितान्यपि ।।137।।

उदीच्यां प्रस्थितः काष्ठां प्रतापं दुःसहं किरन् ।
उत्तराणे[34] यथा भानौ पुण्यकर्माऽनुभावतः ।।138।।

प्राप्तः क्रमेण दशास्यो राजगृहपुरं वरम् ।
तत्र मरुन्मुखो राजा करोति यज्ञकं कुधी ।।139।।

प्रेषितो दशवक्रेण स्वाऽऽगमं कथितं च तम् ।
दूतो गत्वा समागत्य रावणाय ब्रुवन्निदम् ।।140।।

देव स दीक्षितो भूत्वा करोति यज्ञकर्मकम् ।
तच्छ्रुत्वाह दशास्यश्च किं भो मारीच यज्ञकम् ।।141।।

ततो जगाद मारीच शृणु नाथ कथान्तरम् ।
महाकालाऽसुरेणैतत्यज्ञकर्मप्रकल्पितम् ।।142।।

भरते चारणद्वंद्वपुरे राजा सुयोधनः।
अतिथ्याख्या च भार्यास्य सुलसाख्या तयोः सुता।।143।।

तस्याः स्वयंवरार्थेऽत्र पित्रा चाकारिता नृपाः।
आर्यखण्डस्थिताः सर्वे दूताद्विनयवाक्यतः।।144।।

अयोध्यायां गतो दूतः कथितं सगरं नृपम्।
सगरोऽपि च तच्छ्रुत्वा गन्तुं समुद्यतस्तदा।।145।।

श्वेतकेशं शिरोदेशे दृष्ट्वा प्रयाणके नृपः।
वृद्धोऽहं किं गमिष्यामीत्युक्त्वा स्वस्य गृहं स्थितः।।146।।

तस्य धात्री तदा प्राह नाम्ना मंदोदरी वरा।
शुभ्रकेशो वदत्येष तव लक्ष्मीसमागमम्।।147।।

विश्वभूतिरिति मन्त्री तं प्राह सुलसां प्रभो।
तव भार्या करिष्यामि नाऽन्योपायेन सर्वथा।।148।।

तत्छ्रुत्वा सगरो राजा मन्त्रिवर्गसमन्वितः।
चारणयुगले पत्ने गतश्च सुलसाशया।।149।।

सामुद्रिकाऽभिधं शास्त्रं कल्पितं विश्वभूतिना।
गुप्तवृत्या क्षितौ क्षिप्तं लब्धं तच्च कुटुम्बिना।।150।।

सुलसाऽग्रे तु तच्छास्त्रं पठितं विश्वभूतिना।
मन्दोदरी ततः प्राह सुलसे शृणु कन्यके।।151।।

सगरभूपतौ सर्वं वर्तते शुभलक्षणम्।
तस्मात्त्वं वर भो कन्ये सगरं भोगहेतवे।।152।।

सुलसाया जनन्याह शृणु त्वं पुत्रि मद्वचः।
सुरम्यविषये पत्नं पोदनाख्यं मनोहरम्।।153।।

सोमवंशोद्भवो राजा मद्भ्राता तृणपिङ्गलः।
सर्वयशाऽस्य भार्याऽस्ति पुत्रस्तु मधुपिङ्गलः।।154।।

सर्वलक्षणसम्पूर्णो नवयौवनभूषितः।
तं वर पुत्रि भोगाय लक्ष्मीलीलाविराजितम्।।155।।

किं सगरेण वृद्धेन समं सुखं भवेत्तव।
भार्या सन्ति पुनस्तस्य ताभिश्च कलहो भवेत्।।156।।
अतिथेः वचनं श्रुत्वा चैकान्ते प्राह कन्यकाम्।
धात्री मन्दोदरी चेटी शृणु बाले शुभानने।।157।।
यदस्त्यलक्षणं लोके तत्सर्वं मधुपिङ्गले।
अस्ति तस्मात्तदा त्वं तं वरं दुष्टं च मा वर।।158।।
यदि न मन्यसे कन्ये विश्वभूतिं च पृच्छताम्।
सुलसया च पृष्टः स तथैवोक्तं च तेन वै।।159।।
स्वयंवरे तया तत्र वरितः सगरो नृपः।
निष्कासितो भटैस्तस्मान्निर्घाट्य मधुपिङ्गलः।।160।।
मानभङ्गाद् गतः पार्श्वे हरिषेणस्य योगिनः।
वैराग्येणाऽभवद्धर्म्मी मुनिः स मधुपिङ्गलः।।161।।
सगरः सुलसां नीत्वा साकेतं स्वपुरङ्गतः।
भोगान् भुञ्जति भूपालस्तत्र सुलसया समम्।।162।।
पक्षमासोपवासादीन् कुर्वन्[35] स मधुपिङ्गलः।
चम्पापुरं समायातो बहिरुद्यानसंस्थितः।।163।।
एकदा चरिहेत्वर्थं[36] गच्छति मधुपिङ्गलः।
तस्य पादातलं दृष्ट्वा कश्चित् सम्प्राह शास्त्रवित्।।164।।
अयं राजा भवेल्लोके कथं भिक्षां प्रयाचति।
कश्चिद् जगाद तं तत्र नायं लोकेऽस्ति भिक्षुकः।।165।।
सुलसाहेतवे सर्वं सगरस्य सुमन्त्रिणा।
कुशास्त्रं कल्पितं पापान्निर्घाटितश्च पिङ्गलः।।166।।
तपस्वीयं[37] ततो जातो वैराग्यान्मधुपिङ्गलः।
सगरस्तु सुखं भुङ्क्ते पुरे सुलसया समम्।।167।।
तच्छ्रुत्वा क्रोधसंयुक्तो निदानमकरोत् कुधीः।
निःसन्तानं करो लोके सगरस्य भवेत्तथा।।168।।

अहं तु चेद्भविष्यामि तदा मे तपसः फलम्।
इति सञ्चित्य मृत्वा सः सुरोऽभूत्मधुपिङ्गलः ।।169।।

बलिष्टो ज्योतिषां लोके महाकालाऽसुराऽभिधः।
ज्ञातं विभङ्गज्ञानेन सगरस्य विचेष्टितम्।।170।।

सगरस्याऽत्र निर्मूलं निःसन्तानं करोम्यहम्।
इत्युक्त्वा कानने देवो भ्रमति स तदा शृणु।।171।।

भरते धवले देशे सुस्वस्तिकावतीपुरे।
विश्ववसुर्नृपस्तत्र हरिवंशशिखामणिः।।172।।

श्रीमती वनिता तस्य वसुर्नाम्ना तयोः सुतः।
उपाध्यायोऽभवत्तस्य नाम्ना क्षीरकदम्बकः।।173।।

तस्य स्वस्तिमती भार्या पर्वताख्यस्तयोः सुतः।
नारदः पोषितः पुत्रो जैनधर्मप्रभावकः।।174।।

उपाध्यापकस्यान्तिके ते च वसुपर्वतनारदाः।
पारं प्राप्ता: श्रुताऽब्धेश्च लोकलोकान्तवर्तिनः।।175।।

उपाध्यायसमं शिष्यैर्दर्भनेतुं वनङ्गतः।
तत्र शिष्यत्रयोपेतं दृष्ट्वा श्रुतधरं मुनिम्।।176।।

नत्वा स्तुत्वा च तस्याऽग्रे चोऽपविष्टा यथायथम्।
गुरुरपृच्छत् स्वशिष्यान्स्तानेतेषां का गतिर्भवेत्।।177।।

एकः प्राह वसुर्भूप: पापात्श्वभ्रं गमिष्यति।
प्राहाऽन्य: पर्वतस्यापि पापात्श्वाभ्रीगतिर्भवेत्।।178।।[38]

तृतीयः प्राह सर्वार्थसिद्धिं धर्मात् गमिष्यति।
नारदोऽयं तपः कृत्वा त्यक्ता राज्यश्रियं पराम्।।179।।

इति श्रुत्वा पुरं प्राप्तस्तैश्च क्षीरकदम्बकः।
छात्रयोश्च गतिं स्वाभ्रीं स्मृत्वा दुःखं सदाऽकरोत्।।180।।

साम्राज्यं वसवे दत्वा विश्ववसुर्नराधिपः।
जग्राह संयमं सोऽथ राज्यं करोत्यऽसौ वसुः।।181।।

एकदा स गतोऽरण्ये तत्राऽपश्यन्नभस्तले।
संस्थितान्[35] पक्षिणो जीवान् बाणं तान् प्रतिमुक्तवान्।।182।।

आकाशस्फाटिकस्तत्र स्तम्भोऽस्ति दृष्ट्यगोचरः।
तेन लग्नञ्च तद्बाणं पतितं भुवि सङ्गताम्।।183।।

तेन बाणेन सञ्ज्ञाता तत्र स्फाटिकजा शिला।
पतिता भूमिदेशे तां संस्पर्श्य प्राप्तकौतुकः।।184।।

सा शिला वसुना तेन चाऽऽनीता स्वग्रहे तदा।
कृतं सिंहासनं तस्यास्तदुपरि च संस्थितः।।185।।

आकाशस्फाटिके सिंहविष्टरे संस्थितो वसुः।
लोकः कोऽपि न जानाति कपटं भूपतेर्वसोः।।186।।

सत्यवादी वसूराजस्तिष्ठति गगने मुदा।
इति वदन्ति लोकाश्च महात्म्यं तस्य भूपतेः।।187।।

एकदा तौ च गच्छन्तौ मार्गे पर्वतनारदौ।
समित्पुष्पार्थमभ्येत्य वनं नद्या प्रवाहजम्।।188।।

जलं पीत्वा मयूराणां गतानां मार्गदर्शनात्।
नदीतीरे च सम्प्राह नारदः पर्वतं प्रति।।189।।

केक्येकः सप्तकेकिन्यो जलं पीत्वा गता वने।
अग्रे गत्वा तदाऽपश्यन् मयूराणां कदम्बकम्।।190।।

ततो दृष्ट्वा पुनर्मार्गं पर्वतं प्राह नारदः।
गताऽग्रे हस्तिनी तस्या वामं चक्षुर्न विद्यते।।191।।

शुभ्रवस्त्रवृता नारी तस्या उपरि संस्थिता।
पुङ्गर्भिणी ततोऽग्रे च गत्वा तदैव निश्चितम्।।192।।

पर्वतो लज्जितो भूत्वा मातुरग्रे गतोऽवदत्।
पित्रा सम्पाठितः प्रीत्या चैकान्ते स च नारदः।।193।।

तच्छ्रुत्वा सा श्रुतं प्राप्ता भर्त्तारं प्रति सम्वदत्।
त्वया न पाठितः पुत्रः प्रीत्या साक्षाच्च नारदः।।194।।

तदा स प्राह किं जातं प्रिये त्वं वद कारणम्।
नारदोक्तं तया प्रोक्तं वनकेक्यादि जल्पितम्।।195।।
नारदं प्राह किं जातं वने क्षीरकदम्बकः।
ततश्च नारदोऽवोचज्जनक श्रूयतां कथाम्।।196।।
पीत्वा जलं वने केकी पश्चात्पादेन निर्गतः।
पीठं कर्दमितुं भीत्या तास्त्रियो भयवर्जिताः।।197।।
विज्ञानेन मया ज्ञातं केकी केकिस्त्रियः पराः।
पश्चात्भागं शीकरैश्च[40] मूत्रिता हस्तिनी ततः।।198।।
मया ज्ञाता पुनर्वृक्षा भग्ना दक्षिणभागजाः।
ततो ज्ञाता च सैकाक्षी वामे चक्षुविवर्जिता।।199।।
मार्गश्रमात्परिभग्ना सोत्तारिता पदे पदे।
दक्षिण: करभारेणोत्थिता पुनर्गजे स्थिता।।200।।
ततो ज्ञाता मया स्त्रीयं पुङ्गर्भिणी भवेत्सदा।
संलग्नं कण्टके वस्त्रं शुभ्रं ततः परीक्षितम्।।201।।
ज्ञायते स्वात्मज्ञानेन गुरुर्नाऽस्त्यत्र कारणम्।
नारदोक्तं ततः श्रुत्वा भार्यां प्राह कदम्बकः।।202।।
चातुर्यं पश्य भार्ये त्वं नारदस्य विचारिणः।
तच्छुत्वा सा प्रसन्नाऽभूद्रेमे भर्त्रा समं मुदा।।203।।
एकदाऽऽह परीक्षार्थं तयोः क्षीरकदम्बकः।
छगौपिष्टस्य निर्माप्य दत्वा करे सुतद्वयोः।।204।।
पुत्रो छागस्यकर्णो द्वौ छित्वैकान्ते समानयेत्।
पर्वतेन ततो गत्वैकान्ते कर्णौ च छेदितौ।।205।।
दत्तौ पितुः करे तेन पीष्ठछागस्य कर्णकौ।
तद्दृष्ट्वाह पिता प्रान्ते पापिष्ठोऽयं हि मे सुतः।।206।।
नारदोऽपि ततो गत्वैकान्ते प्राह विचारणाम्।
उद्दिष्टं गुरुणैकान्ते त्वं कुरु कर्णछेदनम्।।207।।

पश्यन्ति तारका देवा वृक्षाः स्वात्मा च पक्षिणः।
व्यन्तराश्चन्द्रसूर्याश्च चैकान्तं नाऽस्ति कुत्रचित्।।208।।
मत्वेति पुनरागत्य गुरोरग्रे निवेदितम्।
नास्त्यैकान्तं कुतो देव करोमि हिंसनं क्रियाम्।।209।।
तदा स गुरुणा ज्ञातो भव्योऽयं नाऽत्र संशयः।
अधोगामीति मत्पुत्रस्ततस्त्यजामि पापिनम्।।210।।
वसोः करे सुतं दत्वा भार्यां च पूर्वप्रीतितः।
स्वपदं नारदे क्षिप्त्वा गुरोः पार्श्वेऽभवन्मुनिः।।211।।
अन्ते संन्यस्य सम्प्राप्तः स्वर्गं क्षीरकदम्बकः।
पर्वतनारदौ गेहे मात्रा सह सुखं स्थितौ।।212।।
सभायामेकदा व्याख्यां करोति नारदो मुदा।
अजैर्हन्तव्यमित्यस्य यवबीजं त्रिवार्षिकम्।।213।।
पर्वतः प्राह चाऽस्याऽर्थः छागः पित्रा निवेदितः।
तत्र तयोर्महान्वादो जातः सर्वजनाऽग्रतः।।214।।
ताभ्यां कृता[41] प्रतिज्ञेयं वसुरत्रास्ति साक्षिकः।
छागं स यदि ब्रूयाद्वा वीहि वाऽत्र वदिष्यति[42]।।215।।
तदाऽऽवयोरबद्धस्य जिह्वाछेदं करिष्यति।
इति निश्चित्य सन्ध्यायां ते सर्वे स्वगृहङ्गताः।।216।।
दुर्मुखं पर्वतं दृष्ट्वा स्वस्तिमत्या च पृष्टवान्।
ततस्तेन वृतान्तश्च सर्वस्तस्यै निवेदितः।।217।।
ततो जगाद सा पुत्र त्वया निगदितं[43] मृषा।
त्वत्पितुरन्तिके पूर्वं श्रुतं व्रीहिप्ररूपणम्।।218।।
त्रिवार्षिको भवेद् व्रीहीरजा चेति प्रकीर्त्यते।
तस्मात्त्वद्रसनाछेदं करिष्यति वसुर्नृपः।।219।।
जिह्वाछेदे त्वयि पुत्र मृत्युरेव भविष्यति।
अहं तु किं करिष्यामि भर्तृपुत्रविवर्जिता।।220।।

ततः सस्मार मे दत्तो वरोऽस्ति वसुना पुरा।
तद्याचाम्यधुना गत्वा तेन क्षेमं भविष्यति।।221।।
इत्युक्त्वा सा गता वेगात् पार्श्वं चिन्तातुरा वसोः।
पृष्टा सा वसुना मातः किमर्थमागतं त्वया।।222।।
तया सर्वं ततः प्रोक्तं तस्मै पुत्रस्य वृत्तकम्।
पुनराह शृणु राजन् त्वं पिता सर्वजन्तुषु।।223।।
सत्यं वदन्ति राजानो धर्मं कुर्वन्ति सर्वदा।
वरो दत्तोऽस्ति मे पूर्वं त्वया गुरुप्रताडने।।224।।
मया न गृहीतो राजन् कार्यवर्जितया तदा।
तद्देहि चाऽधुनाऽवश्यं त्वं रक्षस्वाऽत्र मत्सुतम्[44]।।225।।
तदा राजाह भो मातस्तव पुत्रस्य भाषितम्।
अहं सत्यं करिष्यामि सर्वलोकस्य साक्षतः।।226।।
ततस्तुष्टा गता गेहं स्वस्य स्वस्तिमती सती।
वसुश्चाऽचिन्तयत्कष्टामागतं[45] पापकारणम्।।227।।
अथाऽन्यस्य दिनस्यादौ गतौ नारदपर्वतौ।
समीपं क्षितिपालस्य कुतूहलिजनावृत्तौ।।228।।
उपाध्यायेन यत्प्रोक्तं सत्यं वद नराधिपः।
नृपा भवन्ति सत्यस्य वाचका भुवि धर्मिणः।।229।।
ततो जगाद भूपालो यत्पर्वतेन भाषितम्।
तदेव गुरुणा प्रोक्तं सत्यं श्रुतं मया तदा।।230।।
सिंहासनं ततस्तस्य प्रविष्टं भूतले[46] तदा।
लोके वदति भो पश्य नृपो गच्छति भूतलम्।।231।।
आकाशस्फाटिके सिंहविष्टरे संस्थितं नृपम्।
नो ज्ञासीत्किल तल्लोकस्ततो जगाद नारदः।।232।।
वसो वितथासामर्थ्यात्तव सिंहासनं गतम्।
भूमिमद्याऽपि ते युक्तं परमार्थं निवेदनम्।।233।।

ततो मोहमदाविष्टस्तदेव पुनरभ्यधात् ।
प्रविष्टो धरणीं सद्यः सिंहासनसमन्वितः ।।234।।
महापापभराक्रान्तो हिंसाधर्मप्रवर्तनात् ।
गतस्तमस्तमोऽभिष्यां[47] पृथिवीं घोरवेदनाम् ।।235।।
ततो धिग्धिग् जनैः प्रोक्तं वसोर्वाक्यमसत्यकम् ।
नारदः पूजितो लोकैर्धर्ममार्गस्य देशनात् ।।236।।
देशान्निष्कासितः पापी पर्वतः पापदेशनात् ।
परिभ्रमन् वने दुष्टो दृष्टः पूर्वसुरेण सः ।।237।।
महाकालसुरोऽपृच्छत् कथं भ्रमसि पर्वत: ।
पर्वतेन ततः सर्वं तस्याऽग्रे च निवेदितम् ।।238।।
सुरः प्राह त्वया सत्यं प्रोक्तं छागनिरूपणम् ।
सहायं ते करिष्यामि यदि करोषि मद्वचः ।।239।।
त्वत्पिता मत्पिता पूर्वमेकत्र पठितौ परं ।
तेनाऽपि गुरुणा प्रोक्तमजं छागनिरूपणम् ।।240।।
अयोध्यायां समागच्छ शत्रूणां ध्वंसनं कुरु ।
सगराऽग्रे प्रकाश्यत्वं यज्ञशास्त्रनिरूपणम् ।।241।।
यदि सत्यमसत्यं वा वदसि जीवहिंसनम् ।
सर्वेभ्यः तदाऽऽह सत्यं दर्शयिष्यामि सर्वथा ।।242।।
देवस्य वचनं श्रुत्वा स्वभावपापपर्वतः ।
जिनेन निर्मिता वेदा तानेवाऽत्र विपर्ययात् ।।243।।
स्वबुद्ध्या कल्पिता: पापा हिंसाधर्मप्रकाशकाः ।
चकाराऽथर्वनं वेदं षष्टिसहस्रसङ्ख्यकम् ।।244।।
ऋग्वेदश्च[48] ततो श्यामं यजुर्वेदं[49] तथा परम् ।
महाकालस्य दैत्यस्य मुखात्सर्वं प्रकल्पितम् ।।245।।
चतुर्वेदान् पठित्वाऽसौ कृत्वा बाह्मणसत्क्रियाम् ।
सगरसदसि प्राप्तः पर्वतो बहुमन्त्रवित् ।।246।।

मन्त्रेण मोहितं कृत्वा सगरं देववैरिणम्[50]।
जगाद पर्वतः पापी दास्यामि स्वर्गजं सुखम्।।247।।

कुरु धर्मात्मकं राजन् यज्ञविधिं सुखाकरम्।
यज्ञार्थं ब्रह्मणा सृष्टा छागादिजीवराशयः।।248।।

यज्ञविधिं प्रकुर्वन्ति स्वर्गं गच्छन्ति ते नराः।
इति मत्वा विधेयत्वं यज्ञे छागादिपीडनम्।।249।।

भार्यापुत्रसमेता ये पतन्ति वह्निकुण्डके।
सजीवकाश्च ते भूत्वा स्वर्गं गच्छन्ति सर्म्मदाः[51]।।250।।

पर्वतस्य वचः श्रुत्वा सगरैः पापमन्त्रिभिः।
यज्ञकर्म[52] समारब्धं कृत्वा छागादिसंग्रहम्।।251।।

देशान्तरे स्थिता विप्राः सर्वे तत्र समागताः।
पर्वतो बहुधा वेदान् गीतवादित्रनर्तनैः।।252।।

महामण्डपशोभाश्च कारितास्तेन भूभृता।
यज्ञकुण्डे मृगाः क्षिप्ताः सपूत्कारा ज्वलन्ति ते।।253।।[53]

षष्टिसहस्रसङ्ख्याताः छागादिपशुराशयः।
वह्निकुण्डे हुतास्तेन पर्वतेन च भूभृता।।254।।

महाकालाऽसुरस्तेभ्यो दर्शयति मृगांश्च तान्।
गच्छतः शिविकारूढान् स्वर्गं प्रति विनोदकान्।।255।।

तान् मृगान् सगरो दृष्ट्वा सुस्वर्गं गच्छतस्तदा।
पत्न्यश्च[54] तत्र विक्षेप सुप्रीत्या वह्निकुण्डके।।256।।

भार्याञ्च सुलसां देवीं जुहोतिस्माऽग्निकुण्डके।
सुलसाया वियोगेन दुःखी भूपो गृहङ्गतः।।257।।

प्रातः यतिवराभिख्यं मुनीन्द्रं सगरोऽपृच्छत्।
स्वामिन् मे क्व गता भार्या अश्वादयो मृगा अपि।।258।।

मुनिराह गताः श्वभ्रं भार्या ते च यथायथम्।
मृगाश्च कुगतिं प्राप्ता दुर्ध्यानमरणात्खलु।।259।।

सप्तमे वासरे त्वं च विद्युत्पातान्मरिष्यसि।
सप्तमं नरकं यासि बहुप्राणिप्रघातनात्।।260।।

ये कुर्वन्ति नरा यज्ञं श्रद्धति ये च पापिनः।
ते नरकं गमिष्यन्ति बहुदुःखकरं परम्।।261।।

विप्रेभ्यो भूभृता सर्वं प्रोक्तं मुनीन्द्रभाषितम्।
तत उचुश्च विप्रास्ते किं जानाति सनग्नकः।।262।।

सन्देहो वर्तते चित्ते चेत्पश्य सुलसां च ताम्।
सुरेण सुलसा सा तं दर्शिता शिविकास्थिता।।263।।

ततः कृत्वा पुनर्यज्ञं सगरो मृतवान् गतः।
सप्तमेऽह्नौ तडित्पातात् सप्तमीं नारकीं गतिम्।।264।।

अमात्येभ्यश्च देवेन दर्शिताः सगरादयः।
स्वर्गं गच्छन्ति ते भूपा भार्या युक्ताः सुतान्विताः।।265।।

विश्वभूतिमुखाः कृत्वा यज्ञं तं पुरुषाऽधमाः।
हिंसापापाद्गताः श्वभ्रं तीव्रदुःखास्पदं सदा।।266।।

सगरस्य च निर्मूलं निःसन्तानं कृतं मुदा।
सुरेण तेन वैरेण कृत्वा यज्ञप्रकल्पनम्।।267।।

पर्वतोऽपि मृतः प्राप्तं सप्तमं नरकं कुधीः।
नारदोऽथ सुधर्मात्मा गिरितटाऽभिधे पुरे।।268।।

राज्यं प्राप्तो नृपैः सेव्यं धर्मात् किं न जायते।
रविदेवं खगं किञ्चिन्नारदः प्राह भूपतिः।।269।।

पर्वतेन कृतो यज्ञस्तत्र त्वं कुरु विघ्नताम्।
तदा खगेन तेनाऽपि मुक्ता नागाः विषोपमाः।।270।।

सुरेण तेन ते नागा गाढं हत्वा पलायिताः।
ततः खगेन नागेन्द्रो नियुक्तो विघ्नतां प्रति ।।271।।

तदा सुरेण जैनेन्द्री प्रतिमाश्च चतुर्दिशि।
स्थापिता च गता विघ्नाः तां दृष्ट्वा प्रतियातनाम्।।272।।

कृत्वा यज्ञं ततः केचित् गताश्च नारकीं गतिम्।
केचित्यक्ता च मिथ्यात्वं प्रापुः[55] स्वर्गपदं वरम्।।273।।

नारदोऽथ तपः कृत्वा जिनदीक्षां धरो मुनिः।
प्राप्तः सर्वार्थसिद्धिं स त्रित्रिंशदब्धिजीवितः।।274।।

तदा प्रभृति पापिष्टा वेदकर्माणि सर्वदा।
आचरन्ति च कुर्वन्ति हिंसाजीववधादिकम्।।275।।

मद्यपानं परस्त्रीणां सङ्गतिं द्यूतक्रीडनम्।
तापसाः ब्राह्मणाः दुष्टाः कुर्वन्ति पापसेवनम्।।276।।

इति मारीचवाक्यं तच्छ्रुत्वा दशाननः सुधीः।
मरुन्मुखे क्षिमां कृत्वा[56] स्थितो दशदिनान् तथा ।।277।।

अथ मरुन्मुखो राजा यज्ञदीक्षाविधानधृक्।
विप्रान् देशविदेशस्थानाकार्षि सकलांश्च तान्।।278।।

महामण्डपशोभाद्याः कारिताः यज्ञकर्मणि।
प्रजाः सर्वाः समायाताः केचिच्च धनलालसाः।।279।।

तेषु संवर्तको नाम बाह्मणो वेदपारगः।
वादार्थं स्थापितो राज्ञा मण्डपस्य मुखे वरे।।280।।

आगतैः बाह्मणैः सर्वैश्चतुर्द्वारस्य भूमिषु।
महावेदनिनादेन सर्वाशावधरीकृता।।281।।

छागवाजिमृगैर्जीवैः क्षुत्तृग्भिश्च प्रपीडितैः।
भृता वाटकसंस्थाना यज्ञस्य वधहेतवे।।282।।

एतस्मिन्नन्तरे गच्छन्नारदो गगनाङ्गणे।
अधोभागे पशून् दृष्ट्वा भुव्यवतरितः क्षणात्।।283।।

किमिदं कस्मैचित्पृष्टं नारदेन कुतूहलात्।
यज्ञविधिञ्च तेनोक्तं करोति नृपपुङ्गवः।।284।।

तच्छ्रुत्वा नारदः प्राप्तो यत्र संवर्तको द्विजः।
तेनागत्याऽत्र पृष्टोऽसौ किमारब्धं प्रपातकम्।।285।।

पशूनां जीवनाशोऽत्र क्रियते यज्ञकर्मणि।
जीवनाशाद्भवेत्पापं पापात्दुःखपरम्परा।।286।।
तच्छ्रुत्वा कुपितो विप्रः संवतर्को विदुषां गुरुः।
किं भो जल्पसि मूढ त्वं यज्ञस्तु स्वर्गकारणम्।।287।।
विना यज्ञं कुतः स्वर्गो विना स्वर्गं कुतः सुखम्।
तस्माद्यज्ञविधानेन गन्तव्यं स्वर्गभूमिषु।।288।।
नारदः प्राह यज्ञस्तु महापापस्य कारणम्।
नरकं लभसे पापाद्दुःखस्य[57] स्थानकं परम्।।289।।
एतच्छ्रुत्वा द्विजा दुष्टाः कुपिताः पापमानसाः।
नारदं मारितुं कष्टैरागता यष्टिमुष्टिभिः।।290।।
नारदेनाऽपि ते विप्रा मारिताः पादमुष्टिभिः।
ततस्तैर्बहुभिर्विप्रैर्बन्धितो नारदो मुनिः।।291।।
एतस्मिन्नन्तरे राज्ञो रावणस्य समागतः।
दूतास्तेनाऽत्र दृष्टोऽसौ बाह्मणैर्बन्धितो मुनिः।।292।।
गत्वा दूतेन सम्प्रोक्तं रावणाय हितात्मना।
कृपान्विताय जैनाय नारदबन्धनादिकम्।।293।।
दशास्येन ततो वेगात्प्रेषिता पार्थिवा नराः।
शीघ्रमानयंतु पापिन् मरुन्मुखं दुरात्मकम्।।294।।
तैर्गत्वा मोचितो वेगान्नारदो बन्धनादृषिः[58]।
निर्घाटिता द्विजा नष्टास्ताडितास्तैश्चमुष्टिभिः।।295।।
रुदन्ति बाह्मणाः केचित्केचिन्मूर्च्छां समागताः।
केचित्पतितदन्ताः स्युः केचित्प्राणविवर्जिताः।।296।।
होमकुण्डाश्च भग्नास्ते मोचिताः पशवश्च ते।
रज्जुपाशैर्द्विजाः बद्धाः स्तम्भेषु च नियन्त्रिताः।।297।।
लुण्टितं नगरं सर्वं प्रजाः सर्वाश्च पीडिताः।
कुटुम्बवर्गसंयुक्तो मरुन्मुखोऽपि बन्धितः।।298।।

एतस्मिन्नन्तरे राजा रावणोऽत्र समागतः।
नारदेन तदा दत्त आशीर्वादो सुखप्रदः[59]॥299॥
कृपया नारद प्राह भो दशानन दयापरम्।
मुञ्चस्व पीडितान् विप्रान् कारागारे च बन्धनैः॥300॥
न श्रुतं किं त्वया पूर्वं बाह्मणोत्पत्तिकारणम्।
भरतेन कृता दुष्टाः कलौ शत्रुसमा द्विजाः॥301॥
चक्रिणा च सुभौमेन मारिताः ब्राह्मणाः क्षितौ।
एकविंशतिवारांश्च तथापि न क्षयङ्गताः॥302॥
अधुना किं गमिष्यन्ति विप्रा नाशं दशानन।
तस्मान्मुञ्चस्व पापिष्टान् गमिष्यन्ति स्वयं क्षयम्॥303॥
नारदस्य वचः श्रुत्वा मुञ्चिता दीनतो द्विजाः।
दशास्यस्य ततः पादौ नत्वा गता यथायथम्॥304॥
ततो मरुन्मुखो राजा मुञ्चितो दीनमानसः।
भीत्या तेनाऽत्र तस्य द्वौ पादौ स्वमस्तके धृतौ॥305॥
हेमप्रभाऽभिधा कन्या रावणाय विवाहिता।
दत्ता तेन ततो जाता तयोः प्रीतिः नरेन्द्रयोः॥306॥
यथायोग्यञ्च सर्वेभ्यो वस्त्रादिकानि भूभृता।
मरुन्मुखेन दत्तानि तुष्टाः सर्वे परस्परम्॥307॥
श्रेणिकः प्राह भो स्वामिन् कोऽसौ सदृषिः नारदः।
गौतमः प्राह भो राजन् नारदस्य कथां शृणु॥308॥
विप्रोऽस्ति बह्मरुच्याख्यः कूर्मी नाम्नाऽस्य वल्लभा।
संन्यासवेषधारी स वनमध्येऽवतिष्ठति॥309॥
कदाचिद्गर्भिणी जाता कूर्मी भुक्त्वा फलादिकम्।
मुनयश्च तदा तत्र समायाता दिगम्बराः॥310॥
मार्गश्रमोपशान्त्यर्थमुपविष्टा मठान्तिके[60]।
बह्मरुचिः समागत्य पादौ नत्वोपविष्टवान्॥311॥

कूर्मीरपि तदागत्य स्थिता तत्रैव गर्भिणी।
तां दृष्ट्वैको मुनिः प्राह केयं भो विप्रगर्भिणी।।312।।
स प्राह मम भार्येयं ततः प्राह मुनीश्वरः।
संन्यासी वेषधारी त्वं स्त्री ते कुर्तं न युज्यते।।313।।
मूढा मार्गं न जानन्ति यतीनां गृहिणां तथा।
गृहिणां युज्यते नारी त्यज्यते यतिभिश्च सा।।314।।
गृहिणां वनिता चाऽस्ति भार्याऽस्ति योगिनां तथा।
को भेदो मे तदा ब्रूहि यतीनां गृहवासिनाम्।।315।।
इत्यादि बहुधा वाक्यैर्ब्रह्मरुचिः स बोधितः।
तदा वैराग्यभावेन सञ्जातो मुनिरुत्तमः।।316।।
कूर्मी सद्दृष्टिनी जाता गर्भभारसमन्विता।
अयोग्या ग्रहितुं दीक्षां चेतसि व्याकुला सदा।।317।।
सम्पूर्णे दिवसे सूता तनयं शुभलक्षणम्।
अचिन्तयत्तदा चित्ते मुन्युक्तं नाऽन्यथा भवेत्।।318।।
अयं बालो महाभागी भविष्यतीति निश्चयात्।
तस्मादेनं परित्यज्य करोमि हितमात्मनः।।319।।
इत्युक्त्वा बालकं त्यक्त्वा कानने विजने शुभे।
षोडशमे दिने रम्ये स्वयं जाता तपस्विनी।।320।।
आंनर्छलोकपत्ने[61] च कान्त्यार्यामिन्दुमालिनीम्[62]।
शरणं प्राप्य संवेगाद् दीक्षां जग्राह सा सती।।321।।
सत्पुण्याद्बालकश्चाऽसौ रोदनादिविवर्जितः।
वज्रद्भिर्नभसा दृष्टः सुरैर्जृम्भिकसञ्ज्ञकैः।।322।।
गृहीत्वा च कृपायुक्तैरादृत्य परिपालितः।
अध्यापितश्च शास्त्राणि सहस्राण्यशेषतः।।323।।
लेभे च लब्धवर्णः सन् विद्यामाकाशगामिनीम्।
यौवनं च परं प्राप्तः स्थितिं चाऽणुव्रतीं दृढाम्।।324।।

दृष्ट्वा च मातरं चिह्नैः प्रत्यभिज्ञानकारिणीम्।
तत्प्रीत्योपेत्य निर्ग्रन्थं सम्यग्दर्शनतत्परम्।।325।।
प्राप्य क्षुल्लकचारित्रं जटामुकुटमुद्वहन्।
अवद्वारसमो जातो न गृहस्थो न संयतः।।326।।
यश्च कंदर्प्पकौत्कुच्यमौख्र्यार्ऽत्यन्तवत्सलः।
कलहप्रेक्षणाकाङ्क्षी गीतचुञ्चुः प्रभाववान्।।327।।
पूजितो राजलोकैश्च ब्रह्मचारी दृढव्रती।
चचार[63] रोदसीं नित्यं कुतूहलगतेक्षणः।।328।।
देवैः संवर्द्धितत्वाच्च देवसन्निभविभ्रमः।
देवर्षि प्रथितः सोऽभूद्विद्याविद्योतिताऽद्भुतः।।329।।
प्रस्तावं प्राप्य ते प्रोक्ता नारदस्य कथा वरा।
अथ हेमप्रभाया च सुता जाता दशाननात्।।330।।
वरा वर्षैकमध्ये च कृतचित्रेतिनामतः।
कृतं चित्रं हि रूपेण तया लोकस्य पश्यतः[64]।।331।।
एवमनेक[65]देशेषु स्थिता ये नृपपुङ्गवाः।
वशीकृताश्च ते सर्वे रावणेनाऽतिगर्विणा।।332।।
कन्या अश्वाश्च वस्त्राणि गजा रत्नानि भूरिशः।
दशाननाय दत्तानि प्रीत्या भीत्या च तैर्नृपः।।333।।
हेमाद्रादिनगेष्वेवं नदीषु वनवाटिषु।
नगरेषु च रम्येषु विचरन्ति दशाननः।।334।।
महाबलेन सम्पन्नो महावैभवसंयुतः।
कुटम्बिनाञ्च वृन्दानि पश्यन् भ्रमति भूतले।।335।।
क्वचिच्च महिषीयूथान् क्वचिद्गोधनसन्ततिः।
भिल्लानां वनिताः क्वापि क्वचिद् ब्राह्मणसन्ततिः।।336।।
नाना वृक्षांश्च क्षेत्राणि पश्यन् पश्यन् दशाननः।
गच्छति चेप्सितं वित्तं याचकेभ्यो ददाति सः।।337।।

लवणाब्धितटेष्वेवं स्थिता ये देवमानवाः।
लीलया साधितास्तेऽपि गर्वेण लीढमानसाः।।338।।

सिन्धुनद्यास्ततटस्था ये ये चापि मध्यभूमिपाः।
वशीकृताः स्वपुण्येन गङ्गातटश्च साधितः।।339।।

क्वचिद्वर्षं क्वचिन्मासं क्वचित्पक्षं क्वचिद्दिनम्।
स्थित्वा च साधिता देशाः पूर्वपुण्याऽनुयोगतः।।340।।

आर्यखण्डं समासाद्य साधिता म्लेच्छभूमयः।
विजयार्द्धं जेतुं गच्छन् प्राप्तो भागीरथी तटम्।।341।।

जलकल्लोलसम्पूर्णो कच्छमत्स्यादिक्रीडिताम्।
गङ्गां दृष्ट्वा स पद्मां च तत्तटे संस्थिता नृपाः।।342।।

गजवाजिपदातीनां जलं पानाय निर्मलम्।
काष्ठधान्यतृणादीनां राक्षसास्तत्र भुक्तये।।343।।

तत्र भूखेचराः सर्वे सञ्जाताः सुखिनस्तदा।
कैलाशे जिनपूजायै गच्छन्ति ते प्रतिदिनम्।।344।।

विमलधर्मबलेन सुवस्तुकं
सकलजीवहितं सुखदायकम्।
परममोक्षपदं भवनाशनम्
भवति राज्यपदं सुरसेवितम्।।345।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
रावणस्य दिग्विजयवर्णनो नाम षष्ठोऽधिकारः।।6।।

❖❖❖

1 भार्येन्द्र इति क/ग प्रतौ

2 बलि इति ख प्रतौ

3 'न' इति क प्रतौ अप्राप्तः

4 परां इति ग प्रतौ

5 परस्मावेवु इति ख/ग प्रतौ

6 करिष्यति इति ख/ग प्रतौ

7 शेषेरेवास्मि इति क/ग प्रतौ

8 इच्च्यं इति ख प्रतौ

9 दर्शनेन इति ग प्रतौ

10 ज्ञानेन ज्ञातवृतान्तः क्रूरस्यरक्षसस्ततः इति क प्रतौ

11 चतुर्दानं इति ग प्रतौ

12 तन्त्र इति ग प्रतौ/निकृष्य च स्नसा तन्त्री –प.पु. 9/176

13 धरणोऽवधिलोचनः इति क/ग प्रतौ

14 वृणीष्व इति ग प्रतौ

15 कर्मारणं इति ख प्रतौ
कम्भरिन्यं इति ग प्रतौ

16 सौख्यं इति ग प्रतौ

17 दिशो इति क/ख प्रतौ, प. पु. /10/19

18 महोत्साहाः स्तुष्यत्यानतिमात्रतः इति क प्रतौ
महोत्साहस्तुत्यागतिमात्रतः इति ख प्रतौ
महोत्साहस्वस्वंपत्यानतिमात्रतः इति ग प्रतौ
तुष्यन्यानतिमात्रतः इति प. पु. 1/10/21

19 द्विपा इति ख प्रतौ, धिया इति ग प्रतौ

20 स्वसायाश्च धवस्नेहात्पारं पर्याच्च संयुतः इति ख/ग प्रतौ

21 स्वसा समुत्कया इति क प्रतौ, स्वस्रा समुत्कटाः इति ग प्रतौ

22 पुरुप्रीत्या इति क/ख प्रतौ
परप्रीत्या इति प. पु. 1/10/30

23. विचारिणां इति क प्रतौ
विदारिणां इति ख/ग प्रतौ
विकारिणां इति प. पु. 1/10/33

24 दिवारिणां इति ग प्रतौ

25 त्रिजटो हय माकंपो हिडम्बो हिम्ब वैकट इति ख प्रतौ

26 व्यंधाद्रौ इति क/ख प्रतौ
वंध्याद्रौ इति ग प्रतौ
परन्तु अर्थदृष्ट्या विन्ध्याद्रौ भवेत्। अतः मुलपाठे विन्ध्याद्रौ कृतमस्ति।

27 प्रतियातनाम् प्रतिमा इत्यर्थः

28 ज्ञापयता परम् इति ख/ग प्रतौ

29 शिखा इति ख/ग प्रतौ

30 प्रशसुर्व्योमगाधिपाः इति ग प्रतौ
प्रसश्रुव्यौमगाधिपाः इति प. पु. 1/10/101

31 आत्मदंडे विधेर्वशात् इति ख प्रतौ
आत्मदंडे निधेर्वशात् इति ग प्रतौ

32 भोगेभ्यो यदि भीतोत्र तत्र आगम्यते कथं इति ग प्रतौ।

33 पुत्र इति क प्रतौ

34 उत्तरेण इति ग प्रतौ

35 क प्रतौ कुर्वन् पदलोपो वर्तते

36 चरीहेत्वर्थं इति क प्रतौ

37 तपस्चायं इति क प्रतौ, तपस्वयं इति ख प्रतौ

38 एषः श्लोकः ग प्रतौ अनुपलब्धः।

39 संस्थापितान् इति क प्रतौ ।

40 शिकरैश्च इति ख/ग प्रतौ।

41 कृत्वा इति क प्रतौ

42 छागंर्सू यदो ब्रूयाद्वा ब्रीहि चात्र वदिष्यति इति क प्रतौ

43 निवेदितं/निंदित इति ख /ग प्रतौ

44 श्रुतम् इति ख प्रतौ

45 अचिन्तव्यकष्टां मागतं इति ख प्रतौ

46 भूतलं इति ख/ग प्रतौ

47 अतिष्यां इति ख प्रतौ/ भिख्यो इति ग प्रतौ

48 रुग्वेदं इति क प्रतौ

रुगुवेदं च इति ग प्रतौ

49 जुजुर्वेद इति ख/ग प्रतौ

50 बेदवैरिणां इति ग प्रतौ।

51 सम्मदाः इति क प्रतौ/संमुदा इति ग प्रतौ

52 यज्ञकर्तुं इति ख/ग प्रतौ

53 एषः श्लोकः ग प्रतौ अनुपलब्धः।

54 पट्टाखं इति ख प्रतौ।

पद्दाखं इति ग प्रतौ।

55 प्राप्ता इति ख/ग प्रतौ

56 मरुन्मुखोपि दीक्षित्वा इति ग प्रतौ।

57 पापां दुःखस्य इति क प्रतौ, पापं दुःखस्य इति ख प्रतौ

58 द्रषि इति ख/ग प्रतौ

59 विवेकिना इति क प्रतौ

60 मचान्तिके इति क प्रतौ

61 आंभर्छलोकपत्ने इति क प्रतौ/आनच्छ्लोकनगरे इति पद्मपुराणे 11/150

62 कांत्यायामिन्दुमालिनी इति क प्रतौ।

कांर्त्यामिन्दुमालिनी इति ग प्रतौ।

क्षान्त्यार्यामिन्दुमिन्दुमालिनीम् इति प.पु. 1/11/150

63 चत्वार इति ख प्रतौ, चचाल इति ग प्रतौ

64 पश्यत इति क प्रतौ।

65 अन्येक इति ख प्रतौ

❖❖❖

सप्तमोऽधिकारः

कृतचित्रां सुतां दृष्ट्वा रूपाद्यां पूर्णयौवनाम्।
कन्येयं दीयते कस्मै भो मन्त्रिणो वदन्तु मे।।1।।
विरुद्धो मेऽस्ति शक्रेण समं च विजयार्द्धगैः।
अत्रान्तरे समायातो मथुरानगरीप्रभुः।।2।।
हरिवाहननामाऽसौ सुतेन मधुना समम्।
मधुं दृष्ट्वा तदाऽपृच्छन्[1] पुत्रोऽयं कस्य रावणः।।3।।
तदाह मारिचो मन्त्री शृणु राजन् दशानन।
हरिवंशकुले जातो हरिवाहनभूपतिः।।4।।
मध्वाख्यस्तस्य[2] पुत्रोऽयं यो नागेन्द्रसेवितः।
शूलरत्नं करे यस्य महारूपी महागुणी।।5।।
एतच्छ्रुत्वा दशास्येन तस्मै दत्वा स्वकन्यकाम्।
महाविवाहतूर्येण महादानेन पूरितः।।6।।
श्रेणिक आह भो स्वामिन् कुतस्तच्छूलरत्नकम्।
जगाद गौतमस्वामी शूलरत्नकथां शृणु।।7।।
धातक्यैरावते[3] क्षेत्रे शतद्वारपुरे वरे।
सुमित्राख्यो वणिक्पुत्रो धर्मात्मा च महाधनी।।8।।
प्रभवाख्यः सुदत्तस्य बाह्मणो धनवर्जितः।
पुरस्याऽस्यैकदा राजा मृतः पुत्रविवर्जितः।।9।।
तदालोकैः सुमित्राय दत्तं राज्यं नृपाऽर्चितम्।
मित्रस्नेहात्सुमित्रेण प्रभवोऽपि कृतः प्रभुः।।10।।
सुमित्रोऽप्यन्यदाऽरण्ये हृतो दुष्टेन वाजिना।
दृष्टो द्विरददंष्ट्रेण म्लेच्छेन स्वैरचारिणा।।11।।
आनीयाऽसौ ततः पल्लिं सम्प्राप्य समयं दृढम्।
पत्न्या म्लेच्छवरूथिन्यास्तनयापरिणायितः।।12।।
तां च कन्यां समासाद्य साक्षादिव वनश्रियम्।
वनमालाश्रुतिं तत्र स्थितोऽसौ माससमात्रकम्।।13।।

अनुज्ञातस्ततस्तेन शतद्वारपुरोत्तमम् ।
प्रस्थितः स तया साकं वृतः स वरसेनया ।।14।।

गवेषणे विनिष्क्रान्तः प्रभवोऽथ तदैक्षतः ।
कान्तया सहितं मित्रं स्मरस्येव पताकया ।।15।।

चक्रे[4] च मित्रभार्यायां मानसं पापकर्मणः ।
उदयान्नष्टनिःशेषः कृत्याकृत्यविचेतनः[5] ।।16।।

विषिन्नोऽसि किमित्येवमित्युक्तः सुहृदाच्च सः ।
जगाद सुन्दरीं दृष्ट्वा विक्लवत्तस्य कारणम् ।।17।।

श्रुत्वा प्राणसमस्याऽस्य दुःखं स्वस्त्रीनिमित्तकम् ।
तमाशु प्राहिणोत्प्राज्ञं सुमित्रो मित्रवत्सलः ।।18।।

प्रेक्ष्य च प्रभवागारं गवाक्षे गूढविग्रहः ।
स तामैक्षत किं कुर्यादियमस्येति तत्परः ।।19।।

अचिन्तयच्च यद्येषा भवेन्नाऽस्याऽनुकूलिका ।
ततो निग्रहमेतस्याः कर्ताऽस्मि सुविनिश्चितम् ।।20।।

अथैतस्याश्रवा भूत्वा कामं सम्पादयिष्यति ।
ततो ग्रामसहस्रेण पूजयिष्यामि सुन्दरी ।।21।।

समीपं प्रभवस्यास्य[6] वनमाला च सोत्सुका ।
प्रदोषसमये स्पृष्टे ताराप्रकरमण्डिते ।।22।।

आसीनां चासने रम्ये पुरो दोषविवर्जितः ।
तामपृच्छदहो भद्रे का त्वमित्युक्तवान् वद ।।23।।

ततो विवाहपर्यन्तं तस्याः श्रुत्वा विचेष्टितम् ।
प्रभवो निष्प्रभो[7] जातो निर्वेदं च गतः परम् ।।24।।

अचिन्तयच्च हा कष्टं मया मित्रस्य कामिनी ।
किमपि प्रार्थिता कर्तुं धिग्मामुच्छिन्नचेतनम्[8] ।।25।।

पापादस्मान्न मुञ्चेऽहं मृते स्वस्य विपादनात्[9] ।
किं वा कलङ्कयुक्तेन जीवितेन ममाऽधुना ।।26।।

इति सञ्चिन्त्य मूर्द्धानं स लुलूषं चकर्ष सः।
कोशतः सायकं सान्द्रच्छायादिग्ध[10]दिगन्तरम्।।27।।

उपकण्ठञ्च कण्ठस्य यावदेनं चकार सः।
निपत्य सहसा तावत्सुमित्रेण न्यरुध्यत[11]।।28।।

जगाद च त्वरा युक्तं परित्यज्य स तं सुहृत्।
आत्मघातितया दोषं प्राज्ञः किं नाऽवबुध्यसे।।29।।

आत्मगर्भेषु दुःखानि प्राप्नुवन्ति चिरञ्जनाः।
ये शरीरस्य कुर्वन्ति स्वस्याऽविधिनिपातनम्।।30।।

इत्युक्ता सुहृदः खड्गं कराच्चाऽस्य सुचेतसा।
सान्त्वितश्च चिरं वाक्यैर्मनोहरणकारिभिः।।31।।

ईदृशी चावयोः प्रीतिरन्योऽन्यगुणयोजिता।
प्राप्यात्यान्तमहोकष्टः संसारपरिवर्जितः।।32।।

पृथक् पृथक् प्रपद्यन्ते दुःखसुखकरीं गतिम्।
जीवाः स्वकर्मसम्पन्नाः कोऽत्र कस्य सुहृज्जनः।।33।।

अन्यदाऽथ विबुद्ध्यात्मा श्रमणत्वं[12] समाश्रितः।
ईशानकल्पे चेन्द्रत्वं[13] सुमित्रः प्राप्तवान् सुखी।।34।।

ततश्च्युत्वेह सम्भूतो द्वीपे जम्बूपदान्तिके।
हरिवाहनराजस्य मथुरायां सुरौ पुरि[14]।।35।।

माधव्यास्तनयो नाम्ना मधुर्मधु स मोहितः।
नभसो हरिवंशस्य यश्चन्द्रत्वमुपागतः।।36।।

मिथ्यादृक् प्रभवो मृत्वा दुःखमासाद्य दुर्गतौ।
विश्वावसोरभूत्पुत्रो ज्योतिष्मत्यां शिखिश्रुतिः।।37।।

श्रमणत्वधरः कृत्वा ततः कष्टं निदानतः।[15]
दैत्यानामधिपो जातश्चमराख्योऽधमो नरः।।38।।

ततोऽवधिकृतालोक:[16] स्मृत्वा पूर्वभवान्निजान्।
गुणान् सुमित्रमित्रस्य चक्रे मनसि निर्मलान्।।39।।

सुचरित्रं सुमित्रस्य स्मर्यमाणं सु पेशलम्।
हृदयं मत्सुरेन्द्रस्य चकर्त्त करपत्रवत्[17] ।।40।।

दध्यौ चेति पुनर्भद्रः सुमित्रोऽसौ महागुणः।
आसीन्मम महामित्रं सहाय:[18] सर्ववस्तुषु।।41।।

स मृत्वा मधुर्जातोऽस्ति करिष्याम्यस्य[19] रक्षणम्।
इत्युक्त्वा चागतो यत्र मधुरस्ति गुणाकरः।।42।।

दृष्ट्वादरेण कृत्वा च सुरत्नैः परिपूजनम्।
शूलरत्नं ददौ तस्मै सहश्रान्तक[20]सञ्ज्ञितम्।।43।।

शूलरत्नं स तत्प्राप्य परां प्रीतिं गतःक्षितौ।
अस्त्रविद्याऽधिराजश्च सिंहवाहनजोऽभवत्।।44।।

इति मधोश्चरित्रं ते कथितं पुण्यकारणम्।
प्रस्तावं प्राप्य भो राजन् प्राकृतं शृणु साम्प्रतम्।।45।।

अथैवं सर्वसौख्येन परिभ्रमन् दशाननः।
वर्षाण्यष्टादशां यावद्गतः कालो न जानतः[21] ।।46।।

विजयार्द्धनगं जेतुं रावणस्य मनोऽभवत्।
सन्ताडितास्तदा भेर्यः प्रयाणपथसूचिका:।।47।।

अथ दुर्लङ्घ्यपत्नेशो नलकुवरनामकः।
मार्गेऽस्ति विजयार्द्धस्य शक्रेण स्थापितः पुरा।।48।।

रावणस्याऽऽगमं श्रुत्वा लेखेन सहितस्तदा।
तेनाऽपि प्रेषितो दूतः प्रेमाच्छक्रं निवेदितुम्।।49।।

मेरुं गच्छंस्तदेन्द्रोऽसौ दूतस्य सन्मुखोऽभवत्।
लेखपत्रञ्च दूतेन दत्तं शक्राय वेगतः।।50।।

शक्रः प्राह ततो दूतं यावन्मेरुं सुवन्दनाम्।
कृत्वा गच्छामि तावत्त्वं मार्गस्य रक्षणं कुरु।।51।।

इत्युक्त्वा स गतो मेरुं दूतस्तु स्वपुरङ्गतः।
कुबेरं[22] सकलं प्रोक्तं दूतेन यत्नकारणम्।।52।।

कुबेरेण ततो मार्गे मायाशालस्तु निर्मितः।
शतयोजनमुत्सेधः क्रूरजीवैर्भयङ्करः ॥53॥

दशास्येन ततो ज्ञात्वा सामीप्यं वैरिणः पुरम्।
ग्रहीतुं प्रेषितः सेन्यैः प्रहस्तोऽनीकिनीपतिः[23]॥54॥

दृष्ट्वा शालं च सेनानी व्याघ्रुट्य प्राह रावणम्।
देव तत्र कुबेरेण महाशालस्तु निर्मितः॥55॥

शतयोजनमुत्सेधः सिंहव्याघ्रैर्भयङ्करः।
अस्मद्भिर्नेतुं शक्यो न जाने किं भविष्यति॥56॥

एतच्छ्रुत्वा स दशास्यश्चिन्तया व्याकुलोऽभवत्।
तदा पुण्याऽनुसारेण शृणु जातं तु कारणम्॥57॥

नलकुंवरकस्याऽथ रम्भा नाम्नाऽस्ति वल्लभा।
रूपं श्रुत्वा दशास्यस्य प्राप्ता सा कामचेष्टिताम्॥58॥

चित्रमालां[24] सखीं स्वस्य तदा भावो निवेदितः।
साऽऽह देवि शृणु शीघ्रं तव कार्यं करोम्यहम्॥59॥

इत्युक्त्वा सा गता वेगात्कैलाशे यत्र रावणः।
मन्त्रिवर्गैः समं धीमानुपविष्टः सभास्थले॥60॥

शालस्य साधनोपायं चिन्तयन्ति[25] मुहर्मुहुः।
चित्रमाला तदाऽऽगत्य दृष्ट्वैनं रावणमवदत्॥61॥

स्वामिन्नहं कुबेरस्य वल्लभायाः प्रिया सखी।
त्वद्दर्शनार्थमायाता मत्कार्यार्थञ्च किंत्वपि॥62॥

तदैकान्ते समानाय रावणाय निवेदितम्।
रम्भायाश्चेष्टितं सर्वं तया विधानपूर्वकम्॥63॥

त्वं दशास्यो महात्यागी देहि दानं मनोभवम्।
कामेन पीडितां रम्भां शान्तिं कुरु सुभोगतः॥64॥

दशास्य प्राह तच्छ्रुत्वाऽन्यस्त्रीसङ्गमनं कदा।
न कुर्वे निन्दितं कर्म परमं पापसाधनम्॥65॥

दशास्येन तदा पृष्टो भ्राता मन्त्री विभीषणः।
इयं वदति यत्कार्यं रम्भायाः कामचेष्टितम्।।66।।
विभीषणस्तदा प्राह सत्येनाऽपि त्वया प्रभो।
अधुनाङ्गीप्रकर्त्तव्यं सा ते दुर्गं प्रदास्यति।।67।।
ततस्तद्वचनात्तेन दूती सन्मानिता मुदा।
ते वचनात्करिष्यामि रम्भायाः सङ्गमं सदा।।68।।
परं त्वत्र वने माऽस्तु भोगः सन्तोषकारणम्।
यदा पुरं तु दुर्लंघ्य ग्रहिष्यामि तदाऽस्तु तत्।।69।।
श्रुत्वेति कथितं गत्वा रम्भायै चित्रमालया।
रम्भाया मुग्धया दत्ता विद्या तस्मै च शालिका।।70।।
विद्यां प्राप्ते दशास्येऽत्र गतः शालश्च कुत्रचित्।
रावणस्य तदा सैन्यं दुर्लंघ्यपुरमागतम्।।71।।
नलकूवरकस्तत्र धृतस्तै रणभूमिषु।
दुर्लंघ्य च समासाद्य स्थितस्तत्र दशाननः।।72।।
तदा च साऽऽगता रम्भा भोगार्थं रावणाऽन्तिकम्।
ततः स प्राह भो देवि किमर्थमभिलष्यते।।73।।
सङ्गं परनरस्याऽस्य महापापस्य कारणम्।
तस्मात् भज स्वभर्तारं नलकूवरसञ्ज्ञकम्[26]।।74।।
इत्युक्त्वा तेन रम्भायाः करे दत्तस्तु कूवरः।
अनेन सह सम्बन्धं कुरु देवि सदासुखम्।।75।।
तच्छ्रुत्वा लज्जिता जाताऽऽसक्ता स्वपुरुषे सदा।
भार्यापुरुषयोः प्रीतिस्ततो जाता विशेषतः।।76।।
अभ्यर्णे रावणं श्रुत्वा शक्रो निर्गन्तुमुद्यतः।
तदा तातश्च सम्पृष्टुं गतोऽसौ विनयानतः।।77।।
शक्रः सम्प्राह भो तात किं कर्तव्यं मयाऽधुना।
अरिः प्राप्तोऽस्ति सामीप्यं रावणो नाम राक्षसः।।78।।

बालत्वे[27] तं निराकर्तुं निर्गतोऽहं तदा त्वया।
निवारितोऽधुना तात[28] शत्रुर्जातो बलाऽधिकः।।79।।
तदा चाह सहश्रारः सुरेन्द्रं मन्त्रिभिः समम्।
दशाननेन सन्धानं कुरु पुत्र सुखप्रदम्।।80।।
रूपिणीं[29] च सुतां देहि रावणाय बलीयसे।
सुखेन कुरु साम्राज्यं प्रीतितश्चक्रिणा समम्।।81।।
अर्द्धचक्री तु जातोऽयं रावणो भरते परम्।
तस्मात्तेन समं युद्धं कर्तुं ते नैव युज्यते।।82।।
शक्रस्तदाह सक्रोधः किमिदं तात भाषितम्।
दीनत्वं हा त्वया कष्टं पुत्रीदानञ्च वैरिणे[30]।।83।।
इत्युक्त्वा प्रोत्थितः शक्रः समागत्य सभास्थले।
देवानाह्वयितुं वेगाद्रणभेरीमताडयत्।।84।।
तदा देवाः समायाता दिक्पालैः सह संमदाः।
वीरेभ्यो वीरपुष्टिञ्च दत्वाऽऽह तान् सुराधिपः।।85।।
भवतां[31] विद्यते युद्धे कुलाकुलपरीक्षणम्।
सत्कुलीनाश्च ये वीराः प्राणान् त्यजन्ति लज्जया।।86।।
तच्छ्रुत्वा सुभटा वीरा: गत्वा गेहं रणोद्धताः।
क्षमयित्वा स्वदारादीन् सर्वान् सम्पृच्छ्य निर्गताः।।87।।
जीविताशां परित्यज्य संनह्य शस्त्रपाणयः।
गोरीन्द्राभा[32] गजा अश्वा वायुवेगा: सुलक्षणाः।।88।।
शस्त्रैः पूर्णा रथा रम्या विमाना विविधाः पराः।
पदातीनां समूहाश्च वाद्यनिर्घोषनिर्भराः।।89।।
उष्ट्रव्याघ्रवृषारूढा: आगता अग्रगामिनः।
चतुर्बलेन संयुक्तः शक्रो युद्धाय निर्गतः।।90।।
सेनयोरुभयोस्तत्र सञ्जातं प्रथमं रणम्।
मारिता राक्षसा: देवैर्दशदिशि पलायिताः।।91।।

स्वबलं निर्बलं दृष्ट्वा चोत्थिता राक्षसा नृपाः।
वज्रवेगः प्रहस्तश्च हस्तो मारीच्यादयाः।।92।।
उत्थितैस्तैर्महायोद्धैर्भग्ना देवविरूथिनी।
भङ्गं दृष्ट्वा स्वसैन्यस्य चोत्थिताः प्रबलाः सुराः।।93।।
मेघमाली तडित्पिंगो ज्वलिताक्षोऽरिसञ्ज्वरः।
रोचकचंदनाद्याश्च महासैन्यसमन्विताः।।94।।
तैश्च ते राक्षसा वीरा वेष्टितास्तैलयंत्रवत्।
रणे व्याकुलतां प्राप्ताः तीक्ष्णशस्त्रैः प्रपीडिताः।।95।।
भग्नं रक्षोबलं दृष्ट्वा कपिवंशशिरोमणिः।
सूनुः महेन्द्रसेनस्य प्रश्नकीर्त्याख्य उच्छ्रितः।।96।।
तेनैकेन महायुद्धे मारितं देवताबलम्।
यत्र तत्र कपिच्छत्राः कपिशिखाः कपिध्वजाः।।97।।
कपीनां दर्शनाद्भीता देवाः कुर्वन्ति पूत्करान्।
समस्ते विजयार्द्धे च त्रासो जातो महाभयात्।।98।।
ततोऽन्ये देवभूपाश्चागताः[33] सुशस्त्रपाणयः।
तैस्त्रासिताः कपिनाथाः महायुद्धविशारदाः।।99।।
अत्रान्तरेऽथ सम्प्राप्तो वीरो माल्यवतः सुतः।
श्रीमालीति महायोद्धा भग्नास्तेन सुरा नृपाः।।100।।
ततो देवाः समायाता युद्धार्थं युद्धचातुराः।
शिखिकेसरिदण्डाऽभ्रकनकप्रवरादयः[34] ।।101।।
आगतानाञ्च देवानां शिरांसि तत्र कोपिना।
श्रीमालिना प्रछिन्नानि[35] कमलानीव सङ्गरे।।102।।
देवानाञ्च बलं भग्नं दृष्ट्वा शक्रस्य सत्सुतः।
समुत्थितो जयन्ताख्यः सङ्गरेऽसौ यमो यथा।।103।।
श्रीमालिनो जयन्तेन लग्नं युद्धं परस्परम्।
देवैः समं महायुद्धं युद्धन्ति कपिराक्षसाः।।104।।

श्रीमालिना सुदण्डेन जयन्तो मस्तके हतः।
मूर्च्छां प्राप्तस्ततो वीरः प्रोत्थितः वन्दनादिना।।105।।

पुनर्युद्धे जयन्तेन भिंडीमालेन ताडितः।
श्रीमाली पतितो भूमौ मूर्च्छां प्राप्य महोजसाः[36]।।106।।

सोऽपि सञ्ज्ञाञ्च सम्प्राप्य श्रीमाली पुनरागतः।
करोति दारुणं युद्धं जयन्तेन समं रणे।।107।।

जयन्तेन पुनर्माली वज्रेण ताडितो हृदि।
श्रीमाली पतितो भूमौ गतजीवो निरर्थकः।।108।।

श्रीमालिनि मृते भग्नं सकलं राक्षसं बलम्।
जयन्तस्य बले जातो जयजयारवो महान्।।109।।

तदाऽत्र राक्षसं सैन्यं भग्नं दृष्ट्वाऽतिकोपतः।
इन्द्रजित् सन्मुखो जातो जयन्तस्य स्वयं सुधीः।।110।।

तयोर्महद्रणे जाते चेन्द्रजिता महात्मना।
बाणैः छित्वा जयन्तस्य शरीरं जर्जरीकृतम्।।111।।

रुधिरारुणितं देहं दृष्ट्वा पुत्रस्य कोपतः।
सुरेन्द्रः स्वयमायातो युद्धार्थं रणमूर्द्धनि।।112।।

शक्रं समागतं दृष्ट्वा रावणः स्वयमागतः।
ततस्तयोर्महायुद्धं जायते जीवबाधकम्।।113।।

दशास्यस्य महासैन्याः कुम्भकर्णविभीषणाः।
खरदूषणमारीचाविन्द्रजिन्मेघवाहनौ ।।114।।

मयहस्तप्रहस्ताद्या युद्धन्ति परमोद्धताः।
शक्रस्याऽपि तथा सैन्याः श्रीरत्नरत्नचन्द्रमाः।।115।।

सिंहवदनव्याघ्राख्याः[37] गजवाहनचन्द्रमाः।
एवमाद्या महायोद्धा युद्धन्ति रणमूर्द्धनि।।116।।

श्रीमालिमालिनोः स्मृत्वा मरणं रावणस्तदा।
समं शक्रेण युद्धं स करोति सङ्गरे रुषा।।117।।

ततो गजागजैर्युद्धं वाजिनो वाजिभिः समम्।
रथिनो रथिभिः सार्द्धं पदातयः पदातिभिः ।।118।।

खेचराः खेचरैः सार्द्धं भूमिगा भूमिगैः समम्।
गगने भूतले युद्धं लग्नं प्राणिक्षयङ्करम्।।119।।

रणवाद्यनिनादेन पूरिता रणभूमयः।
केचित्पतन्ति निर्जीवाः केचिद्व्रणेन पीडिताः।।120।।

केचिच्च मरणं प्राप्ताः केचिदन्तर्बहिर्गताः।
छिन्नहस्तयुगं केचित् केचित्पादविवर्जिताः।।121।।

केचिच्च घ्राणगताः केचित्कर्णगल्लेषु छिद्रिताः[38]।
शिरोविरहिताः केचिद्देहमात्रव्यवस्थिताः।।122।।

तथापि ते रणे वीरा युद्धन्ति खड्गपाणयः।
यष्टिमुष्टिसमाघातैर्घ्नन्ति ते परस्परम्।।123।।

भल्ल[39]खड्गत्रिशूलैश्च चक्रवज्रगदादिभिः।
पातयन्ति भटानन्यान् स्वयं पतन्ति ते च वैः।।124।।

स्वामिभक्ताश्च ते वीरा लज्जायुक्ता धनेप्सकाः।
स्वमरणं न पश्यन्ति रणे युद्धन्ति कोपतः।।125।।

स्वर्गं गच्छन्ति केचिच्च शुभध्यानप्रयोगतः।
तिर्यङ्गतौ नराः केचिच्श्वभ्रं केचिन्मनुष्यताम्।।126।।

राक्षसैः कुम्भकर्णाद्यैर्लोकपालाश्च बन्धिताः।
नागपोशन ते सर्वे आनीताः स्वबलं तदा।।127।।

शक्ररावणयोर्युद्धं जातमत्यन्तभीषणम्।
धूम्रतं[40] गगनं जाता रक्तपूरितमेदनी।।128।।

वह्निव्याप्तं सुदिक्चक्रं शस्त्रविद्युच्चमत्कृतम्।
उच्चनीचस्थलं जातं मनुष्यपशुमृत्यकैः।।129।।

अश्वखुरैः पुनश्चूर्णैः पूरितं समतां व्रजेत्।
देवा पश्यन्ति[41] व्योम्निस्था रणं दृष्ट्वा मुदङ्गताः।।130।।

एकैकं परैः शस्त्रैः छिन्नत्ति रोषतो घनैः।
बाणैराच्छादितो व्योम्नि मार्तण्डो न हि दृश्यते।।131।।

एवं महद्रणं जातं दिनानि पञ्चविंशति।
षड्त्रिंशदायुधैरादौ पश्चाद्विद्याबलेन च।।132।।

इन्द्रस्य सकला विद्या दशाननेन छेदिताः।
स्वविद्याभिश्च सङ्गामे पूर्वपुण्यनियोगतः।।133।।

तथा दशाननस्याऽपि विद्या शक्रेण निष्फलाः।
कृता महति सङ्गामे रणविद्या प्रभेदिता।।134।।

रावणेन तदा क्रोधान्नागादुत्पत्य बन्धितः।
शक्रः शक्रसमो राजा पुण्येऽतीते च पूर्वजे।।135।।

धृते शक्रे बलं तस्य नष्टं सर्वं दिशो दिशि।
रावणस्य बलं[42] तत्र जयारवो तदाऽभवत्।।136।।

विजयार्द्धगिरेस्तस्य श्रेणयोरुभयोरपि।
नृपान्सर्वांश्च संसाध्य साधिता सकला मही।।137।।

त्रिखण्डमेदिनीमेवं साधयित्वाऽतिपुण्यतः।
रावणश्चागतो लङ्कां चतुर्बलसमन्वितः।।138।।

इन्द्रसोमकृतांतादीन् बन्धित्वा नागपाशकैः।
महावाद्यनिनादेन लङ्कां विवेश रावणः।।139।।

इन्द्रादीनां ततः क्षिप्त्वा कारागारे तु दुस्सहे।
स्वयं करोति साम्राज्यं बन्धुभिः सह पुण्यतः।।140।।

अथ शक्रे नृपे बन्धिसदने पतिते सति।
रथनूपुरपत्नस्य दुःखं कुर्वन्ति ताः प्रजाः।।141।।

राजगेहं समागत्य नत्वा वदन्ति दुःखिनः।
सहस्रारं नृपं लोका मोचय भो सुराधिपम्।।142।।

तच्छ्रुत्वाऽमात्यवर्गैश्च सहस्रारः समागतः।
लङ्कायां विनयीभूत्वा रावणस्यान्तिकं मुदा ।।143।।

रावणाय नमस्कृत्य चोऽपविष्टा यथायथम्।
मानितो रावणेनाऽपि सद्वाक्यैर्विनयान्वितैः।।144।

ततः प्राह सहस्रारः शृणु रावण भूपते।
जितः शक्रस्त्वया नाथमुञ्चेदानीं गिरा मम।।145।।

विहस्य रावणः प्राह यदीन्द्रो ग्रामगर्दभान्।
रक्षयिष्यति भृत्यो मे भूत्वा मोचाम्यहं तदा।।146।।

वायुः सन्मार्जनं कुर्याद्यमस्तु जलपूरणम्।
द्वाररक्षां तु सोमो मे पावकः पचनक्रियाम्।।147।।

लङ्कायाश्च बहिर्भागं वीथिं च पण्यवर्त्मनम्[43]।
देवाः शुद्धं करिष्यन्ति जलकुम्भैः प्रसिञ्चनैः।।148।।

तदाऽहं मोचयिष्यामि शक्रादीन्नाऽन्यथा कदा।
इत्युक्ते लज्जिता देवाः अधः पश्यन्ति पापतः।।149।।

ततः प्राह सहस्रारो यदुक्तं च त्वया प्रभो।
तच्च वयं करिष्यामस्तवाज्ञावशवर्तिनः।।150।।

इति श्रुत्वा दशास्येन तुष्टेन मोचिताः सुराः[44]।
स्नानभुक्तिक्रियास्तेषां कारितास्तेन धीमता।।151।।

दशाननस्ततश्चाऽऽह भो देवेन्द्र नरेश्वरः।
अद्य प्रभृति बन्धुस्त्वं ममास्तु हि चतुर्थकः।।152।।

लङ्कायां कुरु साम्राज्यमहं तु रथनूपुरम्।
गमिष्यामि तव[45] प्रीत्या त्वमत्रैव सुखी भव।।153।।

ततः प्राह सहस्रारः सत्यमुक्तं त्वया प्रभो।
तथाऽपि जन्मभूमिस्तु सर्वेषां प्रियदा भवेत्।।154।।

इत्युक्त्वा स्तवनं कृत्वा दशास्यस्य सहस्रधा।
रक्षोभ्यः क्षमयित्वा च देवा जग्मुः स्वमालयम्।।155।।

महावाद्यनिनादेन पुरवर्गसमन्वितः।
लोकपालैः समं शक्रो विवेश रथनूपुरम्।।156।।

राज्यं पूर्वमिव प्राप्तस्तथाऽपि सः सुराधिपः।
स्वजन्मतृणवन्मन्ये रणे मानविभङ्गतः।।157।।

एकस्तम्भं गृहं कृत्वा तस्योपर्याञ्च संस्थितः।
एकान्ते चिन्तयच्छक्रो वैराग्यं भवनाशनम्।।158।।

नाशरूपं[46] च धिग्राज्यं धिग्देहं पापकारणम्।
इदं सर्वं परित्यज्य करिष्याम्यात्मसाधनम्।।159।।

अत्रान्तरे मुनिः प्राप्तो नाम्ना निर्वाणसागरः।
एकस्तम्भगृहे बिम्बं वन्दितुं श्रीजिनेशिनः।।160।।

तदा शक्रेण तं दृष्ट्वा स्थापितं वरमासनम्।
जिनं नत्वा मुनिस्तस्मिनुपविष्टो दयापरः।।161।।

गुरोः पादौ ततो नत्वा भक्त्या स्तुत्वा च देवराट्।
अग्रे स्थितः परं प्रीत्या विनयानतमस्तकः।।162।।

धर्मं श्रुत्वा गुरोर्मुखात्[47] स्वस्याऽपृच्छद् भवांस्ततः।
वैराग्यतत्परो शक्रो मुनिराह ततः शृणु।।163।।

शिखापदाख्यपत्नेऽस्ति कन्या नाम्ना कुलक्षया।
वणिक्कुलसमुत्पन्ना बालत्वे[48] पितरौ मृतौ।।164।।

व्याधिना पीडिता साऽपि लोकोच्छिष्टेन जीविता।
मुहूर्त्तैकं कियत्काले संन्यस्य मरणङ्गता।।165।।

तस्मिन्पुरे च सञ्जाता क्षीरधारा कुटुम्बिनी।
तस्मान्मृत्वा मणौ पत्ने धरणी गोमुखाख्ययोः।।166।।

कुटुम्बिनो सुतो जातः सहस्रभागनामकः।
तत्र सम्यक्त्वमादाय चाऽणुव्रतमजीग्रहत्।।167।।

समाधिना मृतो जातः सुशुक्रे[49] विबुधोत्तमः।
च्युतः पूर्वविदेहेऽथ नगरे रत्नसञ्चये।।168।।

गुणवत्यां मणेर्जातोऽमात्यात् सामन्तवर्द्धनः।
तत्र दीक्षां समादाय ग्रैवेयकं परमं गतः।।169।।

अहमिन्द्रपदं भुक्त्वा ततश्च्युत्वाऽभवन्नृपः ।
सहस्रारनृपात्त्वञ्च हृदयसुन्दरीसुतः ।।170 ।।
अहमिन्द्राच्च्युतो यस्मात्ततोऽत्राऽपि सुराधिपः ।
त्वं जातः पूर्वपुण्येन भोक्ता परमसम्पदः ।।171 ।।
दुःखं करोषि कस्मात्त्वं पापागमनकारणम् ।
पुण्येऽतीते गता लक्ष्मीः स्वभावचपलात्मिका ।।172 ।।
दशास्येन कृतं तत्र मानभङ्गं रणाङ्गणे ।
कारणं तस्य वक्ष्यामि शृणु चैकाग्रचेतसा ।।173 ।।
अरिञ्जयपुरे राजाऽग्निवेगाख्यः खगेश्वरः ।
अहिलाख्या सुता तस्य वेगवत्युदरोद्भवा ।।174 ।।
तस्याः स्वयंवरार्थञ्च समायाता नृपोत्तमाः ।
त्वमपि तत्र चायातः कन्यालोलुपमानसः ।।175 ।।
तत्रान्यश्चन्द्रावर्त्तेशो नन्दमालोऽपि चाऽऽगतः ।
तस्य कण्ठे तया माला क्षिप्ता पूर्वाऽनुपुण्यतः ।।176 ।।
सोऽपि तां वनितां लब्धश्चन्द्रावर्तपुरङ्गतः ।
तस्योपरि तदारभ्य बद्धं वैरं त्वया नृप ।।177 ।।
नन्दमालोऽथ ते भीत्या वैराग्याच्चाभवन्मुनिः ।
एकदा स स्थितो ध्याने रथावर्तमहीधरे ।।178 ।।
ध्यानस्थितो मुनिर्दृष्टः पूर्ववैरेण स त्वया ।
निन्दितो वचनेर्दुष्टैः श्वभ्रगतिप्रदायकैः ।।179 ।।
कथं जातोऽसि तां त्यक्ताऽहिल्यां भोगविचक्षणाम् ।
इत्युक्ता बन्धितो रज्ज्वा वृक्षस्कन्धे त्वया मुनिः ।।180।।
तदा तस्य मुनेर्भ्राता कल्याणाख्यो महामुनिः ।
ध्यानयुक्तः समीपस्थो ध्यानपूर्णमिदमवदत् ।।181 ।।
रे पापिष्ट त्वया केन हेतुना बन्धितो मुनिः ।
त्वमनेन कुपापेन निस्सन्तानो भविष्यसि ।।182 ।।

इत्युक्त्वा शापकं दत्वा स योगी तेन मोचितः।
तदा सः समितो नत्वा सर्वश्रिया तव स्त्रिया।।183।।
सा सम्यग्दृष्टिनी देवी साधुसेवनतत्परा।
तदोपशान्ततां प्राप्तो मुनिस्तस्याः सुवाक्यतः।।184।।
यदि नाम तया साध्या नाऽसौ नीतः शमं भवेत्।
ततस्तस्य स कोपाऽग्निः केन शक्येत् वारितुम्।।185।।
विधाय साधुलोकस्य तिरस्कारं जना महत्।
दुखमत्र प्रपद्यन्ते तिर्यक्षुनरकेषु च।।186।।
तेन त्वं रावणाप्राप्तस्तिरस्कारं महत्तरम्।
इति श्रुत्वा स वैराग्यात्पुत्रे क्षिप्त्वा नृपश्रियम्।।187।।
निर्वाणसागरस्याऽस्य पार्श्वे राजा सुराधिपः।
लोकपालैश्च पुत्रेण समं मुनिरभूत्तदा।।188।।
तपोघोरतरं कृत्वा शुक्लध्यानस्य योगतः।
उत्पाद्य केवलज्ञानं मुक्तिं प्राप्तः सुरेश्वरः।।189।।
लोकपालजयन्तोऽपि तपः कृत्वा सदुस्सहम्।
सर्वकर्मक्षयं कृत्वा शुभध्यानात्दिवङ्गताः।।190।।
धर्मफलेन भवन्ति नरेशाश्चक्रिसुरेन्द्रधरेशगणेशाः।
तीर्थपदं लभते च मनुष्याः सिद्धपदं भवति हि सुधर्मात्।।191।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
रावणत्रिखण्डसाध्यलङ्काऽऽगमनं शक्रमोक्षगमनवर्णनो नाम सप्तमोऽधिकारः।।7।।

❖❖❖

1. पश्यन् इति ख प्रतौ
2. तत्र इति ग प्रतौ
3. धातकैरावते इति ग प्रतौ
4. चक्रेय इति ख प्रतौ
5. विवेचनः इति क प्रतौ
6. प्रभवस्याऽथ इति ख प्रतौ
7. वैरागी स प्रभो जातो इति ख प्रतौ
8. मूर्च्छा न चेतनम् इति क / ख प्रतौ
9. विवादनात् इति क/ग प्रतौ
10. व्याप्त इति ख प्रतौ
11. न्यरुध्यतः इति ख/ग प्रतौ
12. श्रवणत्वं इति त्रयो प्रतौ परन्तु श्रमणत्वं भवेत्।
    अतोऽत्र मूलपाठे श्रमणत्वं कृतमस्ति।
13. ईशानकल्पेचेन्द्रत्वं इति क प्रतौ
14. मथुरायामुरौपुरि इति क प्रतौ
    मथुराया सुरौ परि इति ग प्रतौ
15. श्रवणत्वधरः कृत्वा ततः कष्टं निदानतः इति त्रयौ प्रतौ
    श्रमणत्वधरः कृत्वा तपः कष्टं निदानतः इति प.पु.1/12/56
    प्रसङ्गानुसारेण श्रमणत्वधरः पाठः स्यात् ।
16. लोके इति क प्रतौ
17. कर्तरपत्रवत् इति ख प्रतौ
18. सहाव्य इति क प्रतौ
19. करिष्याम्यऽर्थ इति क प्रतौ
20. सहस्रान्तिक इति ख प्रतौ
21. जानितः इति क/ख प्रतौ
22. कुवेरे इति क/ख प्रतौ
23. प्राह स्तोनीकिनी इति ख प्रतौ
24. मित्रमाला इति ख प्रतौ

25. चिन्तेतंस इति ग प्रतौ
26. स्वसैव नलकूवरम् इति क/ख प्रतौ
    ग प्रतौ 'सेवाया' अतिरिक्त पदः प्राप्यते।
27. बालत्व इति ख प्रतौ
28. अधुनास्तु इति ख/ग प्रतौ
29. रूपणीं इति क/ख प्रतौ
30. वैरणौ इति ग प्रतौ
31. भवतीं इति ख प्रतौ
32. गरीन्द्र इति ख प्रतौ, शीरीन्द्र इति ग प्रतौ
33. देवभूपालागता: इति ग प्रतौ
34. प्रभवादयं इति ग प्रतौ
35. प्रछन्नादि इति क प्रतौ
36. महोजसां इति ख प्रतौ, महोजसा इति ग प्रतौ
37. व्याघ्रस्य इति ख/ग प्रतौ
38. छिन्द्रिता इति क प्रतौ
39. तल्ल इति ख प्रतौ
40. धूम्निंतं इति क प्रतौ
41. देवा नृत्यंति इति क प्रतौ
    दैव पस्यंति इति ग प्रतौ
42. बले इति क/ख प्रतौ
43. पण्यवर्तिनम् इति ग प्रतौ
44. तुष्टेन तेन मोचिता: इति ख प्रतौ
45. तत इति ख प्रतौ
46. नानारूपं इति क प्रतौ
47. गुरोरास्यात् इति ख/ग प्रतौ
48. बाल्येऽपि इति क प्रतौ
49. शुक्राद्वे इति ख/ग प्रतौ

❖❖❖

अष्टमोऽधिकारः

अथैकदा दशास्योऽसौ गतो मेरुं सबान्धवः।
जिनेन्द्रवन्दनां कृत्वा प्रत्यागच्छन्निजेच्छया।।1।।
विभक्तपर्वतेऽपश्यन् बहुलोकसमागमम्।
तदाऽपृच्छन्स मारीचं कस्मादेते समागताः।।2।।
तदाह मारिचो मन्त्री देवसौवर्ण[1]पर्वते।
अद्यैवाऽनन्तवीर्यस्य मुनेः केवलमुद्भवत्।।3।।
पूजायै तस्य देवेन्द्राः पशवो मानवाः सुराः।
समं स्त्रीभिश्च गच्छन्ति परमानन्दपूरिताः।।4।।
ततस्तद्वचनं श्रुत्वा सम्यग्दर्शनभावितः।
परं पुरन्दरग्राहः प्रमोदं प्रतिपन्नवान्।।5।।
अवतीर्णश्च स्वदेशाद्विप्रकृष्टान्महाद्युतिः।
द्वितीय इव देवेन्द्रो वन्दनायै महामुनेः।।6।।
वन्दित्वा तुष्टवुः साधुमिन्द्रः प्राग्रहरास्ततः।
आसीनाश्च यथास्थानं बद्धाञ्जलिपुटाः सुराः।।7।।
रावणोऽपि नमस्कृत्य स्तुत्वा चोद्यातभक्तितः।
विद्याधरजनाकीर्णः स्थितः समुचितावनौ।।8।।
ततश्चतुर्विधैः सङ्घैर्देवैस्तिर्यङ्नरैस्तथा।
कृतशंसं मुनिश्रेष्ट शिष्येणैवमपृच्छत्[2]।।9।।
भगवन् ज्ञातुमिच्छन्ति धर्माधर्मफलं जनाः।
सनम्रो मुक्तिहेतुञ्च तत्सर्वं वक्तुमर्हथ।।10।।
ततः सुनिपुणं शुद्धं विपुलार्थं मिताक्षरम्।
अप्रकृष्यं जगौ वाक्यं मुनिः सर्वहितं प्रियम्।।11।।
जीवोऽयं द्विविधो ज्ञेयः संसारी मुक्तकस्तथा।
संसारी चतुर्धा प्रोक्तः श्वभ्रतिर्यङ्नरैः सुरैः।।12।।

व्रतं भवेन्मनुष्येषु किञ्चिच्च पशुजन्मसु ।
देवश्वभ्रेषु नास्त्येव व्रतसम्भवकारणम् ।।13।।
तियङ्मनुष्यदेवाश्च कुर्वन्ति जिनपूजनम् ।
जलेक्षुघृतदुग्धैश्च दधिभिश्च जिनस्य वै ।।14।।
संस्नाप्यन्ति[3] जलाद्यैश्चाऽष्टधाऽर्च्चनैः सुभक्तितः ।
पूजापुण्यप्रभावेन भवन्ति स्वर्गसम्पदः ।।15।।
व्रतञ्च द्विविधं ज्ञेयं यतिश्रावकगोचरम् ।
यतीनां सकलं ज्ञेयं गृहिणां विकलं तथा ।।16।।
अहिंसाऽनृतमचौर्यं ब्रह्मचर्याऽपरीग्रहे ।
पञ्चसमितयश्चाऽपि गुप्तित्रयं तथा भवेत् ।।17।।
रत्नत्रयस्य संशुद्धिः साक्षान्मोक्षस्य कारणम् ।
मोक्षे च परमं सौख्यं लोकातीतं निरञ्जनम् ।।18।।
श्वभ्रतिर्यङ्मनुष्येषु परमं दुःखमेव च ।
दुःखं मत्वा सुखं मूर्खा भोगेषु च रसन्ति ते ।।19।।[4]
सम्यक्त्वरत्नमप्राप्य मिथ्यात्वं पञ्चधा परम् ।
ध्यात्वा च पञ्चसंसारे भ्रमन्ति जीवराशयः ।।20।।
मिथ्यात्वञ्च ततस्त्यक्त्वा सम्यक्त्वं परिपालयेत् ।
व्रतानि सेवयेन्नित्यं स्वर्गमोक्षसुखाप्तये ।।21।।
एवं भेदाः सुतत्त्वस्य जिननाथेन भाषिताः ।
तच्छ्रुत्वा च प्रजाः सर्वास्तुष्टा चेतसि संमुदा ।।22।।
महाव्रतधरा केचिज्जाताश्च लघुकर्मिणः ।
केचिदणुव्रताधीराः[5] केचिन्सम्यक्त्वपालकाः ।।23।।
एकेनोक्तं तदा प्रीत्या किञ्चिद् गृहाण रावण ।
अणुव्रतं गृहस्थानां स्वर्गसौख्यफलप्रदम् ।।24।।
तच्छ्रुत्वाह दशास्योऽसौ न शक्तोऽहं कदापि च ।
सद्व्रतं ग्रहीतुं देव सदा पापिमनो मम ।।25।।

तस्मादेकं ग्रहिष्यामि किञ्चिच्च फलदायकम्।
या नेच्छेत्परनारी मां तां न गृह्णामि शक्तितः।।26।।
मम रूपं समालोक्य का नेच्छेद्वनिता च माम्।
इति मनसि संध्याय तद्व्रते निश्चयकृतः।।27।।
यद्यपि सा शचीरूपा मयीच्छा परिवर्जिता।
परस्त्रीं न ग्रहिष्यामि तां सर्वथेति निश्चयात्।।28।।
इति निश्चित्य तत्तेन व्रतं ग्रहीतमुत्तमम्।
गुरुणापि च तद्दत्तं यद्भविष्यति निश्चितम्।।29।।
तथाव्रतधरौ जातौ कुम्भकर्णविभीषणौ।
गृहस्थव्रतसत्पात्रौ साधुसेवनतत्परौ।।30।।
हनूमतादयः सर्वे स्वशक्त्या व्रतधारिणः।
जाता अनन्तवीर्यस्य पार्श्वे पुण्यस्यहेतवे।।31।।
ततो जिनान्नमस्कृत्य गतास्ते स्वं स्वमालयम्।
दशाननोऽपि लङ्कां स्वां गतो बन्धुसमन्वितः।।32।।
तच्छ्रुत्वा श्रेणिकोऽपृच्छत् को हनूमानयं प्रभो।
गौतमः प्राह भो राजन् शृणु हनूमतः कथाम्।।33।।
अथाऽस्ति दक्षिणश्रेण्यामादित्याख्यं पुरं वरम्।
प्रह्लादाख्यो नृपस्तत्र केतुमतीति वल्लभा।।34।।
तयोर्वायुकुमाराख्यः पुत्रोऽस्ति पुण्यवान् परः।
तद्विवाहस्य चिन्ता हि प्रह्लादः प्रकरोति सः।।35।।
आस्तां तावत्कथामन्यां शृणु कौतुककारिणीम्।
भरतान्ते समुद्रस्य समीपे वह्निके दिशि।।36।।
दन्ती नाम्ना नगोऽस्त्यत्र महेन्द्राख्यं पुरं शुभम्।
महेन्द्राख्यो नृपस्तस्य मनोवेगेति वल्लभा।।37।।
गुणवन्तः शतं[6] पुत्रा नामतोऽरिन्दमादयः।
एका पुत्री सुरूपाद्या नाम्ना त्वञ्जनसुन्दरी।।38।।

तां यौवनवतीं दृष्ट्वा महेन्द्राख्यः पिताऽवदत्।
मन्त्रिवर्गं समाहूय कस्मै देया तु कन्यका।।39।।
अमरसागरो मन्त्री ततः प्राह शृणु प्रभो।
दशाननाय दातव्या भरतस्यार्द्धचक्रिणे।।40।।
नो चेदिन्द्रजिते देया मेघनादाय वा तथा।
समर्थसज्जनं प्राप्य जनो याति सुपूज्यताम्।।41।।
नो चेत् स्वयंवरं कुर्याच्छुभं तेन भविष्यति।
कन्या स्वमनसि प्राप्तं वरं भव्यं वरिष्यति।।42।।
इत्युक्तं तद्वचः श्रुत्वा सुमतिः प्राह बुद्धिमान्।
दशाननोऽतिवृद्धोऽस्ति तथापि बहुपत्नीकः।।43।।
एकस्मै चार्पिते कन्यां [7]शक्रज्जिन्मेघनादयोः।
भविष्यति रणं कष्टं श्रीषेणसुतयोर्यथा[8]।।44।।
स्वयंवरे विरुद्धः स्याद्यथाऽकम्पनमण्डपे।
तस्माद्दक्षिणसुश्रेण्यां कनकनगरं शुभम्।।45।।
कनकाभो नृपस्तत्र सुमना तस्य भामिनी।
विद्युत्प्रभस्तयोः पुत्रः कन्या तस्मै च दीयते।।46।।
इत्युक्ते सुमतौ पश्चादाह सन्देहपारगः।
विद्युत्प्रभोऽभवद्रूपी किन्तु भोगेषु निस्पृहः[9]।।47।।
प्राप्तेऽष्टादशवर्षे स दीक्षां जैनीं गृहिष्यति।
घोरतरं तपः कृत्वा शिवस्थानं गमिष्यति।।48।।
रत्नदीपं मया गत्वा श्रुतमस्ति मुनेर्मुखात्।
तत्पितृप्रश्नकाले तु तनुजस्य ततः शृणु।।49।।
कन्येयं प्रापिते तस्मै भ्रष्टशोभा भविष्यति।
तस्मात्प्रह्लादराजस्य सुताय दीयते सुता।।50।।
त्वत्पुत्री तत्र भो राजन् सुखिनी च भविष्यति।
तच्छ्रुत्वा निश्चयं कृत्वा मन्त्रिणः पूजिता नृपैः।।51।।

एतस्मिन्नन्तरे रम्यो मधुमासः समागतः।
देवा गच्छन्ति पूजायै नगं नन्दीश्वरं प्रति।।52।।
अष्टाह्निकमहोत्साहं संकर्तुं[10] श्रीजिनेशिनः।
नृपा विद्याधराः सर्वे गताः कैलाशपर्वतं।।53।।
बन्धुवर्गैर्महेन्द्रोऽपि समेतोऽष्टापदं नगम्।
गतो जिनेन्द्रपूजायै पापनाशस्य हेतवे।।54।।
द्विसप्ततिजिनान्नत्वा पूजयित्वा च निर्वृतः।
उपविष्टः शिलादेशे निर्मलो बन्धुभिः समम्।।55।।
प्रह्लादोऽपि समायातस्तत्र श्रीजिनवन्दितुम्।
पूजयित्वा जिनं नत्वा तच्छिलायां समागतः।।56।।
तं[11] सामीप्यागतं दृष्ट्वा महेन्द्रः प्रोत्थितो मुदा।
तौ च परस्परं प्रीत्या समालिङ्ग्य च हर्षितो।।57।।[12]
उपविष्टौ शिलायां तौ निर्मले रत्नकम्बले।
क्षेमं देहादि सम्पृच्छाद्राजानौ च परस्परम्।।58।।
उचे महेन्द्रराजोऽथ ममास्ति कन्यका वरा।
तच्चिन्तया समाधानं नाऽस्ति प्रह्लादभूपति[13]।।59।।
यस्य पुत्री समं शल्यं[14] नास्ति तस्य सुखं कदा।
कस्मै देया भवेत्किम्वा चेति चिन्ता दिने दिने।।60।।
मनो मे विद्यते दातुं तव पुत्राय कन्यकाम्।
सुरूपाय सुरूपां तां यथा रत्नञ्तु काञ्चने।।61।।
अत्रान्तरे समायाता यूयं पुण्यानुसारतः।
अधुना मे गता चिन्ता प्रह्लादं तव दर्शनात्।।62।।
ततो जगाद प्रह्लादो ममाऽपि वर्तते मनः।
याचितुं तव पुत्रीं तां मत्पुत्राय गुणात्मने।।63।।
इति सम्भाष्य सम्प्रीत्या तत्रैव तत्क्षणे कृतम्।
पुङ्गीपत्रादिसद्दानं ताभ्यां विवाहसूचकम्।।64।।

उपाध्यायात्सुमुहूर्त्तं सम्प्राप्य तृतीये दिने ।
भविष्यति महालग्नं तन्निश्चित्य[15] गृहङ्गतौ ।।65।।
महेन्द्रनगरे राजा सुसामग्रीं विवाहजाम् ।
तथादित्यपुरे रम्ये प्रह्लादः प्रकरोति च ।।66।।
तदा लोकमुखाच्छ्रुत्वा रूपं यौवनलक्षणे ।
अञ्जनायाः शरीरस्य पवनः कामपीड़ितः ।।67।।
मदनस्य दशाऽवस्थां प्राप्तः प्रह्लादनन्दनः ।
आद्ये तद्विषयाचिन्ता द्वितीये द्रष्टुमिच्छकः ।।68।।
तृतीये दीर्घनिःश्वासश्चतुर्थे ज्वरसम्भवः ।[16]
उदासीनं सुगन्धेषु षष्टे भक्तं विषोपमम् ।।69।।[17]
सप्तमे तत्कथासक्तः उन्मत्तश्चाऽष्टमे भवेत् ।
नवमे प्राप्तवान्मूर्च्छां दशमे दुःखधारणम् ।।70।।
सम्पन्नोऽपि महाधैर्यो मन्मथेन प्रपीडितः ।
क्वचिन्न लभते स्वास्थ्यं संद्रष्टुमञ्जना मनः ।।71।।
श्रृङ्गाररहितो वीरो महाचिन्तातुरोऽभवत् ।
प्रहसिताख्य मित्रेण पृष्टं उद्वेगकारणम् ।।72।।
तदाह पवनो मित्रं तवाग्रे न हि लज्जनम् ।
अञ्जनां द्रष्टुमिच्छाऽस्ति रूपलावण्यभूषिताम् ।।73।।
तच्छ्रुत्वा प्राह तं मित्र तवास्मात्तृतीये दिने ।
तया सह विवाहोऽस्ति स्वयं पश्यसि चाञ्जनाम् ।।74।।
ततो जगाद तं मित्रं सम्प्रीत्या पवनञ्जयः ।
दिनत्रयं गमिष्यन्ति तावद्यास्यामि मृत्युताम् ।।75।।
प्रहसितस्ततः प्राह विहस्य पवनं प्रति ।
एवं चेत्तत्र नेष्यामि रात्रौ त्वां तु स्थिरो भव ।।76।।
यावत्तयोः समालापो वर्त्ततेऽयं सुचित्तयोः[18] ।
तावत्तदुपकारी च गतोऽस्तं घर्मदीधितिः ।।77।।

ततः समुचिते काले तस्मिन् प्रस्तुतकर्मणि।
इत्यवोचत् सोत्साहः सुहृदं पवनञ्जयः।।78।।
उत्तिष्ठ मित्र गच्छावो यत्रास्त्यञ्जनसुन्दरी।
तदोत्थित्य च तौ मित्रौ निर्गतौ गगनाङ्गणे।।79।।
वेगात्तन्नगरे प्राप्तावञ्जनाया गृहं वरम्।
गवाक्षे सप्तमपृथ्व्याश्चोपविष्टौ बहिःस्थले[19]।।80।।
अन्तःस्थिताञ्च चन्द्रास्यामञ्जनां तामपश्यताम्[20]।
रूपलावण्यनिर्मग्नां स्तनकुम्भविराजिताम्।।81।।
हेमवर्णां मृगीनेत्रां कलाविज्ञानभूषिताम्।
षोडशाभरणैर्युक्तां स त्वां च सुभगां सदा।।82।।
तां दृष्ट्वा मनसि प्राप्तः सन्तोषं पवनञ्जयः।
अत्रान्तरे सखी चास्या वसन्तमालिकावदत्।।83।।
अहो त्वं पुत्रि धन्याऽसि[21] त्वया लब्धो वरोत्तमः।
धर्मी वायुकुमाराख्यो विद्यारूपगुणान्वितः।।84।।
तस्याऽङ्के भुञ्ज भोगास्त्वं पूर्वपुण्यानुसारतः।
पश्यति लज्जया साधो दृष्ट्वा सुप्रीतिचेतसा।।85।।
सख्यन्या मिश्रकेशाख्या दुष्टवाक्यमिदमवदत्।
किमुक्तमञ्जनां वाक्यं वसन्तमालिके त्वया।।86।।
सत्यं पुण्यं भवेदस्या विद्युत्प्रभो लभेद्यदिः।
विद्यालावण्यसम्पूर्णो भर्ता गुणविशारदः।।87।।
एकापि घटिका श्रेष्ठा तेन भोगविधायिना।
तस्याङ्के संस्थिता साध्वी शोभते हेमरत्नवत्।।88।।
विद्युत्प्रभस्य वायोश्च बहुरन्तरमन्तरम्।
मेरुसर्षपयोर्यावदब्धिगोखुरयोरिव[22] ।।89।।
वार्त्तामेवं प्रकुर्वन्त्यौ सख्यौ पापनिबन्धने।
गवाक्षे संस्थितो वीर: शृणोति पवनञ्जयः।।90।।

मिश्रकेश्या वचः श्रुत्वा निष्ठुरं पवनो रुषा।
उद्युक्तो बाणमाकृष्य मारितुमञ्जनां च ताम्।।91।।
हन्यमाना मया दुष्टा परनररता त्वियं।
विद्युत्प्रभेन प्रीत्याऽत्र रक्षणीया पराक्रमात्।।92।।
अस्या नास्ति मयि प्रीतिर्विद्युत्प्रभे च विद्यते।
तस्मादेतां हनिष्यामि जीवघातेन पापिनीम्।।93।।
प्रहसितेन हस्ते स तदा धृत्वा निवारिता।
स्त्रीहत्या च महापापकारणं नरकप्रदम्।।94।।
तस्मादुत्तिष्ठ गच्छावो वेगेनात्मगृहं वरम्।
इत्युक्त्वा निर्गतो तस्माद्वैरं धृत्वाञ्जनोपरि।।95।।
गतागतौ न केनाऽपि ज्ञातौ कुमारमन्त्रिणौ।
स्वैरं विहत्य[23] गेहं स्वं गतौ तौ गूढदर्शिनौ।।96।।
क्षणैकं तत्र वैराग्यं सम्प्राप्तः पवनोऽवदत्।
धिग् स्त्रीजन्म परं लोके परनरेषु तत्परम्।।97।।
मातृपितृगुरुन् बन्धून् हनन्ति कुपितास्त्रियः।
परनरे सदासक्ता वनिता पापकूपिका।।98।।
एवं चिन्तयतस्तस्य प्रभातमभवत्तदा।
प्राह प्रहसितं मित्रं कोपेन पवनञ्जयः[24]।।99।।
वेगेनाह्वय तु दण्डं गमिष्याम्याञ्जनापुरम्।
तच्छ्रुत्वा तेन मित्रेण रणभेरी प्रताडिता।।100।।
भेरीनिस्वानमाकर्ण्य समागता नभश्चराः।
तैः सह निर्गतो वायुर्महेन्द्रनगरं प्रति।।101।।
पुरस्य सन्निधिं गत्वा रणभेरीञ्च ताडिता।
तच्छ्रुत्वा तु महेन्द्राख्यं पुरं कलकलायितम्।।102।।
महेन्द्रोऽपि ततो भीत्या किमिदं किमिदमवदत्।
गत्वागत्य मनुष्येण कथितं पवनागमम्।।103।।

तच्छ्रुत्वा चाञ्जनादेवी मनसीदमचिन्तयत् ।
अहो पापञ्च मे पश्य मिश्रकेश्या कथं कृतम् ।।104।।

अस्या दुष्टवचः श्रुत्वा भर्त्ता मां कोपताङ्गतः ।
वैरिण्या मेऽनया सर्वं साधितं वैरकारणम् ।।105।।

मे यद्युपशमं भर्त्ता यास्यति धर्मबुद्धितः ।
तदा भुक्तिं करिष्यामि नोचेदनशनं मम ।।106।।

भटैस्तदा महेन्द्रेण कृतं यत्नं पुरस्य वै ।
दूतश्च प्रेषितो वेगात् प्रह्लादभूपतिं प्रति ।।107।।

दूताच्छ्रुत्वा च प्रह्लादस्तत्रागतोऽतिवेगतः ।
पवनं प्राह भो पुत्र किमिदं वैरकारणम् ।।108।।

अत्र केन किमुक्तोऽसि शान्तो भव दयां कुरु ।
इत्यादि वचनैर्वायुर्विज्ञप्तो जनकेन सः ।।109।।

वायोः पादौ महेन्द्रेण भक्त्या स्वमस्तके धृतौ ।
ततस्तद्गौरवं भक्तुमशक्तोऽसौ न्यवर्तत[25] ।।110।।

वायुराह तदा चित्ते संविवाह्यञ्जनां च ताम् ।
त्यजिष्यामि सुदूरेण यावज्जन्मदुरात्मिकाम् ।।111।।

यतोऽन्येनाऽपि केनाऽत्र विवाहेन सुवर्जिता ।
नरासङ्गमदुःखेन दुःखिनी सा भविष्यति ।।112।।

चकार विदितार्थञ्च मित्रं तेन च भाषितः ।
साधु ते विदितं बुद्ध्या मयाऽप्येते निरूपितम् ।।113।।

निर्वृतं दयितं श्रुत्वा कन्यायाः संमदोऽभवत् ।
ततः समयमासाद्य तयोर्विवाहनिर्वृतः ।।114।।

कोमलोऽपि करस्तस्यास्तस्य वह्निसमोऽभवत् ।
अस्य[26] भावमजानस्य पूर्वपापानुबन्धतः ।।115।।

ततो विधानयोगेन पूर्णे विवाहमङ्गले ।
प्रमोदं परमं प्राप्ताः सशब्दा बान्धवास्तयोः ।।116।।

नानाद्रुमलताकीर्णे[27] फलपुष्पविराजिते ।
कृतो मासं वने तत्र विभूत्या परमोत्सवः ।।117।।
कृत्वा यथोचिताऽऽलापाः कृतपूजा परस्परा ।
यथा[28] स्वं ते ययुः सर्वे वियोगाः दुःखिता क्षणम् ।।118।।
अथैकान्तगृहे क्षिप्त्वा नृपागारस्य मध्यगे ।
न जल्पति तया सार्द्धं न तां पश्यति चक्षुषा ।।119।।
प्रियविरहदुःखेन दुःखिनी साञ्जना सती ।
करोति विललापं हि कातरभं जनं मनः ।।120।।
निद्रां न लभते रात्रौ चाश्रुपूरितलोचना ।
वायुर्वायुरिति वाक्यं न च विस्मरति क्षणम् ।।121।।
दीर्घोष्णतरनिश्वासा दग्धपाणिकपोलिका ।
स्नानताम्बूललेपादीन्नाऽऽचरति कदापि सा ।।122।।
करोति भोजनं[29] नैव वेलायां दुःखचेतसा ।
अपराधविमुक्ताऽहं त्यक्ता भर्त्ता रुषा कुतः ।।123।।
एवमादिमहालापान् करोत्यञ्जनसुन्दरी ।
तच्छ्रुत्वा बान्धवाः सर्वे सञ्जाता दुखिनः पराः ।।124।।
पापात्किमञ्जनायाश्च पवनः पूर्वजन्मनः ।
न करोति परां प्रीतिं तया सार्द्धं सुखप्रदाम् ।।125।।
अथवा पवनस्यैव भोगाऽन्तरायकर्मणः ।
असौ भुनक्ति भोगान्न संसारसुखदायकान् ।।126।।
एवं ते सजनाः सर्वे प्रह्लादपक्षिवर्तिनः ।
कुर्वन्ति विविधां चिन्तामसाध्ये कार्यसम्भवे ।।127।।
अत्रान्तरे विरुद्धोऽभूद्रावणेन समं महत् ।
वरुणस्य परं गर्वं केवलं विभ्रतो बलम् ।।128।।
केकसीसूनुना दूतः प्रेषितश्चेत्यभाषत ।
वरुणं स्वामिनः शक्त्या दधानः परमां द्युतिम् ।।129।।

श्रीमान् विद्याधराधीशो वरुणमाह रावणः।
यथा कुरु प्रणामं मे सज्जीभव रणाय वा।।130।।
प्रकृतिस्थिरचित्तोऽथ विहस्य वरुणोऽवदत्।
दूतको रावणो नाम क्रियते तेन का क्रिया।।131।।
नाहमिन्द्रो जगन्निन्द्यवीर्यो वैश्रवणोऽथ वा।
सहस्ररश्मिसञ्ज्ञो वा मरुतौ वाऽथवा यमः।।132।।
देवताधिष्ठितैः रत्नैर्दर्प्पोऽस्याभवदुत्तमः।
आयातु सममेभिस्तं नयाम्यद्य विसञ्ज्ञताम्।।133।।
नूनमासन्नमृत्युस्त्वं येनैवं भाषसे स्फुटम्।
अभिध्यायेति तं दूतो गत्वा भर्त्रे न्यवेदयत्।।134।।
ततः परमकोपेन परितो वारुणं पुरम्।
आगमद्रावणो युक्तः[30] सेनयोदधिकल्पया।।135।।
प्रतिज्ञां च चकारे मां रत्नैरेष मया विना।
नेतव्यश्चपलो[31] भङ्गं मृत्युं वेति ससम्भ्रमः।।136।।
राजीवपौण्डरीकाद्याः क्रुद्धा वरुणनन्दनाः।
विनिर्ययुः सुसन्नद्धाः श्रुत्वा प्राप्तं बलं द्विषः।।137।।
रावणस्य बलेनामा तेषां युद्धमभूत्परम्।
अन्योन्यघातसंञ्छिन्नं विविधायुध[32] संहति।।138।।
गजाः गजैः समं शक्त्या[33] वाजिनोऽश्वै रथारथैः।
भटाभटैः कृतारावा दष्टोष्ठारक्तलोचनाः।।139।।
पराचीनं ततः सैन्यं त्रैकूटैर्वारुणं कृतम्।
चिराय कृतसङ्ग्रामं दत्तसोढायुधोत्करम्।।140।।
जलकान्तस्ततः क्रुद्धः कालाग्निरिव दारुणः।
अधावद्राक्षसं सैन्यं हेति पञ्जरमध्यगः।।141।।
ततो दुर्वारवेगं तं दृष्ट्वा जातं रणाङ्गणे।
गोपायितः स्ववाहिन्या रावणो दीप्तशस्त्रया।।142।।

वरुणेन कृताश्वासास्ततस्तस्य[34] सुताः पुनः ।
परमं योद्धुमारब्धा विध्वस्तभटकुञ्जराः ।।143।।
तयोर्यावद्दशग्रीवः क्रोधदीपितमानसः ।
गृह्णाति कार्मुकं क्रूरो भ्रकुटी कुटिलालिका ।।144।।
दत्तयुद्धश्चिरं तावत्खेदवर्जितमानसः ।
वारुणीनां शतेनाशु गृहीतः खरदूषणः ।।145।।
ततश्चित्ते दशग्रीवः चकारात्यन्तमाकुलः ।
यथा न शोभतेऽस्माकमधुना रणधीरिति[35] ।।146।।
खरदूषणभद्रस्य प्रवृते परमाहवे ।
माऽभून्मरणसम्प्राप्तिस्तस्माच्छान्तिरिहोचिता ।।147।।
इति निश्चित्य सङ्ग्राम शिरसोऽपससारसः ।
सोदराणां यतः कृत्ये मुच्यते चेतसा सदा[36] ।।148।।
ततः स मन्त्रिभिः साकं प्रवीणैर्मन्त्रवस्तुनि ।
सन्मन्त्य निजसामन्तान् स्वदेशसमवस्थितान् ।।149।।[37]
समग्रबलसंयुक्तान्सर्वान् दीर्घाऽध्वगामिभिः ।
आह्वायच्छिरोबद्ध[38] लेखमालैरिति द्रुतम् ।।150।।
प्रह्लादमपि तत्रायाद्रावण[39]प्रेषितो नरः ।
स्वामिभक्त्या कृतं चास्य करणीयं यथोचितम् ।।151।।
विद्याभृतां प्रभोर्भद्र ! भद्रमित्यद्यचोदितः ।
सादरं भद्रमित्युक्त्वा स लेखं न्यक्षिपत्पुरः[40] ।।152।।
ततः स्वयं समादाय कृत्वा शिरसि संभ्रमात् ।
प्रह्लादो वाचयल्लेखमस्यार्थस्याभिधायकम् ।।153।।
श्रीमद्दशाननो राजा प्रह्लादकमिदमवदत् ।
गच्छामि वरुणं जेतुं चतुर्बलेन संयुतः ।।154।।
यथा विद्याधराः सर्वे आगता अत्र त्वं तथा ।
आगच्छत्वतिवेगेन स्वामिभक्तिपरायणः ।।155।।

ततो लेखार्थमावेद्य[41] वायवे निर्विलम्बितम्।
गमने स मतिञ्चक्रे कृतमन्त्रः सुमन्त्रिभिः।।156।।
अथ तं गमने युक्तं जानुस्पृष्टमहीतलः।
वायुर्व्यज्ञापयन् कृत्वा प्रणामं रचिताञ्जलिः।।157।।
नाथ ते गमनं युक्तं विद्यमाने कथं मयि।
आलिङ्गनं फलं कृत्यं जनकस्य सुतैर्ननु।।158।।
ततो न जात एवाऽस्मि यदि ते न करोमि तत्।
गमनाज्ञा प्रदानेन प्रसादं कुरु मे ततः।।159।।
ततः पिता जगादैनं कुमारोऽसि रणे भवान्।
आगतो न क्वचित् खेदं तस्मादाशु व्रजाम्यहम्।।160।।
उन्मज्य[42] ततो वक्षः कनकाद्रितटोपमम्।
पुनराजोधरं वाक्यं जगाद पवनञ्जयः।।161।।
तात मे लक्षणं शक्तेस्त्वयैव जननं ननु।
जगद्दाहे स्फुलिङ्गस्य किं वा वीर्यं परीक्षते।।162।।[43]
भवच्छासित[44]शेषाति पवित्रीकृतमस्तकः।
भङ्गे पुरन्दरस्याऽपि समर्थोऽस्मि न संशयः[45]।।163।।
अभिधायेति[46] कृत्वा च प्रणामं प्रमदा पुनः।
उत्थायानुष्ठितस्नानभोजनादिवपुःक्रियः।।164।।
सादरं कुलवृद्धाभिर्दत्ताशीः[47] कृतमङ्गलः।
प्रणम्य भावतः सिद्धान् दधानः परमां द्युतिम्।।165।।
वाष्पाकुलितनेत्राभ्यां मङ्गलध्वंसभीतितः।
आशीर्दानं प्रवृत्ताभ्यां पितृभ्यां मूर्ध्नि चूम्बितः।।166।।
आपृच्छ बान्धवान्सर्वानभिवाद्य च सस्मितः[48]।
सम्भाष्य प्रणतं भक्तपरिवर्गमशेषतः।।167।।
दक्षिणेनाद्रिणा पूर्वं कृतोज्ज्वलस्वभावतः।
दक्षिणेन कृतानन्दः स्फुरता बाहुना मुहुः।।168।।

सपल्लवमुखे पूर्णकुम्भे निहितलोचनः ।
निःक्रमाद् भवनादेष सहसैक्षत गेहिनीम् ।।169 ।।

द्वारस्तम्भनिषण्णाङ्गां वाष्पस्थगितलोचनाम् ।
नितम्बनिहितभ्रंसि निरादरचलद्भुजाम् ।।170 ।।

ताम्बूलरागनिर्मुक्तां धूसरद्विजवाससाम् ।
तस्मिन्नेव समुत्कीर्णां मलिनां सालभञ्जिकाम् ।।171 ।।

विद्युतीव ततो दृष्टिस्तस्यां निपतितां क्षणात् ।
संहृत्य कुपितोऽवादीदिति प्रह्लादनन्दनः ।।172 ।।

अमुष्मादपसर्पाशु देशादपि दुरीक्षणे ।
उल्कामिव समर्थोऽहं भवतीं न निरीक्षितुम् ।।173 ।।

अहो कुलाङ्गनायास्ते प्रगल्भूत्वमिदं परम् ।
यत्पुरोऽनिष्टमानाऽपि[49] तिष्ठसि त्रपयोज्झिता[50] ।।174 ।।

ततोऽत्यन्तमपि क्रूरं तद्वाक्यं भर्तृभक्तितः ।
तृषितेव चिराल्लब्धममृतं मनसा ययौ ।।175 ।।

जगाद चाञ्जलिं कृत्वा तत्पादगतलोचना ।
सस्खलन्ती मुहुर्वाचमद्गिरन्ती प्रयत्नतः ।।176 ।।

तिष्टिताऽपि त्वया नाथ भवनेऽत्र विवर्जिता ।
त्वत्सामीप्य कृताश्वासा जीविताऽस्मीति कृच्छतः ।।177 ।।

जीविष्याम्यधुना स्वामिन् कथं दूरङ्गते त्वयि ।
त्वत्सद्वचोऽमृतास्वादस्मरणेन विनातुरा ।।178 ।।

कृतं शेषगणस्याऽपि त्वया सम्भाषणं प्रभो ।
पिपासुनाऽपरं[51] देशमतिस्नेहार्दचेतसा ।।179 ।।

अनन्यगतचिन्ताऽहं त्वदसंङ्गमदुःखिता ।
कथं नान्यमुखेनाऽपि त्वया सम्भाषिता विभो ।।180 ।।

त्यक्ताया मे त्वया नाथ समस्तेऽप्यत्र विष्टपे ।
विद्यते शरणं नाऽन्यदथवा मरणं भवेत् ।।181 ।।

ततस्तेन म्रियस्वेति[52] संकोचितमुखेन सा।
सती निगदिता प्रापद्विषण्णा धरणीतले।।182।।

वायुरप्युत्तमामृद्धिं दधानः कृपयोज्झितः।
परमं नागमारुह्य[53] सामन्तैः प्रस्थितः समम्।।183।।

वासरे प्रथमेऽत्रासौ सम्प्राप्तो मानसं सरः।
आवासयत्तटे तस्य सेनामश्रान्तवाहनः[54]।।184।।

विद्यया निर्मिते गेहे सप्तभूम्यनुसंस्थितिः[55]।
नानापक्षिगणानां सः क्रीडां सरसि पश्यति।।185।।

तेषाञ्च चक्रवाक्येकां सन्ध्यायाम् कामव्याकुलाम्।
दृष्ट्वा च पवनो मित्रं तस्याः पृच्छति कारणम्।।186।।

प्रहसितस्ततः प्राह शृणु प्रभोऽत्र कारणम्।
रात्रावस्या वियोगोऽस्ति पत्या तेनेयमाकुला।।187।।

तच्छ्रुत्वा पवनः प्राह रात्रौ वियोगमात्रतः।
रुदति चक्रवाकीयं दुष्करं प्राणनाशकम्[56]।।188।।

अञ्जना तु मया त्यक्ता विना दोषेण पापिना।
द्वाविंशत्यत्र वर्षाणि तस्या दुःखं कियत्प्रमम्।।189।।

मदासक्ता सती प्राणान् ध्रियते निश्चयात्सदा।
म्रियते मद्वियोगे सा तत्पापं मे भविष्यति।।190।।

तस्मात्तस्याः समीपेहं गच्छामि मित्र साम्प्रतम्।
क्षमयित्वा तया सार्द्धं पश्चादग्रे[57] गमिष्यते।।191।।

मित्रो जगाद तच्छ्रुत्वा लोकहास्यं भविष्यति।
रणाद्भीतः समायातो व्याघ्रुट्य पवनञ्जयः।।192।।

वायुः प्राह ततो मित्रं किं कर्तव्यं मयाऽधुना।
तया विरहितो दुःखी मरिष्यामीति निश्चयात्।।193।।

प्रहसितस्ततश्चाह चैवं चेत् त्वं स्थिरो भव।
रात्रौ नेष्यामि तत्राऽहं मेरुतीर्थस्य वार्तया।।194।।

एतस्मिन्नन्तरे रात्रिर्जाता कृष्णतमोवृता ।
तदा मुद्गरसेनानी स्थापितो बलरक्षणे ।।195 ।।
मेरोस्तीर्थं क्षणं[58] कृत्वागमिष्यामोऽत्र वेगतः ।
इत्युक्त्वा पुष्पामालादीन् गृहीत्वा निर्गतौ ततः ।।196 ।।
अञ्जनाया गृहं शीघ्रं प्राप्तौ सन्तुष्टमानसौ ।
वायुरस्थाद्बहिर्भागे मित्रोन्तः सदनङ्गतः ।।197 ।।
मन्ददीपं प्रकुर्वन्तं प्रहसितं प्रकाशताम् ।
दृष्ट्वाऽञ्जना सती भीता कोऽयं कोऽयमिति ब्रुवत् ।।198 ।।
ततः प्रहसितोऽस्मीति गदित्वाऽसौ नमस्कृतिम्[59]।
कृत्वाऽऽहाऽऽगमनं वायोः स्नेहसुखस्य दीपकम् ।।199 ।।
तच्छ्रुत्वा ह्यञ्जनादेवी कुतो हससि बान्धव ।
हसति कर्म मां दृष्ट्वा तदेवाऽलं हि मित्रकः ।।200 ।।
कुतोऽस्ति मन्दभाग्याया मे गृहे पवनागमम् ।
एतत्सर्वं त्वया मित्रविरुद्धं रचितं पुरा ।।201 ।।
वा मम कर्मणो दोषात्दुष्टात्किं क्रियते त्वया ।
प्रहसितस्ततः प्राह दुःखं मा कुरु सुन्दरी ।।202 ।।
तव स्नेहाऽनुबन्धेनाऽऽगतो वायुर्हि सर्वथा ।
सुखिनी त्वं सदा लोके भविष्यस्यम्बिके परम् ।।203 ।।
तच्छ्रुत्वाञ्जनादेवी प्रहसितं प्रमोदतः ।
एवमस्तु हि त्वद्वाक्याद् द्रक्ष्यामि प्राणनायकम् ।।204 ।।
यच्छुभमस्ति तत्सर्वं प्रसादात्पवनस्य मे ।
इत्युक्ता साऽश्रुनेत्रा सा प्रोत्थिता प्रेमचेतसा ।।205 ।।
तावत्समागतो वायुर्गृहां ते प्रेमसंयुतः ।
स्वप्नवत्तं च दृष्ट्वा सा पपात तस्य पादयोः ।।206 ।।
तदा वायुः करौ तस्या धृत्वा कोमलपाणिना ।
हसित्वा च तया साकं शयने समुपाविशत् ।।207 ।।

वसन्तमालिका वायुं नत्वा कृत्वा च भाषणम्।
स्थिता स्थानान्तरं गत्वा सुखं प्रहसितेन सा।।208।।
मौनस्थं पवनं दृष्ट्वा सम्प्राहाञ्जनसुन्दरी।
नाथ नाऽस्त्यत्र ते दोषा मम दुःखं मम कर्मतः।।209।।
निर्मलं मानसं कृत्वा भोगान् भुञ्ज मया समम्।
तच्छ्रुत्वा पवनस्तस्याः पादौ नमितुमुद्यतः।।210।।
अञ्जनया तदा नत्वा स्थापितः शयने पुनः।
तदाह पवनो देवि क्षमां कुरु ममोपरि।।211।।
पवनाञ्जनयोः प्रीतिस्ततो जाता महत्तरी।
स्तनौष्टौ पीडनञ्चक्रे चुम्बनं गल्लकादिषु।।212।।
नाना कामविनोदेन प्रभातमभवत्तयोः।
तदा प्रहसितोऽवोचदुत्तिष्ठ पवनञ्जयः।।213।।
गच्छावश्चाऽधुना[60] दण्डं पुनरागत्य वेगतः।
संतिष्ठ भार्यया साकं भोगसुखेन सम्पदा।।214।।[61]
एतच्छुत्वाऽथ वायुस्तां संपृच्छ्य गन्तुमुद्यतः।[62]
तदा प्राहाञ्जनादेवी हस्तयुग्मस्वमस्तका।।215।।
अद्य नाथर्तुमत्यस्मि भवता कृतसङ्गमा।
ततस्त्वद्विरहे गर्भो ममवाक्यो भविष्यति।।216।।
तस्मान्निवेद्य गच्छ त्वं गुरुभ्यो गर्भसंभवम्।
क्षेमाय दीर्घदर्शित्वं कल्पते प्राणधारिणम्।।217।।
एवमुक्ते जगादाऽसौ देवि पूर्वं त्वया विना।
निःक्रान्तो निश्चितो गेहाद् गुरुणां सन्निधावहम्।।218।।
अधुना गमनं तेभ्यस्त्वदर्थं गदितुं त्रपे[63]।
चित्रचेष्टं[64] च विज्ञाय साञ्जनः स्मरतां व्रजेत्।।219।।
तस्माद्यावदयं गर्भस्तव नैतिप्रकाशताम्।
तावदेव व्रजिष्यामि मा व्राजीर्विमनस्कृताम्।।220।।

इमं प्रवादनोदार्थं मन्नामकृतलक्षणम् ।
गृहाण वलयं भद्रो शान्तिस्ततो भविष्यति ।।221 ।।

इत्युक्त्वा वलयं दत्वा सान्तयित्वा मुहुः प्रियाम् ।
उक्ता वसन्तमालाञ्च तदर्थं समुपासनम् ।।222 ।।

पुनरालिङ्गनं दत्वा चुम्बयित्वा च गल्लकम् ।
सम्पृच्छ्य निर्गतो गेहान्मित्रेण सह वेगतः ।।223 ।।

धर्मेण सौख्यं सकलं नराणां
चक्रेण साध्यं विभवञ्च राज्यम् ।
स्वर्गसौख्यानि भवन्ति धर्मात्
मोक्षस्य लाभो भवति क्रमेण ।।224 ।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
अञ्जनापवनञ्जयसङ्गमवर्णनो नामाष्टमोऽधिकारः ।।

❖❖❖

1. विभक्त इति क प्रतौ
2. अपृच्छतः इति ख प्रतौ
3. संस्नापयतो इति ख प्रतौ, संस्नापितो इति ग प्रतौ
4. दुःखमेव सुखं ह्रकं मूर्ष भोगे रमन्ति ते इति ग प्रतौ
5. केचिदणुव्रताधाराः इति क/ख प्रतौ
6. सतां इति ख प्रतौ
7. शत्रुजित इति ख प्रतौ
8. श्रीश्रेणिक सुतयोर्यथा इति ख प्रतौ, श्रीश्रेणिकस्तु तयोर्यथा इति ग प्रतौ
9. निग्रह इति ख प्रतौ
10. शंकीर्ण इति ग प्रतौ
11. क्षतं इति ख प्रतौ
12. एषः श्लोकः ग प्रतौ अप्राप्तः।
13. भूपते इति क/ख प्रतौ
14. सघ्र्यं इति ग प्रतौ, र्शल्त्रं इति ख प्रतौ
15. तस्मिश्चित्य इति ख प्रतौ
16. द्वारसम्भव इति क प्रतौ अप्राप्ताः।
17. भुंक्ते षष्टं इति ख प्रतौ
18. वसुचित्तयोः इति ख प्रतौ, सुचेतयोः इति ग प्रतौ
19. गवाक्षे सप्तमे स्थित्वाश्चोपविष्टौ वस्थितौ इति ग प्रतौ
20. अपश्यत इति क/ख प्रतौ
21. अस्ति इति ख प्रतौ
22. द्वाब्धि इति क/ख प्रतौ
23. विध्यत्य गत्य इति ग प्रतौ
24. मञ्जना इति ग प्रतौ
25. न्यवर्तकः इति ग प्रतौ
26. अस्या इति क/ख प्रतौ
27. मृदुलताकीर्णे इति क प्रतौ

28. तथा इति क प्रतौ
29. चाञ्जनां इति क प्रतौ
30. आगमद्रावणोयुक्तः इति ग प्रतौ, अरुणद्रावणयुक्तः प.पु. 16/41
31. तनटोश्चपलो इति ग प्रतौ
32. विविधायुद्ध इति क/ग प्रतौ
33. शक्ता इति क/ख प्रतौ
34. कृता स्वास्ताः तस्य इति ग प्रतौ
35. रणधीरीति इति क प्रतौ
    रणधीरति इति ग प्रतौ
36. मुच्यते चेतसा रसः इति ख प्रतौ,मूर्च्छते चेतसा रसः इति ग प्रतौ
37. एषः श्लोकः ग प्रतौ अनुपलब्धः।
38. आह्वायवसिरोवद्ध इति ख प्रतौ
    आह्वायवस्थिरो बद्ध इति ग प्रतौ
39. तत्रायाद्राण प्रेषितो इति ख प्रतौ
40. सलेखंनीक्षितौ पुरः इति ग प्रतौ
41. लेखार्थमामेख्यं इति ग प्रतौ
42. उन्नमत्य इति ख/ग प्रतौ
43. शक्तेस्त्वयों धनचये ननु इति क प्रतौ,
    शक्तेस्त्वयें धनचये ननु इति ख प्रतौ,
    तात मे लक्षणं शक्तेस्त्वया ननु।
    जगद्वहे स्फुलिङ्गस्य किं वा शक्तिं किं वा वीर्य परीक्षते।। इति ग प्रतौ,
    शक्तेस्त्वयैव जननं ननु। इति प. पु. 16/76 अर्थदृष्ट्या च इत्येवं स्यात् ।
44. भवछीसित इति ख प्रतौ, भवच्छासन प. पु. 16/77
45. समर्थोस्मिन्न न शंसय इति ग प्रतौ
46. अवर्धायेति इति ग प्रतौ
47. वृद्धासिर्दत्तासीः इति ख प्रतौ, वृद्धाभिस्वर्दत्तासी इति ग प्रतौ

48. स्म स्मितः इति ख प्रतौ
49. निष्ठमानानाऽपि इति ग प्रतौ
50. त्रपयोषितो इति क प्रतौ
51. यियासुनापरं इति क/ख प्रतौ
52. ततोसुंनमृयस्वेति इति ग प्रतौ
53. नाममारुह्य इति ग प्रतौ
54. सेनामश्रीतराहनः इति ख प्रतौ
55. सप्तमेनुविसंस्थितः इति क प्रतौ
    सप्तमभूमिसंस्थितः इति ख प्रतौ
56. प्राणनाशनम् इति ख/ग प्रतौ
57. पश्चादग्रे इति ग प्रतौ
58. क्षणात्कृत्वा इति ख/ग प्रतौ
59. नमस्कृता इति ग प्रतौ
60. गत्वा च अधुना इति ख प्रतौ
61. एषा पंक्तिः ग प्रतौ अनुपलब्धः।
62. एषा पंक्तिः ग प्रतौ अनुपलब्धः।
63. त्रये इति क/ग प्रतौ
64. वित्रवेष्टं च इति ग प्रतौ

❖❖❖

नवमोऽधिकारः

कतिपयैर्दिनैश्चाऽथ गर्भः प्रकटतां ययुः।
केतुमत्याह तं दृष्टवा केनेदं कृतमञ्जने॥1॥

हस्तपुटाञ्जलिं कृत्वा ततः सर्वं निवेदितम्।
स्वसुरग्रे तया भक्त्या भर्त्राऽऽगमनकारणम्॥2॥

तच्छ्रुत्वा प्राह सा कोपाद् भ्रष्टे कुत्रास्ति मत्सुतः।
तस्य त्वया समं दुष्टे विरुद्धो वर्तते सदा॥3॥

दर्शितश्च[1] तदा तस्यै वलयो जनया मुदा।
युष्मत्[2]पुत्रस्य पश्याऽयं[3] सर्वभ्रान्तिविनाशकः॥4॥

पुनः केतुमती प्राह धूर्तोऽयं चौर्यतस्त्वया।
आनीतो वलयो वायोर्मन्त्रशक्तिप्रभावतः॥5॥

साह वसन्तमालाञ्च सन्देहश्चेच्च पृच्छताम्।
केतुमत्याह तच्छ्रुत्वा साऽभवत्तव कूटनी॥6॥

इत्युक्त्वा क्रूरनामानमाहूय किङ्करमवदत्।
विमाने त्वाञ्जनां क्षिप्त्वा वेगान्नेहि दुरात्मिकाम्॥7॥

पुरोद्याने महेन्द्रस्य मुक्ता सख्या समं परम्।
आगच्छ यावत् केनाऽस्याश्चेष्टां न ज्ञायते पुरे[4]॥8॥

तच्छ्रुत्वा तत्क्षणात्तत्र नीत्वा यानञ्च सोऽवदत्।
देव्युपविश वेगात्त्वं यावन्नाऽस्तं गतो रविः॥9॥

केतुमत्या भयात् सा च सख्या समञ्च संस्थिता।
विमाने साऽश्रुनेत्राद्या दुःखपूरसमाकुला॥10॥

दिनस्याऽन्ते तदा तेन नीता महेन्द्रकानने।
देवि नृपाज्ञया दत्तं दुःखं ते पापिना मया॥11॥

एवमुक्त्वाऽवतार्येतां यानात्सख्या समन्विताम्।
स्वयं व्याघुट्य सम्प्राप्तः केतुमत्यन्तिकं पुरे॥12॥

अतोऽञ्जना महादुःखं करोति शोकपीडिता।
अहो मे कर्मवैचित्र्यं कथं जातं हि पश्यताम्।।13।।
ततो वसन्तमालाऽऽह दुःखं मा कुरु सुन्दरे[5]।
प्रभाते जनकग्रामेऽस्माकं शुभं भवेत्सदा।।14।।
इत्यादि वचनैर्बालां सन्तोष्य दर्भशय्यके।
स्थापितापि[6] निशायां सा निद्रां न लभते सती।।15।।
पाणिसंवाहनात्सख्या विनिर्धूतपरिश्रमा।
सान्तव्यमाना निशां निन्ये दुःखशोकविचिन्तनात्।।16।।
ततो दीर्घोष्णनिश्वास नितान्तम्लानपल्लवम्।
प्रभाते शयनं त्यक्त्वा नाना शङ्काऽतिविक्लवा।।17।।
कृताऽनुगमना सख्या छाययेवाऽनुकूलया[7]।
ऐत्पितुर्मन्दिरद्वारं सकृपं वीक्षिता जनैः।।18।।[8]
ततस्तत्प्रविशन्ती सा निरुद्धा द्वाररक्षिणा।
प्राप्ता रूपान्तरं दुःखादविज्ञाता व्यवस्थिता।।19।।
ततो निखिलमेतस्याः सख्या वृत्तं निवेदितम्।
विज्ञाय स्थापयित्वाऽन्यन्नरं द्वारे ससम्भ्रमः।।20।।
गत्वा शिलाकपाटाख्यो द्वारपालः कृतानतिः।
सुताऽऽगमं महीपाय विनयाच्च व्यजिज्ञपत्।।21।।
ततः प्रसन्नकीर्त्याख्यं महेन्द्रपार्श्वगं सुतम्।
आज्ञापयन्महाभूत्या तस्याः शीघ्रप्रवेशनम्।।22।।
पुरस्य क्रियतां शोभां साधनं परिसज्यताम्।
स्वयं प्रवेशयामीति पुनरुचे नराधिपः।।23।।
जगादाऽसौ ततस्तस्मै द्वारपालो यथास्थितम्।
सुतायाश्चरितं श्रुत्वा करोन्मुखे करं नृपः।।24।।
ततः श्रुत्वा त्रपाहेतुं पिता तस्या विचेष्टितम्।
प्रसन्नकीर्तिमित्यूचे परमं कोपमागतः।।25।।

निर्वास्यतां पुरादस्माद्दूरं[9] सा पापकारिणी।
यस्या मे चरितं श्रुत्वा [10]व्रजेणेवाहते[11] श्रुती।।26।।
ततो नाम्ना महोत्साहः सामन्तोऽस्याऽतिवल्लभः।
जगाद नाथ नो युक्तमेवं कर्तुमिमां प्रति।।27।।
वसन्तमालयाख्यातं यथाऽस्मै द्वाररक्षिणे।
एवमेव न युक्ता तु विचिकित्सा विकारणा।।28।।
श्वस्रूः केतुमती क्रूरा लौकिकश्रुतिभाविता।
अत्यन्तमविचाराऽस्या विना दोषात्कृतोज्झता।।29।।
श्वश्रूभर्तृपरित्यक्तां जनकं शरणं व्रजेत्।
तेन त्यक्ता व्रजेत्कुत्र मरणेन विना च सा।।30।।
एवमादीनि वाक्यानि कथितानि च मन्त्रिणा।
तथापि न नृपश्रोत्रे प्रविष्टं पूर्वपापतः।।31।।
नृपोऽवोचन्मयापूर्वं श्रुतं त्यक्ताऽस्ति वायुना।
तस्मात्सन्दिग्धशीलेयं निर्घाट्यताञ्च मत्पुरात्[12]।।32।।
तस्मादन्योऽपि यस्तस्यै प्रयच्छति समाश्रयम्।
वियोज्यः स मया प्राणैरित्येष मम सङ्गरः।।33।।
कुपितेनेति सा तेन द्वारादविदिता पुरैः[13]।
निर्घाटिता समं सख्या दुःखपूरितविग्रहाः।।34।।
यद्यत्स्वजनगेहं सा जगामाश्रयकांक्षया।
तत्रतत्राप्यदीयन्तं[14] द्वाराणि नृपशासनात्।।35।।
यत्रैवं जनकः क्रुद्धो विदधाति निराकृतिम्।
तत्र शेषजने काऽऽस्था तच्छंदकृतचेष्टिते।।36।।
एवं निर्वार्यमाणा सा सर्वत्राऽत्यन्तविक्लवा[15]।
सखीं जगाद वाष्पौघामाद्राक्षीकृतदेहिका[16]।।37।।
अम्बे इहाऽत्र किं भ्रान्ति कुर्वत्यावां[17] स्व हे सखि।
पाषाणहृदयो लोको जातोऽयं नः कुकर्मभिः।।38।।

वनं तदेव गच्छावस्तत्रैवाऽस्तु यथोचितम्।
अपमानात्ततो दुःखान्मरणं परमं सुखम्।।39।।

इत्युक्त्वाऽसौ समं सख्या तदेव प्रविशद्वनम्।
मृगीव मोहसम्प्राप्ता मृगराजविभीषता।।40।।

उपविष्टा शिलादेशे मार्गग्लानशरीरिका।
गल्ले[18] वामकरं कृत्वा चाऽश्रुपूरितलोचना।।41।।

ततः शोकं परं प्राप्ता करोति विललापनम्।
हा मात ! कानने त्यक्ता त्वयाऽहमाकुला कथम्।।42।।

हा तात ! निर्दयो भूत्वा संरक्षसि कथं न माम्।
हा बान्धव ! त्वया पूर्वं पोषिताऽहं गृहे मुदा।।43।।

हा प्रह्लाद ! वने मुक्ता मां त्वं कथं गृहे सुखी।
हा हा केतुमती देवि ! करोषि न कृपां कथम्।।44।।[19]

हे नाथ ! मां कथं मुक्त्वा गतोऽसि रावणाऽन्तिकम्।
हा जिनेन्द्र! जगत्स्वामिन्! कर्म मां पीड्यते कथम्।।45।।

हा गुरो ! सर्वजीवानां रक्षको मां च रक्षय।
इत्यादिबहुधाशोकं करोत्यञ्जनसुन्दरी।।46।।

यथा यथाऽञ्जना शोकं करोति च तथा तथा।
दुःखाद्वसन्तमालाऽपि रुदति शोकसंकथा[20]।।47।।

पर्वतः प्रतिशब्देन गर्जति मेघवत्तादा।
क्रूरा अपि मृगाः सर्वे तद्दुःखेन रुदन्ति ते।।48।।

स्वभुजाभ्यां समालिङ्ग्य सखी जगाद चाऽञ्जनाम्।
दुःखं मा कुरु भो पुत्रि गर्भस्याकुलतां भवेत्[21]।।49।।

उतिष्ठ पुत्रि गच्छावो गुहायां पर्वतोपरि।
अत्र व्याघ्रादयो जीवा नो हनिष्यन्ति पापकाः।।50।।

मुखं प्रक्षाल्य नीरैश्च समं सख्या शनैः शनैः।
संगच्छत्यञ्जना वार्ता कुर्वन्ती सुखदःखयोः।।51।।

शक्ताऽपि गगने गन्तुं न शक्ता नेतुमाऽञ्जनाम्।
भूमौ वसन्तमालाऽपि गच्छति च तया समम्।।52।।
उत्तरन्ति च नद्यादीन् लङ्घयन्ति शिलादिकान्।
दर्भसूचियुतां भूमिं शनैर्गच्छति सुन्दरी।।53।।
संलग्नं कण्टके वस्त्रं मोचयन्ति सुयुक्तितः।
नीचोच्चभूतले गच्छत् लतां धृत्वा कुवर्त्मनि।।54।।
स्फुर्किते तत्र पर्णेऽपि भयं याति पदे पदे।
सिंहव्याघ्रमृगादुष्टाः शब्दान् कुर्वन्ति दुःखदान्।।55।।
उपविशति पाषाणे यत्र तत्र परिश्रमात्।
धृत्वा सखीकरं बाला प्रोत्थिता सा पदे पदे।।56।।
सखी सुवचनैस्तां च प्रतिबोध्य मुहुर्मुहुः।
नयति पर्वतस्थानं जन्तुभयादिवर्जितम्।।57।।
शनैः शनैर्गुहां प्राप्ता पर्वतस्योपरिस्थिता।
तत्र द्वारे सखी स्थित्वा पश्यत्यभ्यन्तरे मुदा।।58।।
तावन्महामुनिं तत्र शिलायां योगसंस्थिताम्।
दृष्ट्वा धृतिं परां प्राप्ताऽञ्जना सख्या समं[22] तदा।।59।।
अन्तर्गत्वा ततस्ताभ्यां वन्दितो मुनिरुत्तमः।
धर्मवृद्ध्या मुनीन्द्रेण तोषिता सा सती तदा।।60।।
कुटुम्बमिव तं दृष्ट्वा रुरोदाञ्जनसुन्दरी।
प्रकाश्य सकलं दुःखं मुनेरग्रे च पूर्वजम्।।61।।
ततः प्राह मुनीन्द्रोऽसौ दुःखं मा कुरु कन्यके।
जीवानां स्यात्सुखं दुःखं शुभाऽशुभाच्च कर्मतः।।62।।
तव पुत्रो महाभोगी लोकपूज्यो भविष्यति।
भर्त्ताऽऽगमञ्च शीघ्रं स्याद्बाले पूर्वाऽनुपुण्यतः।।63।।
इत्युक्ते च मुनौ देवी पपृच्छ चात्मनो भवान्।
स प्राह भरते चाऽत्र नगरे मन्दराभिधे[23]।।64।।

प्रियनंद्यभिधः श्रेष्टी जायाख्या तस्य भामिनी।
दमयन्ताभिधः पुत्रस्तयोर्धर्मी गुणाकरः।।65।।
अथाऽन्यदा वनक्रीडां कुर्वन् स तत्र सन्मुनिम्।
दृष्ट्वा कृत्वा नमस्कारं तस्याग्रे समुपस्थितः।।66।।
मुनिनाऽस्मै तदा दत्तं सम्यक्त्वं व्रतसंयुतम्।
ततो गत्वा गृहे तेन दत्तं दानं सुयोगिने।।67।।
ततो मृत्वा शुभध्यानाद् दमयन्तनरोत्तमः।
सुधर्मे चाऽपि देवोऽभूत्सद्व्रतात् किं न जायते।।68।।
च्युतो मृगाङ्कपत्नेऽथ हरिचन्द्रनरेश्वरात्।
प्रियलक्ष्म्यां सुतो जातः सिंहचन्द्राऽभिधानकः।।69।।
दानं दत्वा च तत्राऽपि मृतो जातः सुरः पुनः।
विजयार्द्धेऽरुणग्रामे सुकण्ठो भूपतिर्महान्।।70।।
भार्या हेमोदरी तस्य तयोः पुत्रोऽभवच्छिवः।
स च्युत्वा सिंहवाहाख्यो गुणलावण्यभूषितः।।71।।
तीर्थे विमलनाथस्य सोऽन्यदा जातसन्मतिः।
निक्षिप्य तनये राज्यं घनवाहननामके।।72।।
लक्ष्मीतिलकसञ्ज्ञस्य मुनेः पार्श्वेऽभवन्मुनिः।
मृत्वा समाधिना प्राप्तः सुस्वर्गं सप्तमं वरम्।।73।।
च्युत्वा पुण्याऽवशेषेण प्रेरितः परमोदयः।
कुक्षिं तव विवेशाऽयं जीवः सौख्यस्य भाजनम्।।74।।
अधुना श्रृणु दुःखस्य विरहस्याऽस्य कारणम्।
हेमोदरी यदासीत्त्वं सुकण्ठस्य सुवल्लभा।।75।।
लक्ष्मीनामा च तस्याऽन्या स्त्री सपत्नी तवाऽभवत्।
साऽकरोत्यन्यदा पूजां जिनस्य धर्महेतवे।।76।।
हेमोदर्या त्वया गर्वोच्चोरितं जिनबिम्बकम्।
आतपे स्थापितं तीव्रे द्वेषाल्लक्ष्मीमती गृहात्।।77।।

तदा लक्ष्मीमहादेवी चोपविष्टा गृहान्तकम्।
आहारं सकलं त्यक्ता धर्मध्यानपरायणा।।78।।
अत्रान्तरे समायाता संयमश्रीमहाऽऽर्यिका[24]।
लक्ष्मीदुःखं तया दृष्टं जिनबिम्बसमुद्भवम्।।79।।
संयमश्रीतदा वेगात् हेमोदर्यन्तिकं गता।
उपसर्गं निराकर्तुं[25] जिनस्य धर्महेतवे।।80।।
हेमोदर्या च सा दृष्टा वन्दिता शुभभक्तितः।
आसनं च वरं दत्तं तस्यै विनयहेतवे।।81।।
तदाऽऽर्यिकाऽऽह भो पुत्रि पूर्वं पुण्यं कृतं त्वया।
यतो लब्धाऽसि भर्त्तारं सुकण्ठाख्यं नरेश्वरम्।।82।।
पुत्रञ्च सिंहवाहाख्यं धनं रूपञ्च यौवनम्।
अत्राऽपि कुरु धर्मं त्वं पापबुद्धिं सदा त्यज।।83।।
जैनं बिम्बं सुते देहि जिनेन्द्रविकृतिः[26] कथम्।
गोपितं मुग्धबुद्ध्या हि देवि चेष्टां न युज्यते।।84।।
तत्पापात्त्वं हि भो बाले श्वभ्रं यास्यसि सर्वथा।
तस्माज्जिनेन्द्रबिम्बेषु न कर्त्तव्यं विचेष्टितम्।।85।।
पुस्तकं जिनबिम्बं वा द्रविणं[27] वा तयोश्च यः।
विनोदेनाऽपि चौर्येन स व्रजेन्नरकास्पदम्।।86।।
भीता मनसि तच्छ्रुत्वा तत्पापात् कनकोदरी।
जिनबिम्बं समानीय चार्यिकायै समर्पितम्।।87।।
प्रायश्चित्तं त्वया तत्र गृहीतं प्रोषधादिकम्।
कारिता जिनपूजा च प्रतिष्ठादिमहोत्सवैः।।88।।
लक्ष्मीदेव्या समं प्रीत्या क्षमिता कनकोदरी।
गताऽऽर्यिका च स्वस्थानं कृत्वा क्षेमापनं तयोः।।89।।
अन्यदा कालधर्मेण मृत्वा च कनकोदरी।
स्वर्गे गता महापुण्यान्नानाभोगसमाकुले।।90।।

ततश्च्युत्वाऽत्र जाता त्वमञ्जना शेषपुण्यतः।
घटिकैकादशं यावत्तद्बिम्बं गोपितं त्वया।।91।।

तेन पापेन बाले त्वं त्यक्ता भर्त्राऽतिकोपतः।
इति तयोश्च सम्बोध्य ततोऽन्यत्र गतो मुनिः।।92।।

ततस्तत्रैव गूहायामञ्जनसुन्दरी स्थिता।
सख्या समं सुशीलाख्या सुखिनी पवनाशया।।93।।

पायसोदनपक्वान्नघृतादिकश्च षड्रसान्।
पूरयति सखी तस्यै विद्यया सुखलीलया।।94।।

अन्यदाऽथ निशाकाले महाध्वान्तभयङ्करे।
सिंहः समागतो दुष्टो गुहाद्वारे भयङ्करः।।95।।

सिंहगर्जनिनादेन भीताश्च मृगजातयः।
निश्शब्दपक्षिणः सर्वे सञ्जातास्ते यथायथम्।।96।।

तं दृष्ट्वा त्वञ्जना भीता गृहीत्वाऽनशनं तदा।
ध्यानयुक्ता समाविष्टा नमस्कारपरायणा।।97।।

तदा वसन्तमाला साकाशे विमानसंस्थिता।
करोति विविधं शोकमञ्जना रहिता परा।।98।।

तदा तत्र गुहावासी गन्धर्वो मणिचूलवाक्।
भीतां तामञ्जनां दृष्ट्वा रक्षाम्येनां ततोऽवदत्।।99।।

विकृत्या शरभाकारं गृहीत्वा योद्धुमुद्यतः।
तदा तयोर्महायुद्धं जातं शरभसिंहयोः।।100।।

शरभेण हतः सिंहः पलायित्वा गतः क्वचित्।
तदाऽऽगता सखी तत्र यत्राऽस्त्यञ्जनसुन्दरी।।101।।

तदा परस्पराऽऽलापैः सन्तुष्टाऽञ्जनया सखी।
भीतिं मुक्त्वा च सिंहस्य कुरुतः पूर्वजां कथाम्[28]।।102।।

तदा देवः स्वनारीभिर्गीतं गायति दूरतः।
मुनिसुव्रतनाथस्य कर्णयोः रसदायकम्।।103।।

सङ्गीतं देवजं श्रुत्वा सखी वदति भोऽञ्जने।
शृणु गीतं जिनेन्द्रस्य कोऽपि गायति पुण्यधीः।।104।।
माहात्म्यात्तव शीलस्य धर्मिणाऽनेन वारितम्।
उपसर्गं हि सिंहस्य देवि स एव गायति।।105।।
एवं तयोश्च सञ्जातं प्रभातं सुखदायकम्।
सखी तस्याश्च संसेवां करोति विनयान्विता।।106।।
अन्नपाकविधानञ्च तस्यै करोति युक्तितः।
एवं गच्छति कालोऽस्य गर्भे दुःखं न जायते।।107।।
मुनिसुव्रतनाथस्य प्रतिमां तत्र चित्रताम्।
अर्चयन्त्यौ सुखप्राप्त्यै वनपुष्पफलादिभिः।।108।।
एवं संरक्षिता सख्या सुरेण चाऽपि रक्षिता।
गतः कालो न जानाति पुण्यादञ्जनसुन्दरी।।109।।
रात्रौ पूर्णेषु मासेषु प्रभातसमये तदा।
सञ्जाता चोदरे पीडा प्रसूतिसमयप्रदा।।110।।
तदा प्रोचेऽञ्जना देवी पीडा जातोदरे सखि।
साऽऽह प्रसूतिबेलेयं जाता बाले तवाऽधुना।।111।।
सख्या रचितशैय्यायां मृदुकोमलपल्लवैः।
प्रसूता सुखतो बालं सूर्यमूर्तिमिवाऽञ्जना।।112।।
वनस्पतय आसर्वाः फलैः समं सुपुष्पिताः।
जातः सर्वत्र गूहायां प्रकाशस्तस्य देहजः।।113।।
ततः पुत्रमुखं दृष्ट्वा सन्तुष्टाऽञ्जनसुन्दरी।
इदं वदन्ति वाक्यं सा पुत्रोऽहं भाग्यवर्जिता।।114।।
तव जन्मोत्सवं कर्तुमशक्तां विजये वने।
धनेन स्वजनेनाऽपि वर्जिता किं करोम्यहम्।।115।।
जन्तूनां सर्ववस्तुभ्यो वाञ्छति दीर्घजीर्वितम्।
तस्मात्त्वं पुत्र जीवस्व ततो सर्वं भविष्यति।।116।।

शृणु देवि सखि प्रोचे चिरञ्जीवी सुतो भवेत्।
अयं दुःखस्य नाशं ते धर्मधीः संकरिष्यति।।117।।
एतस्मिन्नन्तरे सख्या दृष्ट्वा यानं नभस्तले।
विद्याधरस्य सम्प्रोक्तमञ्जनायै च भीतया।।118।।
तं दृष्ट्वाऽप्यञ्जनादेवी भीतेदं प्रवदत्तदा।
कोऽप्यागतोऽत्र वैरी किं मत्सुतं मारितुं रुषा।।119।।
बान्धवः कोऽपि किं वा मां निरीक्षितुं समागतः।
न जाने किं भवेत्पुत्र भो सखि कर्मणः फलम्।।120।।
तत्प्रलापं ततः श्रुत्वा भुवि विद्याधरो महान्।
अवतरद्विमानेन समं कुटुम्बवेष्टितः।।121।।
गुहाद्वारे विमानं स्वं संस्थाप्यान्तर्गतः स्वयम्।
पत्नीभिः सहितः शङ्कां वहमानः शनैः शनैः।।122।।
आगतं खेचरं दृष्ट्वा नारीजनसमावृतम्।[29]
प्रदत्तमासनं रम्यं वेगाद्वसन्तमालया।।123।।
उपविशत् स्वभृत्येन प्रापिते तत्सदासने।
क्षणमेकं ततः स्थित्वा स भारत्या गंभीरया।।124।।
ऊचे[30] तां विनयं विभ्रत्परं स्वागतदायिनी।
सुमर्यादवचैयं का दृश्यते सुन्दरी परा।।125।।
भार्या कस्य सुता कस्य किं नामेयं कथं श्रिता।
वनमेकाकिनी बाला दुर्वाक्यं केन प्रापिता।।126।।
ततः प्राह सखी राजन् शृणु सर्वं विवेकतः।
सुता महेन्द्रराजस्य नाम्नेयाञ्जनसुन्दरी।।127।।
पत्नी प्रह्लादपुत्रस्य पवनस्य मनोहरी।
पूर्वकर्माऽनुभावेन त्यक्ता भर्त्ता बहूदिनात्।।128।।
द्वाविंशति गते वर्षे तस्यां प्रीतिसमुत्सुकः[31]।
कृत्वा गर्भं दशास्यस्य दण्डं गतोऽनिलो यदा।।129।।

केतुमत्या तदा गर्भं दृष्ट्वा निर्घाटिता गृहात्।
पश्चात् गता पितुर्गेहं सोऽपि ददौ न चाश्रयम् ।।130।।[32]
तदा मयाऽत्र बालेऽयमाऽऽनीता नगसद्मनि।[33]
मुनिनाऽत्र तु सद्वाक्यै रक्षिता सिंहसाध्वसात्।।131।।
एवं पूर्वस्य वृतान्तस्तस्मै सख्या निवेदितः।
आगतोऽयं जनाग्रेषु लीलामात्रं प्रवर्तयेत्।।132।।[34]
विद्याधरस्ततः प्राह चेऽयं मे भगिनी सुता।
चिरकालवियोगेन न ज्ञाता च मयाञ्जना।।133।।
पिता विचित्रभानुर्मे माता सुन्दरमालिनी।
नामतः प्रतिसूर्योऽहं द्वीपे हनूरुहाऽभिधे।।134।।
भगिनी मे मनोवेगा तस्या द्वयं सुता वरा।
रूपान्तरं तु सम्प्राप्ता न ज्ञाताऽतो मया सखि।।135।।
इत्युक्ता वस्तु यद्वृत्तं कौमारे सकलं स तत्।
अञ्जनायै पतद्वाष्पनयनसमनादयत्।।136।।
विज्ञात मातुलोऽथाऽसौ पूर्ववृत्तनिवेदनात्।
तस्य कण्ठं समासाद्य रुरोद चिरमञ्जना।।137।।
तस्या तत्सकलं दुःखं वाष्पेन सह निर्गतम्।
स्वजनस्य हि सम्प्राप्ता वेषेव जगतः स्थितिः।।138।।
महेन्द्रेण सुता ज्ञेया प्रह्लादनृपकुलवधू।
कथिता पूर्ववृतान्तैः वसन्ते नखश्वरे ।।139।।[35]
तयोः स्नेहभरेणैवं कुर्वतोरथ रोदनम्।
वसन्तमालयाप्युच्चै रुदितं पार्श्वया तया।।140।।
रुदत्सु तेषु कारुण्यादरुदंस्तद्योषितः[36]।
कृतरोदा[37]स्वथैतासु रुरुदू[38]मृगयोषितः।।141।।
गुहावदनमुक्तेन प्रतिनादेन भूयसा।
पर्वतोऽपि रुरोदेव सततै निर्जराश्रुभिः[39]।।142।।
ततः शब्दमयं सर्वं तद्बभूव तदा वनम्।
शकुन्तैरपि[40]कारुण्यादाकुलैः कृतनिःस्वनम्।।143।।

सान्तयित्वा ततस्तस्माद्दत्ते नोदकवाहिना।
वारिणा क्षालयद्वक्त्रं स्वस्य च प्रतिभास्करः।।144।।
पारम्पर्येण तेनैव ततस्तत्पुनरप्यभूत्।
वनं मुक्तमहाशब्दं श्रोतुं वार्तामिवाऽनयोः।।145।।
ततः क्षणमिव स्थित्वा निष्क्रान्तौ दुःखगह्वरात्।
अपृच्छतां मिथो वार्तां स्वकुलकथताञ्च तौ।।146।।
सम्भाषणं ततश्चक्रे ततस्त्रीणामञ्जना क्रमात्।
स्खलन्ति न विधातव्ये वनेऽपि गुणिनो जनाः।।147।।[41]
जगाद मातुलं चैवं पूज्यजातस्य[42] मेऽखिलम्।
निवेदय यथाऽवस्थं दिनञ्ज्योतिः कदम्बकम्।।148।।
इत्युक्तेस्तस्य पार्श्वस्थो ज्योतिर्गर्भाभिधानकः।
ज्योतिः शास्त्रप्रकाशं सः करोति लग्नसंयुतम्।।149।।
बहुले चैत्रमासस्य चाऽष्टमी रात्रिपश्चिमे।
यामेखो श्रवणनक्षत्रे[43] पुत्रजन्माभवच्छुभम्।।150।।
एतल्लग्नात् भवे भोगी सुखी जीवी पराक्रमी।
इति श्रुत्वा जना तुष्टा बान्धवा याश्च भाषिताः।।151।।
प्रतिसूर्यस्ततः प्राहोतिष्ट वत्सोऽतिवेगतः।
हनूरुहपुरं यामस्तत्र जन्मोत्सवो भवेत्।।152।।
एवमुक्ते विद्यायाङ्के बालकं जिनवन्दनाम्।
कृत्वा स्थानार्पितं[44] क्षमयित्वा पुनः पुनः।।153।।
निर्गता सा समं सख्या स्वजनैः संवृताऽञ्जना।
बालयुक्ता विमाने हि संस्थिता रत्ननिर्मिते।।154।।
मुक्तामालादिभिः रम्ये चित्र्यते वर[45]शिल्पिभिः।
ततोऽगच्छद्विमानं तद्युक्तं तैर्गगनाङ्गणे।।155।।
मातुरङ्के स्थितो बालो रमति चाऽतिचापलः।
मुक्तामालां करं क्षीपत् विमानात्पतितो भुवि।।156।।

उल्कापातमिव बालं दृष्टापतंतमञ्जना।
रुरोद सजनैः सार्द्धं कृत्वाऽऽलापं प्रदुःखदम्।।157।।
हाहाकरं ततः कृत्वा लोकस्तस्य समातृकः।
स गतोऽनुपदं[46] ज्ञातुं रुदन्वन्नतिविह्वलः।।158।।
ततः सहस्रशः[47] [47/1]खण्डैर्नीतायां सुमहास्वनम्।
ददर्शैनं शिलायाञ्च सुखं सुप्तं दृढं तनुम्।।159।।
अन्तरास्यकृताङ्गुष्ठं क्रीडन्तं प्रहसन्मुखम्।
उत्तानप्रचलत्पाणि चरणं शुभविग्रहम्।।160।।
ततोऽनघशरीरं तं जननी पृथु विस्मया।
गृहीत्वा शिरसि धृत्वा चक्रे वक्षस्थलं ततः।।161।।
प्रतिसूर्यस्ततोऽवोचदहो चित्रमिदं परम्।
वज्रेणेव तेदेतेन शिलाजातं विचूर्णिताम्।।162।।
अर्भकस्य सतोऽप्येषा सशक्तिः सुखरातिगा।
यौवनस्थस्य निर्वाच्यं वरमेवं ध्रुवं तनुः।।163।।
इति ज्ञात्वा परीत्य त्रिः शिरः पाणिशिरोरुहम्।
सहाङ्गनासमूहेन चकाराऽस्य नमस्कृतिम्।।164।।
असौ तस्य वरस्त्रीभिर्नेत्रभाभिः कृतस्मितम्।
सिताऽसिताऽरुणाऽम्भोजमालाभिरिव पूजितः।।165।।
सपुत्रां यानमारोप्य भागिनेयीं ततोऽगमत्।
प्रतिसूर्यो निजस्थानं ध्वजतोरणभूषिताम्।।166।।
ततः प्रत्युद्गतैः पौरैर्नानामङ्गलधारिभिः।
सविवेश पुरं तूर्यनादव्याप्तनभस्थलम्।।167।।
तत्र महोत्सवस्तस्य महाविद्याधरैः कृतः।
आखण्डलसमुत्पत्तौ गीर्वाणैस्त्रिदिवे यथा।।168।।
जन्म लेभे यतः शैले शैलं वा चूर्णयत्ततः।
श्रीशैल इति नामास्य चक्रे मात्रा ससूर्य च।।169।।

पुरे हनूरुहे यस्माज्जातः संस्कारमाप्तवान्।
हनुमानीति तेनागात्प्रसिद्धिञ्च महीतले ।।170।।
सर्वलोकमनो नेत्रे महोत्सवः वपुः क्रियः।
तस्मिन् सुरकुमाराभः पुरे रेमे सुकान्तिमान् ।।171।।
इदं ते कथितं जन्म श्रीशैलस्य महात्मनः।
शृणु सम्प्रति वृतान्तं वायोर्मगधमण्डनम् ।।172।।
वायुना वायुनेवाऽशु गत्वाऽभ्याशं खगेशिनः।
लब्धादेशेन संयुध्य नानाशस्त्राकुले रणे ।।173।।
कृतयुद्धश्चिरं खिन्नो जलकान्तोऽपवर्तितः[48]।
तदा वायुकुमारेण मोचितः[49] खरदूषणः ।।174।।
भूयश्च जलकान्तेन विमुच्य खरदूषणम्।
कृत्वा सन्धिं तुषं प्राप्तः परमं राक्षसाऽधिपात् ।।175।।
अनुज्ञातोऽवहत्कान्तां हृदयेन त्वराऽन्वितः।
जगामाऽभिजनं स्थानं महासामन्तमध्यगः ।।176 ।।
प्रविष्टश्च पुरं पौरैरभियातः सुमङ्गलैः।
ध्वजतोरणमालाभिर्भास्वराभिर्विभूषितम् ।।177 ।।
जगाम च निजं वेश्म[50] दृष्टो वातयनस्थितैः।
मुक्तस्तुतः[51] कर्त्तव्यैः पौरनारीकदम्बकैः ।।178 ।।
विवेश च कृतार्थादि सम्मानो मानिनां वरः।
वाग्भिर्मङ्गलसाराभिः स्वजनैरभिनन्दितः[52] ।।179 ।।
विधाय प्रणतिं तत्र गुरुणामितरैज्जनैः।
नमस्कृतः क्षणं तस्थौ वार्ताभिर्वरमण्डपे ।।180 ।।
ततः प्रासादमारुक्षदञ्जनायाः सुमुन्मनाः।
युक्तः प्रहसितेनैव पूर्वभावनयान्वितः ।।181 ।।
तया विरहितं दृष्ट्वा प्रासादं[53] प्राणतुल्यया।
चेतनामुक्तदेहाभं पपात् च मनः क्षणात् ।।182 ।।

ऊचे प्रहसितं चैव वयस्य किमिदं भवेत्।
अञ्जनासुन्दरी नाऽत्र दृश्यते पुष्करेक्षणात्।।183।।[54]

गृहमेतत्तया शून्यं वनं मे प्रतिभासते।
आकाशमेव वा क्षिप्रं तस्या वार्ताऽधिगम्यताम्।।184।।

आत्मवर्गात् परिज्ञाय वार्तां प्रहसितोऽवदत्।
यथावत् सकलां[55] तस्मै हृदयक्षोभकारिणीम्।।185।।

वञ्चितः स्वजनं[56] सोऽथ समं मित्रेण तत्क्षणम्।
महेन्द्रनगरं तेन प्रवृतो गन्तुमुन्मनाः।।186।।

तस्याऽऽसन्नभुवं प्राप्य मित्रमेवमभाषत।
मन्यमानोऽङ्कसम्प्राप्तां दयितां प्रमदाऽन्वितः।।187।।

पश्य पश्य पुरस्यास्य वयस्य रमणीयताम्।
अञ्जनासुन्दरी यत्र वर्तते चारुविभ्रमा।।188।।

ब्रुवन्नैवं स सम्प्राप्तः पुरं पुरुषसत्तमः।
सुहृदाऽद्वैतचित्तेन विहितप्रतिभाषणाम्।।189।।

ततो जनौघतः[57] श्रुत्वा सम्प्राप्तं पवनञ्जयम्।
अर्घादिनोपचारेण स्वसुरोऽस्य समागमत्।।190।।

पुरस्सरेण तेनाऽसौ प्रीतियुक्तेन चेतसा।
निजं प्रवेशितः स्थानं पौरैः[58] सादरमीक्षितः।।191।।

विवेश भवनं चाऽस्य कान्तादर्शनलालसः।
सङ्कथाभिर्मुहुर्त्तञ्च तस्थौ सर्वगणं भजत्।।192।।

ततस्तत्राऽप्यसौ कान्तामपश्यद्विरहातुरः।
अपृच्छद्बालिकां काचिदन्तर्भवनगोचराम्।।193।।

अपि बालेऽत्र जानाऽसि मत्प्रिया वर्त्ततेऽञ्जना।
साऽवोचद्देव नास्त्यत्र त्वत्प्रियेत्यसुखावहाम्।।194।।

वज्रेणेव ततस्तस्य तेन वाक्येन चूर्णितम्।
हृदयं पूरितौ कर्णौ तप्तक्षीराऽम्बु नैव च।।195।।

वियुक्त इव जीवेन क्षणं चाऽभूत्सुनिश्चलः।
शोकप्रालेय[59]सम्पर्कविच्छायमुख[60]पङ्कजः ।।196।।

निर्गतोऽसौ ततस्तस्माच्छद्मना स्वसुरात्पुरात्।
बभ्राम धरणीं वार्तामधिगन्तुं स्वयोषितः ।।197।।

ज्ञात्वा वायुकुमारञ्च वायुनेवातुरीकृतम्[61]।
ऊचे प्रहसितः सान्त्वं[62] तत्दुःखादभिदुःखितः ।।198।।

किं वयस्य विषण्णोऽसि कुरु चित्तमनाऽकुलम्।
द्रक्षसे दयितां द्राक्षं[63] कियद्वेदं महीतलम् ।।199।।

स प्रवोचत्तु[64] गच्छ त्वं भो सखे रविपुरं द्रुतम्।
इदं ज्ञापय वृत्तान्तं गुरुणा[65] मदनुष्ठितम् ।।200।।

अहं पुनरसम्प्राप्य दयितां क्षितिसुन्दरीम्।
न मन्ये जीवितं तस्मात्पर्यटाम्यखिलां भुविम् ।।201।।

इत्युक्तस्तेन दुःखेन विमुच्य कथमप्यमुम्।
आदित्यनगरं दीनः क्षिप्रं प्रहसितो ययौ ।।202।।

पवनोऽपि समारुह्य नागमम्बरगोचरम्।
विचरन् धरणीमीमां चिन्तामुपागतस्तदा ।।203।।

किं व्याघ्रप्रमुखैर्जीवैर्मारिताऽस्ति बुभुक्षितैः।
नदीपूराच्च भीता किं मृत्युं प्राप्ताऽस्ति सुन्दरी ।।204।।

गर्भं च्युत्वा मृता किं वा गह्वरे पतिताऽथवा।
क्षुतृग्भिः पीडिता दुःखात्किं वा व्याकुलचेतसा ।।205।।

भो मृगा भो नगा वृक्षा दृष्टा चेदस्ति चाऽञ्जना।
निवेदयन्तु मां वेगात्तदा सुखी भवाम्यहम् ।।206।।

एवं विलप्यमानोऽसौ भ्रमति विजने वने।
भूतारवं वनं प्राप्तो नीरपूरितलोचनः ।।207।।

अवतीर्य गजात्तत्र क्षिप्त्वा शस्त्राणि भूतले।
त्यक्ता वस्त्राणि देहस्योपविष्टो भुवि शोकवान् ।।208।।

वने रमस्व[66] भो हस्तिन् मुक्तां च शस्त्रक्रीडनम्[67]।
करेणुभिः समं भोगान् भुक्त्वा च त्वं सुखी भव।।209।।

यदि नायाति सत्शुद्धिरञ्जनाया तदात्वहम्।
मरिष्याम्यदनं[68] त्यक्त्वेत्युक्त्वा तत्रोपविष्टवान्।।210।।

हस्ती भ्रमति तत्पार्श्वं स्वामिभक्तिपरायणः।
इतः प्रहसितो गत्वा गुरुभ्यस्तन्निवेदयत्।।211।।

पुरं त्यक्ता गतो वायुर्वने परमशोकतः।
तच्छ्रुत्वा सजनाः सर्वे शोकं कुर्वन्ति दारुणम्।।212।।

विचाररहितानाञ्च शीघ्रकार्यविधायिनाम्।
जायते हि परं कष्टं केतुमत्यां यथागतम्।।213।।

प्राप्ता केतुमती दुःखं शोकं करोति व्याकुला।
हा पुत्र ! त्वं यातः कुत्र मां त्यक्ता दुःखपीडिताम्।।214।।

प्रह्लादेन ततो वेगात्सर्वान् विद्याभृतः परम्।
ज्ञापयितुं सुतवार्तां दूताः सम्प्रेषिता दिशि।।215।।

विद्याधराश्च तच्छ्रुत्वाऽञ्जनां द्रष्टुञ्च निर्गताः।
केचिद्वायुं निरीक्षन्ते सर्वत्र ते नभश्चराः।।216।।

प्रतिसूर्योऽपि तच्छ्रुत्वा शोकेन व्याकुलोऽभवत्।
अञ्जनाऽपि ततः श्रुत्वा परमं शोकमागता।।217।।

प्रतिसूर्यस्ततः प्राहः दुःखं मा कुरु बालिके।
अद्यैव तव भर्त्तारमानयामि तवाऽन्तिकम्।।218।।

इत्युक्त्वा निर्गतो वेगान्द्रष्टुं प्रह्लादनन्दनम्।
भूतारवे वने वायुं दृष्ट्वा तेऽत्र समागतः।।219।।

न मुञ्चति तदा हस्ती जनान् गन्तुं तदन्तिकम्।
करेणुं तैश्च संदर्श्य धृतो हस्ती मदोद्धतः[69]।।220।।

पितृभ्याञ्च तदा वायुर्बोधितोऽपि न मुञ्चति।
अञ्जनायां गतं ध्यानं मुक्तौ योगी यथागतम्।।221।।

तदैकान्ते सुवृतान्तः प्रतिसूर्येण भाषितः।
गुहायां जन्मपुत्रस्य विमानात्पतनमब्रवीत्।।222।।
सर्वविघ्नसमाप्तिञ्च स्वपुरे तु समागमम्।
तच्छ्रुत्वा पवनस्तुष्टस्तमालिङ्गितवान् सुखी।।223।।
ततो विद्याधरैः सार्द्धं सकलैः पवनञ्जयः।
गतो हनुरुहं पत्नं स्वर्गाभं बहुसम्पदा।।224।।
पवनाऽञ्जनयोस्तत्र जातो मेलापकः परः।
पित्रादीनाञ्च सन्तोषः सञ्जातः परमोत्सवः।।225।।
तत्र मासद्वयं स्थित्वा प्रतिसूर्येण पूजिताः।
विद्याधरा गताः स्थानं स्वं स्वं हर्षसमायुताः।।226।।
स्थितो हनूरुहे पत्ने प्रीत्या प्रह्लादनन्दनः।
अञ्जनाया समं भोगान् भुक्ता सुरेन्द्रसन्निभान्।।227।।
हनूमानथ सम्प्राप्तो यौवनं सुन्दरं परम्।
सिद्धविद्या समुद्रोऽसौ रेमे हनूरुहे पुरे।।228।।
रावणोऽथातिकोपेन वरुणं प्रतिनिर्गतः।
विद्याधरान् समानेतुं दूताः सम्प्रेषितास्तदा।।229।।[70]
खरदूषणसुग्रीवनीलाद्याः खेचरा नृपाः।
आज्ञां धृत्वा समायाता रावणस्याऽन्तिकं मुदा।।230।।
प्राप्याज्ञां प्रतिसूर्यस्य वायोश्च वायुनन्दनः।
विजयार्द्धखगैः सार्द्धं महासैन्यः समागतः।।231।।
ततो महाबलोपेतं हनूमन्तं नराधिपम्।
दृष्ट्वा स रावणस्तुष्टो मनसीदमवदत्तदा।।232।।
अधुना कदनं कार्यं सिद्धं[71] यास्यति निश्चितम्।
अनेन सुकुमारेण समं निर्गमने सति।।233।।
पादौ नत्वा दशास्यस्य हनूमान् करमस्तकः।
विवेकाद्विनयी भूत्वा महारूपी पुरः स्थितः।।234।।

दशाननोऽपि तत्कण्ठे समालिङ्ग्य महेश्वरः।
वस्त्रादिकं स्वदेहस्थं प्रीत्या तस्मै ददौ तदा।।235।।
क्षेमादिकञ्च सम्पृच्छ्योपविष्टौ[72] रत्नभूतले।
तयोस्ततश्च सञ्जाता वरा प्रीतिः परस्परम्।।236।।
चतुर्बलेन संयुक्तो महागर्वी दशाननः।
पातालपुण्डरीकाख्यं पुरं प्राप्तो महाबली।।237।।
ततो नगरमध्येऽस्मिन् जातः कलकलो महान्।
तच्छ्रुत्वा शतसङ्ख्याता निर्गता वरुणात्मजाः।।238।।
तैः राक्षसं बलं भग्नं तद्दृष्ट्वा च दशाननः।
स्वयं योद्धुं समायातो बहुप्राणिक्षयङ्करः।।239।।
युगपद्वारुणैर्वीरैर्वेष्टितो रावणस्तदा।
तद्दृष्ट्वा चाथ श्रीशैलः समायातो रणाङ्गणे।।240।।
तेन वरुणपुत्रास्ते कोपाल्लाङ्गुलविद्यया।
बन्धिताश्च रणे गादं जीवोऽयं कर्मणा यथा।।241।।
तदैव रावणेनाऽपि बन्धितो वरुणो नृपः।
नागपाशेन गर्विष्ठो नरके नारकी यथा।।242।।
रावणस्य बलं सर्वं तदुद्याने निवासितम्।
कुम्भकर्णेन गत्वाऽथ लुण्ठितं वारुणं पुरम्।।243।।
पुरस्य योषितः सर्वाः बन्धित्वा रावणाऽन्तिकम्।
नीतास्तेन तदावेगात्तद्दशास्येन मोचिताः।।244।।
वरुणोऽपि तदा दीनो मुञ्चितो विनयानतः।
सहितः शतपुत्रेण परिवर्गः समन्वितः।।245।।
वरुणेन तदा राज्ञा रावणाय सुकन्यका।
दत्ता सत्यवती नाम्ना विवाहविधिना मुदा।।246।।
तया सह दशास्योऽसौ लङ्कापुरं समागतः।
मेघवाहनश्रीशैलकुम्भकर्णादिभिर्वृतः।।247।।

दशाननेन तुष्टेन तदा दत्ता हनूमते ।
सुकन्याऽनङ्गपुष्पाख्या[73] रूपाख्या भगिनी सुता ।।248।।
अद्य प्रभृति पुत्रस्त्वं मम सर्वत्र निर्भयः[74]।
आज्ञां कुरु च सर्वेषु चेत्युवाच दशानन ।।249।।
राज्यं कुण्डलपत्नस्य दत्तं तेन हनूमते ।
विद्याभृताञ्च सर्वेषामग्रणीकृतवांस्तदा ।।250।।
तथा किष्कुपुरे दत्ता नलराजेन कन्यका।
श्रीशैलाय महाभूत्या नाम्ना सा हरिमालिनी ।।251।।
किन्नरपुरभूपेन दत्ता कन्याः शतप्रमा ।
रूपलावण्यभूपाद्याः सत्प्रीत्या श्रीहनूमते ।।252।।
तथा किष्किन्धनाथेन सुतारा कुक्षि सम्भवा।
पद्माख्या कन्यका दत्ता तस्मै रूपगुणान्विता ।।253।।
एवमादिसहस्रैकं नारीणां पूर्वपुण्यतः ।
श्रीशैलः प्राप्तवान् सर्वकलाविज्ञानभूषितम् ।।254।।
श्रीशैलं तनयं प्राप्य पवनाऽञ्जनसुन्दरी ।
हर्षञ्च परमं प्राप्ता सकलैः सज्जनैः समम् ।।255।।
अथ रावणराज्यस्य श्रीशैलप्रमुखा नृपाः ।
पादसेवां प्रकुर्वन्ति सहस्राणि च षोडशः ।।256।।
सप्तरत्नानि जीवानि निर्जीवानि च सप्तकः।
वर्णितानां सहस्राणि चाऽष्टादशानि पुण्यतः ।।257।।
त्रिखण्डसम्भवं राज्यं विद्याधरनृपैर्वृतः ।
लङ्कायां रावणो राज्यं करोति राक्षसाधिपाः ।।258।।
इन्द्रजिन्मेघवाहौ च कुम्भकर्णविभीषणौ ।
सर्वे ते सुखिनो जाता रावणाद्राक्षसाऽधिपाः ।।259।।
हस्तिनाञ्च रथानाञ्च पक्षसागरलक्षकाः ।
नवकोट्यास्तुरङ्गानां देशाः सहस्रषोडशः ।।260।।

धर्मप्रभावेन भवेद्धनाढ्यो
राज्यस्य सौख्यानि भवन्ति धर्मात्।
स्वर्गस्य लक्ष्मी भवतीह धर्मा-
न्मोक्षस्य प्राप्तिः सततं हि धर्मात्।।261।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
हनमूत्कथासहितरावणविभूतिवर्णनो नाम नवमोऽधिकारः।।9।।

❖❖❖

1. दर्शितस्य इति ख प्रतौ
2. युष्मात् इति क/ख प्रतौ
3. पश्य पदस्य ख प्रतौ लोपः।
4. परे इति ख प्रतौ।
5. सुन्दरि इति ख प्रतौ
6. स्वापि तापि इति क/ख प्रतौ
7. छायावेवानुकूलया इति ख प्रतौ
8. एषः श्लोकः ग प्रतौ अनुपलब्धः।
9. पुरादस्मादरं इति क/ख प्रतौ
10. वज्रैण इति क/ख प्रतौ
11. आहता इति ग प्रतौ
12. मया पुरात् इति ग प्रतौ
13. द्वारादविदिताऽपरैः इति क प्रतौ
    द्वारादविदितापरैः इति ख प्रतौ
14. तत्राध्यदींयत इति ख प्रतौ
    तत्राध्यदींयत इति ग प्रतौ
    तत्र प्यधीयन्त इति प. पु 1/17/60
15. विकृता इति ख प्रतौ
16. वाष्पौद्रा माद्राक्षी कृतदेहिका इति क/ख प्रतौ,
    वाष्पौघसमाद्रीकृतदेहिका इति प. पु. 1/17/62
17. कुर्बन्त्यान्शा इति ग प्रतौ
18. गल्हे इति ग प्रतौ
19. एषः श्लोकः क प्रतौ अनपलब्धः।
20. शोकसंकया इति ग प्रतौ
21. व्रजेत इति ख प्रतौ
22. शमं इति ग प्रतौ
23. मन्दिराभिधे इति ग प्रतौ
24. महार्दिक इति ग प्रतौ
25. उपसर्गन्ति सा कर्तुं इति ख प्रतौ

26. जिनेन्द्रवत्दया इति ख/ग प्रतौ
27. दूव्यनं इति क प्रतौ
    दूवेणं इति ग प्रतौ
28. ''कुरुत: पूर्वजां कथाम्''इति पद ग प्रतौ अनुपलब्धः।
29. 108 त:119 पर्यन्तश्लोकाः ग प्रतौ अनुपलब्धाः।
30. राजन् योषित् समावृतं इति क प्रतौ
31. एषा पङ्क्तिः क/ख प्रतौ अनुपलब्धः।
32. 130 श्लोकतः 138 श्लोकपर्यन्तश्लोकाः ग प्रतौ अनुपस्थिताः सन्ति।
33. तदा सापि दुखाक्रान्ता मार्गं गच्छति शनैः शनैः।
    इति ख प्रतौ पृष्ठान्ते अतिरिक्त पङ्क्ति विद्यते ।
34. एषा पङ्क्तिः ख प्रतौ अनुपलब्धा वर्तते ।
35. एषः श्लोकः क/ख प्रतौ अनुपलब्धः।
36. रुरदंस्तस्य योषितः इति ख प्रतौ, रुरदंस्तस्वयोषितं इति ग प्रतौ
37. कृतरोदां इति ख प्रतौ, कृतखेदा इति ग प्रतौ
38. रुरुद्रुरुयोषितः इति ख प्रतौ, रुरोदयोषितस्तदा इति ग प्रतौ
39. निस्तरः शुचि इति ग प्रतौ
40. सकुंतैरथि इति ख प्रतौ, 3,
41. 147 त: 149 पर्यन्तश्लोकाः ग प्रतौ अनुपलब्धाः।
42. पूज्यसुतस्य इति क प्रतौ
43. यामेखौ श्रवणर्क्षे क/ख
44. स्थानपतिदेवं इति क प्रतौ, स्थानांपति देवं इति ख प्रतौ
45. देव इति ख प्रतौ
46. यद्नुपंद इति ख प्रतौ
47. सहससै इति ग प्रतौ
47/1. खंडे इति ग प्रतौ
48. अपवर्तिनः इति ख/ग प्रतौ
49. याचित: इति ख प्रतौ, पातित: इति ग प्रतौ
50. सामन्तराजवर्गैश्च इति ग प्रतौ
51. प्रसुन इति क प्रतौ

52. अल्पनंदच्चिरं सुखम् इति ग प्रतौ
53. प्रसादं इति ख/ग प्रतौ
54. एष: श्लोक: ख/ग प्रतौ अनुपलब्ध:
55. सकलं इति प्रतित्रयेषु परन्तु व्याकरणात्मकदृष्ट्या सकलां इति स्यात्।
56. स्वजना इति ख प्रतौ, स्वजनी इति क प्रतौ
57. जातौद्यतः इति ख प्रतौ, जनमुखात् इति ग प्रतौ
58. परैः इति ख/ग प्रतौ
59. प्राप्तेय इति ग प्रतौ
60. विच्छायसुस्र इति ख प्रतौ
61. दुःखितञ्चाऽश्रुजीतितम् इति ग प्रतौ
62. सौ च इति ग प्रतौ
63. पश्यामि दयिता तूर्यं इति ग प्रतौ
64. प्रवोचद्व इति क/ख प्रतौ
65. नारिणां इति ग प्रतौ
66. वने व्रजस्व इति ख/ग प्रतौ
67. बलक्रीडनम् इति ख/ग प्रतौ
68. मरिष्याम्यहनं इति ग प्रतौ
69. महोद्धतः इति क/ख प्रतौ
70. एषः श्लोकः ग प्रतौ त्रयश्लोकपूर्वमेव लिखितम्।
    श्लोकस्य क्रमभङ्गो विद्यते ।
71. सिद्धिं इति ख प्रतौ
72. प्रविष्टो इति ग प्रतौ
73. सुकन्यानगपुष्पाख्या इति ख प्रतौ
74. मम सर्व च निर्भयम् इति ग प्रतौ

❖❖❖

दशमोऽधिकारः

संक्षेपेण च सम्प्रोक्तं चरित्रं रावणस्य ते।
मुनिसुव्रतनाथस्य शृणु भो श्रेणिकोऽधुना।।1।।
तात्पर्यं सर्वशास्त्रस्य पञ्चकल्याणवर्णनम्।
कथ्यते च तदेवाऽत्र श्रूयतां[1] सज्जना जनाः।।2।।
भरतेऽत्राऽङ्गदेशाथ चम्पापुरे महेश्वरः।
हरिबह्माऽभिधो धर्मी दानपूजासुतत्परः।।3।।
अनन्तवीर्ययोगीन्द्रपाश्वें श्रुत्वा दयापरम्।
'धर्मं जग्राह दीक्षां स वैराग्याद्धरिबह्मकः'[2]।।4।।
एकादशाङ्गशास्त्राऽब्धेः पारं[3] प्राप्तो गुरोर्मुखात्।
द्वादशधा तपः घोरं चरति दारुणं परम्।।5।।
अनशनावमोदर्यौ तृतीयं वस्तुसङ्ख्यकम्।
रसत्यागं पृथक् शय्याशनं भवति पञ्चमम्।।6।।
कायक्लेशं भवेत्षष्ठं षोढा बाह्यतपः स्मृतम्।
विनयं प्रायश्चित्ताख्यं वैयावृत्यं तृतीयकम्।।7।।
कायोत्सर्गं तथा ध्यानं षष्ठं स्वाध्यायनामकम्।
आभ्यरन्तमिति ज्ञेयं एवं द्वादशधा तपः।।8।।
आर्तरौद्रं तथा धर्मं शुक्लध्यानं चतुर्थकम्।
आर्तरौद्रे परित्यज्य कर्तव्ये धर्मशुक्लके।।9।।
प्रावृट्काले तरोर्मूले ग्रीष्मर्तौ गिरिमस्तके।
शैत्यकाले नदीतीरे ध्यानेन स्थीयते मुनिः।।10।।
हिंसाऽसत्याऽङ्गनासङ्गस्तेयपरिग्रहादिकान्।
व्यतिरिक्तः सदा योगी त्रिकालयोगधारकः।।11।।
ईर्याभाषैषणाऽऽदाननिक्षेपमलमोचनाः।
पञ्चसमितयस्तासु सदा यत्नपरोऽभवत्।।12।।

मनोवाक्कायगुप्तींश्च रक्षति ध्यानयोगतः।
क्षुतृट्शीतोष्णदंशाश्च रत्यरती च नग्नता॥13॥
नारीचर्या निषद्याश्च शैयाऽऽक्रोशवधास्तथा।
याञ्चाऽलाभतृणस्पर्शाः मलरोगौ तथा द्वयम्[4]॥14॥
सत्कारश्च पुरस्कारः प्रज्ञा चाऽज्ञानाऽदर्शनैः।
एते द्वाविंशति ज्ञात्वा सहति स परीषहान्॥15॥
व्रतसमितिपञ्चेन्द्रिरोध लोच[5] षडावशम्।
अचेलस्थितिभुक्तिश्चैकवारं स्नानवर्जनम्॥16॥
अदन्तवणं भूशय्या अमी मूलगुणाः स्मृताः।
तेषु तत्परतां योगी शास्त्राध्ययनतत्परः॥17॥
स्वगुरोर्निकटे धीमान् परां षोडशभावनाम्।
भावयति हरिर्ब्रह्मा तीर्थकृन्नामबन्धनाम्॥18॥
मूढत्रयं ततो हत्वा त्यक्ता मदाऽष्टकं परम्।
अनायतनानि षट् त्यक्ता शङ्काद्यष्टविवर्जितः॥19॥
निःशङ्कादिगुणोपेतं सम्यक्त्वं पालयन्मुनिः।
जिनेन्द्रगुरुशास्त्रेषु करोति विनयं परम्॥20॥
अनतिचारशीलञ्च चरति[6] निर्मलं मुनिः।
अङ्गपूर्वादिशास्त्रञ्चाऽभीक्ष्णं पठति सर्वदा॥21॥
संसारभोगदुःखेषु वैराग्यं परमं दधत्।
शास्त्रदानं सदा शक्त्यनुसारेण करोति सः॥22॥
तपः शक्त्यनुसारेण करोत्यनशनादिकम्।
ग्लानरोगादिभीतानां समाधिं साधयत्यसौ॥23॥
व्याधिपीडितशिष्यानां वैयावृत्यं करोति च।
जिननामाऽक्षरं द्वन्द्वं जपति[7] स पुनः पुनः॥24॥
गुरुषु च सदा भक्तिं करोति मोक्षलालसः[8]।
विनयात्पठति ज्ञानं जिनवाक्येषु भक्तकः॥25॥

षडावश्यकेष्वासक्तो जिनमार्गप्रभावकः।
श्रावकादिषु शिष्याणां वात्सल्यञ्च करोति सः।।26।।
एवं च भावनां रम्यां भावयित्वा जिनस्य च।
नामबन्धं कृतं येन महासौख्यकरं सदा।।27।।
कोष्ठबुद्धिं बीजबुद्धिं पदानुसारिणीं तथा।
सम्भिन्नश्रोतृबुद्धिञ्च रसर्द्धिं स च प्राप्तवान्।।28।।
राजर्षिराजविद्याभिर्दीप्तर्द्धिञ्च तपोबलात्।
सर्वौषध्यर्द्धिं सम्प्राप्तः परमर्द्धिं तपोबलात्।।29।।
उत्तमादिक्षमा स्याच्च मार्दवञ्च तथार्जवम्।
सत्यं शौच्यं परं ज्ञेयं संयमञ्च तपस्तथा।।30।।
त्यागमाकिञ्चनं ब्रह्मचर्यञ्च दशमं भवेत्।
आराधयति धर्मं स दशधा च यतीश्वरः।।31।।
एवं तपो महत्कृत्वा ज्ञानत्रयसमायुतः।
मृत्वा समाधिना योगी प्राणतेन्द्रोऽभवत्तदा।।32।।
विंशत्यब्धिपरमायुः शुक्ललेश्योपयुक्तकः।
सार्द्धरत्नत्रयोत्सेधः पञ्चमनरकादिदृक्।।33।।
स्वस्वन्[9] स दशभिर्मासैरष्टर्द्धिगुणसंयुतः।
वर्षैर्विंशतिसहस्रैर्भुक्तिश्च मानसा भवेत्।।34।।
मनाग्मनः प्रवीचार भोगशच्यादिभिः सदा[10]।
पूजयति जिनबिम्बानि कुर्वन् कल्याणपञ्चकम्।।35।।[11]
नानादेवगणैः सेव्यो गीतनृत्यादिभिः सदा।[12]
अन्वभूच्च सुखं तत्र जिनसेवनतत्परः।।36।।
यस्मिन्वंशे भवेत्स्वामी मुनिसुव्रतनामकः।
तस्य श्रीहरिवंशस्य चोत्पत्तिः कथ्यतेऽधुना।।37।।
दशमे श्रीजिनेऽतीते वत्साख्ये विषये वरे।
कौशाम्बीनगरी रम्या यमुनाजलवेष्टिता।।38।।

सुमुखाख्यो नृपस्तत्र सर्वशास्त्रविशारदः।
वसन्तसमये क्रीडां कर्तुं स्त्रीभिः स निर्गतः।।39।।
गजमारुह्य मार्गेऽसौ गच्छन् जनैर्विलोकितः।
तदा तेन गवाक्षस्था दृष्टैका वनिता वरा।।40।।
ततः कामेन व्याप्तोऽसौ वनं गत्वाऽतिवेगतः।
व्याघुट्य सदनं प्राप्तश्चिन्ताव्याकुलचेतसि।।41।।
निद्रां न लभते रात्रौ दिवा भुक्तिं करोति न।
अमात्यः सुमतिर्नाम्ना तदाऽपृच्छच्च तं नृपम्।।42।।
किमर्थं देव चिन्ताऽस्ति मयि ते सति मन्त्रिणि।
तदा जगाद भूपालो मार्गे संगच्छता मया।।43।।
गवाक्षस्था महारूपा दृष्टैका वनिता परा।
तदारभ्य च मे चिन्ता वर्तते कामजां सदा।।44।।
तदा जगाद मन्त्री स श्रेष्ठी चात्रास्ति वीरकः।
महाधर्मी धनैर्युक्तस्त्यागी भोगी सुरोपमः।।45।।
वनमालाभिधा तस्य भामिनी स भवेत्प्रभो।
उपायस्तत्र कर्तव्यस्तामानीतुं सखीमुखात्।।46।।
आहूय मन्त्रिणा तेन श्रेष्ठी वीरसञ्ज्ञकः।
प्रेषितो गजमानेतुं दूरदेशान्तरं तदा।।47।।
दूतीमुखात् समानीता वनमाला नृपालये।
ततः प्रीतिः तयोर्जाता भूपतिर्वनमालयोः।।48।।
कतिपयैर्दिनैस्तत्र वीरश्रेष्ठी समागतः।
नृपेन गृहीता भार्या ज्ञात्वा शोकीपरोऽभवत्।।49।।
प्रोष्ठिलाख्यमुनेः पार्श्वे श्रुत्वा धर्मं दयापरम्।
वैराग्याद्दीक्षितो भूत्वा करोति तप उत्तमम्।।50।।
अन्ते संन्यासमादाय मृत्वा सुधर्मनामनि।
चित्राङ्गदाभिधो देवो जातः पुण्यवशात्सुखी।।51।।

एकदा सुमुखो दत्वा वरधर्माय योगिने।
वनमालाऽन्वितो दानं पापं पपृच्छ मानसम्[13] ।।52।।
परस्त्रीसङ्गमात्किं स्याद्वद स्वामिन् सुखं वचः।
सोऽवोचदस्य पापेन जायते नारकी गतिः ।।53।।
तस्य वचनमाकर्ण्य पापात्सम्भीतमानसौ।
बह्मचर्यं ग्रहीत्वा तौ स्त्रीपुरुषौ गृहे स्थितौ ।।54।।
एकदा विद्युदापातात् मृत्वा तौ मुनिदानतः।
भरते हरिवर्षाख्ये देशे भोगपुरे वरे ।।55।।
प्रभञ्जननृपस्तत्र हरिवंशशिखामणिः।
मृक्कंडा तस्य भार्याऽस्ति नृपपुत्रोऽभवत्तयोः ।।56।।
सिंहकेतुरिति नाम्ना रूपी गुणी सत्पक्षमान्[14]।
अथवा शीलपुरे रम्ये वज्रघोषमहीपतिः ।।57।।
शुभा वा तस्य भार्याऽस्ति वनमाला सुता तयोः।
विद्युन्मालाभिधा जाता पुत्री रूपगुणान्विता ।।58।।
सा सिंहकेतुना नीता विवाहविधिना मुदा।
पूर्वस्नेहाऽनुबन्धेन तत्र प्रीतिरभूत्तयोः ।।59।।
चित्राङ्गदः सुरो यस्तु स्मृत्वा वैरञ्च पूर्वजम्।
अहरन् गगने तौ च दम्पती पापबुद्धितः ।।60।।
मारयामि जले क्षिप्त्वा चास्फाल्यै तौ शिलातले।
इति सञ्चिन्त्यतौ नीत्वा गच्छति स तदा शृणु ।।61।।
सुमुखस्य तदा मित्रो मद्याख्यश्च मृतोऽभवत्।
अणुव्रतेन सौधर्मे सूर्यप्रभाभिधः सुरः ।।62।।
बोधितस्तेन चित्राङ्गदेवः पापान्निवारितः।
तदा चित्राङ्गदेवेन मुक्तो चम्पापुरी वने ।।63।।
विद्युन्मालासिंहकेतू शनैस्तौ पुरसन्निधिम्।
आगतौ च भयत्रस्तौ रतिकामौ परौ यथा ।।64।।

तद्दिने तत्पुरस्वामी मृतः पुत्रविवर्जितः।
राजपुरुषमन्वेष्टुं गजः संमन्त्रितो जनैः।।65।।
सिंहकेतोः शुभे कण्ठे क्षिप्ता माला च दन्तिना।
सिंहासने ससंस्थाप्य पूजितः सज्जनैस्ततः।।66।।
जनैः पृष्टस्तदा कस्त्वं कस्मादत्र समागतः।
साह भोग्यपत्नेऽस्ति प्रभञ्जननरेश्वरः।।67।।
हरिवंशकुलोद्‌भूतो मृक्कंडा तस्य भामिनी।
तत्पुत्रोऽहं सिंहकेतुरियन्तु मम वल्लभा।।68।।
देवेन केनचित्पापात् क्षिप्तोऽहमत्र पापिना।
तच्छ्रुत्वा जनैस्तस्य मृक्कंडाया सुतो यतः।।69।।
मार्क्कण्डेय इति नाम कृतं महोत्सवैः परैः।
भार्यया सहितो राज्यं चम्पायाञ्च करोति सः।।70।।
तत्पुत्रोऽभून्महागिरिस्ततो हेमगिरिः स्मृतः।
वसुगिरिस्ततो जात एवमाद्या महानृपाः।।71।।
हरिवंशे समुत्पन्ना राज्यभारधुरन्धराः।
दत्वा राज्यं स्वपुत्रेभ्यो यथायोग्यां गतिं श्रिता।।72।।
तस्मिन् वंशेऽथ राजाऽभूत्सुमित्राख्यो महागुणी।
मागधविषये रम्ये कुशाग्रनगरे वरे।।73।।
समुद्रवच्च गम्भीरो मेरुरिव सदास्थिरः।
कल्पवृक्ष इव त्यागी भोगी शक्र इवाऽपरः।।74।।
सोमाख्या[15] तस्य भार्याऽस्ति शीलगुणविभूषणा।
रूपाख्या स्वामिभक्ताश्च सम्यक्त्वगुणसंयुता।।75।।
अथ स्वावधिना ज्ञात्वा षण्मासावधिजीवितम्।
प्राणतेन्द्रस्य सम्प्राह सौधर्मेन्द्रो धनाधिपम्।।76।।
कुशाग्रनगरेशस्य सुमित्रस्य सुतो भवेत्।
विंशतिमो जिनाधीशः षण्मासेषु गतेषु च।।77।।

अतो गत्वा कुरु त्वं हि भो कुबेर मुदा स्वयम्।
रत्नवृष्टादि पञ्चैवाश्चर्यं रम्यं च तद्गृहे ।।78।।
तदाज्ञां मस्तके कृत्वा परं तोषेण पूरितः।
अगमत्तद्गृहं यक्षो महापुण्यस्य हेतवे ।।79।।
पद्मरागादिवैडूर्यसहितं कनकैर्महत्।
करोति धनदो वृष्टिं राजाङ्गणे दिने दिने ।।80।।
गन्धोदकस्य वृष्टिञ्च कल्पवृक्षप्रसूनकैः।
सुदिव्यं दुन्दुभिध्वानं जयजयरवेर्युतम् ।।81।।
सर्वत्रगमनं रुध्वा रत्नधारा दशो दिशि।
देववृन्दैः समं प्रीत्या कृत्वा नृत्यति यक्षराट् ।।82।।
पञ्चाश्चर्यं ततो दृष्ट्वा जिनकल्याणसूचकम्।
मिथ्यादृष्टिजना जाता जिनभक्तिषु तत्पराः ।।83।।
सार्द्धत्रिकोटिरत्नानि काले काले स वर्षति।
प्रतिदिनं त्रिकालञ्च यावत्षण्मासपूर्यते ।।84।।
पुरं सर्वं धनैः पूर्णं भाविश्रीजिनपुण्यतः।
सर्वत्र सुखिनो जाता जनास्तोषेण पूरिताः ।।85।।
सौधर्मेन्द्रोऽथ सम्प्राह षट्देव्यः प्रतियुक्तिवित्।
सोमाख्यायाश्च सद्गर्भे जिनेन्द्रोऽवतरिष्यति ।।86।।
यूयम् गत्वा ततस्तत्र कुरुध्वं गर्भशोधनम्।
षट्पञ्चाशत्कुमारीभिः सह सेवां विधीयते ।।87।।
इत्युक्ते देवनाथेऽस्मिन् श्रीह्रीधृतिसुकीर्त्तयः।
बुद्धिलक्ष्म्यौ च सम्प्रीत्या तस्याज्ञां शिरसि धृताः ।।88।।
कुशाग्रनगरं प्राप्ता सुमित्रस्यान्तिकं गताः।
भो राजन् तव भार्याया गर्भे जिनो भविष्यति ।।89।।
तस्याः सेवां करिष्याम आज्ञां देहि नराधिप।
नृपः प्राह वरं देव्यं क्रियतां सेवनं परम् ।।90।।

ततस्ताश्च गता यत्र सोमादेवी प्रवर्त्तते।
सेवां कर्तुं समारब्धा प्रोच्य शक्रस्य सत्कथाम्।।91।।
ततस्ताभिः कृतं तस्या गर्भसंशोधनं परम्।
शुद्धस्फटिकसङ्काशं शुचिद्रव्यकदम्बकैः।।92।।
पादयोः क्षालनं काचित् काचिदङ्गप्रक्षालनम्।
एवमादिक्रियां तस्याः कुर्वन्ति ताः सुखप्रदाम्।।93।।
सोमा कृत्वाऽथ सुस्नानं चतुर्थं गर्भसूचकम्।
सुखं सुप्ताऽथ पल्यङ्के पुष्पोपचारशोभिते।।94।।
पश्चिमे प्रहरेऽपश्यत् रम्यान् स्वप्नांश्च षोडश।
महाफलप्रदान् लोके जिनकल्याणसूचकान्।।95।।
गर्जन्तं हस्तिनं रम्यं श्वेतं तुङ्गं मनोहरम्।
वृषभञ्च महास्कन्धं शुभं रम्यं महास्वनम्।।96।।
शिरसि कृतलाङ्गूलं सिंहश्चेतं स केशरम्।
गजेः प्रसिञ्च्यमानां सुकुम्भैर्लक्ष्मी सुखस्थिताम्।।97।।
पुष्पमाले परे रम्ये[16] चञ्चरीकैश्च कङ्कृतेः।
षोडशसुकलायुक्तं तारावृत्तञ्च चन्द्रकम्।।98।।
हन्त तमसां वृन्दमुद्यन्तं निर्मलं रविम्।
रमन्ते सरसो नीरैर्मीनयुग्मं सु सुन्दरम्।।99।।
कुम्भौ हेममयौ रत्नैः कलितौ कमलान्वितौ।
पद्मैर्युक्तं जलैः पूर्णं निर्मलं सुसरोवरम्।।100।।
गर्जन्तं नीरकल्लोलैः समुद्रं पारवर्जितम्।
सुरत्नैः कीलितं हेमं मनोज्ञं सिंहविष्टरम्।।101।।
घण्टाध्वजादिभूषाद्यां स्वर्विमानं मनोहरम्।
नागगेहं सुरम्यञ्च निर्गच्छन्तं महीतलात्।।102।।
नानारत्नैः कृतां राशिमिन्द्रचापसमप्रभाम्।
वह्निदीपञ्च निर्धूमं ज्वलत् ज्वालोपशोभितम्[17]।।103।।

एवं स्वप्नसमूहं सा दृष्ट्वाऽपश्यत्तदन्तरम्।
स्वमुखे प्रविशंतं च कृष्णं तुङ्गं गजं वरम्।।104।।
प्राणान्तेन्द्रोऽथ स च्युत्वाऽस्या गर्भेऽवतरत्तदा।
श्रावणस्य द्वितीयायां कृष्णायां श्रवणे च मे।।105।।
ततः बोधिकैर्गीतैर्वाद्यैश्च नर्तनादिभिः।
प्रबुद्धा सा ततः सोमा हर्षयुक्ता समुत्थिता।।106।।
कृत्वा स्नानादिकं कार्यं सामायिकं सुखप्रदम्।
निर्जगाम सुखी युक्ता देवी स्वभर्तुरन्तिकम्।।107।।
अर्द्धासनं तदा तेन दत्तं तव संस्थिता।
करौ द्वौ मुकलीकृत्वा जगाद विनयाऽन्विता।।108।।
नाथाद्य पश्चिमे यामे दृष्टं स्वप्नकदम्बकम्।
तत्फलं ब्रूहि मे वेगात् सुखिन्यहं भवेद्यतः।।109।।
सोऽवोचच्छृणु ते देवि स्वप्नात्पुत्रो भविष्यति।
गजाद् भुवि महान् पुत्रो वृषाद्राज्यधुरन्धरः।।110।।
सिंहात्पराक्रमी लोके लक्ष्म्या लक्ष्मीयुतो भवेत्।
दाम्नः सन्तीर्थकर्ता स्याच्चन्द्रद्विश्च सुखङ्करः।।111।।
खेरज्ञानहन्ता च मीनयुग्मात् सदा सुखी।
निधानभोगी कुम्भाभ्यां सुलक्षणी सरोवरात्।।112।।
समुद्राच्च महाज्ञानी साम्राज्यं सिंहविष्टरात्।
विमानात्सुरवद्भागी त्रिज्ञानी भवनालयात्।।113।।
रत्नराशेर्गुणाधारो वह्नेश्च कर्मदाहकः।
अन्ते गजाच्च ते कुक्षौ समवतरितो जिनः।।114।।
स्वप्नानां च फलं श्रुत्वा तुष्टा देवी गृहङ्गता।
घण्टानादस्तदा स्वर्गे स्वयमेवाऽभवत्परम्।।115।।
ज्योतिर्लोके हरेर्नादो भेरीनादश्च व्यन्तरे।
शङ्खनादश्च पाताले चैवं शब्दायितं जगत्।।116।।

आसनकम्पा[18] देवानां नतानि मुकुटानि च।
कल्पवृक्षेषु सञ्जाता पुष्पवृष्टिः स्वयं महत्।।117।।

अवधिना तदा ज्ञात्वा जिनगर्भस्य सम्भवम्।
देवाश्चतुर्णिकायाश्च सशक्राश्च समागताः।।118।।

नाट्यादिकां क्रियां कृत्वा सुमित्रस्य गृहाङ्गणे।
पञ्चाश्चर्यं महत् कृत्वा स्तुत्वा तुष्टा जिनं सुराः।।119।।

जिनस्य जननीं त्रीणि वारं परीत्य ते सुराः।
पुनः पुनश्च तां नत्वा स्वस्वस्थानङ्गता मुदा।।120।।

धर्म्माच्च कल्याणजिनेन्द्रपूजा
देवा समाकर्षणताञ्च धर्मात्।
कर्म्मसमूहाः[19] प्रलयन्ति धर्मात्
तस्मात्कुरुध्वं[20] जिनधर्ममेकम्।।121।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते मुनिसुव्रतगर्भकल्याणकवर्णनो नाम दशमोऽधिकारः।।10।।

❖❖❖

1. शृणुत इति क प्रतौ, शृणुतां इति ख प्रतौ
2. धर्मां जग्राह दीक्षासां वैराग्याद्धरबह्मकः इति ग प्रतौ
3. अब्धैः र्परं इति ख प्रतौ
4. तथात् ह्वयं इति ग प्रतौ।
5. लोभ इति ख प्रतौ
6. रहिताः इति ग प्रतौ
7. पठति इति ख/ग प्रतौ
8. मूढ़लालसः इति ख प्रतौ
9. सस्वन् इति ख प्रतौ स्वसन् इति ग प्रतौ
10. नृत्यादिभिः सदा इति ख प्रतौ।
    स्त्रीभिः समन्वितः इति ग प्रतौ।
11. एषा पङ्क्तिः क/ख प्रतौ न प्राप्यते।
12. एषा पङ्क्तिः क/ख प्रतौ न प्राप्यते।
13. प्रयच्छश्वछमानसम् इति ग प्रतौ
14. क्षमादिमान् इति ख/ग प्रतौ
15. पद्मावतीति नामो प. पु. 21/12
16. पुष्पमालो परं रम्यं इति ख प्रतौ
17. ज्वाला पश्यति शोभितम् इति ख प्रतौ
18. आसन कल्पः देवानां इति ख प्रतौ
19. धर्मसमूहाः इति ख प्रतौ
20. कुरुत्वं इति ख प्रतौ

❖❖❖

एकादशमोऽधिकारः

अथ त्रिज्ञानसम्पन्नो गर्भो वर्द्धते नित्यशः।
शुक्तौ मुक्तामणिर्लोके दर्पणे प्रतिबिम्बवत्।।1।।
मलमूत्रविनिर्मुक्तः क्वचिद्बाधाविवर्जितः।
गर्भो[1] वर्द्धति तद्गर्भे सर्वेषां सुखसम्पदा।।2।।
शक्राज्ञया तदा देव्यः कुर्वन्त्यस्याः प्रसेवनम्।
षट्पञ्चाशद्वरा कन्या भक्त्याद्याश्च सुराङ्गनाः।।3।।
नृत्यन्ति ताण्डवं काश्चित् हावभावैर्युतं तदा।
काश्चिद् गायन्ति गीतानि सुस्वरैः सप्तभिर्मुदा।।4।।
वंशवीणामृदङ्गादीन् काश्चिद्वाद्यन्ति युक्तितः।
कथां कुर्वन्ति काश्चिच्च जिनपुराणसङ्गताम्।।5।।
ददाति शयनं काश्चिद् काश्चिदासनमाक्षिपत्।
काश्चिद्ददति ताम्बूलं हस्ताधारञ्च कास्तदा।।6।।
क्रियां स्नानस्य काश्चिच्च काश्चिच्चरणक्षालनम्।
पाकस्य सम्विधिं काश्चिद्रक्षति शयनं पुरा[2]।।7।।
खड्गं धृत्वा स्थिताः काश्चिद् वातञ्च तालवृन्तकैः।
काश्चित्पठन्ति सुश्लोकान् गीतच्छन्दप्रहेलिकाम्।।8।।
त्वत्पुत्रः कीदृशो देवि भवेत्त्रैलोक्यमण्डनः।
सर्वज्ञाता लोकत्राता कर्मभेत्ता भविष्यति।।9।।
जिनं सुसृष्टिकर्त्तारं जितमोहं सदेश्वरम्।
सुभक्त्या तमहं वन्दे सुखदं सुखसम्पदे।।10।।

छत्रबन्धचित्रम्

जिनज्ञानधनध्यानं मानदानं मनःस्थिरम्।[3]
सुनरं नन्दिनं जैनं स नयेत् न कुनन्दनम्।।11।।

कमलबन्धचित्रम् गोमूत्रिकाबन्धम् च

विटस्य सङ्गतिं कर्ता को न भवेत्सुखी भुवि।
इवर्णे रहिते देवि कोऽर्थः स्याच्च मनोहरः।।12।।

सर्वसृष्टिदुःखभञ्जनवीरदेवनागसुरसेवितम्।
प्रहेलिकादिबन्धसन्धिकाव्यजैः सुसदा जिनं संस्तुवे[4]।।13।।

प्रहेलिका

इत्यादिक्रीडनैर्देवीं सेवन्ति सुरवल्लभाः।
गतकालं न जानाति सोमा जिनेन्द्रपुण्यतः।।14।।

पञ्चाश्चर्यसमेताञ्च रत्नवृष्टिञ्च पूर्ववत्।
नवमासावधिं यावत्करोति स धनाधिपः।।15।।

आनन्दनन्दनं नित्यं नृत्यं नृणां जिनेश्वरः[5] ।
करोति रत्नवृष्टिञ्च त्रिकालसर्वगोचरम्।।16।।

कल्पवृक्षस्य सत्पुष्पैः पुष्पवृष्टिं करोति च।
नानागन्धसुगन्धीभिर्जलैवृष्टिं सुखप्रदाम्।।17।।

नानावाद्यस्य निर्घोषान् कुर्वन्ति तत्र देवता।
जयजयारवान्नित्यं सर्वलोकसुखप्रदाम्।।18।।

गीतनृत्यविनोदेन नवमासा गताः सुखम्।
नोदरस्य विकारोऽभून्नो देहञ्च विछायताम्।।19।।

वैशाखकृष्णदशम्यां श्रवणर्क्षे शुभे दिने।
प्रसूता च सुतं देवी त्रिज्ञानवरलोचनम्।।20।।

दिवानाथं यथा प्राची निर्मलं तेजसां वयम्[6]।
द्योतयन्तं जगत्सर्वं जिनमसूतसुन्दरी।।21।।

दिशः प्रसन्नतां प्राप्ता निर्मलञ्च नभोङ्गणम्।
शीतलश्च ववुर्वायुः परमानन्ददायकः।।22।।

स्वजनेषु महानन्दो गीतनृत्यं गृहे गृहे[7]।
वाद्यस्य विभवा जाताः श्रवणेषु सुखप्रदाः।।23।।

घण्टानादोऽथ[8] स्वर्गेऽभूत्सिंहनादश्च ज्योतिषि।
व्यन्तरे दुन्दुभेर्नादः शङ्खनादश्च भूतले।।24।।
चतुर्णिकायदेवानां गृहेषु च मनोहरा।
पुष्पवृष्टिः परा जाता वाद्यनिर्घोषसंयुता।।25।।
मुकुटानि च देवानां नमितानि स्वयं सदा।
कम्पितानि भयादेव सिंहासनानि पूर्ववत्।।26।।[9]
पञ्चाश्चर्यञ्च देवानां लोके जातं मनोहरम्।[10]
देवैः स्वावधिना ज्ञातो जिनजन्मसमुद्भवः।।27।।
सेन्द्राश्च व्यन्तराः सर्वे भवनवासिनस्तथा।
ज्योतिषः सपरिवारा नानायानैश्च संयुताः।।28।।
सुधर्मेन्द्रगृहद्वारं सम्प्राप्ता विभवान्विताः।
तदा षोडशस्वर्गस्था देवास्तत्र समागताः।।29।।
सौधर्मेन्द्रस्तदा भक्त्या निर्गतः स्वगृहान्मुदा।
ऐरावतं समारूढः शचीदेव्या समं परम्।।30।।
सप्तसेनाः कृताश्चाग्रे महाऽऽडम्बरसंयुतः।
एकैकस्यां सुसेनायां सप्त सप्त चमू भवेत्।।31।।
सर्वैकोन्नाश्च पञ्चाशत् सेना रम्याश्च निर्गताः।
सेनायां च सु प्रत्येकं गीतवाद्यं सुनर्तनम्।।32।।
वृषभाश्च रथा अश्वा गजा नर्तक्य एव च।
गन्धर्वाश्च तथा भृत्या सप्तसेना प्रकीर्तिताः।।33।।
वृषभाणाञ्च प्रत्येकं सप्तसेना पृथक् पृथक्।
एवं रथाश्च नागानां गन्धर्वा भृत्यवर्तिनाम्।।34।।
वृषभस्याद्यसेनायां वृषभा दिव्यसुन्दराः।
चतुराशीतिसहस्राः शेषेषु तद्विगुणाः पृथक्।।35।।
कोट्येकलक्षषट्चैवाष्टषष्टिसहस्रप्रमा।
पिण्डिता वृषभा ज्ञेया घण्टाचामरभूषिताः।।36।।

आरूढा देवता सेना विराज्यन्ते जिनोत्सवे।
गजादयोऽपि तावन्त सङ्ख्या जिनैः प्रकीर्तिता।।37।।
एते ज्ञेयाः सुधर्मेन्द्रदेवस्य विभवा पराः।
तथैवं शेषशक्राश्च निर्गता विभवैर्युताः।।38।।
आद्यसेनावृषभाणां शुभ्रारत्नविभूषणाः।
श्वेतच्छत्रध्वजश्चेता घण्टाचामरशोभिताः।।39।।
जयाभाश्च द्वितीया स्यात् सेना रम्या सुखप्रदा।
नीलोत्पलस्य वर्णान्या मरकतमणिप्रभा।।40।।
हेमवर्णा तथा चाऽन्या कृष्णवर्णा ततोऽपरा।
अशोकपुष्पवर्णाऽन्या चैवं सेनासु सप्तधा।।41।।
स्वस्य वर्णसुभूषाद्या दिव्यरूपमनोहरा।
आरूढा देवतास्तांश्च स्वस्वभार्यासमन्विता।।42।।
तुङ्गा रथास्तथाशुभ्राश्चतुशक्राः सुशोभिनः।
छत्रचामरघण्टाभिर्भूषिताश्च सुरैर्भृता।।43।।
शुभ्राः प्रथमकक्षायां हेमवर्णा द्वितीयकाः।
दूर्वादल समाश्चाऽन्या मरकतमणेः समाः।।44।।
कर्कोटकमणेस्तुल्याः पद्मरागमणेः समाः।
इन्द्रनीलनिभाश्चाऽन्या सप्तकक्षाः स्मृताः पराः।।45।।
एवमश्वा गजा यान्ति जिनेन्द्रजन्मोत्सवे।
गन्धर्वा आद्यकक्षायां नृत्यन्ति गीतसंयुताः।।46।।
त्रिषष्टिपुरुषाणाञ्च चरित्राणि पठन्ति ते।
द्वितीयाः पञ्चकल्याणं गायन्ति शुद्धचेतसा।।47।।
चक्रिणां गीतरम्याणि पठन्ति तृतीयानिकाः।
अन्येषां केवलीनाञ्च कथां पठन्ति गायकाः।।48।।
शक्रादीनां पुराणानि पठन्ति पञ्चमासुराः।
मण्डलीकादिभूपानां कथां गायन्ति धर्मिणाम्।।49।।

द्व्यर्द्धद्वीपस्य सन्नृणां गीतानि सप्तके स्मृताः।
खड्गैश्चार्षभगांधार मध्यमैश्च स्वरैस्तथा।।50।।

पञ्चमैश्च निषादैश्च गायन्ति क्रमतः सुराः।
वीणामृदङ्गझल्लर्या वादयन्ति सुरा मुदा।।51।।

कृष्णध्वजा मणिदण्डा आद्यकक्षे पदातयः।
हेमदण्डा ध्वजानीला वैडूर्य[11]पाण्डुरध्वजाः।।52।।

कृष्णदण्डा ध्वजाशुभ्रा रक्तदण्डा हरिध्वजाः।
कुर्वरा पीतदण्डेषु पीतध्वजा मरकतेः।।53।।

हस्ती चक्रं रविः सिंहो गरुडो दर्पणस्तथा।
वृषभश्चक्रवाकश्च ध्वजाः सप्त[12] पृथक् पृथक्।।54।।

पुष्पहेममणिरत्नमुक्ताफलप्रवालकः।
दुःकुलां वरपत्राणां[13] मालास्तेषु च सप्तधा।।55।।

सुधर्मेन्द्रस्य सम्प्रोक्ता विभवाः श्रीजिनोत्सवे।
एवं सर्वेऽपि ते शक्रा गच्छन्ति विभवैर्युताः।।56।।

ऐरावतो हि शक्रस्य कीदृशो भवति प्रभो।
लक्षयोजनप्रोत्तुङ्गो विस्तरोऽपि तथा भवेत्।।57।।

द्वात्रिंशत्सुमुखान्यस्य दन्ता अष्टौ मुखं प्रति।
दन्तं प्रतिसरश्चैकं नलिन्येका सरः प्रति।।58।।

द्वात्रिंशत्कमलान्ये वै चैकैकां पद्मिनीं प्रति।
द्वात्रिंशदस्य पत्राणि प्रतिपद्मं विराजते।।59।।

प्रतिपत्रं[14] च द्वात्रिंशन्नृत्यन्त्यपसरसा वराः।
केषाञ्चित्संयतानां तु श्रूयतां भो मतान्तरम्।।60।।

चतुर्मुखो गजो ज्ञेयो दन्तयुग्मं मुखं प्रति।
सरसानां शतं ज्ञेयं प्रतिदन्तं जलैर्भृतम्[15]।।61।।

सरः प्रतिनलिनीनां पञ्चविंशतिकं ततः[16]।
नलिनीं प्रति पद्मानां पञ्चविंशाधिकं शतम्।।62।।

नर्तकीनां प्रतिपद्यमष्टोत्तरशतं परम् ।
एवं वैभवसंयुक्तं गजं शक्रः स्थितो मुदा ।।63।।

नानावाद्यसमेतश्च नृत्यगीतसमन्वितः ।
बहुदेवैश्च संवृत्तः शक्रस्तोषाच्च निर्गतः ।।64।।

युवराज इव धर्मी[17] प्रतीन्द्रो निर्गतस्ततः ।
पुरोधोऽमात्यमन्त्री च त्रायस्त्रिंशत्सुरा अपि ।।65।।

त्रिपरिषत्सुराः शक्रं कारिणोलं[18] च निर्गताः ।
भृत्यसमा सुराः तस्य निर्गता अङ्गरक्षणम् ।।66।।

कोटपाला नभादेवा[19] दिक्पाला लोकपालकाः ।
प्रकीर्णकाः सुरा रम्या प्रजा इव च निर्गताः ।।67।।

दासकर्मकरा देवा आभियोग्याश्च निर्गताः ।
किल्विषिकाः सुरा नीचा चण्डालाभा कुपुण्यकाः ।।68।।

सौधर्मेण समं चैवं दशधा निर्गता सुराः ।
सर्वे शक्रास्तथा ज्ञेया आदौ सुकल्पवासिनः ।।69।।

चन्द्रसूर्यग्रहास्तारा नक्षत्राणि च पञ्चधा ।
निर्गताः ज्योतिषां देवाः महावैभवसंयुताः ।।70।।

त्रायस्त्रिंशल्लोकपालो नास्ति तेषु परं समम् ।
व्यन्तरेषु तथा ज्ञेयो विभवो द्वन्द्ववर्जिताः ।।71।।

किन्नरा किम्पुरुषाश्च गन्धर्वाश्च महोरगाः ।
यक्षराक्षसभूताश्च पिशाचाश्चेति व्यन्तराः ।।72।।

विद्युन्नागाऽसुरा देवाः सुपर्णाऽग्निमरुत्सुराः ।
स्तनिताऽब्धिसुराः द्वीपादिक्कुमाराश्च भावना ।।73।।

एवं चतुर्णिकायाश्च निर्गताः सुरनायकाः ।
क्षणाद्राजाङ्गणं प्राप्ताः सुमित्रभूपतेर्वरम् ।।74।।

आपूर्यनगरं सर्वं वर्त्मपण्यवनं[20] नभः ।
भक्त्या स्थिताः क्रमाद्देव जिनपूजनोत्सवाः ।।75।।

शक्राज्ञया शची देवी सा गता सूतिकागृहम्।
जिनस्य जननीं दृष्ट्वा तुष्टास्तोत्रमिदमवदत्।।76।।
धन्या त्वं जगतां माता सर्वलक्ष्मीनिवासिनी।
तव दर्शनमात्रेण गतं मे पापपुञ्जकम्।।77।।
इत्यादि स्तवनं कृत्वा त्रिः परीत्य पुनः पुनः।
तोषाऽश्रु सा[21] शची भक्त्या सन्नता[22] भुविमस्तका।।78।।
सुमाया निद्रया माता स्थापिता शयने तया।
मायाबालञ्च संस्थाप्य नीत्वा जिनञ्च निर्गता।।79।।
चूडारत्नमिव बालं कराभ्याञ्च धृतं शची।
रविणा सहिता पूर्वदिगिव शोभते तदा।।80।।
भृङ्गारः कलशः छत्रं सुप्रतीकञ्च चामरे।
दर्पणं तालवृंत्तञ्च ध्वजा चेत्यष्टमङ्गलम्।।81।।
मङ्गलानि ततो धृत्वा पुरो गच्छन्ति कन्यकाः।
षट्पञ्चाशज्जिनेभक्त्या आत्मनो मङ्गलाय च।।82।।
काश्चिन्नृत्यन्ति गायन्ति जिनस्तुत्यं पठन्ति च।
निराञ्जनान् समुत्तार्य[23] क्षिपन्ति च दिशो दश।।83।।
शचीकरात्तदा शक्रो जिनमादाय भक्तिकः[24]।
स्वाङ्के संस्थाप्य तद्रूपं पश्यति लोकदुर्लभम्।।84।।
तोषाश्रुनेत्रपूर्णोऽसौ[25] कृत्वा सहस्रलोचनम्।
दृष्ट्वा गद्गदया वाचा स्तुतिं कर्तुं समुद्यतः।।85।।
त्वं नाथ जगतां स्वामी त्रिलोकैकं पितामहः।
गुरुणां त्वं गुरुर्देवो देवानां त्वं धनेश्वरः।।86।।
इति स्तुत्वा करं प्रोच्चैरुच्चालयच्छचीपतिः।
मेरुं गन्तुं सुरेभ्यश्च सूचयामास सधर्मधीः।।87।।
जयनन्दं जयवर्द्धं जय जीव जिनेश्वरः।
इत्युक्त्वा निर्गता देवाः महावाद्यैश्च संयुताः।।88।।

अश्वगजविमानादीनारूढाः सकलाः सुराः।
ज्योतिःपटलमुल्लङ्घ्य मेरोर्मुद्भिर्गतास्तदा।।89।।
योजनानां सहस्रैकं मेरुर्मध्ये भुवः स्थितः।
नवतिनवसहस्रमुत्थितः स्थिरस्तम्भवत्।।90।।
सहस्रदशविस्तारो योजनानां भुवस्तले।
शिरोदेशे सहस्रैकं सुरासुरप्रसेविते।।91।।
चूलिका च ततः प्रोच्चा चत्वारिंशत्सुयोजनम्।
मूले द्वादशमध्येष्टौ विस्तरा शिखरे चतुः।।92।।
चूलिकैशानभागेऽस्ति शिलापाण्डुकसञ्ज्ञिका।
जिनाभिषेकनीरैश्च धौता शशीव[26] निर्मला।।93।।
शतयोजनलंबा या तदर्द्धं[27] विस्तरा मता।
उच्छिता[28] योजनान्यष्टौ जिनस्नानाय शाश्वता।।94।।
तन्मध्ये रत्ननिर्माणं कोशैकं[29] सिंहविष्टरम्।
उभयोः पार्श्वयोस्तस्य भद्रासने च शोभतः।।95।।
अर्द्धचन्द्रसमाकारा पाण्डुका सिंहविष्टरैः।
धत्ते सा परमां शोभां लोके मोक्षशिला यथा।।96।।
त्रिःपरीत्य च तं मेरुं देवैः संस्थापितो जिनः।
सिंहासने च वैभूत्या जयशब्दादिघोषणैः।।97।।
मण्डपस्य कृता शोभा घण्टातोरणचामरैः।
यथायोग्यं सुरास्तत्र चोपविष्टा सुभक्तितः।।98।।
ततः शक्रेण दिक्पाला लोकपाला यथाक्रमम्।
संस्थाप्य पूजिता अर्घैः सर्वशान्तिकहेतवे।।99।।
जन्तुविष्टं जलं चात्र तस्माच्च क्षीरसागरात्।
समानीय जिनो देवस्तेन संस्नाप्यते यया[30]।।100।।
इति ध्यात्वा सुराधीशैरिन्द्रनीलसुरत्नकैः।
क्षीरसागरपर्यन्तं कृताः सोपानपङ्क्तयः।।101।।

श्रेणिद्वयं सुरैर्वृन्दैर्हस्ताद्धस्तैर्जलैः भृताः।
आनीताः कलशास्तत्र स्थापिता स्रग्भिर्भूषिताः।।102।।
शातकुम्भमया कुम्भा अष्टयोजनविस्तराः।
तावत्सङ्ख्या च गम्भीरा मुखयोजनमात्रकाः।।103।।
सौधर्मेन्द्रस्ततः कुम्भं कराभ्यां धृतवान् मुदा।
ईशानेन्द्रस्तथा चान्यं कलशमुद्धरयत्परम्।।104।।
परिचारककर्माणि कुर्वन्ति शेषदेवताः।
देव्यः शचीमुखा सर्वा यथायोग्यां क्रियां श्रिताः।।105।।
जयजयरवैर्देवैः सन्तोषेण तदा कृताः।
सहस्रसुभुजैः शक्रश्चक्रे जिनाभिषेचनम्।।106।।
महावाद्य[31]सुनिर्घोषाः सञ्जाता भूतले तदा।
जयशब्दैर्जगत्सर्वं पूरितं च सुरैर्मुदा।।107।।
शेषैरिन्द्रैस्तथादेवैस्नापितः श्रीजिनेश्वरः।
स्वस्वभक्त्यनुसारेण संसारदुःखछित्तये।।108।।
जिनं संस्नाप्यते देवास्ततः कुर्वन्ति पूजनम्।
जलगन्धाक्षतैः पुष्पैश्चरुदीपैश्च धूपकैः।।109।।
फलैश्च निर्मलैरर्घैः पूजयित्वा ततः परम्।
पादोदकं जिनेन्द्रस्य सुरैः स्वमस्तके कृतम्।।110।।
ततो जिनस्य देहस्थं जलत्यक्तऽमलांशुकैः।
सुगन्धचन्दनैः सारैः सुरैः कृतं विलेपनम्।।111।।
शुभरत्नैश्च निर्माणं मुकुटे मस्तके कृतम्।
रम्यं हेममयं रत्नैर्ललाटे तिलकं कृतम्।।112।।
कज्जलं नेत्रयोर्मध्ये पुष्पमाला कृता हृदि।
कुण्डले सुन्दरे वज्रसूचिछेदितकर्णयोः।।113।।
केयूरौ हस्तयुग्मे च कङ्कणमुद्रिकान्वितौ।
कटिसूत्रं कटिदेशे पादयोः पादभूषणम्।।114।।

मण्डनस्य विधिं कृत्वा स्तुतिञ्चक्रे सुरेश्वराः।
त्वं जातोऽसि जगन्नाथास्माकं रक्षण हेतवे।।115।।

अज्ञाननिद्रितां सृष्टिं प्रबोधको जिनेश्वरः।
नमस्ते देवदेवाय नमस्ते श्रीजिनेशिने।।116।।

इत्यादिस्तवनै स्तुत्वा तस्य ततः कृतं सुरैः।
मुनिसुव्रत इत्याख्यं सद्व्रतस्योपदेशनात्।।117।।

भक्त्या स्तुत्वा जिनेन्द्रं तं त्रिःपरीत्य पुनः पुनः।
नताः शक्राः सुरैः सार्द्धं स्वस्य कल्याणहेतवे।।118।।

पुनः श्रीजिनराजं तं गजं संस्थाप्य पूर्ववत्।
ज्योतिषां मण्डलं भीत्वा[32] कुशाग्रनगरं क्षणात्।।119।।

प्राप्ताः सुरा सुमित्रस्य गृहाङ्गणं परं मुदा।
अलङ्कृतं जिनं मातुर्हस्ते तदा समर्पयत्।।120।।

गन्धालिप्तं सुतं दृष्ट्वा तुष्टा माता प्रमोदतः।
सुमित्रोऽपि ततो दृष्ट्वा सुखी जातः स्वचेतसि।।121।।

सिंहासने तदा शक्रः पितरौ श्रीजिनेशिनः।
स्थापितौ परया भक्त्या स्तुतिभिः संस्तुतौ परम्।।122।।

युवां धन्यौ हि लोकेऽस्मिन् ययोर्वंशे जगद्गुरुः।
युवयोरद्भुता लक्ष्मी त्रिलोकसुखदायिनी।।123।।

इत्यादि बहुधा स्तुत्वा पूजितौ वस्त्रभूषणैः।
शक्रश्च नाटकाचार्यो भूत्वा नृत्यन्ति हर्षतः।।124।।

शचीमुखास्तदा देव्यो नर्तक्यः परसुन्दराः।
हावभावविलासैश्च नृत्यन्ति ताण्डवं परम्।।125।।

सभापतिर्जिनो यत्र गणाचार्यः सुरेश्वरः।
सुनर्त्तकी शची देवी तत्र का वर्णना परा।।126।।

ततः कृत्वा नियोगं स्वं स्वं देवा हर्षपूरिताः।
स्वं स्वं स्थानङ्गता पुण्यं समुपार्य सुखप्रदम्।।127।।

कतिपयान् सुरान् तस्य सेवायै स नियुज्य च।
शक्रोऽपि च गतः स्वर्गं परमपुण्यभाजनः।।128।।

सुमित्रेण नृपेणात्र पुत्रजन्ममहोत्सवः।
कृतः सुमहत्या भूत्या कुटुम्बैः सकलैः सह।।129।।

परमसुन्दरदिव्यसुमूर्त्तिकम्
सकलकर्मकलङ्कविनाशकम्।
अघहरं सुखकारजिनेश्वरम्
भजतु भव्यजनाः शिवसौख्यदम्।।130।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते मुनिसुव्रतस्वामिजन्मोत्साहवर्णनो नाम एकादशमोऽधिकारः।।11।।

❖❖❖

1. गर्भे इति ख प्रतौ
2. परा इति ख प्रतौ
3. जिनज्ञान घनध्यान मानं दानं घनं मनः इति क/ख प्रतौ
4. जिनेन्द्रपुण्यः इति ख प्रतौ
5. नृपाजिरे धनेश्वर इति ख प्रतौ
6. चयं इति क/ख प्रतौ,
7. महोत्सवाः इति क प्रतौ
8. घटनादोथ इति क प्रतौ
9. कम्पिताभि इति क प्रतौ, एषा पङ्क्तिः ख प्रतौ अनुपलब्धा।
10. एषा पङ्क्तिः ख प्रतौ अनुपलब्धा।
11. वैडूर्या इति ख प्रतौ
12. सद्य इति ख प्रतौ
13. दुःकुल वरपत्राणां इति ख/ग प्रतौ
14. परिषत्रीणी इति ग प्रतौ।
15. प्रतिदन्तैर्जलैभृतम् इति क प्रतौ।
16. पञ्चविंशातिंक गतः इति क प्रतौ।
    पञ्चविंशतिकेवन् इति ग प्रतौ।
17. इवाधर्मी इति क/ख प्रतौ।
18. करिणोतं इति ग प्रतौ
19. कोटपालनिभा देवा इति क/ख प्रतौ।
20. वर्त्म्यं पवनं इति ग प्रतौ
21. तोषा स्तुत्वा इति ख प्रतौ, तोषाश्च इति ग प्रतौ
22. सन्तता इति क प्रतौ
23. नीरंजनान् समुत्तार्या इति ग प्रतौ।
24. भक्तिकः इति क प्रतौ।
    शक्तितः इति ग प्रतौ।
25. तोषाश्रु लोकपूर्णोऽसौ इति ख प्रतौ

26. शचीव इति ख प्रतौ
27. शतयोजनलंबायामदर्द्धं इति ग प्रतौ।
28. उच्छ्रिता इति क/ख प्रतौ।
29. क्रौशेकं इति ग प्रतौ।
30. मया इति क/ग प्रतौ।
31. महवीर्य इति ग प्रतौ
32. मण्डलं भेत्वा इति ख प्रतौ।
    मण्डलोलंघ्य इति ग प्रतौ।

❖❖❖

द्वादशमोऽधिकारः

ववृधे चाथ बालोऽसौ क्रीडाभिश्च सुरैः समम्।
शनैः शनैर्गृहमार्गे चलति स्खलितास्पदम्।।1।।
यथा यथा जिनो देवो वृद्धिं प्राप्य च क्रीडति।
तथा तथा सुरा भूत्वा बालाः क्रीडन्ति तेन वै।।2।।
स्नानभोजनवस्त्रादि सर्वं तस्यात्र शक्रजम्।
सेवकाश्च सुराः प्रोक्ता देवाङ्गनाः प्रचारिकाः।।3।।
स्मर हास्यविनोदेन रञ्जयन्ति जनान् जिनः।
त्रिज्ञानसंयुतश्चाऽभूद् व्रतधारी स्वयं तदा।।4।।
क्रमेण यौवनं प्राप्तः षड्रसैः श्रीजिनेश्वरः।
विवाहहेतुजां चिन्तां करोति तस्य देवराट्।।5।।
हस्तिनागपुरेशस्य श्रीधरस्य च वल्लभा।
श्रीमतीति तयोः पुत्री नाम्ना चास्ति सुमङ्गला।।6।।
सा शक्रेण तदा प्रीत्या जिनाय परिणायिता।
स्वर्गेषु सम्भवै रम्यैः सारेषु सारवैभवैः।।7।।
तया समं च भुनक्ति मन्दकामी सुखं परम्।
मुनिसुव्रतनाथोऽसौ विज्ञानैः सकलैर्युतः।।8।।
प्रबुधं श्रीजिनं ज्ञात्वा सुमित्रो भूपतिर्महान्।
चकार राज्यभारे तं देवनाथैः समं मुदा।।9।।
मुनिसुव्रतराजस्य विजयाख्यः सुतोऽभवत्[1]।
तेन समं कदाचित्सः स्थितोऽस्ति सिंहविष्टरे।।10।।
पट्टहस्ती तदा मुक्ता भुक्तिं करोति दुःखकम्।
तद्दृष्ट्वाऽवधिनेत्रेण जिनः प्राह जनं प्रति।।11।।
तालपुरे नृपो भोगी नाम्ना नरपतिर्महान्।
पात्रापात्रविचारं स न जानाति हि मूढधीः।।12।।

अज्ञानवाहितो जीवः करोति पापसेवनम्।
ददाति स कुपात्रेभ्यो दानं द्रव्यं यथेप्सितम्।।13।।
ततो मृत्वात्र सञ्जातो गजोऽयं गहने वने।
त्यक्ता राज्यश्रियं भूरि पापात् प्राप्तश्च तत् वनम्[2]।।14।।
तच्छ्रुत्वाऽथ गजस्यास्य जातिस्मरणमभूत्तदा।
व्रतेन सह सम्यक्त्वं जग्राह स गजाधिपः।।15।।
तं दृष्ट्वा श्री जिनेन्द्रोऽसौ वैराग्यं चिन्तयद्हृदिः।
अस्थिरं सकलं ज्ञेयं देहभार्यासुतादिकम्।।16।।[3]
अनित्याऽशरणे द्वे च संसारैकत्वताथवा।
अन्यत्वाऽशुच्यनुप्रेक्षे चास्रवसंवरे तथा।।17।।
निर्जरालोकानुप्रेक्षे बोधिदुर्लभता तथा।
धर्मानुप्रेक्षा चेत्यत्राचिन्तयच्छ्रीजिनोत्तमः।।18।।
तदा लोकान्तिका देवा ज्ञात्वा स्वावधिना जिने।
वैराग्यं ते समायाता वर्द्धितुं तत्सुबुद्धिकाः।।19।।
सारस्वतास्तथादित्या वह्नयोरुणसञ्ज्ञकाः।
गर्दतोयव्याबाधाश्च स्तुषिताऽरिष्टः चाष्टधा।।20।।
बह्मस्वर्गालयस्थास्ते दीक्षाकल्याणशंसिनः।
शेषा अपि समायाता देवाश्च बह्मचारिणः।।21।।
स्तुतिं रम्यां जिनं नत्वा चक्रिरे ते सुरास्तदा।
जिनेन्द्रत्वं चिदानन्दः सर्वज्ञः सर्वसौख्यदः।।22।।
त्वत्प्रसादाच्च भव्यानां मुक्तिमार्गो भविष्यति।
तस्मात्कार्यञ्च दीक्षायाः कुरु नाथ सुवेगतः।।23।।
इत्यादि ते नियोगं स्वं कृत्वा स्थानङ्गताः मुदा।
ततश्चाधिकवैराग्याद्दीक्षां ग्रहीतुमुद्यतः।।24।।
तदा स्वावधिना ज्ञात्वा पूर्ववच्चागताः सुराः।
हस्तयुग्मं समायुज्य नत्वा जिनं पुरः स्थिताः।।25।।

तदा विजयपुत्राय दत्वा राज्यं नृपार्चितम्।।
दीक्षाया हेतवे स्वामी निर्गन्तुञ्च समुद्यतः।।26।।
अपराजितनामाञ्च शिविकां सुमनोहराम्।
उपविश्य जिनः स्नात्वा काननं प्रतिनिर्गतः।।27।।
सप्तपदानि शक्रस्तां वाहयामास भक्तितः।
स्वस्कन्धे च तथा शेषाः सप्तसप्तपदानि वै।।28।।
एवं खगाः सुरा भूपा वहन्ति शिविकां तदा।
क्रमेण काननं प्राप्तो जिनो नीलाभिधानकम्।।29।।
सुरैः सुरचिते रम्ये मण्डपे सुशिलातले।
उपविष्टो जिनेन्द्रोऽसौ पूर्वाभिमुखतस्तदा।।30।।
सम्पृच्छ्य सज्जनान्सर्वान् क्षमयित्वा च जन्तुषु।
देहस्थभूषणान्याशु त्यजति स्म जिनेश्वरः।।31।।
नमः सिद्धेभ्य इत्युक्त्वा सुकेशान् पञ्चमुष्टिभिः।
लुञ्चयामास वैराग्यान्मोक्षसाधनहेतवे ।।32।।
पवित्रांस्तान् गृहीत्वा च बध्वा दुःकूलपट्टके।
क्षीराब्धौ क्षेपयामास शक्रो भक्त्या जिनेशिनः।।33।।
मनोवचनकायैश्च व्रतानि गृहीतानि च।
जिनेन द्विविधस्त्यक्तः परिग्रहोऽत्र दुःखदा।।34।।
वैशाखकृष्णपक्षे च श्रवणे दशमीदिने।
सहस्रसुनृपैः सार्द्धं दीक्षां जग्राह सुव्रतः।।35।।
केचिन्नृत्यन्ति गायन्ति हसन्ति स्तुवन्ति च ।
शक्राः कुर्वन्ति दीक्षाया महोत्सवं सुहर्षतः।।36।।
स्तुत्वा नत्वा परं प्रीत्या जिनं नत्वा पुनः पुनः।
स्वं स्वं स्थानङ्गता देवाः पुण्यमुपार्ज्य मोक्षदम्।।37।।
विजयादिनृपा सर्वे पूजयित्वा जिनेशिनम्।
नत्वा भक्त्या गतो गेहं संसारकारणोद्यताः।।38।।

दीक्षालक्ष्मीं समादाय नग्नरूपो जिनेश्वरः।
ध्याने स्थितो दिनं युग्मं दिव्यमूर्तिः परात्मकः।।39।।[4]

अथ देहस्य स्थित्यर्थं धर्मार्थञ्च जिनेश्वरः।[5]
मध्याह्ने पारणाहेतोः राजगृहपुरङ्गतः।।40।।

वृषभसेनभूपालो जिनं दृष्ट्वा सुभक्तितः।
त्रिःपरीत्य प्रतिग्राह नत्वा च प्रासुकैर्जलैः।।41।।

उच्चासने च संस्थाप्य पादौ प्रक्षाल्य पूजितौ।
प्रासुकाहारमेवाऽस्मै ददौ राजा सुभक्तितः।।42।।

श्रद्धाशक्तिस्तथा भक्तिर्विज्ञानमप्यलुब्धता।
क्षमात्यागश्च सप्तैते पात्रदाने गुणाः स्मृताः।।43।।

प्रतिग्राहोच्चसंस्थानं पादक्षालन् पूजने[6]।
नतिः स्तुतिर्मनोवाक्कायशुद्धिर्नवधा स्मृताः।।44।।

गृहीत्वा श्रीजिनो भुक्तिं कृत्वाऽक्षयसुसम्पदः।
वनं गन्तुं समुद्युक्तः शुक्लध्यानस्य हेतवे।।45।।

नृपो भक्त्या जिनं नत्वा स्तुत्वा देवं पुनः पुनः।
महापुण्यं समुपार्ज्य हर्षतः स्वगृहङ्गतः ।।46 ।।

तदा देवैः सुसन्तुष्टैः पञ्चाश्चर्यं कृतं मुदा।
अहोदानमहोदानमित्युक्त्वा निलयङ्गताः[7]।।47।।

अथ वनं जिनो गत्वा मासोनवत्सरं तपः।
कुर्वंश्च विहरन् देशान् छद्मस्थेन स्थितो मुदा।।48।।

अथोपवासयुग्मं स गृहीत्वा शुक्लध्यानतः।
चम्पकद्रुममूलेऽथ कायोत्सर्गेण संस्थितः।।49।।

सिद्धान्नष्टगुणान् ध्यायन् तत्पदप्राप्तिहेतवे।
क्षान्त्यादिदशधा धर्मं ध्यायति सततं परम्।।50।।

आर्त्तरौद्रे परित्यज्य धर्मध्याने क्वचित्स्थितः।
आज्ञापायविपाकाख्यसंस्थानविचयात्मकाः।।51।।

धर्मध्यानस्य भेदाः स्युश्चतुर्धा कर्मभेदकाः।
श्वभ्रतिर्यग्सुरायूंषि तैः[8] खण्डितानि तेन वै।।52।।
अनन्तानुबन्धिक्रोधमानमायाऽतिलोभता।
मिथ्यात्वसम्यक्त्वमिथ्यात्व[9]सम्यक्त्व[10]प्रकृतिर्हता।।53।।
ततोऽप्रमत्ततां प्राप्य क्षपकश्रेणिमाश्रितः।
महोत्साहेन सोऽत्राधःप्रवृत्तिकरणोऽभवत्।।54।।
अपूर्वकरणे स्थित्वाऽनिवृत्तिकरणोऽभवत्[11]।
तत्राद्य शुक्लध्यानं धृत्वा जिनः प्रघातयत्।।55।।
अनिवृत्तिगुणस्थाने नवभागे पृथक् पृथक्।
स्थित्वा कर्माणि षट्त्रिंशल्लघुकर्मी जिनोऽभवत्।।56।।
आद्यभागे निद्रानिद्रा प्रचलाप्रचला तथा।
स्त्यानगृद्धिस्तथा तिर्यगतिस्तदाऽऽनुपूर्विका।।57।।
श्वभ्रगतिस्तथा श्वभ्रगत्याऽऽनुपूर्विका परा।
एकद्वित्रिचतुरिन्द्रीजातयः[12] स्थावरत्वकम्।।58।।
आतपोद्योतता युग्मं साधारणञ्च सूक्ष्मता।
एता षोडशधा कर्मभेदा भागाद्यमे हताः[13]।।59।।
अप्रत्याख्यानतत्क्रोधमानमायाप्रलोभताः।
प्रत्याख्यानचतुष्कं चैते चाष्टौ च द्वितीयके।।60।।
तृतीये खण्डवेदं च स्त्रीवेदं च चतुर्थके।
हास्यं रत्यरती शोकः भयं जुगुप्सा च पञ्चमे।।61।।
पुंवेदं तु हतं षष्टे सप्तमे संज्वलनं च रुट्।
अष्टमे मानमेकं च नवमे निकृतिर्हता[14]।।62।।
एवं भागा नवोत्तुङ्गा अनिवृत्तगुणात्मके।
दशमे तु गुणस्थाने सूक्ष्मलोभो हतोऽपरः।।63।।
क्षीणकषायसंस्थानाद्यभागे प्रकृतिर्द्वयम्।
निद्रा च प्रचला चेति भागेऽथ द्वितीये शृणु।।64।।

चक्षुरचक्षुरवधिकेवलदर्शनस्य[15] च ।
मतिश्रुत्यवधिमनःपर्ययकेवलाश्चिदः ।।65 ।।
दानलाभौ च भोगोपभोगाऽनन्तवीर्यता ।
अन्तरायस्य संछिन्ना चतुर्दश इति स्मृताः ।।66 ।।
त्रिषष्टिप्रकृतिं हत्वा द्वादशे गुणसङ्गते ।
त्रयोदशगुणस्थाने सयोगकेवलीजिनः ।।67 ।।
वैशाखकृष्णपक्षे च श्रवणे दशमी दिने ।
सायाह्ने केवलज्ञानमुत्पन्नं श्रीजिनेशिनः ।।68 ।।
पूर्ववत्स्वर्गलोकेन ज्योतिर्व्यन्तरभावने ।
घण्टानिनाद[16]चिह्नेन सर्वैर्ज्ञातञ्च केवलम् ।।69 ।।
शक्राज्ञया कुबेरेण समवशरणं वरम् ।
निर्मितं पञ्चवर्णैश्च रत्नैर्विभवसंयुतम् ।।70 ।।
भूमितः पञ्चसहस्रान् दण्डांस्तद्गगने स्थितम् ।
विंशतिसहस्रसोपानैश्चतुर्मुखैर्विराजते ।।71 ।।
धूलिशालाऽभिधः शालः प्रथमः परिकीर्तितः ।
मणिभिः पञ्चवर्णैश्च निर्माणो बहुसुन्दरः ।।72 ।।
युग्मयोजनविस्तीर्णं मध्येऽस्यसमवसृतिः ।
पीठपर्यन्तभूभागः समं शालः समुन्नतः ।।73 ।।
गोपुराणि च चत्वारि भूषितानि सुतोरणैः ।
ततोऽग्रे शोभते भूमिर्मानस्तम्भैर्मनोहरा[17] ।।74 ।।
तत्र षोडशसोपानैः शोभाढ्या पीठिका वरा ।
चतुर्मुखैश्च संयुक्ताः शालत्रितयवेष्टिताः ।।75 ।।
तन्मध्ये श्री जिनार्चाभिः शोभन्ते दिव्यचामरैः ।
मानस्तम्भाध्वजाघण्टाभिर्भूषिताश्च हैमिकाः ।।76 ।।
प्रतिस्तम्भं चतुर्वाप्यो निर्मलजलपूरिताः ।
तज्जलेन सुरा भक्त्या पूजयन्ति जिनोत्तमम् ।।77 ।।

किञ्चिद्दूरं ततो गत्वा शोभते जलखातिका।
ततश्चाभ्यन्तरङ्गत्वा लतावनं विराजते।।78।।
क्रीडापर्वतसंयुक्तं प्रासादैर्बहुभूषितम्।
कियन्तमपि गत्वातः शालो हेममयो वरः।।79।।
रत्नकङ्गुरशोभाढ्याः पञ्चवर्णमणिप्रभः।
तस्य रूपमयाण्येव गोपुराणि चतुर्दिशि।।80।।
त्रिभूम्याणि सुरम्याणि[18] शिखरैः पद्मरागमयैः।[19]
तत्र नृत्यन्ति गायन्ति देवाङ्गणास्तथा सुराः।।81।।
प्रतिद्वारं विराजन्ते प्रत्येकाष्टोत्तरं शतम्।
वरमङ्गलद्रव्याणि शततोरणभूषितम्।।82।।
धूपघटाश्च स्तूपाश्च द्वारे नवनिधानकम्।
नाट्यशालास्ततो वीथे[20]रुभयोस्तटयोर्वरा।।83।।
रत्नस्तम्भाः सुवर्णाद्या नाट्यार्थं वरमण्डपाः।
ततो मध्ये महावृक्षैः शोभन्ते सुवनानि च।।84।।
क्वचिद्गेहा: क्वचिद्स्तम्भा: वाद्यं नाटयश्च पर्वता:।
क्वचिद्वाप्य: क्वचिच्छाला: शोभन्ते तत्र कानने।।85।।[21]
मृगेन्द्रकमले माला हंसवृषभदन्तिनः।
वस्त्रगरुडमयूरा: चक्रञ्च दशधा ध्वजाः।।86।।
वीथ्यन्तरेषु शोभन्ते प्रत्येकाष्टोत्तरं शतम्।
प्रतिद्वारं विराजन्ते लघुध्वजादिभिर्युताः।।87।।
चतुःसहस्रविंशत्यधिकं ज्ञेयं शतत्रयम्।
ध्वजाः सर्वा: मिलित्वा च जिनेन्द्रसमवसृतौ।।88।।
कियद्दूरं ततो गत्वा शालो हेममयः परम्।
पूर्ववल्लक्षणोपेतो द्वारनाट्यघटादिभिः।।89।।
ततश्च कल्पवृक्षाणां वनं भाति मनोहरम्।
ततः सिद्धार्थवृक्षाश्च सिद्धबिम्बानि मूलका:।।90।।

चैत्यवृक्षा जिनैर्बिम्बैः शोभन्ते परमे वने।
चम्पकचूत[22]मन्दारप्राशोकप्रमुखा द्रुमाः।।91।।
द्वारचतुष्टयोपेताः प्राकारत्रयवेष्टिताः।
हेमद्रुमाश्च घण्टादिचामरैर्भूषिता वराः।।92।।
तेषां मूले चतुर्भागे प्रातिहार्यादि भूषिताः।
जिनबिम्बा विराजन्ते शुद्धस्फाटिकनिर्मिताः।।93।।
ततो वेदी वरा शोभा वनदेशेषु शोभते।
चतुर्भिर्गोपुरैर्युक्ता पूर्ववन्नाट्यशालिकाः।।94।।
रूप्यमया शुभा वेदी ततो ध्वजा महीतलम्।
हेमस्तम्भाः मणिर्दण्डाश्चित्रध्वजादिपङ्क्तयः।।95।।
सिद्धार्थचैत्यवृक्षाश्च पूर्ववत्सर्वसुन्दराः।
नाट्यो वाप्यः क्वचिद् रम्याः शोभन्ते रत्नभूषणाः।।96।।
ततः स्फाटिकशालश्च गोपुरैर्वरभूषितः।
पूर्ववच्छोभया युक्तो जिनेन्द्रगुणसन्निभः।।97।।
आद्यपीठे च संलग्ना शालपर्यन्तभित्तयः।
षोडशाः स्फाटिकाः शुद्धाः सभा द्वादशधास्ततः।।98।।
आद्ये कोष्ठे मुनीन्द्राः स्युर्द्वितीयेकल्पजाः स्त्रियः।
आर्यिकाश्राविकायुक्ता ज्योतिषां योषितस्ततः।।99।।
व्यन्तर्यो नागनार्यश्च नागाश्च व्यन्तरास्ततः।
ज्योतिष्का कल्पजां देवा मनुष्याः पशवः क्रमात्।।900।।
सुलक्ष्मीमण्डपस्तस्माद् ध्वजातोरणचामरैः।
भूषितो रत्नस्तम्भैश्च नानालङ्करणादिकैः।।101।।
ततः पीठत्रयं भाति चाद्यपीठे सहस्रकम्।
अष्टमङ्गलद्रव्याणि धर्मचक्राणि वापि[23] च।।102।।
मणिवैडूर्यनिर्माणं पीठं प्रथममुच्यते।
तत्र षोडशसोपानैर्मण्डिता सुसभा मुदा।।103।।

ततो हेममयं पीठं द्वितीयं तत्र शोभनम्।
सुरैर्धृतं महारम्यं निर्मलञ्च ध्वजाष्टकम्।।104।।
वृषभं दन्ति चक्राणि पद्मसिंहगरुन्मतः।
गृहमाले शुभा चाष्टौ ध्वजाः पीठे द्वितीयके।।105।।
ततो रत्नमयं पीठं तृतीयं पञ्चवर्णजम्।
तस्योपरि वरं पीठं शोभते च त्रिमेखलम्।।106।।
तस्योपरि परं रम्यं सौवर्ण्यं सिंहविष्टरम्।
सुसहस्रदलं पद्मं भाति सिंहासनोपरि।।107।।
चतुरङ्गुलमात्रं चान्तराले तस्य चोपरि।
मुनिसुव्रतनाथोऽसौ स्थितो धर्मोपदेशकः।।108।।
पूर्ववदम्बरैर्युक्ताः सुरास्तत्र चतुर्विधाः।
आगता मानवोपेताः पशुभिः सह धार्मिकाः।।109।।
अष्टशतप्रातिहार्यैश्च युक्तं दृष्ट्वा जिनेश्वरम्।
तुष्टाः सुरा नरा शक्राः पशवोऽपि महात्मनः।।110।।
जिनोपरि द्रुमाऽशोकः पुष्पवृष्टिस्तथा परा।
चामराणि चतुःषष्टिस्तथा च सिंहविष्टरम्।।111।।
छत्रत्रयं ध्वनिर्दिव्या भामण्डलं स्वदेहजम्।
दुन्दुभिर्द्वादशकोट्याः प्रातिहार्याष्टकं भवेत्।।112।।
पूजाद्रव्यैर्जिनः शक्रैर्नरैश्च पूजितः सुरैः।
स्तुत्वा नत्वा समाविष्टास्तेऽथ स्वस्वप्रकोष्टके।।113।।
मुनिकोष्ठे गणाधीशा मन्त्राद्य[24]ष्टादश स्मृताः।
द्वादशाङ्गधरापञ्चशतानि परमोज्ज्वलाः।।114।।
एकविंशसहस्राणि शिक्षिकाः परिकीर्तिताः।
अष्टशताधिका ज्ञेयाः सहस्रं चाऽवधीक्षणाः।।115।।
केवलिनोऽपि तावन्तस्तपसः सर्वदर्शिनः।
विक्रियर्द्धिसमायुक्ता द्विसहस्रशतद्वयम्।।116।।

मनःपर्ययसंयुक्ताः पञ्चदशशतानि वै ।
वादिनो द्वादशशतं मिथ्यामतप्रखण्डकाः ।।117।।
पिण्डितास्ते सहस्राणि त्रिंशत्सर्वे मुनीश्वराः ।
आर्यिकाः पुष्पदन्ताद्याः पञ्चाशत्सहस्राणि वै ।।118।।
श्रावका एकलक्षाश्च श्राविकास्त्रिगुणा मताः ।
देव्यो देवा असङ्ख्याताः सङ्ख्याताः पशवः स्मृतः ।।119।।
तदा विजयराजोऽसौ जिने प्रश्नं समापृच्छत् ।
स्वामिन् ब्रूहि कृपां कृत्वा संसारस्थितिकारणम् ।।120।।
जिनः प्राह शृणु राजन् संसारो द्विविधः स्मृतः ।
सुखदुःखादिभेदेन पापाद्दुःख्यन्यतः सुखी ।।121।।
पापाच्च नरकप्राप्तिस्तिर्यग्गतिश्च पापतः ।
पापपुण्यान्मनुष्यत्वं देवत्वं बहुपुण्यतः ।।122।।
पुण्यं तु द्विविधं ज्ञेयं श्रावकमुनिभेदतः ।
एकादशप्रकारं तद्भवति गृहमेधिनाम् ।।123।।
जिनेन्द्रदेवतच्छास्त्रतन्मार्गयतीश्वराः ।
हृदये सर्वदा स्थाप्या श्रावकैः शुद्धदृष्टिभिः ।।124।।
कुदेवशास्त्रलिङ्गीनां विश्वासः क्रियते न हि ।
सप्तव्यसनकन्दादिमूलानां सेवनं त्यजेत् ।।125।।
अगालितं जलं तक्रं दधिकां जिह्वयहोषितम् ।
सन्धानकञ्च विद्धानमविज्ञातं फलं त्यजेत् ।।126।।
किञ्चादि कुसुमं नालीकालिङ्गालावसूरणम्[25] ।
अत्यन्तकोमलं सर्वं त्यजेदनंतकायिकम् ।।127।।
एकघातादनन्तानां जीवानां घातकं तु यत् ।
तन्न भक्ष दयावद्भिः श्वभ्रादिदुःखदायकम् ।।128।।
चर्मस्थतैलं वा सर्पी चूर्णान्नं हिंगुभेषजम् ।
नवनीतं मधुं सिक्यं गोरसैर्द्विदलं त्यजेत् ।।129।।

अविदारितवृताङ्कं सिंवी बदर[26]जाम्बुकम् ।
पल्लवं काननोत्पन्नं इक्षुग्रन्थी त्यजेन्नरैः ।।130।।
मिथ्या त्वन्नं निशाभुक्तिं निशापक्वोदनादिकम् ।
प्रावृट्यदलितं त्याज्यं पल्लवारुणिदूषणम् ।।131।।
क्रोधाभिमानमायाऽतिलोभहत्कालुषं त्यजेत् ।
एतद्‌गुणैः समेतः स श्रावकः शुद्धदृष्टिभाक् ।।132।।
पंचाणुव्रतशिक्षाव्रतचतुर्गुणव्रतत्रयम् ।
एते द्वादशपर्यन्ताः श्रावको द्वितीयो मतः ।।133।।[27]
अन्यस्त्रीसङ्गं मृषात्वं हिंसास्तेयपरिग्रहान् ।
त्यागोऽणुव्रतं दिग्देशाऽनर्थदण्डं गुणव्रतम् ।।134।।
समताऽतिथिसम्भागौ भोगोपभोगसङ्ख्यकम् ।
अनशनं जिनैः प्रोक्तं शिक्षाव्रतचतुष्टयम् ।।135।।
त्रिकाले समतां कुर्यात् तृतीयो व्रतिनामतः[28] ।
चतुर्दश्याष्टमीपर्व प्रोषधः स्यात्स्वशक्तितः ।।136।।
अप्रासुकं त्यजेत्सर्वं व्रती भवति पञ्चमः ।
रक्षेत्षष्टे दिवाशीलं रात्रिभुक्तिं परित्यजेत् ।।137।।
सर्वस्त्री जननी तुल्या सप्तमे बह्मचारिणः ।
सर्वारम्भं परित्यक्तश्चाष्टमः श्रावको भवेत् ।।138।।
एकवस्त्रं विना सर्वं सङ्गं च नवमे त्यजेत् ।
अनुमोदं न कुर्वन्त्याऽऽहारार्थं दशमे क्वचित् ।।139।।
एकादशमे संस्थाने श्रावको द्विविधो भवेत् ।
कछोटी सङ्ग एकः स्याद्द्वितीयो वस्त्रधारकः ।।140।।
उद्‌दण्डभ्रामरी कुर्याद् गुरुणा सङ्गतोऽथवा ।
सिद्धान्तप्रायश्चित्तस्य शास्त्रेऽधिकारता न हि ।।141।।
करपात्रोदनं[29] चैकवारं पिच्छप्रधारणम् ।
लोचं त्रिकालयोगञ्च नियमात्कोपि धारकः[30] ।।142।।

भोजने वमने मूत्रमलोत्सर्गे च मैथुने।
सामायिके जिनार्चायां स्नाने मौनं विधीयते।।143।।
आर्द्रचर्मास्थिमांसाश्रृक पूयमद्यादि दर्शनात्।
स्पर्शनात् शुष्कचर्मास्थिमार्जारादिरजस्वलाम्।।144।।
भुंक्ते नियमितं वस्तुं धान्यं मृत्युकमिश्रितम्[31]।
ग्रामदाहं महोत्पातः निर्दयशब्दसंश्रुते।।145।।
इदं मांससमं चित्ते संकल्पे जनिते सति।
मलमूत्रादिशङ्कायामन्नं त्यजति श्रावकः।।146।।
श्रावकस्य क्रिया प्रोक्ता यतीनां श्रूयतेऽधुना।
व्रतानिपञ्च गुप्तित्रीन् समितिपञ्चसंयुतम्।।147।।
रक्षिते संयमं ज्ञेयं त्रयोदशविधं परम्।
सर्वोत्कृष्टजिनेन्द्रस्य सुधर्ममुत्तमं जगुः।।148।।[32]
उपासकयतीनाञ्च व्रतात्पुण्यस्य सञ्चयः।
पुण्यात्स्वर्गस्य सम्प्राप्तिः क्रमान्मुक्तिर्भवेन्नृणाम्।।149।।
चतुर्विंशतितीर्थेशं द्वादशचक्रवर्तिनः।
बलभद्रप्रतिविष्णुविष्णवोऽपि च पुण्यतः।।150।।
वृषभोऽजितनामा च सम्भवोऽप्यभिनन्दनः।
सुमतिः पञ्चमो ज्ञेयः पद्मप्रभः सुपार्श्वकः।।151।।
चन्द्रप्रभः पुष्पदन्तः शीतलः श्रेयसाह्वयः।
वासुपूज्यो विमलोऽथानन्तधर्मै च शान्तिकः।।152।।
कुन्थ्वरमल्लिनाथाश्च तथाहं मुनिसुव्रतः।
नमिर्नेमिश्च पार्श्वश्च वर्द्धमानस्तथान्तिमः।।153।।
भरतो वृषभकाले च चक्री रुद्रश्च भीमकः।
सगरोऽजितकाले स्याच्चक्री रुद्रो बलिस्तथा।।154।।
काले सुविधिनाथस्य रुद्रो जितारिनामकः।
काले शीतलनाथस्य रुद्रो विश्वानलोऽभवत्।।155।।

कालेऽथ श्रेयसे रुद्रः सुप्रतिष्टो मनोहरः।
अश्वग्रीवः प्रतिविष्णुस्त्रिपृष्टो विष्णुरुच्यते।।156।।

विजयाख्यो बलभद्रो भीमाख्यो नारदस्तथा।
वासूपूज्यस्य कालेऽथ तारकः प्रतिविष्णुकः।।157।।

द्विपृष्टो विष्णुविख्यातश्चाचलो बलभद्रकः।
अर्जुन[33]श्चाऽभवद्रुद्रो महाभीमस्तु नारदः।।158।।

काले विमलनाथस्य पुण्डरीको हि रुद्रकः।
मेरकाख्यः प्रतिविष्णुः स्वयंभूरितिविष्णुकः।।159।।

धर्माख्यो बलभद्रः स्यादुद्धारनारदो मुनिः।
कालेऽनन्ते प्रतिविष्णुर्निशुम्भः पुरुषोत्तमः।।160।।

विष्णुप्रभो बलभद्रो महारुद्रः सुनारदः।
अजितन्धररुद्रः स्याद्धर्मकालेऽथ वक्ष्यते।।161।।

जितनाभिरभूद्रुद्रः कैटघ्नः प्रतिविष्णुकः।
नरहरिरभूद्विष्णुर्बलभद्रः सुदर्शनः।।162।।

कालाख्यो नारदो ज्ञेयश्चक्री च मघवांस्ततः।
पीठनामाऽभवद्रुद्रश्चक्री सनत्कुमारकः।।163।।

शान्तिकुन्थ्वरनाथाश्च त्रयो जिनाश्च चक्रिणः।
सूभूम्याख्य[34]स्ततश्चक्री ततश्च मधुसूदनः।।164।।

प्रतिविष्णुस्तदा विष्णु[35] पुण्डरीको महाबली।
आनन्दाख्यो बलभद्रो महाकालस्तु नारदः।।165।।

मल्लिमुक्ते कियत्काले बलिघ्नः प्रतिविष्णुकः।
दत्तो विष्णुर्बलभद्रो नन्दिमित्रस्तु नारदः।।166।।

दुर्मुखाख्यस्ततः पद्मश्चक्रवर्ती पराक्रमी।
सुव्रते च गते मोक्षं सुचक्री हरिषेणकः।।167।।

ततो दशाननो जातः प्रतिविष्णुश्च राक्षसः।
विष्णुर्लक्ष्मीधरो ज्ञेयो रामचन्द्रस्तथा बली।।168।।

नरकमुखनाम्ना च तदाऽभून्नारदो मुनिः।
नमौ शिवङ्गते चक्री जयसेनो भविष्यति।।169।।
नेमिकाले प्रतिविष्णुर्जरासन्धोऽभिधानकः।
कृष्णविष्णुर्बलभद्रः पद्मोऽधोमुखनारदः[36] ।।170।।
बह्मदत्तस्ततश्चक्री वीरकाले तु सातकी।
कालसङ्ख्यामतो राजन् शृणु लोकविकल्पिताम्।।171।।
योजनप्रतिमं व्योम सर्वतो भित्तिवेष्टितम्[37]।
अबेः प्रजातमात्रस्य रोमाग्रैः परिपूरितम्।।172।।
द्रव्यपल्यमिदं गाढमाहत्य[38] कविनीकृतम्।
कथ्यते कल्पितं कस्य व्यापारोऽयं सुधो भवेत्[39]।।173।।
ततो वर्षशतेऽतीते चैकैकस्मिन् समुधृते।
क्षीयते येन कालेन कालपल्यं तदुच्यते।।174।।
कोटीकोट्यो दशैतेषां कालो रत्नाकरोपमः।
सागरोपमकोटीनां दशकोट्योऽवसर्पिणी।।175।।
उत्सर्पिणी च तावन्त्यस्ते सिताऽसितपक्षवत्।
प्रत्येकमेतयोर्भेदा षडुद्दिष्टा महात्मभिः।।176।।
द्विरुक्तसुखमः कालः प्रथमः परिकीर्तितः।
कोटाकोट्याश्च चत्वारः सागरो मानमुच्यते।।177।।
सुखमो द्वितीयः प्रोक्तस्त्रिकोटाकोट्यसागरः।
सुखदुःखस्तृतीयोऽभूद् द्विकोटाकोटिसागरः।।178।।
द्विचत्वारिंशद्वर्षोनकोटाकोट्येकसागरः।
दुःखमसुखमो ज्ञेयश्चतुर्थकालमुत्तमः।।179।।
उक्तो वर्षसहस्राणामेकविंशतिपञ्चमः।
तावन्तो दुःखमोऽत्यन्तदुःखमः षष्टमो मतः।।180।।
पुण्यतश्चक्रवर्तीनां लक्ष्मीर्नवनिधानकम्।
चतुर्दशैव रत्नानि जीवाजीवप्रभेदतः।।181।।

मुकुटबन्धराजानो द्वात्रिंशच्चसहस्रकम् ।
सेवन्ति पादयुग्मञ्च चक्रिणः पूर्वपुण्यतः ।।182।।

षण्णवतिसहस्राणि नारीणां रूपसम्पदाम् ।
चतुर्भिरधिकाशीति लक्षा[40] गजास्तथा रथा:[41] ।।183।।

अष्टादशैव कोट्योस्य वायुवेगास्तुरङ्गमाः ।
द्वात्रिंशच्च सहस्राणि देशाश्च सम्पदा भृताः ।।184।।

तदर्द्धा सम्पदो विष्णोर्नार्य: सहस्रषोडशः ।
तीर्थङ्करस्य लक्ष्मी च ज्ञेया धर्मप्रभावतः ।।185।।

शालो वेदी तथा[42] शालो वेदी प्राकारवेदिका ।
शालो वेदी जिनेन्द्रस्य भवति समवसृतौ ।।186।।

प्रासादाः खातिकावाप्यः प्रोद्यानके तवस्तथा ।
कल्पवृक्षाश्चैत्यगेहा: पीठत्रयञ्च भूमयः ।।187।।

जिनेन्द्रा द्वादशोत्सेधा[43] प्राकारस्तम्भवेदिका: ।
पताकातोरणस्तूपा चैत्यवृक्षाश्चपर्वताः ।।188।।

नाट्यशाला वनान्येवं जिनमानेन विस्तराः ।
गोपुरपर्वता अष्टगुणिता विस्तरा मता ।।189।।

पुण्याज्जिनेन्द्रसद्देहे घण्टादि लक्षणानि च ।
अष्टोत्तरशतं ज्ञेयं व्यञ्जनानि नवशतम् ।।190।।

इत्यादि बहुधा धर्मोपदेशनं कृतं तदा ।
श्रीजिनेनोपकाराय भव्यानां धर्महेतवे ।।191।।

नानादेशेषु विहृत्य सम्मेदपर्वतङ्गतः ।
सुसभां मासमात्रञ्च त्यक्त्वा ध्यानेन संस्थितः ।।192।।

शेषाण्यघातिकर्माणि हत्वा ध्यानेन शुक्लतः ।
शिवं प्राप्तः सदा सौख्यस्थानं नित्यं निरञ्जनम् ।।193।।

फाल्गुनकृष्णपक्षस्य द्वादश्यां निशि पश्चिमे ।
भागे श्रवणनक्षत्रे सिद्धोऽभून्मुनिसुव्रतः ।।194।।

ज्ञात्वा चावधिना देवाः पूर्ववदागतास्तदा।
निर्माप्य विकृत्या देहं भस्मितं मुकुटाग्निना।।195।।

तद्भस्मञ्च तदादाय कृत्वा ललाटलेपनम्।
स्वस्वस्थानङ्गता देवा उपार्ज्य पुण्यराशयः।।196।।

त्रिंशत्सहस्रवर्षाणि चायुरस्य प्रकीर्तितम्।
विंशतिधनुरुत्सेधः शरीरे कनकद्युतिः।।197।।

मल्लौ मुक्तिगते काले चतुःपञ्चशल्लक्षके।
वर्षेऽतीते सुव्रतौऽभूत्तदभ्यन्तरजीवितः।।198।।

पञ्चशताधिकसप्तसहस्रवत्सरे गते।
प्राप्तो राज्यं सुरैः सेव्यं महावैभवसंयुतम्।।199।।

पञ्चदशसहस्राणि वर्षाणि राज्यतो गताः।
वर्षैकञ्च तयो राज्ये केवलिनस्ततः परम्।।200।।

चारित्रं परमं सु निर्मलतरं यस्याभवन्मुक्तिदम्।
सम्यक्त्वं मलदोषवर्जितपरं ज्ञानं तथा क्षायिकम्।।
गीर्वाणैः परिसेवितं पदयुगं वाक्यं सदा सौख्यदम्।
स श्रीसुव्रतनाथको भवभयाद्भव्यान् सदा रक्षतु।।201।।[44]

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते मुनिसुव्रतचरित्रकथनं द्वादशमोऽधिकारः ।।12।।

❖❖❖

1. दत्वा सुव्रतसञ्ज्ञाय राज्यं पुत्राय निस्पृहः प. पु. 21/31
2. मूढं स्मरति तद्वनम् इति ख/ग प्रतौ
3. शरदम्भोद विलयं स दृष्टवा प्रतिबुद्धवान् प. पु. 2/30/21
4. एषा पङ्क्तिः ख प्रतौ अनुपलभ्यते।
5. एषा पङ्क्तिः ख प्रतौ अनुपलभ्यते।
6. पूजनै इति ख प्रतौ
7. निलयं ययौ इति ख प्रतौ
8. तौ इति ख/ग प्रतौ
9. सम्यक्तप्रथ्यात्व इति क प्रतौ।
10. सम्यक्त इति क/ख प्रतौ।
11. एषा पङ्क्तिः ख प्रतौ अनुपलभ्यते।
12. जायतः इति ख प्रतौ।
13. मता इति ग प्रतौ
14. माया च नवमे हता इति ख/ग प्रतौ
15. केवलादर्शनस्य इति ख प्रतौ, केवलं दर्शनस्य इति ग प्रतौ
16. दिनाद इति क/ख प्रतौ।
17. मनोहरः इति ख/ग प्रतौ।
18. त्रिभूम्पाणि सुरंपाणि इति त्रयौ प्रतौ परन्तु त्रिभूम्याणि सुरम्याणि इति स्यात्।
19. पद्मरागजैः इति ग प्रतौ।
20. वाप्येरुभयो इति ग प्रतौ
21. एषः श्लोकः क प्रतौ अनुपलब्धः।
22. च्युत इति ख प्रतौ
23. धर्मचक्राण्यवापि च इति क प्रतौ
24. मघ्त्राद्य इति क/ख प्रतौ, मल्लाद्य इति ग प्रतौ
25. नालिङ्गालांबुसूरणम् इति ख प्रतौ
26. बदरी इति ख प्रतौ।
    वदरी इति ग प्रतौ।
27. एषः श्लोकः क/ख प्रतौ अनुलब्धोऽस्ति।
28. व्रतिनांसतः इति ख प्रतौ
29. करपात्रेदनं इति क प्रतौ

30. न धारक इति ख प्रतौ
31. मृत्फक इति ख प्रतौ
32. एषा पङ्क्तिः ग प्रतौ अनुपलभ्यते।
33. अर्जुल इति क/ख प्रतौ
34. सोभूमाख्य इति क/ख प्रतौ।
35. 'तदा विष्णुः' ख प्रतौ पदलोपः।
36. पद्मौमुखनारदः इति ख प्रतौ।
37. भुविवेष्टितम् इति ग प्रतौ
38. माहात्य इति क प्रतौ
40. चतुर्भिरधिकाशीति गजा इति ख प्रतौ,
    चतुर्भिरधिकाशीति गजास्तथा इति ग प्रतौ
41. गजास्तथावराः इति क प्रतौ
    जातस्तथावराः इति ख प्रतौ (मूलपाठे ग प्रतेः रथावराः पदे वराः शब्दस्य लोपः कृतः)
42. वेदी इति क/ख प्रतिद्वये
43. जिनेन्द्रदशोत्सेधा इति ख प्रतौ
44. एषः श्लोकः ख प्रतौ श्लोकद्वये विभक्तः।

❖❖❖

त्रयोदशमोऽधिकार:

जिनेन्द्रपञ्चकल्याणं वर्णितं श्रेणिकप्रभो ।
हरिवंशं ततो वक्ष्ये यत्र सीतासमुद्भवः ।।1 ।।
दक्षोऽभूद्विजयात्पुत्रो दक्षा च[1] एलवर्द्धनः[2] ।
ततः श्रीवर्द्धनो जज्ञे श्रीवृक्षश्च ततोऽभवत् ।।2 ।।
सञ्जयन्तो बभूवास्मादुद्रवः[3] कुणिमस्ततः ।
महारथः[4] पुलोमा चेत्येवमादिनरेश्वरः ।।3 ।।
सहस्रशः समुत्पन्ना हरीणामन्वये शुभे ।
सम्प्रापुर्निर्वृतिं[5] केचित्केचिन्नाकनिवासिनाम्[6]।।4 ।।
एवं क्रमात्प्रयातेषु पार्थिवेषु च भूरिषु ।
नृपो वासवकेत्वाख्यः कुलेऽस्मिन् मैथिलेऽभवत् ।।5 ।।
विपुलेति महादेवी तस्यासीद्विपुलेक्षणा ।
परमश्रीं समाप्राप्ता रूपभूषणभूषिता ।।6 ।।
तस्यां जनकनामाऽभूत्तनयो नयकोविदः ।
अनुजः कनकस्तस्य रविचन्द्रौ समावुभौ ।।7 ।।
एवं जनकसम्भूतिः कथिता ते नराधिपा ।
शृणु सम्प्रति यद्वंशे नृपो दशरथोऽभवत् ।।8 ।।
इक्ष्वाकूनां महावंशे राजानो बहवो गताः ।
मुनिसुव्रतकालेऽभूदयोध्यायां नृपोत्तमः ।।9 ।।
विजयाख्यो हि तस्यासीद् भामिनी हेमचूलिनी ।
शक्रमन्युस्तयोः पुत्रः कीर्तिमत्यस्य भामिनी ।।10 ।।
तयोश्च तनयौ जातौ चन्द्रसूर्योपमौ वरौ ।
वज्रबाहुरिति चाद्यो द्वितीयश्च पुरन्दरः ।।11 ।।
हस्तिनागपुरे राजा हस्तिवाहाभिधस्तदा ।
चूडामणी प्रिया तस्य चार्वी नाम्ना तयोः सुता ।।12 ।।

विवाहविधिना सोढा विभूत्या वज्रबाहुना।
सन्तुष्टाः स्वजनाः सर्वे लब्धा तां वरकन्यकाम्।।13।।
कन्याभ्रातैकदा तत्र नाम्ना चोदयसुन्दरः।
वज्रबाहुं स्वपत्नञ्च नेतुं प्रीत्या समागत:।।14।।
वज्रबाहुः कुमारोऽपि निर्गतः स्वजनैर्वृतः।
नारीभिर्बहुभिः सार्द्धं स्वसुरस्य पुरं प्रति।।15।।
ततो मार्गे मुनिं दृष्ट्वा ध्यानाध्ययनतत्परम्।
पश्यन्मुनिं[7] वज्रबाहुस्तं तत्र चैकाग्रदृष्टितः।।16।।
विहस्य तं तदा प्राह हर्षादुदयसुन्दरः।
विनोदेन शुभं वाक्यं भगिनी चार्वी पतिं प्रति।।17।।
एकाग्रध्यानतः किं भो वाऽहो मुनिं निरीक्षसे।
मनोऽस्ति ग्रहीतुं दीक्षां तवापि मुक्तिसाधिकाम्।।18।।
वज्रबाहुस्ततः प्राह वरमुक्तं त्वयाऽधुना।
सर्वथाहं ग्रहीष्यामि सुदीक्षां तव वाक्यतः।।19।।
इत्युक्त्वा वज्रबाहुस्तं नागेन्द्रादवतीर्णवान्।
नत्वा श्री मुनिनाथं तं प्रार्थयामास[8] संयमम्।।20।।
विनोदेन मयोक्तं भो चेत्यहोदयसुन्दरः।
न कर्तव्यं त्वया तच्च सत्यं कारणवर्जितम्।।21।।
वज्रबाहुः पुनः प्राह पुष्णाति[9] किं न त्वामृतम्[10]।
पीतं चातिविनोदेन नराणां सुखकारणम्।।22।।
इत्युक्त्वाऽऽभरणं सर्वं त्यक्त्वा वैराग्यपूरितः।
व्याकुलां वनितां मुक्त्वा दीक्षां जग्राह धीरधी:।।23।।
तं दृष्ट्वा दीक्षिता जाता गुणाब्धिमुनिसन्निधिम्।
उदयसुन्दराद्याश्च षड्विंशतिकुमारकाः।।24।।
चार्व्याद्या वनितास्तेषां सञ्जाता आर्यिका वराः।
तत्र तदा मुनिं नत्वा तदा वैराग्यपूरिताः।।25।।

श्रुत्वा वार्तामयोध्यायां विजयो नाम भूपतिः।
इदमचिन्तयच्चित्ते पश्याहो मम मूर्खताम्।।26।।
पौत्रोऽपि दीक्षितो जातो गृहे तिष्टाम्यहं कुधीः।
इत्युक्त्वा स्वपदं दत्तं पुरन्दराय सौनवे[11]।।27।।
पार्श्वे निर्वाणघोषस्य मुनीन्द्रस्य महात्मनः।
सुरेन्द्रमन्युना सार्द्धं प्रवव्राज महात्मना।।28।।
अथ पुरन्दरस्यास्य वल्लभा पृथिवीमती।
तयोः पुत्रोऽभवद्धर्म्मी नाम्ना कीर्तिधरो महान्।।29।।
तस्मै दत्वैकदा राज्यं पुरन्दरो नरेश्वरः।
क्षेमङ्करमुनेः पार्श्वे मुनिरभूच्च धर्मधीः।।30।।
कीर्तिधरो महाराजः करोति राज्यमुत्तमम्।
सहदेवीति भार्याऽस्य सुखं भुङ्क्ते तया समम्।।31।।
अथाऽभ्रपटलं दृष्ट्वा वायुना प्रलयङ्गतम्।
उद्युक्तो ग्रहीतुं दीक्षां स्वयं कीर्तिधरो नृपः।।32।।
अमात्यादीन् समाहूय राज्यास्पदं समर्पितम्।
अमात्याद्यास्तदा प्राहुः शृणु राजन् विवेकतः।।33।।
पुत्रो नाऽस्त्यत्र ते कस्मै दीयते राजसम्पदः।
रहिते राज्ञि साम्राज्ये नाशं यास्यन्ति ते प्रजाः।।34।।
प्रजानाशे च धर्मस्य हानिरेव भविष्यति।
तस्मात्पुत्रमुखं दृष्ट्वा कुर्याद्दिव तपोवरम्।।35।।
इत्यादिवचनै: राजा तैः सम्बोध्य गृहे तदा।
रक्षितो बहुधा भोगान् भुनक्ति सजनैर्वृतः।।36।।
सहदेव्यां कदाचिच्च गर्भोऽभवत्तदा तया।
लोपितो मायया गर्भो दीक्षोद्युक्तपतेर्भयात्।।37।।
पूर्णेऽथ नवमे मासे देव्यसूतसुतं वरम्।
एकान्तसदने कोऽपि न जानाति यथा तथा।।38।।

षोडशमे दिने तस्याश्चेटी दूरं सरोवरम्।
क्षालनार्थं गता वस्त्रं सूत्रिकस्य[12] वनान्तरे।।39।।
तत्रैको ब्राह्मणोऽपृच्छच्चेटिकां कारणं तदा।
दूरागमस्य सुप्रीत्या तया तस्मै निवेदितम्।।40।।
मूलात्प्रारभ्य वृतान्तः पुत्रजन्मादिसम्भवः।
तच्छ्रुत्वा ब्राह्मणो वेगादागतो राजमन्दिरम्।।41।।
सिंहासने स्थितो राजा विज्ञप्तो ब्राह्मणेन सः।
राजंस्तव सुतो जातस्तच्छ्रुत्वा तुष्टवान्नृपः।।42।।
ब्राह्मणाय बहुद्रव्यं दत्वा जन्मोत्सवः कृतः।
नृपेण तस्य पुत्रस्य कृतं नाम सुकौशलः।।43।।
तस्मिन् काले प्रसूताय पुत्राय भूपतेः पदम्।
दत्वा स्वयं मुनिर्जातः कीर्तिधरो महानृपः।।44।।
अथ सुकौशलो राजा करोति राज्यमुत्तमम्।
द्वात्रिंशद्भिश्च भार्याभिः भोगान् भुनक्ति पुण्यतः।।45।।
द्वात्रिंशत्समयेऽतीते कीर्तिधरो महामुनिः।
राज्ञो गेहं समायातश्चर्यार्थं शास्त्रमार्गतः।।46।।
सहदेव्या तदा देव्या निर्घाटितो मुनिर्ग्रहात्।
पापिन्या पूर्वकोपेन मासोपवाससंयुतः।।47।।
मुनिर्गत्वा वनं रम्यं संस्थितो ध्यानयोगतः।
सुकौशलस्य धात्री च रोदी[13] दृष्ट्वा गतं मुनिम्।।48।।
सुकौशलस्तदा प्राह कथमम्बेऽत्र रोदसि।
धात्री प्राह शृणु वत्स मम रोदनकारणम्।।49।।
त्वत्पिता त्वयि साम्राज्यं दत्वा मुनिरभूत्परम्।
सोऽद्यागतो हि भक्षार्थं तव गेहे तपोधनः[14]।।50।।
निष्काशितः स मात्रा ते गेहाद्योगी वनङ्गतः।
सुकौशलोऽथ तच्छ्रुत्वा निर्गतः पितृपृष्ठितः।।51।।

वनस्थं पितरं दृष्ट्वा तस्य पादौ नतो नृपः।
दीक्षां याचितवान् भक्त्या वैराग्यात्पितुरन्तिकम्।।52।।

तदागत्य प्रधानाद्यैर्विज्ञप्तोऽसौ सुकौशलः।
देव पुत्रमुखं दृष्ट्वा गृह्यतां संयमं परम्।।53।।

सुकौशलस्ततः प्राह चित्रमालोदरे महत्।
सुतगर्भोऽस्ति[15] साम्राज्यं दत्तं तस्मै मयाऽधुना।।54।।

इत्युक्त्वा तान् मुनिर्जातः सुकौशलो नराधिपः।
ततोऽमात्या गताश्चित्रमालया सह स्वपुरम्।।55।।

सहदेवी तदा श्रुत्वा गवाक्षात्पतिता मृता।
आर्तध्यानेन सा व्याघ्री जाता पापकरा परा।।56।।

कदाचित्तौ वने व्याघ्र्या संस्थितौ ध्यानयोगिनौ।
संदृष्टौ पूर्ववैरिण्यौ[16] कीर्तिधरसुकौशलौ।।57।।

सुकौशलं तदा व्याघ्री पादेनाताडयन्मुनिम्।
शुक्लध्यानेन योगी सः सम्प्राप्तः शिवमास्पदम्।।58।।

तदा तस्य शरीरं सा व्याघ्री भक्षितुमुद्यता।
भक्षितं मुखपर्यन्तं रक्तारुणितकं तया।।59।।

दन्तान् दृष्ट्वा मुखे तस्य व्याघ्री जातिस्मरोऽभवत्।
स्वसुतं भक्षितं ज्ञात्वा स्वयं शोकातुरोऽभवत्।।60।।

अहो चित्रञ्च संसारे माताऽभक्षत्[17] सुतादिकान्।
कीर्तिधरेण सा व्याघ्री बोधिताऽणुव्रतं श्रिता।।61।।

संन्यासव्रतमादाय स्वर्गं प्राप्ता सुखास्पदम्।
सुकौशलस्य देहं तत्पूजितं सुरनायकैः।।62।।

कीर्तिधरोऽपि कैवल्यज्ञानमुत्पाद्य शुक्लतः।
ज्योतिर्मयं शिवं प्राप्तः सम्यक्त्वादिगुणाष्टकम्।।63।।

चित्रमालाथ साऽसूतं तनयं शुभलक्षणम्।
हिरण्यरुचिनामानं चन्द्रमण्डलसन्निभम्।।64।।

तस्य स्त्रीरूपसौभाग्या नाम्नाऽमृतवती सती।
नघुषाख्यस्तयोः पुत्रः सञ्जातः स महाबली।।65।।
हिरण्यरुचिराजोऽथ नघुषाय नृपश्रियम्।
दत्वा विमलयोगीन्द्रपार्श्वे मुनिरभूत्परम्।।66।।
अथ नघुषराज्यस्य सिंहिका नाम वल्लभा।
अयोध्यायाञ्च संस्थाप्य तां नघुषो बलाऽन्वितः।।67।।
उत्तराशां गतो जेतुं सामन्तशतसेवितः।
दूरे गतं नृपं ज्ञात्वा दक्षिणस्थैः नृपैस्तदा।।68।।
अयोध्यावेष्टिता दुष्टैः सर्पैश्चन्दनवृक्षवत्।
तदा सिंहिका या देव्या मारितास्ते पलायिताः।।69।।
सिंहिका च ततो देवी चतुर्बलसमन्विता।
संलग्ना पृष्टितस्तेषां शस्त्रपातकृतश्रमा[18]।।70।।
तान्सर्वांश्च वशीकृत्वा स्वपुरं सा समागता।
उत्तराशां बलाज्जित्वा[19] नघुषोऽप्याऽऽगतः पुरम्।।71।।[20]
सिंहकायास्ततः श्रुत्वा साहसं नघुषो नृपः।[21]
असतीयमिति ज्ञात्वा त्यक्तवान् दूरदर्शनाम्[22]।।72।।
कदाचिन्नघुषो राजा ज्वरेण पीडितः परम्।
वैद्याः कुर्वन्ति वैद्यत्वं तथापि न गुणो भवेत्।।73।।
तच्छ्रुत्वा सिंहिकादेवी मनसि व्याकुला तदा।
बन्धुजनान् समाहूय सामन्तैः सह चाब्रवीत्।।74।।
यदि पतिव्रताऽहं स्यात्तदा त्वनेन वारिणा।
गुणो भवतु मे भर्तुरित्युक्ता जलमर्पयत्।।75।।
तदुदकेन देहं तत् नघुषस्य प्रसिञ्चितम्।
तदा ज्वरेण निर्मुक्तो नृपतिश्चाऽभवत्सुखी।।76।।
तदा सिंहिकया सार्द्धं सञ्जाता प्रीतरुत्तमा।
सौदासाख्यस्तयोः पुत्रो जातो बुध्या पराक्रमी।।77।।

दत्वा पुत्राय साम्राज्यं नघुषोऽप्यभवन्मुनिः।
राज्यं करोति सौदासो मांसाहारे स लोलुपः।।78।।
अयोध्यायां दिनान्यष्टौ वर्तते जीवरक्षणम्।
फाल्गुनकार्तिकाषाढे सूर्यवंशनृपाज्ञया।।79।।
एकदाष्टाह्विकायाञ्चाहूय तलवरं परम्।
मांसं याचति सुण्डाख्यं सौदासो नृपतिस्तदा।।80।।
तलवरस्ततः प्राह देवाऽत्र नगरे तव ।
न मार्यते दिनान्यष्टौ जीवमात्रमपि क्वचित्।।81।।
नृपः प्राह यथा कोऽपि न जानाति तथा हि मे।
देहि मांसमानीय रक्ष जीवं ममाधुना।।82।।
तदवस्थं नृपं ज्ञात्वा पुरान्सुण्डो बहिर्गतः।
संदृष्टं मृतकं बालं क्षिप्तं भूमौ च तद्दिने।।83।।
तं वस्त्रावृत्तमानीय संस्कृत्य स्वादुवस्तुभिः।
तलवरो[23] ददौ मांसं भूपाय तस्य गोप्यतः।।84।।
महामांसरसास्वादं नितान्तं प्रीतिमानसः।
भुक्तोच्छितो मिथः सुण्डं स जगाद सविस्मयः।।85।।
वद भद्र कुतः प्राप्तं मांसमेतत्त्वयेदृशम्।
अनास्वादितपूर्वोऽयं रसो यस्यातिपेशलः।।86।।
सुण्डोऽथ दातुमारब्धे सोभयं मयि भूपते।
त्वयि निर्भयकार्येषु करोमि सुखसाधया।।87।।[24]
ततो राजा जगादेयं सर्वदा क्रियतामिति।
निर्भयं भयमाकार्षी उपलं पचते सदा।।88।।[25]
सुण्डोऽथ दातुमारब्धः शिशुवर्गाय मोदकान्।
शिशवस्तत्प्रसङ्गेन प्रत्यहं तं समाययुः।।89।।
गृहीत्वा मोदकान् यातान् शिशूनां पश्चिमं ततः।
मारयित्वा ददौ तस्मै राज्ञे संस्कृत्य सन्ततम्।।90।।

प्रत्यहं क्षीयमाणेषु पौरबालेषु निश्चितः।
सुण्डेन सहितो राजा देशात्पौरैर्निराकृतः।।91।।
कनकायां समुत्पन्नस्तस्य सिंहरथः सुतः।
स एव स्थापितः पौरैः प्रणतः सर्वपार्थिवैः।।92।।
महामांसरसासक्तः सौदासो दग्धमानकः।
बभ्राम धरणीं दुःखी भक्षयन्नुष्टितान् शवान्[26]।।93।।
सिंहस्येव यतो मांसमाहारोऽस्याभवत्ततः।
सिंहसौदासशब्देन भुवने ख्यातिमागतः।।94।।
दक्षिणापथमासाद्य प्राप्यानम्बरसंश्रयम्।
श्रुत्वा धर्मं बभूवासावणुव्रतधरो महान्।।95।।
ततो महापुरे राज्ञि मृते पुत्रविवर्जिते।
स्कन्धमारोपितः प्राप्य राज्यं राजद्विपेन सः।।96।।
व्यसर्जयच्च पुत्रस्य नतये[27] दूतमूर्जितम्।
सोऽलिखत्तव गर्हस्य न नमामीति[28] निर्भयः।।97।।
तस्योपरि ततो याति सौदासे विषयोऽखिलः।
प्रपालयितुमारेभे भक्षणत्रासकम्पितः।।98।।
स जित्वा तनयं युद्धे राज्ये न्यस्य पुनः कृती।
महासम्वेगसम्पन्नः प्रविवेश तपोवनम्।।99।।
ततो बह्मरथो जातश्चतुर्वक्त्रस्ततोऽभवत्।
तस्माद्धेमरथो जज्ञे जातः शतरथस्ततः।।100।।
उदयादिः पृथुस्तस्मादन्यस्तस्मात्पयोरथः।
बभूवेन्द्ररथो युष्माद्विना नाथरथस्ततः।।101।।
मान्धाता वीरसेनश्च प्रतिमन्युस्तथा[29] क्रमात्।
नाम्ना कमलबन्धश्च दीप्त्यां कमलबान्धवः।।102।।
प्रतापेन रवेस्तुल्यः[30] समस्तस्थितिकोविदः।
रविमन्युश्च विज्ञेयो बसन्ततिलकस्तथा।।103।।

कुबेरदत्तनामा च कुन्थुभक्तिश्च[31] कीर्तिमान्।
शरभद्विरदौ प्रोक्तौ रथशब्दोत्तरश्रुती[32] ।।104।।
मृगेशदमनाभिख्यो हिरण्यकशिपुस्तथा।
पुञ्जस्थलः ककुस्थश्च[33] रघुः परमविक्रमः।।105।।
इक्ष्वाकुकुलसद्भूताः कीर्तिता भुवनाधिकाः।
भूरिशोऽत्र गता मोक्षं कृत्वा दिगम्बरं व्रतम्।।106।।
अयोध्यायां नृपो जातश्चाऽनरण्यो रघोः[34] सुतः।
पृथ्वीमतीति भार्यास्य शीलादिगुणभूषिता।।107।।
पुत्रौ जातौ तयोः श्रेष्ठौ चन्द्रसूर्यसमप्रभौ।
आद्योऽनन्तरथः ख्यातो दशरथो द्वितीयकः।।108।।
रावणस्य रणे जातो मुनिः सहस्ररश्मिकः।
अनरण्योऽपि तच्छ्रुत्वा वैराग्यमकरोत्तदा।।109।।
मासमात्रे जनितेऽस्मिन् दशरथे नृपश्रियम्।
क्षिप्त्वाऽनन्तरं येनाऽसौ चानरण्योऽभवन्मुनिः।।110।।
अनरण्यस्तपस्तप्त्वा मोक्षं प्राप्तः सुखास्पदम्।
अथानन्तरथो मौनी विजहार महीतले।।111।।
परीषहैर्न भग्नोऽसौ यस्मात्तस्माज्जनैः कृतम्।
अस्य चानन्तवीर्याख्यं तदेव सिद्धितां गतम्।।112।।
अथ दर्भपुरे राजा सुकौशल इति श्रुतिः।
तस्याऽमृतप्रभा भार्या तयोः सुताऽपराजिता।।113।।
दशरथेन सा नीता विवाहविधिना मुदा।
अन्योऽपि पद्मपत्नेऽथ[35] बन्धुतिलकभूपतिः।।114।।
मित्रा नाम्ना च भार्यास्य सुमित्राख्या तयोः सुता।
साप्यानीता सुभूपेन दशरथेन पुण्यतः।।115।।
रत्नपुरस्य नाथस्य सुप्रभाख्या सुताऽपरा।
परिणीता नरेन्द्रेण दशरथेन धीमता।।116।।

एवं त्रिभिः सुभार्याभिः सार्द्धं भोगान् परान् बहून्।
भुनक्ति पुण्यतः पूर्वादयोध्यायां नरेश्वरः।।117।।

धर्मफलेन प्रभवन्ति सौख्यं
पापौघविनाशो भवति हि धर्मात्।
स्वर्गनिवासः पुनरिह धर्मात्
मोक्षस्य सौख्यं सततं हि सुधर्मात्[36]।।118।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
हरिवंशोत्पत्ति[37] रघुवंशोत्पत्ति[38]वर्णनो नाम त्रयोदशमोऽधिकारः।।13।।

❖❖❖

1-2. दक्षोचलवर्द्धनः इति क प्रतौ,
त्रेलवर्द्धनः इति ख प्रतौ,
विक्षातो ऐलवर्द्धनः इति ग प्रतौ
3. द्रुद्रुव इति क प्रतौ तथा ग प्रतौ अनुपलब्धः।
4. महारष्य: इति क/ख प्रतौ
5. निर्वृतिं इति ख प्रतौ।
6. निवासितां इति क प्रतौ।
7. पश्यति इति ख प्रतौ, पश्यन्ती इति ग प्रतौ
8. याचयामास इति ख/ग प्रतौ।
9. पुष्लाति इति क/ख प्रतौ, पुघ्माति इति ग प्रतौ उपलभ्यते परन्तु पुष्णाति इति पाठः स्यात्।
10. चामृतं इति ग प्रतौ।
11. सूनवे इति ख/ग प्रतौ
12. सुत्तिकस्य इति ख प्रतौ।
सुतिकास्य इति ग प्रतौ।
13. स्यारोदी इति ग प्रतौ।
14. तपोवनम् इति ख प्रतौ
15. शुभगर्भो इति ख प्रतौ
16. पूर्ववैरिण्यां इति क/ख प्रतौ
17. भक्ष इति क प्रतौ, भेक्षत् इति ग प्रतौ
18. शस्त्रशास्त्रकृतश्रमा इति ख/ग प्रतौ
19. वशाज्जित्वा इति ख प्रतौ
20. एषा पङ्क्तिः ग प्रतौ अनुपलभ्यते।
21. एषा पङ्क्तिः ग प्रतौ अनुपलभ्यते।
22. दूरदर्शनः इति ख प्रतौ।
दूरदर्शने इति ग प्रतौ।
23. तलवरेण इति ग प्रतौ

24-25. सोभयं मार्गयित्वास्मै यथावद्धि न्यवेदयत्।
ततो राजा जगादैवं सर्वदा क्रियतामिति।।87।।
श्लोकद्वयो: स्थाने ख प्रतौ एषः श्लोकः प्राप्यते।

26. दृष्टिमानवान् इति क प्रतौ

27. तनये इति ख प्रतौ।

28. तनममीति इति ख प्रतौ

29. प्रतिमन्यस्तथा इति ख प्रतौ, प्रतिमान्यस्य इति ग प्रतौ

30. रवेस्तल्प: इति ख प्रतौ, खेस्तल्पा इति ग प्रतौ

31. कुभक्ति इति ख प्रतौ

32. रथसदोत्तर इति ख प्रतौ

33. काकुस्थ इति क प्रतौ

34. रथो: इति क प्रतौ

35. पद्मपत्रे इति क प्रतौ।

36. ग प्रतौ अस्पष्टान्यञ्च श्लोकं लिखितम्।

37. हरिवंशोत्पत्ति जनकराजा इच्छ्वाकुवंशं उत्पत्ति व्यसरथरघुवंशोत्पत्ति इति ग प्रतौ।

38. रघुवंशोत्पत्ति इति ख प्रतौ अनुपलब्धः।

❖❖❖

चतुर्दशमोऽधिकारः

दशरथ:[1] कदाचिच्चैकान्त[2]सदसि स्थितः ।
तदा विमानमार्गेण चाऽऽगतो नारदो मुनिः ।।1 ।।
सन्मानैर्मानितो राज्ञा मणिपीठे समाश्रितौ ।
सम्पृच्छ्य देहधर्मादि कुशलं सुखिनौ च तौ ।।2 ।।
दशरथस्ततः प्राह स्वामिन् कस्मात्समागतः ।
नारदः प्राह भो राजन् विदेहादहमागत:[3] ।।3 ।।
सीमन्धरस्य कल्याणं दृष्टं निष्क्रमणं मया ।
यत्र यत्र जिनेन्द्रस्य गेहास्ते वन्दिता पुनः ।।4 ।।
लङ्कायाञ्च समायातो विनोदार्थमहं ततः ।
तत्रास्ति रावणो राजा राक्षसेशो महाबली ।।5 ।।
तद्गेहे शान्तिनाथस्य प्रतिमा वन्दिता पुनः ।
सभायां दशवक्रस्य विपरीतं श्रुतं मया ।।6 ।।
निमित्तज्ञानिना यच्च रावणाय निवेदितम् ।
दशरथस्य पुत्राणां हस्ते मृत्युस्तव प्रभो ।।7 ।।
जनकस्य सुता सीता निमित्तादतिदुर्घटात् ।
भीतो मनसि तच्छ्रुत्वा प्राह राजा विभीषणः ।।8 ।।
यावत्तयोश्च सन्तानं जायते प्राक् हन्मि तौ ।
अग्रे विरुधिनौ दुष्टौ मे बन्धुर्भाविघातिनौ ।।9 ।।
युवयोरिति सञ्चिन्त्य दर्शनार्थं च किंकराः ।
प्रेषितास्तेन संगूढा दृष्ट्वा युवांश्च ते गताः ।।10 ।।
विभीषणाय सम्प्रोक्तं तैरागत्य भवत्कथा ।
ततो विभीषणो राजा युवां हन्तुं विचिन्तते ।।11 ।।
अद्य श्वो वा भवन्तौ स हन्तुमत्राऽऽगमिष्यति ।
वृतान्तश्चेति तत्रैव मया श्रुतस्ततः प्रभो ।।12 ।।

तच्छ्रुत्वाऽहं तव प्रीत्याऽत्रागतस्त्वां निवेदितुम्।
तस्मात्त्वं कुरु भो यत्नं सर्वथैव तवात्मनः।।13।।

तस्मै वृतान्तमित्युक्ता मिथुलां पुनरागतः[4]।
तथैव जनकायास्मै नारदः प्रोक्तवान् कथाम्[5]।।14।।

तच्छ्रुत्वा मन्त्रिणामग्रे ताभ्यां सर्वं निवेदितम्।
मन्त्रिवर्गास्ततः प्राहुः न जाने किं भविष्यति।।15।।

यावद्विघ्नाः प्रलीयन्ते[6] तावद्युवां पुरान्तरे।
स्थीयते गुप्तवृत्या च यतो[7] क्षेमं भविष्यति।।16।।

श्रुत्वेति तौ च राजानौ देशान्तरं गतौ[8] तदा।
निर्माप्य माययाऽमात्यैर्लेप्यौ[9] नृपकलेवरौ।।17।।

लाक्षारसेन भृत्वा च स्थापितो सिंहविष्टरे।
लेप्यनृपौ तदाऽऽगत्य विभीषणेन मारितौ।।18।।

तदा च मिथुलाऽयोध्यापुर्योः कलकलोऽभवत्।
नृपयोर्मरणं श्रुत्वा प्रजानां[10] हितकांक्षिणो।।19।।

विभीषणोऽपि राजानौ मृतौ ज्ञात्वा[11] स्ववैरिणौ।
गतो लङ्कापुरं वेगात् प्रमोदपरमान्वितः।।20।।

प्रायश्चित्तं ततः कृत्वा व्यर्थं पापमुपार्जनम्[12]।
रावणः सज्जनैः सार्द्धं करोति राज्यमुत्तमम्।।21।।

अतो दशरथो राजा जनकेन समं तदा।
भ्रमति पादमार्गेण बहून् देशांश्च रङ्कवत्।।22।।

क्रमेण[13] नगरं प्राप्तो नाम्ना कौतुकमङ्गलम्।
शुभमतिरिति तत्र राजा राजशिरोमणिः।।23।।

पृथ्वीमतीति भार्यास्य तयोः पुत्रौ सुदर्शनौ।
कैकय्यद्रोणमेघाख्यौ केकामती च कन्यका।।24।।

गुणलावण्यरूपाढ्या सङ्गीतज्ञानपारगा।
चातुरीसकलज्ञानशस्त्रशास्त्रसमन्विताः।।25।।

तस्याः पित्रा समारब्धः स्वयंवरमहोत्सवः।
तदर्थं हरिवाहाद्या आगता नृपपुङ्गवाः।।26।।
मञ्चेषु ते समासीना यथायोग्यं नरेश्वराः।
जनकेन समं तत्र दशरथोऽपि संस्थितः।।27।।
दर्शिताश्च ततो धात्र्या राजानो बहवस्तथा।
हरिवाहननामाद्या गर्वोद्धता महाबलाः।।28।।
कन्या सर्वान्नृपांस्त्यक्ता कण्ठे दशरथस्य वै।
विक्षेप पुष्पमालां तां पूर्वजन्मानुयोगतः।।29।।
ततो हेमप्रभाद्याश्च तं दृष्ट्वा क्रोधताङ्गताः।
भिक्षुकः पुरुषः कोऽयं कन्यामेति[14] विशारदाम्।।30।।
इत्युक्त्वा प्रोत्थिताः सर्वे युद्धार्थं दुष्टमानसाः।
शुभमतिस्ततः प्राह तेभ्यः क्रुद्धः सुतापतिः।।31।।
जामातः कन्यकां रक्ष त्वमत्र परियत्नतः।
दुष्टैतान् भूमिपान् युद्धे शस्त्रौघैर्मारयाम्यहम्।।32।।
दशरथस्ततः प्राह माम त्वं हि स्थिरो भव।
त्वयि पश्यति दुष्टैतान् तत्क्षणाद्धातयाम्यहम्।।33।।
इत्युक्त्वा रथमारुह्य प्रयुक्तं प्रौढवाजिभिः।
रणभूमिं समायातः शस्त्रराशिसमन्वितः।।34।।
तदा केकामती देवी रथवाहमुतीर्य सा।
उपविष्टा धुरादेशे वाहितुं रथमुत्तमम्।।35।।
उवाच देव यच्छाऽऽज्ञां कस्योपरि महारथम्।
प्रेरयाम्यतिवेगेन पापिनो दुष्टचेतसः।।36।।
दशरथस्ततः प्राह किं देवि रङ्कमारितैः।
भूपालाः सन्ति ये तेषामुपरि क्षिप संरथम्।।37।।
ततो देव्या तथैवाशु प्रेरितो रथमुत्तमः।
उपरि भूमिपालानां विमानमिव वाजिभिः।।38।।

तदा दशरथेनापि मारिता नृपपुङ्गवाः।
गताः पलायनं कृत्वा मुक्त्वा वाजिरथादिकान्।।39।।
ततो हेमरथो राजा संस्थितो रणमूर्द्धनि।
सोऽपि दशरथस्याऽग्रे पलायितो मृगो यथा।।40।।
तदा दशरथस्यैव दण्डे जयारवोऽभवत्।
ततः शुभमतिस्तुष्टस्तनयाभ्यां समन्वितः।।41।।
विवाहमङ्गलं जातं तयोश्च परमोत्सवैः।
सम्प्रोक्तं बन्दिभिः राजा चाऽनरणयात्मजो जयः[15]।।42।।
चतुर्बलेन संयुक्तो वाद्यनिर्घोषपूरितः।
ययौ दशरथाऽयोध्यां मिथिलां जनको ययौ।।43।।
पुनर्जन्मोत्सवं तस्य चक्रे तत्राऽतिसस्मरः।
पुनर्नृपाऽभिषेकञ्च परिवर्गो महर्द्धिभिः।।44।।
अशेषभयनिर्मुक्तो रेमे तत्र सुपुण्यवान्।
चतुर्देवीषु मध्ये च स्वर्गे देवाधिपो यथा।।45।।
दशरथो रहस्याह केकामति यदि त्वया।
रथो न प्रेरितो मेऽस्ति तदा जयः कथं भवेत्।।46।।
तस्मात्त्वं याच मां देवि मनोऽभिलषितं वरम्।
केकामती ततः प्राह सन्तुष्टा रहसि स्थिता।।47।।
देवाऽहं याचयिष्यामि यदाऽस्ति[16] मे प्रयोजनम्।
दशरथस्ततः प्राह तथाऽस्तु भो तवेप्सितम्।।48।।
अथाऽपराजिता देवी सुखं सुप्ता वराऽऽसने।
रजन्याः पश्चिमे यामे चतुः स्वप्नान्निरीक्ष्य सा।।49।।
उत्थिता जयनादेन भर्तुरन्ते समागता।
पादौ नत्वोपविष्टा[17] सा भर्ता दत्तार्द्धविष्टरे।।50।।
देवि जगाद भो नाथ मया दृष्टं निशात्पये।
स्वप्नचतुष्टयं रम्यं शशिसिंहौ गजं रविम्।।51।।

राजा प्राह तव देविं[18] पुत्र सारो भविष्यति।
महाभागो महाभोगी शत्रूणां प्रलयङ्करः।।52।।
श्रुत्वेति साथ सन्तुष्टा गता गेहं सुभावतः।
बह्मस्वर्गात्समागत्य चोत्पन्नो गर्भसद्मनि।।53।।
तदा प्रभृति सा देवी सञ्जाता परमोत्सवाः।
पूजति जिनदेवञ्च सर्वक्षेमं सुखप्रदम्।।54।।
कतिपयैर्दिनैश्चाऽपि सुमित्रा शयनस्थले।
निशायाः पश्चिमे यामे पश्यत्स्वप्नपञ्चकम्।।55।।
महोद्धतं महासिंहं सिंहासनं नगस्थितम्।
समुद्रञ्चाऽतिगम्भीरमुद्यन्तञ्च दिवाकरम्।।56।।
पञ्चमं चक्ररत्नञ्च परमं मङ्गलप्रदम्।
ततः प्रभाततूर्येण चोत्थिता शुभदर्शना।।57।।
भर्तुरन्ते समायाता पूर्ववत्तेन मानिता।
पुत्रस्य सम्भवं श्रुत्वा गता गेहं सुशर्मदा[19]।।58।।
दिवसे चाथ सम्पूर्णेऽपराजिता सुलक्षणम्।
असूत बालकं रम्यं सूर्यमूर्तिमिवापरम्।।59।।
कृष्णपक्षे त्रयोदश्यां फाल्गुने मासि चोत्तमे।
मघायां वर्ष सहस्राणि त्रयोदश स जीविकः।।60।।
वक्षसि राजते पद्मं ततः पद्म इति स्मृतः।
बान्धवैः सकलैर्हर्षात् महोत्सवो महान् कृतः।।61।।
सुमित्राऽपि तथा बालं प्रसूता शुभलक्षणम्।
शत्रुगृहेषु चोत्पाताः सञ्जाताः प्रभयप्रदाः।।62।।
शुक्ले माघस्य विशाखानक्षत्रे प्रतिपादिते।
द्विषट्सहस्रवर्षासु पञ्चदशधनु तनुः।।63।।[20]
चन्द्रसूर्यौ यथा पत्ने रेमाते सुखलीलया।
कुमारौ परमोदारौ कलाविज्ञानपारगौ।।64।।

तथा केकामती बालमसूत भरताभिधम्।
सुषुवे सुप्रभापुत्रं शत्रुघ्नं शत्रुबाधकम्।।65।।
यथा लोके चतुः स्तम्भाः शोभन्ते तनयास्तथा।
दृष्ट्वा दशरथः पुत्रां विद्याचिन्तामचिन्तयत्।।66।।
कांपिलाख्यपुरेऽथास्ति बाह्मणो भार्गवाभिधः।
ईक्ष्वाख्या चेति भार्यास्य चैहिरूढिस्तयोः सुतः।।67।।
पित्राऽसौ दुर्जनो ज्ञात्वा निर्घाटितः स्वसद्मतः[21]।
गतो राजगृहं दुःखीवसानः कर्पटद्वयम्।।68।।
तत्र वैवस्वतो नाम धनुर्वेदाऽतिपण्डितः।
युक्तः सहस्रमात्रेण शिष्याणामभियोगिनाम्।।69।।
यथावत्तस्य पार्श्वेऽसौ धनुर्विद्यामुपागमत्।
जातः शिष्यसमश्चाऽथ[22] दूरेणाऽधिकौशलः।।70।।
श्रुतं कुशाग्रराजेन मत्सुतेभ्योऽपि कौशलम्।
वैदेशे क्वापि विन्यस्तमिति ज्ञात्वा रुषङ्गतः।।71।।
राजानं कुपितं ज्ञात्वा शस्त्राऽऽचार्येण शिक्षितः।
एहिरूढे यथा राजा न जानाति तथा कुरु।।72।।
ततो नृपेण ते सर्वे शिष्यवर्गाः समाहुताः।
ततस्ते गुरुणा सार्द्धं कुशाग्रनगरङ्गताः।।73।।
ततोऽन्तेवासिनो राज्ञाऽनुक्रमेण परीक्षिताः।
शराशनस्य विज्ञाने कुशलो न गुरोः परः।।74।।
तदैहिरूढिना[23] तत्र कपटेन स्वचातुरी।
न दर्शिता नृपस्याग्रे तस्यैव च महाभयात्।।75।।
तेषां मध्ये कुमारान् स्वान् धनुर्विद्याविशारदान्।
दृष्ट्वा भूपोऽत्र सन्तुष्टो मनसि परमोत्सवः।।76।।
शस्त्रविद्यां न जानाति चैहिरूढिः कुबुद्धिमान्।
इति ज्ञात्वा नरेन्द्रेण शस्त्राचार्यो हि पूजितः।।77।।

ततो नृपाऽऽज्ञया शिष्यैः सहितो गुरुरागतः।
राजगृहं पुरं रम्यं परमानन्दपूरितम्।।78।।
वैवस्वतेन पुत्री स्वा तदा दत्तैहिरुढये।
तथा सहाऽऽगतोऽयोध्यां स गुरोराज्ञया ततः।।79।।
दशरथेन तं दृष्ट्वा पुत्रास्तस्मै समर्पिताः।
शास्त्राध्ययनहेत्वर्थं धर्माऽर्थकामसिद्धये।।80।।
ततस्तेन कुमारेभ्यो बहुविद्याः प्रयच्छिताः[24]।
चातुरीबुद्धिविज्ञानशस्त्रशास्त्र[25]समन्विता।।81।।
दशरथेन तुष्टेन दत्तं तस्मै धनं घनम्।
स्वपुरेऽन्तः कुमारास्ते सुलीलयाञ्च रेमिरे।।82।।
अथ जनकराजस्य विदेहाख्याऽस्ति वल्लभा।
गर्भवती च सञ्जाता कदाचित्पूर्वपुण्यतः।।83।।
तदेको रक्षति देवो गर्भं तस्याः प्रयत्नतः।
तच्छ्रुत्वा श्रेणिकः प्राह कुतो रक्षति स सुरः।।84।।[26]
गौतमः प्राह सुज्ञानी[27] शृणु श्रेणिक भूपते।
भरते दारुपत्नेऽत्र बाह्मणो विमुचिः परः।।85।।
अनुकोशेति भार्याऽस्य भूतिर्नाम्ना तयोः सुतः।
सरसाख्या सुता रम्या नवयौवनभूषिता।।86।।
समीपे तस्य गेहस्य रुद्राख्योऽस्ति द्विजोत्तमः।
तस्य भार्या कुरी नाम्ना [28]कपानाख्यस्तयोः सुतः।।87।।
मृतो पितरि[29] संदुःखी कपानस्तत्र संस्थितः।
भिक्षार्थं विमुचिर्विप्रः क्व गतो भार्यया समम्।।88।।
तदा तां सरसां नीत्वा मात्रा समं पलायितः।
गतो देशान्तरं पापी कपानो विषयाधिकः।।89।।
निरीक्षितुं च तां भूतिः शोकी बभ्राम मेदिनीम्।
ततो निपुरुषे गेहं[30] शेषं स्वमपि लुण्टितम्।।90।।

देशान्तराद्विमुचिश्च स्वपुरमागतस्तदा ।
भग्नं दृष्ट्वा गृहं सोऽपि व्याकुलीभूतमानसः ।।91।।
पुनः स निर्गतस्तस्माद्भार्यया सह दुःखतः ।
पुत्रीं निरीक्षितुं वेगाद्दूरदेशान्तरं प्रति ।।92।।
सभार्यो विमुचिः प्राप्तः सर्वाऽरिनगरं परम् ।
त्रिज्ञानी सर्वसिद्धाख्यस्तत्र दृष्टो मुनीश्वरः ।।93।।
धर्मं श्रुत्वा च तत्पार्श्वे सञ्जातो विमुचिर्यतिः ।
अनुकोशार्यिका जाता धर्मध्यानेन तत्परा ।।94।।
कुरी चाप्याऽऽर्यिका जाता वैराग्यगुणपूरिता ।
तपस्तप्त्वा त्रयोऽप्येते मृत्वा लौकान्तिकङ्गताः ।।95।।
विजयार्द्धनगे चाथ नगरे रथनूपुरे ।
च्युत्वातो विमुचिर्जातश्चन्द्रगतिर्नृपो महान् ।।96।।
अनुकोशाऽपि तस्यैव भार्या जाता ततश्च्युता ।
ख्याता पुष्पवती नाम्ना गुणरूपविभूषिता ।।97।।
जनकस्य कुरी च्युत्वा भार्या जाता विदेहका ।
भूति प्रभृतयस्तेऽपि भ्रान्त्वा संसारवर्त्मसु ।।98।।
सरसा च मृगी भूत्वा मृत्वा सा वनवह्निना ।
अथ चक्रपुरे ख्याते चक्रध्वजो महानृपः ।।99।।
मनस्विनीति भार्याऽस्य तयोः कन्याऽभवत्परा ।
चित्तोत्सवाभिधाना सा रूपलावण्यभूषिता ।।100।।
उष्ट्रो भूत्वा कपानोऽपि मृत्वा तत्रैव पट्टणे ।
राज्ञः पुरोहितस्याऽस्य स्वाहायां तनयोऽभवत् ।।101।।
पिङ्गलाख्यो महारूपी कलाविज्ञानवर्जितः ।
चित्तोत्सवयुता तेन पठिता[31] गुरुसन्निधिम् ।।102।।
पूर्वजन्मतयोः[32] प्रीत्या सङ्गोऽत्राप्यभवत्परः ।
ततस्तेन हता बाला कला[33]विज्ञानभूषिता ।।103।।

विदग्धनगरं प्राप्तौ धनधान्यविवर्जितौ।
पिङ्गलस्य समीपे सा शोभति न दरिद्रतः[34] ।।104।।
ग्रामबहिः कुटीं कृत्वा तिष्ठति[35] भार्ययाऽन्वितः।
गृहे संस्थाप्य तां सोऽपि करोति काष्ठविक्रयम् ।।105।।
अथ भूतिचरो भूत्वा हंसो मानसरोवरे।
श्रुत्वा धर्मं मुनेर्वाक्यान्मृत्वा स शुभलेश्यतः ।।106।।
दशवर्षसहस्रायुः किन्नरोऽभून्नगोत्तरे[36] ।
ततश्च्युत्वा विदग्धे च पुरे ज्योतिहरेर्नृपात् ।।107।।
सञ्जातः प्रवरावल्यां पुत्रः कुण्डलमण्डितः।
पराक्रमी च विज्ञानी रूपलक्षणसंयुतः[37]।।108।।
अश्वारूढेन तेनाऽथ गच्छता[38] तृणसद्मनि।
स्थिता चित्तोत्सवा दृष्ट्वा ततः कामेन पीडितः ।।109।।
गृहं गत्वा मुखाद् दूत्या सा कारिता स्वसद्मनि।
भुक्त्वा भोगांस्तया सार्द्धं रक्षिता तेन पापिना ।।110।।
साऽपि तेन समं लुब्ध्वा सुखं तिष्ठति तद्गृहे।
ततः स पिङ्गलाक्षोऽपि श्रान्तः स्वगृहमागतः ।।111।।
तामदृष्ट्वा विशालाक्षीं निमग्नो दुःखसागरे।
विस्तरेण किमुक्तेन पिङ्गलः शोकपीडितः ।।112।।
हृतभार्यो द्विजो राज्ञः सदनं समुपागमत्।
ऊचे चान्विष्य मे राजन् पत्नी केनापि चोरिता ।।113।।
दुःखितानां दरिद्राणामार्ताणाञ्च विशेषतः।
नारीणां पुरुषाणाञ्च सर्वेषां शरणं नृपः ।।114।।
अमात्यं धूर्तमाहूय समीपं पार्थिवोऽवदत्।
चिराय मा कृथा माम जायाऽस्याऽन्विष्यतामिति ।।115।।
जगादेति च तत्रैकः सविकारेण चक्षुषा।
सा दृष्टा पार्थिकैर्देवं[39] पोदनस्थानवर्त्मनि[40] ।।116।।

क्षान्त्यार्यावृन्दमध्यस्थां तपः कर्तुं समुद्यताम्।
विनिवर्तय तां क्षिप्रं किं विरौषि व्रज द्विज।।117।।

तच्छ्रुत्वा पोदने मार्गे गतोऽसौ त्वरयाऽन्वितः।
पोदने नगरेऽन्विष्य चैत्येषू पवनेषु च[41]।।118।।

अदृष्ट्वा पुनरागच्छद्विदग्धनगरं द्रुतम्।
नृपाज्ञया नरैः क्रूरैर्निर्घाटितो नृपगृहात्।।119।।

ततश्चिन्तातुरो भूत्वा भ्रमति सकलां महीम्।
आर्यगुप्ताख्यमाचार्यं सम्प्राप्तोऽसौ दिगम्बरम्।।120।।

श्रुत्वा धर्मञ्च तत्पार्श्वे पिङ्गलोऽभून्मुनिस्ततः।
तपः घोरतरं कृत्वा महातेजाऽसुरोऽभवत्।।121।।

अथ दुर्गं समाश्रित्य राजा कुण्डलमण्डितः।
अयोध्याविषयं सर्वं लुण्टति चौरविद्यया।।122।।

अनरण्यस्तदा राजा तं संधर्तुं न शक्तवान्[42]।
करोति विविधां चिन्तां देशस्योद्वासकारणात्[43]।।123।।

रात्रौ न लभते निद्रां दिवसे नाऽन्नमिच्छति।
ततोऽस्य दुर्बलं देहं जातं परमचिन्तया।।124।।

ततोऽसौ बालचन्द्रेण सेनान्या[44] जात्वभाष्यत[45]।
उद्विग्न इव कस्मात्त्वं सततं नाथ लक्षसे।।125।।

उद्वेगकारणं राज्ञा सर्वं तस्मै निवेदितम्।
तच्छ्रुत्वा बालचन्द्रेण प्रतिज्ञेयं समाश्रिता।।126।।

राजन्न साधयित्वा तं कुण्डलमण्डितं तव।
सकाशं नाऽऽगमिष्यामि[46] व्रतमेतन्मया कृतम्।।127।।

इति राज्ञः पुरः कृत्वा सङ्गरं रोषमुद्वहन्[47]।
बलेन चतुरङ्गेन सेनानी गन्तुमुद्यतः।।128।।

चित्तोत्सवा समायुक्तचित्तो मुक्ताऽन्यचेष्टितः।
प्रमादबहुलो भिन्नमूलभृत्पक्षतायितिः[48]।।129।।

अज्ञातलोकवृतान्तो मण्डितः खण्डितोद्यमः[49]।
हेलया बालचन्द्रेण गत्वा बृद्धो मृगो यथा।।130।।
गृहीत[50]बलराज्यं तं[51] निर्वास्य विषयान् कृती।
बालचन्द्रोऽनरण्यस्य[52] समीपं पुनरागमत्।।131।।
ततस्तेन सुभृत्येन कृतस्वस्थ[53]वसुन्धरा।
परं प्रमोदमापन्नोऽनरण्यः सुखमन्वभूत्।।132।।
शरीरमात्रधारी तु मण्डितः पापचारुकः।
पर्यटन् धरणीं दुःखी पश्चात्तापसमाहतः।।133।।
श्रमणानां परिप्रापाश्रमपदं महात्मनाम्।
प्रणम्य शिरसाऽसौ च धर्मं पप्रच्छ भावतः।।134।।
दुःखितानां दरिद्राणां वर्जितानाञ्च बान्धवैः।
व्याधिसंपीडितानाञ्च प्रायो भवति धर्मधीः।।135।।
ततश्चतुर्गतीनां हि प्रभेदाः दर्शिताश्च तैः।
फलञ्च पापपुण्यस्य दुःखसुखद्वयात्मकम्।।136।।
यतीनाञ्च गृहस्थानां व्रतानि दर्शितानि च।
कृपायुक्तैश्च योगीन्द्रैर्जिनसूत्रानुसारतः।।137।।
तच्छ्रुत्वा मण्डितेनाथ गृहीतं श्रावकव्रतम्।
सम्यक्त्वपूर्वकं सर्वं रात्रिभुक्त्यादिवर्जनम्।।138।।
कृत्वा चैत्यनमस्कारं गुरोर्दिग्वाससां तथा।
निष्क्रान्तः स ततो देशादिति चिन्तामुपागता।।139।।
मातुः सहोदरो भ्राता कृतान्तसमविक्रमः।
ध्रुवं मे सीदतः सोऽयं भविष्यत्यवलम्बनम्।।140।।
राजा भूत्वा पुनः शत्रुं[54] जेष्यामीति सुनिश्चितः।
आसां वहन्प्रवृत्तोऽसावातुरो दक्षिणापथम्।।141।।
श्रमादिदुःखपूर्णोऽसौ मृत्वा मार्गे[55] समाधिना।
उदरे स विदेहाया उत्पन्नो व्रतपुण्यतः।।142।।

पिङ्गलचरदेवोऽसौ तदाऽपश्यत्स्ववैरिणम् ।
कुक्ष्युत्पन्नं विदेहाया दुष्टं कुण्डलमण्डितम् ।।143।।
पापिनं मारयाम्येनं जातं प्रसूतिमात्रकम् ।
इत्युक्त्वा तस्य यत्नञ्च देवः करोति वैरतः ।।144।।
पूर्णे दिने विदेहा सा[56] प्रसूतं बालकं वरम्।
तदैवेतेन देवेन हृतोऽसौ बालको मुदा ।।145।।
गगने बालकं नीत्वा प्राप्तोऽसौ सुरसत्तमः।
शिलायां स्फाल्य बालं हि मारयामीत्यचिन्तयत् ।।146।।
करस्थितं तदा बालं दृष्ट्वा सुभगलक्षणम्।
मनस्यचिन्तयद्देवोऽहोऽहं पूर्वमभून्मुनिः ।।147।।
एकेन्द्रियप्रमुखा जीवा: मारिता न मया तदा।
एनं पञ्चेन्द्रियं बालं मारयाम्यधुना कथम् ।।148।।
संसारवर्द्धकं वैरं कष्टं न साधयाम्यहम् ।
एनं मोचामि कान्तारे सुखस्थे निर्मले स्थले ।।149।।
इत्युक्त्वा कुण्डलाभ्यां तमलङ्कृत्य नभोङ्गणात्।
बालकं मुक्तवान् देवो लघुपर्णाख्यविद्यया ।।150।।
नक्तं शक्त्या स्थितेनाऽसावुद्याने नभसा पतन्।
विद्याभृतेन्दुगतिना ददृशे सुखभाजनम् ।।151।।
उडुपातः किमेषः स्याद्विद्युत्खण्डोऽथ वा च्युतः।
वितर्क्येति समुत्पत्य तदा ददर्श बालकं शुभम्[57]।।152।।
गृहीत्वा च प्रमोदेन देव्याः पुष्पवती श्रुतेः।
वरशय्यां प्रसुप्ताया[58] जंघादेशे चकार सः ।।153।।
ऊचे[59] चैतां धृतस्तान[60] उत्तिष्ठोतिष्ट सुन्दरि।
किं शेषे बालकं पश्य सम्प्रसूताऽसि शोभनम् ।।154।।
ततः कान्तकरस्पर्शसौख्यसम्पत्प्रबोधिता ।
शय्यातः सहसोत्तस्था सा विघूर्णितलोचना ।।155।।

अर्भकञ्च ददर्शाऽतिसुन्दरं सुन्दरानना।
तस्यास्तदंशुजालेन निद्राशेषो निराकृतः।।156।।
परञ्च विस्मयं प्राप्ता पप्रच्छ प्रियदर्शना।
कयाऽयं जनितो नाथ पुण्यवत्या स्त्रिया शिशुः।।157।।
सोऽवोचद्दयिते जातस्तवाऽयं प्रवरः सुतः।
प्रतीह संशयं मा गास्त्वत्तो धन्याऽपरा तु का।।158।।
साऽवोचदहं[61] वन्ध्याऽस्मि कुतो मे सुतसम्भवः।
प्रतारितास्मि देवेन किं मे भूयः प्रतार्यते[62]।।159।।
सोऽवोचद्देवि मा शङ्कां[63] कार्षी कर्मनियोगतः।
सुप्रच्छन्नोऽपि नारीणां जायते गर्भसम्भवः।।160।।
सोऽवोचदस्तु नामैवं कुण्डले त्वातिचारुणी।[64]
ईदृशे मर्त्यलोकेऽस्मिन्सुरत्ने भवतः कुतः।।161।।
सोऽवोचद्देवि नानेन विचारेण प्रयोजनम्।
शृणु तथ्यं पतन्नैष गगनादाहृतो मया।।162।।
मयाऽनुमोदितस्तेऽयं सुतः सत्कुलसम्भवः।
लक्षणानि वदन्त्यस्य महापुरुषभूमिकम्।।163।।
श्रमं कृत्वाऽपि भूयांसं भारमूर्द्धा[65] च गर्भजम्।
फलं तनयलाभो च तत्ते जातं सुखं प्रिये।।164।।
एवमस्त्विवति सम्भाष्य देवी सूतिगृहङ्गता।
प्रभाते सुतजन्माऽस्यास्तुष्ट्या लोके प्रकाशितम्[66]।।165।।
ततो जन्मोत्सवस्तस्य पुरेऽस्मिन् रथनूपुरे।
सम्प्रवृतः समागच्छद्विस्मिताऽशेषबान्धवः[67]।।166।।
रत्नकुण्डलभानूनां मण्डलैर्मयतो वृतः।
प्रभामण्डलनामाऽस्य पितृभ्यां निर्मितं ततः।।167।।
अर्पितः पोषणायासौ धात्र्या लीलामनोहरः।
सर्वान्तःपुरलोकस्य करपद्ममधुव्रतः।।168।।

विदेहाऽथ हते पुत्रे करोति विललापकम्।
बन्धुवर्गादयः सर्वे रुदन्ति दुःखव्याकुलाः।।169।।
तस्मिन्नेवाऽभवत्काले मन्दोदर्यां च रावणात्।
स्वर्गादागत्य सद्गर्भः पूर्वजन्माऽनुवैरतः।।170।।
उदरे संस्थिते गर्भे मन्दोदरी महासती।
दुष्टबुद्धया च शस्त्रौघैः रावणं हन्तुमिच्छति।।171।।
रावणेन मनस्तस्य ज्ञातं तद्गर्भसम्भवात्।
हन्तुं मामिच्छती देवी दुष्टाचारविवर्जिता।।172।।
ज्ञात्वा त्वेकान्तवासे सा स्थापिता तेन यत्नतः।
मासेऽथ नवमे पूर्णे प्रासूत[68]कन्यकां वराम्।।173।।
रावणः प्राह मे केयं वैरिणी पूर्वजन्मनः।
इति ज्ञात्वा च मञ्जूष्यां क्षिप्ता सा बालपुत्रिका।।174।।
मारिचस्य करे दत्ता चेत्युक्ता रावणेन सा।
इमां क्षेपय मञ्जूषां दूरदेशे महीतले।।175।।
तच्छ्रुत्वा तां समादाय मारीचोऽसौ गतस्तदा।
विमानान्मिथिलोद्याने चाऽवतीर्णो नभस्तलात्।।176।।
सुक्षेत्रे भूमिमध्ये तां मञ्जूषां कन्ययाऽन्विताम्।
क्षिप्त्वा लङ्कां गतः कृत्वा रावणाज्ञां समारितः[69]।।177।।
ततः प्रभातकालेऽथ कुटुम्बी तत्र लाङ्गलम्।
वाहति भूमिशुद्ध्यर्थं तदाऽपश्यत् सुपेटिकाम्।।178।।
यद्दिने वैरिणा पुत्रः राज्ञो हतोऽस्ति तद्दिने।
राज्ञे समर्पिता मीत्या पेटिका च कुटुम्बिना।।179।।
तां दृष्ट्वा जनकः कन्यां तस्यां मध्ये सुरूपिकाम्।
हस्ते दत्ता विदेहाया शोकिन्यास्तुक् वियोगतः।।180।।
सुतां गृहाण देवी मां शोकं मा कुरु सुन्दरि।
करोम्यहञ्च सर्वत्र त्वत्पुत्रस्य निरीक्षणम्।।181।।

इत्यादि वचनैर्रम्यैर्जनकेन प्रशान्तिता।
पुत्रार्त्ताऽथ विदेहाऽपि तुष्टा दृष्ट्वा सुतामभूत्।।182।।
यतो लाङ्गलपद्धत्तौ लब्धा पुत्री मुदा ततः।
सीता तस्याः कृतं नाम पितृभ्यां सज्जनैः समम्।।183।।
पुत्रस्य हरणं राज्ञा दशरथाय सूचितम्।
अतस्ततो विलोक्याशु निराशा अभवंश्च ते।।184।।
अथ रूपवती पुत्री पूर्णेन्दुवदना सती।
अशोकपल्लवच्छाया कुम्भस्तनी तनूदरी।।185।।
कलाविज्ञानसम्पूर्णा शचीव ववृधे सदा।
तां दृष्ट्वा बान्धवास्तुष्टाः कुर्वन्ति परमोत्सवान्।।186।।
जनकस्यैकदा चाथ देशे लुण्टितुमागताः।
म्लेच्छाश्च म्लेच्छदेशस्था वर्वराद्या महाभटाः।।187।।
जनकेन ततो राज्ञा दूतः सम्प्रेषितस्त्वरा।
दशरथाय गुप्ताख्यस्तद्वृतान्तं निवेदितुम्।।188।।
दूतः प्राह ततो नत्वा नृपं दशरथं प्रति।
राजन् वर्वरदेशस्था आगता म्लेच्छपार्थिवाः।।189।।
तैश्च संगृहीता देशाः समस्ताः स्वपराक्रमात्।
हिंसापातकयुक्तैस्तैः स्वस्ववर्णाः प्रजाः कृताः।।190।।
बाह्मणक्षत्रियवैश्याः शूद्राश्चैकत्र भाजने।
भुञ्जिता मद्यमांसादिकमन्नं पापिभिश्च तैः।।191।।
जिनेन्द्रचैत्यगेहाश्च भग्नास्तैः शिखरान्वितः।
मुनयो बाधितास्तैश्च श्रावका विह्वलाः कृताः।।192।।
स्त्रियो बन्दिगृहे क्षिप्ता लुण्टितं गोधनादिकम्।
अधुना मिथिलादेशमागमिष्यन्ति पापिनः।।193।।
दशरथेन तच्छ्रुत्वा प्रेषितौ रामलक्ष्मणौ।
चतुर्बलेन संयुक्तौ गतौ तौ मिथिलापुरम्।।194।।

जनककनकौ तत्र युद्धमानौ च तैः समम्।
तदा म्लेच्छैर्धृतौ तौ च कारागारे कृतौ परौ।।195।।

तावत्प्राप्तावतिवेगात्कुमारौ रामलक्ष्मणौ।
ताभ्यांस्ते मारिता म्लेच्छाः सिंहाभ्यां हस्तिनो यथा।।196।।

जनककनकौ मुक्ता मुक्ता राजरथादिकान्।
गताः पलायनं कृत्वा म्लेच्छाः सम्भीतमानसाः।।197।।

ततश्च पृष्टितस्ताभ्यां गत्वा म्लेच्छाश्च मारिताः।
ततो भीता नृपा म्लेच्छा गङ्गार्यवनमाश्रिताः।।198।।[70]

निर्वर्त्य रामलक्ष्मीशौ मिथुलायां समागतौ।
दत्वा राज्यं जनकायायोध्यायां पुनरागतौ।।199।।

कुमारौ तौ पितुः पादौ नत्वा सुखेन संस्थितौ।
दशरथः सुतौ दृष्ट्वा सन्तुष्टश्चेतसि परम्।।200।।

करोति जनको राज्ये मिथिलायां सबान्धवः।
चिन्तयति तदा चित्ते स च परमधार्मिकः।।201।।

रामेण बहुलो मेऽत्रोपकारो धीमता कृतः।
तस्मै पुण्यपुरुषार्योपकरिष्याम्यहं च किम्।।202।।

ममास्ति कन्यका रम्या तस्मै दास्यामि तां वराम्।
इत्युक्ता कल्पिता सीता दातुं रामाय पुण्यतः[71]।।203।।

परम विमलधर्मात्प्राप्यते राजलक्ष्मीः
सुरसुरपतिराज्यं लभ्यते दिव्यधर्मात्।
धनकनकसमेतं सत्कुलं चापि धर्मात्
जिनवरमुखजातं सेव्यतां शुद्धधर्म्मम्।।204।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते रामादिचतुभ्रार्तृणां सीताभामण्डलयोरुत्पत्ति म्लेच्छबन्धनाच्छीतारामकल्पनावर्णनो नाम चतुर्दशमोऽधिकारः।।14।।

❖❖❖

1. दसरथः इति ख प्रतौ
2. कदाचिच्च चेकान्त इति क प्रतौ,
   कदाचिच्च चैकान्त इति ख प्रतौ,
   कदाचिच्च एकान्त इति ग प्रतौ परन्तु कदाचिच्चैकान्त इति पाठः स्यात्।
3. विदेहात् समागत इति ग प्रतौ, विदेहात् सामगता इति क प्रतौ
4. पुरमागतः इति ख प्रतौ
5. कथम् इति क प्रतौ
6. प्रलीयन्ते इति ख/ग प्रतौ
7. जतो इति क प्रतौ
8. गता इति ख प्रतौ
9. लेप्पो इति ख प्रतौ
10. नृपाणां इति ख प्रतौ
11. राजातौ मृतौ ज्ञातौ इति ख प्रतौ
12. व्यर्थं पापस्य संभवं इति क/ख प्रतौ
13. कृमेण इति ख प्रतौ
14. कन्यां नेति इति ख/ग प्रतौ
15. वानराण्यात्मजो इति ख प्रतौ
16. तदास्ति इति ख प्रतौ
17. नत्वौपविष्टा इति क/ग प्रतौ
18. देवी इति ग प्रतौ
19. सुस्मसदा इति क प्रतौ
20. एषः श्लोकः ग प्रतौ अनुपलब्धः।
21. सद्मन इति ख/ग प्रतौ
22. सम पश्चाच्च इति क/ग प्रतौ, सहस्राच्च इति प. पु. 1/25/47
23. तदैवरूढिना इति ख/ग प्रतौ
24. प्रपाठिता इति ख प्रतौ

25. विद्या इति क प्रतौ
26. ख प्रतौ अनुपलब्धश्लोकः।
27. अज्ञानी इति ख प्रतौ
28. कयान इति ख/ग प्रतौ
29. मृतो पितृ च
30. मपुरुषे गेहे इति ग प्रतौ
31. पठति इति क/ख प्रतौ
32. पूर्वजन्मयो: इति क/ख प्रतौ
33. 'कला' इति ख प्रतौ अनुपलभ्यते।
34. दरिद्रिता इति ख प्रतौ, दरिद्रि सा इति ग प्रतौ
35. तिष्टेति इति ग प्रतौ
36. किन्नगोत्तरे इति ख प्रतौ, किन्नरोभूनरोत्तरे इति ग प्रतौ
37. नवयौवनसंयुतः इति ख/ग प्रतौ
38. गच्छता इति ख प्रतौ अनुपलभ्यते
39. पार्थिकं देव इति ख प्रतौ
40. पोदनपुरवर्त्मनि इति ग प्रतौ,
41. पर्वे तेषु च इति ख प्रतौ
42. संधर्तुमशक्तवान् इति ग प्रतौ
43. देशस्योद्वाशकारणान् इति ग प्रतौ
44. सेर्नन्या इति क/ख प्रतौ।
45. ज्ञात्वताष्यत इति ग प्रतौ।
46. सेकेसंना गमिष्यामि इति ग प्रतौ, सकाशमाऽऽगमिष्यामि इति प. पु.
47. सगरं रोगमुद्वहन् इति ख प्रतौ
    संगरे रोगमुद्वहन् इति ग प्रतौ
48. थितिः इति ख प्रतौ।
49. खंडितोनतमः इति ख प्रतौ।
50. गृहिन् इति ख प्रतौ

51. ते इति ग प्रतौ
52. बालचन्द्रो नरेन्द्रेण इति ग प्रतौ
53. स्वस्य इति ग प्रतौ
54. शक्तुं इति ख प्रतौ
55. आतुरो पाठः स्यात् परन्तु आपुरो प्रतित्रयेषु इत्येव उपलभ्यते।
56. सम्पूर्णे समये देवी इति क प्रतौ, सम्पूर्णे दिने देवी इति ख प्रतौ
57. बालं ददर्श सः इति क प्रतौ
58. प्रसुप्तायां इति क/ग प्रतौ।
59. उचै इति ख प्रतौ।
60. द्रुतस्वान इति प.पु 11/26/133
61. सोवोचत्प्रिय इति ख प्रतौ, सोवोचत्स्त्रिया इति ग प्रतौ
62. प्रतारिता इति ख प्रतौ
63. मांसिका इति ग प्रतौ
64. सोवोचदस्तुनामेकं कुण्डले त्वरि वारुणी इति ख प्रतौ,
    सोवोचदस्तुमामेवं कुण्डलेन्वति चारुणी इति ग प्रतौ
65. भूयां संसारं मूद्धर्ना इति क प्रतौ
66. प्रभाते शुभं जन्मास्या सुष्टा लोके प्रकाशितम् इति क प्रतौ
67. बान्धवै इति ग प्रतौ।
68. प्रसूत इति ख/ग प्रतौ।
69. स मारिचा इति ग प्रतौ।
70. एषः श्लोकः ग प्रतौ अनुपलब्धः।
71. इत्युक्ता कल्पिता शीता दातुं रामाय पुण्यतः इति ख प्रतौ।
    इत्युक्ता कल्पिता दातुं रामाय पुण्य मिष्यतः इति ग प्रतौ।

❖❖❖

पञ्चदशमोऽधिकारः

सीतायाः[1] कल्पनं रम्यं श्रुत्वा रामाय नारदः।
तुष्टो मनसि तां दृष्टुमागतो मिथिलापुरीम्।।1।।
नारदो जनकादेशात्प्रविष्टो राजमन्दिरम्।
दर्पणे स्वं तदा सीता मुखं पश्यति हर्षतः।।2।।
तावद् भयानकं तत्र रूपं दृष्ट्वा च नारदम्।
भीता सीता गताऽभ्यन्तर्गृहं कृत्वा पलायनम्।।3।।
नारदोऽनुपदं तस्या विशपन्नतिकुतूहलात्[2]।
नारीभिर्द्वारपालाभिः सावष्टम्भमरुध्यतः।।4।।
यावत्तस्य च तासां च कलहो वर्त्तते महान्।
तावच्छब्देन सम्प्रापुः पुरुषाः खड्गधारिणः।।5।।
गृह्यतां मार्यतां कोऽयं कोऽयमित्युद्धतस्वनाः।
कुञ्चितौ[3]ष्ठान्नरान् दृष्ट्वा सशस्त्रान् हन्तुमुद्यतान्।।6।।
नारदः परमं विभ्रद्भयमुत्कटवेपथुः।
उर्द्धरोमाः खमुत्पत्य विश्रान्तोऽष्टापदाचले।।7।।
अचिन्तयच्च हा कष्टं प्राप्तोऽस्मि जननं पुनः।
निःक्रान्तोऽस्मि महादावात् पक्षी ज्वालाहतो यथा।।8।।
दृष्टुं सीतामहं प्राप्तः सीतयाहं हि मारितः।
तस्मादेतां भयजाले[4] क्षेपाम्यहं हि नारदः।।9।।
तस्याः सरूपमित्युक्ता पट्टे संलिख्य वेगतः।
विमाने च समारुह्य गतोऽसौ रथनूपुरम्।।10।।
तत्रोद्याने कुमारैश्च रम्यमानाय नारदः।
भामण्डलकुमाराय पट्टं दर्शितवान् तदा।।11।।
पट्टं दृष्ट्वा कुमारोऽसौ मूर्च्छितो मोहनिद्रया।
क्षणं ततश्च शोकं संकरोति कामपीडितः।।12।।

निद्रां न लभते रात्रौ न च भुक्तिं दिवा क्वचित्।
कन्दर्पस्य दशावस्थां प्राप्तवान् चित्तव्याकुलः ।।13।।
तदेन्दुगतिना पृष्ठो नारदो नाम सन्मुनिः।
कस्येयं विद्यते कन्या किं नाम किं गुणास्तदा ।।14।।
इत्युक्ते नारदः प्रोचे जनको मिथिलापतिः।
हरिवंशी च तस्येयं पुत्री सीताभिधा परा ।।15।।
महारूपगुणोपेता कलाविज्ञानपारगा।
योग्या सा त्वत्कुमारस्य कन्या रम्या सुलक्षणा ।।16।।
नारदस्य वचः श्रुत्वा चन्द्रगतिस्तु तुष्टवान्।
आगत्य कान्तया साकं सुतमेवमभाषतः ।।17।।
भज सर्वाः क्रियाः पुत्र सुचेता भोजनादिकाः।
अतो वृणोमि तां कन्यां भवतो मनसि स्थिताम् ।।18।।
परिशान्त्य सुतं कान्तां रहश्चन्द्रायणोऽवदत्।
प्रमोदं च विषादञ्च विस्मयं च वहंस्त्रिधम् ।।19।।
कान्ते विद्याभृतां कन्याः संसारे प्रतिमोहिताः[5]।
भूचरीभिश्च सम्बन्धः कथमस्मासु युज्यते ।।20।।
अस्माकं निलयं गन्तुं युज्यते वा कथं प्रिये।
यदि वा तेन नो दत्ता मुखच्छाया तदा तु का ।।21।।
तस्मात्केनाप्युपायेन कन्यायाः पितरं प्रिये।
इहैवाऽऽनय याचामि[6] नान्य: पन्था विराजते ।।22।।
नाथ युक्तमयुक्तं वा त्वमेव ननु मन्यसे।
तथापि तावकं वाक्यं ममापि हृदयङ्गमम् ।।23।।
ततश्चपलवेगाख्यं भृत्यमाहूय सादरम्।
कर्णजापेन विज्ञातः वृतान्तमकरोन्नृपः ।।24।।
आज्ञादानेन तुष्टोऽसौ मिथिलां त्वरितो ययौ।
हृष्टहंसयुवामोदसूचितामिव पद्मिनीम् ।।25।।

अवतीर्याम्बराच्चारु सप्ति[7]वेषमुपाश्रितः ।
वित्रासयितुमुद्युक्तो[8] गोमहिष्यश्ववारणान् ।।26 ।।
देशघाते यथाजातः समाक्रन्दस्तदापरः ।
सुश्राव च जनौघेभ्यो जनकस्तद्विचेष्टितम् ।।27 ।।
निर्ययौ च पराद्युक्तः[9] प्रमोदोद्वेगकौतुकैः ।
ईक्षाञ्चक्रे च तं सप्तिं नवयौवनसङ्गतम् ।।28 ।।
नानोपायैस्ततश्चाश्वो घोटकैः पुरुषैर्धृतः ।
मासमात्रं समाश्वास्य वशीकृतः शनैःशनैः ।।29 ।।
अत्रान्तरे प्रणम्याहो पाशको जनकं नृपम् ।
पश्यतां देवनागस्य बन्धनस्थानमुत्तमम् ।।130 ।।
तच्छ्रुत्वा प्राह राजाऽसौ शीघ्रमानय वाजिनम् ।
ततोऽश्वपालकेनाऽऽशु सोऽश्व आनीतवांस्तदा ।।31 ।।
तमारूढो नृपो यावत्तावदश्वो नभस्तले ।
उड्डीय विद्यया वेगाद् गतो दूरमदृश्यताम् ।।32 ।।
हाहाकारान्नृपाः कृत्वा ततो भीताः पुरङ्गताः ।
किं जातमिति साश्चर्या व्याकुला दीनमानसाः ।।33 ।।
ततो नदीगिरिदेशान्नुल्लङ्घ्य वाजिना नृपः ।
विजयार्द्धनगे नीतो रथनूपुरभूबहिः ।।34 ।।
तत्र जिनेन्द्रगेहस्योपवनभूरुहस्य च ।
शाखायां नृपतिर्लग्नो धैर्यवान् जनको दृढः ।।35 ।।
अतो जनकराजेन्द्रो भूरुहादवतीर्णवान् ।
चैत्यगेहं ततो दृष्ट्वा प्रविष्टः स्नानसत्क्रियः ।।36 ।।
सन्तुष्टोऽसौ जिनं नत्वा व्याकुलश्चित्तचिन्तया ।
उपविष्टः सभास्थाने रत्नकीलितमण्डपे ।।37 ।।
कृती चपलवेगोऽपि मायां संहृत्य सत्वरः ।
सिद्धकार्यो महामानी सम्प्राप्तो रथनूपुरम् ।।38 ।।

स्वामिने चाऽवदन्नत्वा तुष्टो जनक आनीतः।
स्थापितोऽस्ति वने रम्ये भूमिपो जिनवेश्मनि।।39।।
आगतं जनकं ज्ञात्वा परं हर्षमुपागमत्।
आप्तवर्गेण संयुक्तश्चन्द्रायणो महामना।।40।।
गृहीत्वा च परां पूजां नानावाहनसङ्कुलः।
मनोरथरथाऽऽरूढो ययौ जिनवरालयम्।।41।।
दृष्ट्वा ततो महासैन्यमागच्छत्परमोज्ज्वलम्।
तूर्यं शङ्खमहानादं साश्चर्यो जनकोऽभवत्।।42।।
ततो हरिगजद्वीपिनागहंसादि वाहिनीम्।
पुरुषाणां परं मध्ये विमानं स विलोकयत्।।43।।
अचिन्तयन्नृपो नूनमेते विद्याभृतो जनाः।
विजयार्द्धगिरेस्तूर्द्धं ये वसन्ति मया श्रुतम्।।44।।
मध्येऽयमस्य सैन्यस्य सुविमानकृतस्थितिः।
शोभते परमो दीप्त्या कोऽपि विद्याधराधिपः।।45।।
एवं चिन्ता परे तस्मिन्नृपतौ दैत्यपुङ्गवः।
सम्प्रापच्चैत्यगेहञ्च प्रमोदान्नतविग्रहः।।46।।
दृष्ट्वा दैत्याधिपं प्राप्तं भीमसौम्यपरिग्रहम्।
जनकः किमपि ध्यायन् संस्थः सिंहासनान्तरे।।47।।
भक्त्या शशाङ्कयानोऽपि कृत्वा पूजां वरोत्तमाम्।
स्तुतिं च विविधां कृत्वा जिनं नत्वा नृपः पुनः।।48।।
श्रुतिं श्रुत्वा जिनेन्द्रस्य परमाह्लादकारिणीम्।
जनकोऽपि स्थिरीभूत्वा तुष्टश्चेतसि सम्मुदा।।49।।
ततश्चन्द्रायणोऽवोचद्दीपचचलितमानसः।
को भवान् विजने देशे वसत्यत्र जिनालये।।50।।
कस्माद्देशात्समायातः किं नाम तव विश्रुतम्।
दृश्यसे त्वं नृपाकारं श्रुत्वेति जनकोऽवदत्।।51।।

मिथिलानगरीतोऽहं प्राप्तो जनकसञ्ज्ञकः।
हृतो मायातुरङ्गेण नभश्चरमहीपते ॥52॥
इत्युक्ते जनकेनैतावन्योन्यं प्रीतिमानसौ।
इच्छाकाराञ्जलिं कृत्वा सुखासीनौ बभूवतुः॥53॥
क्षणं स्थित्वा च वृतान्तैरन्योन्यविनिवेदितैः।
जनितान्योन्यसन्मानौ तौ विस्रंभं[10] समीयतुः॥54॥
गृहे नीत्वा नरेन्द्रेण मानितो जनको मुदा।
स्नानभोजनताम्बूलगन्धलेपक्रियादृतः ॥55॥
चन्द्रायणस्ततोऽवोचद् धन्योऽहं यस्त्वमीक्षितः।
अस्ति ते दुहिता रम्या तां देहि मम सूनवे॥56॥
सोऽवोचदस्ति मे सत्यं कन्या च रूपशालिनी।
किन्तु रामाय सा दत्ता मया तुष्टेन चेतसा॥57॥
किं ब्रूवे तस्य रामस्य गुणान् सङ्ख्यविवर्जितान्।
येन ते म्लेच्छराजानो लीलया दलिता रणे॥58॥
शस्त्रशास्त्रमहाविद्या साधिता येन धीमता।
यं दृष्ट्वा नृसुराः सर्वे नम्रन्ति भक्तिसंयुताः॥59॥
अयोध्यायां महामानी स्थितो दशरथात्मजः।
चतुर्भिर्भ्रातृभिः साकं शोभते परमोत्सवः॥60॥
तस्मिन् मम महाप्रीतिर्विद्यते उत्तमा[11] विभो।
तं च मुक्ता कथं पुत्री दीयतेऽन्ये वरे मया॥61॥
ततो विद्याधरोऽवोचत्किं ब्रूषि भूचरान्नृपान्।
सुरसमखगेन्द्राणामग्रे ते पशवः समाः॥62॥
इत्युक्ते जनकः प्राह नैवं वाक्यं त्वया नृपः।
अविनयं महापापसाधनं दुःखकारणम्॥63॥
यत्र भूमौ जिनाधीशा उत्पद्यन्ते च चक्रिणः।
सा त्वतश्च[12] कथं निन्द्या महापुण्यस्य कारणात्॥64॥

पद्मस्तु परमो योद्धा लक्ष्मणो यस्य बान्धवः।
तस्मै कन्या मया दत्ता नाऽन्यत्र परियुज्यते।।65।।
चन्द्रगतिस्ततस्तस्य करं धृत्वा युधालयम्।
नीत्वा तं जनकं प्राह शृणु राजन् विवेकतः।।66।।
वृथा गर्जसि तत्र त्वं पद्मलक्ष्मणयोर्गुणान्।
विद्याबलविमुक्तानां भूचराणां कुतो बलम्।।67।।
तथापि शृणु भो राजन् कथामस्मत्पुरातनीम्।
पुराज्ञाधरनीशेन दत्तेऽस्ति धनुषी द्वये।।68।।
परं भक्त्यनुसारेण नमि विद्याधराय भो।
तस्यात्र वंशजोऽहं तु विद्याभृतां नरेश्वरः।।69।।
ते द्वे विद्येते मद्गेहे वज्रावर्तमिदं धनुः।
इदञ्च सागरावर्तं अमरैः कृतरक्षणम्।।70।।
इमे बाणासने कर्तुमधिज्ये यदि तौ क्षमौ।
अनेनैव तयोः शक्तिं ज्ञास्यामः किं बहूदितैः।।71।।
वज्रावर्तं समारोप्य पद्मो गृह्णातु कन्यकाम्।
अस्माभिः प्रसभं[13] पश्य तामानीतामिहाऽन्यथा।।72।।
ततोऽतिवरमित्युक्त्वा धनुषी वीक्ष्य दुर्ग्रहे।
मनाक् व्याकुलीभावं जनको मनसाऽऽगमत्।।73।।
ततः कृत्वा जिनेन्द्राणां पूजां स्तोत्रं तु भावतः।
गदाशिरादिसंयुक्ते पूजां नीते शरासने।।74।।
उपादाय च ते शूरा जनकं च नभश्चराः।
मिथिलाऽभिमुखं जग्मुश्चन्द्रोऽपि रथनूपुरम्।।75।।
ततः कृतमहाशोभं समङ्गलमहाजनम्।
विवेश जनको वेश्म पौरलोकावलोकितः।।76।।
विधायाऽऽयुधशालां च समावृत्य नभश्चराः।
वहन्तः परमं गर्वं नगरस्य बहिःस्थिताः।।77।।

जनकेन ततो राज्ञा समाहूय स्वमन्त्रिणाम्।
कथितः सर्ववृतान्तो रथनूपुरसम्भवः।।78।।
विंशतिदिनमर्यादा कृताऽस्ति च स्वयंवरे।
ततो भो मन्त्रिवर्गाऽत्र किं कर्तव्यं मयाऽधुना।।79।।
प्राहुश्च मन्त्रिणो राजन् किमत्र चिन्तया तव।
पद्मलक्ष्मणयोः शक्तिर्धनुषोः साधनेऽस्ति वै।।80।।
ततो धनुर्ग्रहप्रान्ते विशाला रचिताऽवनिः।
स्वयंवरार्थमाहूताः पार्थिवाः सकला क्षितौ।।81।।
प्रेषितः कोशलां दूतः पद्माद्याः समुपागताः।
मातृपित्रादि संयुक्ता जनकेनाऽभिपूजिताः।।82।।
ततो हर्म्यतले कान्ते स्थिता परमसुन्दरी।
कन्या सप्तशतान्तस्था सीता शूरभटावृता।।83।।
प्रान्तेषु सर्वसामन्ता वेश्मनोऽस्या वत स्थिरे।
कुर्वाणा विविधां लीलां महाविभववर्त्तिनः।।84।।
ततः स्थित्वा पुरस्तस्य कञ्चुकी सुबहुश्रुतः।
जगाद तारशब्देन[14] हेमवेत्रलताकरा।।85।।
राजपुत्रि निरीक्षस्व पद्माभं पद्मलोचनम्।
अयोध्याधिपते राज्ञः पुत्रो दशरथश्रुतेः।।86।।
लक्ष्मीमान् लक्ष्मणश्चाऽयमनुजोऽस्य महाद्युतिः।
भरतोऽयं महाबाहुः शत्रुघ्नोऽयं सुचेष्टितः।।87।।
सुतैर्दशरथोऽप्येभिर्वेष्टितो गुणसागरः।
वसुधां शास्ति निर्दग्धभयाङ्कुरसमुद्भवाम्।।88।।
हरिवाहननामाऽयं धीमानेष घनप्रभः।
अयं चित्ररथः कान्तो दुर्मुखोऽयं प्रभाववान्।।89।।
श्रीसञ्जयो जयो भानुः सुप्रभो मन्दरो बुधः।
विशालः श्रीधरो वीरो बन्धुर्भद्रबलः शिखी।।90।।

एतेऽन्ये च महासत्वा महाशोभासमन्विताः।
विशुद्धवंशसम्भूताश्चन्द्रनिर्मलकान्तयः ।।91 ।।

इत्यादि वर्णनायुक्ताः श्रूयन्तेऽमी महागुणाः।
इदं त्वदर्थमेतेषां समारब्धं परीक्षणम् ।।92 ।।

वज्रावर्तमिदं चापमारोपयति यो नरः।
कुमार्या वरणीयोऽसौ भवत्या पुरुषोत्तमः ।।93 ।।

क्रमेण मानिनस्ते च कुर्वाणाः स्वविकत्थनम्।
वज्रावर्त्तं धनुस्तेन ढौकिताश्चारुविभ्रमाः ।।94 ।।

आसीदत्सु कुमारेषु धनुर्मुञ्चति पावकम्।
विद्युत्सटा समाकारं निश्वसद् भीषणोरगम् ।।95 ।।

चक्षुस्तत्र द्रुतं केचिद् वह्निज्वालासमाहृतम्।
त्रस्ताः पिधाय पाणिभ्यां पराचीनत्वमाश्रिताः ।।96 ।।

तस्थुर्दूरत एवान्ये दृष्ट्वा स्फुरितपन्नगान्।
कम्पमानसमस्ताङ्गा विनिमीलितलोचनाः ।।97 ।।

केचिज्ज्वराकुलाः पेतुः क्षितावन्ये गिरोज्झिताः[15]।
द्रुतं पलायिताः केचिदेके मूर्च्छां समाश्रिताः ।।98 ।।

ततः पद्माभ चोत्थित्वा[16] गृहित्वा च वज्रावृतम्।
मौर्यां चारोपितं चापं सूर्यज्योतिः समप्रभम् ।।99 ।।

तस्य टङ्कारशब्देन गर्जितं मेदिनीतलम्।
पाताले चकितो नागः स्वर्गे यानाश्च कम्पिताः ।।100 ।।

तदा देवैश्चसन्तुष्टैः पञ्चाश्चर्यं कृतं मुदा।
जयजयारवो भूमौ सञ्जातो बहुधा तदा ।।101 ।।

वरमालां तदा सीता रामकण्ठे च चिक्षिपत्।
तस्य पार्श्वे स्थिता देवी शोभते सा शची यथा ।।102 ।।

अवतारित मौर्वीकं स्वं[17] कृत्वा सायकासनम्[18]।
तस्थौ विनयसम्पन्नः स्वासने सीतयान्वितः ।।103 ।।

क्षुब्धाकू[19] पारनिस्वानं सागरावर्तकार्मुकम् ।
तावच्च लक्ष्मणोऽधिज्यां कृत्वा स्फालयदुन्नतम् ।।104।।
शरे निहितदृष्टिं तं समालोक्य नभश्चराः ।
वदन्तो देवमामेति मुमुचुः कुसुमोत्करान् ।।105।।
आकृष्य कार्मुकं क्रूरं मौर्वीसंरावमूर्जितः ।
अवतार्य च पद्मस्य पार्श्वे सुविनयस्थितः ।।106।।
विक्रान्ताय तथा तस्मै विद्याभृच्चन्द्रवर्धनः ।
अष्टादश ददौ कन्या धिये वा प्रौढिका इति ।।107।।
पद्मशक्तिं समालोक्य खगा विस्मयतां गताः ।
कार्मुकाशां परित्यज्य गतास्ते रथनूपुरम् ।।108।।
विद्याधरैः समागत्य नगरे भयपूरितैः ।
वृतान्ते कथिते तस्मिंश्चन्द्रश्चिन्तापरः स्थितः ।।109।।
अथ पद्मस्य पादाब्जौ पूजितौ पक्षवर्तिभिः ।
जयजयारवं कृत्वा मुदं प्राप्ताः स्वसज्जना: ।।110।।
कनकात्सुप्रभायां[20] जाता नाम्ना लोकसुन्दरी ।
भरताय तदा दत्ता दशरथोपदेशनात् ।।111।।
विलक्षाः पार्थिवाः सर्वे जग्मुः स्थानं यथायथम् ।
रामस्य सत्कथां कृत्वा तस्थुस्ते स्वात्मनो गृहम् ।।112।।
अथ वादित्रनिर्घोषैः कामिनीगीतमङ्गलैः ।
शान्तिपूजां पठद्विप्रैर्जातं विवाहमङ्गलम् ।।113।।
भूषाश्च गजवस्त्रैश्च पूजिता: जनकेन ते।
सन्तुष्टा भृत्यवर्गाश्च महादानेन तोषिताः ।।114।।
रतिमदनयोर्युग्मं शचीन्द्ररोहिणीन्दवोः ।
शेषपद्मावत्योर्भाति जानकीपद्मयोर्युगम् ।।115।।
महोत्साहै[21]स्ततस्तेषां कृत्वा विवाहमङ्गलम् ।
दशरथः सुतैः सार्द्धमयोध्यापुरमागतः ।।116।।

तत्र करोति साम्राज्यं दशरथो नरेश्वरः।
नानाभोगैः सुसम्पन्नो धर्मध्यानपरायणः।।117।।
एकदाऽऽषाढशुक्लस्यां चाष्टम्यां जिनपूजनम्।
कृत्वा च विविधोत्साहैः पञ्चामृताभिषेचनैः।।118।।
नृपेण कञ्चुकीहस्तैर्जिनस्य चरणोदकम्।
प्रेषितं पट्टनारीभ्यश्चतुर्भ्यो निर्मलं ततः।।119।।
कञ्चुकीभिस्त्रिभिर्गत्वा वेगात्तच्चरणोदकम्।
दत्तञ्च स्वस्वदेवीभ्यः पवित्रं पापनाशनम्।।120।।
केकामतिः सुमित्रा चाऽपराजितामुदङ्गताः।
न दत्तं वृद्धकञ्चुक्या सुप्रभायै[22] तदा तु सा।।121।।
महाक्रोधेन सङ्कुप्य मर्तुं वाञ्छति दुःखतः।
भण्डारिणं समाहूय प्रार्थयत्सा विषौषधम्।।122।।
तावद्दशरथो राजा तस्याः मन्दिरमागतः।
कस्मात्त्वं देवि रुष्टासि कुतो मर्तुं च वाञ्छसि।।123।।
नरकमात्मघातेन चाऽवश्यं त्वं गमिष्यसि।
जैनमार्गं न जानासि येनेदं चिन्तितं त्वया।।124।।
यावदेवं वदत्येषस्तावदागत्य कञ्चुकी।
गृहाण देवि राज्ञा ते प्रेषितं चरणोदकम्।।125।।
शान्तिजलं ततो दत्वा सन्तोषिता नृपेण सा।
विविधैर्विनयैर्वाक्यैः सुप्रभा प्राणवल्लभा।।126।।[23]
ततो दशरथः प्राह रे कञ्चुकी त्वया कुतः।
समयो गमितो दुष्ट यतो रुष्टास्ति सुप्रभा।।127।।
तदाह कञ्चुकी तस्मै कम्पमानशरीरिकेः[24]।
वृद्धोऽहं देव पादैकं गन्तुं शक्तो न च क्वचित्।।128।।
यष्टिकां च विना राजन् नान्याधीशोऽत्र कोऽपि मे।
गतौ कर्णौ गते नेत्रे गतं मांसं शरीरजम्।।129।।

वचनमृजु[25] नायाति शैथलं चा भवत्तनुः।
केशाश्च पाण्डुरा जाता दन्ताश्च पतिता मम।।130।।
विनाहारं क्षणं स्थातुं न शक्तं देव मे तनुः।
पूर्वाभ्यासेन ते गेहे भ्रमामि चात्र कूटिमे।।131।।
त्वद्गृद्धै पोषितं देहं पञ्चामृतरसायनैः।
मम तैः कृपया युक्तैरनरण्यादिभूपकैः।।132।।
पादस्खलितवाक्यं वा नरचिह्नं न लक्षते।
रक्षितञ्च तनुर्यत्नैस्तथापि नाशतां गतम्।।133।।
अद्य श्वो वा मरिष्यामि तथाप्याज्ञां वहामि ते।
जानासि[26] नाथ मे रूपं पूर्वं यदस्ति ते गृहे।।134।।
तद्गतं सकलं राजन् तपोदान[27]विवर्जितम्।
तनयाः कस्य तातो वा माता भ्राता च किञ्कराः।।135।।
इत्युक्तेऽत्र तया[28] राजा श्रुत्वा भीतः स्वचेतसि।
संसारविषयेष्वेवं विरक्तोऽभूत्तदात्मनः[29]।।136।।
धिग्संसार महाकष्टं जन्ममृत्युजरामयः।
राज्यभोगानतस्त्यक्ता ग्रहिष्यामि वरं तपः।।137।।
एवं चिन्तयतस्तस्य प्रभातमभवत्तादा।
सर्वहिताख्य आचार्य आगतो नन्दने वने।।138।।
सङ्घेन महता वृत्तस्तपसा कृशदेहिकः।
चतुर्ज्ञानैश्च सम्पूर्णो दयावान् क्षमयान्वितः।।139।।[30]
चातुर्मासं तदुद्याने संस्थितः प्रासुके स्थले।
मुनयो यत्र तत्रस्था ध्यानाऽध्ययनतत्पराः।।140।।
मुनेरागमनं श्रुत्वा सन्तुष्टो नृपपुङ्गवः।
स्वपुरं परिवर्गेण निर्गतः सुवनं प्रति।।141।।
सङ्घैः सार्द्धं ततो गत्वा महेन्द्रोद्यानमुत्तमम्।
मुनिं नत्वा च पूजित्वा समाविष्टो महीतले।।142।।

आशीर्वादेन भूपोऽसौ तोषितो मुनिना परम्।
ततः सिद्धान्तसम्बन्धाः श्रुता मुनेर्मुखात्तदा।।143।।
उत्पत्तिप्रलयादीनां स्थितिः कौलकरी तथा।
सम्बन्धः सप्ततत्त्वानां जिनानां चरितादिकम्।।144।।
धर्मं श्रुत्वा यतीनाञ्च श्रावकाणां तथा नृपः।
तदा गतो गृहं स्वस्य वैराग्यगुणभूषितः।।145।।
आगच्छन्ति च गच्छन्ति श्रावका वनितान्विताः।
मुनिचरणसेवार्थं धर्मध्यानेषु तत्पराः।।146।।
नानाशास्त्रविनोदेन दानेन मुनिपूजया।
चातुर्मासो गतः कालो न ज्ञातः श्रावकैः क्वचित्।।147।।
दशरथोऽपि वैराग्यात् गृहे तिष्ठति धर्मधीः।
भामण्डलस्य वृतान्तो विस्तराच्छ्रूयतां प्रभो।।148।।
रथनूपुरसद्ग्रामे भामण्डलकुमारकः।
सीता चिन्तासमासक्तो न लेभे स रतिं क्वचित्।।149।।
शयने चाशने भुक्तौ सुखं नाऽस्य कदा क्वचित्।
तदा वसन्तकीर्त्याख्यो मित्रोऽस्य प्राणवल्लभः।।150।।
स गत्वा भूपतेरग्रे सम्प्राह च यथावृतम्।
राजन् भामण्डलो बालः सीताचिन्ताप्रपीडितः।।151।।
भवद्भिस्तदुपचारः किमपि क्रियते न हि।
किमत्र दीर्घसूत्राश्च परकार्येषु शीतलाः[31]।।152।।
ततश्चन्द्रगतिः प्राह समाहूय कुमारकम्।
मिथिलासर्ववृत्तान्तो धनुरादिषु सम्भवः।।153।।
विद्याभृताञ्च सत्कन्या भज स्वपुत्रहर्षतः।
तस्याशां परित्यज्य सा पद्मेन परीणिता।।154।।
देवाधिष्टितशस्त्राणि गृहीतानि महात्मना।
येन तस्याग्रतः कन्यां हर्तुं चापि न शक्यते।।155।।

इत्युक्तो कुपितो ज्ञानी भामण्डलः कुमारकः।
भूचरास्ते कियन्मात्रा विद्याबलविवर्जिताः।।156।।
निर्घाट्या चाधुना तेषामानयम्यत्र कन्यकाम्।
इत्युक्त्वा प्रोत्थितस्तस्मान्महाक्रोधसमन्वितः।।157।।
चतुर्बलेन संयुक्तो निर्गतो वनितां प्रति।
विदग्धनगरं प्राप्तः क्रमात् भूरिपराक्रमी।।158।।
दृष्ट्वा तन्नगरं सोऽथ जातिस्मरोऽभवत्तदा।
कुण्डलमण्डितं स्वं हि संस्मरन् मूर्छताङ्गतः।।159।।
ततस्तस्य परिवर्गैः नीतोऽसौ रथनूपुरम्।
तत्र शैत्यापचारेण प्राप्तः सञ्ज्ञामचिन्तयत्।।160।।
अहोऽहो हा महापापं मे घटितं दुष्टचिन्तनात्।
भगिन्या सह सम्बन्धो वाञ्छितः पापिना मया।।161।।
चन्द्रगतिश्च तच्छ्रुत्वा पृच्छति कारणं सुतम्।
कुतः स्वसा कुतो भ्राता भ्रांत्या किं पुत्र जल्पसि।।162।।
ततो विहस्य सोऽवोचत्तातेह मम जन्मनि।
मत्पिता जनकराजोऽसौ विदेहा जननी मता।।163।।
पूर्ववैरेण देवेन क्षिप्तोऽहं गगनाङ्गणात्।
त्वया धृतो द्विहस्ताभ्यां किं विस्मृतोऽसि भो पितः।।164।।
विमुचि प्रमुखाद्याश्च स्वभवाः पूर्वजन्मनाम्।
भामण्डलेन तस्याऽग्रे सविस्ताराश्च सूचितः।।165।।
चन्द्रगतिस्ततः प्राह धिग्संसारस्य मोहनम्।
माता मृत्वा च भार्या स्यात्भार्या च भगिनी भवेत्।।166।।
तस्मादिदं परित्यज्य गमिष्यामि तपोवनम्।
इत्युक्ता चोत्थितो राजा चन्द्रगतिनभश्चरः।।167।।
परिवारेण संयुक्तः सम्प्राप्तो वनितापुरम्।
नन्दनकानने यत्र सर्वहितमुनीश्वरः।।168।।

उपविष्टो गुरुं नत्वा धर्मश्रवणहेतवे ।
गुरुणा कथितो धर्मो दशधा सुदयान्वितः ।।169 ।।
चन्द्रगतिश्च तच्छ्रुत्वा मुनेः पार्श्वे महाव्रतम् ।
अयाचयच्च वैराग्यान्मोक्षपदाभिलाषया ।।170 ।।
तच्छ्रुत्वा योगिना तस्मै दत्ता दीक्षा सुनिर्मला ।
भामण्डलाय साम्राज्यं दत्वा नृपोऽभवन्मुनिः ।।171 ।।
तदा बन्दिजनैः प्रोक्ता भामण्डलगुणस्तुतिः ।
जयतु जनकस्यात्र कुमारोऽसौ महाबली ।।172 ।।
बालत्वे हरणं प्राप्तो विद्याधरान्वये ततः ।
वृद्धिं जातोऽसि जीवत्वं चन्द्रगतिनृपास्पदे ।।173 ।।
जयजयारवं श्रुत्वा साकेतायां निशात्पथे ।
किं जातमिदमित्युक्ता सन्तुष्टा जैनबान्धवाः ।।174 ।।
सीता देवी च तच्छ्रुत्वा व्याकुलाऽभूत्स्वचेतसि ।
किं मे भ्राताऽऽगतोऽस्त्यत्र मुनिमाहात्म्यपुण्यतः ।।175।।
रामोऽपि सम्भ्रमाद्वेगादुत्थितः शयनस्थलात् ।
सुप्रभातं ततो जातं रविणा सहसोदितम्[32] ।।176 ।।
ततः स्वपरिवारेण युक्तो दशरथो नृपः ।
आगतः कानने तत्र महांश्च यत्र वैभवः ।।177 ।।
विमानैर्वाजिभिर्नागै रथैश्च भूषितं वनम् ।
दृष्ट्वा दशरथस्तुष्टो मुनिपार्श्वे गतस्ततः ।।178 ।।
कृत्वा तत्र नमस्कारं चोपविष्टो महीतले ।
दृष्ट्वा नवं मुनिं राजाऽपृच्छत्संयमकारणम् ।।179 ।।
मुनिना पूर्ववृतान्त उक्तो भामण्डलादिजः ।
जनकस्य सुतं ज्ञात्वा तुष्टो दशरथोऽवदत् ।।180 ।।
एहि भामण्डल स्वामिन् समालिङ्ग मया समम् ।
इत्युक्ते तौ च सम्प्रीत्यालिङ्गितौ च परस्परम् ।।181 ।।

रामोऽपि च समाश्लिष्टः समालिङ्गितलक्ष्मणः।
शत्रुघ्नो भरतस्तेनालिङ्गितौ परमादरात्।।182।।
सीता चालिङ्गिता भ्रातुः कण्ठे तोषाश्रुलोचना।
परस्परञ्च सर्वेषां सञ्जाता प्रीतिरुत्तमा।।183।।
दशरथेन वेगेन मिथिलां प्रेषितो नरः।
पुत्रस्यागमनं श्रुत्वा तुष्टो जनकभूपतिः।।184।।
परिवारेण सार्द्धं सः साकेतायां समागतः।
दशरथः समं पौरैर्भामण्डलेन निर्गतः।।185।।
नगरस्य बहिर्भागे सञ्जातः सङ्गमस्तयोः।
पुत्रस्य वदनं दृष्ट्वा विदेहा तोषमागता।।186।।
आलिङ्गिताश्च ते सर्वे पितृमातृसुतादयः।
कुशलादि शुभं प्रश्नं सम्पृच्छ्य तुष्टितां गताः।।187।।
ततो विमानमारूढा अयोध्यापुरमागताः।
तत्र जन्मोत्सवं चक्रे जनकनृपपुङ्गवः।।188।।
विदेहाह तदा पुत्र धन्या पुत्रवती सती।
बाललीला यया दृष्टा तव चेष्टा विनिर्मिता।।189।।
ततो भामण्डलेनापि विद्यया बालचेष्टिता।
विनोदाद्दर्शिताः तस्यारिङ्खणादिसमन्विताः।।190।।
दारिद्र्यरहितो लोको जातो जन्ममहोत्सवे।
दानेन वाञ्छित्याधिक्यं प्राप्तेन धरणीतले।।191।।
मासमात्रं स्थितास्तत्र बन्धुसङ्गममोदिनः।
पद्मो भामण्डलं प्राह विनयान्वितविग्रहम्।।192।।
सीतायै शरणं देव त्वमेवोत्तमबान्धवः।
ततो भामण्डलः प्राह तथास्तु तव वाक्यतः।।193।।
स्वसारञ्च समालिङ्ग्य स्नेहादेव सुचेष्टितः।
उपादिशदसौ[33] भूपो भूयः प्रवरमानसः।।194।।

श्रृणु भगिनि सुबुद्धि मे स्वश्रृश्वसुरयोः प्रिये।
परिवर्गे च तत्कुर्यात् श्लाघ्यतां येन गच्छसि।।195।।
सर्वानामंत्र्य विन्यस्य विमाने सज्जनान् बहून्।
द्व्यर्द्धद्वीपमध्यस्था वन्दिता जिनसद्गृहाः।।196।।
ततः स्वनगरे नीत्वा पूजिता वस्त्रभूषणैः।
सम्मान्य पक्षमात्रं ते साकेतायां समागताः[34]।।197।।
दशरथोऽन्यदा सङ्घैः सार्द्धमागत्य कानने।
मुनिं पपृच्छ नत्वा तं पूर्वजन्मात्मनो[35] भवान्।।198।।
मुनिराह ततो राजन् शृणु संसारसंस्थितिः।
सेनापुरे वणिक्पुत्री नाम्ना चोपास्ति निर्धनाम्।।199।।
मिथ्यात्वाचारिणी साधुनिन्दनकारिणी परा।
स्वयं ददाति नो दानमन्यानपि निवारयत्।।200।।
तेन पापेन सा भ्रष्टा भ्रमिता नरकादिषु।
जिन इति कदाचिच्च श्रुत्वाऽक्षरद्वयं मुदा।।201।।
तत्पुण्येन च सा मृत्वा पुरेन्द्रकपुराद्वये।
पुत्रोऽभूद् भद्रधारिण्योर्धारणाख्यो विचक्षणः।।202।।
तस्य पत्नी सुरूपाद्या नाम्ना नयनसुन्दरी।
तया समं मुनीन्द्रेभ्यो ददौ दानं स धारणः[36]।।203।।
विदेहे धातकीखण्डे मेरूत्तरकुरौ वरे।
मृत्वा तत्र समुत्पन्नौ तौ च पल्यत्रयस्थितौ।।204।।
ततस्त्रिविष्टपं प्राप्तौ च्युत्वात्र पृथिलापुरे।
नन्दिघोषाद्वसुधायां पुत्रोऽभून्नन्दिवर्धनः।।205।।
दत्वा राज्यं स्वपुत्राय नन्दिघोषोऽभवन्मुनिः।
यशोधरमुनेः पार्श्वे श्रुत्वा धर्मं जिनेश्वरम्।।206।।
ग्रैवेयकं परं प्राप्तो नन्दिघोषस्तपोबलात्।
धर्मं करोति गार्हस्थं धर्मिष्ठो नन्दिवर्द्धनः।।207।।

पूर्वकोटिमहाभागो भुक्त्वा धर्मपरोऽपि स।
सन्यासेन तनुं त्यक्त्वा सम्प्राप्तः पञ्चमं दिवम्।।208।।
विदेहेऽत्र ततश्च्युत्वा पश्चिमे रजताचले।
चन्द्रपुरे सुनाकाभे रत्नमाली महानृपः।।209।।
विद्युल्लताभिधा भार्या तनयोऽभूत्तयोश्च सः।
सूर्यञ्जय इति नाम्ना रूपलावण्यभूषितः।।210।।
सिंहपुरं कदाचित्स रत्नमाली महाबली।
प्रस्थितो विग्रहं कर्तुं यत्रास्ति वज्रलोचनः।।211।।
रथैः प्रभास्वरैर्दिव्यैः पदातिगजवाजिभिः।
नानाशस्त्रकृतध्वान्तैः सामन्तैः सुमहाबलैः।।212।।
तं दष्टोष्ठं धनुःपाणिं कवचावृतविग्रहम्।
दग्धुकाममरिस्थानं क्रोधादाग्नेयविद्यया[37]।।213।।
रथाग्रारूढमायातं वेगिनं भीषणाकृतिम्।
नभस्थं सहसा कश्चिदमरोऽभिदधदिति।।214।।
रत्नमालिन् किमारब्धमिदं संरम्भमुत्सृज।
विबुध्यस्व[38] वदाम्येष वृतान्तं तव पूर्वकम्।।215।।
भरते गन्धिनगरे भूति[39]र्नाम्ना नराधिपः।
मांसाहारी महापापी सप्तव्यसनतत्परः।।216।।
साधोः कमलभद्रस्य पार्श्वे श्रुत्वा वृषं वरम्।
श्रावकोऽभून्महाधर्मी सम्यक्त्वरहितः पुनः।।217।।
उपमन्युरिति नाम्ना तस्यास्ति च पुरोहितः।
तेन तस्य व्रतं सर्वं मोचितं पापबुद्धिना।।218।।
गोपुरस्थौ कदाचित्तौ मारितौ पूर्ववैरिणा।
पुरोहितो गजो जातो भूतिः सुतस्य सद्मनि।।219।।
सङ्गामे स गजः पापी जर्जरीभूतविग्रहः।
नमस्कारफलेनापि मृत्वा सुध्यानयोगतः।।220।।

गन्धिनगरभूपस्य भूतिसुतस्य धीमतः।
देव्यां योजनगन्धायां पुत्रोऽभूदरिसदूनः।।221।।
दृष्ट्वा कमलभद्रं तं पूर्वजन्मसमस्मरन्।
प्रव्रज्याऽसौ ततो मृत्वा सतारेऽहं सुरोऽभवत्।।222।।
स त्वं भूतिमृगो जातो मंदारण्ये[40] दुराकृतिः।
अकामनिर्जरा तस्य दावदग्धस्य भुक्तितः।।223।।
सञ्जातो व्याधको मृत्वा क्लिंजाख्यश्चाऽतिपापकः।
ततो मृत्वाऽतिपापेन शर्करानरकङ्गतः।।224।।
महास्नेहानुबन्धेन तत्र त्वं बोधितो मया।
अयमुद्धृत्य जातोऽसि रत्नमाली खगेश्वरः।।225।।
पर्याप्तानि न किं तानि दुःखानीत्युदितश्च सः।
सूर्यञ्जयस्य पुत्राय दत्वा राज्यं नृपार्चितम्।।226।।
वृतान्तश्रवणात्तस्मात्परं निर्वेदमीयुषा।
सूर्यञ्जयेन सार्द्धं स दीक्षां जग्राह धीरधीः।।227।।
रत्नमाली पुनर्नाम्नादुर्गतित्रस्तमानसः।
तपस्तप्त्वा महाशुक्रे सुरो जातो महर्द्धिकः।।228।।
सूर्यञ्जयोऽपि सन्तप्य तत्रैवोऽभूत्सुरोत्तमः।
च्युतोऽनरण्यराजर्षे दशरथोऽभवत्सुतः।।229।।
स्वल्पेन सुकृतेनत्वमुपास्ति प्रमुखैर्भवैः।
न्यग्रोधबीजवत्वृद्धिं सम्प्राप्तोऽसि शुभोदयः।।230।।
नन्दिवर्द्धनकाले ते नन्दिघोषः पिता च यः।
सोऽहं ग्रैवेयकाद्भ्रष्टः सर्वभूतहितोऽभवम्।।231।।
यौ भूतिरुपमन्युश्च तावेतौ त्वद्वशानुगौ।
जनककनकौ जातौ महाशुक्राच्च्युतौ सुरौ।।232।।
संसारे न परः कश्चिन्नात्मीयः कश्चिदञ्जसा।
स्वस्य शुभाशुभैर्जन्तोरुद्वर्त्तपरिवर्तना[41]।।233।।

उदाहृतमिदं श्रुत्वा विनीतो वीतसंशयः।
अनरण्यसुतो जातः संविग्नः संयमोन्मुखः।।234।।

सर्वादरसमेतश्च सम्पूज्य चरणौ गुरोः।
प्रणम्य च विशुद्धात्मा प्रविवेश सुकौशलम्।।235।।

एवञ्च मानसे चक्रे सार्वभूमीश्वरं पदम्।
पद्माय सुधिये दत्वा साधयामि शिवां गतिम्।।236।।

दिवारात्रौ नृपो निद्रां न लभते सचिन्तया।
मोक्षपदाभिलाषी सुवैरागी भोगसम्पदि।।237।।

धर्मः प्राणिहितङ्करोति सततं धर्मं जना गृह्यताम्।
धर्मेण प्रभवन्ति राज्यविभवा धर्माय तुभ्यं नमः।।
धर्मान्नश्यति पापसन्ततिपरा धर्मस्य सौख्यं फलम्।
धर्मे देहि मनः प्रभो वृषकरं भो धर्म मां रक्षय।।238।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
सीताविवाहधनु:साधनभामण्डलसङ्गमदशरथवैराग्योत्पत्तिर्वर्णनो नाम पञ्चदशमोऽधिकारः।।5।।

❖❖❖

1. शीर्तयाः इति ख प्रतौ।
2. विशन्नतिकुतूहलः प. पु. 2/28/8
3. कुपितो इति ग प्रतौ
4. भवजालं इति ख/ग प्रतौ
5. संसारे प्रति मोमिता इति क प्रतौ,
   संसार प्रतिमोज्जिताः इति ख प्रतौ, संत्यज्य प्रति मोज्झिता प.पु. 2/28/56
6. इहैवानाय याचामि इति ख/ग प्रतौ
7. सद्मि इति ख प्रतौ
8. चित्रासयितुमुद्युक्तौ इति ग प्रतौ
9. पुरा छुक्त इति ख प्रतौ
10. विश्रामौ इति ग प्रतौ
11. अकृत्रिम इति क प्रतौ, कृत्रिम इति ख प्रतौ
12. स्यात्तश्च इति ख प्रतौ
13. प्रसभे इति ख प्रतौ, प्रशसं इति ग प्रतौ
14. तोर शब्देन इति क प्रतौ
15. गिरोप्सिताः इति क/ग प्रतौ
16. पद्मेभवोत्थित्वा इति ख प्रतौ, पद्मे वचोत्थित्वा इति ग प्रतौ
17. स्वं स्थाने स इति प. पु. 2/28/245
18. सायकासमं इति क/ख प्रतौ।
19. क्षुब्धाक्ष इति ख प्रतौ, क्षुब्धाक्र इति ग प्रतौ
20. कनकात्सुप्रभा इति ख प्रतौ
21. महोत्साहो इति ख प्रतौ
22. सुप्रजा इति त्रयौ प्रतौ, परन्तु अन्यपुराणेषु सुप्रभा नाम प्राप्यते यथा प.पु. 2/29/12
23. एषः श्लोकः इति क प्रतौ अनुपलब्धः।
24. कम्पामानशरीरिका इति ख/ग प्रतौ।
25. मृज इति ख प्रतौ
26. जानामि इति क प्रतौ।

27. तपोराजन् इति ग प्रतौ
28. वुपया इति क प्रतौ
29. तथात्मनः इति क प्रतौ,
    तौ मना इति ग प्रतौ
30. एषः श्लोकः ख प्रतौ अनुपलब्धः।
31. शीतया इति ख प्रतौ
32. सहसोर्ज्जितम् इति ख/ग प्रतौ
33. उपदेसयसौ इति ग प्रतौ
34. समानिताः इति क/ग प्रतौ
35. पूर्वजानात्मनो इति क/ख प्रतौ
36. समाधारणः इति ख प्रतौ
37. क्रोधादाज्ञयविद्यया इति क/ख प्रतौ
38. निबुध्य इति क/ग प्रतौ
39. चूति इति ख प्रतौ, भूमि इति ग प्रतौ
40. महारण्ये इति क प्रतौ
41. शुभाऽशुभेबद्धे इति ग प्रतौ

❖❖❖

षोडशमोऽधिकारः

अथामात्यान् समाहूय प्रोचे दशरथो नृपः।
राज्यं दत्वा च रामाय गमिष्यामि तपोवनम्।।11।।
तदाऽपराजिता मुख्या देव्यः प्राहुः शृणु प्रभो।
नाथास्माकं निराधारं मुक्त्वा त्वं व्रजसि कथम्।।2।।
नानाभोगं परित्यज्य किमस्ति जिनदीक्षिते।
तस्माद्देवं कृपां कृत्वा संतिष्ठ गृहिणां व्रते।।3।।
दशरथस्ततः प्राह नैवं स्याच्च कदा प्रिये।
सर्वथाहं ग्रहीष्यामि दीक्षां मोक्षस्य साधनाम्।।4।।
ज्ञात्वा दशरथस्याथ निश्चयं सकला जनाः।
कुर्वन्ति रामदेवाय सामग्रीमभिषेचिकाम्।।5।।
भरतोऽपि मुदा दीक्षां गृहीतुं तत्परस्तदा।
चिन्तयति सुवैराग्यं संसारेऽनित्यतां पराम्।।6।।
ततः केकामती देवी दृष्ट्वा च व्याकुलं सुतम्।
किं स्थास्यामि गृहे चाहं पतिपुत्रविवर्जिता।।7।।
कथं रक्षामि भर्त्तारं तनयं वा गुणालयम्।
दीक्षां निवारितुं कुर्वे किमुपायं सुनिश्चितम्।।8।।
एवं चिन्तामुपेतायाः केकामत्याः स्वतो भयात्।
तस्या वरोऽभवच्चित्ते गत्वा च त्वरितं तदा।।9।।
प्रीत्या परमया दृष्ट्वा साऽवष्टम्भं नराधिपम्।
जगादार्द्धासने स्थित्वा तेजसा पुरुषान्विता।।10।।
सर्वेषां भूभृतां नाथ पत्नीनाञ्च पुरस्त्वया।
मनीषितं ददामीति यदुक्ताहं प्रसादिना।।11।।
वरं सम्प्रति[1] तं यच्छ मह्यं सत्यसमुज्ज्वला।
दानेन तेऽखिलं लोकं कीर्त्तिर्भ्रमति निर्मला।।12।।

तदा दशरथोऽवोचद् गृह्यतां दक्षिणां प्रिये।
प्रार्थय त्वं यदिष्टं ते यच्छाम्येष वराशये।।13।।
इत्युक्ते मुञ्चती वाष्पमवोचज्ज्ञातनिश्चया।
दीक्षायाः समये नाथ मत्सुते दीयतां श्रियम्।।14।।
ततो दशरथोऽवोचत्प्रिये काऽस्मिन्नपत्रपा।
न्यासस्त्वया मयि न्यस्तस्साम्प्रतं गृह्यतामसौ।।15।।
एवमस्तु शुचं[2] मुञ्च निर्ऋणोऽहं त्वया कृतः।
किं वा कदाचिदुक्तं ते मया जनितमन्यथा।।16।।
पद्मलक्ष्मणसंयुक्तमाहूय च कृताननतिम्[3]।
ऊचे विनयसम्पन्नं किञ्चिद्विगतमानसः।।17।।
शृणु वत्स रणे घोरे कला पारगयाऽनया।
कृतं केकयया साधु सारथ्यं मम दक्षया।।18।।
तदा तुष्टेन पत्नीनां भूभृताञ्च पुरो मया।
मनीषितं तु दास्यामि तदैव[4] रक्षितं तया।।19।।
देहि पुत्रस्य मे राज्यमिति तं याचतेऽधुना।
किमप्याकूत[5]मापन्ना निरपेक्षा मनस्विनी।।20।।
प्रतिज्ञाय तदेदानीं ददाम्यस्यै न चेन्मतम्।
प्रव्रज्यां भरतः कुर्यात्संसारालम्बनोज्झितः।।21।।
इयञ्च पुत्रशोकेन कुर्यात्प्राणविवर्जनम्।
भ्रमेच्च मम लोकेऽस्मिन्न कीर्तिर्वितथोद्भवा।।22।।
मर्यादा न च नामेयं यद्विहायाग्रजं क्षमम्।
राज्यलक्ष्मीवधूत्सङ्गां कनीये प्राप्यते सुते।।23।।
भरतस्याखिले राज्ये दत्ते स त्वं सलक्ष्मणः।
क्व गच्छेत्परमं तेजो दधानः क्षत्रगोचरम्।।24।।
न वेद्मि तदहं वत्स किं करोमीति पण्डितः।
अत्यन्तदुःखवेगोऽहं चिन्तावार्तान्तरस्थितः।।25।।

ततः पद्मो जगादेदं विभ्रद्विनयमुत्तमम्।
सद्भावप्रीतिचेतस्कः पादन्यस्तनिरीक्षणः।।26।।

तात रक्षात्मनः सत्यं त्यजास्मत्प्रतिचिन्तनम्।
शक्रस्याऽपि श्रिया[6] किं मे त्वया कीर्तिमुपागते।।27।।

जातेन ननु पुत्रेण तत्कर्त्तव्यं गृहैषिणा।
येन नो पितरौ शोकं कनिष्टमपि गच्छतः।।28।।

पुनाति त्रायते चायं पितरं येन[7] शोकतः।
एतत् पुत्रस्य पुत्रत्वं प्रवदन्ति मनीषिणः।।29।।

सभानुरञ्जनी यावत्कथेयं वर्तते तयोः।
तावत्तत्रागतो वेगाद्वैरागी भरतो नृपः।।30।।

पित्रा स्वस्याङ्कमाऽऽरोप्य परिष्वज्य स चुम्बितः।
इति चाऽभिदधे भूमौ तिष्ठासुर्वंशगः पितुः।।31।।

राज्यं पालय वत्स त्वमहं यामि तपोवनम्।
स जगौ न भजे[8] राज्यं प्राव्रज्यं तु करोम्यहम्।।32।।

भज तावत्सुखं पुत्र सारं मनुजजन्मनः।
नवेन वयसा कान्त[9] वृद्धः सन् प्रव्रजिष्यसि।।33।।

इत्युक्तेऽभिदधे तात किं मोहयसि मां वृथा।
मृत्युः प्रतीक्षते नैव बालं[10] तरुणमेव वा।।34।।

गृहाश्रमे[11] महावत्स श्रूयते धर्मसञ्चयः।
अशक्यः कुनरैः कर्तुं तपः घोरं भयास्पदम्।।35।।

इत्युक्तेऽभिदधे तात हृषीकवशवर्तिनः।
कामक्रोधादिपूर्णस्य का मुक्तिर्गृहसेविनः।।36।।

अथ गेहेऽपि लभ्येत श्रेयोजनकं तैर्व्रतम्।
त्वमेव कुरुषे कस्माद् गृहत्यागं महामतिः।।37।।

पिता तद्वचनं श्रुत्वा हृष्टरोमा प्रमोदतः।
जगाद वत्स धन्योऽसि विबुद्धो भव्यकेसरी[12]।।38।।

तथापि वीर नो भङ्गः कदाचित्प्रणयस्य मे।
त्वया कृतो विनीतानां भवान् हि शिरसि स्थितः।।39।।
ततः पद्मोऽपि तं पाणौ गृहित्वैवमभाषत।
प्रेमनिर्भरया पश्यन् दृष्ट्या मधुरनिःस्वनः।।40।।
तातेन भ्रातरुक्तं यत्कोऽन्यस्तद्गदितुं क्षमः।
न हि सागररत्नानामुत्पत्तिः सरसो भवेत्।।41।।
वयस्तपोऽधिकारे[13] ते जायतेऽद्यापि नोचितम्।
कुरु राज्यं पितुः कीर्तिरुद्यात् शशिनिर्मला।।42।।
इत्युक्त्वा भावतः पादौ शिरसा भुविमक्षिपन्[14]।
पितुः प्रणम्य तत्पार्श्वान्निर्गतो लक्ष्मणान्वितः।।43।।
अत्रान्तरे नृपो मूर्च्छां सम्प्राप्तोऽपि न केनचित्।
ज्ञातः स्तम्भसमायुक्त वपुः पुस्तसमाकृतिः।।44।।
अतूर्णं[15] धनुरादाय गत्वा नत्वा च मातरम्।
आपृच्छताञ्च गच्छामि तावदन्य महीमिति।।45।।
सखीत्वं मूर्च्छया तस्या दुःखज्ञाननिवारणात्।
क्षणं कृतं परिप्राप्ता सञ्ज्ञां चाश्रुकुलेक्षणा।।46।।
ऊचेऽपराजिता हा त्वं वत्स क्व प्रस्थितोऽसि माम्।
कस्मात्त्यजसि सच्चेष्ट क्षिप्त्वा शोकमहोदधौ।।47।।
परिदेवनमेवं तां कुर्वन्तीं हृदयङ्गमम्।
जगाद प्रणतः पद्मो मातृभक्तिपरायणः।।48।।
अम्ब मा गाद्[16] विषादं त्वं दक्षिणस्यामहं दिशि।
निरुप्य संश्रयं योग्यं नेष्यामि त्वां विसंशयम्।।49।।
तातेन पृथिवी दत्ता जननीवरदानतः।
भरतायेति ते कर्णजाहं नूनमुपागतम्।।50।।
अन्ते तस्या महारण्ये विन्ध्याद्रौ मलयेऽथवा।
अन्यस्मिन् वार्णवस्यान्ते पश्य मातः[17] कृतं पदम्।।51।।

मयि स्थिते समीपेऽस्मिन् लोकभास्करसम्मते।
आज्ञैश्वर्यमयी कान्तिर्भरतेन्दोर्न जायते।।52।।

ततः प्ररुदती माता जगादात्यन्तदुःखिता।
पुत्रं विनीतमाश्लिष्य स्नेहकातरलोचना।।53।।

तनयाद्यैव मे गन्तुमुचितं भवता समम्।
कथं त्वाहमपश्यन्ती प्राणान् धारयितुं क्षमा।।54।।

पिता नाथोऽथवा पुत्रः कुलस्त्रीणां त्रयी गतिः।
पिताऽतिक्रान्तकालो मे नाथो दीक्षासमुत्सुकः।।55।।

जीवितस्य त्वमेवैकः साम्प्रतं मेऽवलम्बनम्।
त्वयापि रहिता साहं वद गच्छामि कां गतिम्।।56।।

सोऽवोचदुपलैरम्ब क्षितिरत्यन्तकर्कशा।
भवत्या विषमापद्भ्यां गन्तुं सा शक्यते कथम्।।57।।

तस्मात्कुत्रचिदेवाहं विधाय सुखमाश्रयम्।
यानेन केनचिन्नेष्ये भवन्तीं[18] त्यजनं कुतः।।58।।

यथा स्पृशामि ते मातः पादावेष तथा ध्रुवम्।
आगमिष्यामि नेतुं त्वां मुञ्च कार्यविचक्षणे।।59।।

एवमुक्ते विमुक्तः सन् परिशान्त्य सुभाषितैः।
पुनश्च पितरं प्राप्तप्रबोधं प्रणिपत्य सः।।60।।

शेषं मातृजनं नत्वा परिशान्त्य सुभाषितैः।
अविषण्णमहाचेतः सर्वन्यायविचक्षणः।।61।।

भातृबन्धुपरिष्वङ्गं कृत्वा सम्भाषणं तथा।
सीतायाः सदनं प्राप्तः प्रेमनिर्भरमानसाः।।62।।

प्रिये त्वं तिष्ठ चात्रैवं गच्छाम्यहं पुरान्तरम्।
ततो जगाद सा साध्वी यत्र त्वं तत्र चाप्यहम्।।63।।

तत्छ्रुत्वाऽन्यांश्च सम्पृच्छ्य समालिङ्ग्य परस्परम्।
जानकी न्यस्तविस्तारिलोचना प्रश्रयान्वितः।।64।।

मन्त्रिणो नृपतीन् सर्वान् परिवर्गञ्च सादरम्।
आपृच्छ्य छेकवर्गेऽपि वीक्षणोल्लापनाकुलः[19]।।65।।

प्रीत्या संवर्द्धितं भूयः कृतालिङ्गनमादृतम्।[20]
मित्रवर्गं सवाष्पाक्षं पुनरुक्तं न्यवर्त्तयत्।।66।।

स्निग्धेन चक्षुषाऽपश्यत्प्रधानान् वाजिवारणान्।
निरगच्छत्पितुर्गेहान्मन्दर[21]स्थिरमानसः।।67।।

आरूढौकं द्रुतं चारु सामन्ता वाजिवारणाः।
पद्मेन न गृहीतास्ते परमन्यायवेदिना[22]।।68।।

विदेशगमनोद्युक्तं दृष्ट्वा तं जानकी भृशम्।
श्रीमदंशुकसंवीता विकसत्पद्मलोचनाम्।।69।।

प्रणम्य श्वसुरं श्वश्रुरापृच्छ्य च सुहृज्जनम्।
विनीता सा ययौ नाथं पौलोमीव[23] सुराधिपम्।।70।।

दृष्ट्वा तमुद्यतं गन्तुं स्नेहनिर्भरमानसः।
लक्ष्मणोऽचिन्तयत्क्रोधं वहन्नयनलक्षकम्।।71।।

अन्यायमीदृशं कर्तुं कथं तातेन वाञ्छितम्।
स्वार्थसंसक्तनित्याशं धिग्स्त्रैणमनपेक्षितम्।।72।।

अहो महानुभावोऽयं ज्यायान् पुरुषसत्तमः।
मुनेरपीदृशं स्वान्तं दुःकरं जायते नहि[24]।।73।।

किमद्यैव करोम्यस्य सृष्टिमुत्सृज्य दुर्जनात्।
भरतस्य बलाद्वाहो करोमि विमुखाश्रियम्।।74।।

न युक्तमथवा चित्रं जातं क्रोधानुजस्य मे।
क्रोधः करोति मोहान्धमपि दीक्षामुपश्रितम्।।75।।

किमनेन विचारेण कृतेनाऽनुचितेन मे।
ज्येष्ठस्ततश्च जानाति साम्प्रता सम्प्राप्तं बहु।।76।।

सितकीर्तिसमुत्पत्तिर्विधातव्यहि नः पितुः।
तूष्णीमेवानुगच्छामि ज्यायां संसाधुकारिणम्।।77।।

प्रशमय्य स्वयं कोपमित्यादाय शरासनम्।
प्रणम्यापृच्छ्य चाऽशेषं जनं गुरुपरस्परम्[25] ।।78।।

महाविनयसम्पन्नो मार्गयोग्यकृताकृतिः।
लक्ष्मीनिलयवक्षस्कः पद्मस्याऽनुपदं ययौ।।79।।

पितरौ परिवर्गेण सहितौ तनयान्वितौ।
वर्षा इव प्रकुर्वाणौ धाराभिर्नयनाऽम्भसा।।80।।

वार्यमाणा अपि सर्वे पृष्ठमां यान्ति सज्जनाः।
राजद्वाराद्विनिष्क्रान्तौ क्रमेण सज्जनान्वितौ।।81।।

ततः पौरजनैर्वृतो गच्छन्तौ राजवर्त्मनि।
पौरजना रुदन्त्यत्र घोराधारान्धमेघवत्।।82।।

सन्ध्याकालेऽथ तावत्तौ पुरबहिः सरोवरे।
जिनचैत्यालयं प्राप्तौ परिवर्गसमन्वितौ।।83।।

तत्र श्रीजिनचन्द्रस्य पूजां कृत्वा महत्तराम्।
रात्रौ सुप्ताश्च ते तत्र सज्जनाश्चित्तव्याकुलाः।।84।।

मन्त्रिणस्तत्र सम्प्राहुर्नत्वा दशरथं नृपम्।
राज्यस्थितिः च रामेऽस्मिन् कर्त्तव्या नाथ निश्चयात्।।85।।

इति परस्परं सर्वे कुर्वन्ति ते विचारणम्।
केचित्सुप्ता गता केचित्केचिद्रुदन्ति व्याकुलाः।।86।।

मध्यरात्रिं समाश्रित्य यत्र तत्र जनाः स्थिताः।।
तेष्वज्ञातेषु जानक्या निर्गतौ रामलक्ष्मणौ।।87।।

मुक्ता सर्वान् गतो रामः सीतालक्ष्मणसंयुतः।
जनैः कैरपि न ज्ञातः सुप्तैस्तैश्च यथायथम्।।88।।

ततः प्रभातकालेऽथ धावन्तो निर्गता जनाः।
गत्वा गव्यूतिं सम्प्राप्ता रामलक्ष्मणसंयुतम्।।89।।

सज्जनैरावृतो रामो गच्छति सः शनैः शनैः।
ग्रामे ग्रामे पुरे देशे प्राप्य पूजां पदे पदे।।90।।

प्राप्तो बाहुनदीतीरं सीमान्तपरिवर्त्तिनम्।
तदा जगाद रामोऽसौ यूयं गच्छन्तु भो जनाः।।91।।
अधुना कौशलो देशस्तातेन भरतेऽर्पितः।
कृत्वा तस्य सुसेवां भो यूयं तिष्ठन्तु सद्मनि।।92।।
निर्वर्त्येति जनानुक्ता सीतां कृत्वा भुजस्थले।
रामोलक्ष्मणसंयुक्तः उत्तीर्णः सरितं तदा।।93।।
भीमारण्ये प्रविष्टौ तौ ससीतौ रामलक्ष्मणौ।
महाविनोदसंयुक्तौ लीलाहर्षेण पूरितौ।।94।।
दूरे रामं गतं ज्ञात्वा केचिच्च नृपपुङ्गवाः।
दीक्षां तत्रैव जग्राहुः केचिच्च पुरमागताः।।95।।
अथ दशरथो राजा भरताय नृपश्रियम्।
दत्वा सर्वहितस्यास्य पार्श्वे गतो जनैर्वृतः।।96।।
द्वासप्ततिनृपैः सार्द्धं दीक्षां जग्राह धीरधीः।
मोहपाशं क्रमोच्छित्वा भ्रमति विषयान् बहून्।।97।।
दीक्षिते भर्त्तरि तस्मिन् विदेशं च गते सुते।
परं सुमित्रया साकं शोकं भेजेऽपराजिता।।98।।
ते दृष्ट्वा दुःखिते गाढमजस्त्रं साऽश्रुलोचने।
भरतस्य श्रियं मेने भरतोऽसौ विषोपमम्।।99।।[26]
अथैवं दुःखमापन्ने भृशन्ते वीक्ष्य केकया।
पश्चादुत्पन्नकारुण्यान्पुत्रमेवमभाषते ।।100।।
पुत्रराज्यं त्वया लब्धं प्रणताऽखिलराजकम्।
पद्मलक्ष्मणनिर्मुक्तमलमेतन्न शोभते ।।101।।
राजपुत्र्या समं बालौ क्व तौ यातौ सुखेधितौ।
विमुक्तवाहनौ मार्गे पाषाणादिभिराकुले।।102।।
मातरौ दुःखिते एते तयोर्गुणसमुद्रयोः।
विरहे मापतां मृत्युमजस्रपरिदेवने ।।103।।

तस्मादानय तौ क्षिप्रं समं ताभ्यां महासुखम्।
सुचिरं पालय क्षोणीमेवं सर्वं विराजते।।104।।
व्रज तावत्त्वमारुह्य तुरङ्गं जातरंहसम्।
आव्रज्याम्यहमेषाऽपि सुपुत्राऽनुपदं तव।।105।।
इत्युक्तो धृतिमासाद्य साध्वेवमिति सत्वरः।
सम्भ्रान्तोश्च सहश्रेण भरतस्तत्पथंश्रितः।।106।।
कृत्वा पुरस्सरान् पद्म पार्श्वात्प्रत्यागतान्नरान्।
पवनाश्वसमारूढः स ययौ भृशमुत्सुकः।।107।।
सम्प्राप्तस्तामरण्यानीमनेकपकुलाकुलाम्।
नाना वृक्षावृतादित्यां गिरिगह्वरभीषणाम्।।108।।
बांधयित्वा महावृक्षैरुडुपानां[27] सुसंहती।
तां धुनीमुत्तताराऽसौ[28] क्षणेन सहवाहनः।।109।।
दूतो दृष्ट्वावितो दृष्टौ पुरुषौ सहयोषितौ।
इति पृच्छन्स शृण्वंश्च जगामानन्यमानसः।।110।।
अथेतौ परमारण्ये विश्रान्तौ सरसस्तटे।
ससीतौ भरतोऽपश्यत्पार्श्वन्यस्त शरासनौ।।111।।
प्रभूतदिवसं प्राप्तं ताभ्यां सीताव्यपेक्षया।
षड्भिर्दिनैस्तमुद्देशं भरतः प्रतिपन्नवान्।।112।।
अवतीर्य तुरङ्गाच्च मार्गं लोचनगोचरम्।
गत्वा पद्भ्यां समाश्लिष्य पादौ पद्मस्य मूर्च्छितः।।113।।
ततो विबोधितस्तेन कृत्वा सम्भाषणं क्रमात्।
मूर्द्धाञ्जलिर्जगादेवं पद्मं विनत[29]विग्रहः।।114।।
विडम्बनमिदं कस्मान्नाथ मे भवता कृतम्।
परं राज्योपदेशेन न्यायसर्वस्व कोविदा।।15।।
आस्तां तावदिदं राज्यं जीवितेनापि किं मम।
भवता विप्रयुक्तस्य गुरुचेष्टितकारिणा।।116।।

उत्तिष्ठ स्वपुरं यामः प्रसादं कुरु मे प्रभो।
राज्यं पालय निश्शेषं यच्छ मेति सुखासिकाम्।।117।।
भवामि छत्रधारस्ते शत्रुघ्नश्चामराश्रितः।
लक्ष्मणः परमो मन्त्री सर्वं सुविहितं ननु।।118।।
पश्चात्तापानलेनालं सन्तप्ता जननी मम।
तव लक्ष्मीधरस्याऽपि वर्तते शोककारिणी।।119।।
ब्रवीत्येवमसौ यावत्केकया तावदागता।
वेगिनं रथमारुह्य सामन्तशतमध्यगा।।120।।
दृष्ट्वा परमशोकेन निर्भरीकृतमानसा।
हाकारमुखरा चैतावालिङ्ग्य रुदिता चिरम्।।121।।
ततोऽस्तु सरितच्छेदे विप्रलापेति खेदिता।
क्रमात्सम्भाषणं कृत्वा केकयैवमाभाषत्।।122।।
पुत्रोत्तिष्ठ पुरं यामः कुरु राज्यं सहानुजः।
ननु त्वया विहीनं मे सकलं विपिनायते।।123।।
भरतः शिक्षणीयोऽयं तवात्यन्तमनीषिणः।
स्त्रैणेन नष्टबुद्धेर्मे क्षमस्व दुरनुष्ठितम्।।124।।
ततः पद्मो जगादेवं किं न वेत्सि त्वमम्बिके।
क्षत्रिया ननु कुर्वन्ति सकृत्कार्यमनन्यथा।।125।।
उक्तं तातेन यत्सत्यं तत्कर्त्तव्यं त्वया मया[30]।
भरतेन च दुष्कीर्तिर्माभूदस्य जगत्त्रये।।126।।
पुनश्चोवाच भरतं भ्रातर्मा गाद्विभित्तमाम्।
शङ्कसे यद्यनाचारान्नाऽयं मदनुमोदनात्।।127।।
इत्युक्त्वा पुनरप्यस्य पद्मो राज्याऽभिषेचनम्।
चकार कानने रम्ये समक्षं सर्वभूभृताम्।।128।।
प्रणम्य केकयां सान्त्व सम्भाष्य च पुनः पुनः।
भ्रातरं च परिष्वज्य प्राहिणोत्सोऽतिकृच्छ्तः।।129।।

तौ विधाय यथायोग्यमुपचारं ससीतयोः।
रामलक्ष्मणयोर्जातौ मातापुत्रौ[31] यथागतम्।।130।।
परिध्वस्ता[32]ऽखिलाभ्रेषं सर्वप्रकृतिसौख्यदम्।
चकार भरतो राज्यं प्रजासु जनकोपमः।।131।।
राज्ये तथाविधेऽप्यस्य धृतिर्नाऽभूदपि क्षणम्।
दुस्सहं दधमानस्य शोकशल्यं मनस्विनः।।132।।
त्रिकालामरनाथस्य पूजां करोति चोत्तमाम्।
ययौ श्रोतुं च सद्धर्मं चैत्यमस्येयतीधृतिः।।133।।
तत्राचार्यो द्युतिर्नाम्ना स्वपरागमपारगः।
महता साधुसङ्घेन वर्तते भव्यबोधकः।।134।।
अग्रतोऽवग्रहं तस्य चकार भरतः सुधी।
पद्मदर्शनमात्रेण करिष्ये मुनितामिति।।135।।
कृत्वेति नियमं राजा जिनपूजापुरस्सरम्।
कृत्वा दानं गृहे योगी भूत्वा तिष्ठति सद्मनि।।136।।
पञ्चाशदधिकानाञ्च नारीणां शतमध्यगः।
रेमेऽसौ सततं गेहे पद्मेषु भ्रमरो यथा।।137।।
धृत्वाज्ञां रामदेवस्य प्रजासु सततं सुखी।
शत्रुघ्नेन समं राज्यं करोति भरतेश्वरः।।138।।
धर्मेण राज्यं सततं च सौख्यं
धर्मेण पूजां लभते मनुष्यः।
धर्मेण शीलं व्रतयुक्तसारं
धर्मं कुरुध्वं सकलाः सुभव्याः।।139।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
रामस्य वनवासः दशरथस्य दीक्षाग्रहणं भरतस्य राज्यवर्णनो नाम षोडशमोऽधिकारः।।16।।

❖❖❖

1. माम् इति ख प्रतौ
2. एवमश्र चुचं इति ख प्रतौ
3. कृतानति इति ख प्रतौ, कृतानपि इति ग प्रतौ
4. यथैव इति ख प्रतौ
5. किमप्याकृत इति ख प्रतौ
6. शक्तस्यापि क्रिया इति ख/ग प्रतौ
7. योऽति इति क प्रतौ
8. नभे इति ख प्रतौ
11. काले इति क प्रतौ
    कोत इति ख प्रतौ
10. वृद्धं इति क प्रतौ
11. गृहागमे इति ख प्रतौ
12. भव्यकेशरी इति क/ख प्रतौ।
13. यावस्तपोधिकारे ते इति ख प्रतौ
14. भूतलस्य स इति क प्रतौ, भूतलः स्मृता इति ख प्रतौ,
15. आत्रूर्णां इति ख प्रतौ,लक्ष्मणो इति ग प्रतौ, स तूर्णं प. पु. 2/31/165
16. अन्वमागा इति त्रयौ प्रतौ उपलभ्यते,अम्ब मा गाद् प.पु. 2/31/171
    अर्थदृष्ट्या इत्येवं पाठः स्यात्।
17. तातः इति ख प्रतौ
18. भवति इति ख/ग प्रतौ
19. एषा पङ्क्ति ग प्रतौ अनुपलभ्यते।
20. एषा पङ्क्ति ग प्रतौ अनुपलभ्यते।
21. मन्दिर इति क/ग प्रतौ
22. परमन्यावेदिना इति ख प्रतौ
23. पैलोभी इति ग प्रतौ
24. जातु जायते इति ख प्रतौ
25. जन गुरु परस्पराम् इति ख/ग प्रतौ
26. एषः श्लोकः ख प्रतौ अनुपलभ्यते।
27. रुद्रपानां इति ख/ग प्रतौ।
28. धुनीमुकृतारासौ इति ख प्रतौ
29. नमित इति क प्रतौ
30. मम इति ख प्रतौ
31. मात्रापुत्रौ इति क/ख प्रतौ।
32. अरिध्वस्त इति क प्रतौ

❖❖❖

सप्तदशमोऽधिकारः

भीमाख्येऽथ वने पद्मः सम्प्राप्तस्तापसाश्रमम्।
ततस्तैः पूजितो भक्त्या प्रेमनिर्भरमानसैः।।1।।
कतिपयदिनांस्तत्र[1] स्थित्वाऽसौ निर्गतः पुनः।
तापसैर्बहुधा[2] तत्र रक्षितोऽपि न संस्थितः।।2।।
तेषूक्तेषु पुनः कोपं[3] प्राप्तः श्रीरघुनन्दनः।
विकारः तापसेष्वेवं चित्रकूटवनङ्गतः।।3।।
व्याघुट्य तापसाः सर्वे स्वाश्रमं शोकिनो गताः।
सीतारूपं स्मरन्त्येते व्याकुला मुग्धमानसाः।।4।।
चित्रकूटवनमध्ये रेमे रामो निरन्तरम्।
सीतया सहितस्तोषाल्लक्ष्मणेन समं परम्।।5।।
नानावृक्षसमूहेषु नानापुष्पान्वितेषु च[4]।
मृगाणां वृन्दमध्येषु रेमाते रामलक्ष्मणौ।।6।।
सुगन्धिवनपुष्पैश्च कस्तुरि[5]मुखलेपनैः।
पायसैर्वनगोदुग्धैस्तन्दुलैश्च वनोद्भवैः।।7।।
वनफलैरसौघैश्च[6] सारैश्च निर्झरोदकैः[7]।
सन्तुष्टा वनमध्यस्थाः पक्षोनमासपञ्चकम्।।8।।
निर्गतास्ते पुनस्तस्माद्देशं दशमुखं गताः।
तत्र क्षेत्राणि पश्यन्ति पुण्ड्रेक्ष्वादि[8]भृतानि वै।।9।।
गोधूमयवशालीनां राशयश्च पदे पदे।
नगराणि च रम्यानि भूषितानि जिनगृहे[9]।।10।।
तथा मनुष्यमात्रञ्च दृश्यते हि न च क्वचित्।
तदा जगाद पद्माभो लक्ष्मणं बान्धवं प्रति।।11।।
दृश्यते किं न मानुष्यः[10] पश्य लक्ष्मण ! दूरतः।
गच्छत्यागच्छति कोऽपि तस्मै पृच्छस्व बुद्धिमान्[11]।।12।।
इत्युक्त्वा च मृदुस्पर्शे धिषिणो रत्नकम्बले।
उपविष्टश्च पद्मोऽसौ प्रीतितः सह सीतया।।13।।

वृक्षमारुह्य[12] संपश्यल्लक्ष्मणो दूरतस्तदा।
आगच्छन्तं नरं चैकं कर्पटादिविवर्जितम्॥14॥
ततस्तं च करो[13] धृत्वा चानीतो रामसन्निधिम्।
रामाय नमनं कृत्वा समाविष्टः स मानुषः॥15॥
रामोऽपृच्छत्ततस्तस्मै कस्त्वं चाऽप्यागतः कुतः।
सोऽवोचद्दूरतः स्थानादागतोऽहं प्रभो परम्॥16॥
शिरगुप्तिश्च मे नाम जातितोऽहं कुटुम्बिकः[14]।
सदा दुःखी महापापी वस्त्रभूषणवर्जितः॥17॥
पुनर्जगाद पद्माभो भद्र कस्मादियं मही।
मनुष्यैरहिता जाता उद्वसाकर्षणैर्युता[15]॥18॥
तदाहत्र[16] शृणु राजन् देशे दशपुरे परे।
वज्रकर्णो नृपः पापी मिथ्यादृष्टिश्च[17] हिंसकः॥19॥
एकदा परिवर्गैः संयुक्तो[18] गतो महावने।
शिलातले स्थितं तत्र मुनिं ध्यानपरायणम्॥20॥
शान्तिमूर्तिं क्षमायुक्तं श्रुतसागरपारगम्।
दृष्ट्वा प्रोवाच राजा तमश्वारूढश्च गर्वतः॥21॥
कस्मात्त्वं कुरुषे ध्यानं कस्माद्देहस्य शोषणम्।
जीवो नास्ति शिवो नास्ति नास्ति स्वर्गादिसम्भवः॥22॥
ततो जगाद योगीन्द्रश्चास्ति[19] जीवो निरञ्जनः।
वह्निरस्ति यथा काष्ठे जीवोऽस्ति व्यापकस्तथा॥23॥
प्रत्यक्षज्ञानतः स्वर्गो भूतादिरूपदर्शनात्।
यतः स्वर्गस्ततो मोक्षोऽनुमानादिति निश्चितः॥24॥
तस्माद्यः कुरुते पुण्यं तस्य स्वर्गादिसम्भवः।
यः करोति तपः घोरं स व्रजेच्छिवसद्मनि॥25॥
यश्च करोति हिंसादिपातकं जीवबाधकम्।
स व्रजेन्नरकं घोरं महादुःखस्य कारणम्॥26॥

तस्मात्त्वं कुरु भो राजन् सत्यं धर्मदयापरम्।
सारं पालय सम्यक्त्वं संसाराब्धिसुतारकम्।।27।।
ततोऽश्वादवतीर्याऽसौ नत्वा च मुनिपादयोः।
श्रावकस्य व्रतान्यत्र जग्राह स नरेश्वरः।।28।।
जिनदेवञ्च नैर्ग्रन्थ्यं मुक्त्वाऽन्यस्मै गुरुं कदा।
नमाम्यहं न चेत्युक्तां प्रतिज्ञां कृतवान्नृपः।।29।।
प्रीतिवर्द्धननामानं मुनिं नत्वा गृहङ्गतः।
तदा प्रभृति पात्रेभ्यः करोति दानमुत्तमम्।।30।।
व्रतशीलेषु सम्पन्नो दयावान् क्षमयान्वितः।
कृत्वा श्रीजिनबिम्बं तु मुद्रिकायां समर्चति[20]।।31।।
उज्जयिनीपुरीस्वामी[21] सिंहोदराभिधानकः।
तस्य सेवां सदा राजा करोति वज्रकर्णकः।।32।।[22]
एकदोज्जयिनीं गत्वा सिंहोदरं महानृपम्।
मायया स नतिं कृत्वाङ्गुष्ठस्थं श्रीजिनं नतः[23]।।33।।
पुनः समागतो भूपो दशपुराभिधं[24] पुरम्।
दुर्जनेन तदैकेन सिंहोदराय जल्पितम्।।34।।
तुभ्यं न नमते राजन् वज्रकर्णः स गर्ववान्।
मुद्रिकास्थं जिनाकारं नमति भक्तिपूर्वकम्[25]।।35।।
सिंहोदरस्ततः प्राह महाक्रोधेन पूरितः।
कपटं तस्य पश्यामि मारयामि च पापिनम्।।36।।
माययाह्वय यच्चैनं दशाङ्गनगरस्थितम्[26]।
वधार्थमुद्यतो मानी सिंहोदरः स्वसम्पदा।।37।।
वज्रकर्णो नरेशस्तु प्रगुणेनैव चेतसा।
प्रवृतोऽश्वशतेनाऽस्य[27] विनीतो गन्तुमुद्यतः।।38।।
दण्डपाणिर्युवा चैकस्तदागत्य नृपं प्रति।
कुङ्कुमच्छाय उश्वासैः[28] पूर्णो नत्वैवमुक्तवान्।।39।।

यदि भोगशरीराभ्यां सुनिर्विण्णोऽसि पार्थिवः।
तत उज्जयिनीं गच्छेन्नोचेन्नो गन्तुमर्हसि[29]।।40।।
क्रुद्धो सिंहोदरो यत्ते वधं कर्तुं समुद्यतः।
अनमस्कारदोषेण कुरु राजन्नभीप्सितम्[30]।।41।।
इति तद्वचनं[31] श्रुत्वा किञ्चित्खेदमुपागतः।
सोऽपृच्छत्कोऽसि किं नामा कुतो वासि समागतः[32]।।42।।
कथं वा[33] तव मन्त्रोऽयं विदितोऽत्यन्तदुर्गमः।
एतद्भद्र समाचक्ष्व ज्ञातुमिच्छाम्यशेषतः।।43।।
सोऽवोचत् कुन्दपुरेऽस्ति वणिक्धनपरायणः।
समुद्रसङ्गमो[34] नामा यमुना तस्य भामिनी।।44।।
विद्युज्ज्वालाकुले काले प्रसूता जननी च माम्।
बन्धुभिर्विद्युदङ्गाख्या मयि तेन नियोजिता।।45।।
क्रमाच्च यौवनं विभ्रदवन्तिनगरीमिमाम्।
आगतोऽस्म्यर्थलाभाय युक्तोऽहं बहुसम्पदा।।46।।
वैश्यां कामलतां दृष्ट्वा कामबाणेन ताडितो।
न रात्रौ न दिवा यामि निर्वृत्तिं परमाकुलः।।47।।
एकां रात्रिं वसामीति तया कृतसमागमः।
प्रीत्या दृढतरं बद्धो यथा वागुरया मृगः।।48।।
जनकेन ममाऽसङ्ख्यैर्यदब्दैरर्जितं[35] धनम्।
तन्मयाऽस्य कुपुत्रेण षड्भिर्मासैर्विनाशितं[36]।।49।।
अन्यदा सा पुरः सख्या निन्दन्ती कुण्डलं निजम्।
श्रुता मयेति भारेण किं कर्णस्याऽमुना मम।।50।।
धन्या सा श्रीधरा देवी महासौभाग्यभाविनी[37]।
यस्यास्तद्राजते कर्णे मनोज्ञं रत्नकुण्डलम्।।51।।
चिन्तितञ्च मया तच्चेदपहृत्या सुकुण्डलम्।
आशां[38] न पूरयाम्यस्यास्तदा किं जीवितेन मे।।52।।

ततो जिहीर्षया[39] तस्य दयितां[40] प्रोह्य जीवितम्।
गतोऽहं भवनं राज्ञो रजन्यां तमसावृतः ।।53।।
पृच्छन्ती श्रीधरा तत्र मया सिंहोदरं श्रुता।
निद्रां न लभसे कस्मान्नाथोद्विग्नः इवाऽधुना ।।54।।
सोऽवोचद्देवि निद्रा मे कुतो व्याकुलचेतसः।
न मारितो रिपुर्यावन्नमस्कारपराङ्मुखः ।।55।।
निहन्ताऽस्मि[41] न चेदैनं नमस्कारपराङ्मुखम्।
वज्रकर्णं ततः किं मे जीवितेन हतौजसः ।।56।।
ततोऽहं कुलिशेनैव[42] हृदये कृतताडनः।
रहस्यरत्नमादाय त्यक्त्वा कुण्डलशेमुषीम् ।।57।।
धर्मोद्यतमनस्कस्य[43] सततं साधुसेविनः।
भवतोऽन्तिकमायातो ज्ञात्वा कुरु निवर्त्तनम् ।।58।।
नागैरञ्जनशैलाभैः प्रक्षरद्गण्डभित्तिभिः।
सप्तिभिश्च महावेगैर्भटैश्च कवचावृतैः ।।59।।
तदा ज्ञापनया मार्गो निरुद्धोऽयं पुरोऽखिलः।
सामन्तैः परमं क्रूरैर्भवन्तं हन्तुमुद्यतैः ।।60।।
प्रसादं कुरु गच्छाशु प्रतीपं धर्मवत्सल।
पतामि पादयोरेष तव मद्वचनं[44] कुरु ।।61।।
अथ प्रत्येषितो राजन् ततः पश्य तदागतम्।
धूलिपटलसञ्छन्नं परचक्रं महारवम् ।।62।।
तावत्परागतं दृष्ट्वा साधनं कुलिशश्रवाः।
समेतो विद्युदङ्गेन निर्वृत्तो वेगिवाहनः[45] ।।63।।
प्रविश्य च पुरं दुर्गं सुधीरः प्रत्यवस्थितः।
विधाय वञ्चितारोधं सामन्तश्चाव्यवस्थिरे ।।64।।
प्रविष्टं नगरं श्रुत्वा वज्रकर्णं[46] रुषा ज्वलन्।
सिहोंदरः समायातः सर्वसाधनसंयुतः ।।65।।

पुरस्यात्यन्तदुर्गत्वात्साधनक्षयकातरः ।
न स तद्ग्रहणे[47] बुद्धिं चकार सहसा नृपः ।।66।।
समावास्य[48] समीपे च त्वरितं प्राहिणोन्नरम्।
वज्रकर्णं स गत्वेति बभ्राणाऽत्यन्तनिष्ठुरम्।।67।।
जिनशासन[49]गर्वेण सदावष्टब्धमानसः[50] ।
ऐश्वर्यकण्टकस्त्वं मे जातः सद्भाववर्जितः।।68।।
कुटुम्बभेदने दक्षैः[51] श्रमणैर्दुर्विचेष्टितैः ।
प्रोत्साहितो गतोऽस्येतामवस्थां नयवर्जितः।।69।।
भुङ्क्षे देशं मया दत्तमर्हतञ्च नमस्यसि।
अहो ते परमा माया जातेऽयं दुष्टचेतसः।।70।।
आगच्छाशु[52] ममाभ्यासं प्रणामं कुरु सन्मतिः।
अन्यथा पश्य जातोऽसि मृत्युना सह सङ्गमम्[53]।।71।।
ततस्तद्वचनात् गत्वा दूतोऽवददिदं पुनः।
एवं वज्रश्रुतिर्नाथ ब्रुवति[54] कृतनिश्चयः।।72।।
नगरं साधनं कोशं गृहाण विषयं विभो।
धर्मद्वारं सभार्यस्य यच्छ मे केवलस्य वा।।73।।
कृता मया प्रतिज्ञेयं मुञ्चाम्येनां मृतोऽपि न।
द्रविणस्य भवान् स्वामी शरीरस्य[55] तु नो मम।।74।।
इत्युक्तोऽप्यपरित्यक्तः क्रोधः सिंहोदरः पुरः।
कृत्वा रोषमिमं[56] देशमुदवासयदुज्ज्वलम्।।75।।
इदं ते कथितं देव देशोद्वासनकारणम्।
गच्छामि[57] साम्प्रतं शून्यग्रामधान्यमितोऽन्तिकम्।।76।।
तस्मिन्विमानतुल्येषु दह्यमाने षुसद्मसु ।
मदीया दुःकुटी दग्धा तृणकाष्ठविनिर्मिता।।77।।
तत्र गोपायितं सूर्पं[58] घटं पिठरमेव च।
आनयामि कुगेहिन्या प्रेरितः क्रूरवाक्यया।।78।।

अथवात्यन्तमेवेदं तया मे जनितं हितम्।
देव कोऽपि भवान् दृष्टो मया येन सुकर्मणा।।79।।

इत्युक्ते करुणाश्लिष्टः पथिकं वीक्ष्य दुःखितम्।
पद्मोऽस्मै रत्नसंयुक्तं[59] ददौ काञ्चनसूत्रिकम्।।80।।

प्रीतितः प्रणिपत्यासौ तदादाय[60] त्वराऽन्विताम्।
प्रतियातो निजं धाम बभूव च नृपोपमः।।81।।

रामोऽपि निर्गतस्तस्मात्सीतालक्ष्मणसंयुतः।
दशपुरबहिःस्थञ्च सम्प्राप्तः श्रीजिनालयम्।।82।।

चन्द्रनाथं जिनं नत्वा शालायां[61] राघवः स्थितः।
स्वयं पाकविधिं नेतुं लक्ष्मणोऽसौ गतः पुरम्।।83।।

तदाऽसौ वज्रकर्णेन पृष्टः[62] कुतः समागतः।
सोऽवोचद्दूरदेशादागतोऽहं मम बान्धवः।।84।।

स्थितोऽस्ति बहिरुद्याने एकाकी भार्ययाऽन्वितः।
आनयाम्यन्नमस्माद्भो तदर्थं भक्तितो भृशम्।।85।।

कुलिशश्रुतिना तस्मै दत्तमन्नं रसान्वितम्।
लक्ष्मणोऽसौ तदादाय रामस्यान्तिकमागतः।।86।।

सीतया संस्कृतं पाकं विधिना निर्मलं परम्।
भुक्त्वा तौ सुखिनौ जातौ ससीतौ रामलक्ष्मणौ।।87।।

ततो जगाद पद्माभः पश्य लक्ष्मण धर्मिणम्।
वज्रकर्णं महाराजं जैनवात्सल्यकारकम्[63]।।88।।

एनं रक्षाशु गत्वा त्वं सुकर्णं जैनबान्धवम्।
इत्युक्ते लक्ष्मणो वीरो निर्गतोऽसौ धनुर्द्धर।।89।।

सम्प्राप्तो लीलया वेगात्सिंहोदरसभास्थलम्।
सिंहोदरस्ततोऽवोचत् कस्त्वं कस्मात्समागतः।।90।।

ततो जगाद लक्ष्मीशो दूतोऽहं भरतस्य वै।
आगतस्त्वाञ्च सुबुद्धिं कथनाय हिताय च।।91।।

वज्रकर्णस्त्वया कस्मान्निरुद्धोऽस्ति निरर्थकम्।
जैनधर्मी[64] कृपायुक्तो दानपूजादितत्परः।।92।।
सिंहोदरस्ततः प्राह को दूतो भरतस्तु कः।
किं गर्जसि वृथा मूढ गर्वेणोद्धतमानसः।।93।।
मदाज्ञां रहितं दुष्टं वज्रकर्णं महद्रिपुम्।
मायाविनं नमस्कारवर्जितं मारयाम्यहम्।।94।।
केवलं वज्रकर्णं न त्वां भरतेन संयुतम्।
अन्यानपि सुकर्णस्य घ्नम्यहं पक्षवर्तिनः।।95।।
इत्युक्ते क्रोधभारेण प्रोत्थितो लक्ष्मणस्तदा।
स्तम्भान्निर्मूल्य नागानां मारयामास तद्भटान्।।96।।
कांश्चिद् बाणैर्द्रुमैः कांश्चिद् खड्गैः कांश्चिच्च वज्रकैः[65]।
ततः कलकलो जातो गजवाजिरथादिषु।।97।।
सिंहोदरो स्वयं योद्धोमुत्थितः सेनयाऽन्वितः।
बहुशस्त्रो गजारूढः सङ्गरे राक्षसोपमः।।98।।
लक्ष्मणेन तदा नागाद्धनुषात्पातितो भुवि।
बध्वा करद्वयं नीतो दुष्टोऽसौ पद्मसन्निधिम्।।99।।
अवोचल्लक्ष्मणो देव स दुष्टोऽयं समानितः[66]।
कुरु शुभमशुभं वा भवतां चेतसि स्थितम्।।100।।
ततः सिंहोदरो नत्वा रामपादाविदमवदन्।
वज्रकर्णाय भो देहि राज्यं मां मुञ्च धीरधीः।।101।।
अहं त्वत्पादसत्सेवां करिष्यामि सुभक्तितः।
राजराजः कृपेशस्त्वं ममोपरि दयां कुरु[67]।।102।।
तस्य स्त्रीभिश्च धृत्वा तच्चरणौ रामसीतयोः[68]।
देहि भो राघवास्मभ्यं भर्तृदानं सुप्रीतितः।।103।।
प्राह सिंहोदरं पद्मो विनयानतमस्तकम्।
वज्रकर्णश्च यत्प्रोचे तत्कुरु त्वं हि सर्वथा।।104।।

ततो गत्वा नरैर्वेगादाहूतो वज्रकर्णकः।
सोऽप्यत्र विद्युदङ्गेन जिनालयं समं गतः।।105।।
त्रिःपरीत्य जिनं नत्वा वज्रकर्णो नरेश्वरः।
रामस्य सन्निधिं प्राप्तः पृष्टवान् कुशलादिकम्।।106।।
रामो जगाद ते क्षेमादस्माकं क्षेम वर्त्तते।
धन्योऽसि त्वं महाधैर्यो जिनभक्तिपरायणः।।107।।
अन्यं नरं जिनं मुक्ता नमितो न दृढ़त्वतः[69]।
मुक्तिरामा तवैकस्य वशीभवेच्च नान्यथा।।108।।
वज्रकर्णस्ततः प्राह तं नत्वा विनयान्वितः।
सफलो नियमो देव ! ममाऽभूत् त्वत्प्रसादतः।।109।।
लक्ष्मणेन तदा प्रोक्ता रामाग्रे भूरि तद्गुणाः।
रामस्तुष्टस्तदा प्राह किञ्चिद्याचस्व भो नृप।।110।।
वज्रकर्णस्ततः प्राहास्ति सर्वं कृपया तव।
मुञ्चाऽधुना च मद्भूपं सिंहोदरं हि राघव।।111।।
श्रुत्वेति लक्ष्मणेनासौ सिंहोदरः प्रमोचितः।
तयोश्चालिङ्गनं प्रीतिः सङ्कृता सिंहकर्णयोः।।112।।
अर्द्धं भवन्ति साम्राज्यं गजरथादिवाजिनम्।
अर्द्धभागेन तत्सर्वं वज्रकर्णाय चार्पितम्।।113।।
विघ्नहतप्रसादेन तां वेश्यां तच्च कुण्डलम्।
लेभे सेनाधिपत्यञ्च विद्युदङ्गः सुविश्रुतः।।114।।
लक्ष्मणाय ततः प्रीत्या वज्रकर्णेन कन्यकाः।
अष्टौ दत्वा परं भक्त्या पूजितौ रामलक्ष्मणौ।।115।।
सिंहोदरादिभिर्भूपै लक्ष्मणाय सुहर्षतः।
दत्ताः शतत्रयं कन्याः रूपलावण्यभूषणाः।।116।।
ततस्तान् प्राह लक्ष्मीशो यावन्मे नास्ति चास्पदम्।
तावद् गृह्णामि नार्यो न पदबन्धनकारणाः[70]।।117।।

पद्माभोऽपि तदेवाह स्थानं कृत्वाब्धिसन्निधिम्।
कन्यावृन्दञ्च लक्ष्मीशः सम्प्रीत्या परिणेष्यति।।118।।[71]

एवमस्त्विति तैरुक्तं चन्द्रप्रभजिनालये।
कतिपयदिनांस्ताभ्यां समं स्थिताश्च ते नृपाः।।119।।[72]

एकदाथ निशाकाले तेषामज्ञातनिर्गतो।
ससीतौ चैत्यगेहात्तौ शनैर्गच्छद्विनोदिनैः।।120।।

नलकच्छपुरं प्राप्तौ क्रमाद्बहिर्वनस्थलम्।
उपविष्टोऽत्र पद्माभः कम्बले सीतया समम्।।121।।

जलं नेतुं कियद्दूरं सरसि लक्ष्मणो गतः।
तदाऽत्र तत्पुराधीशो रूपलावण्यभूषितः।।122।।

नाम्ना कल्याणमालाऽसौ[73] गच्छति स्वजनैर्वृतः।
गजारूढो रथैरश्वैर्भृत्यैर्युक्तः स्वलीलया।।123।।

तदा स लक्ष्मणं दृष्ट्वा सरस्तीरे सुलक्षणम्।
मनसि व्याकुलो जातः कामबाणेन पीडितः।।124।।

नीलोत्पलेन लक्ष्मीशं स राजाऽत्र प्रताडयन्।
नरमेकं ततः प्राह चैनमानीयतामिति[74]।।125।।

स गत्वा देव मे नाथस्त्वामाकारयति द्रुतम्।
तच्छ्रुत्वा लक्ष्मणो वीरश्चागतोऽतिकुतूहलात्।।126।।

अवतीर्य गजात्सोऽपि करे धृत्वाऽथ लक्ष्मणम्।
शनैर्वस्त्रगृहे तावत्सम्प्राप्तः सरसस्तटे।।127।।

एकासने समाविष्टौ सस्नेहौ तौ परस्परम्।
प्राह कल्याणमालाऽसौ कस्त्वं कस्मात्समागतः।।128।।

सोऽवोचद्विप्रयोगान्मे ज्येष्ठो दुःखेन तिष्ठति।
तावन्नयामि तस्यान्नं कथिष्यामि च ते ततः।।129।।

ततः शाल्योदनः सूप उपदंशानवं घृतम्।
आपूपाद्यां भवं धान्यं[75] व्यञ्जनानि पयोदधि।।130।।

वस्त्राभरणमाल्यानि लेपनप्रभृतीनि[76] च ।
अमत्राणि च चित्राणि तैलं मार्जनकानि च[77] ।।131 ।।
सर्वमेतत्समासन्नं पुरुषैः सुमहाजवैः ।
भाविनानायितं[78] तेन जनेनान्तिकमात्मनः ।।132 ।।
अन्तरङ्गः प्रतीहारो नृपस्य वचनात्ततः ।
गत्वा सीतान्वितं पद्मं प्रणम्यैवमभाषत ।।133 ।।
अमुष्मिन् वस्त्रगेहे हि भ्राता ते देव तिष्ठति ।
एतन्नगरनाथश्च विज्ञापयति सादरम्[79] ।।134 ।।
प्रसादं कुरु तच्छाया शीतलेयं मनोहरा ।
तस्मादियं तमध्वानं चेत्त्वया गन्तुमर्हथ ।।135 ।।
इत्युक्ते सीतया सार्द्धं ज्योत्स्नयेव निशाकरः ।
पद्मः समाययौ विभ्रन्मत्तद्विरदविभ्रमम् ।।136 ।।
दूरादेव समालोक्य लक्ष्मणेन समं ततः ।
अभ्युत्थानञ्चकारास्य जनः प्रत्युद्गतिं तथा ।।137 ।।
सीतया सहितस्तस्थौ पद्मोऽत्यन्तवरासने ।
अर्घदानानि सन्मानं प्राप्तश्च जनकल्पितम् ।।138 ।।
ततः कर्माणि निर्वृत्यैस्वैरं स्नानाशनादिकैः ।
समुत्सार्याखिलं लोकमात्मानीतस्तुरीयताम् ।।139 ।।
दूतः पितुः सकाशान्मे प्राप्त इत्युपदेशतः ।
प्रयत्न परमं कक्ष्यां प्रविश्याऽनन्यगोचरम् ।।140 ।।
नाना प्रहरणान् वीरान्नियुज्य द्वारि भूयसः ।
प्रविष्टो योऽत्र वध्यो हि ममेति कृतभाषणम् ।।141 ।।
सद्भावज्ञापने लज्जां दूरीकृत्य सुमानसः ।
व्यापारयदसौ तेषां समक्षं कञ्चुकीजनः ।।142 ।।
स्वर्गादिव ततः प्राप्ता काऽप्यसौ वरकन्यका ।
उपयातेव पातालात्[80]किञ्चिल्लज्जानतानना ।।143 ।।

तातोऽसौ सहसा मुक्ता नररूपा सुलोचना।
ढौकिता जानकी तेन रतिं श्रीरिव लज्जया।।144।।

अन्तरे[81] लक्ष्मणस्तत्र परिष्वक्तो मनो भुवा।
अवस्थां कामपि प्राप्तश्चलमंथरलोचनः।।145।।

ततो विशुद्ध्या बुद्ध्या पद्मस्तामित्यभाषत।
दधाना विविधं वेषं का[82] त्वं क्रीडसि कन्यके।।146।।

ततोऽन्शुकेन संवीयगात्रं प्रवरभाषिणी।
जगाद देव! वृतान्तं श्रृणु सद्भाववेदिनम्।।147।।

बालिखिल्य[83] इति ख्यातः पुरस्यास्य पतिः सुधीः।
सदाचारपरो नित्यं मुनिवल्लोकवत्सलः।।148।।

पृथिवीति प्रिया तस्य गर्भाधानमुपागता।
म्लेच्छाधिपतिना चाऽसौ गृहीतः संयुगे नृपः।।149।।

उक्तञ्च स्वामिना तस्य सिंहोदरमहीभृता।
पुत्रश्चेद् भविता गर्भे कर्ता राज्यमसाविति।।150।।

ततोऽहं पापिनी जाता मन्त्रिणा वसुबुद्धिना।
सिंहोदराय पोस्तेन[84] कथिता राज्यकांक्षया।।151।।

नीता कल्याणमालाख्या जनन्या रहितार्थकाम्।
प्रायो माङ्गलिके लोको व्यवहारे प्रवर्तते।।152।।

मन्त्री माता च मे वेत्ति कन्येयमिति नापरः।
इयन्तं कालमधुना भवन्तः पुण्यवीक्षिताः।।153।।

दुःखं तिष्ठति मे तातः[85] प्राप्तश्चारकवासिताम्।
सिंहोदरोऽपि नो शक्तस्तस्य कर्तुं विमोचनम्।।154।।

यदत्र द्रविणं किञ्चिद्देशे समुपजायते।
तन्म्लेच्छस्वामिने सर्वं प्रेष्यते दुर्गमीयुषे।।155।।

वियोग[86]वह्निनाऽभ्यन्तं तप्यमाना ममाम्बिका।
जाता कलावशेषेव चन्द्रमूर्तिर्गतप्रभा।।156।।

इत्युक्त्वा दुःखभारेण पीड़िताऽशेषगात्रिका।
सद्यो विछायतां प्राप्ता मुक्तकण्ठं रुरोद सा।।157।।

अत्यन्तमधुरैर्वाक्यैः पद्मेनाश्वासिता ततः।
सीतया च निधायाङ्के कुर्वन्त्या मुखधावनम्।।158।।

सुमित्रासूनुना चोक्ता शुचं विसृज सुन्दरि।
कुरु राज्यमनेनैव वेषेणोचित्तकारिणी।।159।।

शुभे कांश्चित्प्रतीक्षस्व दिवसान् धैर्यसङ्गतान्।
म्लेच्छेन ग्रहणं किं मे पितरं पश्य मोचितम्।।160।।

तत्र ते कानने रम्ये विचित्रालापविभ्रमाः।
देवा इव सुखं तस्थुः स्वच्छन्दा दिवसत्रयम्।।161।।

ततः सुप्तजने काले रजन्यां रामलक्ष्मणौ।
ससीतौ रन्ध्रमाश्रित्य निष्क्रान्तौ काननालयात्।।162।।

विबुध्य तानपश्यन्ती कन्या व्याकुलमानसा।
हाकारमुखराशोकं परमं समुपागता।।163।।

कृच्छान्नियम्य शोकञ्च वरवारणवर्तिनी[87]।
प्रविश्य स्वपुरं तस्थौ पूर्ववद्दीनमानसा।।164।।

ततः कल्याणमालाया रूपेण विनयेन च।
हृतचित्ताः क्रमेणैते प्रापुर्मेखलनिम्नगाम्।।165।।

उत्तीर्य विहितक्रीडास्तां सुखेन मनोहरान्[88]।
बहून् देशान्नतिक्रम्य प्राप्ता विन्ध्यामहाटवीम्।।166।।

स्कन्धावीरमहासार्थ[89] परिक्षुणेन[90] वर्त्मना।
प्रयान्तः पथिकैर्गोपैः कीनाशैश्च निवारितः।।167।।

अनिमित्तं ततो दृष्ट्वा सीतयापि निवारिताः।
तथाऽप्यग्रे च गच्छन्तौ म्लेच्छसैन्यमपश्यतः।।168।।

कार्मुकञ्च करे कृत्वा गच्छन्तौ रामलक्ष्मणौ।
दृष्ट्वा म्लेच्छा गताःक्वापि कृत्वा शीघ्रं पलायनम्।।169।।

अवगत्य ततस्तस्मात् सन्नह्यान्ये समागताः।
प्रावृट् मेघसमानेन तेऽपि हासेन निर्जिताः ।।170।।
ततस्तेऽत्यन्तवित्रस्ता म्लेच्छाः पतितकार्मुकाः।
कुर्वन्तं परमारावं गत्वा पत्ये निवेदयत् ।।171।।
ततोऽसौ परमं क्रोधं वहंश्चापञ्च दारुणम्।
निर्जगाम महासैन्यः शस्त्रसन्तमसावृत्तः ।।172।।
काकोनदा इति ख्याता म्लेच्छास्ते धरणीतले।
दारुणाः सर्वमांसादौ दुर्जयाः पार्थिवैरपि ।।173।।
तैरावृतां दिशां प्रेक्ष्य पुरो वनकुलाशितैः।
धनुरारोपयत्किञ्चित्कोपं लक्ष्मीधरोऽभजत् ।।174।।
तथा चास्फालितं सर्व[91] वनमा कम्पितं यथा।
ज्वरश्च वनसत्वानां जज्ञे प्रकटवेपथुः ।।175।।
संदधानं शरं वीक्ष्य लक्ष्मणं त्रस्तचेतसः।
बभ्रमुश्चकतां प्राप्ता म्लेच्छा निश्चक्षुषो यथा।।176।।[92]
ततः साध्वससम्पूर्णो म्लेच्छानामधिपो भृशम्।
अवतीर्य रथादेतौ प्रणम्य रचिताञ्जलिः ।।177।।[93]
अब्रवीदस्ति कौशाम्बीनगरी प्रथिता बभूः।
अहित्याग्नि[94]र्द्विजस्तत्र नाम्ना विश्वानलः शुचिः।।178।।
प्रतिबंध्येति[95] तज्जाया जातोऽहं तनयस्तयोः।
रौद्रभूतिरिति ख्यातः शस्त्रद्यूत[96]कलाऽन्वितः ।।179।।
बाल्यात्प्रभृतिः दुष्कर्मनित्याऽनुष्ठानकोविदः।
प्राप्तश्चौर्ये कदाचिच्च शूले भेत्तुमभीप्सितः ।।180।।
धनिनैकेन तत्राहं श्रद्दधानेन साधुना।
मोचितो वेपमानाङ्गस्त्यक्त्व देशमिहागतः ।।181।।
प्राप्तः कर्मानुभावेन काकोनदजनेशताम्।
भ्रष्टस्तिष्ठामि सद्वृत्या पशुभिः समताङ्गतः ।।182।।

इयन्तं यस्य मे कालं सैनाढ्या अपि पार्थिवाः।
चक्षुषोर्गोचरीभावमासन् शक्ता न सेवितुम्[97]।।183।।

सोऽहं दर्शनमात्रेण कृतो देवेन विक्लवः।
धन्योऽस्मि वीक्षितौ येन भवन्तौ पुरुषोत्तमौ।।184।।

शासनं यच्छतां नाथौ किं करोमि यथोचितम्।
शिरसा पादुके[98] किं वा वहे पावनपण्डिते।।185।।

विन्ध्योऽयं[99] निधिभिः पूर्णो वरयोषिच्छतैस्तथा।
भुजिष्यमिच्छन्तं[100] देवौ नानाजातिभृत्तं परम्।।186।।

इत्युक्त्वा प्रणतिं[101] कुर्वन् पुनरर्तिपरां गतः।
पपात विह्वलो[102] भूमौ छिन्नमूलतरुर्यथा।।187।।

कष्टावस्थां ततः प्राप्तं तमेवं राघवोऽवदत्।
उत्तिष्ठ कुरु मा भैषीर्बालिखिल्यं निबन्धनम्।।188।।

तस्यैवाभिमतो भूत्वा सचिवः सज्जनान्वितः।
विहाय सङ्गतिं म्लेच्छैर्विषयस्य हितोऽभवत्।।189।।

एवं प्रभो करोमीति कृत्वा प्रणतिमादृतः।
महारथेन तं[103] गत्वा मुमोच विनयान्वितः।।190।।

अभ्यङ्गोद्वर्त्तनस्नानं भोजयित्वा स्खलङ्कृतम्।
आरोप्य स्यन्दनं तं च प्रेषितस्तु तदन्तिकम्।।191।।

पतितोऽसौ तयोः पादौ बालिखिल्यो नरेश्वरः।
ततो गुणांस्तयोश्चैव स्तुतवान् भक्तिपूर्वकम्।।192।।

ततो रामाज्ञया वेगाद्[104] गतोऽसौ निजवेश्मनि।
अमात्यादिभिरागत्य स्थापितो भूभृतां पदे।।193।।

सचिवो रुद्रभूतिस्तु जातस्तस्यैव भूभृतः।
नृपाः सिंहोदराद्याश्च श्रुत्वा तुष्टाः स्वचेतसि।।194।।

गच्छन्तौ लीलया चाथ ससीतौ रामलक्ष्मणौ।
खानदेशञ्च सम्प्राप्तौ यत्र तापी महानदी।।195।।

आगता वरुणग्रामे कपिलाख्य द्विजगृहे।
शालायामुपविष्टौ तौ सीतया सह हर्षतः।।196।।
भार्यया कपिलस्यैव सीतायै चार्पितं जलम्।
गालितं किं न वा नीरं पृष्टा सा सीतया तदा।।197।।
कपिलोऽत्रान्तरे वेगाद्दर्भभारसमन्वितः।
कमण्डलुशिखासूत्रमण्डितो ह्यागतो वनात्।।198।।
कः पृच्छति जलशुद्धिमज्ञानी शास्त्रवर्जितः।
निर्घाट्यतां मम गेहादिति दुष्टो वचोऽब्रवीत्।।199।।
तच्छ्रुत्वा लक्ष्मणोऽवोचत् मारयाम्येनं द्विजम्[105]।
आस्फाल्य चरणे[106] धृत्वा शिलायां बलिहेतवे।।200।।
ततो जगाद पद्माभ एवं मा ब्रूषि[107] लक्ष्मण।
भिक्षुको ब्राह्मणो दीनो न मार्यते हि सद्भटैः।।201।।
तस्मादुत्तिष्ठ गच्छामो वने सुनन्दनोपमे।
इत्युक्त्वा सीतया सार्द्धं गतौ[108] तस्माद्वनं च तौ।।202।।
वृष्टिर्जाता तदा तत्र शीतला सुसुखप्रदा।
पीत्वा ते तज्जलं जाताः सुखिनः तृषयार्दिताः।।203।।
रात्रौ[109] वटद्रुमस्याऽधः सुप्तास्ते सुखनिद्रया।
वटयक्षस्तदा तत्र तान्[110] दृष्ट्वा तुष्टवान् परम्।।204।।
गत्वा यक्षश्च विंध्याद्रौ जगाद नगपं सुरम्।
देव चागत्य मद्गेहे सुप्ताः सन्ति त्रिमानवाः।।205।।
तच्छ्रुत्वा स स्वभार्याभिः सहितोऽत्र समागतः।
तान् दृष्ट्वा स्वाऽवधिज्ञानात् ज्ञातौ तौ बलकेशवौ।।206।।
ततस्तदनुभावेन वात्सल्येन च भूयसा।
क्षणेन नगरी तेषां तेन रम्या विनिर्मिता।।207।।
ततस्ते सुखसम्पन्नाः सुप्ता किल सु चारुणाः।
प्रभातगीतशब्देन प्रबोधं समुपागताः[111]।।208।।

तल्पेऽवस्थितमात्मानमपश्यद्रत्नराजिते ।
प्रासादञ्च[112] महारम्यं बहूभूमिकमुज्ज्वलम् ।।209।।
देहोपकरणव्यग्रं परिवर्गञ्च सादरम् ।
नगरञ्च महासद्म[113]शालगोपुरशोभितम् ।।210।।
तेषां महानुभावानां दृष्टेऽस्मिन् सहसा पुरे।
न मनो विस्मयं प्राप तद्धि क्षुद्रविचेष्टितम् ।।211।।
अशेषवस्तुसम्पन्नास्तत्र ते चारुचेष्टिताः ।
अवस्थानं सुखं चक्रुरमरा इव भोगिनः ।।212।।
यक्षाधिपेन रामस्य यस्मात्प्रकल्पिता[114] पुरी।
ततो महीतले ख्यातिं गता रामपुरीति सा ।।213।।
प्रतीहारभटाः शूरा अमात्याः सप्तयो गजाः[115]।
पौराश्च विविधास्तस्यामयोध्यायामिवाभवत् ।।214।।
एकदा कपिलः सोऽपि समिधार्थं समागतः।
तद्वने नगरं दृष्ट्वा साश्चर्याभूतमानसः ।।215।।
कांश्चित्स्त्रियं पृच्छति स्म का पुरी कोऽत्रभूपतिः।
सोचे रामपुरीयञ्च रामश्चाऽस्या नरेश्वरः ।।216।।
निर्मलं जैनपात्रेभ्यो दानं ददाति चेप्सितं[116] ।
सेवको जिननाथस्य जैनपात्रस्य भक्तकः ।।217।।
बान्धवो[117] लक्ष्मणो यस्य सीताख्या यस्य वल्लभा।
विमानसदृशं गेहं राजते यस्य सून्नतम् ।।218।।
जैनं विहाय चान्येषां न प्रवेशोऽस्ति भो द्विज।
देवाधिष्ठितपत्नेऽस्मिन् जैनमार्गप्रर्वतनम्[118] ।।219।।
लब्धोपायञ्च तच्छ्रुत्वा द्रव्यलाभस्य[119] तन्मुखात्।
विनम्य पादयोस्तस्या वनमध्ये गतो द्विजः ।।220।।
चारित्रभूषणं नत्वा गुरुं पप्रच्छ धर्मधीः ।
धर्मं श्रीजिननाथोक्तं सर्वजीवदयापरम् ।।221।।

मुनिना सद्व्रतं तस्मै चोपदिष्टं सविस्तरम्।
सम्यक्त्वपूर्वकं सर्वं सद्धर्मो जिनभाषितः।।222।।
एतच्छ्रुत्वा मुनिं नत्वा जैनो भूत्वा स सद्व्रती।
स्वगेहमागतो भार्यां स्वसमं कृतवान् द्विजः।।223।।
ततोऽसौ भार्यया सार्द्धं रामपुरीं समागतः।
जैनोऽहमिति सम्प्रोच्य प्रविष्टो[120] जिनवेश्मनि।।224।।
सामायिकक्रियां कृत्वा स रामस्यान्तिकङ्गतः।
पठनशास्त्राणि जैनस्य नमस्कारपुरस्सरम्।।225।।
सिंहासनं समासीनं सीतालक्ष्मणसंयुतम्।
रामं दृष्ट्वा च तं ज्ञात्वा मूर्च्छां प्राप्तो भयातुरः।।226।।
लक्ष्मणेनाऽथ तन्मूर्च्छा दूरीकृतोपचारतः।
तदा द्विजेन पूर्वस्य वृतान्तः कथितो मुदा।।227।।
सम्यक्दृष्टी च भव्योऽयं रामेण ज्ञातवान् द्विजः।
सद्व्रती च सदाचारी जैनमार्गप्रभावकः।।228।।
तस्मै दत्तं बहुद्रव्यं तल्लब्ध्वा स्वगृहं गतः।
द्रव्येण तद्गृहे सर्वे सञ्जाता विभवास्ततः।।229।।
तं दृष्ट्वा सज्जना जैना जातास्तस्योपदेशतः।
तेऽपि रामस्य सामीप्यं गता हर्षेण पूरिताः।।230।।
दत्तं रामेण तेभ्योऽपि द्रव्यं ते सुखताङ्गताः।
कदाचित्कपिलो विप्रो वैराग्यादभवद्यतिः।।231।।
तपः घोरतरं कृत्वा शिवं प्राप्तः सुखास्पदम्।
भार्या तस्य गता स्वर्गं जैनधर्मप्रभावतः।।232।।

संसारार्णवतारणाय सततं धर्मो जिनैर्भाषितः
सोऽपि जीवसमूहरक्षणतया जायेत भव्यात्मनाम्।
धर्माद्राज्यपरम्परात्र लभते स्वर्गोऽपि धर्मोद्भवेत्
धर्मं भो भज भूपमोक्षपददं जैनं सदा निर्मलम्।।233।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते वज्रकर्णस्योपसर्गनिवारण–
बालिखिल्यबन्धमोक्षं कपिलमोक्षगमनरामपुरीनिवासवर्णनो नाम सप्तदशमोऽधिकारः।।17।।

1. कतिपयदिनास्तत्र इति ख/ग प्रतौ।
2. तदा तामसै.... इति पाठ ख प्रतौ
3. कौपं इति क प्रतौ
4. नाना पुष्पलतादिषु इति ख प्रतौ, भाति पुष्पलतादिषु इति ग प्रतौ
5. किस्तुरि इति क प्रतौ, कस्तूरि इति ग प्रतौ
6. वनफलरसाढौश्च इति ख/ग प्रतौ
7. सारैश्चनिभर्जरोद्दकैः इति क प्रतौ
8. पुण्ढ्रेक्ष्वादि इति ख प्रतौ
9. जिनगृहैः इति क प्रतौ
10. मानुष्यं इति ख प्रतौ
11. बुद्धिमात् ख/ग प्रतौ
12. वृक्षमांरुह्य इति ग प्रतौ
13. करे इति क/ख प्रतौ
14. कुटम्बिकः इति त्रयौ प्रतौ, कुटुम्बिकः इति पद्मपुराणे द्वितीयभागे 33/73
15. उर्च्छ्वसाकर्षणैर्युता इति ग प्रतौ
16. तदात्र इति क प्रतौ
17. मिथ्यादृष्टी च इति क/ख प्रतौ
18. परिवर्गेण युक्तौ इति ग प्रतौ
19. योगीन्द्राश्चास्ति इति ग प्रतौ।
20. समेर्चयत् इति ग प्रतौ
21. स्वामिन् इति ग प्रतौ
22. एषः श्लोकः ख प्रतौ अनुपलभ्यते।
23. श्रीजिनं ततः इति ग प्रतौ
24. दधपुराभिधं इति ख प्रतौ
25. भक्तिपूर्वकः इति ख प्रतौ
26. दशनगरसंस्थितम् इति ख प्रतौ
27. प्रवृतोस्यश्च तेनास्य इति ख प्रतौ
28. कंकुमच्छाय उच्छ्वासौ इति ग प्रतौ
29. गन्तुमह्वसि इति ग प्रतौ
30. राजामभीप्सितम् इति ग प्रतौ
31. तं गदितं इति ख/ग प्रतौ
32. बन्धवत् इति ग प्रतौ
33. पुरे कथञ्च इति ग प्रतौ
34. समुद्रसागरो इति ग प्रतौ

35. ममासंङ्ख्यैयदध्वैरर्जितं इति ख प्रतौ
36. षड्विद्या सेविनाशितः इति ख प्रतौ, यदर्थासौ विनाशितः इति ग प्रतौ
37. सौभाग्यभागिनी इति ग प्रतौ
38. आसां इति त्रयौ प्रतौ, आशां इति इति पद्मपुराणे द्वितीयभागे 33/152
39. जीहीर्षया इति क/ख प्रतौ, विजीषया इति ग प्रतौ, जिहीर्षया इति इति पद्मपुराणे द्वितीयभागे 33/153
40. दयितां इति त्रयौ प्रतौ, दयितं इति इति पद्मपुराणे द्वितीयभागे 33/153
41. निहतास्मि इति ख प्रतौ
42. कुशले नेव इति ग प्रतौ
43. नमस्कस्य इति ग प्रतौ, नस्कस्य इति ख प्रतौ
44. मद्वचनै इति ग प्रतौ
45. वेगवाहनः इति क/ख प्रतौ।
46. वचः कर्णं इति ग प्रतौ
47. तद्ग्राहसौ इति ग प्रतौ
48. सेनावास्य इति क प्रतौ
49. निनाशासन इति ख प्रतौ
50. सर्वदा स्तब्धमानसः इति क प्रतौ, सर्वदाष्टध्वमानसः इति ख प्रतौ
51. कुटुम्बभेदक्षैः इति ख प्रतौ
52. आगत्वाश्रु इति ख प्रतौ
53. सङ्गतः इति ख प्रतौ, सङ्गतम् इति ग प्रतौ
54. ब्रूवन्ति इति ग प्रतौ
55. शरणाद्र इति ग प्रतौ
56. रोधमिमं इति ख/ग प्रतौ
57. गव्यामि इति ख प्रतौ
58. श्रूर्प्पं इति क प्रतौ
59. पद्मस्मै दुःखसंयुक्तं इति ख प्रतौ
60. तदाय इति ख प्रतौ
61. शिलायां इति ग प्रतौ
62. एकाकी इति ग प्रतौ
63. कारणम् इति ख प्रतौ
64. जिनधर्मी इति ख प्रतौ
65. कांश्चिद्काभित्तिवज्रकैः इति ग प्रतौ
66. समान्वितः इति ख प्रतौ
67. दयां कृत्वा ममोपरि इति ख प्रतौ
68. रामलक्ष्मणसीतयोः इति ग प्रतौ

69. नमितो दृढतत्वत: इति ख प्रतौ
70. पदबन्धनकारणं इति क/ग प्रतौ।
71. एषः श्लोकः ग प्रतौ नास्ति।
72. एषः श्लोकः ग प्रतौ नास्ति।
73. कल्याणमालोसौ इति क प्रतौ
74. चैनमानीय भो मिति इति ख प्रतौ
75. आपूपाथं भबंध्यानि इति ख प्रतौ,
आपूपार्थानिचित्राणि इति ग प्रतौ, अपूपा घनबन्धानि इति पद्मपुराणे द्वितीयभागे 34/13
76. प्रभृतानि इति ख प्रतौ
77. मार्जिनकानि इति ग प्रतौ
78. भाविनानि यतं इति ख प्रतौ, भाविनापि वत्त इति ग प्रतौ
79. सादरम् इति क प्रतौ
80. उत्पपात तदा साऽपि इति क प्रतौ
81. अन्ते इति पद्मपुराणे द्वितीयभागे 34/36
82. विविधं वंसं क्क इति ख प्रतौ
83. वालिलिष्य इति क प्रतौ, वालिलिल इति ख/ग प्रतौ, बालिखिल्य इति पद्मपुराणे द्वितीयभागे 34/39
84. यौस्तेन इति क/ख प्रतौ, पौंस्नेन इति इति पद्मपुराणे द्वितीयभागे 34/42
85. नाथ: इति ख प्रतौ
86. व्ययोग इति क प्रतौ
87. बरबारणवर्तिना इति ख प्रतौ
88. मनोहरं इति क/ग प्रतौ, मनोहरां इति ख प्रतौ, मनोहरान् इति इति पद्मपुराणे द्वितीयभागे 34/59
89. स्कन्धावीरहासार्थ इति ख प्रतौ, स्कन्धचारमहासार्थ इति ग प्रतौ
90. परिक्षणेन इति ग प्रतौ
91. जन इति ग प्रतौ
92. ग प्रतौ क्रमभङ्गो विद्यते।
93. ग प्रतौ क्रमभङ्गो विद्यते
94. आदित्याग्नि इति ख/ग इति प्रतौ
95. प्रतिसंध्येति इति पद्मपुराणे द्वितीयभागे 34/78
96. शस्त्रदूत इति ख प्रतौ
97. गोचरीभावमांसाशक्ताम शेवितुं इति ग प्रतौ।
98. पादुक: इति ख/ग प्रतौ
99. व्यन्ध्योयं इति क/ग प्रतौ, व्यंधोयं इति ख प्रतौ उपलभ्यते परन्तु वन्ध्योऽयं इति पाठः स्यात्।
100. भुजिष्यामि छतां इति ग प्रतौ

101. प्रणितिं इति क प्रतौ, प्रणतं इति ग प्रतौ
102. विह्वलौ इति ग प्रतौ
103. महारथसुतं इति पद्मपुराणे द्वितीयभागे 34/91
104. वेगादतो इति ख प्रतौ
105. मारयाम्येन गद्विजम् इति ख प्रतौ, मारयाम्येन मेद्विजम् इति ग प्रतौ
106. चरणं इति ग प्रतौ
107. ब्रूहिषि इति ग प्रतौ
108. गतो इति ख प्रतौ
109. तत्र इति ग प्रतौ
110. तत्रागतान् इति ग प्रतौ
111. समुपागतः इति ग प्रतौ
112. प्रसादं इति ग प्रतौ
113. महासप्त इति ग प्रतौ
114. प्रकल्पिते इति ग प्रतौ
115. समदा गजाः इति क प्रतौ, सप्तजोगजाः इति ग प्रतौ
116. ददाति चेप्सितं धनम् इति ख प्रतौ
117. बन्धवो इति ख/ग प्रतौ
118. प्रवर्तिनि इति क/ख प्रतौ
119. द्रव्यालाभ इति ग प्रतौ
120. विप्रो यविष्टो इति ग प्रतौ
121. बालिलीला बंधमोक्षण इति क/ख प्रतौ।

❖❖❖

अष्टादशमोऽधिकारः

चतुर्मासेऽथ वातीते विद्युदभ्रादिविह्वरे[1]।
रामगन्तुं समुद्युक्तं दृष्ट्वा यक्षोऽवदत्परम्।।1।।
क्षन्तव्यं देव किञ्चिच्चाविनया[2] दुःकृतं मया।
भवादृशां नराणाञ्च कः शक्नोतीह सेवितुम्।।2।।
ततो जगाद रामोऽपि नम्रीभूतं सुराधिपम्।
यदपराधमस्माकं तत्क्षन्तव्यं त्वयासुरः।।3।।
इति वचनमाकर्ण्य[3] सन्तुष्टो यक्षनायकः।
नत्वा स्तुत्वा च तं रामं पूजति स्म सुभक्तितः।।4।।
स्वयंप्रभाभिधं हारं ददौ रामाय संमुदा[4]।
कुण्डले लक्ष्मणायादात्[5] शशिसूर्यसमप्रभे।।5।।
चूडामणिञ्च सीतायै सुकल्याणाभिधं ददौ।
महाविनोददक्षाञ्च[6] वीणामीप्सितनादिनीम्।।6।।
यक्षाधिपञ्च संतोष्य निर्गतौ रामलक्ष्मणौ।
यक्षोऽपि नगरं मायां विसर्ज्य स्थानकङ्गतः।।7।।
बहुदेशां समुल्लङ्घ्य व्याघ्रसिंहादिसंभृतान्।
क्रीडन्तौ विविधां क्रीडां व्याघ्रसिंहगजादिभिः।।8।।
विजयाख्यपुरं प्राप्तौ नगरस्य बहिर्वने।
नागालये स्थितौ रात्रौ रत्नकम्बलसंस्थरे।।9।।
शालायां तस्य संसुप्तौ चान्धकारैः समावृतौ।
मार्गागमपरिश्रान्तौ सुखिनौ बलिकेशवौ।।10।।
अथात्र नगरे राजा प्रसिद्धः पृथिवीधरः।
इन्द्राणी महिषी तस्य योषिद्गुणसमन्विता[7]।।11।।
तनया वनमालेति तयोरत्यन्तसुन्दरी।
बाल्यात्प्रभृति सा रक्ता लक्ष्मणस्य गुणश्रुतेः।।12।।
श्रुत्वाऽनरण्यपुत्रस्य प्रव्रज्या समये वचः।
रक्षितुं लक्ष्मणोपेतं गतं रामं क्वचिद्वनम्।।13।।

ध्यात्वेणेन्द्रपुरेशस्य[8] बालमित्राय सूनवे ।
सुन्दरायातियोग्याय पितृभ्यां सा निरूपिता ।।14।।
तञ्च विज्ञाय वृतान्तं हृदयस्थितलक्ष्मणा ।
विरहाद्भयमापन्ना चिन्तामेवमुपागता ।।15।।
अंशुकेन वरं कण्ठं विचेष्ट्यासज्य पादपे[9] ।
मृत्युं प्राप्तास्मि नान्येन पुरुषेण समागमम् ।।16।।
इति सञ्चिन्त्य सा बाला गतेऽस्तं तिग्मतेजसि ।
सोपवासा समासाद्य पितृभ्यामनुमोदनम् ।।17।।
प्रवरं रथमारुह्य सखीजनसमावृता ।
जगाम परमया लक्ष्म्या[10] वनदेवीं किलार्चितम् ।।18।।
यस्यां रात्रौ वनोद्देशे यत्र ते प्रथमं स्थिताः ।
तस्यामेव तमेवैषा गता दैवनियोगतः ।।19।।
आरण्यदेवतापूजा तस्मिन् किल विनिर्मिता[11] ।
सुप्तश्च सकलो लोको निराशंकः कृतक्रियः ।।20।।
निश्शब्दपदनिक्षेपात्ततो वनमृगीव सा ।
निष्क्रम्य शिविरात्तस्मात्प्रतस्थे भयवर्जिता ।।21।।
ततस्तस्या समाग्राह्यं गन्धं परमसौरभम् ।
प्रोत्थितो लक्ष्मणो वीरो किमिदमिति संस्मरन् ।।22।।
ज्योतिरेखेव काप्येषा मूर्त्तिरत्रोपलक्ष्यते ।
कुमार्या श्रेष्ठ्या भाव्यमनया कुलजातया ।।23।।
महता शोकभारेण परिपीडितमानसा ।
अपश्यन्ती परं दुःखवारणोपाय[12]मुन्मुना ।।24।।
अयातचिन्तिता[13] नूनमेषात्मानं जिघांसति ।
पश्यामि तावदेतस्याश्चेष्टामन्तर्हितोऽभवत् ।।25।।
इति सञ्चिन्त्य निश्शब्दो भूत्वा वटतरोरधः ।
तस्थौ कल्पद्रुमस्येव त्रिदशः कौतुकान्वितः ।।26।।

तमेव पादपं साऽपि प्राप्ता हंसवधूगतिः।
नतैव स्तनभारेण[14] चन्द्रवक्त्रा तनूदरी।।27।।[15]

लक्ष्मणस्तां तथाभूतां दृष्ट्वाऽचिन्तयदुक्तिभिः।
वेद्मि तावदिमां सम्यक् कुतः कृत्यं भविष्यति।।28।।

अंशुकेनाऽम्बुवर्णेन कृत्वा पाशं तु कन्यका।
जगादैवं गिरा योगि[16] मनोहरणयोग्यया।।29।।

एतत्तरुनिवासिन्यः शृणुताहो सुदेवताः।
भवतीभ्यो नमाम्येषा प्रसादं क्रियतां मयि।।30।।

वाच्यो मद्वचनादेवं भवन्तीभिः प्रयत्नतः[17]।
कुमारो लक्ष्मणो दृष्ट्वा वनेऽस्मिन् विचरन् ध्रुवम्।।31।।

यथा त्वद्विरहे बाला वनमाला सुदुःखिता।
त्वयि मानसमारोप्य प्रेतलोकमुपागता।।32।।

अंशुकेन समालम्ब्य स्वं सा[18] न्यग्रोधपादपे।
त्वन्निमित्तमसून्तन्वी त्यजंत्यस्माभिरीक्षिता[19]।।33।।

एवमुक्तं त्वया[20] नाथ यदि मे नात्र जन्मनि।
समागमः कृतोऽन्यत्र प्रसादं कर्तुमर्हसि।।34।।

एवं न्यग्रोधशाखायां[21] समर्पयति पाशकम्।
सम्भ्रान्तश्च समालिङ्ग्य सौमित्रिरिदमब्रवीत्।।35।।

अयि मुग्धे सुकण्ठेऽस्मिन् मद्भुजालिङ्गनोचिते।
कस्मादंशुकपाशोऽयं त्वया सुमुखि सज्यते[22]।।36।।

अहं स लक्ष्मणो मुञ्च पाशं परमसुन्दरी।
यथाश्रुतं निरीक्षस्व न चेत्प्रेक्षसि[23] बालके।।37।।

इत्युक्ता पाशमेतस्याः करोसान्त्वनकोविदः[24]।
जहार लक्ष्मणः फेनपुञ्जतामरसादिव।।38।।

ततोऽसौ त्रपया युक्ता दृष्ट्वा मन्थरचक्षुषा।
लक्ष्मणं नेत्रचौरेण रूपेण परिलक्षितम्।।39।।

परं विस्मयमापन्ना चिन्तामेवमुपागता।
ईदृग्वेपथुना युक्ता नवसङ्गमजन्मना।।40।।
किमयं वनदेवीभिः प्रसादो[25] जनितो मम।
कारुण्यं मम जाताभिः सन्देशवचनैः पुनः।।41।।
सोऽयं यथाश्रुतो नाथः सम्प्राप्तो दैवयोगतः।
भवेद्येन मम प्राणाः प्रयान्तो विनिवारिताः।।42।।
इति सञ्चिन्तयन्ती सा किञ्चित्प्रस्वेदधारिणी।
लक्ष्मीधरसमाश्लेषं लब्धाऽत्यन्तमराजत।।43।।
ततो मृदुमहामोदकुसुमोदारसंस्तरे।
प्रबुद्धो राघवश्चक्षुर्ल्लक्ष्मणार्थमुदीरयत्।।44।।
अपश्यंश्च समुत्थाय पप्रच्छ जनकात्मजाम्।
प्रदेशे लक्ष्मणो देवि नैतस्मिन् दृश्यते कृतः।।45।।
प्रदोषे संस्तरं कृत्वा सोऽस्माकं पुष्पपल्लवैः।
आसीदनतिदूरस्थः[26] कुमारो ह्यत्र नेक्ष्यते।।46।।
नाथ वाह्वायतां[27] तावदिति तस्यां कृतध्वनौ।
क्रमादत्युच्चया[28] वाचा बलो व्याहृतवानिति।।47।।
एह्यागच्छ[29] क्वयातोऽसि भद्र लक्ष्मण बान्धव[30]।
प्रयच्छ वचनं तात त्वरितं बालका व्रज[31]।।48।।
अयमायामि देवेति[32] दत्वाऽस्मै संभ्रमी वचः।
वनमालासमेतोऽसौ जयेष्ठस्यान्तिकमागतः।।49।।
स वनमालया युक्तो रामस्य चरणौ नतः।
कथित्वा सर्ववृतान्तमुपविष्टो महीतले।।50।।
अथाऽतो वनमालायाः प्रबुद्धाऽसौ सखीजनः।
क्व गता वनमालेति ध्वनिं कृत्वा रुरोदति[33]।।51।।
तच्छ्रुत्वा सुभटाः सर्वे धावमाना दशो दिशि।
दृष्ट्वा लक्ष्मणसंयुक्ता शालायां समुपस्थिता।।52।।

तन्मुखात् ज्ञातवृतान्त भट्टा गत्वा नृपमवदत्[34]।
ततो महीधरो राजा भार्यया सममागतः[35]।।53।।

रामलक्ष्मणयोः पादौ नत्वा स्थितो महीधरः।
परस्परं तयोः प्रीतिः सञ्जाता परमावहा।।54।।

महीधरेण राज्ञा तौ विवाहविधिना तदा।
लक्ष्मणाय सुता दत्ता तत्रैव वरकानने[36]।।55।।

महासंभ्रमयुक्तास्ते गजारूढा नृपैर्वृताः।
प्रविश्य नगरं राज्ञा स्थापिता नृपमन्दिरे।।56।।

स वनमालया सार्द्धं भुक्त्वा भोगान् सुखंस्थितः।
रामोऽपि सीतया साकं कालं सुखेन नीयते।।57।।

अथैकदा सभामध्ये संस्थितः पृथिवीधरः।
रामलक्ष्मणसंयुक्तश्चाष्टपुत्रैः समन्वितः।।58।।

नन्द्यावर्तपुरा तत्र चागतो दूत उत्तमः।
विज्ञप्ति स्म नृपं नत्वा करयुग्मशिरस्थितः।।59।।

नन्द्यावर्तपुरस्वामी नाम्नातिवीर्यभूपतिः।
त्वामाह्वयति सम्प्रीत्या चतुर्बलसमन्वितम्।।60।।

महीधरस्ततोऽवोचत्तत्र किं मे प्रयोजनम्।
दूतो जगाद साकेतपुरेऽस्ति भरतः प्रभुः।।61।।

तं प्रति प्रेषितो दूतश्चातिवीर्येण गर्वतः।
ततो गत्वा च दूतेन भरताय निवेदितम्।।62।।

आज्ञापयत्यतिवीर्यो भवन्तं[37] नृपपुङ्गवः।
आगच्छ भज मे पादौ नोचेत्त्यज तवाश्रमम्।।63।।

एतच्छुत्वा च शत्रुघ्नः क्रोधेन दूतकुर्करम्।
ग्रामान्निर्घाटयामास संघृष्टा दुर्महीतले।।64।।

दूतो गत्वा ततो वेगादतिवीर्याय चोक्तवान्।
शत्रुघ्नेन कृतं यत्तत्स्वस्य प्राणप्रपीडनम्।।65।।

ततो राजातिवीर्योऽसौ क्रोधपूरितमानसः।
अङ्गबङ्गतिलङ्गानां[38] म्लेच्छानाञ्च नरेश्वरः।।66।।
स दशक्षोणिभिर्युक्तो निर्गतश्चातिवीर्यवाक्।
गजवाजिरथैर्भृत्यै र्महावाद्यसमन्वितैः।।67।।
तच्छ्रुत्वा भरतो गर्वी शत्रुघ्नेन समं तदा।
अवन्तिमिथिलादीनां पतिभिः सह निर्गतः।।68।।
नर्मदासरितस्तीरे दक्षिणोत्तरयोर्दिशोः।
उभयोर्वीरयोरस्ति स्थापितं बलमुत्तमम्।।69।।
शत्रुघ्नेन तदा रात्रौ स्वतिवीर्यस्य वाजिनाम्।
चतुःषष्टिसहस्राणि नीतानि चौरबुद्धिना।।70।।
अतिवीर्यस्ततः क्रोधो यत्र यत्र नरेश्वराः।
तांस्तानाह्वयितुं दूतान् प्रेषितवान् स्वगर्वतः।।71।।
भवद्भिरपि शीघ्रेणागन्तव्यं तत्र भो नृप।
पृथ्वीधराय चेत्युक्ता दूतः स्वस्थानकङ्गतः[39]।।72।।
लक्ष्मणं प्राह तच्छ्रुत्वा रामश्चिन्तातुरस्तदा।
किं कर्तव्यमहो वत्स कार्यं दुर्घटमागतम्।।73।।
अतिवीर्योऽतिवीर्योऽसौ बहुबलसमन्वितः।
भरतः स्वल्पसैन्योऽसौ[40] पराक्रमविवर्जितः।।74।।
भग्ने च भरतेऽस्माकं सुवंशल्लज्जनं[41] भवेत्।
आवयोः प्रकटं कर्तुं नैवात्र युज्यतेऽधुना।।75।।
गुप्तवृत्या ततोऽस्माभिः कर्त्तव्यं कार्यमुत्तमम्।
इति सञ्चिन्त्य ताभ्याञ्च महीधराय भाषितम्।।76।।
ततो महीधरो राजा कुमारैरष्टभिर्युतः।
गुप्तलक्ष्मणरामाभ्यां निर्गतः सेनयावृतः।।77।।
गत्वा तत्राऽतिवीर्यं तं दृष्ट्वा महीधरो नृपः।
क्वचित्स्थानं स्थितः प्रीत्या ससैन्यश्च तदाज्ञया।।78।।

ततस्तत्र समीपस्थं जिनेगहं मनोहरम् ।
दृष्ट्वा रामो गतस्तस्मिन् जिनपूजाञ्चकार सः ।।79।।
नत्वैवं वरधर्माया[42] आर्यिकायाश्च सन्निधिम् ।
श्वेतवस्त्रधरां सीतां स्थापितवांस्तदा मुदा ।।80।।[43]
नर्तकीरूपमादाय स्वयं रामः सलक्ष्मणः ।
करोति नर्तनं रम्यं जिनगेहेप्सरैः समम् ।।81।।[44]
तस्मान्निर्गत्य भूपानां वस्त्रभूते गृहे गृहे ।
चक्रेऽसौ नर्तनं रामः परं कपटवृत्तिभिः ।।82।।
केनचिदतिवीर्याय कथिता नर्तकी कथा ।
तेनाप्याकारिता प्रीत्या नर्तकीरूपभूषिता ।।83।।
तत्रागत्य महानृत्यं करोति लक्ष्मणान्वितः ।
गीत्वा गीतं जिनेन्द्राणां परमङ्गलकारिणाम् ।।84।।
ततो गायति सङ्गीतं भरतस्य बलीयसः ।
धन्यो दशरथो राजा यस्य वंशे समुद्भवः ।।85।।
भरतः सर्वभूपानां पालकोऽत्र महीतले ।
तच्छुत्वा कोपसम्प्राप्तमतिवीर्यं वचोऽवदत् ।।86।।
शृण्वतिवीर्य मे वार्ता रघुवंशशिरोमणिः ।
वर्तते भरतस्वामी तस्य सेवां सदा कुरु ।।87।।
यथा ते परमं श्रेयो भविष्यति न चाऽन्यथा ।
इति सङ्गीतकं रम्यं गायति रघुनन्दनः ।।88।।
एतच्छुत्वाऽतिकोपेनोत्थितोऽतिवीर्यभूपतिः ।
खड्गं धृत्वा करे शीघ्रं नर्तकीं हन्तुमुद्यतः ।।89।।
तदा लक्ष्मणवीरेण धृत्वा केशेष्वसौ नृपः ।
पश्चाद्भागे करौ बध्वा मुष्टिघातेन ताडित ।।90।।
खड्गमन्यानपि हन्तुं करे करोति लक्ष्मणः ।
तावद्भीताश्च पार्श्वस्थाः शेषास्ते राजपुङ्गवाः ।।91।।

वदन्ति ते किमुत्पातः स्वर्गवेश्यासमुद्भवः।
किं वा विद्याधरस्त्रीतो[45] भरतपुण्यतोऽभवत्।।92।।

भो नृपा अतिवीर्यस्य पक्षं त्यक्ता करिष्यथ।
भरताज्ञां यथा यूयं तदा मुञ्चामि नान्यथा।।93।।

नर्तकीवचनं श्रुत्वा भयं प्राप्ताश्च ते नृपाः।
भरतं सेवितुं वेगाद्गताश्च जीविताशया।।94।।

संगृह्यतोऽतिवीर्यं तं गजारूढः सलक्ष्मणः।
जिनगेहं गतो रामः शत्रुमर्दनहर्षतः।।95।।

अवतीर्य गजाद्रामः प्रविष्टो जिनवेश्मनि।
जिनं संपूज्य भक्त्या तां आर्यिकांश्च प्रपूजयत।।96।।

उपविष्टौ सभामध्ये मण्डपे सीतयान्वितौ।
पृथ्वीधरकुमारैश्च वेष्टितौ विभवैर्युतौ।।97।।

रामदेवस्ततोऽवोचल्लक्ष्मणं कृपयान्वितः।
केशबन्धादतिवीर्यं करे[46] शिथिलतां कुरु।।98।।

लक्ष्मणोऽसौ तथा चक्रे पुनराह स राघवः।
भोऽतिवीर्य कुतश्चिन्ता करोषि मानमर्दनात्।।99।।

भरताज्ञां शिरोदेशे धृत्वा सुखेन तिष्ट भो।
भुक्त्वा भोगान् स्वनारीभिः स्वर्गसन्निभवेश्मनि।।100।।

अतिवीर्यस्ततोऽवोचन्न भोगैर्मे प्रयोजनम्।
दीक्षां रम्यां ग्रहिष्यामि संसाराब्धिसुतारकाम्।।101।।

इत्युक्ता क्षमयित्वाऽसौ शत्रुमित्रं विरक्तधीः।
श्रुतसागरयोगीन्द्रं नत्वा मुनिरभून्नृपः।।102।।

विन्ध्याचलोपरिभागे करोति सन्तपो मुनिः।
रागद्वेषविनिर्मुक्तो धर्मध्यानपरायणः।।103।।

तनयमतिवीर्यस्य विजयरथसञ्ज्ञकम्।
राज्ये संस्थाप्य रामोऽपि तुष्टो मनसि संमदः।।104।।

विजयरथराजेन लक्ष्मणाय वरा स्वसा।
रतिमालाभिधा[47] दत्ता रूपाढ्या तुष्टचेतसा।।105।।

तां मुक्त्वा तत्र विवाह्य नत्वा जिनं गुरुं च तौ।
पृथ्वीधरेण संयुक्तौ वैजयन्तपुरङ्गतौ।।106।।

नर्तकी हेतुतः श्रुत्वा स्वतिवीर्यस्य दीक्षितम्।
हास्यं कुर्वंश्च शत्रुघ्नो भरतेन निवारितः।।107।।

विजयरथभूपोऽथ चतुरङ्गबलान्वित:[48]।
आगत्य भरत: पादौ प्रणम्य संस्थितो पुरः।।108।।

कनिष्ठां भगिनीं तस्मै नाम्ना विजयसुन्दरी।
भरतायै परां दत्वा सन्धिं कृतवान् स तदा।।109।।

भरतोऽपि ततो भक्त्यातिवीर्यमुनिसन्निधिम्।
गत्वा पादौ प्रणम्योच्चैर्ज्जगाद वचनं परम्।।110।।

क्षन्तव्यञ्च[49] त्वया देव यदस्ति मेऽपराधकम्।
त्वं धन्योऽसि यतः सद्यः मुक्तिकान्ता वशीकृता।।111।।

इत्यादि स्तवनैः स्तुत्वा भक्त्या युक्त्या च पूजितः।
पुनः पुनः मुनिर्नत्वा निवृतः स्वपुरं प्रति।।112।।

नन्द्यावर्तपुरे राज्ये संस्थाप्य विजयरथम्।
शत्रुघ्नं प्रमुखैर्युक्तो भरतः[50] स्वपुरङ्गतः।।113।।

सार्द्धं विजयसुन्दर्या भुक्त्वा भोगान् सुखप्रदान्।
करोति भरतो राज्यं पापकण्टकवर्जितम्।।114।।

कांश्चिच्च दिवसान् रामः स्थित्वा तु वैजये पुरे।
अग्रे प्रणायकं कर्तुं लक्ष्मणाय निवेदितम्।।115।।

ततो लक्ष्मीधरोऽवोचद्वनमालां वरां प्रियाम्।
देवि तिष्ठाऽत्र[51] गत्वाहमागमिष्यामि वेगतः।।116।।

वनमाला ततः प्राह देवोऽहं च त्वया समम्।
आगमिष्यामि ते भक्तिं करिष्यामि सुखप्रदाम्।।117।।

पुनराह सुमित्राजः[52] स्थानं कृत्वातिवेगतः।
त्वां नेतुमागमिष्यामि तावत्त्वं हि स्थिरीभव।।118।।

यत्पापं स्यान्निशाभुक्तौ कंदस्य भक्षितेऽथवा।
वाऽऽगालिते जले पीति[53] तत्पापं मे भविष्यति।।119।।

भो देवि यदि नेतुं त्वां नागमिष्याम्यहं तदा।
इत्यादि शपथै[54] रामां सन्तोष्य वनमालिकाम्।।120।।

निर्गतौ तौ निशाकाले ससीतौ रामलक्ष्मणौ।
गच्छन्तौ लीलया युक्तौ प्रेमनिर्भरमानसौ।।121।।

क्वचित्पक्षं क्वचिन्मासं क्वचिद्रात्रि क्वचिद्दिनम्।
मोहं तौ मेदनीं सर्वां रूपलावण्यभूषितौ।।122।।

तान् दृष्ट्वा पुरनार्योऽपि व्याकुलाः कामपीडिताः।
भ्रमन्त्यनुपदं तेषां ग्रामे पत्ने पुरेषु च।।123।।

क्रमात् क्षेमांजलीपत्नं प्राप्तौ तौ बलिकेशवौ।
ग्रामबहिर्वने भुक्त्वा भोजनं त[55] च संस्थिता।।124।।

तदा लक्ष्मीधरो वीरो नगरं द्रष्टुमीप्सया।
गतो रामाज्ञया धन्वी महाशृङ्गारभूषितः।।125।।

पुरं प्रविश्य लक्ष्मीशो महाकौतुकसंभ्रमी।
वीथीं यतस्ततोऽपश्यत्[56] रत्नपुञ्जैर्विराजिताम्।।126।।

यत्र तत्र जनाः स्थित्वा वार्तां कुर्वन्ति गुप्तितः।
तदैकं नरम[57] पृच्छल्लक्ष्मण चारुलक्षणः।।127।।[58]

कां भो वार्तां जनाः स्थित्वा कुर्वन्ति व्याकुलात्मकाः।
सोऽवोचदत्र राजाऽस्ति नाम्ना शत्रुदमः परः।।128।।[59]

हेमप्रभाख्या भार्याऽस्ति जितपद्मा तयोः सुता।
अतिरूपगुणैः ख्याता पद्मनेत्रा दृढस्तनी।।129।।

सा ख्याति नाऽस्ति लोकेऽस्मिन् पुरुषः पुरुषार्थकः।
नरं विपुरुषं[60] तस्मात्कदाचिन्न करोम्यहम्।।130।।

देवाऽधिष्टितशस्त्राणि सन्ति[61] पञ्चैव शक्तयः।
नृपास्याऽस्य गृहे रम्ये पारम्पर्या समागताः।।131।।
शत्रुदमैः प्रयोक्तां तां[62] शक्तिं यः सहते नरः।
भर्ताऽवश्यं समे भावी प्रतिज्ञेति तया कृता[63]।।132।।
शक्तिं कः सहते धीरः कस्य तस्याः प्रयोजनम्।
इति कुर्वन्ति ते वार्तां जनौघाः शृणु धीरधीः।।133।।
श्रुत्वेति लक्ष्मणः प्राप्तो विनोदान्नृपमन्दिरम्।
द्वारपालाज्ञया वीरस्ततो राजसभाङ्गतः।।134।।
दृष्ट्वा तमनमस्कारं[64] महासुन्दरविग्रहम्।
शत्रुदमस्ततोऽवोचत् कस्त्वं कस्मात्समागतः।।135।।
सोऽवोचद् भरतस्याऽहं भारवाहो नरोत्तमः।
तव पुत्र्या महागर्वं परिहर्तुं समागतः।।136।।
शत्रुदमस्तदाऽवोचच्छक्तिर्मुक्ता मया तु यः।
सहते स मम पुत्र्या[65] भर्ता स्यान्नान्यथा कदा।।137।।
ततो जगाद लक्ष्मीशः शक्त्या किमेकया तव।
पञ्चैवत्वं प्रयोगश्च तृणायन्ते च ता मयि[66]।।138।।
विवादो[67] वर्तते यावत्तावद् गवाक्षवर्त्मनि[68]।
पश्यन्ति राजभार्यास्ता जितपद्मादयस्तथा।।139।।
ततस्तीव्रप्रकोपेन शत्रुदमेन भूभृता।
शक्तिः संभ्राम्य हस्तेन प्रयोक्ता लक्ष्मणं प्रति।।140।।
लक्ष्मणेन विना कष्टं धृता दक्षिणपाणिना।
पुनः शत्रुदमेनापि प्रयोक्ता द्वितीया गदात्[69]।।141।।
साऽपि लक्ष्मणवीरेन वामहस्तेन संधृता।
तृतीयाऽपि ततः क्षिप्ता नृपेण तेन कोपिना।।142।।
धृता दक्षिण कुक्ष्या सा चतुर्थी च द्वितीयया।
पञ्चमी संधृता दन्तैः पञ्चदन्तो गजो यथा।।143।।

पुष्पवृष्टिस्ततो जाता देववृन्दा नभस्तलात्[70]।
तं दृष्ट्वा लज्जितो राजा शत्रुदमः पराक्रमी।।144।।
शत्रुदमस्ततोऽवोचन्न च केनाप्यहं जितः।
सोऽद्य त्वया जितः शक्त्या नास्ति लोकेऽत्र ते समम्।।145।।
तस्माद् वृणस्व मे पुत्रीं जितपद्मां गुणान्विताम्।
तदाऽह लक्ष्मणो भ्राता जानाति मे हिताऽहितम्[71]।।146।।
कुत्राऽस्ति वीर ते भ्राता तं पश्यामि सुभक्तितः।
इत्युक्त्वाऽरिदमो राजा निर्गतः सेनयावृतः।।147।।
लक्ष्मीधरो[72] गजारूढो गच्छति जितपद्मया।
रामो यत्राऽस्ति ते प्राप्ताः कानने सीतयान्वितः।।148।।
रामाऽरिदमयोस्तत्र जातं मेलापकं वने।
सस्नेहात् स्थिता सर्वे आह्लादितस्वमानसाः।।149।।[73]
क्षेमप्रश्नञ्च[74] संपृच्छ्य सन्तुष्टास्ते परस्परम्।
पुरे जाता कथा सर्वा शत्रुदमेन भाषिताः।।150।।
ततो महोत्सवैस्तत्र शत्रुदमेन निर्मितम्।
विवाहमङ्गलं रम्यं लक्ष्मणजितपद्मयोः।।151।।
समानीताः पुरे तेन रामादयो जनैर्वृताः।
स्थापिताः स्वालये भक्त्या पूजिता वस्त्रभूषणैः।।152।।
लक्ष्मणोऽथ तया सार्द्धं भोगान् भुनक्ति पुण्यतः।
सीतया सह रामोऽपि तिष्ठति सुखलीलया।।153।।
पुण्याद्भोगसुखं लभन्ति मनुजाः संसारमध्ये सदा
दुःखं व्याधिवियोगशोकसहितं पुण्यात्क्षयं जायते।
साम्राज्यं नृपराजसेवितपदं भूयात्प्रभुः पुण्यतस्-
तस्मात्त्वं भज स्वर्गराज्यसुखदं पुण्यं परं मङ्गलम्।।154।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
वनमालाविवाहाऽतिवीर्यमानभङ्गविजयसुन्दरीलाभजितपद्माजयवर्णनो नामाष्टादशमोऽधिकारः।।18।।

❖❖❖

1. गतेस्यभ्रादिविह्वरे इति ख/ग प्रतौ
2. देव किन्तुमयाज्ञानाद्विनया इति ग प्रतौ
3. इति तद्वचनमाकर्ण्य इति ग प्रतौ
4. संमदः इति ख/ग प्रतौ
5. लक्ष्मणाय द्वे इति ख/ग प्रतौ
6. महाविवेकददीक्षा इति ग प्रतौ
7. समन्वितः इति ख प्रतौ, समन्वितौ इति ग प्रतौ
8. ध्यात्वा इन्द्र पुरेशेन समन्वितः इति ग प्रतौ
9. स्तब्ध पादपे इति क प्रतौ, सृज्य पादपे इति ग प्रतौ
10. परया लक्ष्म्या इति ख प्रतौ
11. बलि विनिर्मितम् इति क प्रतौ
12. वारणाय इति ख प्रतौ
13. आयाति इति क/ग प्रतौ
14. सनभारेण इति ग प्रतौ
15. एषः श्लोकः इति ख प्रतौ अनुपलब्धः।
16. गिराव्योगी इति ग प्रतौ
17. श्रृणुतीभिः प्रजल्पितः इति ग प्रतौ
18. सं सा इति ख प्रतौ, हिं सा इति ग प्रतौ
19. त्यजन्त्यस्मान्निरीक्षता इति ग प्रतौ
20. तया इति क/ग प्रतौ
21. निगद्य इति क प्रतौ, निराद्य इति ख प्रतौ
22. सुमुचि सज्यते इति ख प्रतौ, सुमुचित सज्यते इति ग प्रतौ
23. प्रेषसि इति क/ग प्रतौ
24. करोशांत्वन कोविदः इति ख/ग प्रतौ, करात् सांत्वनकोविदः इति प. पु. 2/36 /34
25. प्रमादो इति ख प्रतौ
26. आसीदनऽतिदूरस्थः इति ख प्रतौ, आसीदं नतिदूरस्थं इति ग प्रतौ
27. व्याहूयतां इति क प्रतौ।
    व्याकूयतां इति ख प्रतौ।
28. क्रमादत्पुयावाचा इति ख प्रतौ

29. एह्यागत्य इति ख प्रतौ
30. लक्ष्मण लक्ष्मण इति क/ख प्रतौ
31. वचनं तात चरितं बालका व्रजसि त्वया इति ग प्रतौ
32. देवेनं इति ग प्रतौ
33. रुरोदसा इति ग प्रतौ।
34. नृपेऽवदत इति ख प्रतौ, नृपो वदन् इति ग प्रतौ
35. स समागत: इति ग प्रतौ
36. देवकानने इति ख/ग प्रतौ
37. भवन्तै इति ख/ग प्रतौ
38. अगर्वगतिलंगानां इति ख प्रतौ
39. पृथ्वीधराय भो पुत्रे त्यक्त्का स्वस्थानकं गत: इति ख प्रतौ
40. स्वल्प सैन्यास्या इति ख/ग प्रतौ
41. सुवंशेल्लज्जनं इति ख/ग प्रतौ
42. तत्रैवं परधर्माया इति क प्रतौ

43–44.नत्वैवं वरधर्माया स्वयं राम: सलक्ष्मण:।
करोति नर्तनं रम्यं जिनगेहेप्सर: समम्।। इति ग प्रतौ

45. विधाधरस्त्रीभि इति ग प्रतौ
46. करौ इति ग प्रतौ
47. वनमाला इति ख प्रतौ
48. विजयरथ राजेन्द्र चतुरङ्गसेनया बलान्वित: इति ग प्रतौ
49. क्षमितव्यं इति ग प्रतौ
50. नरवर: इति ग प्रतौ
51. तिष्टान्न इति ग प्रतौ
52. सुमित्राय इति ग प्रतौ
53. वागालिते जले पीति इति क/ख प्रतौ
54. सद्वचै: इति ख प्रतौ
55. भोजनांते इति ग प्रतौ
56. यते ततो पश्यत् इति ग प्रतौ
57. नगरं इति ग प्रतौ

58-59. यत्र तत्र जनाः स्थित्वा कुर्वन्ति व्याकुलात्मकाः।
सोवोचदत्र राजास्ति नाम्ना शत्रुदमः परः।। इति ख प्रतौ

60. नरुचि पुरुषं इति ग प्रतौ

61. शान्ति इति ग प्रतौ

62. शत्रुदमप्रयोक्तानां इति ग प्रतौ

63. प्रतीतं तपया कृता इति ग प्रतौ

64. तमानमस्कार इति ख प्रतौ।

65. सहते मम पुत्राभ्यां इति ग प्रतौ

66. तृणाय सेचिता मयि इति ग प्रतौ

67. विवाहो इति ग प्रतौ

68. गवाक्षवर्तिनी इति ग प्रतौ

69. ग्रहात् इति क प्रतौ

70. देववृन्दान्नभस्तलात् इति क प्रतौ

71. नाना जल्पति मे हितम् इति ग प्रतौ

72. निर्गतो यो इति ग प्रतौ

73. रामारिदमयोस्तत्र जातं मेलापकं परम्।
परस्परमहाप्रीत्या संस्थिता रत्नकम्बले।। इति ख/ग प्रतौ

74. क्षेमप्रत्मेत्र इति ग प्रतौ।

❖❖❖

एकोनविंशतितमोऽधिकारः

जितपद्माञ्च सम्बोध्य पूर्ववद्रामलक्ष्मणौ।
ससीतौ निर्गतौ रात्रौ[1] दक्षिणसागरं प्रति।।1।।

क्वचिद् खेलन्ति दोलायां क्वचित्सरसि शीतले।
क्वचिद् पुष्पवने रम्ये[2] क्वचिन्नदीतटे वरे।।2।।[3]

क्वचिद्वनगजारूढाः कुत्रचिद् वनवाजिषु।
क्वचिद्वनबलीवर्दे[4] रमन्ति संभ्रमान्विताः।।3।।

सीतामारोप्य मात्तङ्गे क्रीडयन्तो वने पराम्।
पुष्पमालादिशृङ्गारं कृत्वा रूपगुणान्वितम्।।4।।

वंशाख्यं[5] नगरं प्राप्ताः क्रमेण भूरि भूषणाः[6]।
नगरस्य बहिर्देशे तृतीयप्रहरे स्थिताः।।5।।

तदा तत्र पुरस्याऽस्य पलायन्ते जना भयात्।
रामः पपृच्छ तान् दृष्ट्वा यूयं गच्छथ भो कुतः।।6।।

रामः प्राहुस्ततस्तेऽद्य तृतीयदिवसोऽभवत्[7]।
गिरेरस्योपरिभागे नादो नक्तं प्रवर्तते।।7।।

महाभयङ्करो घोरो विद्युत्पातादि संयुतः।
वेतालादिकृताकारा दृश्यन्ते प्रलयङ्कराः।।8।।

वयं पलायनं कृत्वा गच्छामस्तद्भयान्निशौ।
प्रभाते पुनरायामः स्वगृहं भोजनेच्छया।।9।।

इति श्रुत्वा मुखात्तेषां सीताऽवोचत् पतिं प्रति।
उत्तिष्ठ देव गच्छामो वयमपि जनैः सह।।10।।

प्रस्तावसदृशीं शक्तिं पुमान् करोति बुद्धिमान्।
को जानाति रवः[8] कस्य रात्रौ प्रवर्तते प्रभो।।11।।

एतच्छ्रुत्वा विहस्योच्चै रामो जगाद तां प्रति।
गच्छ देवि जनैः सार्द्धं क्षेमं ते जायते यतः।।12।।

सीताह देव मुक्ता त्वां किं मे क्षेमैः प्रयोजनम्।
ततो जगाद पद्माभ एवं चेन्मौनमाश्रयः।।13।।

पर्वतस्योपरि गत्वाऽहं पश्याम्यद्य कौतुकम्।
इत्युक्त्वा निर्गतो रामो मध्ये सीता ततोऽनुजः।।14।।
शनैः शनैर्गतास्ते हि पर्वतोपरि संमदाः।
तत्र ध्यानसमारूढौ गुणिनौ मुनिपुङ्गवौ।।15।।
मोक्षाभिलाषिणौ धीरौ निर्ग्रन्थौ ज्ञानमूर्त्तिकौ।
सर्पवृश्चिककर्कीटैश्च वेष्टितौ सर्वदेहिकौ।।16।।
चतुःकषायनिर्मुक्तौ तपोध्यानपरायणौ।
देशभूषणनामाद्यो द्वितीयः कुलभूषणः।।17।।
मुनीं दृष्ट्वा मनस्तुष्टाः स्तम्भिता वा क्षणं स्थिताः।
ततो लक्ष्मणपद्माभ्यां धनुर्भ्यां जीवराशयः।।18।।
दूरी सर्पादिकाः कृत्वा जलेन स्नापितौ मुनी।
महागन्धविलेपेन पूजितौ तैः सुभक्तितः।।19।।
कृत्वाङ्के देवदत्तां तां वीणां गायन्ति[9] राघवः।
नृत्यं च नर्तकी सीता तालं करोति[10] लक्ष्मणः।।20।।
तेषां नृत्येन गीतेन पशोरपि सुखं भवेत्।
ताण्डवं नर्तनं नृत्वा वन्दितौ मुनिसत्तमौ।।21।।
तावच्च रजनी जाता महाध्वान्तभयप्रदा।
मुनयोः पूर्ववैरेणारब्धवान[11] पीडनं सुरः।।22।।
उपसर्गं महाघोरं दैत्यः करोति पापकः।
सिंहव्याघ्रादिरूपाणि कृत्वा चोपलवर्षणम्।।23।।
हुङ्कारेण कुशब्देन गर्जति मदिनीतलम्।
वेतालाकृतिमाश्रित्य भीरूणाञ्च भयप्रदम्।।24।।
भीता सीता च तं दृष्ट्वा कण्ठे लग्ना: रघो पतेः।
कम्पमाना शरीरे सा प्राणरक्षणहेतवे।।25।।
हा नाथ रक्ष मां भीतामित्युवाचः पुनः पुनः।
ततो जगाद पद्माभः सम्यक्त्वदृढचेतसा।।26।।

मुनयोर्देवि मा भीषी पादस्य शरणं कुरु।
इत्युक्ते मुनयोः पादसन्निधिं जानकी स्थिता।।27।।

सलक्ष्मणेन रामेण सज्जीकृत्वा शरासनम्[12]।
तस्य टङ्कारशब्देन भीतो देवः प्रकम्पितः।।28।।

पलायितः क्व दुष्टोऽसावुपसर्गैः समं तदा।
गगनं निर्मलं जातं सर्वप्राणिसुखप्रदम्।।29।।

तदैव केवलज्ञानमुत्पन्नं मुनयोस्तयोः।
सुराश्चतुर्णिकायाश्च तत्प्रभावात्समागताः।।30।।

अष्टविधार्चनां कृत्वा जलगन्धाक्षतादिकैः।
स्तोत्रैश्च विविधैः स्तुत्वा प्रणम्य भक्तितः परम्।।31।।

समवशरणे रम्ये चोपविष्टा यथायथम्।
पशवो मनुजा देवाः धर्मश्रवणहेतवे।।32।।

श्रुत्वा धर्मं मुनिप्रोक्तं ज्ञानिनं राघवोऽवदत्।
भो प्रभो केन दुष्टेनोपसर्गो निर्मितस्त्वयि।।33।।

ततो जगाद योगीशो भरते पद्मिनीपुरे।
विजयपर्वतो राजा धारिणी तस्य भामिनी।।34।।

दूतोऽमृतस्वराख्यो[13]ऽस्योपयोगा तस्य वल्लभा।
उदितमुदिताख्यौ च तयोः पुत्रौ गुणार्णवौ।।35।।

वसुभूतिरितिख्यातो द्विजोऽस्ति तत्र दुष्टधीः।
स उपयोगया सार्द्धं सङ्गं करोति लम्पटः[14]।।36।।

क्वचिद्भूपतिना दूतः प्रेषितो नगरान्तरम्।
मार्गे गत्वा स दूतोऽग्रे मारितो वसुभूतिना।।37।।

पुरं गत्वा तया सार्द्धं ततो रेमे स निर्भयः।
पुत्राभ्याञ्च ततो ज्ञात्वा हतोऽसौ वैरतः पितुः।।38।।

मृत्वा च वसुभूतिः स समेदपर्वते कुधीः।
सम्प्राप्तो म्लेच्छतां पापाद्धनधान्यादिवर्जितः[15]।।39।।

एकदा विहरन् क्षोणीं मुनीन्द्रो मतिवर्द्धनः।
सङ्घैश्चतुर्विधैः सार्द्धमागतो पद्मिनीपुरे ।।40।।
वसन्ततिलकोद्याने निर्मलस्थलमाश्रयत्।
वनपालस्तदा गत्वा नृपाऽग्रेऽसंवदत्परम्।।41।।
राजन् जैनमुनिनाथः सङ्घेन वनमाश्रितः।
वारिते दास्यति शापं[16] ततो भवेत्कुलक्षयम्।।42।।
नो चेच्च[17] भवतां क्रोधो वननाशाद्भविष्यति।
इतो व्याघ्र इतो गर्तः साम्प्रतं किं करोम्यहम्।।43।।
राजोचे तं च मा भीषि[18] पश्यामि तांस्तपोधनान्[19]।
इत्युक्ता निर्गतो बन्धुवर्गैर्विजयपर्वतः।।44।।
वनमागत्य नागाच्च समुत्तीर्य नरेश्वरः।
वनं प्रविश्य सोऽपश्यद्यत्र तत्र मुनीन् स्थितान्।।45।।
मोक्षार्थिनस्तपोलीढान् जपध्यानसमन्वितान्।
सर्वं गर्वं परित्यज्य ननाम मुनिपादयोः।।46।।
मतिवर्द्धनयोगीन्द्रो धर्मवृद्धिं तदा ददौ।
संसाराऽनित्यतां पापपुण्यभदेमदर्शयत्।।47।।
धर्मं श्रुत्वा मुनि प्रोक्तं राजा विजयपर्वतः।
दत्वा पुत्राय साम्राज्यं स्वयं मुनिरभूत्सुधीः।।48।।
उदितमुदितौ तौ च मुनी जातौ दिगम्बरौ।
तस्यैव योगिनः पार्श्वे संसारदुःखभीतितः।।49।।
सम्मेदवन्दनां कुर्तं गच्छन्तौ तौ कदापि च।
दृष्टौ म्लेच्छेन पूर्वेण तयोर्दुष्टेन वैरिणा।।50।।
म्लेच्छो यावत्तयोर्हन्तुं युक्तस्तावत्ततोऽत्र वै।
केनचिन्म्लेच्छनाथेन कृपया स निवारितः।।51।।
रघुपतिः पुनः प्राह तेनात्र केन हेतुना।
रक्षितं मुनियुग्मं तद्धर्मपात्रं दिगम्बरम्।।52।।

योग्याह यक्षपत्नेऽथ सुरपकर्षकाभिधौ।
भ्रातरौ चैकदा ताभ्यां मोचितो व्याघ्रहस्ततः।।53।।
मूल्यं दत्वा मृगश्चैको म्लेच्छेशोऽभून्मृतश्च सः।
तौ च मृत्वाऽत्र सञ्जातावुदितमुदिताभिधौ।।54।।
रक्षितो मृगभवेऽयं रक्षितौ तेन हेतुना।
विना हेतुं कुतः प्रीतिः कुतो वा वैरसम्भवः।।55।।
उपसर्गात्तदा मुक्तौ कालान्तरे मृतौ च तौ।
मुनी स्वर्गे सुरौ जातावुदितमुदितौ परौ।।56।।
वसुभूतिश्चरो भ्रान्त्वा चिरात्प्राप्तो मनुष्यताम्।
कृत्वा मिथ्यातपो घोरं ज्योतिर्लोके सुरोऽभवत्।।57।।
अथाऽरिष्टपुरे रम्ये राजा प्रियव्रताभिधः।
काञ्चनाभा च पद्माभा नाम्ने द्वे तस्य वल्लभे।।58।।
ज्योतिष्कोऽसौ सुरश्च्युत्वा हेमाभार्यामभूत्सुतः।
अनुन्धराभिधो[20] गर्वी कुमारोऽपि कुबुद्धिमान्।।59।।
स्वर्गाच्च्युत्वा च तौ जातौ पद्माभायां सुतौ वरौ।
आद्यो रत्नरथो ज्ञेयश्चित्ररथो द्वितीयकः।।60।।
राज्यं समर्प्य पुत्राभ्यां[21] संन्यस्य षट्दिनानि वै।
मृत्वा स्वर्गे सुरो जातः प्रियव्रतो नरेश्वरः।।61।।
रत्ननगरनाथस्य सुताऽस्ति श्रीप्रभाभिधा।
रत्नरथेन सा लब्धा विवाहविधिना तदा।।62।।
द्वेषादनुन्धरस्तस्य करोति युद्धमुद्धतः।
रत्नचित्ररथाभ्यां च स्वदेशात् स बहिष्कृतः।।63।।
ततः स तापसो भूत्वा भ्रमति विषयान् बहून्।
रत्नचित्ररथौ तौ च सुरौ जातौ तपोबलात्।।64।।
च्युत्वा सिद्धार्थपत्ने तौ क्षेमङ्करनरेश्वरात्।
विमलायां सुतौ जातौ देशकुलादिभूषणौ।।65।।

कस्मिन् ग्रामान्तरे पित्रा स्थापितौ शास्त्रहेतवे।
कृतोऽभ्यासः परस्ताभ्यामुपाध्यायस्य सन्निधिम्।।66।।
कुमारौ विद्यया पूर्णौ यौवनेनापि भूषितौ।
आगतौ स्वपुरे भूत्या बन्धुभिः परिवेष्टितौ।।67।।
तदा गवाक्षमार्गस्थां राजपुत्रीं मनोहराम्।
दृष्ट्वा कामविकारौ तौ जातौ सापि तथाऽभवत्।।68।।
तदा बन्दिजनाज्जातो विदः स्वचिह्नसम्भवः।
क्षेमङ्करस्य पुत्रौ चैतौ जयतात् सुलक्षणौ।।69।।
इयमपि गवाक्षस्था चेतयोर्भगिनी शुभा।
जयतु रूपसौभाग्या नीलोत्पलोत्सवाभिधा।।70।।
कुलदेशादिभूषाभ्यां ज्ञात्वा स्वभगिनीं तदा।
पापस्य कारणं चित्रं ज्ञातं श्वभ्रस्य दायकम्।।71।।
तौ समुत्पन्नवैराग्यौ जातौ तपस्विनौ शुभौ।
विहरन्तौ बहून् देशानावामत्र समागतौ।।72।।
दुःखेन चावयोस्तातो मृत्वा गरुडनायकः।
संन्यासफलतो जातः पाताले व्यन्तराधिपः।।73।।
क्षुब्धः स्वासनकम्पेन प्रयुज्याऽवधिमूर्जितः।
आगतोऽयं स्थितो भाति व्यन्तरामरसंसदि।।74।।
अनुन्धरस्तु विहरंस्तापसाचारतत्परः।
कौमुदीनगरीं प्राप्तः शिष्यसङ्घेन वेष्टितः।।75।।
नरेशः सुमुखस्तत्र रतवत्याऽस्य भामिनी।
कान्ताशतप्रधानत्वं प्राप्ता परमसुन्दरी।।76।।
साधुदत्तमुनेः पार्श्वे सम्यग्दर्शनमागता।
तत्प्राप्येतरतीर्थानि तृणतुल्यानि मन्यते।।77।।
रहस्याथ[22] पुरस्तस्याः कदाचिदवदन्नृपः।
अहोऽसौ तापसः स्थानं महतां तापसामिति।।78।।

ततो रतवत्युपवाच कीदृग्नाथेद्दृशं तपः।
मिथ्यादृशामविज्ञानलोकदम्भनकारणम् ।।79।।

तच्छ्रुत्वा भूपतिस्तस्यै क्रुद्ध स्म[23] चागदत्पुनः।
मा रुषः पश्य नाथेमं मेऽचिरात्पादवर्त्तिनम्[24]।।80।।

इत्युक्त्वा स्वगृहं गत्वा शिखियित्वा मनोहरम्।
आत्मजां नागदत्ताख्यां प्रेषयत्तापसाश्रमम्।।81।।

तस्या स्थानङ्गता कन्या योगस्थानं सुविभ्रमा।
आस्थितामरकन्येव परमाकल्पधारिणी।।82।।

वातोरिताम्बरव्याजादूरुकाण्डमदर्शयत्।
मारस्यान्तः पुरस्थानं लावण्यरसनिर्भरम्।।83।।

स्वस्य रूपञ्च[25] तस्मै सा दर्शयति विकारतः।
स्तनोष्टनाभिकुक्षादि जङ्घापादकरद्वयम्।।84।।

तस्या[26] रूपं समालोक्य कामव्याप्तश्च तापसः।
पृच्छति कुत्र बाले त्वं कस्य पुत्री किमागता।।85।।

सा जगाद शृणु स्वामिन्नस्य पुरस्य भूभृतः[27]।
कन्याऽहं मारिता मात्रा निष्कासितास्य सद्मतः।।86।।

अहं शरणनिर्मुक्ता तव सन्निधिमागता।
त्यक्ता संसारकर्माणि भवामि च तपस्विनी।।87।।

श्रुत्वेति विकलो भूत्वा चाऽसौ वदति मूढधीः।
सुखेन स्थियतां बाले मद्गृहे भोगलीलया।।88।।

इत्युक्त्वालिङ्गनं मूढो यावत्कर्तुं स वाञ्छति।
तावद् वदति सा कन्याऽनुदाहं सङ्गवर्जिता।।89।।

कार्यं तदेव कर्तव्यं यदग्रे स्थिरतां भवेत्।
तस्मादहं करान्मातुर्याचनीया त्वया प्रभो।।90।।

दास्यति नियमान्मां सा मयि चोदासवर्त्तिनी।
तस्याः पादौ प्रणामेन सर्वकार्यस्थिरं भवेत्।।91।।

श्रुत्वेति सोऽतिमूर्खः सन् प्रभातेऽथ तया समम्।
गतो नृपगृहं वेगाद्यत्रास्ति नृपवल्लभा।।92।।
तस्याः पादौ ततो धृत्वा याचति नृपसाक्षिकम्।
नागदत्ताभिधां कन्यां व्याकुलो मूढतापसः।।93।।
तदा नृपेण चारोप्य गर्दभे भ्रष्टतापसः।
निष्कासितः स्वपत्नाच्च लोष्टमुष्टादिताडितः।।94।।
ततोऽपमाननिर्दग्धः परं दुःखं समुद्वहन्।
भ्राम्यन्महीं मृतः क्लेशयोनिषु भ्रमणं श्रितः।।95।।
ततः कर्माऽनुभावेन मनुष्यभवमागतः।
द्रारिद्र्यपङ्कनिर्मग्नं जनादरविवर्जितम्।।96।।
गर्भस्थ एव चैतस्मिन् विदेशं जनको गतः।
उद्वेजितः कुटुम्बिन्या कलहक्रूरवाक्यया।।97।।
कुमारे च हता माता म्लेच्छेन विषया हतः।
दुःखं च परमं प्राप्तः सर्वबन्धुविवर्जितः।।98।।
ततस्तापसतां प्राप्य कृत्वा बालतपः परम्।
ज्योतिर्लोकं समारुह्य नाम्ना वह्निप्रभोऽभवत्।।99।।
अनन्तवीर्यनामाऽथ केवली सेवितः सुरैः।
इत्यन्तेवासिना पृष्टो धर्म्मचिन्तागतात्मना।।100।।
मुनिसुव्रतनाथस्य तीर्थेऽस्मिन् भवता समः।
कोऽन्योऽनुभविता भव्यलोकस्योत्तरकारणम्[28]।।101।।
सोऽवोचन्मयि निर्वाणं गतेऽत्र श्रमणक्षितौ।
देशभूषण इत्येको द्वितीयः कुलभूषणः।।102।।
भवितारौ जगत्सारौ[29] केवलज्ञानदर्शिनौ।
यौ समाश्रित्य लोकोऽयं तरिष्यति भवार्णवम्।।103।।
सोऽपि वह्निप्रभस्तस्माच्छ्रुत्वा[30] केवलिनो मुखात्।
अवस्थानं निजं यातो दध्यौ केवलिभाषितम्।।104।।

अन्यदावधिना ज्ञात्वा योगिनाविह तौ गिरौ।
अनन्तवीर्यसर्वज्ञमिथ्यावाक्यं करोम्यहम्।।105।।
एवमुक्ताऽभिमानेन परमेणातिमोहितः।
आगतः पूर्ववैरेण कर्तुं परमुपद्रवम्।।106।।
चरमाङ्गधरं दृष्ट्वा स भवन्तमतिद्रुतम्।
सुरेन्द्रकोपभीत्या च तिरोधानमुपागतः।।107।।
नारायणसमेतेन प्रातिहार्ये त्वया कृते।
केवलज्ञानमस्माकं जातं घातिपरिक्षये।।108।।
इति गत्यागतीः[31] श्रुत्वा प्राणिनां वैरकारणाम्।[32]
वैरानुबन्धमुत्सृज्य स्वस्था भवन्तु जन्तवः[33]।।109।।
महापूतमिति श्रुत्वा वचनं केवलीरिताम्।
मुहुः सुराऽसुरा नेमुः सम्भीता भवदुःखतः।।110।।
तावच्च गरुडाधीशः परमं सम्मदं श्रितः।
नत्वा केवलिनः पादौ संयतोऽर्पितमानसः।।111।।
प्रातिहार्यकृतं येन त्वया मत्सुतयोः परम्[34]।
ततस्तुष्टोऽस्मि याचस्व वस्तुयत्तेऽभिरोचते।।112।।
क्षणं चिन्तागता:[35] स्थित्वा जगाद रघुनन्दनः।
त्वया सुरप्रसन्नेन स्मर्त्तव्या व्यमापदि[36]।।113।।
एवमस्त्विति तेनोक्ते दध्युः शङ्खं दिवौकसः।
भेर्यश्च मेघनिनादाः[37] सानुवाद्याः समाहताः।।114।।
साधुपूर्वभवं श्रुत्वा संवेगं परमं श्रिताः।
प्रवव्रजर्जनाः केचिदन्येऽणुव्रतमाश्रिताः।।115।।
कुलदेशादिभूषाख्यम् चरित्रं शृण्वतां सताम्।
क्षयं प्रयाति पापौघं जनानां शुद्धचेतसाम्।।116।।
वंशपुरं[38] नरेन्द्रेण सुरप्रभेन धीमता।
ससीतौ रामलक्ष्मीशौ वस्त्रभूषैश्च पूजितौ।।117।।

कियत्दिनानि तत्रैव स्थित्वा रामेण कारिताः।
जिनगृहा महोत्तुङ्गा ध्वजातोरणभूषिताः।।118।।
रामः स्थितो यतस्तत्र तस्माद्रामगिरिः स्मृतः[39]।
प्रतिष्ठा यागतैर्लोकेस्तदाख्या सिद्धितां गताः।।119।।
तस्माच्च निर्गतौ रामकेशवौ सुखलीलया।
गच्छन्तौ सीतया सार्द्धं नानादेशपुरादिकान्।।120।।
क्रमेण काननं प्राप्तौ दण्डकाख्यं मनोहरम्।
नाना वृक्षसमाकीर्णं नानापुष्पैः[40] सुगन्धिकम्।।121।।
अब्धितीरं समारुह्य तिष्ठति गहनं परम्।
भिल्लैरप्यप्रवेश्यं तन्नानामृगैर्भयङ्करम्।।122।।
कर्णरवानदीतीरं शनैः प्राप्तौ सुनिर्मलम्।
वनमध्ये महारम्यं वृक्षपङ्क्तिवरं तटम्।।123।।
कृत्वा तत्र जलक्रीडां स्नात्वा वस्त्रादिभूषिताः।
शयिताश्च शिलादेशे सीतापद्माभलक्ष्मणाः।।124।।
ततः पलाशपत्रैश्च निर्माणै[41]र्भाजनैर्मुदा।
लक्ष्मीधरेण संदत्तै र्निमलैनिर्मलस्थले।।125।।
तन्दुलैर्वनगोदुग्धैः सुपाकः सीतया कृतः।
पक्वान्नैः पायसैर्युक्तः पत्रसाकैर्वरोदनम्।।126।।
क्रीडार्थं लक्ष्मणो वीरो गतो वनगजैः समम्।
अत्रान्तरेऽवधिज्ञानसम्पन्नौ संयमान्वितौ।।127।।
मुनी सुगुप्तगुप्ताख्यौ मासोपवासधारिणौ।
प्राप्तावतिथिवेलायां चर्यार्थं रामसन्निधिम्।।128।।
रामाय सीतया दृष्ट्वा दूरतस्तन्निवेदितम्।
इति श्रुत्वेप्सितो रामो मुनी दृष्ट्वा ससंभ्रमी।।129।।
मुनिपादौ प्रणम्योच्चैर्भक्त्या विनयपूर्वकम्।
दम्पतिभ्यां जलैः शुद्धैस्तिष्ठ तिष्ठेति भाषितम्।।130।।

त्रीणि प्रदक्षिणीकृत्वा नमोऽस्तु परमादरात्।
रक्षितौ चारणौ राज्ञा चर्यार्थं गुणभूषणौ।।131।।
पादौ प्रक्षालनं कृत्वा पूजित्वाऽष्टविधार्चनैः।
ताभ्यां दत्तश्च सिद्धान्नं श्रद्धाशक्तिसमन्वितम्।।132।।
सीतया प्रेषितं[42] चान्नं रामेण चार्पितं करम्।
देहाधारं परं कृत्वाशीर्वादं ददतुर्मुनी।।133।।
पारणानन्तरं देवैः पञ्चाश्चर्यं कृतं तदा।
पुष्पगन्धोदकैः रत्नैर्युता वृष्टिः कृता परा।।134।।
जयशब्दस्य निर्घोषः सञ्जातः पात्रदानतः।
उपविष्टौ मुनी चाऽत्र ततः शिलातले वरे।।135।।
तदा वृक्षोपरि तत्र स्थितः पक्ष्येकगृध्रकः।
जातिस्मरो मुनी दृष्ट्वा भूत्वा प्रेरित भक्तितः।।136।।
आगत्यासौ[43] मुनेः पादौ पतितो दीनमानसः।
पक्षी निवार्यमाणोऽपि सीतया च पुनः पुनः।।137।।
मुनिचरणधौतेऽथ जले स्नात्वा सुनिर्मले।
करोति स स्तुतीन् शब्दान् मुनिगुणेषु तत्परः।।138।।
पादोदकप्रसादेन जातं हेममयं तनुः।
पक्षिणः कौतुकं कारि पञ्चवर्णैर्मनोहरम्।।139।।
पटसूत्रैः समं केशाः पक्षौ वैडूर्यसन्निभौ।
चञ्चुपादा महाकान्त्या पद्मरागमणेः समा।।140।।
तं दृष्ट्वा विस्मयी रामः सीतया सह योगिनम्।
अपृच्छत्कारणं तस्य पक्षिणो भक्तिसम्भवम्।।141।।
मुनिराह शृणु राजन्नत्रादौ विषयोऽभवत्।
ग्रामपुरादि शोभाढ्यो वनवाप्यादिमण्डितः।।142।।
तस्य मध्ये पुरं चासीत्कर्णकुण्डलसञ्ज्ञिकम्।
दण्डकाख्यो नृपस्तत्र मिथ्यादृष्टिर्महाबली।।143।।

तस्यासीन्मस्करी देवी भोगलालसमानसा[44]।
सोऽपि तस्यां महासक्तश्चाऽन्योऽन्यं प्रेमबन्धनौ ।।144।।

निष्क्रान्तेनान्यदा तेन नगरात्साधुरीक्षितः।
प्रलम्बितभुजः श्रीमान् ध्यानसंरुद्धमानसः ।।145।।

कृष्णसर्पो मृतस्तस्य दग्धांगो विषलालया।
कण्ठे निधापितस्तेन ग्रावदारुणचेतसा ।।146।।

यावदेषोपनीतो न[45] प्रदातुर्मम केनचित्[46]।
तावन्न संहरेद्योगमिति[47] ध्यात्वा मुनिः स्थितः ।।147।।

अतीते गणरात्रे च पुनस्तेनैव वर्त्मना।
निष्कामन्पार्थिवोऽपश्यत्तदवस्थं महामुनिम् ।।148।।

ऋजुनैव च रूपेण गत्वा निकटतां भृशम्।
अपृच्छदपनेतारं किमेतदिति सोऽवदत् ।।149।।

नरेन्द्र पश्य केनापि नरकावासमार्गिणा।
योगस्थस्य मुनेरस्य कण्ठे सर्पः समर्पितः ।।150।।

यस्य सर्पस्य सम्पर्कात् विग्रहस्य समुद्भवम्।
प्रतिबिम्बशितिक्लिन्नं दुर्दर्शमतिभीषणम् ।।151।।

मुनिं निष्प्रतिकर्माणं दृष्ट्वा राजा तथाविधम्।
प्रणम्याक्षमयद्यातास्ते च स्थानं यथोचितम् ।।152।।

ततः प्रभृति सक्तोऽसौ कर्तुं भक्तिमनुत्तमाम्।
निरम्बरमुनीन्द्राणां वारितोपद्रवक्रियः ।।153।।

पापिनी मस्करी देवी दृष्ट्वा जैनोत्तमं नृपम्।
उपायं कर्तुमारब्धं जैनधर्मं निवारितुम् ।।154।।

चर्यार्थमागतं दृष्ट्वा नग्नरूपं जगाद सा।
पश्य भूपाल त्वद्देवीं भोक्तुं वाञ्छति नग्नकः ।।155।।

ज्ञात्वा तदीदृशं कर्म राज्ञाऽतिक्रोधमीयुषा।
अमात्याद्युपदेशञ्च स्मृत्वा निर्ग्रन्थनिन्दनम् ।।156।।

क्रूरकर्मभिरन्यैश्च प्रेरितः श्रमणाहितैः।
आज्ञापयन्महर्षीणां यन्त्रनिष्पीडने नरान्[48] ।।157।।
गणाधिपसमेतोऽसौ[49] समूहोऽम्बरवाससाम्।
यन्त्रनिष्पीडनैर्नीतः पञ्चतां पापकर्मणा ।।158।।
बाह्यभूमिगतस्तत्र मुनिरेकः समाव्रजत्।
इत्यवार्यत लोकेन केनचित्करुणावता[50] ।।159।।
भो भो निर्ग्रन्थ मागास्त्वं पूर्वनैर्ग्रन्थ्यमाश्रयम्।
यन्त्रेणापीड्यसे तत्र द्रुतं कुरु पलायनम् ।।160।।
यन्त्रेषु श्रमणाः सर्वे राज्ञा क्रुद्धेन पीडिताः।
मागास्त्वमप्यवस्थां तां रक्ष धर्माश्रयं वपुः ।।161।।
ततः क्षणमसौ सङ्घमृत्युदुःखेन दुःखितः।
वज्रस्तम्भ इवाकम्पस्तस्थावव्यक्तचेतनः ।।162।।
अथास्यासह्यदुःखेन प्रेरितः शमगह्वरात्।
निरम्बरमहीध्रस्य निरगात्क्रोधकेशरी ।।163।।
ततः कालाऽनलाकारो बहुलः कुटिलः पृथुः।
शुभ वाम भुजा तस्य निरगात्पावकध्वजः ।।164।।
गत्वा श्रुतेन तद्देशः पुरग्रामसमन्वितः।
भस्मीकृतश्च तत्पापात् सरोवापीवनैर्युतः[51] ।।165।।
मनुष्याः पशवः सर्वे वृक्षभूम्यादि भस्मिता।
हाहाकारेण भूपोऽसौ सप्रजः प्रलयङ्गतः ।।166।।
नान्तःपुरं न देशश्च न पुराणि न पर्वताः।
न संस्थितं तदा किञ्चिन्मुनीनां घातपापतः ।।167।।
महासंवेगयुक्तेन मुनिना चिरमर्जितम्।
धर्मं क्रोधाग्निना सर्वं हारित्वा नरकङ्गतः ।।168।।
यतोऽयं दण्डको राजा तस्माद्देशः सुदण्डकः।
तेनैव ध्वनिनाद्यापि[52] दण्डकः परिकीर्त्यते ।।169।।

काले महत्यतिक्रान्ते प्राप्तायां चारुतां भुवि।
एतेऽत्र पादपा जाताः पर्वता निम्नगाः सरः।।170।।
मुनेस्तस्य प्रभावेन सुराणामपि भीतिदं।
पश्वादिदं समाकीर्णं सिंहेभशरभादिकैः।।171।।
संसारेऽत्र चिरं भ्रान्त्वा दण्डकः पापतो नृपः।
अयं गृध्रत्वमायातो वनेऽत्र रतियोगतः।।172।।
दृष्ट्वा साऽतिशयावेष नौ वनेऽत्र समागतौ।
पापस्य कर्मणो हान्यात्प्राप्तः पूर्वभवस्मृतिम्[53]।।173।।
योऽसौ परमया शक्त्या[54] युक्तोऽभूद्दण्डको नृपः।
सोऽयं पश्यत सञ्जातः कीदृशः पापकर्मभिः।।174।।
इति विज्ञाय विरसं फलं कटुककर्म्मणः।
किं न भो सज्यते धर्मे दुरिताच्च विरज्यते।।175।।
पक्षिणं संयतोऽवादीन् मा भैषीरधुना द्विज[55]।
मा रोदीष्व यथाभाव्यं कः करोति तदन्यथा।।176।।
आश्वासं गच्छ विश्रब्धः कम्पं मुञ्च सुखी भव।
पश्य क्वेयमनरण्यानी क्व रामः सीतयान्वितः।।177।।
अवग्रहोऽस्मदीयः क्व क्व त्वमात्मार्थमागतः[56]।
प्रबुद्धो दुःखसम्बोधः कर्मणामिदमीहितम्।।178।।
इदं कर्म विचित्रत्वाद्विचित्रं परमं जगत्।
अनुभूतं श्रुतं दृष्टमथैव[57] प्रवदाम्यहम्।।179।।
पक्षिणः प्रतिबोधार्थं ज्ञात्वाकूतञ्च सीरिणः।
सुगुप्तिरवदत्स्वस्य सुगुप्तेः शमकारणम्[58]।।180।।
अचलो नाम विख्यातो वाराणस्यां महीपतिः।
गिरिदेवीति जायाऽस्य गुणरत्नविभूषणा।।181।।
त्रिगुप्त इति विख्यातो गुणनाम्नाऽन्यदा मुनिः।
पारणार्थं गृहं तस्याः प्रविष्टः शुद्धचेष्टितः।।182।।

स तया परमां श्रद्धां दधत्या विधिपूर्वकः।
तर्पितः[59] परमान्नेन स्वयं व्यापारयुक्तया।।183।।

समाप्ताऽशनकृत्यश्च पादन्यस्तोत्तमाङ्गया।
पपृच्छान्योपदेशेन स्वस्य पुत्रसमुद्भवम्।।184।।

नाथ साऽतिशयोऽयं मे[60] गृहवासो भविष्यतिः।
किं वा नेति प्रसादोऽयं क्रियतां निश्चयार्प्पणे।।185।।

वचोगुप्तिं ततो भित्वा[61] राज्ञीभक्त्यानुरोधतः।
तस्याश्चारुसमादिष्टं[62] मुनिना तनयद्वयम्।।186।।

त्रिगुप्तस्य मुनेस्तस्य समादेशेऽनयत्सुतौ[63]।
जातौ सुगुप्तिगुप्ताख्यौ पितृभ्यां तौ ततः कृतौ।।187।।

तौ च सर्वकलाभिज्ञौ कुमारश्रीसमन्वितौ।
तिष्ठन्तौ विविधैर्भावै रममाणौ जनप्रियौ।।188।।

वृत्तान्तोऽयञ्च सञ्जातो गन्धवत्यां महीपते।
पुरोहितस्य सोमस्य प्रियायास्तनयद्वयम्।।189।।

सुकेतुरग्निकेतुश्च तयोः प्रीतिरनुत्तमा।
सुकेतुरन्यदा चाऽभूत्कृतदारपरिग्रहः।।190।।

आवयोरधुना भ्रात्रोः पृथग् शयनमेतया।
क्रियते जाययाऽवश्यमिति दुःखमुपागतः।।191।।

सुकेतुः प्रतिबुद्धः सन् शुभकर्मानुभावतः।
अनन्तवीर्यपादान्ते श्रमणत्वं समाश्रितः।।192।।

अग्निकेतुर्वियोगेन भ्रातुरत्यन्तदुःखितः।
वाराणस्यामभूदुग्रस्तापसोधनचिन्तयाम्[64]।।193।।

श्रुत्वा तथाविधिं तञ्च भ्रातरं स्नेहबन्धतः।
प्रतिबोधयितुं वाञ्छन् सुकेतुर्गन्तुमुद्यतः।।194।।

स व्रजन् गुरुणा वोचि[65] सुकेतो कथयिष्यसि।
वृत्तान्तं सोदरायेमं येनासावुपशाम्यति[66]।।195।।

कोऽसौ नाथेति तेनोक्ते गुरुरेवमुदाहरन्।
करिष्यति त्वया साकं संजल्पं[67] दुष्टभावतः।।196।।
युवयोः कुर्वतो जल्पं जाह्नवीमागमिष्यति।
चारुकन्या समं स्त्रीभिस्तिसृभिर्गौरविग्रहा।।197।।
दिवसस्य गते यामे विचित्रांशुकधारिणी।
एभिश्चिह्नैर्विदित्वा तां भाषितव्यमिदं त्वया[68]।।198।।
दृष्ट्वा तां वक्ष्यसीदं[69] त्वं ज्ञानं चेदस्ति ते मते।
चेदेतस्या[70] कुमार्यायाः किं भविता शुभाशुभम्।।199।।
अज्ञानोऽसौ विलक्षः संस्तापसस्त्वां भणिष्यति[71]।
भवान् जानात्विति त्वञ्च वक्ष्यस्येवं सुनिश्चितम्।।200।।
अस्त्यत्र प्रवरो नाम वाणिजः सम्पदान्वितः।
तस्येयं दुहिता नाम्ना रुचिरेति प्रकीर्त्तिता।।201।।
तृतीयेऽह्नि पञ्चत्वं वराकीयं प्रपत्स्यते[72]।
ततोऽजा कंवरग्रामे विलासस्य भविष्यति।।202।।
वृकेण मारिता मेषी महिषी च ततः पितुः।
मातुलस्य विलासस्य भविष्यति शरीरजा[73]।।203।।
एवमस्त्विति सम्भाष्य प्रणम्य प्रमदा[74] गुरुम्।
सुकेतुः क्रमतः प्राप्तस्तापसानां निकेतनम्।।204।।
गुरुणा च यथोदिष्टं तं दृष्ट्वा तामुदाहरन्।
तथावृत्तं च तत्सर्वं यातमग्नेः समक्षताम्।।205।।
ततोऽसौ विधुरा नाम्ना विलासस्य शरीरजा।
याचिता श्रेष्टिना लब्धा प्रवरेण मनोहरा।।206।।
विवाहसमये प्राप्ते प्रवराय न्यवेदयत्।
अग्निकेतुर्यथैवं ते दुहितासीद्भवान्तरे।।207।।
विलासायापि ते सर्वे भवास्तेन निवेदिताः।
श्रुत्वा तत्कन्यका जाता जातिस्मरणकोविदा।।208।।

तत प्रव्रजितुं वाञ्छां सा संवेगपराऽकरोत्।
प्रवरश्च विलासेन व्यवहारदुराशयः।।209।।
सभायां पितुरस्माकं प्रवरे भङ्गताङ्गते[75]।
आर्यिकात्वमिता कन्या श्रमणत्वञ्च[76] तापसः।।210।।
वृतान्तमीदृशं श्रुत्वा वयं वैराग्यपूरिताः।
सकाशे[77]ऽनन्तवीर्यस्य जैनेन्द्रव्रतमाश्रिताः।।211।।
एवं मोहपरीतानां प्राणिनामतिभूरिशः।
जायन्ते कुत्सिताचारा भवसन्ततिदायिनः।।212।।
इति मुनिमुखाच्छ्रुत्वा भीतोऽसौ संसृतेर्द्विजः।
तदा च मुनिना तस्मै दत्तं सुश्रावकव्रतम्।।213।।
रात्रिभुक्तिपरित्यागो मांसादित्यजनं कृतम्।
जीवहिंसादिकं त्यक्ता सञ्जातः समतान्वितः[78]।।214।।
मुनिभ्यां कृपया हस्ते सीतायाश्चार्पितो द्विजः।
पोषणाय शुभाकारः परमस्नेहदायकः।।215।।
धर्मवृद्धिं ततो दत्वा तेभ्यो मुनी गतौ[79] वने।
रामोऽत्र पक्षिणा सार्द्धमुपविष्टः ससीतकः।।216।।
विदेशेऽपि गतेऽस्माकं दानपुण्यमभूत्परम्।
इत्युक्त्वा लक्ष्मणं मार्गे पश्यन्ति ते सुभुक्तये।।217।।
तावल्लक्ष्मणवीरोऽपि गजारूढः समागतः।
रत्नराशिं परां दृष्ट्वा पक्षिणञ्च मनोहरम्।।218।।
अपृच्छद्रामदेवं सः कुतस्तोऽयं द्विजः प्रभो।
ततो रामेण तस्याग्रे दानादिकं निवेदितम्।।219।।
तच्छ्रुत्वा लक्ष्मणस्तुष्टस्ततस्ते पक्षिणा सह।
भुक्ता तत्रोपविष्टाश्च शिलादेशे सुनिर्मले।।220।।
ततो जटायुरित्येवमभिधानं कृतमुदा।
गृधस्य तस्य लक्ष्मीश सीतारामैः प्रमोदतः।।221।।
ततो ते पक्षिणा सार्द्धं क्रीडन्तस्तु वनस्थले।
भ्रमन्ति स्वेच्छया युक्ता रत्नहेममयि भुवि।।222।।

क्वचित्पक्षं क्वचिन्मासं क्वचिन्नक्तं क्वचिद्दिनम्।
वनस्पतिफलाहारैः सन्तुष्टाः सुखिनः सदा।।223।।

तत्राऽपूर्वस्थलं दृष्ट्वा रामो जगाद लक्ष्मणम्।
अत्र स्थातव्यमस्मद्भिर्निर्माप्य नगरं वरम्।।224।।

अस्मन्मात्रादि[80] सद्वर्गं तत्र गत्वा त्वमानयः।
दुःखिभूतं वियोगेन रम्यस्थानेऽत्र निर्मले।।225।।

वाऽत्र त्वं सीतया सार्द्धं तिष्ठ गत्वाऽऽनयाम्यहम्।
एकाऽपि घटिका तेषां दुःखात्संवत्सरायते।।226।।

लक्ष्मीधरस्ततः प्राह यथा ते वचनं भवेत्।
तथा करोमि देवोऽहं नान्यथा तव भाषितान्।।227।।

रघुपति पुनः प्राह वर्षाकालः समागतः।
नदीपूरेण[81] तन्मार्गो रुन्धितोऽस्ति महीतले।।228।।

रथादिशिविकायानं शुद्धमार्गेण गच्छति।
वर्षाकालं ततः कृत्वा त्वं गत्वानय बान्धवान् ।।229।।

एवमस्तु हि चेत्याह लक्ष्मणो गुणलक्ष्मणः।
सीतयाऽपि तथा प्रोक्तं यथा रामेण भाषितम्।।230।।

इत्युक्त्वा सरितस्तीरे गृहं कृत्वा मनोहरो।
स्थितास्ते सुखतस्तत्र परं प्रेमनिबन्धनाः।।231।।

तन्दुलैर्वनगोदुग्धैः कृत्वा चान्नं सुनिर्मलम्।
घृतपूरैश्च पक्वान्नैः पत्रशाकैः परैर्युतम्।।232।।

भुक्त्वा निरन्तरं तेऽत्र रमन्ति लीलयाऽन्विताः।
वनगजैस्तुरङ्गैश्च सार्द्धं स्वनगरे यथा।।233।।

दानेनेह लभन्ति भोगवसुधा सौख्यं मनुष्याः सदा
भुक्त्वा तत्र चिरं सुखं बहुविधं मृत्वा ततस्ते नराः।
प्राप्यन्ते दिविजन्म निर्मलतनू रोगादिदोषोप्सितम्
मात्त्वं कुरु दानमेव सुखदं स्वर्गस्य मोक्षस्य च।।234।।

दानेन राज्यं लभते मनुष्यो
दानेन भोगस्य च भूरि जन्म।
दानेन नाको भवति प्रलोके
तस्मात्कुरु त्वं वरपात्रदानम्।।235।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते कुलभूषणदेशभूषणोपाख्यानं मुनिदानं पक्षिजटायुमेलापकं नदीतीरनिवासवर्णनो नाम एकोनविंशतितमोऽधिकारः।।19।।

❖❖❖

1. ससीतौ रात्रौ यग्मुः इति ग प्रतौ
2. पुष्पवने र इति ख प्रतौ।
3. एषः श्लोकः इति क प्रतौ अनुपलब्धते।
4. बलीवर्दै इति ख/ग प्रतौ अनुपलब्धते
5. वैशाख्यं इति ख प्रतौ
6. गुणभूषणाः इति ख/ग प्रतौ
7. भवेत् इति ग प्रतौ
8. को लानाति खः इति ख प्रतौ
9. गायति इति ख/ग प्रतौ
10. धरोति इति ख/ग प्रतौ
11. पूर्ववैराणां रब्धवान् इति ग प्रतौ
12. सराशनम् इति ख प्रतौ, सरासनम् इति क प्रतौ
13. दूतोमृतमुराख्योति इति ग प्रतौ
14. लम्पटी इति ख प्रतौ
15. पापादयादानादि वर्जितम् इति ग प्रतौ
16. सापं इति क/ख प्रतौ
17. तदाभूत् इति ग प्रतौ।
18. भैषी इति ख/ग प्रतौ
19. तांस्तपोधनम् इति ग प्रतौ
20. अनुधरा इति क/ख प्रतौ
21. राज्यं सुतेषु संस्थाप्य इति क/ख प्रतौ
22. रहस्यथ इति क/ख प्रतौ
23. क्रुद्धस्या इति क प्रतौ, क्रुद्धोऽसौ इति ग प्रतौ
24. चिरात्पादवर्तिनाम् इति ग प्रतौ
25. सुखरूपं इति ग प्रतौ
26. तस्य क/ख प्रतौ
27. पुरुषस्य भूभृतः इति ग प्रतौ
28. भव्यस्योत्तरकारणम् इति ख प्रतौ।
    लोकस्योत्तारकारणम् इति ग प्रतौ।
29. जगन्नाथौ इति ग प्रतौ

30. वह्निप्रभा तस्माच्छ्रुत्वा इति ग प्रतौ
31. गत्यागतिः इति ग प्रतौ
32. वैरकरिणीम् क/ख इति प्रतौ
33. जन्तुवः इति ग प्रतौ
34. पराम् इति क/ख प्रतौ
35. चिन्तामना इति क प्रतौ
36. व्यमापदि इति क प्रतौ, वयमायदि इति ग प्रतौ
37. मेघनिनदः इति क/ख प्रतौ
38. वंसापुरं इति क प्रतौ, वंसपुरु इति ग प्रतौ
39. स्थितः इति ग प्रतौ
40. लतापुष्पैः इति ग प्रतौ
41. निर्माणो इति ग प्रतौ
42. प्रापितं इति क प्रतौ
43. आगत्याश्रु इति क/ख प्रतौ
44. भोगलीलासमानसा इति ग प्रतौ
45. यावदेषोपनीतेन इति ख/ग प्रतौ।
46. तदा कुकर्म केनचित् इति ख प्रतौ
47. संहरेघोर इति ग प्रतौ
48. नरम् इति क प्रतौ , नरा इति ग प्रतौ।
49. समन्तोसौ इति क प्रतौ
50. करुणावदत् इति क प्रतौ , करुणावता इति ख प्रतौ।
51. वनैर्वतः इति ख/ग प्रतौ
52. ध्वनिना पापि इति ग प्रतौ
53. पूर्वभवस्मृतिः इति ख/ग प्रतौ
54. शय्या इति ख प्रतौ
55. रधुनाब्धिजा इति ग प्रतौ
56. सङ्गतः इति ख/ग प्रतौ
57. मयैव इति ग प्रतौ
58. स्वगुप्तिश्वदत्स्वस्य सुगुप्ते सर्मकारणम् इति ग प्रतौ
59. तर्पिताः इति ग प्रतौ

60. यो इति ग प्रतौ
61. भीत्वा इति त्रयौ प्रतौ, भित्वा इति पद्मपुराणे 2/41/112
62. समोद्दिष्टं इति ग प्रतौ
63. मुनिस्तस्य सा देशेनयत्सुतौ इति क प्रतौ
64. धयचिन्तया इति ख प्रतौ, धरचिन्तया इति ग प्रतौ, धर्मचिन्तया इति पद्मपुराणे 2/41/119
65. वाचि इति ख/ग प्रतौ
66. येनासावुपसाम्पति इति क/ग प्रतौ
67. संकल्प इति क प्रतौ
68. साकं इति ग प्रतौ
69. वक्ष्यसीदत्वं इति ग प्रतौ
70. वेदे तस्याः इति ख/ग प्रतौ
71. भविष्यति इति ख प्रतौ।
72. प्रपश्पते इति त्रयौ प्रतौ, प्रपत्स्यते इति पद्मपुराणे द्वितीयभागे 41/128
73. शरीरज: इति क प्रतौ, सरीरजा: इति ख प्रतौ
74. प्रमदी इति क प्रतौ
75. सङ्गतांगते इति ख प्रतौ
76. श्रवणत्वं इति त्रयौ प्रतौ परन्तु श्रमणत्वं इति स्यात्।
77. सकांशे इति क प्रतौ, शंकासे इति ख/ग प्रतौ
78. सञ्जातश्च समन्वित: इति क प्रतौ
79. मतौ इति क प्रतौ
80. अस्मिन्मात्रादि इति ख/ग प्रतौ
81. नदीपूर्णेन इति ख प्रतौ

❖❖❖

विंशतितमोऽधिकारः

शरत्काले[1] हि सम्प्राप्ते चाभ्रविह्वरवर्जितम्[2]।
चन्द्रसूर्यौ शुभिः सर्वमभून्निर्मलभूत्तलम्।।1।।
दृश्यन्ते सरसा वृक्षाः पर्वताः शोभयाऽन्विता।
महता[3] ध्वनिना युक्ताः पक्षिणो बहुजातयः।।2।।
कुर्वन्ति रामलक्ष्मीशसीतास्तत्र विचारणम्।
बन्धुवर्गं समानीय क्रियते नगरं पुरम्।।3।।
पश्य लक्ष्मण कुत्रात्र नगरहेतुकस्थलम्[4]।
रामस्य वचनं श्रुत्वा धनुः कृत्वा करे मुदा।।4।।
तदा लक्ष्मीधरो भ्राम्यंस्तस्मिन्नेव वनस्थले।
सुगन्धसौरभेणाऽसौ चाऽग्रेऽग्रे चाऽत्र गच्छति।।5।।
वंशजाले समुद्भूतं खड्गं दृष्ट्वा मनोहरम्।
वीरः किमिदमित्युक्ता जग्राह स्वकरेण तत्।।6।।
तस्य तीक्ष्णपरीक्षार्थं स्वशक्त्या च स लक्ष्मणः।
चिच्छेद वंशजालं तत् तेन खड्गेन बुद्धिमान्।।7।।
वंशजालेन सार्द्धञ्च शिरच्छिन्नञ्च कस्यचित्।
तद्दृष्ट्वा पापभीतोऽसौ लक्ष्मणो दुःखपीडितः।।8।।
गणेशं श्रेणिकोऽपृच्छत् कस्येदं मस्तकं विभो।
गणाधीशस्ततः प्राह शृणु राजन् कथां पराम्।।9।।
लङ्काया उत्तरे भागे दण्डकस्य च दक्षिणे।
योजनस्याऽष्टमे भागे पातालनगरं महत्।।10।।
अलङ्कारपुरं[5] नाम्ना समुद्रस्य तटे वरम्।
शत्रुभिरप्यसाध्यं तच्छतसो देशमध्यगम्।।11।।
नानाग्रामैश्च संयुक्तं तत्राऽभूत्खरदूषणः।
राजा तस्य महादेवी चन्द्रनखाऽभिधा वरा।।12।।
रावणस्य स्वसा ज्ञेया तस्य बभूवतुः सुतौ।
शम्बूकः प्रथमो ज्ञेयः सुन्दः सञ्ज्ञो द्वितीयकः।।13।।

मातुलगौरवाद्गर्वे वहन्तौ यौवनोद्धतौ ।
गुरुभिर्वीयमाणोऽपि शम्बूको मृत्युचोदितः ।।14।।
सूर्यहास्याभिधं खड्गं साधितुं दण्डकं गतः ।
वंशजालं समालोक्य गम्भीरं देवरक्षितम् ।।15।।
ब्रह्मचर्यव्रतोपेत एकभक्तसमन्वितः ।
एकवस्त्रधरोधीरो वंशजाले समाविशत् ।।16।।
गन्धधूपचरुपुष्पैः कृत्वा पूजां निरन्तरम् ।
करोति सूर्यखड्गस्य वर्षद्वादशसाधनम् ।।17।।
मध्याह्ने जननी चाऽस्य गृहित्वोदनभाजनम् ।
सिद्धखड्गं सुतं दृष्टुमागच्छति दिनं प्रति ।।18।।
पूर्णे द्वादशवर्षेऽथ सप्तमे दिवसे वरम्[6] ।
त्रिहस्तस्याऽन्तराले चागतं खड्गं तपोबलात् ।।19।।
तं दृष्ट्वा जननी तुष्टा गता सा भर्तुरन्तिकम् ।
प्रभो पुत्रस्तृतीयोऽह्ने[7] सिद्धविद्या दृढव्रती ।।20।।
आगमिष्यति मेरुं स गत्वाऽत्र नगरे वरम् ।
तस्यार्थं कुरु सामग्रीं महावैभवसंयुता ।।21।।
एवमस्त्विति भर्ता तामुक्त्वा करोति संभ्रमः ।
लक्ष्मणस्याऽस्य राज्ञोऽथ शृणु श्रेणिक वृत्तकम् ।।22।।
मस्तकं लक्ष्मणस्तत्र छिन्नं दृष्ट्वाऽतिव्याकुलः ।
रामस्य सन्निधिं प्राप्तः सूर्यहास्येन संयुतः ।।23।।
नत्वा पादौ च रामस्य सर्ववृतान्तमब्रवीत् ।
तच्छ्रुत्वा प्राह रामस्तं निमित्तज्ञो महाबली ।।24।।
कस्यचिन्मस्तकं छिन्नं विद्याभृतस्त्वया ततः ।
अस्माकं शृणु वत्सात्र महाऽनर्थो भविष्यति ।।25।।
इत्युक्त्वा सावधानौ तौ ससीतौ रामलक्ष्मणौ ।
सधनुष्कौ[8] समाविष्टौ सुखिनौ सुखलीलया ।।26।।

अथ चन्द्रनखा माता पुत्रं दृष्टुं समागता।
पतितं मस्तकं तावद्दृष्ट्वा रोदति दुःखतः।।27।।
केनेदं मस्तकं छिन्नं मे पुत्रस्य सुखासिनः।
चन्द्रबिम्बं समं रूपं कथं छिन्नं दुरात्मना।।28।।
सूर्यखड्गं करप्राप्तं नीतं केनाऽत्र पापिना।
इत्युक्त्वा मूर्च्छनं प्राप्ता शोकाऽनलेन दीपिता।।29।।
ततः सञ्ज्ञां स्वयं प्राप्य क्रोधपूरितमानसा।
पश्यामि कस्य चेष्टेयं[9] मम दुखस्य कारिका।।30।।
तं च निग्रहयिष्यामि[10] भर्तृ भार्तृकरेण वै।
इत्युक्ता दुःखिनीभूता साऽतस्ततश्च[11] पश्यति।।31।।
दूरतस्तौ ततो दृष्ट्वा कामदेवोपमौ शुभौ।
रूपलावण्यसमम्पन्नौ कलाविज्ञानभूषितौ।।32।।
पुत्रशोकं परित्यज्य कामव्याप्तशरीरिका।
अशोकस्य द्रुमस्याऽधश्चोपविष्टा निरादरा[12]।।33।।
रूपेण वनदेवाभा वनभारधरा वरा।
मायया कन्यका रूपं धृत्वा रोदति दीनता।।34।।
श्रुत्वाऽथ रोदनं तस्याः सीता तत्र समागता।
पृच्छति कस्य बाले त्वं पुत्री कस्य च वल्लभा।।35।।
एकाकिनी च कस्मात्त्वं कस्माद्रोदसि दुःखिनी।
मा भीषि वद कल्याणि यथावत्तव वृत्तकम्।।36।।
इत्युक्त्वा सा करे धृत्वा रामस्यान्तिकमानिता।
रामेणापि तया पृष्टा सीतावत् करुणात्मना।।37।।
साऽवोचल्लज्जया युक्ता मन्मथोद्रेकपीडिता।
बालत्वे मरणं प्राप्ता पित्रादयो मम प्रभो।।38।।
वस्त्रादिरहिताऽरण्ये भ्रमामि मृगवत्सदा।
कस्याप्यत्राश्रयो नास्ति यत्र गत्वा[13] ऽऽश्रयाम्यहम्।।39।।

एकश्चेद्युवयोर्मध्ये प्रेमादङ्गीकरोषि माम् ।
तदाऽहं सुखिनी नित्यं यामि तच्छरणं ध्रुवम्[14] ।।40।।
इत्युक्त्वा मौनमादाय स्थिताश्च स्वरूपिणी[15] ।
तच्छ्रुत्वा कालविज्ञानी[16] रामो जगाद तां प्रति ।।41।।
भो बालेऽत्रावयोर्मध्ये नाऽस्ति तव प्रयोजनम् ।
गच्छ त्वं यत्र ते कोऽपि दास्यति परमाश्रयम् ।।42।।
इत्युक्त्वा रामदेवेन तस्मान्निर्घाटिता तदा ।
साऽथ कोपवती भूत्वा गता स्वनगरं प्रति ।।43।।
तदाऽत्र लक्ष्मणो वीरस्तस्या रूपं विचिन्तवान् ।
चेतसि व्याकुलो भूत्वा तत्र स्थातुं न शक्तिवान् ।।44।।
तस्मादन्योपदेशेन रामाज्ञया स निर्गतः ।
बभ्राम चाटवीं सर्वां तां विलोकनहेतवे ।।45।।
दृश्यते सा न कुत्रापि रूपलावण्यसुन्दरी ।
चित्ते मत्वा तदाश्चर्यं निराशोऽभूत्स लक्ष्मणः ।।46।।
अतस्ततः समालोक्य स्वस्थानं पुनरागतः ।
उपविष्टः समीपेऽसौ रामस्य स्वबुद्धिमान् ।।47।।
अथ चन्द्रनखा मुग्धा पुत्रवियोगदुःखिनी ।
अलङ्कारपुरं प्राप्ता यत्रास्ति खरदूषणः ।।48।।
मुक्तकेशी मलीनाङ्गी छिन्नविग्रहशोकिनी ।
करोति विललापं सा जनानां दुःखदायकम् ।।49।।
पीडति[17] हृदयं स्वस्य मेघं वर्षति चक्षुषा ।
मूर्च्छां प्राप्य पुनर्दुःखात्पतति सा महीतले ।।50।।
खरदूषणभूपोऽत्र तच्छ्रुत्वा शीघ्रमागतः ।
किं जातं त्वं प्रिये कस्माद्रोदसि दुःखपूरिता ।।51।।
बाधिता[18] केन दुष्टेन दत्तदुःखञ्च केन वा ।
मुञ्च दुःखं विलापञ्च वद ते दुःखकारणम् ।।52।।

तन्निग्रहं करिष्यामि कर्णघ्राणादिछेदनम्।
चन्द्रनखां ततो दुःखाज्जगाद खरदूषणम्।।53।।
नाथ नाम्नाऽत्र शम्बूकस्तव पुत्रः सुलक्षणः[19]।
करोति सूर्यहासस्य साधनं दण्डके वने।।54।।
सस्त्रीकौ पुरुषौ तत्र दुष्टौ कस्मात्समागतौ।
ताभ्यां स मारितो बालो ध्यानतत्परसंस्थितः।।55।।
तव पुत्रकरं प्राप्तं खड्गञ्च गृहितं तथा।
कुर्वतो ध्वनिहुंकारांस्तत्रस्तः सिंहसन्निभौ।।56।।
दर्शनार्थञ्च पुत्रस्य तत्राऽहं प्रीतितो गता।
तदा पुत्रशिरच्छिन्नं दृष्ट्वा रुदति संस्थिता।।57।।
तत्रागत्य पुनस्ताभ्यां कामिभ्यां पीडिताप्यहम्।
पूर्वपुण्यानुयोगेन मम शीलं न खण्डितम्।।58।।
तस्मात्पलायनं कृत्वाऽऽगताऽहं तव सन्निधिम्।
अधुना नाथ मत्पुत्रवैरस्य साधनं कुरु।।59।।
पुत्रस्य मरणं श्रुत्वा दुःखतः खरदूषणः।
मूर्च्छां प्राप्तश्चिरं कालं सज्जनैश्चेतनीकृत।।60।।
हे पुत्र ! केन बालत्वे दुःखितोऽसि न[20] पुण्यवान्।
स कथमधुना दुष्टैर्मारितो विजने वने।।61।।
शोकमित्यादिकं कृत्वा सः पुनः कोपमागतः।
तेषामहं करिष्यामि शिरच्छेदं हि वेगतः।।62।।
इत्युक्त्वाऽन्तर्गृहं गत्वा विचार्य सचिवैः सह।
नीतं येन रविखड्गं स न का[21] पुरुषो भवेत्।।63।।
शम्बूकस्य वधं कृत्वा पुनस्तत्रैव ये स्थिता।
तस्माद्रावणराजाय दूतः प्रेषणियस्त्वरा[22]।।64।।
अमात्यानां वचः श्रुत्वा सम्प्रोच्य सर्ववृत्तकम्।
दूतं प्रेषितवान् लङ्कां दूषणो रावणं प्रति।।65।।

यावद्दूत[23]मुखाच्छ्रुत्वा क्रोधदीप्तो दशाननः।
कृत्वा सैन्यस्य सामग्रीमाऽऽयाति तावदत्र तु।।66।।
तुग्दुखाऽसहमानोऽसौ[24] निर्गतः खरदूषणः।
चतुरङ्गबलोपेतो नाना विद्याभिरावृतः।।67।।
विविधवाद्यसंयुक्तो दण्डके स समागतः।
सीता च तद्ध्वनिं श्रुत्वा भीता लग्ना पतेर्हृदि[25]।।68।।
न भेतव्यं न भेतव्यमित्याश्वास्य च जानकीम्।
जगाद राघवो देवि कोऽप्ययं खेचरो नृपः।।69।।
सुरो गच्छति वा मेरुं वन्दितुं श्री जिनोत्तमम्।
विवाहमङ्गलार्थं वा गच्छति कोऽपि वा खगः।।70।।
इत्यवदच्च[26] रामोऽसौ यावत्तावत्समागतम्।
समीपोऽरिमहासैन्यं दृष्ट्वा जगाद लक्ष्मणः।।71।।
वंशजालस्थपुंसोऽत्र कोऽपि पक्ष:[27] समागतः।
पश्य भो देव तस्येदं गजयूथं घनोपमम्।।72।।
वाजिनो वायुवेगाश्च रथाः पर्वतसन्निभाः।
पदातव्यो महादैत्या[28] दैत्यानां मुखभञ्जकाः[29]।।73।।
दुःशीलया तया नूनं स्त्रिया माया प्रवीणया।
निजाः संक्षोभितास्ते स्युरस्माकं दुःखदायकाः।।74।।
ततो जगाद रामोऽसौ शृणु लक्ष्मण लक्ष्मण।
त्वं यत्नं कुरु सीतायां एतांश्च मारयाम्यहम्।।75।।
ततस्तमञ्जलिं कृत्वा सुमित्रातनयोऽवदत्।
मयि स्थिते न समरम्भस्तव देव विराजते।।76।।
संरक्ष राजपुत्रीं त्वं प्रत्यरातिं[30] व्रजाम्यहम्।
ज्ञेया च सिंहनादेनं मम यद्यापदद्भवेत्[31]।।77।।
इत्युक्त्वा सागरावर्तं[32] खड्गञ्च सूर्यहासकम्।
गृहित्वा योद्धुमुद्युक्तो लक्ष्मणः प्रत्परिस्थितः[33]।।78।।

तं दृष्ट्वाऽथ महाधीरं भीता विद्याधरा हृदि।
तथापि योद्धुमुद्युक्ता भटा गगनगामिनः।।79।।
एकेनैव सुवीरेण निरुद्धा सकला चमूः।
बाणमेघैः समुच्छाद्य चाकुलव्याकुलीकृता।।80।।
पतन्ति लक्ष्मणैर्बाणै शिरांसि कमलानि वा।
विद्याभृतां नभःस्थानां भूषितानि सुकुण्डलैः।।81।।
गगनाद्गजवृन्दानि वाजिनश्च पदातयः।
पतन्ति मरणं प्राप्य लक्ष्मण बाणताडनैः।।82।।
अत्रान्तरेऽथ सम्प्राप्तो रावणो राक्षसाधिपः।
चतुर्बलेन संयुक्तो वेगेन दण्डके वने।।83।।
क्व क्व कुत्रेति शम्बूक वधकारी नरोऽधमः।
तन्निग्रहं करिष्यामीत्युक्ता सन्मुखमागतः।।84।।
तत्राऽग्रे रामसंयुक्तां रूपलावण्यभूषिताम्।
सीतां दृष्ट्वा च कामाग्निपीडितोऽभूत्स रावणः।।85।।
शम्बूकवधं विस्मृत्य सञ्जातो मदनाकुलः।
केयं कस्य च भार्या वा कस्य पुत्री क्व चागता।।86।।
किं करोमि क्व गच्छामि कथं मे स्त्री भविष्यति।
ममाऽनया विना सर्वं व्यर्थीभूतं गृहं धनम्।।87।।
यदि शक्त्या गृहिष्यामि तदाऽस्याः पुरुषो महान्।
युद्धेऽनेन कृतेऽस्माकं कलहोऽत्र भविष्यति।।88।।
परस्त्रीग्रहणे कीर्तिर्दूरादेव पलायते।
राक्षसाणां महावंशो मलीमशो भविष्यति।।89।।[34]
अस्याः संहरणोपायश्चिन्तनीयो मयाऽधुना।
जानायिति[35] यथा कोऽपि न करिष्याम्यहं तथा।।90।।
इत्युक्त्वा कर्णपैशाञ्ची विद्यामाकर्ष्य सोऽपृच्छत्।
कोऽयं कस्य समुद्भूतः[36] केयं[37] कस्य च वल्लभा।।91।।

ततोऽवदत्पिशाची सा रामोऽयं रघुवंशजः।
सीतेयमस्य भार्या हि प्राणेभ्योऽपि गरीयसी।।92।।

योऽसौ युद्धति लक्ष्मीशः स भ्राताऽस्यैव भक्तिकः।
सिंहनादेति[38] सङ्केते कृते रामो गमिष्यति।।93।।

अस्मिन् युद्धे च ते मित्रो दूषणोऽसौ मरिष्यति।
पिशाचीवचनं श्रुत्वा तथा चकार रावणः।।94।।

परस्त्रीलम्पटो दुष्टो विद्यामाहूय सिंहिनाम्[39]।
संशिक्ष्य प्रेषयामास रणे माया विधायिनीम्।।95।।

शस्त्रान्धकारिते जाते तयोश्चाऽथ महाहवे।
तत्र सिंहरवं कृत्वा रामरामेति संवदत्।।96।।

तं च सिंहरवं श्रुत्वा स्फुटं लक्ष्मणभाषितम्।
प्रीत्या रतिमय:[40] पद्मो व्याकुलीभूतमानसः।।97।।

निर्माल्यैर्जानकीं सम्यक् प्रच्छाद्यात्यन्तभूरिभिः।
क्षणमेकं प्रिये तिष्ट मा भैषीरिति संवदत्[41]।।98।।

वयस्य वनितां तावज्जटायू रक्ष यत्नतः।
किञ्चिदस्मत्कृतं[42] भद्र स्मरस्युपकृतं यदि।।99।।

इत्युक्त्वा वार्यमाणोऽपि शकुनैः क्रन्दनाकुलैः।
सतीमुक्त्वा महारण्ये वेगवान् प्राविशद्रणम्।।100।।

अत्रान्तरे समागत्य विद्यालोकनकोविदः।
सीतामुक्षिप्य बाहुभ्यां नलिनीमिव रावणः।।101।।

कामदाहगृहीतात्मा विस्मृताऽशेष धर्मधीः।
आरोपयितुमारेभे पुष्पकं गगनस्थितम्।।102।।

ह्रियमाणामथ प्रेक्ष्य[43] स्वामिनो वनितां प्रियाम्।
समरम्भवह्निदीप्तात्मा[44] समुत्पत्य महाजवः।।103।।

तीक्ष्णकोटिभिरत्यन्तं जटायुर्नखलाङ्गलैः।
दशाननमुरक्षेत्रं[45]चकर्षा[46]सृक्समाद्रितम्।।104।।

परुषैरदनान्तैश्च[47] वातसंपाटितांशुकैः[48] ।
जघानजवनैर्भूयः सर्वकार्यमलं[49] बलम् ।।105।।
इष्टवस्तुविघातेन रावणः कोपवानऽथ ।
हत्वा हस्ततलेनैव महीतलमजीगमत्[50] ।।106।।
ततोऽसौ परुषाघाताद्विह्वलीभूतमानसः ।
कुर्वन् केकायितं दुःखी खगो मूर्च्छामुपागतः ।।107।।
ततो निर्विघ्नमारोप्य पुष्पकं जनकात्मजाम् ।
जानतः[51] सङ्गतं कामं रावणः स्वेच्छया ययौ[52] ।।108।।
ज्ञात्वाऽपहृतमात्मानं रामरागातिशायनात्[53] ।
सीता शोकवती भूत्वा विललापार्त्त निःस्वना ।।109।।
ततः स्वपुरुषासक्तां हृदये कृतरोदनाम् ।
दृष्ट्वा सीतामभूत्किञ्चित् विरागीव दशाननः ।।110।।
इयं तु राममासक्ता[54] परपुंसि निरादरा ।
मयैषा वनिता कस्मात्कस्माच्चाङ्गीकृता मया ।।111।।
मारयाम्यधुनैषाञ्च तीक्ष्णखड्गेन पाणिना ।
इत्युक्त्वा हन्तुमारब्धो यावत्तावदचिन्तयत् ।।112।।
अहोऽबलेयमस्याश्चोपरिस्यान्मत्करः कथम् ।
वैरिवृन्दमहाघाते वहति यथा तीक्ष्णताम्[55] ।।113।।
सुविद्या परनारी च परराज्यं परं धनम् ।
शनैस्तदवश्यतामेति बुद्धिप्रेमसुयुक्तितः ।।114।।
अतो मद्गृहसाम्राज्यं दृष्ट्वाऽवश्यं भविष्यति ।
तावत्संरक्षणी यैषा गेहस्य पश्चिमे वने ।।115।।
यदि शक्त्या गृहिष्यामि तदा मे नियमोऽस्ति हि ।
गुरुणा चार्पिताऽन्यस्त्री शक्त्या न भोग्यते मया ।।116।।
प्राणत्यागोऽपि कर्तव्यः कर्तव्यं वा धनक्षयम् ।
व्रतभङ्गो न कर्त्तव्यो दुःखदायी भवे भवे ।।117।।

पतिव्रताञ्च नारीं वा बलेन गृहिते सति।
नश्यन्ति सकला विद्या तासां मे श्रापयोगतः ।।118।।
इति मत्वा विमाने तां संस्थाप्य विषयान्वितः।
गच्छति स्वेच्छया मूढ स्वलङ्कानगरं प्रति।।119।।
अथेषु वारिधाराभिराकुलं रणमण्डलम्।
प्रविष्टं राममालोक्य जगाद लक्ष्मणः सुधीः ।।120।।
हा कष्टं देव कस्मात्त्वं भूमिमेतामुपागतः[56]।
एकाकी[57] मैथिलीं मुक्ता विपिने विघ्नसङ्कुले।।121।।
तेनोक्तं त्वद्रवं श्रुत्वाऽऽगतोऽस्म्यहं त्वराऽन्वितः।
सोऽवोचद्गम्यतां शीघ्रं न साधु भवता कृतम्।।122।।
सर्वथा परमोत्साहो जयत्वं बलिनं रिपुम्।
इत्युक्त्वा शङ्कया युक्तो जानकीं प्रति राघवः।।123।।
क्षणान्निवर्त्तते यावत्तावत्तत्र न दृश्यते।
सीतेऽसि हृदयाच्चेतो रामश्च्युतममन्यत[58]।।124।।
हा सीत ! इति भाषित्वा मूर्च्छितो धरणीमगात्।
भर्त्रा तेन परिष्वक्ता बभूव भूमिभूषिता[59]।।125।।
सञ्ज्ञां प्राप्य ततो दृष्टिं निक्षिपत्[60] वृक्षसङ्कुले।
इति प्रेमपरीतात्मा जगादात्यन्तमाकुलः।।126।।
अयि देवि क्व याताऽसि प्रयच्छ वचनं द्रुतम्[61]।
चिरं किं प्रतिहास्येन[62] दृष्ट्वाऽसि तरुमध्यगा।।127।।
एह्यागच्छ[63] प्रयातोऽस्मि कार्यं कोपेन किं प्रिये।
जानास्येव चिरं कोपस्तव देवि न मे सुखम्।।128।।
त्वद्वियोगान्मृतं मां त्वं पश्यसि किं प्रिये वद।
मयि तव महाप्रीतिः सर्वेन्द्रिसुखदायिनी।।129।।
सर्वाः स्त्रियः परित्यज्य आगतोऽहं त्वया समम्।
न कर्तव्यः प्रिये कोपः एकाकिनं वने तु माम्।।130।।

एवं कृतध्वनिभ्र्राम्यत्प्रदेशं तं सुगह्वरम् ।
गृध्रञ्च मूर्च्छमैक्षिष्ट कृतकेकास्वनं शनैः ।।131।।

ततोऽत्यन्तविषणात्मा म्रियमाणस्य पक्षिणः ।
कर्णजापं[64] ददौ प्राप्तस्स तेनाऽमरकायताम् ।।132।।

तस्मिन्मृत्युं गते पद्मः शोकार्त्तः केवले वने ।
वियोगदहनव्याप्तः पुनर्मूर्च्छामशिश्रियत् ।।133।।

समाश्वास्य च सर्वत्र न्यस्य दृष्टिं समाकुलः ।
दीनं ललाप नैरश्यात् भूतेनैवार्त्तमानसः ।।134।।

रन्ध्रं प्राप्य वने भीमे हा केनाऽस्मिन् दुरात्मना ।
हरिता जानकी कष्टं हतो दुष्करकारिणा ।।135।।

भो भो सिंहा मृगा व्याला गावो द्विजा गजा वृकाः ।
भवद्भिः सात्र दृष्ट्वान् त्वं वदन्तु मम साम्प्रतम् ।।136।।

वृक्षादींश्च सुसम्प्रच्छ्य सीतायाः सुधिमुत्तमाम् ।
केनाऽपि कीथता नाऽस्मै पुनर्मूर्च्छां समागतः ।।137।।

पुनः सञ्ज्ञाञ्च सम्प्राप्य रामोऽसौ क्रोधपूरितः ।
धनुषा वज्रावर्तेन कृतो टङ्कारवो महान् ।।138।।

तेन नादेन सम्भीताः सिंहादिमृगजातयः ।
गर्जिताः पर्वताः सर्वे वृक्षाश्चलाचलापि ताः[65] ।।139।।

त्रुटिता[66] निर्झरा नीरैः कलकलायिता द्विजाः ।
तथाऽप्यप्राप्य[67] सीताया वार्ता मूर्च्छागतः पुनः ।।140।।

ततः शीतलवातेन सञ्ज्ञां सम्प्राप्य राघवः ।
गल्ले कृत्वा करद्वन्द्वमुपविष्टो महीतले ।।141।।

कर्मणः पश्य सामग्रीं यया दुःखं निरन्तरम् ।
पित्रादीनां वियोगोऽभूच्छीताऽपि विपने गता ।।142।।

कं पृच्छामि क्व गच्छामि किं करोमि वने घने ।
केन दुष्टेन नीताऽसि वा त्वं मृतासि दुःखिनी ।।143।।

किं वाक्यं मम मूर्खत्वं यत्तु बान्धवविवर्जिते[68]।
एकां मुक्तां वने सीतां गतो हरणं भूतले।।144।।
मध्ये बन्धवयोः सीता रक्षित्वाऽहं गतो न किम्।
पृष्टिभागेऽथ[69] वा बध्वा किं जाने कर्मणः फलम्।।145।।
इत्यादिविविधं शोकं कृत्वा व्याकुलचेतसः।
भूमौ पतति रामोऽसौ[70] प्राप्य मूर्च्छां पुनः पुनः।।146।।
अथ लक्ष्मीधरो वीरः सुखरदूषणस्य च[71]।
भटैः सार्द्धं स एकाकी युद्धं करोति दारुणम्।।147।।
एतस्मिन्नन्तरे प्राप्तः पूर्वोक्तः स विराधितः।
चन्द्रोदरनृपपुत्रश्चतुर्बलेन संयुतः।।148।।
आगत्य[72] लक्ष्मणं नत्वा प्रोवाच विनयं वचः।
देव ! पूर्वमलङ्कारनगरं मम गोत्रजम्।।149।।
अनेन खरदूषेन गृहितम् हि स्वशक्तितः।
आगमिष्यति भो देव मत्करे कृपया तव।।150।।
त्वमेकः खरदूषेण सार्द्धं युद्धं कुरु प्रभो।
अन्यान् दुष्टभटान् सर्वान् वेगेन मारयाम्यहम्।।151।।
तथाऽस्तु लक्ष्मणेनोक्तं ततो राजा विराधितः।
दूषणस्य भटानां हि सन्मुखोऽभून्महोत्सवः।।152।।
अहो भो सुभटाः सर्वे चागच्छन्तु रणाऽञ्जिरम्[73]।
चन्द्रोदरकुमारोऽहमागतो भवतां क्षयः।।153।।
श्रुत्वेति सुभटाः सर्वे रणभुमिः[74] समागताः।
उभयोः सेनयोस्तत्र[75] संलग्नं कदनं महत्।।154।।
हस्तिनो हस्तिभिः सार्द्धं वाजिनो वाजिभिः सह।
कुर्वन्ति कलहं वीराः पदातयः पदातिभिः।।155।।
पतन्ति ते गजारूढा मृत्युं प्राप्य परस्परम्।
लुनन्ति शिरः पद्मानि[76] निर्दयाः सुभटास्तदा।।156।।

हस्तिनां पादघातेन पतन्ति सुतुरङ्गमाः।
घोटकानां मुखाघातैः मृत्युं प्राप्ता नरोत्तमाः।।157।।

लक्ष्मणोऽपि करोत्यत्र सङ्ग्रामं लीलया तदा।
तं प्रति प्राह गर्वेण कोपाच्च खरदूषणः।।158।।

क्व यासि मूढ दूरात्मन् कृत्वा मत्पुत्रकं वधम्।
परस्त्रीलम्पटः पापी मरिष्यस्यधुना रणे।।159।।

स्मर कञ्चित्कुलदेवं यतस्ते सुगतिर्भवेत्।
लज्जया रहितो दुष्टः कथं तिष्ठसि मत्पुरम्[77] ।।160।।

संक्रुद्धो लक्ष्मणः प्राह कुवाक्यं खरदूषणम्।
किं गर्जसि वृथा मूर्ख गजाग्रे कुक्करो यथा।।161।।

यत्र गतस्तु पुत्रस्ते तत्र त्वां प्रेषयाम्यहम्।
इत्युक्त्वा बाणघातेन दूषणं पातितो रथात्।।162।।

सप्तवारां स दुष्टात्मा विरथीकृतवांस्तदा।
गजारूढो गजाच्चाऽपि पातितो लक्ष्मणेन वै।।163।।

ततस्तु पादमार्गेण लक्ष्मणस्याऽभिमुखोऽभवत्।
ततस्तयोर्महायुद्धं जातं भीरुभयप्रदम्।।164।।

परस्परं महाघातैर्गजिताः पर्वता अपि।
देवानां विस्मयो जातो नृत्यन्ति ग्रहनारदाः।।165।।

ततस्तु सूर्यहास्येन लक्ष्मणेन महात्मना।
दूषणस्य शिरच्छिन्नं कुण्डलमुकुटान्वितम्।।166।।

दूषणोऽसौ गतः प्राणः पतितः पृथिवीतले।
स्वर्णस्य पुरुषाकारो मन्मथस्याकृतिस्तथा।।167।

दूषणस्याऽथ सेनानी नाम्ना सुभगदूषणः।
विराधितस्य संभक्तुं रथं यावच्च वाञ्छति।।168।।

तावल्लक्ष्मणवीरेण भिण्डीमालेन ताडितः।
वक्षसि पतितो भूमौ गतः प्राणतनुः पतिः।।169।।

सेनाधिपे मृते तस्य सुभटास्तु पलायिताः।
अभयघोषणं दत्वा ते लक्ष्मणेन रक्षिताः।।170।।
ततो विराधितायास्मै समर्प्य रणशोधनम्[79]।
जयं सम्प्राप्य लक्ष्मीशः पद्माभस्यान्तिकङ्गतः।।171।।
सीतया रहितं रामं दृष्ट्वा मूर्च्छां समागतम्।
उवाच लक्ष्मणो भ्रातः किं सुप्तोऽसि क्व जानकी।।172।।
उत्थाय सहसा दृष्ट्वा लक्ष्मणं निर्व्रणाङ्गकम्।
किञ्चित्प्रमोदमायातः परिष्वज्य ससादरः[80]।।173।।
जगाद भद्र नो वेद्मि देवी केनाऽपि किं हृता[81]।
उत सिंहेन[82] किं भुक्ता न दृष्टाऽत्र गवेषिता।।174।।
पातालं किं भवेन्नीता नभः शिखरमेव च।
उद्वेगेन विलीना वा सुकुमारशरीरिका।।175।।
ततः क्रोधपरीताङ्गो विषादो लक्ष्मणोऽवदत्।
देवोद्वेगाऽनुबन्धेन न किञ्चिदपि कारणम्।।176।।
परिसान्तव्योत्तमैर्वाक्यै[83]र्विविधैः श्रुतिपेशलैः।
विमलेनाऽम्भसा वक्त्रं तस्य प्रक्षालयन् सुधीः।।177।।
श्रुत्वा तावदलं तारं शब्दमुक्तानितानन:।
अपृच्छ्रीधरं रामः संभ्रमं[84] किञ्चिदापयन्।।178।।
किमेषा नदति क्षोणी गगनात्किमियं ध्वनिः।
किं कृता भवता पूर्वं शत्रुशेषं मयोज्झितम्[85]।।179।।
सुमित्राजस्ततोऽवोचन्नाथोऽनेन महाहवे।
उपकारो महान् काले खेचरेण कृतो मम।।180।।
चन्द्रोदरसुतः सोऽयं विराधित इति श्रुतिः।
प्रस्तावे देव तेनैष[86] हितेन परिढौकितः।।181।।
चतुर्विधेन दण्डेन महताऽस्य सुचेतसः।
आगच्छतो महानेषः शब्दः श्रुतिमुपागतः।।182।।

विश्रब्धो चेतसोर्यावत्कथेयं वर्तते तयोः।
तावन्महाबलोपेतः परिप्राप्त विराधितः।।183।।
ततो जयजयस्वानं कृत्वा विरचिताञ्जलिः।
जगाद खेचरस्वामी प्रणतैः सचिवैः समम्।।184।।
स्वामी ! त्वं परमोऽस्माभिश्चिरं प्राप्तो नरोत्तमः।
अतः प्रदीयतामाज्ञां नाथ कर्तव्यवस्तुनि।।185।।
इत्युक्तो लक्ष्मणोऽभाणीत् साधो[87] शृणु सुवर्तनम्।
गुरोः केनाऽपि मे पत्नी हृता दुर्नयवर्तिना।।186।।
तया विरहितः सोऽयं पद्मः शोकवशीकृतः।
यदि नाम त्यजेत्प्राणांस्ततो वह्निं विशाम्यहम्।।187।।
एतत् प्राणदृढासक्तान् भद्रप्राणा न वै हि मे।
ततोऽत्र प्रकृते किञ्चित्कर्तव्यं कारणपरम्।।188।।
एतच्छ्रुत्वाह चिते स्वे विराधितः स्वदुःखतः।
भ्रान्त्वा दुःखसमुद्रस्य पारं लभामि न क्वचित्।।189।।
रामचन्द्राश्रया[88] ज्ञातं मे दुःखान्तो भविष्यति।
ततस्तु कर्मणश्चित्र्यादस्यैव दुःखमागतम्।।190।।
तथापि स्वं दृढकृत्वा मनोऽवदद्विराधितः।
देव! चिन्ता न कर्तव्या त्वत्पत्नीमानयाम्यहम्।।191।।
इत्युक्त्वा सुभटाः स्वस्य प्रेषितास्ते दशो दिशि।
लोके नभसि पाताले पर्वते दुर्घटे वने।।192।।
पुरे ग्रामे नदी वापी सदनसागरादिषु।
सर्वत्रालोकनं तैश्च कृतं सुप्रीतितो रघो।।193।।
सीता दृष्टा न कुत्रापि निराशा सुभटा जनाः।
व्याघुट्य चागतास्तत्र पद्माभस्यान्तिकं पुनः।।194।।
तेषां मुखानि चालोक्य रामो दुःखादिदमवदत्।
गते भाग्ये कुतो लक्ष्मी[89] कुतो राज्यं[90] कुतो यशः।।195।।

अन्यथा चिन्तते जीवो दैवः करोति चान्यथा।
सन्तृप्त्यर्थं रुषोमांसं[91] संगृह्णन् मृत्युताङ्गतः।।196।।
पश्यति यस्य देवोऽत्र मार्गन्तु दुष्टचेतसा।
बलिष्टोऽपि नरस्तत्र किं करोति पराक्रमम्।।197।।
समुद्रे पतितं रत्नं कुतो लभन्ति पापिनः।
यूयं तु सुभटा जाता दुखिनो मम दुःखतः।।198।।
ममाशामधुना त्यक्ता यूयं लक्ष्मणसंयुताः।
गच्छन्तु स्वालयं शीघ्रं प्राणत्यागं करोम्यहम्।।199।।
सीतया रहितो वत्सः कथं शोभां लभाम्यहम्।
प्राणस्य त्यजनं रम्यं न तु सीतावियोगकम्।।200।।
मातृपित्रादिभिर्वर्गैर्भ्रमामि रहितो वने।
तथापि दैवपापेन[92] न मुक्तः सीतया समम्।।201।।
इत्यादि विविधालापं कृत्वा रुदति राघवः।
लक्ष्मणाद्याश्च तं दृष्ट्वा रुदन्ति कृतनिःस्वनाः।।202।।
विराधितस्ततः प्राह शृणु रामनरेश्वर।
दुःखे कृतेऽत्र सीता किं लभते दुष्टसंहृता।।203।।
तस्मात्त्वं धैर्यमालम्ब्य कुरु कार्यस्य कारणम्।
जीविते लभते लक्ष्मी राज्यं सौख्यं वराङ्गना।।204।।
विद्याधरनराधीशे मारिते खरदूषणे।
भविष्यति महान् द्वेषो बहुभिः खेचरैः समम्।।205।।
सुग्रीव मेघनादेन्द्रजित्कुम्भकर्णवायुजाः।
इत्यादि बहवः सन्ति नृपा दूषणपक्षकाः।।206।।
दूषणमरणं श्रुत्वाऽऽगमिष्यन्ति नभश्चराः।
तस्मादुत्तिष्ट गच्छामश्चाऽलङ्कारपुरम्वरम्।।207।।
तत्र स्थित्वा परं बुद्ध्या पदातीन् प्रेषयाम्यहम्।
सीतावार्तां समानेतुं वेगाद्धामण्डलं प्रति।।208।।
स चाहं च मिलित्वाऽत्र सीतायास्तव सर्वथा।
मेलापकं करिष्यामि नान्यथा मम जीवितम्।।209।।

इत्यादिविविधैर्वाक्यैः सन्तोष्य रघुनन्दनम्।
रथमारुह्य सम्प्राप्ता अलङ्कारपुरम्वरम्।।210।।
चतुरङ्गबलोपेतैरागत्य नगरञ्च तैः।
संवेद्य गृहितं सर्वद्रव्यैः पूर्णं मनोहरम्।।211।।
पश्चिमद्वारतो नष्टा चन्द्रनखा भयातुरा।
लघुपुत्रेण संयुक्ता भग्ना युद्धे पराङ्मुखाः।।212।।
ततो विविधवाजित्रैर्जयशब्दैः समन्वितैः।
प्रविष्टो नगरं स्वस्य चन्द्रोदरसुतस्तदा।।213।।
पूर्वनृपं समालभ्य पौराश्च सुखिनोऽभवत्।
तत्रोत्तमे महावासे स्थितो रामः सलक्ष्मणः।।214।।
स्वर्गस्य सन्निभावासे स्थितोऽपि रघुनन्दनः।
मन्यते स विना सीतां श्मसान सदृशं च तत्।।215।।
तत्र सद्मनि जैनेन्द्रं गेहं दृष्ट्वा मनोहरम्।
सहस्रस्तम्भनिर्माणं जिनबिम्बैर्विराजितम्।।216।।
पूजित्वा च जिनं भक्त्या सन्तुष्टो मनसि क्षणम्।
उपविष्टो गृहोद्याने नानाद्रुमसमाकुले।।217।।
विराधितः कुमारोऽसौ लक्ष्मणेन समं तदा।
स्थितो रामसमीपेऽन्ये यथायोग्यञ्च संस्थितः।।218।।
सीतावार्तां समानेतुं कुर्वन्त्यत्यन्तचिन्तनम्।
तथापि कुत्रचिन्नैव तस्या वार्तां लभन्ति ते।।219।।

पूर्वस्य[93] पापेन भवेद्दरिद्री
करोति पापं पुनरेव पापी।
नानाप्रकारं सहतेऽत्र दुःखं,
तस्माद्विमुञ्चस्व कुपापसाधनम्।।220।।
जीवस्य हिंसाकरणस्य दोषै-
रसत्यवादैत्तपरचौर्यकृत्यैः।
परस्य नारीगमनेन नित्यं
फलोति पापस्य कुपापसाधनम्।।221।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते शम्बूकवधसीतावियोगखरदूषणमरणालङ्कारपुरप्रवेश वर्णनो नाम विंशतितमोऽधिकारः।।20।।

1. सरत्कालेऽथ इति ख/ग प्रतौ
2. विद्रुरवर्जितं इति क प्रतौ, विड्डुरवर्जिते इति ख/ग प्रतौ
3. सहिता इति क प्रतौ, महाता इति ग प्रतौ
4. नगरं हेतुकं छलं इति ख प्रतौ
5. अलङ्कारो परं इति क/ग प्रतौ
6. परम् इति ग प्रतौ
7. तृतीयाऽह्नि इति क/ख प्रतौ
8. साध्यानुष्कौ इति ख प्रतौ, सधानुष्कौ इति ग प्रतौ
9. चेष्टोऽयं इति ख प्रतौ
10. तं मानी निग्रहष्यामि इति ग प्रतौ
11. सा ततश्च प्रपश्यति इति ख प्रतौ, सातस्ततश्च पश्यति इति ग प्रतौ
12. निरादरी इति ख/ग प्रतौ
13. यं च इति क प्रतौ, यत्रागत्वा इति ग प्रतौ
14. तच्छरणं करिष्यामि नो चेन्मरणं ध्रुवम् इति ख/ग प्रतौ
15. स्थिता सा शीस्वरूपिणी इति क प्रतौ, स्थिता शास्वरूपिणी इति ख प्रतौ
16. कलविज्ञानी इति ख प्रतौ
17. पीडिता इति ग प्रतौ
18. मारिता इति ग प्रतौ
19. सुलक्ष्मणः इति ख प्रतौ
20. ना इति क प्रतौ
21. स ते का इति ग प्रतौ
22. प्रेषणीयं तरा इति क प्रतौ
23. यावदेतन् इति ग प्रतौ
24. दुग्दुःखासहमाानोऽसौ इति ख प्रतौ, सुतदुःखासहमानौऽसौ इति ग प्रतौ
25. पते कटि इति ग प्रतौ
26. तदावदच्च इति ग प्रतौ
27. पक्षी इति क प्रतौ, यक्षः इति ग प्रतौ
28. अग्रेसरा महापत्ति इति ग प्रतौ
29. पदातयो महादैत्यानां सुखभंजकाः इति ख प्रतौ

30. प्रत्यशंति इति ख प्रतौ, प्रतिराति इति ग प्रतौ
31. यद्यायदुद्भवेत् इति ग प्रतौ
32. सागरावर्ते इति क प्रतौ
33. प्रत्परिंस्थित: इति क प्रतौ
34. एष: श्लोक: क प्रतौ अनुपलब्ध:।
35. जानिषिति इति ख प्रतौ, जानीषिति इति ग प्रतौ अस्पष्ट:।
36. समुद्भव: इति क प्रतौ
37. कायं इति ख प्रतौ।
38. सिंहनादे तु इति क/ख प्रतौ
39. सिंहिनां इति क प्रतौ
40. प्रीत्याशतिमयं इति क प्रतौ
41. मा भीषिरिति संगदत् इति क प्रतौ
42. किंचिदस्मान्कृतं इति ख प्रतौ
43. ह्रियमाणामथाप्रेष्य इति क प्रतौ
44. वह्निदीप्ता स इति क प्रतौ
45. दशाननमुरुक्षेत्रं इति क/ख प्रतौ
46. च कर्ष इति ख प्रतौ, चकार्षा इति ग प्रतौ
47. परुषैश्छदनान्तैश्च इति पद्मपुराणे 2/44/87
48. अंशुकम् इति क प्रतौ
49. सर्वकायमलं इति पद्मपुराणे 2/44/87
50. महीतलमहीगमत् इति ग प्रतौ
51. जानान: इति पद्मपुराणे द्वितीयभागे 44/90
52. जयौ इति ग प्रतौ
53. रामरामाऽतिशायनात् इति क/ख प्रतौ
54. राम मा शक्ता इति ग प्रतौ
55. वहति यथ तीक्ष्णताम् इति ख प्रतौ, कथं वैरवृन्दमहाघाते वहती यस्य तीक्ष्णताम् इति ग प्रतौ
56. भूमिमेवमुपागत: इति ख/ग प्रतौ
57. एकेकां इति क/ख प्रतौ

58. रामश्च्युतममान्यता इति क प्रतौ।
    रामश्च्युतममान्यत इति ख प्रतौ।
59. भूमिर्बभूवभूषिता इति ख/ग प्रतौ
60. दृष्ट्वा निक्षिपन् इति ग प्रतौ
61. दूतं इति ख प्रतौ
62. परिहास्येन इति क प्रतौ
63. एह्यागत्य इति ख प्रतौ
64. कर्णजा इति ख प्रतौ
65. वृक्षाश्चश्चपलापिता इति क प्रतौ, वृक्षाश्चलाश्चलापि ता: इति ख प्रतौ,
    वृक्षाश्च ध्वनिलापिता इति ग प्रतौ, वृक्षाश्चलाऽचलापि ता: इति मूलप्रतौ एतत् कृतम्।
66. त्रूटिता इति क प्रतौ
67. तथापि प्राप्य इति ग इति प्रतौ
68. बन्धविवर्जिते इति क प्रतौ, बन्धववर्जितम् इति ग प्रतौ
69. पृष्टभागे इति ग प्रतौ
70. रामस्यै इति ग प्रतौ
71. वीर: स्ते खरदूषणस्य च इति ग प्रतौ
72. आगतं इति ख प्रतौ
73. रणागिरं इति ग प्रतौ
74. रणभुवि इति क प्रतौ, रणभूमि इति ग प्रतौ
75. सैनयोस्तत्र इति ख प्रतौ
76. शिरपद्मार्नि इति ख प्रतौ
77. मत्पुरः इति क/ख प्रतौ।
78. त्रयौ प्रतौ द्वितीये पादे नवपदा लिखिताः।
79. रणसोधनम् इति ख/ग प्रतौ
80. स सीरिणम् इति क प्रतौ
81. किं कृता: इति ख प्रतौ, कि कृतां इति ग प्रतौ
82. वनसिंहेन इति क प्रतौ, उभसिंहेन इति ख प्रतौ
83. परिसोच्योत्तमैर्वाक्यै इति ख प्रतौ, परिशान्त्योत्तमैर्वाक्यै इति ग प्रतौ
84. संभ्रामं इति क प्रतौ

85. मृतोप्तिसतम् इति क प्रतौ
86. देवतैनेव इति ख प्रतौ
87. साधु इति ख प्रतौ
88. राचन्द्रान्मया ख/ग प्रतौ
89. रामा इति क प्रतौ
90. रामा इति ख/ग प्रतौ
91. रुषो मांसं इति ख प्रतौ, रुषे/कषे मांसं इति क प्रतौ, कषो मां स गृह्णन् इति ग प्रतौ
92. देवपापेन इति ग प्रतौ
93. सर्वस्य इति क प्रतौ

❖❖❖

एकविंशतितमोऽधिकारः

अथ विमानमारूढो गच्छति स दशाननः।
सीतया सहितः कामी लीलया धनगर्वतः।।1।।

सीताया रोदनं दृष्ट्वा रामस्मरणसंयुतम्।
संप्रीत्याह दशास्योऽसौ शृणु देवि विवेकतः।।2।।

स भूमिगोचरी रामो विद्यालक्ष्मीविवर्जितः।
त्यजाशां तस्य मूर्खस्य कुरु भोगं मया समम्।।3।।

अहं तु राक्षसाधीशो नानाविद्याविवेकवान्।
शक्तियुक्तो धनैः पूर्णः कामशास्त्रविशारदः।।4।।

अष्टादशसहस्राणां नारीणां मध्यमुख्यताम्।
त्वां करिष्यामि सुप्रीत्या शची स्वर्गे तथा भव।।5।।

वा ममोपरि देवि त्वं कृपां कृत्वा सुखं भज।
तव दुःखान्मरिष्यामि तत्पापं ते भविष्यति।।6।।

तव सेवां करिष्यामि दासवत्प्रीतितः प्रिये।
इत्युक्त्वा चरणौ नत्वा यावत्स्पृशति तत्तनुम्।।7।।

तावदुवाच सीता तं[1] धिग् पापिन् तव जीवितम्।
परस्त्रीसङ्गमात्श्वभ्रं गमिष्यसि कुपापतः।।8।।

धिग् धिग् क्व तव साम्राज्यं धिग् लक्ष्मी तव पापिनी।
मां[2] स्पर्शितुं न योग्यस्त्वं पापाचारी दुरात्मकः।।9।।

दूरं तिष्टस्व भो दुष्ट ! सतीनां स्पर्शमात्रतः।
दु:खं प्राप्यसि घोरं त्वं भस्मीभावं भविष्यसि।।10।।

मनसा तनुना वाचा सतीनां यः पराभवम्।
करोति तस्य साम्राज्यं लक्ष्मीविद्याक्षयङ्गताः।।11।।

इत्युक्त्वा रोदनं कृत्वा विललापती सा सती।
हा लक्ष्मीधर ! हा राम ! हा भामण्डलभूपते।।12।।

हा जनक हि मे तात हा विदेहे सुखप्रदे।
आगच्छ कुरु नाशं मे दुःखस्य कृपयान्विते।।13।।

इति विलापसंयुक्तं सीतया सह रावणः।
जय वर्द्ध[3] स्व सुशब्दैः प्राप्तो लङ्कापुरं वरम्।।14।।
नानावाद्यविनोदेन सर्वैश्च सचिवैः सह।
गतः स्वमन्दिरं रम्यं नानाधातुविनिर्मितम्।।15।।
गृहस्य पश्चिमोद्याने संस्थाप्य जनकात्मजाम्।
अन्तर्ग्रहे सभायां स गत्वा स्थितो दशाननः।।16।।
सञ्ज्ञातं सीतया तावदिदं विद्याधरं पुरम्।
अनेन पापिनां हृत्वा नीताऽहं विषयार्थिना।।17।।
यावन्नायाति रामस्य वार्ता तावन्ममाऽस्तु हि।
जलाऽन्नं नियमात्त्यागं इति व्रतं कृतं मया।।18।।
अथ रावणभूपाऽग्रे सहस्राऽष्टादशप्रमाः।
तस्य नार्यो रुदन्यत्र दूषणमरणं श्रुता।।19।।
तावच्चन्द्रनखा प्राप्ता सुन्दपुत्रेण संयुता।
हस्तिरथतुरङ्गादीन् मुक्ता सज्जनवेष्टिता।।20।।
मुक्तकेशी पतेः शोकं करोति रावणाग्रतः।
हाहाकारमयं जातं रावणस्य गृहं तदा।।21।।
दशाननस्ततः प्राह भग्निचन्द्रनखे शृणु।
संसार ईदृशो लोके न कस्याऽपि स्थिरो भवेत्।।22।।
अग्रे पश्चाच्च सर्वेषां मरणमेव निश्चितम्।
ततः शोकेन किं कार्यं व्यर्थं पापस्य कारणम्।।23।।
त्वद्भर्तुर्वधकस्याऽहं करिष्यामि वधं त्वरा।
दानपूजादिकं कृत्वा त्वं तिष्ट मद्गृहे सुखम्।।24।।
इत्याश्वास्य स्वभग्नीं तां रावणोऽन्तःपुरङ्गतः।
निरादरेण संसुप्तस्तल्पे व्याकुलमानसः।।25।।
व्याकुलं पुरुषं दृष्ट्वा नत्वा मन्दोदरी वदत्।
नाथ कस्माद्विषण्णोऽसि किं न करोषि भोजनम्।।26।।

विनोदवदनैर्वार्तां कथं न क्रियते प्रभो।
किं नष्टं दूषणे मृत्ये शोकं करोषि धीर्यधीः।।27।।

बहवः कदने पूर्वं त्वद्बन्धवः क्षयङ्गताः।
तदा नाऽत्र कृतं दुःखमधुना किं गतं तव।।28।।

ततः प्राह विहस्येदं सुखं मे यदि वाञ्छसि।
तदा कोपो न कर्तव्यो ममोपरि त्वया प्रिये।।29।।

शोकस्य कारणं वच्मि यदि दास्यसि सौकृतम्।
कोपेन रहिता देवि शृणु चैकाग्रचेतसा।।30।।

ततश्च शपथं तस्या गृहित्वा रावणोऽवदत्।
भूचरवनिता सीता स्थापिताऽस्ति वने मया।।31।।

सा न भवति मे वश्या नानोपाये कृते मयि।
तद्दुःखेन मरिष्यामि कामज्वरेन पीडितः।।32।।

शक्त्या यदि ग्रहिष्यामि तदास्ति नियमो मम।
गुरुदत्तः परस्त्रीषु शक्तिर्न क्रियते मया।।33।।

मन्दोदरी ततः प्राह कथं सा पापिनी विभो।
तव रूपं धनं दृष्ट्वा या न मोहति विप्लवा।।34।।

वश्यं कृत्वा मया नाथ दीयते सा च ते सती।
त्वं कुरुस्त्वं समाधानं शरीरस्य प्ररक्षणम्।।35।।

इत्युक्त्वा सा गता शीघ्रं सीता वर्तति यद्वने।
अष्टादशसहस्रैश्च सपत्नीभिः समं सती।।36।।

तां दृष्ट्वा पूर्वमोहेन प्राह मन्दोदरी सती।
अयि कन्येऽत्र कस्मात् त्वमागताऽसि विरूपताम्।।37।।

विद्याधरनरेशस्य कथं वश्यं न गच्छसि।
कस्मात्करोषि शोकं त्वं रावणं प्राप्य सुप्रियम्।।38।।

विना पुण्येन दशास्यो भर्ता न लभ्यते कदा।
तस्माच्छोकं परित्यज्य कुरु रावणसङ्गमम्।।39।।

अष्टादशसहस्राणां मध्ये त्वं गुरुतां भज।
किं भूगोचरिणां त्यागे गतं तव शुभानने॥40॥
रावणे कुपिते कन्ये तावकौ रामलक्ष्मणौ।
जानीहि त्वं मृतावेव नाऽन्यथा मम भाषितम्॥41॥
इत्युक्त्वा रोदनञ्चक्रे सीता परमसुन्दरी।
तदा मन्दोदरी प्राह पुत्रीमोहेन मोहिता॥42॥
कस्माद्रुदसि बाले त्वं त्वां दृष्ट्वा मम साम्प्रतम्।
जातोऽस्ति परमो मोहो मातुर्यथा सुतादिषु॥43॥
सीता प्राह तदैवं चेन्मोहोऽस्ति मम साम्प्रतम्[4]।
रक्ष शीलव्रतं रम्यं कृपां कृत्वा सदा सुखम्॥44॥
तदा सा प्राह भो पुत्रि चैवमेव भविष्यति।
तव शीलेन सर्वासां नारीणां भूषणं भवेत्॥45॥
एतस्मिन्नन्तरे प्राप्तः स्वयमेव दशाननः।
सीतां मदनतां वार्ता गङ्गावेणीमिवद्विपः[5]॥46॥
समीपीभूय चोवाच परं मधुरया गिरा।
किञ्चिद्विहसितं कुर्वन् मुखचन्द्रं महादरः॥47॥
वस्तुना केन हीनोऽहं जगत्त्रितयवर्तिना।
न मां वृणोषि भो देवि तस्याऽत्र कारणं वद॥48॥
इत्युक्त्वा स्पर्शितुं कामं सीताऽवोचत्ससंभ्रमा।
अपसर्प ममाङ्गानि मा स्पृश पापमानस:[6]॥49॥
नीचस्य च कुशीलस्य विभवाः केवलमलम्।
जनस्य साधुशीलस्य दारिद्र्यमपि भूषणम्॥50॥
चारुवंशप्रसूतानां जनानां शीलहानितः।
लोकद्वयविरोधेन शरणं मरणं वरम्॥51॥
एतस्मिन्नन्तरे तस्याः शोकं द्रष्टुमशक्यतः।
अस्तं गतो दिवानाथश्चान्धकारोऽभवत्तदा॥52॥

मायया सिंहसर्पादि रूपाणि रावणेन ताम्।
दर्शितानि तथाप्यत्र शीलाच्च्युता न जानकी।।53।।
उपसर्गेण संयुक्ता गता रात्रिर्भयङ्करा।
शीलपुण्येन सञ्जातं प्रभातं निर्मलं पुनः।।54।।
ततो वस्त्रान्तरे क्षिप्त्वा सीतां बहिश्च रावणः।
उपविष्टः सभां कृत्वा सामीप्यस्थ मनोहराम्।।55।।
खरदूषणमृत्युं तच्छुत्वा विभीषणादयः।
आगताः शोकसन्तप्ता रावणस्यान्तिकं स्थिता।।56।।
ततः पटान्तरे श्रुत्वा स्त्रीकृतां शोकसद्ध्वनिम्।
पृच्छति तां पटं त्यक्ता शोकवतीं विभीषणः।।57।।
भो भगिनी ! कस्य पुत्री त्वं कथं रोदसी दीनताम्।
ततो नेत्राऽश्रुपूर्णा सा शृणु भ्रातर्जगाद च।।58।।
सुताऽहं जनकस्याऽथ स्वसा भामण्डलस्य च।
वनिता रामदेवस्य सीताख्या प्राणवल्लभा।।59।।
दण्डके रामलक्ष्मीशौ गतौ कदनहेतवे।
तावदनेन दुष्टेन हृत्वाऽहमानिताऽत्र भो।।60।।
यावद्रामो वियोगान्मे न मृतोऽस्ति शृणु प्रभो।
तावत्तस्मै कुरुष्व त्वं ममात्राऽऽगमकारणम्।।61।।
इत्युक्त्वा शोकसन्तप्ता पुन रोदति सा सती।
विभीषणोऽथ तच्छुत्वा कोपसञ्जातमानसः।।62।।
जगाद रावणं नत्वा किं कृतं भो विवेकिना।
त्वया देव परस्त्रीणां हरणं पापकारणम्।।63।।
परस्त्रीसङ्गपापेन जायतेऽत्र कुलक्षयम्।
अपकीर्त्तिश्च लोकेऽस्मिन् परस्मिन्नरको भवेत्।।64।।
मुञ्च सीतां कृपां कृत्वा ममोपरि नराधिपः।
दशाननस्ततः प्राह शृणु भ्रातर्विभीषण।।65।।

लोके यदस्ति सारं तन्मदीयं सर्वथा भवेत्।
वस्त्ररत्नगजाः सुस्त्री परस्य न भवेत्कदा।।66।।

इत्युक्त्वा विकथां कर्तुमारब्धो रावणः प्रभुः।
मारिचेन समं तत्र ततस्तं प्राह मारिच।।67।।

नाथ न्यायसुमार्गेण गन्तव्यं भूभृतां सदा।
लोकविरुद्धपापेन वंशनाशो भविष्यति।।68।।

श्रवणं धर्मशास्त्रस्य रावणस्य न रोच्यते।
मत्वेति तत उत्थाय वनं गन्तुं समुद्यतः।।69।।

त्रैलोक्यडम्बरं[7] नागं चोपविष्टो दशाननः।
सामन्तैर्वाद्यनिर्घोषैः सहितो निर्गतो पुरात्।।70।।

आरोप्य पुष्पकं[8] सीतां पतिवियोगव्याकुलाम्।
स्वलक्ष्मीं दर्शयन् हर्षात् गच्छति लीलयाऽन्वितम्।।71।।

वरान्नश्वान् गजान् स्थलान् पदातीश्च रथान् वरान्।
लङ्कापत्नं सश्रृङ्गारं स दर्शयति[9] जानकीम्।।72।।

इत्यादिविभवोपेतं तथापि तं[10] दशाननम्।
तृणं वन्मन्यते सीता रामगुणाऽनुरागिनी।।73।।

क्रमात्पुरबहिर्देशे प्राप्तोऽसौ प्रमदे वने।
नानावृक्षैः समाकीर्णै गिरिसप्तप्रमण्डिते।।74।।

प्रकीर्णको जनानन्दः सुखसेव्यः समुच्चयः।
वारणं प्रियं प्रमदो महीपृष्टस्तु सप्तमः।।75।।

नगैरेभिः[11] सुरम्ये च वापीकूपैर्मनोहरैः।
सप्तभूमिगृहै रम्ये कोकिलालापभूषिते।।76।।

विद्याधरकुमारैश्च तेषां स्त्रीभिश्च संभृते।
मुनिवृन्दसमायुक्ते सार्थके प्रमदे वने।।77।।

अशोकवनमध्येऽत्र चाऽशोकस्य तरोरधः।
रत्नजटितसंतल्पे सीता संस्थापिता परम्।।78।।

तस्याः संस्थाप्य सेवायां खेचर्यः सगृहङ्गतः।
सेवन्ति पादयुग्मं ताः सीतायाश्चन्दनादिभिः।।79।।

उपर्युपरि सम्प्रेष्य दूतीं माध्यस्थवर्तिनीम्।
कारयति दशास्योऽसौ माध्यस्थं सीतया समम्।।80।।

सा गत्वागत्य सम्प्राह यथावद्रावणं प्रति।
प्रभो सीता न गृह्णाति जलाऽन्नं मौनमाश्रिता।।81।।

न भविष्यति सावश्यं तव देव कदाऽपि च।
इति श्रुत्वा महाशोकं करोति मूढ रावणः।।82।।

अतो व्याकुलभावेन न जानाति हिताहितम्।
पुनः पुनर्मनश्चिन्ता सीताया एव वर्तते।।83।।

ततो विभीषणो राजा ज्ञात्वा रावणमानसम्।
आहूय सचिवान्सर्वान् करोत्यत्र विचारणम्।।84।।

रावणेनानीता सीता ततोऽनर्थो भविष्यति।
देशनाशो धनेर्हानिर्मानभङ्गो भवेत्सदा।।85।।

प्रतिकूला भविष्यन्ति दृष्ट्वा रावणदुष्कृतम्।
हनूमतादयो भूपा न्यायमार्गप्रवर्तिनः।।86।।

जिनास्याद्भवतां प्रश्नाद्भवद्भिश्च श्रुतं पुरा।
दशरथकुमाराभ्यां नाशो भवेच्च रक्षसाम्।।87।।

अतो यूयं महाधीराः कुर्वन्तु देशरक्षणम्।
अधुना बहुधोपायैर्युष्मद्बुद्धिप्रयोजनां।।88।।

रावणस्य हितङ्कारी नाऽस्ति विभीषणात्परः।
वदत्यतः क्वचिन्माऽभूद्दशवक्रस्य विघ्नता।।89।।

सव्य[12] बाहुर्दशास्यस्य पतितः खरदूषणः।
सहायं प्राप्य रामस्य बली जातो विराधितः।।90।।

मायासुग्रीवरूपेण सुग्रीवोऽप्यस्ति चाकुलः।
वानराश्च स्वभावेन दुर्जना एव कोपिनः।।91।।

श्रुत्वा विभीषणप्रोक्तं सम्भिन्नमतिरभ्यधात्।
सत्यं देव दशास्येन प्रमादकरणं कृतम्।।92।।
पञ्चमुखस्ततोऽवोचत् किं गतं दूषणे मृते।
सन्ति तेन समा भूरि रावणस्य गृहे नराः।।93।।
तच्छ्रुत्वा युक्तितः प्राह सहस्रमतिमन्त्रिकः।
दहत्यग्निकणश्चैकः सन्दीप्तः सकलं जगत्।।94।।
अश्वग्रीवो महासैन्यः ख्यातः सर्वत्र विष्टपे।
स्वल्पेनापि त्रिपृष्ठेन निहतो रणमूर्द्धनि।।95।।
तस्माद्यत्नं प्रकर्तव्यं लङ्काया रक्षणं विभो।
नरयन्त्राणि मार्गेषु प्रसार्यतां नरोत्तमैः।।96।।
सज्जना मधुरैर्वाक्यैः सन्तुष्टव्या त्वया विभो।
दुर्जना धनदानैश्च क्रियतां किङ्करा इव।।97।।
विनयैर्वचनै रम्यैः सन्तोष्य रावणं प्रभुम्।
सीता रामाय दातव्या कर्त्तव्यं कार्यमुत्तमम्।।98।।
सीतां सन्मान्य दानैर्वा रावणेवश्यतां यथा।
भवेत्तथैव कर्त्तव्यं यतोऽसौ सौख्यतां व्रजेत्।।99।।
पत्नीवियोगदुःखेन स रामोऽपि मरिष्यति।
रामे मृते स लक्ष्मीशो वह्नयावेशं करिष्यति।।100।।
ताभ्यां विना निशक्तोऽसौ न किमपि विराधितः।
मरिष्यति च सुग्रीवो मायासुग्रीवमारितः।।101।।
अतः सर्वत्र धीर्यत्वं करणीयं महात्मभिः।
एवं निश्चित्य ते सर्वे गताः स्वनिलयं तदा।।102।।
विभीषणेन यन्त्राद्यैः शाली दुर्गोत्तरीकृतः[13]।
विद्याभिश्च विचित्राभिर्लङ्का गह्वरतां कृता।।103।।
सुभटा स्थापिता यत्र तत्र सुशस्त्रधारिणः।
महावाद्यस्य निर्घोषैर्वधरीकृतदिङ्मुखम्।।104।।

दशदिशासु दिक्पाला लङ्काया स्थापिता क्रमात्।
सुग्रीवस्य कथां राजन् श्रूयतां विघ्नसम्भवाम्।।105।।

पूर्वप्रोक्तोऽथ यः कामी साहसगतिनामकः।
विद्यां संसाध्य हेमाद्रौ वेगादीप्सितरूपिणी।।106।।

सुग्रीवेऽथ गते क्वापि धृत्वा सुग्रीवरूपकम्।
किष्किन्धापुरमायातः प्रधानैरपि वर्जिते।।107।।

राजद्वारं प्रविश्याशु सुताराया गृहङ्गतः।
अभिधानं न जानाति दासीभृत्यकुटम्बिनाम्।।108।।

कोशस्थद्रव्यवस्तूनां स्थानं शय्याऽशनं क्वचित्।
विद्याश्लोकादिसङ्गीतं नाटं जानाति न क्वचित्[14]।।109।।

अज्ञानप्रस्तुतं[15] कार्यं सुतारां धरितुं[16] गतः।
अनुमानाच्च तं दृष्ट्वा भीता तारा स्वचेतसि।।110।।

अयं कोऽप्यऽस्ति मायावी सुग्रीववेषधारकः।
यावन्न निश्चयोऽस्य स्यात्तावच्छीलं भवेन्मम।।111।।

इत्युक्तैकान्तगेहे सा स्थिता तारा सुखं सती।
ततोऽसौ सत्यसुग्रीव आगतः स्वपुरं मुदा।।112।।

कुर्वन्ति विस्मयं लोकास्तदा व्याकुलचेतसा।
प्रभाते चागतो राजा सुग्रीवोऽयं कुतः पुनः।।113।।

तान् दृष्ट्वा प्राह चित्ते स्वे सुग्रीवो व्याकुलः कथम्।
लोकाः सर्वोपमां दृष्ट्वा किं नष्टं मम सद्मनि।।114।।

किं वा चाङ्गदवीरोऽथ गतोऽस्ति मंदिरं प्रति।
तस्य दुःकारणवार्ता चागताऽस्ति गृहे मम।।115।।

इति सञ्चिन्तयन् राजा गच्छति स शनैर्गृहम्।
तावत् कृत्रिमसुग्रीवो युद्धार्थं सन्मुखागतः।।116।।

उभयोः सेनयोस्तत्र सञ्जातं कदनं महत्।
न ज्ञायते हि केनापि सत्यसुग्रीवरूपकम्।।117।।

प्रधानपुरुषैस्तावत्कृतं विचारणं परम्।
अस्मद्भिरपि न ज्ञातं सुग्रीवयोः सुनिश्चयः।।118।।
उभयोः कदने सूरा म्रियन्ते कारणं विना।
अस्मदीयास्ततो युक्त्या रक्षणीयं बलं परम्।।119।।
यावन्न जायतेऽस्माकमेतयोरेकनिश्चयः।
तावदुभावपि भूपौ स्थातव्यौ च[17] बहिः पुरम्।।120।।
वानराणां महावंशो मा भूत्क्वचिन्मलीमशः।
इत्युक्त्वा स्थापितौ तैश्च दक्षिणोत्तरयोर्नृपौ।।121।।
ततोऽमात्यैः सुतारा सा पृष्टा सुग्रीवभामिनी।
को मायावी च सत्यः को ब्रूहि देवि विचक्षणे।।122।।
सुतारा प्राह शृण्वन्तु भोऽमात्याः सुविवेकिनः।
यः पूर्वमागतो दुष्टः स सुग्रीवो भवेन्न हि।।123।।
जाम्बूवता तथैवोक्तं तथापि मन्त्रिणो गणाः।
न निश्चयन्ति नारीणां वृद्धबालनृणां वचः।।124।।
अतिवृद्धस्य बालस्य स्त्रियश्च मद्यपायिनः।
चौरस्य ग्रथिलस्याऽपि वाक्यैर्न निश्चयो भवेत्।।125।।
इति निश्चित्य तैः सर्वै दक्षिणोत्तरयोर्दिशोः।
मायावि सत्यसुग्रीवौ स्थापितौ क्रमतो बलात्।।126।।
अक्षौहिण्यस्ततः सप्तप्रभुमेकं समाश्रिताः।
इतरं चापि तावन्त्यः संशयस्य वशङ्गताः।।127।।
अकरोच्चन्द्ररश्मिश्च प्रतिज्ञामिति संशये।
बालिपुत्रो यतः कुर्वन्सर्वतः प्रतिपालनम्।।128।।
सुताराभवनद्वारं यो गच्छेत्कश्चिदस्य सः।
प्रौढेन्दीवरशोभस्य वध्यः खड्गस्य मे ध्रुवम्।।129।।
ततः कपिध्वजा एवं स्थापितौ तावुभावपि।
अपश्यन्तौ सुताराऽस्यं[18] निमग्नौ व्यसनाऽर्णवे।।130।।

पत्नीविरहदुःखेन सत्यसुग्रीवपीडितः।
भ्रमन् देशान्तरं दुःखी जातोऽत्र कार्यसिद्धये।।131।।
शरणं वायुपुत्रस्य प्राप्योक्तवांश्च पूर्वजम्।
दुःखं सविस्तरं सर्वं मायासुग्रीवनिर्मितम्।।132।।
तच्छ्रुत्वा जातकोपोऽसौ हनूमान् सच्चिवैः सह।
किष्किन्धापुरमायातः सुग्रीवस्य सुखालये।।133।।
श्रुत्वा प्राप्तं हनूमन्तं मायासुग्रीवभूपतिः।
आरुह्यद्विवरदं प्रीत्या सुग्रीव इति निर्गतः।।134।।
कपिध्वजं तमालोक्य परं सादृश्यमागतम्।
विस्मितो वायुपुत्रोऽपि पतितो संशयार्णवे।।135।।
अचिन्तयच्च सुव्यक्तं सुग्रीवौ द्वाविमौ कथम्।
एतयोः कातरं[19] हन्मि यद्विशेषो न लभ्यते।।136।।
अविदित्वाऽनयोर्भेदमुभयोर्वा नरेन्द्रयोः।
कदाचिद् वधिषां माऽहं सुग्रीवं सुहृदां वरम्।।137।।
मुहूर्त्तं मन्त्रिभिः सार्द्धं विमृश्य च यथाविधिः।
उदासीनतया देव मारुतिः स्वपुरङ्गतः।।138।।
हनूमति गते मायासुग्रीवोऽभूत्स निर्भयः।
तथा च सत्यसुग्रीवः पुनश्चिन्तातुरोऽवदत्[20]।।139।।
शरणं दशवक्रस्य गमिष्याम्यथ चेदहम्।
उभावप्यतिकामी स हत्वा तारां ग्रहिष्यति।।140।।
मन्त्रदोषमसत्कारं[21] दानं पुण्यं स्वशूरताम्।
दुःशीलत्वं मनोदाहं दुर्मित्रेभ्यो नो वेदयेत्।।141।।
शरणं खरदूषणस्य गमिष्यामीति वेगतः।
शक्तिवां स तु विज्ञानी मम कार्यं करिष्यति।।142।।
इति निश्चित्य सम्प्राप्तः पातालनगरं तदा।
नगरस्य बहिर्भागे दण्डकस्य रणस्थले।।143।।

मृतानि गजवृन्दानि तथाऽश्वानां च सन्ततिम्।
मनुष्यान्मरणं प्राप्तान् शस्त्रजर्जरविग्रहान्[22] ।।144।।
शृगालैर्भक्षितान् देहान् चित्तावह्निं समुच्चयान्।
महाक्रन्दैर्युतान् दृष्ट्वा सुग्रीवो विस्मयङ्गतः ।।145।।
कञ्चित्[23] पृच्छति भो भ्रातः किं जातं कदनं परम्।
केन सार्द्धं कृतं केन मा भीषिस्त्वं शुभं वद ।।146।।
ततस्तेनाऽत्र तत्सर्वं प्रोक्तं तस्मै सविस्तरम्।
रामस्य नगरावासं मरणं दूषणस्य च ।।147।।
सीताया हरणं चाऽपि नृपत्वञ्च विराधिते।
एतच्छ्रुत्वाह सुग्रीवः स्वचित्ते दुःखमानसः ।।148।।
यत्र गच्छामि तत्रैव पापान्नाशो हि दृश्यते।
यस्याऽहं शरणं प्राप्तः पूर्वं मृत्युङ्गतस्तु सः ।।149।।
गच्छामि शरणं कस्य को दुःखं मे हरिष्यति।
कूपवापीतडागेषु पतित्वा मरणं वरम् ।।150।।
एतस्मिन्नन्तरे तस्य जाता बुद्धिः सुखप्रदा।
दूषणो निहतो येन तस्यैव शरणं वरम् ।।151।।
मे दुःखस्य विनाशं सः सर्वथैव करिष्यति।
भार्याविरहदुःखं मे जानिष्यति मनोगतम् ।।152।।
इति विमृश्य तेनाशु[24] विज्ञानी प्रेषितो नरः।
आदराच्च प्रियं कर्तुं राममित्रं विराधितम् ।।153।।[25]
सुग्रीवागमनं श्रुत्वा दूतस्यास्यद्विराधितः।
सविस्मयः सतोषश्च मेरो रिवाभवत्तदा[26]।।154।।[27]
संसर्गात् किं न केनापि ज्ञायते च शुभाशुभम्।[28]
पश्य सुग्रीवराजोप्यागतोऽस्ति[29] शरणं मम ।।155।।
विराधितेन दूतोऽसौ पूजितो वचनैर्वरैः।
रामस्य शरणं वेगादायातु वानराधिपः ।।156।।

तस्यात्र मानसं दुःखं क्षणाद्रामो हरिष्यति।
गत्वा दूतेन तत्प्रोक्तं सुग्रीवोऽप्यथ सञ्चलत्।।157।।
तस्य दुन्दुभिनिर्घोषं समाकर्ण्य घनोपमम्।
पातालनगरं भीतं भ्रान्ताकुलमहज्जनम्।।158।।
ततो लक्ष्मीधरोऽपृच्छत्सम्प्रीत्या च विराधितम्।
वद तूर्यनिनादोऽयं श्रूयते कस्य संहतः।।159।।
सोऽवोचच्छ्रूयतां देव महाबलसमन्वितः।
नाथोऽयं कपिकेतूनां प्राप्तस्त्वां सेवितुं परः।।160।।
भ्रातरौ बालिसुग्रीवौ किष्किन्धनगराधिपौ।
तिग्मांशुरजसः पुत्रौ प्रख्याताववनाविमौ।।161।।
राज्ये संस्थाप्य सुग्रीवं बालिमुनिरभूत्तदा।
सोऽयं प्राप्तो महाराजोङ्गाङ्गदौ चापि यत्सु तौ[30]।।162।।
एवं प्रवर्तते यावत्कथा तावत्समागतः।
सुग्रीवः सचिवैः सार्द्धं चतुरङ्गबलान्वितम्।।163।।
ततो लक्ष्मणरामाद्या भूपालाः प्रेमनिर्भराः।
तुष्टा दृष्ट्वा च सुग्रीवं परिष्वक्ताः परस्परम्।।164।।
रामस्य चरणौ नत्वा चोपविष्टा यथायथम्।
रामेण जाम्बुवान् पृष्टः कोऽयं कस्मात्समागतः।।165।।
स प्राह वानरेशोऽयं सुग्रीवाख्यो महानृपः।
चतुर्दशसुक्षोणीनां विद्याभृतां महेश्वरः।।166।।
सत्तीर्थं वन्दितुं यावद्गतो विजयपर्वते।
तावत्कोऽप्येक पापात्मा[31] सुग्रीवरूपधारकः।।167।।
तस्थौ प्रविश्य किष्किन्धमयं परिभ्रमन् बहिः।
श्रीशैले विगते व्यर्थं सर्वत्र शरणोज्झितः।।168।।
अयं शरणमायातो भवतां शृणु वत्सल।
भवद्विधा नरा लोके सञ्जाताः परदुःखहाः।।169।।

रामः प्राह ततश्चित्ते मत्समोऽयञ्च दुःखवान्।
कान्तया विरही शोकी मत्कार्यञ्च करिष्यति।।170।।

रामोऽवोचत्तमाहूय सुग्रीवं वानरध्वजम्।
मायाविनञ्च निर्घाट्य तुभ्यं दास्यामि भूपदम्।।171।।

सुतारामेलनं चापि करिष्यामि त्वया समम्।
आनिष्यसि[32] च सीताया वार्तां त्वं यदि वेगतः।।172।।

ततो जगाद सुग्रीवः शृणु राघवभूपते।
अहं तु द्व्यर्द्धद्वीपेऽत्र परिभ्रान्तुं सुशक्तिवान्।।173।।

ततोऽहं तव भार्यायाः सप्तवासरमध्यतः।
आनिष्यामि न वार्तां चेत्तदा वह्निं विशाम्यहम्।।174।।

अमीभिरक्षरैः पद्मः परमाह्लादमाश्रितः।
रोमाञ्चनिर्भरदेहं बभार च समन्ततः।।175।।

अन्योन्यस्य वयं द्रोहरहिताविति चादरात्।
शपथं चक्रतुर्जैनं तस्मिन्नेव जिनालये।।176।।

ततो रथवरारूढौ महासामन्तसेवितौ।
किष्किन्धनगरं तेन प्रयातौ रामलक्ष्मणौ।।177।।

समीपीभूय दूतश्च प्रहितः कपिमौलिना।
सदूतः कुटसुग्रीवं प्राह शीघ्रं पुरात्प्रभो।।178।।

गच्छ भो चेत् त्वमागच्छ रणार्थं रणभूमिषु।
तच्छ्रुत्वा तेन दुष्टेन हत्वा दूतो निराकृतः।।179।।

ततश्चालीकसुग्रीवः सनह्य स्यन्दनंस्थितः।
युद्धाय निर्ययौ क्रुद्धः पृथुसैन्यसमावृतम्।।180।।

अथो कूटभटाटोपः सङ्कटश्चण्डनिस्वनः।
संप्रहारो महानासीदग्रसंलग्नसेनयोः।।181।।

सुग्रीवमेव सुग्रीवो जगामोद्ग्रीवमुखरुट्।
विद्यायाः करणासक्तो दृढं योद्धुं समुद्यतः।।182।।

सम्प्रहारो महान् जातस्तयोश्चक्रेषु सायकैः।
अन्धकारीकृताकाशश्चिरमप्राप्तयोः श्रमः।।183।।

अथ सुग्रीवमाहत्य गदयालीकवानरी[33]।
विज्ञाय मृत इत्येवं तुष्टः पुरमुपाविशत्।।184।।

निश्चेष्टविग्रहश्चायं[34] सत्यशाखामृगध्वजः।
निजं शिविरमानीतः परिवार्य सुहृज्जनैः।।185।।

अब्रवील्लब्धसञ्ज्ञश्च नाथ हस्तमुपागतः।
जीवन्नेव कथं चौरः पुरं मम पुनर्गतम्।।186।।

नूनं न भवितव्यं मे दुःखस्यान्तं हि राघव।
भवन्तमपि सम्प्राप्य किन्तु कष्टमतः परम्।।187।।

ततः पद्मप्रभोऽवोचद्भवतोर्युध्यमानयोः।
विशेषो न मया ज्ञातो ना हतस्तेन ते समः।।188।।

अथाहूय पुनस्तस्य कृत्रिमस्य सुसन्मुखम्।
अभूद्रामोऽतिकोपेन परस्त्रीसङ्गकारिणः।।189।।

सागरावर्तमारोप्य पणच्यां चापमुत्तमम्।
टङ्कारशब्दमाकर्षी त्रिलोकेषु भयप्रदम्।।190।।

शब्दं श्रुत्वाऽथ तस्याऽत्र दूरं वेगात्पलायिता।
वेतालीति महाविद्या स्वेप्सितरूपदायिनी।।191।।

सुग्रीवस्य ततो रूपं त्यक्ता जातश्च पूर्ववत्।
साहसगतिनामाऽसौ स्वस्य रूपेण संस्थितः।।192।।

तं दृष्ट्वा वानराः सर्वे भूत्वैकत्र महाभटाः।
परस्परं सुहर्षेण सत्यसुग्रीवमाश्रिताः।।193।।

ततो लक्ष्मणवीरेण साहसगतिः कुधीः।
युद्ध्यमानश्च खड्गेण हतो रामेण सङ्गरे।।194।।

वानराणां महावंशे जातो जयरवो महान्।
ततः सुग्रीवराजेन पूजितौ रामलक्ष्मणौ।।195।।

त्रयोदशमहाकन्या रूपलावण्यभूषिताः।
सन्दत्ता रामदेवाय सुग्रीवेणात्मसम्भवा।।196।।
चन्द्राभा हृदयावल्ली हृदिधर्मा तृतीयका।
अनुन्धरा च श्रीकान्ता सुन्दरी च सुरावती।।197।।
मनोवाहिनी चारुश्री दशमी मदनोत्सवा।
पद्मावती गुणमाला जिनमत्यन्तऽमीवरा।।198।।
महारूपगुणैर्युक्ता यथा नाम तथा गुणाः।
स्वयंवरविधानेन ता जाता रामवल्लभाः।।199।।
यावन्नायाति सा सीता तावच्छीलं भवेन्मम।
इत्युक्त्वा रक्षितास्तेन जिनपूजनहेतवे।।200।।
महावैभवसम्पन्नं दृष्ट्वा किष्किन्धकं पुरम्।
नगरस्य बहिर्देशे स्थितास्ते नन्दने वने।।201।।
खेचरीभिः ससेव्योऽपि वृतोऽपि विविधैर्नपैः।
सीतया रहितो मन्ये यद्येका वर्षसन्निभा।।202।।
सुग्रीवोऽथ गृहं गत्वा सुखं सुतारया समम्।
करोति विविधान् भोगान् चिरकालवियोगवान्।।203।।
महाभोगनिमग्नोऽसौ विस्मृतो रामसंकथाम्।
राज्यं करोति सुग्रीवस्तारया सह भोगवान्।।204।।
पुण्येन विघ्नाः प्रभवन्ति नाशं
शक्तेन पुंसा सह सङ्गतिश्च।
सुखानि भोगाश्च भवन्ति पुण्यात्
तस्मात्कुरु त्वं शुभं पुण्यहेतु।।205।।
दया सुदानेन सुदीर्घजीवी
सुसत्यवाक्येन पवित्रमूर्तिः।
अचौर्यशीलैश्च भवेद्धनाढ्यः
सर्वाणि चैतानि सुपुण्यतः स्यात्।।206।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते सीतारावणविलापमायासुग्रीवमरणसुग्रीवतारामेलापकवर्णनो नाम एकविंशतितमोऽधिकारः।।21।।

1. तां इति क प्रतौ
2. मां इति क प्रतौ न उपलभ्यते।
3. जय वर्द्धस्व इति क प्रतौ, जयवर्द्धन इति ख प्रतौ
4. सीता प्राह ततो मातरेवं चेन्मम साम्प्रतम् इति ख प्रतौ, सीता प्राह ततो माते वचने मम साम्प्रतम् इति ग प्रतौ
5. गंगावेणीसमङ्घिप: इति ग प्रतौ
6. पापमानसा क/ग प्रतौ
7. त्रैलोक्यमंबरं इति क/ग प्रतौ
8. पुषपके इति क प्रतौ
9. स द्दर्शयति इति ख प्रतौ
10. सीता दृष्टवा इति क प्रतौ
11. नगरैरेभि इति ख प्रतौ
12. सच्च्य इति ख प्रतौ
13. दुर्गोतरां कृत: इति क प्रतौ
14. नाटकं न च क्वचित् इति ग प्रतौ
15. अज्ञानोप्रस्तुतं इति क प्रतौ, अज्ञाने प्रस्क्तं ख प्रतौ
16. हरितुं इति ख प्रतौ, ग प्रतौ अस्पष्टा लेखनी
17.स्थातव्यां च इति ख प्रतौ, स्था युवयो: च इति ग प्रतौ
18. सुताराश्पं इति क प्रतौ।
19. एतयो: कतरं इति क प्रतौ, एतयो: कृर्तमर्हन्मी इति ग प्रतौ
20. पुत्रश्चिन्तातुरावदत् इति ख प्रतौ
21. मन्त्रं दोषसत्कारं इति ख प्रतौ
22. शस्त्रनिर्जरविग्रहान् इति ख प्रतौ
23. किञ्चित इति ख प्रतौ
24. तेनाश्रु इति क प्रतौ
25. एष: श्लोक: ग प्रतौ अनुपलभ्यते
26. मेरोरिवासपत्तदा इति क प्रतौ
27. एष: श्लोक: ग प्रतौ अनुपलभ्यते
28. अहो रामस्य संसर्गात् किं किं न जायते शुभम्। इति क/ख प्रतौ

29. पश्य सुग्रीवराजोस्य गतोस्ति इति ग प्रतौ।
30. महाराजो गांगदौ वायियकुतौ इति क प्रतौ
31. तावत्कोप्यायात्मायावी इति क/ख प्रतौ
32. आगमिष्यसि इति क प्रतौ
33. गदयालिकवानरी इति क प्रतौ, गदयालिंकवानरी इति ग प्रतौ
34. निश्चेष्टविग्रहश्चाहं इति क/ख प्रतौ, निश्चेष्टविग्रहश्चाहात् इति ग प्रतौ
    निश्चेष्टविग्रहश्चाऽयं इति पद्मपुराणे 2/47/108,
    अर्थदृष्ट्यापि निश्चेष्टविग्रहश्चाऽयं इति स्यात्।

❖❖❖

द्वाविंशतितमोऽधिकारः

सीताया विरही रामो भ्रमति[1] नन्दने वने।
तां विलोकनहेतोश्च सा दृश्यते न कुत्रचित्।।1।।
तदा क्रोधेन दीप्तोऽसौ सुग्रीवस्य गृहङ्गतः।
तत्र दृष्ट्वाऽथ सुग्रीवं जगाद रघुनन्दनः।।2।।
सुतारां प्राप्य रे दुष्ट सुखी जातोऽसि सद्मनि।
इत्युक्त्वा हन्तुमुद्युक्तः सुग्रीवं रामविस्मृतम्।।3।।
तदा भीतोऽथ सुग्रीवः कम्पकम्पितविग्रहः।
लक्ष्मणशरणं प्राप्तः स्वस्य जीवितहेतवे।।4।।
तदाह लक्ष्मणो रामं क्षम्यतां देव पापिनम्।
विस्मृतं त्वदीयं कार्यं क्षुद्राणामीदृशी गतिः।।5।।
विनयवचनैः रामं सन्तोष्य लक्ष्मणसुधीः।
सुग्रीवं प्राह भो राजन् विस्मृतोऽसि कथं परम्।।6।।
महता चोपकारोऽत्र विस्मृतव्यो न कुत्रचित्।
यक्षदत्तो यथा मूढो[2] यक्षकं विस्मृतो भुवि।।7।।
पपृच्छ मगधाधीशो गणेश्वरमिहान्तरे।
यक्षदत्तस्य वृत्तान्तं नाथेच्छामि निवेदितुम्।।8।।
ततो गणधरोऽवोचच्छृणु श्रेणिक भूपते।
चकार यक्षदत्तस्य यथा मातुः स्मृतिं मुनिम्।।9।।
अस्ति क्रोञ्चपुरं नाम नगरं तत्र पार्थिवः।
यक्षसञ्ज्ञः प्रिया तस्य राजिलेति प्रकीर्त्तिता।।10।।
तत्पुत्रो यक्षदत्ताख्यः स बाह्ये[3] विहरन् सुखम्[4]।
अपश्यत्परमां नारीं स्थितां दुर्विधपाटके।।11।।
स्मरेषु हतचित्तोऽसौ तामुद्दिश्य व्रजन्निशि।
मुनिनाऽवधियुक्तेन मैवमित्यभ्यभाषत[5]।।12।।
ततस्तं विद्युदुद्योतद्योतितं वृक्षमूलगम्।
ऐक्षतायनमाध्यानं[6] मुनिं सायकपाणिकः[7]।।13।।

तमुपेत्य नतिं[8] कृत्वा पप्रच्छ विनयान्वितः।
भगवन् किं त्वया मेति निषिद्धं कौतुकं मम।।14।।
सोऽवोचद्यां समुद्दिश्य प्रस्थितः कामुको भवान्।
सा ते माता ततस्तां मा यासीः[9] कामीनिवारितः।।15।।
सोऽवोचत्कथमित्याख्यत्ततोऽस्मिन् प्रस्तुतं मुनिः।
मानसानि[10] मुनीनां हि सुदिग्धान्यनुकम्पया[11]।।16।।
शृण्वस्ति मृतिकावत्यां[12] कनको नाम वाणिजः।
धूर्नाम्नि[13] तस्य भार्यायां बन्धुदत्तः सुतोऽभवत्।।17।।
भार्या मित्रवती तस्य लतादत्तसमुद्भवा।
कृत्वाऽस्यां गर्भमज्ञातं पोतेन प्रस्थितः पतिः।।18।।
स्वसुराभ्यां ततो ज्ञात्वा गर्भं दुश्चरितेति सा।
निराकृता पुरात्क्षिप्रं दास्योत्पलिकया सह।।19।।
प्रस्थिता च पितुर्गेहं सार्थेन महता समम्।
सर्पेणोत्पलिका दंष्टा मृता सा विपिनान्तरे।।20।।
ततः सख्या विमुक्ता सा[14] शीलमात्रसहायिका।
इमं क्रौञ्चपुरं प्राप्ता महाशोकसमाकुला।।21।।
स्फीतदेवार्चकाऽऽरामे प्रसूता दारकं वरम्।
आरात् क्षालयितुं याता शिशुस्तावद्धृतः शुना[15]।।22।।
ततो दृष्ट्वाऽस्य यक्षस्य पूजकेन महात्मना।
श्वनाद्विमोच्य तन्मध्ये दृष्टं बालं गुणान्वितम्।।23।।
स तं स्वैरं समादाय रत्नकम्बलवेष्टितम्।
ददौ यक्षमहीपाय निर्गताय बहिर्वनम्।।24।।
ततोऽनेन विपुत्राया राजिलायाः समर्पितः।
सार्थां च यक्षदत्ताख्यां प्रापितस्त्वं स वर्तते।।25।।
प्रत्यावृत्य च संभ्रान्ता प्रपश्यन्ती[16] प्रसूतकम्।
विप्रलापं चिरं चक्रे दुःखान्मित्रवती परम्।।26।।

देवार्चकेन सा दृष्ट्वा कृपया कृतसान्त्वना।
त्वं मे स्वसेति भाषित्वा स्वकेऽवस्थापिता गृहे।।27।।

सहायरहितत्वेन त्रपया कीर्तिभीतितः।
न सा गता पितुर्गेहं तत्रैव निरता ततः।।28।।

सेयमत्यन्तशीलाढ्या जिनधर्मपरायणा।
कुटीरे दुर्विधस्यास्ते भ्रमता या त्वयेक्षिता।।29।।

व्रजता बन्धुदत्तेन यद्दत्तं रत्नकम्बलम्।
अस्यास्तद्यक्षगेहेऽस्मिन्स्तिष्टत्यद्यापि रक्षितम्।।30।।

इत्युक्ते संयतं नत्वा स्तुत्वा च हितकारिणम्।
इयाय खड्गवानेषः संभ्रमी यक्षसन्निधिम्।।31।।

ऊचे च तेऽसिनाऽनेन छिनद्मि नियतं शिरः।
सत्यतो यदि मे जन्म नो ब्रूषि स्फुटकारणम्।।32।।

यथावद्वेदितं तेन रत्नकम्बललक्षितम्।
अयं जरायुलेपेन तिष्टत्यद्यापि दिग्धिकः।।33।।

प्रथमाभ्यां ततस्तस्य पितृभ्यां सह सङ्गमः।
जातो महोत्सवोपेतो महाविभवविस्मितः।।34।।

कथितं ते महाराज वृतान्तादिदमागतम्।
अधुना प्राकृतं[17] वक्ष्ये भवावहितमानसः।।35।।

रामं नत्वाऽऽह सुग्रीवो मच्छक्तिं पश्यतां विभो।
तवाधुनैव सीताया वार्तां सम्प्रापयाम्यहं।।36।।

इत्युक्त्वा सुभटान् स्वस्य चाहूय प्राह वानरी।
यूयं गत्वा च सर्वत्र पश्यन्तु जानकीं सतीम्।।37।।

आज्ञां धृत्वा ततस्तस्य निर्गताः सुभटास्तदा।
सार्द्धद्वीपद्वयं सर्वं नदी नगाऽब्धिपेशलम्।।38।।

गूहापातालभूशृङ्गं गत्वा तैरवलोकितम्।
सुग्रीवोऽपि स्वयं द्रष्टुं विमानस्थश्च निर्गतः।।39।।

नानादेशान् परिभ्राम्यन् विलोकयन् महीतलम्।
कम्बूद्वीपनगस्यासौ[18] प्राप्तः शिखरमुत्तमम्।।40।।
वृक्षस्याऽधोऽत्र कञ्चिच्च दृष्ट्वा सपुरुषं परम्।
गगनादवतीर्याऽसौ तस्यान्तिकं समागतः।।41।।
सुग्रीवं सोऽपि दृष्ट्वाऽथ भीतः कम्पितविग्रहः।
अहो सुग्रीवराजोऽयं सत्यं मां हन्तुमागतः।।42।।
मित्रोऽयं दशवक्रस्य प्रेषितस्तेन निश्चयात्।
इत्युक्त्वा गद्गदं वाक्यं रुरोद भयपूरितः।।43।।
ततस्तमाह सुग्रीवः कस्त्वं कस्मात्समागतः।
कथं कम्पयसि[19] मा भीषिः सत्यं ब्रूहि कथां तव।।44।।
सोऽवोचच्छ्रूयतां राजन् देवगीतपुरे वरे।
राजा चार्कजटी तस्य रत्नजटिरहं सुतः।।45।।
धातकीखण्डचैत्यानि वन्दित्वाऽहं पुरं प्रति।
गच्छंश्च गगने तत्र श्रुतवान् जानकी ध्वनिम्।।46।।
हा लक्ष्मीधर ! हा पद्म ! हा भामण्डल बान्धव।
इति श्रुत्वा ध्वनिं तत्र तस्या पार्श्वेऽहमागतः।।47।।
ततो रावणराजस्तां नीत्वा नभसि गच्छति।
मयोक्तं तत्र हे पापिन् सीतेयं रामवल्लभा।।48।।
भामण्डलनरेन्द्रस्य भग्नीयं मम स्वामिनः।
भातृजाया लक्ष्मीशस्य स्नुषा दशरथस्य च।।49।।
क्व त्वं गच्छसि नीत्वैतां मुञ्च मुञ्च विवेकतः।
इत्युक्त्वा च कृतं युद्धं रावणेन समं मया।।50।।
रावणेनाऽपि मे विद्या छेदिता सकला रुषा।
ततः आयुर्बलेनाऽहं पतितः कम्बुके वने।।51।।
स्थित्वा कियत्क्षणं तत्र शनैस्तु गिरिमस्तकम्।
आगतो वाधुना जातं सङ्गमं च त्वया समम्[20]।।52।।

सुग्रीवस्तद्वचः श्रुत्वा तुष्टस्तदा स्वचेतसि।
जगाद वचनं तस्मिन् विद्याभृंशान्मया न हि।।53।।

भूप त्वं भवतो ज्ञातं[21] त्वमेव मम बान्धवः।
रत्नजटिनमारोप्य विमानं पुरमागतः।।54।।

रामस्य चरणौ नीत्वा सुग्रीवः प्राह भूपतिः।
सीताया देव सुवार्ता पृष्टव्याऽस्मै सविस्तरा।।55।।

पृष्टो रामेण सत्प्रीत्या रत्नजटी नभश्चरः।
कुत्र दृष्टा सती सीता मद्वियोगेन दुःखिनी।।56।।

पद्मपादौ परिणम्य सर्ववृत्तान्तविस्तरः।
सुरत्नजटिना प्रोक्तः सीताहरणसम्भवः।।57।।

तच्छ्रुत्वा गद्गदैर्वाक्यैः पुनः पृच्छति राघवः।
सत्यं ब्रूहि वद सत्यं दृष्टा सीता सुनिश्चयात्।।58।।

सत्यं प्रभो मया दृष्टा सीता त्वद्गतमानसा।
लङ्केन्द्रेण हृता बाला नियमात्पापबुद्धिना।।59।।

तस्मै रामेण तच्छ्रुत्वा दत्तो हारमणिप्रभः[22]।
वस्त्रयुग्मञ्च चेत्युक्ता राज्यं दास्यामि ते परम्।।60।।

ततो विद्याधरान् क्रोधाद्रामोऽपृच्छत्स लक्ष्मणम्।
लङ्कापुरी कियद्दूरं सः को रावणदुर्जनः।।61।।

इत्युक्ते भयभीतास्ते शक्ता न रावणप्रभो।
वार्तां कामपि संकर्तुं तस्मान्मौनं समाश्रिताः।।62।।

रामे पुनः पुनः पृष्टे जाम्बूवता स्वधीर्यतः।
उक्तं रावणराजस्य पुरं वंशपराक्रमम्।।63।।

रावणेन समं युद्धं कर्तुं शक्तो न भूतले।
तस्य वार्तामपि कर्तुं शक्तिर्नास्त्यत्र कस्यचित्।।64।।

तस्मात्त्वं त्यज सीताशां राक्षसकरसङ्गताम्।
विद्याधरकुमारीभिर्भज भोगान्नरेश्वर।।65।।

पद्मोऽवदन्न मेऽन्याभिः वनिताभिः प्रयोजनम्।
विजयन्ते महालीलां यदि शच्या अपि स्त्रियः।।66।।

लक्ष्मण प्राह दशास्येनाऽस्ति शक्तिः कदापि च।
अस्ति चेत् परनारीषु तस्करः स कथं भवेत्।।67।।

दाम्भिकस्याऽतिभीतस्य[23] मोहिनः पापकर्मणः।
रक्षोऽधमस्य तस्याऽस्ति कुतः स्वल्पाऽपि शूरता।।68।।

अब्रवीत्पद्मनाभश्च किमुक्तेनेह भूरिणा।
वार्तागमोऽपि[24] दष्प्राप्यो दिष्ट्या लब्धो मया स हि।।69।।

चिन्त्यमस्त्यपरं नाऽत्र क्षोभ्यतां राक्षसाधमः।
[25]जायतामुचितां भाविफलं कर्मानिलेरितम्।।70।।

कर्तुं प्रत्युपकारो मे यद्यस्ति[26] भवतां मनः।
दर्शयन्तु तदा शीघ्रं रावणपुरवर्त्मकम्।।71।।

जाम्बूनदस्ततोऽवोचद् प्रभो मूढग्रहस्त्वया[27]।
त्यजतां क्षुद्रवन्माऽभून्मयूरछददुःखितः[28]।।72।।

अस्ति वेणातटे गेही नाम्ना सर्वरुचिः किल।
सुतो विनयदत्तोऽस्य गुणपूर्णसमुद्भवः[29]।।73।।

विशालभूतिसञ्ज्ञश्च वयस्योऽस्याऽतिवल्लभः।
तद्भार्यायां समासक्तो गृहलक्ष्म्यां[30] दुरात्मकः।।74।।

तस्या एवं च वाक्येन विहत विच्छद्मना वनम् ।[31]
नीत्वा विनयदत्तं सः वबन्धोपरि शाखिनः।।75।।

बध्वा च तं ततो गेहं क्रूरकर्म्माऽहिताशयः।
विधाय चोत्तरं किञ्चिदवतस्थे कृतार्थवत्।।76।।

अत्रान्तरे तमुद्देशं दिग्मूढः प्रच्युतः पथः।
आजगाम भ्रमन्खिन्नः क्षुद्रोऽपश्यच्च तं तरुम्[32]।।77।।

घनच्छायाकृतश्रद्धस्तस्याऽधश्च जगाम सः।
क्वणितं[33] वाऽशृणोन्मन्दमुन्मुखश्च व्यलोकयन्।।78।।

यावत्पश्यति तं बद्धं निविडं[34] दृढबन्धनैः।
अत्यन्ततुङ्गशाखाऽग्रे निश्चेष्टीकृतविग्रहम्।।79।।
आरुह्य तेन मुक्तोऽसौऽनुकम्पासक्तचेतसा।
गतो विनयदत्तस्तु स्वं तेनैव समाश्रयम्।।80।।
स्वजनस्योत्सवो जातो महानन्दसमुत्कटः।
विशालभूतिरालोक्य तं च दूरात्पलायितः।।81।।
क्षुद्रेण पोषितो रम्यो मयूरोऽस्ति मनोहरः।
तं दृष्ट्वा नृपपुत्रेण गृहीतः स्वशक्तितः।।82।।
तन्निमित्तं महाशोकः क्षुद्रो मित्रमभाषत।
मां चेदिच्छसि जीवन्तं यच्छ तन्मे मयूरकम्।।83।।
बद्धस्तथाविधो वृक्षे मया त्वं परिमोचितः।
अस्योपकारमुख्यस्य[35] प्रतिदानं प्रयच्छ मे।।84।।
ततो विनयदत्तास्तमुवाचाऽन्यमयूरकम्।
गृहाण मणिरत्नञ्च कुतस्तं ते ददाम्यहम्।।85।।
सोऽवोचद्दीयतां मह्यं स एवेति पुनः पुनः।
मूढस्तथाविधो[36] जातो भवान्नपि नरोत्तमः।।86।।
राजपुत्रकरं प्राप्ता कृत्रिमासौ मयूरिका।
कथं लभ्या वधो यस्माल्लभ्यते यत्नतत्परैः।।87।।
त्रिवर्णाऽम्भोजनेत्राणां कन्यानां कनकत्विषाम्।
पीवरस्तनकुम्भानां विशालजघनश्रियाम्।।88।।
वक्त्र[37]कान्तिजितेन्दूनां पूर्णानां चारुभिर्गुणैः।
पतिर्भव महाभोग प्रसीद रघुनन्दन।।89।।
अनुबन्धमिदं हास्यं त्यज दुःखविर्वद्धनम्।
मयूरशष्प[38]शोकार्त्तो मा भूत्त्वं क्षुद्रवद्बुधः।।90।।
सर्वदा सुलभा पुंसः शिखिशष्पोपमाः[39] स्त्रियः।
ब्रवीमी राघवः त्वाहं प्राज्ञैः शोको न धार्यते।।91।।

ततो लक्ष्मीधरोऽवोचत् परमो वाक्यवर्त्मनि।
जाम्बूनदेदृशं नेदमेतमेतादृशं शृणु।।92।।
आसीद्गृहपतिः ख्यातः पुरे कुसुमनामनि।
प्रभवाख्यः प्रिया तस्य यमुनेति प्रकीर्तिता।।93।।
धनबन्धुगृहक्षेत्रे पशुप्रभृतयः सुताः।
पालान्तास्तस्य सेवन्ते शब्दानामन्तमागता।।94।।
अन्वर्थसञ्ज्ञकास्ते च कुटम्बार्थं सदोद्यता।
कुर्वन्ति कर्मविश्रान्तिं क्षणमप्यनुपागता[40]।।95।।
आत्मश्रेयोऽभिधानश्च सुतोऽस्यैवाऽखिलाधरः।
पुण्योदयादसौ भोगान् भुङ्क्ते देवकुमारवत्।।96।।
भ्रातृभिः सह पितृभ्यां चिरं कटुभिरक्षरैः।
निर्भत्सितोऽन्यदा यातो मानी बाह्यं परिभ्रमन्।।97।।
सुकुमारशरीरोऽसौ निर्वेदं परमं गतः।
कर्मकर्तुमशक्तात्मा मरणं स्वस्य वाञ्छति।।98।।
पूर्वकर्माऽनुभावेन प्रेरितः पथिकश्च तम्।
समागत्याभणी देवं श्रूयतामपि मानव।।99।।
पृथुस्थानाधिपऽस्याहं सुभानुरिति नन्दनः।
गोत्रिकाक्रान्तदेशः सन् कुर्वन्नैमित्तभाषितम्।।100।।
पर्यटन् वसुधामेतां देवात्[41] कूर्मपुरङ्गतः।
आचार्येणाऽभियोगेन सङ्गं प्राप्तोऽस्मि तत्र च।।101।।
अयोमयमिदं तेन दत्तं मे वलयं शुभम्।
मार्गदुःखाऽभिभूताय कारुण्याकारचेतसा[42]।।102।।
एतच्च सर्वरोगाणां शमनं बुद्धिवर्द्धनम्।
ग्रहोरगपिशाचादिवशीकरणमुत्तमम्।।103।।
नैमित्तादिष्टकालस्य सम्प्रातश्च ममाऽवधिः।
आत्मीयमधुना राज्यं कर्तुं यामि निजं पुरम्।।104।।

राज्यस्थस्य प्रमादाश्च जायन्ते गणनोज्झिताः[43]।
एतच्च छिद्रमासाद्य नियतं नाशकारणम्।।105।।[44]
गृहाणैतत्ततस्तुभ्यं[45] यच्छामि वलयं परम्।
उपसर्गविनिर्मुक्तं यदि वाञ्छसि जीवितम्।।106।।[46]
लब्धस्य च पुनर्दानं शंसन्ति सुमहाफलम्।
यशश्च प्राप्यते लोके पूजयन्ति च तं जनाः।।107।।
ततस्तमेवमित्युक्ता गृहीतमिदमायसम्।
आत्मश्रेयो गतो धाम सुभानुश्च निजं निजम्।।108।।
यावत्पत्नी नरेन्द्रस्य दष्टा श्वसनभोजिना[47]।
निश्चेष्टा दग्धुमानीता चित्तोद्देशे[48] स पश्यति।।109।।
कटकस्य प्रभावेन तस्य लोहमयस्य ताम्।
जीवयित्वा परं प्राप्यदसौ पूजां नरेन्द्रतः।।110।।
महान्तस्तस्य सञ्जाता भोगाः परमसौख्यदाः।
सर्वबन्धुसमेतस्य पुण्यकर्माऽनुभावतः।।111।।
उत्तरीयांशुकस्योर्द्धं निधाय वलयं सरः।
प्रविष्टो यावदादाय गोधेरोनस्यदुद्धतः[49]।।112।।
महातरोरधस्ताच्च प्रविवेश विलं महत्।
शिलानिकरसञ्छिन्नं निर्हारं घोरनिस्वनम्।।113।।
तेन गोधेरशब्देन किल नित्यप्रवर्त्तिना।
बभूव स्थानमप्येतत्प्रलयाशंकिमानसम्।।114।।
आत्मश्रेयस्ततो वृक्षमुन्मूल्य स शिलाघनम्।
गोधेरं नाशयित्वा तं निधानं प्राप्य साङ्गदम्।।115।।
आत्मश्रेयः समः पद्मः सीतावलयमूर्तिवत्।
प्रमादवच्च कोशाद्यं शब्दः स्याच्छब्दवद्रिपोः।।116।।
महानिधानवल्लङ्का गोधेरो दशवक्रकः।
जनास्त इव निर्भीता यूयं भवत साम्प्रतम्।।117।।

एतच्छ्रुत्वा पुनः प्राह जाम्बूनदो नरोत्तमः।
श्रूयतां राम मद्वाक्यं दुराग्रहस्त्वया कृतः।।118।।
रावणेन पुरा पृष्टोऽनन्तवीर्यो मुनीश्वरः।
आत्मनो मरणं कस्य हस्ते देव भविष्यति।।119।।
तेनोक्तं सिद्धशिलां य उद्धरेत्स्वपराक्रमात्।
स एव हन्यते त्वां हि चक्रेण चामुना दृढम्।।120।।
एतच्छ्रुत्वाह लक्ष्मीश उद्धरिष्यामि नाऽन्यथा।
ततस्तेऽथ विमानस्थास्तां शिलां प्रति निर्गताः।।121।।
जाम्बूनदश्च सुग्रीवो नलनीलौ विराधितः।
इत्यादि बहवो वीरा रात्रौ प्राप्ताश्च गह्वरम्।।122।।
नाभिगिरिशिरोदेशे शिलायोजनमुच्छिता।
अष्टयोजनविस्तीर्णा सिद्धस्थानं मुनेशिनाम्।।123।।
तत्राऽवतीर्यतैः सर्वैः सा शिला पूजिता परम्।
गन्धाऽक्षतादिभिः पुष्पैः सुराऽसुरैश्च सेविता।।124।।
कृत्वा सिद्धान्नमस्कारं बद्धा वस्त्रपरीकरं।
लक्ष्मणः स्वभुजाभ्यां तामुद्धरच्च जयारवैः।।125।।
रामाद्यास्तत्र पश्यन्ति विद्याधरनरेश्वराः।
तेषां साक्षी सुखं तेन सा जंघमात्रमुद्धृता।।126।।
तद् दृष्ट्वा देवदेवौघैः पञ्चाऽश्चर्यं कृतं तदा।
निश्चितं तैः खगैः सर्वैः कृष्णोऽयं नाऽन्यथा भवेत्।।127।।
सुग्रीवाद्यास्ततः सिद्धान्नत्वा रात्रौ च निर्गताः।
विमाने तौ च संस्थाप्य नानावाद्यसमन्विताः।।128।।
द्व्यर्द्धद्वीपेऽथ सन्त्यत्र सिद्धक्षेत्राणि यानि च।
तानि सर्वाणि गत्वा ते नत्वा स्वपुरमागताः।।129।।
ततः प्रभातकाले तान् जगाद रघुनन्दनः।
भवद्भिरधुना कस्मात्क्रियते भो विलम्बनम्।।130।।

गत्वा चाऽद्यैव लङ्कायां हन्तव्यो राक्षसाऽधिपः।
दुःखे स्थिता सती सीता कर्तव्या सुखिनी सदा॥131॥

जाम्बूनदस्ततोऽवोचच्छ्रूयतां रघुनन्दन।
किं विरुद्धेन ते कार्यं किं वा सीतासमागमे॥132॥

सोऽवोचन्न विरुद्धे मे कार्यं जीवप्रघातने।
सीतालाभे तु मे कार्यं भवद्भिः क्रियते च तत्[50]॥133॥

ततः परस्परं चोचुर्वानराः भीतमानसाः।
को गमिष्यति मानुष्यो बोधितुं राक्षसाऽधिपम्॥134॥

क्रुद्धोऽस्माकं स सर्वेषां जीवनाशं करिष्यति।
जानाति न यथा सोऽत्र तथा कार्यं कुरु प्रभो॥135॥

हनूमांस्तत्र सङ्गंतुं शक्तो नृपेषु युक्तिवित्।
तमाहूय ततस्तत्र सम्प्रेष्य रावणं प्रति॥136॥

स गत्वा दशवक्रं तं सन्तोष्य वचनैर्नृपैः।
आनेष्यति सतीं सीतां सर्वेषां हि सुखं भवेत्॥137॥

एवमस्त्विवति तैः सर्वैरङ्गीकृत्य नभश्चरैः।
हनूमतोऽन्तिकं दूतः श्रीभूतिः प्रहितो द्रुतम्॥138॥

उत्पत्यं[51] गगने शीघ्रं गतोऽसौ हनुवत्पुरम्।
दृष्ट्वा तत्र हनूमन्तं प्रोक्तवान् सर्ववृत्तकम्॥139॥

खरदूषणराजस्य मृत्युं शम्बूकसंयुतम्।
सुग्रीवस्य सुतारायाः प्राप्तिमृत्युञ्च तद्रिपोः॥140॥

पितुश्च मरणं श्रुत्वाऽनङ्गपुष्पा तदाऽकरोत्।
आक्रन्दं बान्धवैः सार्द्धं शम्बूकमरणं श्रुता॥141॥

सुग्रीवस्य सुखं श्रुत्वा गीतवाद्यसुनर्तनैः।
अकरोज्जिनगेहेषु विभवान् पद्मरञ्जिका॥142॥

एकतो रोदनाक्रन्द एकतो वाद्यवैभवाः।
श्रीशैलस्य गृहं जातं रसद्वयेन पूरितम्॥143॥

दूषणस्य सुताऽनङ्गपुष्पा सन्तोषिता तदा।
श्रीशैलेनाऽमृतैर्वाक्यैः परिष्वज्य स्ववल्लभा।।144।।

तथा सुग्रीवराजस्य तनया पद्मरञ्जिका।
प्रेमेण पोषिता तेनाऽलिङ्ग्य स्ववल्लभा परा।।145।।

चतुर्बलेन संयुक्तो निर्गत्य वायुनन्दनः।
नानावाद्यमहोत्साहैः किष्किन्धपुरमागतः।।146।।

सुग्रीवप्रमुखैर्भूपैः सन्मुखीभूय पूजितः।
वस्त्रभूषणताम्बूलैः सम्प्रीत्या पवनात्मजः।।147।।

रामस्य सर्ववृत्तान्तः सुग्रीवेण सुभाषितः।
वायुपुत्राय सम्प्रीत्या सुतारामोचनादिकम्।।148।।

तच्छ्रुत्वा हर्षसम्पूर्णः सञ्जातो वायुनन्दनः।
सुग्रीवाद्या नृपास्तेन पद्माभस्याऽन्तिकङ्गताः।।149।।

रामस्य चरणौ नत्वा परिष्वज्य परस्परम्।
उपविष्टा यथायोग्यं हेमकूटमभूतले।।150।।

शक्तिर्वन्तं हनमून्तं दृष्ट्वा तौ रामलक्ष्मणौ।
प्रोचतुश्चेतसि चायमस्मत्कार्यं करिष्यति।।151।।

सुग्रीवाऽस्यात्ततः सर्वान् रामलक्ष्मणयोर्गुणान्।
ज्ञात्वा स्तुत्वा च तं रामं जगाद पवनात्मजः।।52।।

युष्मद्भार्यां प्रभो सीतां वेगतश्चाऽऽनयाम्यहम्।
प्रतिबोध्य दशास्यं तं नानायुक्त्या विवेकिनम्।।153।।

सत्यं त्वं देव जानीहि स्वल्पकालेन ते प्रियाम्।
सीतां पश्यसि तोषेण युक्तां रूपेण भूषिताम्।।154।।

जाम्बूनदस्ततोऽवोचत् श्रूयतां वायुनन्दनः।
वानराणां त्वमेवैको जातोऽसि महदाश्रयः।।155।।

अप्रमत्तेन गन्तव्यं लङ्कां रावणपालिताम्।
न विरोधः क्वचित्कार्यः कदाचित्केनचित्समम्।।156।।

एवमस्त्विवति सम्भाष्य तं संप्रस्थितमुन्नतम्[52]।
विलोक्य परमां प्रीतिं पद्मनाभः समागतः।।157।।
रामोऽवोचत्तमालिङ्ग्य सीतायै वत्स कथ्यताम्।
त्वद्विरहात्स नो शेते न भुनक्ति न तिष्ठति।।158।।
करोति विविधालापान् षट्पद इव संभ्रमन्।
त्वद्गुणः पुष्पसद्गन्धैः सदा रञ्जितमानसः।।159।।
शीलाद्यां वेद्मि देवि त्वां मम प्रेमाऽनुबन्धनीम्।
वाञ्छसि मद्वियोगात्त्वं त्यक्तुं प्राणान्निरादरात्।।160।।
दुर्लभो मनुजो जन्म दुर्लभा गुणसम्पदः।
आवयोः सदृशी प्रीतिर्दुर्लभाऽस्ति पुनर्गतौ।।61।।
प्राणान् रक्षसि तस्मात्त्वं कुरु यत्नं कलेवरे।
आवयोः स्वल्पकालेन मेलनञ्च भविष्यति।।162।।
धिग्मां देवि परगेहे त्वं प्राप्ता मयि सत्यपि।
ममाशां मनसि धृत्वा कुरु भुक्तिं वरानने।।163।।
इत्युक्त्वा तेन सन्दत्ता मुद्रिका चिह्नदायका।
दर्शय वीर सीतायै पुनरिदं वचो वद।।164।।
गजमारोप्य भो देवि सरसि क्रीडिता मया।
दानं दत्तं त्वया सार्द्धं चारणेभ्यो वने वरे।।165।।
वारितुमुपसर्गञ्च वंशगिरौ च योगिनोः।
रामपुरे जलं त्यक्तं दत्तं विप्रेण पापिना।।166।।
इत्यादि वद सीतां तां सद्यप्रत्ययदायकम्।
चूडारत्नञ्च तस्या हि ममाऽन्तिकं त्वमानय।।167।।
तथा सर्वं वदिष्यामि चेत्युक्त्वा वायुनन्दनः।
रामलक्ष्मणयोः पादौ नत्वा च निर्गतो मुदा।।168।।
यावन्नायाम्यहं तावद्यूयमत्रैव वानरः।
स्थीयतां यत्नतः सर्वे कृत्वा सेवाञ्च चैतयोः।।169।।

सर्वानिति स सम्भाष्य निर्गतः पवनात्मजः।
चतुर्बलेन संयुक्तो महावाद्यसमन्वितः।।170।।
लीलया गच्छतस्तस्य लङ्काध्यानस्य वेगिनः।
महेन्द्रनगरं दृष्टेराभिमुखमुपागतम्।।171।।
सचिवेदं पुरं कस्य किं नाम किं गुणाकरम्।
सचिवास्ते ततः प्रोचुर्मातामहस्य ते पुरम्।।172।।
महेन्द्रनगरं नाम्ना तदेव नाम भूपतिः।
तच्छ्रुत्वा कोपसम्पन्नो जगाद पवनात्मजः।।173।।
गर्भस्थे मयि मे माता पीडिता येन पापिना।
तस्मान्निर्मूल्यतां पन्नं सर्वं क्षिपामि सागरे।।174।।
इत्युक्त्वा रणभेरीतैः सन्ताड्य वेष्टितं पुरम्।
तच्छ्रुत्वा तत्पुराधीशः शतपुत्रैश्च निर्गतः।।175।।
उभयोः पक्षयोर्भृत्या मृताः सङ्ख्यविवर्जिताः।
ततः श्रीशैलवीरेण बद्धा लाङ्गुलविद्यया।।176।।
पुरञ्च लुण्ठितं किञ्चित्ततश्च मन्त्रिणा मुखात्।
महेन्द्रभूपतिर्मुक्तो नत्वा पादौ हनूमता।।177।।
मातामहः प्रभो मे त्वं क्षान्तव्यञ्च त्वयाऽत्र माम्।
ततः संस्थाप्य भूपस्तैः पूजितः सिंहविष्टरे।।178।।
ततः प्राह महेन्द्रोऽसौ धन्योऽहं त्वत्समो मम।
पुत्र्याः पुत्रोऽभवद्राजा ज्ञानी धर्मी पराक्रमी।।179।।
इत्युक्त्वालिङ्ग्यते सर्वे सन्तुष्टाश्च परस्परम्।
स्नानभोजनताम्बूलं सञ्जातं तत्र तद्दिने।।180।।
यूयं गच्छन्तु रामस्य सन्निधिं पुत्रसंयुताः।
इत्युक्त्वा तांश्च श्रीशैलो लङ्कां प्रति स निर्गतः।।181।।
महेन्द्रतनयाः सर्वेञ्जनाया[53] सन्निधिङ्गताः।
तयाऽपि मानितास्ते च वस्त्रदानैश्च पूजिताः।।182।।

ततो रामसमीपं ते भक्तियुक्ता समागताः।
मानितास्तेऽत्र रामेण[54] सुग्रीवाद्यैश्च पूजिताः॥183॥

अथ श्रीशैलराजस्य त्रिकूटं प्रतिगच्छतः।
उदधिनाम[55] सद्वीपो दृष्ट्वाऽग्रे सुन्दरोऽभवत्॥184॥

दधिमुखं पुरं तत्र महाप्रासादमण्डितम्।
सामीप्यस्थं वनं तस्य शुष्ककाष्टतृणैर्भृतम्॥185॥

दह्यमानं परं घोरं वह्निना पक्षिभिः सह।
चारणयुगलं तत्र योगस्थञ्च दिगम्बरम्॥186॥

तयोरासन्नभूतञ्च वह्निं दृष्ट्वा सुदारुणम्।
वात्सल्यकरुणासक्त उत्तरितो नभस्तलात्॥187॥

समुद्रजलमाकृष्य ववर्षज्जलदा इव।
तेन जलेन दावाऽग्निः क्षणमात्रात्क्षयङ्गतः॥188॥

मुनयोश्चरणौ यावत्पूजति पवनात्मजः।
तावत्तिस्रो वराः कन्या मेरुं गत्वा समागताः॥189॥

ताभिश्च पूजितौ भक्त्या मुनी हनूमता समम्।
नत्वा स्तुत्वा महास्तोत्रैः श्रीशैलो भुवि संस्थितः॥190॥

श्रीशैलश्च पुनस्ताभिः पूजितो वरवस्तुभिः।
सुकृतिना त्वया देवमुनिविघ्ना निवारिताः॥191॥

प्रसादात्तव चाऽस्माकं विद्यासिद्धिमुपागता।
इत्युक्त्वा तत्र ताः कन्याः उपविष्टा महीतले॥192॥

ततो जगाद श्रीशैलो यूयं भो कस्य कन्यकाः।
एकाकिन्या कुतश्चाऽत्र संस्थिता विजने वने॥193॥

अवोचज्जायायसी तासामत्रोदधिमुखाह्वये।
पुरे गन्धर्वराजस्य वयं तिस्रो वराः सुताः॥194॥

प्रथमा चन्द्रलेखाख्या ज्ञेया विद्युत्प्रभात्ततः।
अन्या तरङ्गमालेति सर्वगोत्रस्य सौख्यदा॥195॥

आवां यावन्ति[56] लोकेऽस्मिन् विजयार्द्धाद्रिसम्भवाः।
विद्याधरकुमारेन्द्राः कुलपुष्करभास्कराः।।196।।
अन्यदा परिपृष्टश्च तातेनाऽष्टाङ्ग विन्मुनिः।
स्थानेषु भगवन् केषु भाव्या दुहितरो मम।।197।।
सोऽवोचत्साहसगतिं यो हनिष्यति संयुगे।
आसां कतिपयाऽहोभी रमणोऽसौ भविष्यति।।198।।
निशम्यामोघवाक्यस्य मुनेस्तद्वचनं ततः।
अचिन्तयत्पिताऽस्माकं विधाय स्मेर माननम्[57]।।199।।
कोऽप्यसौ भविता लोके नरो वज्रायुधोपमः।
विजयार्द्धोत्तरश्रेणीश्रेष्टं यो हन्ति साहसम्।।200।।
अथवा न मुनेर्वाक्यं कदाचिज्जायतेऽनृतम्।
इति विस्मयमाविष्टः पिता माता जनस्तथा।।201।।
चिरं प्रार्थयमानोऽपि यदाऽसौ लब्धवान्न नः[58]।
तदाऽस्म[59]दुःखचिन्तास्थःसञ्जातोऽङ्गारकेतुकः।।202।।
ततः प्रभृति चाऽस्माकमऽयमेव मनोरथः।
द्रक्षामस्तं कदा वीरमिति साहससूदनम्।।203।।
एतच्च वनमायाता दारुणद्रुमसङ्कटम्।
अस्मात्कोशचत्वारिस्थं सिंहव्याघ्रादिसेवितम्।।204।।
श्वेतवस्त्रधरा रम्यास्तपोयुक्ताश्च संस्थिताः।
मनोऽनुगामिनी नाम विद्यां साधयितुं वराम्।।205।।
दिवसो द्वादशोऽस्माकं वसन्तीनामिहान्तरे।
प्राप्तस्य साधुयुग्मस्य वर्तते दिवसोऽष्टमः।।206।।
अङ्गारकेतुना तेन वीक्षिताश्च दुरात्मना।
ततस्तेनाऽनुबन्धेन क्रोधेनापूरितोऽभवत्।।207।।
ततोऽस्माकं वधं कर्तुमेता दीप्ता दिशः क्षणात्।
धूमाऽङ्गारकवर्षेण वह्निना पिञ्जरीकृताः।।208।।

षड्भिः संवत्सरैः कष्टैः यदुःसाध्यं प्रसाध्यते[60]।
दत्वाङ्गमुपसर्गस्य तदद्यैव हि साधितम्।।209।।
इहापदि महाभाग नाऽभविष्यत्[61] भवान् यदि।
अधक्ष्याम हि योगिभ्यां सहारण्ये ततो ध्रुवम्।।210।।
साधुसाध्विति संस्तुत्य[62] ततो मारुतिरब्रवीत्।
भवतीनां श्रमः श्लाघ्यः फलयुक्तश्च निश्चयः।।211।।
अहो वो विमला बुद्धिरहो स्थाने मनोरथः।
अहो भव्यत्वमुत्तुङ्गं येन विद्या प्रसाधिता।।212।।
आख्यातञ्च क्रमात्सर्वं यथावृत्तं सविस्तरम्।
पद्मागमादिकं यावदात्मागमनकारणम्।।213।।
ततश्च श्रुतवृत्तान्तो गन्धर्वोऽमरया सह।
समागतो महातेजास्तमुद्देशं सहाऽनुगः।।214।।
नभश्चरसमायोगे देवाऽऽगमनसन्निभे।
क्षणेन तद्वनं जातं सर्वं[63] नन्दनसुन्दरम्।।215।।
हनूमतो[64] मुखात्सर्वं ज्ञात्वा गन्धर्वभूपतिः।
तुष्टस्तस्मात्सुताभिश्च द्रष्टुं रामं स निर्गतः।।216।।
किष्कन्धञ्च पुरं गत्वा भूत्या दुहितृभिः समम्।
शासने पद्मनाभस्य गन्धर्वो रतिमाश्रयात्।।217।।
ताश्च निस्समसौभाग्या विभूत्या परयाऽन्विताः।
उपनिन्ये[65] परा कन्या रामायाऽऽक्लिष्टकर्मणे।।218।।
एताभिरपराभिश्च सेव्यमानो विभूतिभिः।
अपश्यन् जानकीं पद्मो मेने शून्या दिशो दशः।।219।।
अथ श्रीशैलराजस्य त्रिकूटं प्रतिगच्छतः।
शालिदुर्गेण संरुद्धं सैन्यं तस्य महाबलम्।।220।।
ततो जगाद हनूमान् रुद्धं केन बलं मम।
पृथुमतिस्ततो मन्त्री प्राह वाक्यं भयङ्करम्।।221।।

देवकेनाऽपि दुष्टेन मायाशालो विनिर्मितः।
क्रूरं यन्त्रैर्भयं दायीं[66] सिंहव्याघ्रवृकैर्युतः।।222।।
अनेकद्वीपसंवृत्तो ज्योतिर्मण्डलचुम्बितः।
अग्निज्वालासमादीप्तो भूतप्रेतैश्च मण्डितः।।223।।
त्वत्सैन्यं तेन संरुद्धं पश्य नाथ पलायते।
भीतं चेतसि सर्वत्र भक्षमानं हि राक्षसैः।।224।।
श्रीशैलः प्राह तं दृष्ट्वा पश्य रावणचेष्टितम्।
परनारीं स्वयं धृत्वा राज्यं वाञ्छति मूढ धीः।।225।।
शालं प्रोन्मूल्य मायाजं करोमि राक्षसां क्षयम्।
परस्त्रीतस्कराणां हि कदाचिन्न जयो भवेत्।।226।।
जलगवाक्षमित्युक्त्वा प्रविश्य पवनात्मजः।
बाहूभ्यामुद्धृतः शालः कर्माणि मुनयो यथा।।227।।
भुजाभ्यां स्फाटितः शालो वंशग्रन्थी यथाऽग्निना।
हृदयं शालिविद्यायाः स्फुटितं पक्वबिम्बवत्।।228।।
सापूत्कारं ततः कृत्वा नष्टशाली भयातुरा।
मायादुर्गेऽथ संभग्ने भूमिर्जाता यथा नभः।।229।।
ततो हनूमतः सैन्यमग्रे गच्छति लीलया।
नानावाद्यसमायुक्तं ध्वजाडम्बरभूषितम्।।230।।
शालं भंक्तागतं श्रुत्वा श्रीशैलः स समागतः।
सकोपश्च ससैन्यश्च भूपो वज्रमुखाभिधः।।231।।
रावणाऽनुज्ञया येन निर्मितः शाल उत्तमः।
लङ्कामार्गं समारुह्य रक्षति यो दिवानिशि।।232।।
उभयोः सेनयोस्तत्र सञ्जातं कदनं महत्।
वज्रमुखशिरः क्रोधाच्छेदितं श्रीहनूमता।।233।।
श्रुत्वाऽथ मरणं तस्य पुत्री कोपात्समागता।
सुलङ्कासुन्दरीनाम्ना पितुर्वैरं प्रसाधितुम्।।234।।

उभयोः पक्षयोर्वीराः संलग्नाः कदने पुनः।
कन्यकया[67] हतं सैन्यं श्रीशैलस्य पलायतम्।।235।।

हनूमता समं युद्धं कन्या करोति दारुणम्।
विद्याशस्त्रैस्तया घोरैः सोऽपि व्याकुलतां कृतः।।236।।

श्रीशैलोऽसौ ततो वीरः क्रुद्धो जगाद चेतसि।
स्त्रिया हतं मम सैन्यं भग्नं तत् किं करोम्यहम्।।237।।

हन्यते यदि नारीयं मया लोके भवेत्तदा।
मेऽपकीर्त्तिश्च सर्वत्र कुले विद्याभृतां सदा।।238।।

अस्यै द्रक्ष्यामि मद्रपूं मन्मथाकारसन्निभम्।
अस्याश्चित्तं हरिष्यामि कामस्य देशपीडनैः।।239।।

इत्युक्त्वा मन्मथाकारं धृत्वा तस्यै प्रदर्शितम्।
तद्रूपं सम्पतिं दृष्ट्वा साऽभून्मन्मथपीडिता।।240।।

परस्परं ततो दृष्ट्वा कटाक्षैः संधितौ तदा।
युद्धं विश्राम्य चैकत्र मिलितौ[68] तावुभौ शुभौ।।241।।

लङ्कासुन्दरीबालाऽथ पितुः शोकं करोति सा।
तदा श्रीशैलवीरेण सुभाषितैः सुबोधिता।।242।।

तयोस्तत्रैव सञ्जातं विवाहमङ्गलं परम्।
विद्यया कृतसद्गेहैस्तोरणैर्मण्डिते पुरे।।243।।

रात्रिमेकां तया[69] सार्द्धं स्थित्वा लङ्कां पुनः।
प्रतिनिर्गतश्च तदा साऽऽह शृणु नाथ विवेकवान्।।244।।

रावणः स तु दुष्टात्मा परस्त्रीलोलुपः सदा।
त्वां दृष्ट्वा हन्यते क्रोधान्न गन्तव्यं ततस्त्वया।।245।।

सोऽवोचन्न करिष्यामि क्रोधस्य कारणं कदा।
इत्युक्त्वा तत्र संस्थाप्य तां स लङ्का गतो मुदा।।246।।

लङ्कायाश्च बहिर्देशे संस्थाप्य स्वबलं तदा।
विभीषणनरेन्द्रस्य न्यायिनश्च[70] गृहङ्गतः।।247।।

परस्परं समालिङ्ग्य विभीषणमरुत्सुतौ ।
रम्यदेशे समाविष्टौ क्षेमप्रश्नकृतावुभौ ।।248 ।।

ततो जगाद श्रीशैलः शृणु राजन् विभीषण।
किमारब्धं तव भ्राता लोकद्वयविरुद्धकम् ।।249 ।।

परस्त्रीसंगजं पापं बहुजनक्षयङ्करम् ।
वद तस्मै सुबुद्धिस्त्वं यतो राज्यस्थिरं भवेत् ।।250 ।।

सोऽवोचत् बहुधा प्रोक्तं मया तस्मै विवेकतः।
तदा प्रभृति न ब्रूते मया सार्द्धं स रावणः ।।251 ।।

एकादशदिनान्यस्याः सीताया भोजनं विना।
गतानि च तथाऽप्यस्य करुणा नाऽभवद् हृदि ।।252 ।।

उपचारं कुरु तस्या आहारग्रहणं प्रति।
पश्चाच्च तव वाक्येन बोधं यास्यति रावणः ।।253 ।।

विभीषणवचः श्रुत्वा हनूमान् करुणात्मकः।
तस्मात्समुच्थितो वीरो निर्गतस्तद्वनं प्रति ।।254 ।।

शोभमानं महावृक्षैः फलपुष्पादिसम्भृतम् ।
विवेश परमोद्यानं सीतादर्शनलालसः ।।255 ।।

अधोभागे त्वशोकस्य रत्नखञ्चिततल्पके ।
रामस्मरणसंयुक्ता चोपविष्टाऽतिव्याकुला ।।256 ।।

वामकरकपोलस्था मुक्तकेशी कृशोदरी।
शोकवह्निसमावाष्पा रूपलावण्यभूषिता ।।257 ।।

सेव्यमाना बहुस्त्रीभिर्जलपूरितलोचना ।
रोहिणीव सती सीता दृष्टा तेन हनूमता ।।258 ।।

सोऽवोचन्मनसीदं स्वे सीतागुणानुरञ्जितः।
सत्यं रोदति रामोऽस्या सद्गुणैश्चित्तव्याकुलः ।।259 ।।

ततोऽसौ भ्रमराकारं स्वयं भूत्वा सुमुद्रिकाम्।
सीतायाः क्षिप्तवानङ्के वृक्षस्योपरिसंस्थितः ।।260 ।।

सहसा मुद्रिकां दृष्ट्वा रामनामाङ्कितां वराम्।
हसिता जानकी चित्ते मत्वा रामस्य दर्शनम्।।261।।

तस्यामेवमवस्थायां[71] गत्वा नार्यस्त्वरान्विताः।
तोषादवर्द्धयन् दिष्ट्या रावणं तत्परायणम्।।262।।

सन्तुष्टोङ्गगतं ताभ्यो वस्त्ररत्नादिकं ददौ।
श्रुत्वा स्मेराननां सीतां सिद्धकार्यं विचिन्तयत्।।263।।

ततो मन्दोदरीं देवीं जगाद रावण प्रभुः।
देवि गच्छ परिवर्गैः सीतां रञ्जय वेगतः।।264।।

स्वनाथवचनात्साध्वी सर्वान्तःपुरसंयुता।
गत्वा मन्दोदरी शीघ्रं यत्राऽसौ जनकात्मजा।।265।।

विकचाऽस्य द्युतिं सीतां दृष्ट्वा मन्दोदरी चिरात्।
जगौ बाले त्वयाऽस्माकं परमोऽनुग्रहः कृतः।।266।।

अधुना भज[72] लोकेशं रावणं शोकवर्जितम्।
सुराणां श्रीरिवाधीशं लब्धनिश्शेषसम्पदम्।।267।।

इत्युक्त्वा कुपिताऽवोचद्यदीदं भवतीरितम्।
पद्मः खेचरि जानाति म्रियते ते पतिर्ध्रुवम्।।268।।

वार्ता समागता भर्तुरिति तोषमुपागता।
अकार्षं[73] वदनं स्मेरं भजन्ती परमां धृतिम्।।269।।

इति ता वचनं श्रुत्वा राक्षसेशस्य योषिताः।
ऊचुः क्षुद्रव[74]वातेन लपत्येषेति सस्मिता।।270।।

ततोऽवोचत्सती सीता कोऽत्राऽस्ति मम बान्धवः।
येनेयमानिता रम्या मुद्रिका सुखदायिनी।।271।।

एतच्छुत्वाऽथ श्रीशैलो नारीवृन्दसभोदरे।
स्वरूपं दर्शयित्वाऽस्यै कामाकारः स्थितः पुरः।।272।।

सीतायाश्चरणौ नत्वा करपद्मशिरः कृतः।
मातर्मयानीता रम्या रामदेवस्य मुद्रिका।।273।।

ततो जगाद वैदेही कस्त्वं कस्मात्समागतः।
कस्य वंशसमुद्भूतः कथं जानासि राघवम्।।274।।

आत्मगोत्रमभिधानं सर्वमुक्तं हनूमता।
सुग्रीवचरितं स्वस्य रामेण सह सङ्गमः।।275।।

त्वया विना स कुत्रापि रामो न लभते रतिम्।
रात्रौ निद्रां दिवा भुक्तिं न करोति स दुःखतः।।276।।

युष्मद् दासानुबन्धेन प्राणान् धत्ते स राघवः।
त्वदीयाञ्च कथां रम्यां करोति नान्यजल्पनम्।।277।।

श्रुत्वेति सा च सन्तुष्टा प्राहाऽश्रुपूर्णलोचना।
अहं तु पापिनी तुष्टा किं ददाम्यत्र तेऽधुना।।278।।

श्रीशैलोऽसौ ततः प्राह तव दर्शनदर्शनात्।
फलितं पुण्यवृक्षं मे ततः सर्वं भविष्यति।।279।।

पुनर्जगाद सा सीता सत्यं ब्रूहि मरुत्सुतः।
सुखं जीवति जीवेशो लक्ष्मणो वा पराक्रमी।।280।।

दुःखगैर्वा हतोऽरण्ये खरदूषणसङ्गरे।
वियोगात्तस्य मे नाथो मृतः किं वा परं वद।।281।।

मुद्रिका तेन दत्तेयं किं वा लब्धा च्युता क्वचित्।
अस्ति चेत्कुत्र मे नाथो वीर विद्याधरैः समम्।।282।।

सोऽवोचद्देवि सत्यं ते नाथः किष्कन्धके स्थितः।
बहुभिः खेचरैर्युक्तस्तेनाऽहं प्रेषितो ध्रुवम्।।283।।

मन्दोदरी ततः प्राह त्यक्त्वा त्वं रावणं प्रभुम्।
भूचराणां जातोऽसि किङ्करो नीचवर्त्मना।।284।।

दुष्टाय ते दशास्येन दत्तं पूज्यपदं परम्।
भूत्वा तस्यैव सद्रोही मर्तुं वाञ्छसि तत्करे।।285।।

ततो जगाद श्रीशैलः सत्यमुक्तं त्वया परम्।
भूचरास्तु जिनेन्द्राद्यास्तेषां सेवा हि भूषणम्।।286।।

त्वं त्वग्रमहिषी भूत्वा कूटणित्वं करोषि यत्।
श्वभ्रं गच्छसि मृत्वातो रावणेन समं परम्।।287।।

सीतायाः सदृशं रूपं त्वयि नास्ति कदापि च।
अतस्त्वं कुटनी भूत्वा वाञ्छसि स्वस्य जीवितुम्।।288।।

मन्दोदरी ततोऽवोचत्क्रोधसञ्जातमानसा।
स्वामिद्रोही कृतघ्नश्च व्रजन्ति नरकालयम्।।289।।

दूतत्वेन समायातं त्वां वेत्ति यदि रावणः।
तदा तवाऽतिकोपेन शिरच्छेदं करिष्यति।।290।।

खरदूषणकोपेन सीताया रामलक्ष्मणौ।
मृतावेव हि जाने त्वं दशवक्त्रकरेण वै।।291।।

वध्वीभूत्वा तथा सीता दशवक्त्रं करिष्यति।
तदा दशास्यो कोपेन दूरादेव त्यजिष्यति।।292।।

इत्युक्ते जानकी प्राह कथं गर्जसि रण्डिके।
न श्रुतौ किं त्वया लोके बलिनौ रामलक्ष्मणौ।।293।।

ययोर्धनुर्निनादेन कम्पिता सकला मही।
तयोः करैश्च ते भर्त्ता मृत एव हि पश्यसि।।294।।

रावणेन विना यूयं रण्डा भूत्वा गृहे गृहे।
जलाऽश्रुपूर्णनेत्रास्तु भिक्ष्यावृत्तिं[75] करिष्यथ।।295।।

तच्छ्रुत्वा क्रोधसञ्जाता दशवक्त्रस्य योषितः।
जानकीं हन्तुमुद्युक्ताः करतालादिताडनैः।।296।।

तदा श्रीशैलवीरेण हुङ्कारध्वनिना मुदा।
निवारिताश्च ता सर्वाः पतिता भूतले भयात्।।297।।

सर्वासां पतितं तासां वस्त्रगन्धादिभूषणम्।
कोपाद् गत्वा ततस्ताभिः रावणाय निवेदितम्।।298।।

हनूमानथ सीतायाः पादौ नत्वा जगाद च।
भोजनं कुरु वैदेही रामदर्शनवाञ्छया।।299।।

इत्यादि विविधैर्वाक्यैर्बोधिता जानकी तदा।
विभीषणस्य नारीभिर्यत्नं बहुविधं कृतम्।।300।।
विभीषणमुखा भूपा भुक्तवन्तस्तदा ततः।
रामेण रहिता सीता भोक्तुं वाञ्छति नादरात्।।301।।
वायुपुत्राऽनुरोधेन जानक्या भोजनं कृतम्।
विद्याभृताञ्च नारीभी रचितं हेमभाजने।।302।।
भोजनानन्तरं सीता समाविष्टा महीतले।
वायुपुत्रस्ततोऽवोचद्विनयानतमस्तकः।।303।।
मातरारोह मे स्कन्धं प्रापयिष्यामि राघवम्।
ततो जगाद वैदेही श्रीशैलमश्रुलोचना।।304।।
तत्रागन्तुमयुक्तं[76] मे रामस्याऽनुज्ञया विना।
लोकोऽयं परमो मूर्खश्चाऽपवादं करिष्यति।।305।।
चूडारत्नमिदं वीर गृहाण रघुभूभृते।
मत्प्रत्ययकरं देहि वाक्याच्च त्वमिदं वद।।306।।
वैदेह्या ध्रीयते प्राणास्तव दर्शनवाञ्छया।
त्वां विना मेऽत्र सर्वेऽपि प्रभो जानीहि बान्धवाः।।307।।
सुदानं मुनये दत्तं त्वया नाथ मया सह।
तदैव स्मर्यतां चिह्नं सीतया चोदितं मुदा।।308।।
इत्याद्युक्त्वाह तं सीता गच्छ वच्छाऽधुना त्वरम्।
यावन्न जायते कस्मादुपसर्गं नरात्तव।।309।।
तथाऽस्त्विति वचः प्रोक्तः कृत्वा चरणवन्दनाम्।
तद्वनान्निर्गतस्तोषात्स्वदेहपुलकान्वितः।।310।।
नगादुत्तीर्यवन्तं तं कामरूपं हनूमतम्।
दृष्ट्वा वनस्थखेचर्यः कामव्याकुलताङ्गताः।।311।।
ताभिः सह विनोदांश्च करोति पवनात्मजः[77]।
घ्राणच्छेदं शिरोमुण्डमित्यादिपीडनैः परैः।।312।।

नरमुख्याच्च[78] पूत्कारं श्रुत्वा तासाञ्च रावणः।
धावध्वं किङ्कराः सर्वे धृत्वा चानीयतां च तम्।।313।।

तच्छ्रुत्वा धावमानास्ते निर्गताः शस्त्रपाणयः।
प्राप्ता यत्राऽस्ति श्रीशैलो वनवृक्षादिबाधकः।।314।।

हनूमानथ तान् दृष्ट्वा भूत्वा वानररूपताम्।
भूत्वा गोप्यश्च शाखाऽग्रे स्थितो वृक्षस्य दुर्घटे।।315।।

अदृष्ट्वा पुरुषास्ते तं क्व गतोऽस्ति स दुर्जनः।
इत्युक्त्वा चाऽग्रतो भूत्वा वनमध्ये समागताः।।316।।

ततः श्रीशैलवीरोऽसौ वृक्षान्निर्मूल्यतान्नरान्।
मारयामास तैर्वृक्षैः केचित्ते पतिता मृताः।।317।।

चम्पकाश्च्युतपुन्नागाः कपित्था दाडिमद्रुमाः।
फेनसकदलीवृक्षा नारिकेलाश्च[79] निम्बुकाः।।318।।

अशोकाश्चाऽन्यजां वृछाः[80] प्रोन्मूल्य तेन नाशिताः।
सप्तभूमिमया वासा गोपुरतोरणाऽन्विताः।।319।।

पातिताः पादघातेन भूमिकम्पविधायिना।
वापी सरसः सोपानाः क्षिप्तास्तेन जलेषु च।।320।।

भग्ना घोटकशालाश्च नगरस्य बहिस्थिताः।
अग्निना गजशालाश्च दग्धा तेन हनूमता।।321।।

आगतान् पुरुषान् सर्वान् पर्वतोपलताडनैः।
पातयामास श्रीशैलो वृक्षशाखादिभञ्जनैः।।322।।

पतिता मूर्च्छिताः केचित्केचिच्च मरणङ्गताः।
केचिच्छस्त्रकृताघाताः कुर्वन्ति रोदनं परम्।।323।।

केचिद्गत्वा दशास्याय वदन्ति च भयातुरा।
देव कोऽपि महादैत्य आगतोऽस्ति वने बली।।324।।

सद्गेहाः पातितास्तेन मारिता राक्षसा नराः।
प्रोन्मूलिता महावृक्षा फलपुष्पैश्च सम्भृताः।।325।।

रावणः प्राह तच्छ्रुत्वा गच्छ त्वं मेघवाहन।
दुरात्मा कोऽस्ति तं धृत्वा चानीयताञ्च पापिनम्।।326।।

जनकस्य वचः श्रुत्वा निर्गतो मेघवाहनः।
गजारूढो महायोद्धो राक्षसो रक्षसां समः।।327।।

तत्र प्राप्तस्तदा दृष्ट्वा मेघवाहो हनूमता।
कपिमयं बलं कृत्वा तयोर्जातं महद्रणम्।।328।।

बाधितो वायुपुत्रेण मेघवाहः पलायितः।
इन्द्रजिच्च तथा श्रुत्वा निर्गतो रणमुद्धतः।।329।।

तत्र तयोर्महायुद्धं सञ्जातं जीवघातकम्।
परस्परं महाशक्तैः पतिताः सुभटाः पराः।।330।।

तदा तीव्रप्रकोपेन शक्रजिता महात्मना।
नागपाशेन सम्बद्धो दृढ़ं मारुतिवानरः।।331।।

तस्करवत्करौ बध्वा शक्रजिता मरुत्सुतः।
समर्पितो दशास्याय स्वामिने दुष्टरक्षसाम्।।332।।

दशास्यः प्राह श्रीशैलं सिंहासनोपरिस्थितः।
रे रे दुष्ट कथं भग्नं महोद्यानं त्वया मम।।333।।

महेन्द्रनगरं दग्धं बद्धो राजा महेन्द्रवाक्।
भग्नो माया महाशालो हतो वज्रमुखो नृपः।।334।।

मद्योषितो महोद्याने हुङ्कारेण प्रताडिता।
सप्तभूमिमया वासाः पातिता मे कथं त्वया।।335।।

प्रभुत्वं त्वयि संदत्तं मया प्रागेव दुर्जने।
तद्विस्मृतोऽसि रे दुष्ट समाश्रितोऽसि राघवम्।।336।।

यस्य भार्या मयानीता तस्य करोषि दूतताम्।
मम मुखस्य दाक्षिण्यं कथं त्यक्तं[81] त्वया कुधि।।337।।

इत्युक्त्वा हन्तुमुद्युक्तो धृत्वा खड्गं दशाननः।
ततस्तं सचिवा प्रोचुः क्षम्यतां द्रोहिणं विभो।।338।।

त्वत्प्रसादेन जातोऽयं विख्यातो भुवनत्रये।
द्व्यर्द्धद्वीपे भयमुक्तो भ्रमति स्वेच्छयाऽत्र वै।।339।।
तव पादौ परित्यज्य जातो भूमिगकिङ्करः।
तत्फलं नरकावासो द्रोहिणोऽस्य भविष्यति।।340।।
श्रीशैलोऽसौ ततः प्राह कस्याऽपि भयवर्जितः।
मया किं नाशितं चास्य कोपाद्रामो हनिष्यति।।341।।
परस्त्रीतस्करः पापी श्वभ्रं यास्यति रावणः।
तेन समं भवन्तोऽपि व्रजिष्यथ हि नारकम्।।342।।
नाशकाले हि सर्वेषां बुद्धिर्नाशोऽत्र जायते।
त्यक्त्वा सारं सदाचारं दुराचारं रमन्ति ते।।343।।
वृद्धत्वे रावणस्याऽस्य दुर्बुद्धिरभवत्कथम्।
अतो जानीहि नाशोऽत्र राक्षसानां प्रजायते।।344।।
इत्युक्ते रावणोऽवोचदेनं दुष्टञ्च मार्यताम्।
लङ्कायाश्च बहिर्नीत्वा कृत्वा शूलप्ररोपणम्।।345।।
तच्छ्रुत्वा तद्भटैर्वेगाद् बध्वा च लोहशृङ्खलैः।
रथस्तम्भेन सार्द्धं स नीयते पुरवर्त्मनि।।346।।
धूलिपङ्कैश्च लिप्ताङ्गं दृष्ट्वा तं श्रीहनूमतम्।
लोका वदन्ति दुर्वाक्यं पुरस्थाः कौतुकात्परम्।।347।।
रावणपादसेवान्ते त्यजनात्फलितं फलम्।
इदृशं वायुपुत्रस्य शिरच्छेदादिसम्भवम्।।348।।
श्रीशैलश्चाऽथ तच्छ्रुत्वा छित्वा[82] बन्धान् सुवेगतः।
आस्फाल्य पादघातेन तां भटानुदितो नभः।।349।।
पातिता गोपुरास्तेन शालो हेममयो महान्।
वीथिशालाः प्रतोलिश्च गृहाश्च ध्वनिनां ततः।।350।।
दग्धञ्च नगरं सर्वं लङ्कानाममनोहरम्।
पातितं भूपतेर्गेहं ध्वजातोरणभूषितम्।।351।।

ततः ससैन्यको वीरः किष्कन्धं प्रतिनिर्गतः।
सम्पाद्य राक्षसांस्त्रासं क्षेमेन पवनात्मजः।।352।।
श्रीशैलबन्धनं श्रुत्वा सीता रुदति दुःखतः।
तदा वज्रमुखी दास्या वर्जिता चेति भाषणात्।।353।।
श्रीशैलं पश्य देवि त्वं भंक्त्वा शालं प्रतोलिकाम्।
पुरं गच्छति किष्कन्धं दण्डयुक्तं नभस्तले।।354।।
तं दृष्ट्वा हसिता सीता तदा जगाद चेतसि।
गत्वाऽयं रामदेवाय मद्वार्तां च कथिष्यति।।355।।
अथ सम्प्राप्य किष्कन्धपुरं प्रविश्य मारुतिः।
रामपादौ प्रणम्योच्चैरुपविष्टः पुरः भुवि।।356।।
समालिङ्ग्य हनूमन्तं जगाद रघुनन्दनः।
सुखं दृष्ट्वा सती सीता कुत्र सा संस्थिता त्वया।।357।।
चूडारत्नं ततस्तस्य निधायाऽग्रे मरुत्सुतः।
प्राह देव वने दृष्टा सशोका जानकी मया।।358।।
यदुक्तञ्च तया सर्वं रामाय तन्निवेदितम्।
तच्छ्रुत्वा दुःखतो रामो रुदते चित्तव्याकुलः।।359।।
लक्ष्मीधरस्तदाऽवोचत् रुदितो किं फलं भवेत्।
हत्वाऽद्यैव दशास्यं तमानयामि तव प्रियाम्।।360।।
तदा प्रमुदितो रामस्तदा ददौ हनूमते।
सर्वाङ्गस्थितसद्वस्त्रं[83] षोडशाभरणैः समम्।।361।।
धर्मात्प्रीतिरितीह निर्मलयशोधर्माद्धनिनो जना।
धर्माद्दीर्घसुजीवितं नरभवे चारोग्ययुक्तः परम्[84]।।
धर्मात्पुष्टिकररसा बहुतराः प्राप्यंत्यहो मानवाः।
तस्मादात्महितप्रदं कुरु वृषं संसारसञ्छेदकम्।।362।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
कोटिशिलोद्धरणहनूमल्लङ्कागमनसीतावार्ताकथननाम द्वाविंशतितमोऽधिकारः।।22।।

❖❖❖

1. भ्रमन्ती इति ख प्रतौ
2. यक्षदत्तोयमूढौ मां इति ग प्रतौ
3. स वाहां इति ख प्रतौ, स वाहं इति ग प्रतौ, स बाह्यां इति पद्मपुराणे द्वितीयभागे 48/37
4. मुखम् इति ख प्रतौ
5. मैवमित्य सभाषत: इति क प्रतौ, सैवमित्यभ्यभाषत: इति ख प्रतौ
6. ईक्षतायेननाधानं इति ग प्रतौ, ऐक्षतायननामानं भवेदिति।
7. शायिकपाणिक: इति ख प्रतौ
8. तमुत्पेत्युनति इति ग प्रतौ।
9. मयासीः इति ख प्रतौ, मा पासीः इति ग प्रतौ।
10. मनसानि इति ख/ग प्रतौ
11. मुदिग्धान्यनुकम्पया ख/ग प्रतौ
12. श्रृण्वति मृत्यकावत्यां इति ख प्रतौ, श्रृण्वांस्त मृतिकावत्यां इति ग प्रतौ
13. धूनाम्नि इति क/ग प्रतौ
14. विमुक्ताऽसौ इति ख/ग प्रतौ
15. सुना: इति ग प्रतौ
16. संभ्रान्त्वा प्रपश्यन्ती इति ख प्रतौ, संभ्रान्त्या प्रपश्यन्ती इति ग प्रतौ,
    संभ्रान्तमपश्यन्ती इति पद्मपुराणे 2/48/51
17. अन्यं कथान्तरं इति क प्रतौ
18. ज्यकम्बूद्वीपनगस्याऽसौ इति ग प्रतौ
19. क्रन्दसि इति क प्रतौ, कंपसि इति ग प्रतौ
20. आगतोऽहं ततो जातं संगमं च त्वया समम् इति ख प्रतौ,
    आगतो मम सत्सङ्गं मां च बंध्वा मया समं इति ग प्रतौ
21. भूप त्वं तव न ज्ञातं इति ग प्रतौ
22. दत्तं हारं मणिप्रभ: इति क प्रतौ, दत्ता हारमणिप्रभा इति ग प्रतौ
23. दाम्भिकस्याभिभीतस्य इति ख प्रतौ
24. वार्तांगामोपि इति ग प्रतौ
25. जायतो इति ख प्रतौ
26. यदस्ति इति ख प्रतौ
27. गूढग्रहस्त्वया इति ख प्रतौ
28. दुखिता इति क प्रतौ, दुखित इति ग प्रतौ
29. गुणपूर्णासमुद्भव: इति क प्रतौ
30. गृहलक्ष्म्या इति ख/ग प्रतौ
31. तस्या एव च वाक्येन विहति छद्मनावनम् इति ख प्रतौ

32. तां ततः इति क प्रतौ
33. क्वतितं इति ग प्रतौ
34. निबिडं इति ख प्रतौ, नैमिविडं इति ग प्रतौ
35. अस्योपकारमुखस्य इति क/ग प्रतौ
36. पुनस्तथाविधोजातो इति ख प्रतौ
37. वक्रं इति ख/ग प्रतौ
38. मयूरशिष्य इति ख/ग प्रतौ
39. शिखिशिष्पोपमा इति ग प्रतौ
40. क्षणमप्यनुमागताः इति ख प्रतौ
41. देवाः इति ख प्रतौ
42. कारुण्यार्करचेतसा इति ग प्रतौ
43. गणनोप्सिताः इति क प्रतौ
44. एषः श्लोकः ख प्रतौ अनुपलभ्यते
45. गृहाणैतत्तुभ्यं इति क प्रतौ
46. राज्यस्थमिवलयं परं उपसर्गविनिर्मुक्तां यदि वाञ्छसि जीवितां इति ख प्रतौ
47. दष्टा च सिनितोजिना इति ग प्रतौ
48. चित्ताद्देशे इति क प्रतौ, चित्तोर्द्देशे इति ग प्रतौ
49. गोधेरो तस्य इति ख प्रतौ, गोधे तस्य सुदुद्धतः इति ग प्रतौ
50. यत्नं प्रवर्तते नित्यं भवद्भिः क्रियते च यत् इति क प्रतौ
51. उत्पन्नं इति ख प्रतौ
52. तं संप्रस्थितमुन्नताम् इति क/ख प्रतौ
53. जनन्या इति क प्रतौ, जिनया इति ग प्रतौ
54. मानितास्ते स रामेण इति क/ग प्रतौ
55. दधिनाम सद्वीपस्य वार्ता अग्रिमश्लोके च उद्धृतः अतएव अत्र उदधिनाम स्थाने दधिनाम इति भवितव्यम्।
56. आवां याचति इति ख प्रतौ, आवां याचन्ति इति ग प्रतौ
57. मानवं इति ख प्रतौ
58. लब्धवान्न सः इति ख प्रतौ, लब्धवान्ततः इति ग प्रतौ
59. तदास्य इति ग प्रतौ
60. यछःसाध्यते इति ख प्रतौ
61. सम्भविष्यत् इति ख/ग प्रतौ
62. संस्मृत्य इति ख प्रतौ
63. स्वर्गे इति क प्रतौ
64. हनूमानो इति ख प्रतौ

65. उपनिन्यो इति क/ख प्रतौ
66. भयदीयं इति क प्रतौ, भयदाया इति ग प्रतौ
67. कन्यकाया इति ग प्रतौ
68. मिलेतौ इति क प्रतौ
69. रात्रिमेकं तया सार्द्धं इति ग प्रतौ, रात्रिमेका तया सार्द्धं इति ग प्रतौ
70. न्यायिनः इति क/ख/ग प्रतौ, न्यायिनः भवेत्
71. तस्यामेवावमस्थायां इति क प्रतौ, तस्यामेववचस्थायां इति ख प्रतौ
72. भूंज इति ख प्रतौ
73. अकर्षं इति ख प्रतौ, अकीर्षं इति ग प्रतौ
74. क्षुद्रवत् इति क प्रतौ
75. जीक्ष्यावृत्तिं इति ख प्रतौ
76. तत्र गन्तुं न युक्तं इति ख प्रतौ, तत्रागन्तुं न युक्तं इति ग प्रतौ
77. पवनात्मकः इति क प्रतौ
78. नरमुख्याच्च इति त्रयौ प्रतौ, नरमुखः इति अर्थः अतएव नरमुखाच्च एतत् श्रेष्ठः।
79. नारिकेराश्च इति त्रयौ प्रतौ, नारिकेलाश्च भवितव्यमिति।
80. अशोकाश्चत्यजांछाद्याः इति त्रयौ प्रतौ, अशोकाश्चन्यजां वृक्षाः भवितव्यम्
81. तिक्तं इति क प्रतौ
82. भंक्त्वा इति क प्रतौ
83. यद्वस्त्रं इति ख प्रतौ, मद्वस्त्रं इति ग प्रतौ
84. चारोप्य युक्तं परं इति क प्रतौ, चारोग्य युक्तिं परां इति ग प्रतौ

❖❖❖

त्रयोविंशतितमोऽधिकारः

अथ लक्ष्मीधरोऽवोचत्किं भो विधाधराधिपाः।
लङ्कां गन्तुं हि युष्माकं विलम्बो वर्तते कथम् ।।1।।
चेद्विलम्बोऽस्ति युष्माकं तदावां[1] भ्रातरावुभौ।
भुजाभ्यामब्धिमुत्तीर्य गच्छावहे रणं प्रति।।2।।
अथोचे सिंहनादाख्य एवं मा ब्रूषि लक्ष्मण।
युष्माकं या गतिर्भावी सैवास्माकं भवेद् ध्रुवम्।।3।।
एकेनैव सुवीरेण लंका दग्धा हनूमता।
वयं तु बहवः सूराः[2] विद्याबलपराक्रमाः।।4।।
क्रुद्धेऽधुना दशवक्त्रे चाऽस्माकं मृत्युमागतम्।
अथोचे चन्द्रमारीचिः किमर्थं विभ्यसे हृदि।।5।।
स एव परनारीषु तस्करो हि मरिष्यति।
कर्त्तव्यं त्वरितं लङ्कां प्रति तस्मात्प्रयाणकम्।।6।।
योद्धा सन्त्यस्मदीया ये तेषां नामान्यतः शृणु।
नलनीलौ च सुग्रीवश्चाऽङ्गाङ्गदौ मरुत्सुतः।।7।।
विराधितो महेन्द्राख्यः प्रश्नकीर्ति[3]स्तदात्मजः।
ख्यातो घनगतिस्तीव्रो भूतनादो गजस्वनः।।8।।
भामण्डलश्च वज्रास्य इत्यादि सङ्ख्यवर्जिताः[4]।
रावणाऽग्रे च तेषां कः कामचाण्डालसेवकः।।9।।
तस्य वाक्यं नृपैर्श्रुत्वा रणभेर्यश्च ताडिताः।
तच्छ्रुत्वा वानराधीशाः सञ्जाता रणमुद्यताः।।10।।
रघुपुत्रौ पुरः कृत्वा विमानस्थाश्च निर्गताः।
लङ्कां प्रति महायोद्धाश्चतुर्बलसमन्विताः।।11।।
मार्गशीर्षस्य कृष्णायां पञ्चम्यामुत्तमे दिने।
नानावाक्यैश्च युक्तास्ते गच्छन्ति शकुनैः शुभैः।।12।।
क्षणाद्वेलन्धरद्वीपं प्राप्तास्ते वानरा नृपाः।
वेलन्धरपुरस्वामी समुद्रो नाम तत्र च।।13।।

युद्धे नलेन संस्पर्द्धय जित्वा निहितसैनिकाः।
बद्धो बाहुबलौघेन समुद्रः खेचरः परः ॥14॥
सम्पूज्य च पुनर्मुक्तः पद्मनाभस्य शासने।
स्थापितोऽवस्थिताश्चैते पुरे तत्र यथोचितम्॥15॥
तेन श्री कमला चैव गुणमाला तथाऽपरा।
रत्नचूला तथा कन्या समुद्रेण प्रमोदिना॥16॥
कल्पिता पुरशोभाद्या योषिद्गुणविभूषिता।
लक्ष्मीधरकुमाराय सुरस्त्रीसमविभ्रमाः॥17॥
तत्रैकां रजनीं स्थित्वा सुवेलमचलङ्गताः।
सुवेलनगरे तत्र सुवेलो नामखेचरः॥18॥
जित्वा तमपि सङ्गामे हेलामात्रेण खेचराः।
चिक्रीडुर्मुदितास्तत्र त्रिदशा इव नन्दने॥19॥
सुखेन तत्र ते सर्वे सुक्षेमाः क्षेपितक्षपाः।
अन्येद्युरुद्यता गन्तुं लङ्कां तेनं सुविभ्रमाः॥20॥
हेमगृहैर्महारम्यां जिनप्रासादभूषिताम्।
काञ्चनशालसम्वृत्तां लङ्कां दृष्ट्वा समीपगाम्॥21॥
हंसद्वीपं समाश्रित्य चोत्तारिता यथायथम्।
हंसपुरपतिं हंसं वध्वाकृतश्च किङ्करः॥22॥
पश्यन्ति खेचरास्तत्र भामण्डलसमागमम्।
यावन्नायाति स तावल्लङ्कायां प्रेषितो नरः॥23॥
श्रुत्वा तत्र मुखात्तत्र रामस्यागमनं परम्।
कलकलो महान् जातो लङ्कायां परमाद् भयात्॥24॥
ततो रावणराजेन रणभेर्यश्च ताडिताः।
तन्नादं सुभटाः श्रुत्वा सन्तुष्टा रणलालसाः॥25॥
सन्नद्धा विविधैर्वेषै रथहस्तितुरङ्गमैः[5]।
आगता रावणस्यान्ते स्वामिभक्तिपरायणाः॥26॥

सङ्गाममुद्यतं ज्ञात्वा दशवक्त्रं विभीषणः।
बुद्धिं दातुं समायातस्तस्य गेहं[6] विवेकवान्।।27।।
नत्वा रावणपादौ स संस्थितो[7] विनयान्वितः।
श्रूयतां विनयं देव कृपां कृत्वा ममोपरि।।28।।
त्वं लङ्केशो जगत्स्वामी न्यायमार्गप्रवर्त्तकः।
देहि सीताञ्च पद्माय त्यज दुष्टं दुराग्रहम्।।29।।
तेन सार्द्धं समायाताः श्रीशैलाद्या नभश्चराः।
तैर्बन्धितः समुद्राख्यः सुवेलश्च सुहंसवाक्।।30।।
ते च लङ्कां ग्रहिष्यन्ति परस्त्रीसङ्गदोषतः।
वंशनाशो भवेन्नित्यमस्माकं प्राणसंशयः।।31।।
तच्छुत्वा शक्रजित्प्राह पितृचित्तानुसारतः।
कोऽधिकारोऽस्ति साधोऽत्र तव बुद्धिप्रभाषणे।।32।।
यदि त्वं विभ्यसे चित्ते तदा तिष्ठ स्वसद्मनि।
योषिल्लक्ष्मीं गृहीत्वा स्वां कृत्वात्मानं च दीनताम्[8]।।33।।
स्त्रीरत्नं सर्वरत्नेषु तत्सम्प्राप्य कथं त्यजेत्।
रावणाग्रे कियन्मात्राः क्षणिका वानरा नराः।।34।।
ततो विभीषणोऽवोचदेवं मा ब्रूषि शक्रजित्।
सुकर्मबलतो रङ्को भूपतिं प्राप्यते नराः।।35।।
पापाद्रङ्कायते राजा तस्मात्पापं परित्यज।
कुरु सारं सदाचारं परस्त्रीसङ्गवर्जितम्।।36।।
यावल्लक्ष्मणवीरेण लङ्का नैवाऽत्र गृह्यते।
तावत्त्वया च रामाय सीता सुखाच्च दीयते।।37।।
सीता नाऽऽनीता पित्रा लङ्कानाशनहेतवे।
सर्ववंशक्षयं कर्तुमानीता विषमौषधी।।38।।
भूपा हनूमताद्याश्च बहवो राममाश्रिताः।
सिंहसमैश्च तैः सार्द्धं त्वं शिवो युद्धयसे कथम्।।39।।

इत्युक्ते क्रोधसम्भारात्खड्गमादाय रावणः।
दुष्टात्मा प्रोत्थितो हन्तुं धृत्वा वैरं महत्तरम्।।40।।
विभीषणोऽपि तं दृष्ट्वा प्रोत्थितो युद्धहेतवे।
तदा तौ मन्त्रिवर्गेण बहुयुक्त्या निवारितौ।।41।।
दशाननस्ततोऽवोचद् रे दुष्ट विभीषण।
अस्मद्देशे कदाचित्त्वं मा तिष्ठ वैरिसत्प्रियः।।42।।
विभीषणस्ततः प्राह नाऽहं रत्नश्रवात्मजः।
लङ्कायां यदितो[9] नाशं करिष्यामि तदा भवेत्।।43।।
यथाऽयं राक्षसाधीशस्तथा चाहमऽपि प्रभुः।
अर्द्धराक्षसद्वीपस्य राज्यं गृह्णामि सर्वथा।।44।।
इत्युक्ता निर्गतो मानी लङ्कापुराद्विभीषणः।
त्रिंशद्भिःक्षोणिभिः सार्द्धं रामस्याश्रितहेतवे[10]।।45।।
विद्युद्वेगो घनप्राज्ञः प्रचन्द्रश्चपलाऽभिधः।
उद्गतोऽशनिसङ्घाख्यः कालाद्याश्च महाबलाः।।46।।
विभीषणाश्रिताः पूर्वं साऽन्तःपुराश्च निर्गताः।
चतुर्बलेन संयुक्ता हंसद्वीपं समागताः।।47।।
विभीषणस्य सैन्यस्य श्रुत्वा भेरीरवं तदा।
भीतास्ते कम्पयश्चित्ते सन्नद्धा योद्धुमुद्यताः।।48।।
वज्रावर्तधनुर्वेगं हस्ते चकार राघवः।
लक्ष्मणः सागरावर्तं पुरतो निर्गतस्तदा।।49।।
गजवाजिरथान् भृत्यान् पुरः कृत्वा च निर्गताः।
रणभेरीञ्च सन्ताड्य वानरा विभवान्विताः।।50।।
विभीषणेन दूतोऽथ प्रेषितो राघवं प्रति।
तेनागत्याऽत्र सम्प्रोक्तं विभीषणाऽऽगमं परम्।।51।।
कृत्वा वैरं समं भ्रात्रा तव शरणमागतः।
रक्ष देव कृपां कृत्वा राक्षसेशं विभीषणम्।।52।।

रामः प्राह समाहूय जाम्बाद्यान्मन्त्रिणः परान्।
कपटात्किं समायातः किं वा सत्यं विभीषणः।।53।।

समुद्रमितिरित्याह रामं बुद्धिविशारदः।
धर्मपक्षी सदाचारी वर्तते स विभीषणः।।54।।

विरुद्धो बन्धुना सार्द्धं जातोऽस्ति तस्य निश्चितः।
तव पुण्याऽनुसारेण सुन्दरं किं न जायते।।55।।

शृणु चाऽत्र कथां रम्यां पुरमस्ति सुकाञ्चनम्।
सूर्यदेवो नृपस्तत्र राज्ञी तस्य मतिप्रिया।।56।।

लता नाम्ना वनिक् रण्डा तस्याः स्तो वटुकौ शुभौ।
गिरिभूती[11] च नामानौ परं प्रीतिनिबन्धनौ।।57।।

कदाचिद्यानपात्रेऽपगत्वा[12] ताभ्यां मनोहरम्।
गृहीतं सुधनं दत्वा रत्नमेकं कलिप्रदम्।।58।।

तद्दृष्टवाऽथ गिरिः प्राह भूतिकं मारयाम्यहम्।
सारं रत्नं ग्रहिष्यामि करिष्यामि प्रयोजनम्।।59।।

यदा न दृश्यते रत्नं तदा निर्मलमानसः।
भूतिरपि तथा ब्रूयाद्रत्नं दृष्ट्वा कदापि तत्।।60।।

दत्तं तद्रत्नमुभाभ्यां मातृहस्ते सुखाप्तये।
तद्दृष्ट्वा प्राह माताऽपि मारयामि कुमारकौ[13]।।61।।

सञ्ज्ञातं तैस्ततः सर्वैर्रत्नं दुष्टं न रक्षते।
इत्युक्त्वा सागरे क्षिप्तं वैरनाशनहेतवे।।62।।

मत्स्येन गलितं तत्र धीवरेण स मारितः।
पुनरानीय तद्दत्तं तेन पुण्ये तयोः पुनः।।63।।

पूर्वबद्धैरसम्बद्धो जातस्तद्रत्नदर्शनात्।
तेषाञ्च मातृपुत्राणां जीवजातं परस्परम्।।64।।

तद्रत्नं तैः पुनर्ज्ञातं दुष्टं वैरस्य कारणम्।
चूर्णीकृत्वा समुद्रे तच्क्षिप्तं स्वस्य सुखाप्तये।।65।।

जातमस्ति तथा वैरं भो पद्म धनहेतवे।
लङ्कायां रक्षसां मध्ये विभीषणदशास्ययोः।।66।।

श्रुत्वा पद्मेन तस्योक्तिमाकारितो विभीषणः।
ततो वेगात्समायातो दूताद्रत्नश्रवास्सुतः।।67।।

पद्मपादौ प्रणम्योचे ममेह जन्मनि प्रभो।
त्वत्पादौ सरण्यौ स्यातां[14] परस्मिंश्च जिनोत्तमः।।68।।

राघवः प्राह तच्छ्रुत्वा शृणु राक्षसभूपते।
लङ्कां तुभ्यञ्च दास्यामि राक्षसद्वीपसंयुताम्।।69।।

विभीषणसमायोगे वर्तते यावदुत्सवः।
तावत्सिद्धमहाविद्यो भामण्डलः समागतः।।70।।

विजयार्द्धनगाधीशं दृष्ट्वा भामण्डलं प्रभुम्।
पद्मादयश्च सन्तुष्टा वानरा विमलप्रभाः।।71।।

अष्टदिनानि स्थित्वाऽत्रहंसद्वीपास्ततश्च ते।
निर्गता विभवैर्युक्ताश्चतुर्बलेन संयुताः।।72।।

लङ्कायां रणभूमिं तां प्राप्ता वानरवाहिनी।
विंशतियोजनस्थानं रुध्वा दण्डः समुत्तरत्।।73।।

नानावाद्यसमायुक्तैर्बहुतोरणमण्डपैः।
गजवाजिरथाद्यैश्च भूषितं वानरं बलम्[15]।।74।।

सामीप्यं परसैन्यं तत्प्राप्तं श्रुत्वा दशाननः।
चिरकाले रणं प्राप्य भेर्यस्ताडितवान् पराम्।।75।।

मारीचप्रमुखा भूपाः सन्नद्धा रणलालसाः।
रावणस्याऽन्तिकं प्राप्ताः स्वसैन्यसचिवैर्युताः।।76।।

अक्षोहिणी सहस्राणि चत्वारि रावणप्रभोः।
मिलितानि सुरम्याणि महाकदनहेतवे ।।77।।

एकाऽक्षोहिणी सहस्रं वानराणां प्रभो परम्।
प्रभामण्डलवीरस्याऽक्षोहिण्येकसहस्रकम् ।।78।।

किं प्रमाणाक्षोहिणी स्यात्तदाह गौतमो मुनिः।
अष्टावत्र गता भेदा विवादाङ्गे प्रकीर्त्तिता।।79।।
पत्तिः सेना च सेनास्थं गुल्मो वाहिनिपृतेन[16]।
चमूरानिकिनी चेति चाष्टधा शृणु तद्विधिः।।80।।
एको रथो गजश्चैकस्तथा पञ्चपदातयः।
त्रयस्तुरङ्गमास्सैषापत्तिरित्यभिधीयते ।।81 ।।
पत्तिस्त्रिगुणिता सेना तिस्त्रः सेनामुखं च ताः।
सेनामुखानि च त्रीणि गुल्ममित्यनुकीर्त्यते।।82।।
वाहिनी त्रीणि गुल्मानि पृतना वाहिनी त्रयः।
चमूस्त्रिपृतना ज्ञेया चमूत्रयमनीकिनी।।83।।
अनीकिन्यो दश प्रोक्ता प्राज्ञैरक्षोहिणीति सा।
तदाङ्गानां पृथक् सङ्ख्या चतुर्णां कथयामि ते।।84।।
अक्षोहिण्यां प्रकीर्त्यानि रथानां सूर्यवर्च्चसाम्।
एकविंशतिसङ्ख्यानि सहस्राणि विचक्षणैः।।85।।
अष्टौ शतानि सप्तत्या सहिताऽन्यपराणि च।
गजानां कथितं ज्ञेयं संख्यानं रथसङ्ख्यया।।86।।
एका लक्षा सहस्राणि नवसङ्ख्या समन्विताम्।
शतत्रयञ्च पञ्चाशदक्षोहिण्यां पदातयः।।87।।
पञ्चषष्टिसहस्राणि षट्शतञ्च दशोत्तरा।
अक्षोहिण्यामियं सङ्ख्या वाजिनां परिकीर्त्तिता।।88।।
एवं सङ्ख्या बलोपेतं विज्ञायापि दशाननम्।
बलं किष्कन्धनाथस्य किञ्चिद्भयेन वर्जितम्।।89।।
क्षमयित्वा स्वनारीभिः समर्प्याऽथ गृहं धनम्।
आलिङ्ग्य स्वकुटम्बेभ्यो निर्गता रक्षसां भटाः।।90।।
क्वचिदाह शृणु नाथ यावन्नायासि त्वं गृहे।
तावत्सर्वरसानां मे नियमोऽस्तु जिनाऽग्रतः।।91।।

कदाचिदाऽऽह मणिपुष्पैः पूजयामि जिनेश्वरम्।
यदि क्षेमेन मे नाथं पश्यामि गृहमाऽऽगतम्।।92।।

कदाचिदाह रणक्षेत्रे गत्वा नाथो मरिष्यति।
तदा वह्नौ प्रविश्यामि प्राणत्यजनहेतवे।।93।।

सङ्ग्रामे वीक्षिते पृष्टे यदि नाथाऽऽगमिष्यसि।
दुर्यशस्तदाऽहं प्राणान्मोक्षामि श्रुतिमात्रतः।।94।।

किङ्कराणां यतः पत्न्यो वीराणामतिगर्विताः।
धिग्शब्दं मे प्रदास्यन्ति किन्तु कष्टमतः परम्।।95।।[17]

रणप्रत्याऽगतं वीरमुरो व्रणविभूषणम्।
विशीर्णकवचं प्राप्तं जयं लब्धं भटास्तव।।96।।

द्रक्ष्यामि यदि धन्याऽहं भवन्तमपि कच्छनम्[18]।
तदा चाऽहं भविष्यामि यशःकीर्त्या च भूषिता।।97।।

इत्यादि विविधालापैर्भाषिताः सुभटा जनाः।
निर्गताः सङ्गरकर्तुं नृपाज्ञां कृतमस्तकाः।।98।।

वार्यमाणा अपि नार्यः पुनरायान्ति पृष्टितः।
रमणस्य परं प्रीत्या पुनर्दर्शनलालसा।।99।।

पुरतो निर्गतौ वीरौ हस्तप्रहस्तनामकौ।
दशवक्रमनापृच्छ स्वामिभक्तिपरायणौ[19]।।100।।

तयोः पृष्टे च संलग्नाः सुमाली प्रमुखा नृपाः।
सार्द्धद्विकोटिसङ्ख्याताः कुमारा रणमुद्धताः।।101।।

कुशकुनास्तदा तेषां जाता धूमादिदर्शनाः।
मत्वा तथापि सूरत्वं रणभूमिं समागता।।102।।

तेषां रणरवं श्रुत्वा निर्गतौ रामपक्षिणौ।
नलनीलौ परौ वीरौ चतुर्बलेन संयुतौ।।103।।

रामाद्याः क्षत्रिया भूपा निर्गताः शकुनैर्वरैः।
तयोः पृष्टे च संलग्ना रणभूमिसमाश्रिताः।।104।।

उभयोः सेनयोस्तत्र सञ्जातं कदनं महत्।
हस्तिभिः पातिता अश्वा भृत्यैरश्वा निपातिताः।।105।।
आक्रन्दो भृत्यवर्गाणां गजानां घनगर्जनः।
हेषारवस्तुरङ्गानां सञ्जाता रथसध्वनिम्।।106।।
मुहूर्ते नलिनिलाभ्यां संयुद्धच्चरणमूर्द्धनि।
निहतौ भिण्डिमालाभ्यां मृतौ हस्तप्रस्तकौ।।107।।
तयोः सम्प्राप्तयोर्मृत्युं स्वस्वस्थाने च तद्दिने।
गत्वा चोत्तरितं सैन्यं श्रान्तं वानरराक्षसोः।।108।।
ततोऽसौ श्रेणिकोऽपृच्छद्गौतमं गणनायकम्।
केन वैरेण ताभ्यां तौ हतौ हस्तप्रहस्तकौ[20]।।109।।
तच्छ्रुत्वा गौतमोऽवोचत् श्रृणु तेषां भवावलिम्।
यतो वैरस्य शान्तिं स्यात्प्राणिनामिह जन्मनि।।110।।
राजगृहे पुरे पुत्रौ द्विजस्येन्धकपल्लवौ।
जैनौ तौ दानपूजादौ तत्परौ धर्मवत्सलौ।।111।।
कदाचित्पथि गच्छन्तौ भिल्लाभ्यां तौ च मारितौ।
कलिकलिंदनामाभ्यां पापिभ्यां दुर्घटे वने।।112।।
साधुदानप्रपुण्येन हरिक्षेत्रे मृतौ च तौ।
जातौ मृत्वा ततः प्राप्तौ स्वर्गं सुधर्मनामकम्।।113।।
ततश्च्युत्वा मनुष्यत्वं प्राप्य[21] कृत्वा तपो वरम्।
स्वर्गे गत्वा पुनश्च्युत्वा सञ्जातौ नलनीलकौ।।114।।
भील्लौ तौ संसृतौ भ्रान्त्वा सञ्जातौ यमुनातटे।
तापसौ च तपः कृत्वा सञ्जातौ ज्योतिषौ सुरौ।।115।।
विजयार्द्धे ततश्च्युत्वाऽरिञ्जयनगरे च तौ।
वह्निनामनृपाज्जातौ चाऽश्विन्याः कुक्षिसम्भवौ[22]।।116।।
हस्तप्रहस्तनामानौ गर्विणौ बलिनौ शुभौ।
रणे भग्नौ न केनाऽपि दशवक्रस्य भाक्तिकौ।।117।।

मारितौ नलनीलाभ्यां पूर्ववैरस्य पापतः।
पूर्वबीजं विना न स्यात्प्रीतिर्वा वैरसम्भवः॥118॥

अन्येद्याः रावणा भूपाः श्रुत्वा हस्तप्रहस्तयोः।
मरणं निर्गता योद्धुं मारीचप्रमुखा भटाः॥119॥

सम्भग्ना रणभूमौ तैर्वानराः सुपराक्रमाः।
दशदिशां पलायन्ते मारिता राक्षसैर्नृपैः॥120॥

किष्कन्धस्य बलं भग्नं दृष्ट्वाऽथ पवनात्मजः।
उत्थितः कदनं कर्तुं राक्षसाणां क्षयङ्करम्॥121॥

तं दृष्ट्वा राक्षसा दूराज्जीवं धृत्वा पलायिताः।
मालीवांश्च महायोद्धा प्रोत्थितो राक्षसाऽग्रणी॥122॥

हनूमान्मालिनोस्तत्र[23] सञ्जातं कदनं महत्।
हस्तिनो हस्तिभिः सार्द्धं वाजिनो वाजिभिः समम्॥123॥

रथिनो रथिभिर्लग्ना पदातयः पदातिभिः।
सचिवाः सचिवैः साकं नृपा नृपैर्विदारिताः॥124॥

ततो हनूमता शक्त्या मारितो मालिवान्प्रभुः।
पतितः प्राप्य मूर्च्छां सः भूमौ विगतचेतनः॥125॥

ततोऽसौ सचिवैस्तस्य नीतो लङ्कां सुभक्तितः।
गतं मालिनमालोक्य वज्रोदराख्य उत्थितः॥126॥

सोऽपि श्रीशैलवीरेण वज्रेण ताडितो हृदि।
पतितो मरणं प्राप्य हुङ्कारेणापि वर्जितः॥127॥

ततो राक्षसनाथस्य नष्टं सैन्यं दिशो दश।
तं दृष्ट्वा रावणपुत्रो जम्बूमाली समुत्थितः॥128॥

तस्मिन्नुत्थित्तमात्रेण नष्टं सैन्यञ्च मारुतम्।
तं दृष्ट्वा वायुपुत्रोऽथ सन्मुखञ्च समागतः॥129॥

ततस्तीव्रप्रकोपेन सुजम्बूमालिना हतः।
गदया वक्षसि श्रीमान् वीरः पवननन्दनः॥130॥

मूर्च्छां प्राप्य पुनः सञ्ज्ञां सम्प्राप्य पवनात्मजः।
षष्टिसिंहरथं प्रोग्रमारुह्य पुनरागतः ।।131।।
सञ्जातं परमं युद्धं जम्बूमालिहनूमतोः।
रथाश्वरथिभिर्भग्ना गजागजैश्च मारिताः ।।132।।
अश्वा अश्वैश्च सम्भिन्ना भृत्या भृत्यैर्विदारिताः।
केचिन्मृत्युङ्गता वीरा केचिन्मूर्च्छां समागताः ।।133।।
ततः श्रीशैलवीरेण वज्रदण्डेन ताडितः।
जम्बूमाली हृदिस्थाने पतितः श्वासवर्जितः ।।134।।
तं जम्बूमालिनं स्थाप्य शिविकायाञ्च मूर्च्छितम्।
रणात्पलायनं कृत्वा गता राक्षससैन्यकाः ।।135।।
ततो दूरे स्थितं दृष्ट्वा रावणं राक्षसाधिपम्।
योद्धुं दधाव हनूमान् तं प्रति भयवर्जितः ।।136।।
सन्मुखमागतं दृष्ट्वा श्रीशैलं गर्वपूरितम्[24]।
युद्धे दृष्टिञ्चकाराऽसौ क्रुद्धो वीरदशाननः ।।137।।
ततस्तस्यैव सामन्ताः विनम्य रावणं प्रभुम्।
रणभूमौ समायाता योद्धुं हनूमता समम् ।।138।।
संयुद्ध्य तैश्चिरं कालं वेष्टितो वायुनन्दनः।
तञ्च तथाविधं दृष्ट्वा प्रोत्थिता वानरा नृपाः ।।139।।
नलनीलौ च सुग्रीवः सुषेणश्च विराधितः।
प्रीतिङ्करो महायोद्धा भामण्डलो विभीषणः ।।140।।
महेन्द्रतनयाः सर्वे समुद्रोऽहं स भूपतिः।
एभिर्मुख्यैः खगैः वीरैः मारिता राक्षसाः नृपाः ।।141।।
पलायितास्ततो भीताः राक्षसाः व्याकुलात्मकाः।
तं दृष्ट्वा कुम्भकर्णोऽसौ प्रोत्थितो राक्षसाऽग्रणी ।।142।।
त्रासं प्राप्तास्ततो वीरा वानराणां रणे पराः।
रणं तथापि नो त्यक्तं श्रोणितगलिता गताः ।।143।।

कुम्भकर्णं भटं दृष्ट्वा वीरौ सुग्रीवनन्दनौ।
भामण्डलशशीन्द्राद्य रणभुविं समागताः।।144।।
दृष्ट्वा तान् युद्धतः क्रोधात्कुम्भकर्णोऽथ मायया।
विद्यया स्वापयामास[25] निद्रयेव सुखाकरे[26]।।145।।
च्युत्वा तेषां करेभ्यश्च शस्त्राणि पतितानि च।
उत्थापयत्तान् सुग्रीवं प्रतिबोधसुविद्यया।।146।।
पुनस्ते कुम्भकर्णेन समं युद्धन्ति वानराः[27]।
ततः स व्याकुलो जातस्तै: पीडितो रणे रुषा।।147।।
तद्दृष्ट्वा प्रोत्थितो योद्धुं रावणो राक्षसां प्रभुः।
इन्द्रजिच्च ततः प्राह नत्वा तातं महाभटा:।।148।।
मयि सति च ते तात गन्तुं न युज्यते रणम्।
पश्य शक्तिं ममाप्यत्र मारयामि कपीन् परान्।।149।।
इत्युक्त्वा सः समारुह्य त्रिलोक्यडम्बरं गजम्।
आगतः सचिवैर्युक्तः शक्रजिद्रणमूर्द्धनि।।150।।
तेनागमनमात्रेण भीता वानरवाहिनी।
तेषां तथापि सञ्जातं रणं वानररक्षसाम्।।151।।
नास्ति किष्कन्धनाथस्य स नरो यो न विन्द्धितः।
रावणस्य कुमारेण शरेण रणमध्यगः।।152।।
हन्यमानं कुमारेण बलं दृष्ट्वा विराधितः।
प्रभामण्डलसुग्रीवाः स्वयं योद्धुं समुत्थिताः।।153।।
स्वस्य नाथाऽनुरोधेन युद्ध्यमानाः परस्परम्।
उभयो पक्षयोर्वीरा: मृता: सङ्ख्यविवर्जिताः।।154।।
रक्तप्रवाहपूरेण प्लावितं सकलं बलम्।
पुनर्वाजिखुरैस्तच्च कर्दमन्तं[28] रणं परम्।।155।।
शक्रजिदाह सुग्रीवं रे रे वानरदुर्मते।
त्वमाश्रितोऽसि पद्माभं त्यक्त्वा रावणभूपतिम्।।156।।

गच्छसि क्वाऽधुना मूढ मृत्युं वाञ्छसि मत्करे।
ततो जगाद सुग्रीवः किं व्यर्थं मूढ गर्जसि।।157।।
पितुरन्यायमार्गेण क्षयं यासि स्वयं रणे।
अन्यायकारिणां सिद्धिर्दृष्टा कार्यस्य न क्वचित्।।158।।
इत्युक्तौ तौ तदा वीरौ युद्धतस्तौ परस्परम्।
बहुधा शस्त्रसङ्घातैः सुराः पश्यन्ति कौतुकम्।।159।।
मेघवाहेन संलग्नो भामण्डलखगेश्वरः।
वज्रनक्रः समाहूतो विराधितेन भूभृता।।160।।
हनूमान् कुम्भकर्णेन रुद्धो बुद्ध्या रणाञ्जिरे।
मारीचेन महेन्द्राख्यः शूकेन नलनीलकौ।।161।।
एकमेकश्च कोपेन मारयत्यत्र निर्दयाः।
शस्त्रवज्रेण सम्भिन्ना वहन्ति रक्तनिर्जराः।।162।।
शक्रजिता कुमारेण शस्त्रौघैर्व्याकुलीकृतः।
सुग्रीवश्चाऽतितेजस्वी रणं तथापि नोज्झति।।163।।
सन्त्यज्य वाहनं चैकमन्यं रोहति शक्रजित्।
सुग्रीवोऽपि तथा वीरः करोति शस्त्रवर्षणम्।।164।।
मेघबाणैश्चकाराऽसौ प्लावनं शक्रजिन्नृपः।
सुग्रीवभूपतेः सैन्यं समुद्रे मत्सवत्तदा।।165।।
पवनाऽस्त्रेण सुग्रीवश्चकार क्षयतां घनम्।
वह्निबाणं पुनस्तेन नियुक्तं वानरान् प्रति।।166।।
वह्निना दह्यमानं स्वं दण्डं दृष्ट्वाथ वानराः।
मुमोच मोघबाणञ्च वह्निं वारयितुं क्षणात्।।167।।
एवं विद्यासु शस्त्रौघैः पीडितो वानराधिपः।
नागपाशेन सम्बद्धं शक्रजिता मृगो यथा।।168।।
मेघवाहकुमारेण तथा भामण्डलप्रभुः।
सर्पपाशप्रयोगेन सम्बद्धो वानरो यथा।।169।।

शक्रजिन्मेघवाहाभ्यां यावद्बद्धो रणाञ्जिरे।
प्रभामण्डलसुग्रीवौ तावदन्ये पलायिताः।।170।।
ततो विभीषणोऽवोचत्पश्य राघव लक्ष्मण।
नागपाशेन सम्बद्धौ पतितौ खेचरेश्वरौ।।171।।
पश्य च कुम्भकर्णेन श्रीशैलो जर्जरीकृतः।
क्षिप्तो भुजान्तरे गाढं दुःखान्मृत्युं स यास्यति।।172।।
एतेषां मरणेऽस्माकं सर्वेषां मरणं ध्रुवम्।
आयातं कुरु तस्मात्त्वं रक्षां देव स्वसैन्यके।।173।।
अहं गत्वा कुमारौ तौ निवारयामि चोद्धतौ।
इत्युक्त्वा रणमध्ये स समायातो विभीषणः।।174।।
आगतं पितरं दृष्ट्वा शङ्कमानौ कुमारकौ।
पश्वन्निःसरितौ वेगादिन्द्रजिन्मेघवाहनौ।।175।।
अङ्गाङ्गदकुमाराभ्यामागत्य रणमूर्द्धनि।
संयुद्ध्य कुम्भकर्णेन मोचितः पवनात्मजः।।176।।
प्रभामण्डलसुग्रीवौ मृतौ ज्ञात्वाऽथ राक्षसाः।
गताः स्वनिलयं वेगाद्धर्षपूरितमानसाः।।177।।
ततो लक्ष्मणपद्माभौ विराधितविभीषणौ।
अङ्गाङ्गदौ हनूमांश्च नलनीलौ महेन्द्रजाः।।178।।
मिलित्वा तत्र ते सर्वे रणभुविसमागताः।
प्रभामण्डलसुग्रीवौ यत्र स्तः पतितावुभौ।।179।।
रामं जगाद लक्ष्मीवान् चैतयोर्मरणे सति।
अस्माकं स्यात्कथं शक्तिर्जेतुं दशाननं द्विषं।।180।।
तस्मात्कार्यं कुरु नाथ चैतयोर्जीवनं प्रति।
पद्माभः प्राह तच्छ्रुत्वा सत्यं वत्स त्वयोदितम्।।181।।
एतस्मिन्नन्तरे रामः संस्मरन् गरुडं च तम्।
प्रोक्तं वंशस्थले येन कष्टे मां स्मर राघव।।182।।

स्मरणानन्तरं वेगान्नगाधिपः समागतः ।
कृत्वा सविनयं पद्मं स्थितोऽग्रे स्थिरमानसः ।।183।।
प्रार्थयाहं प्रसन्नस्ते दास्यामि वरमीप्सितम् ।
ततो जगाद पद्माभः शृणु नागेश मद्वचः ।।184।।
उत्थापय मम प्रीत्या विद्याऽधिपौ च मूर्च्छितौ ।
तच्छ्रुत्वा गरुडाधीशो विद्ये ताभ्यां ददौ शुभौ ।।185।।
सिंहविद्याञ्च पद्माय छत्रचामरसंयुतम् ।
हलञ्च मुशलं शस्त्रैर्गरुडेशो ददौ मुदा ।।186।।
ददौ स गारुडी विद्यां गदाखड्गसमन्विताम् ।
लक्ष्मीधराय सत्प्रीत्या पूर्वपुण्यानुसारतः ।।187।।
नत्वा स्तुत्वा च पद्माभं गरुडः परमधाार्मिकः ।
गतः स्वस्थानकं रम्यं बहुलतोषपूरितः ।।188।।
सिंहाख्यविद्यया रामो निर्माप्य सिंहकं रथम् ।
लक्ष्मणोऽपि च निर्माप्य रथं गारुडसञ्ज्ञकम् ।।189।।
तत्रारुह्य समायातौ सूरैर्विद्याधरैर्वृतो[29] ।
नानाशस्त्रैश्च संयुक्तौ यत्र स्तः खगनायकौ ।।190।।
गारुडवायुस्पर्शेन विनष्टं सर्पबन्धनम् ।
गते विषे च सर्पस्य चोत्थितौ तौ खगेश्वरौ ।।191।।
प्रभामण्डलसुग्रीवौ गतनिद्राविव प्रभू ।
ज्ञानवन्तौ च तेजस्कौ चन्द्रसूर्यसमावुभौ ।।192।।
रामस्य चरणौ नत्वा विनयात्संस्थितौ पुरः ।
तदा विभीषणाद्याश्च तुष्टा मनसि संमुदा ।।193।।
पद्मं जगाद सुग्रीवः किमद्भुतं त्वया कृतम् ।
विषस्य हरणोपायः कुत्र लब्धो नरेश्वरः ।।194।।
तदा रामेण सम्प्रोक्तं चरितं च सविस्तरम् ।
वंशस्थले च यज्जातं मुनिनाथादिसम्भवम् ।।195।।

देशभूषणयोगीन्द्रकुलभूषणयोगिनोः।
पुराणं परमं श्रुत्वा सन्तुष्टाः सकलाः खगाः।।196।।

स्वस्ववाहनमारूढा महावैभवसंयुताः।
पूर्वस्थानञ्च ते गत्वा वानरा सुसमाश्रिताः।।197।।

पापप्रभावेन भवेद् दरिद्री
श्वभ्रादिदुःखानि भवन्ति पापात्।
विहाय पापं कुरु शुद्धधर्मम्
यतो भवेत्त्वं धनधान्यभोगी।।198।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते राक्षसवानरमहायुद्धसिंहगारुडविद्यालाभ सुग्रीवप्रभामण्डलयोर्मूर्च्छानिवारणावर्णनो नाम त्रयोविंशतितमोऽधिकारः।।23।।

1. तदावौ इति ख/ग प्रतौ
2. स्थाय: इति ख प्रतौ, स्थाया इति ग प्रतौ
3. प्रघ्मकीर्ति इति ग प्रतौ, प्रसन्नकीर्ति इति पद्मपुराणे द्वितीयभागे 54/38
4. इत्याद्यसंख्यवर्जित: इति ख/ग प्रतौ
5. गजरथतुरंगमै: इति ख/ग प्रतौ
6. समायात:स्तमागेहं इति ग प्रतौ
7. स्थिताऽग्रे इति ख/ग प्रतौ
8. योषिल्लक्ष्मीं गृहित्वा च वदत्यात्मानं च दीनतां इति क प्रतौ
9. यदि तो नाशं इति क प्रतौ, यदि नो नाशं इति ख प्रतौ
10. रामस्याश्रतहेतवे इति क प्रतौ, रामस्याश्रव हेतवे इति ग प्रतौ
11. गिरीभूतौ इति ख प्रतौ, गिरिभूतीव इति ग प्रतौ
12. पात्रेऽप्पगत्वा इति क प्रतौ, पात्रेप्यगत्वा इति ग प्रतौ
13. च दारकौ इति ग प्रतौ
14. स्यु तां इति ख प्रतौ, स्यू तां इति ग प्रतौ
15. वनम् इति क प्रतौ
16. वाहिनिधृतवे इति ख प्रतौ, वाहिनिपृतने इति ग प्रतौ
17. एष: श्लोक: ख प्रतौ अनुपलब्ध:
18. भवन्तिमषिवछर्द्धनं इति ग प्रतौ, भवन्तमविकत्थनम् इति पद्मपुराणे द्वितीयभागे 57/7
19. स्वामिभक्तिपरं ययौ इति ख प्रतौ
20. तौ हतौ हस्तप्रहस्तकौ ।।110।। श्लोकात् तौ च मारितौ ।।113।। पर्यन्तश्लोका: ग प्रतौ अनुपलब्धा:।
21. ततश्च्युत्वाऽत्र संप्राप्य इति ग प्रतौ
22. वह्निनामनृपा..........सम्भवौ ।।116।। एषा पंक्ति ग प्रतौ अनुपलब्ध:।
23. हनूमान्मालिवतोस्तत्र इति क प्रतौ, हनूमान्मालिवस्तत्र इति ख प्रतौ
24. गर्वपर्वतम् इति क प्रतौ
25. स्वापयामाग्र इति क प्रतौ
26. सुखासरे इति ख प्रतौ
27. भंगं नीताश्च वानरा: इति क प्रतौ
28. कर्दमितं इति ख/ग प्रतौ
29. भूरिर्विद्याधरैर्वृतो इति ख/ग प्रतौ

❖❖❖

चतुर्विंशतितमोऽधिकारः

श्रुत्वा सुग्रीवराजस्य तथा भामण्डलस्य च।
जीवितं गरुडाधीशात् राक्षसा व्याकुलङ्गताः ।।1 ।।

अन्ये ह्युराक्षसा वीरा मारीचाद्याः समागताः।
चतुर्बलेन वाद्येन संयुक्ता रणमेदिनीम् ।।2 ।।

तेषां भेरीरवं श्रुत्वा वेगाद्वानरवाहिनी।
आगता वाद्यसंयुक्ता रणे प्रोद्धतमानसाः ।।3 ।।

उभयोः सेनयोस्तत्र सञ्जातं परमं रणम्।
तावच्च वानरी सेना भग्ना राक्षससद्भटैः ।।4 ।।

वानरीयं बलं भग्नं दृष्ट्वा भामण्डलप्रभुः।
उत्थितः कदनं कर्तुं राक्षसैः राक्षसोपमः ।।5।।

तेनाऽपि त्रासमानास्ते भग्ना राक्षससद्भटाः।
तद्दृष्ट्वा रावणो राजा स्वयं योद्धुं समुत्थितः ।।6 ।।

गजस्थेन दशास्येन वाणघातेन ताडिताः।
दिक्षु पलायनं कृत्वा गता वानरदेवता ।।7 ।।

ततो विभीषणो राजा युद्धार्थी रणमूर्द्धनि।
क्रोधवह्निसमो योद्धुं आगतो रावणं प्रति ।।8 ।।

सन्मुखं भ्रातरं दृष्ट्वा जगाद रावणप्रभुः।
अशिक्षितोऽसि बालोऽसि रणे त्वं कथमागतः ।।9 ।।

रक्ष जीवं गृहे गत्वा नो चेदत्र मरिष्यसि।
भ्रातुर्हिंसां ददासि मां तस्मात्त्वं व्रज बान्धव ।।10 ।।

विभीषणस्ततः प्राह प्राप्तो कालोऽत्र रावण।
त्वं मरिष्यसि मद्हस्ते ततो गच्छ गृहं रणात् ।।11 ।।

सोऽवोचत्कोपतस्तत्र धिग् ते मूढ सुजीवितम्।
स्वस्थवंशं परित्यज्य जातोऽसि रामकिङ्करः ।।12 ।।

विभीषणस्ततोऽवोचच्छृणु भ्रातर्दशाननः।
जानकीं देहि चाद्याऽपि रामाय त्वं सुखी भव ।।13 ।।

इत्युक्ते क्रोधसम्पन्नो रावणोऽभिमुखङ्गतः।
अन्येऽपि पार्थिवा लग्ना योद्धुं विभीषणं प्रति।।14।।

छिन्नं वैभीषणं छत्रं बाणेन रावणेशिना।
ततो विभीषणेनाऽपि सञ्छिन्ना रावणी ध्वजा।।15।।

एवं तयोर्महायुद्धे मृत्युं यान्ति च सद्भटाः।
लक्ष्मीधरेण संरुद्धः शक्रजिद्रावणात्मजः।।16।।

रामेण सह सङ्ग्रामं कुम्भकर्णः करोत्यलम्।
ययौ सिंहकटीं नीलो युद्धे शंभूत्तथानलः।।17।।

स्वयंभू दुर्मतिः क्रुद्धो दुर्मुखोऽपि घटोदरम्।
दुष्ट शक्राशनिं कालस्तथा चन्द्रनखं नृपम्।।18।।

स्कन्धो भिन्नाञ्जनं विघ्नं विराधितो नराधिपः।
ख्यातं मयमहादैत्यमङ्गदो भासुराङ्गदः।।19।।

कुम्भकर्णसुतं कुम्भं समीरणसमुद्भवः।
किष्किन्धेशः सुमाल्यख्यं केतुं जनकनन्दनः।।20।।

मेघवाहनमङ्गाख्यो जम्बूमाली च जाम्बवम्।
कामं क्षुब्धरथो क्षुब्धः क्षोभणाभिख्यमूर्जितम्।।21।।

सारणञ्च महेन्द्राख्यः शूकं श्रीशैलनन्दनः।
अन्येऽप्येवं महायोद्धा यथायोग्यं परस्परम्।।22।।

परस्परं महाघातैर्मृताः सङ्ख्यविवर्जिताः।
चतुर्बलेन संयुक्ता महाशृङ्गारभूषिताः।।23।।

ततः शक्रजिता पूर्वं प्रयोक्ता बाणसन्ततिः।
लक्ष्मणेनापि सम्मुक्ता बाणराशिश्च तं प्रति।।24।।

इन्द्रजिता तमो बाणं मुक्ता कृष्णं तमोघनम्।
लक्ष्मणेन कृतं दूरे सूर्यबाणेन तामसम्।।25।।

शक्रजिता पुनर्मुक्तो सर्पबाणेन वेष्टिता।
गारुडेन च तेनापि नाशिता नागबन्धनाः।।26।।

ततो लक्ष्मणवीरेण सम्प्रेर्य नागबाणकम् ।
सम्बद्धः शक्रजिद्गाढं पतितो भूतले तदा ।।27 ।।
पद्मेनाऽपि तथा युद्ध्वा कुम्भकर्णो नरेश्वरः ।
बन्धितो नागपाशेन पतितोऽसौ च मूर्च्छितः ।।28 ।।
भामण्डलेन तौ चोभौ पद्मलक्ष्मीधराज्ञया ।
क्षिप्त्वाऽऽत्मीये रथे गाढं रक्षितौ राक्षसाऽधिपौ ।।29 ।।
तथा विराधितेनापि संयुद्ध्य रणमूर्द्धनि ।
नीतो मेघकुमारोऽसौ बध्वा नागैः स्ववेश्मनि ।।30 ।।
इतो विभीषणेनापि क्रियते रणमुद्धतम् ।
रावणेन समं क्रोधात् परस्पराभिघातनात् ।।31 ।।
रावणेनातिकोपेन प्रयुक्तं भ्रातरं प्रति ।
त्रिशूलं लक्ष्मणेनात्रान्तराले निवारितम् ।।32 ।।
क्रुद्धो दशाननो धृत्वा शक्तिबाणं भयङ्करम् ।
धरणेन्द्राऽर्पितं पूर्वं कैलाशक्षोभकारिणा ।।33 ।।
जगाद लक्ष्मणं वीरं गर्वपूरितमानसः ।
अवसर्पस्व रे दुष्ट मृत्युं वाञ्छसि रे कथम् ।।34 ।।
कपीनामाश्रमं कृत्वा जातोऽसि त्वं पराक्रमी ।
तं खरदूषणं हत्वा चागतोऽसि रणे पुनः ।।35 ।।
पशुसमो महीगस्त्वमहं सुरसमखगः ।
वज्रघातेन मद्धस्ते सर्वथा त्वं मरिष्यसि ।।36 ।।
ततो जगाद लक्ष्मीशो रे रे रावण नष्टधी ।
कुत्र यासि रणं त्यक्त्वा मृत्युस्तेऽत्र समागतः ।।37 ।।
परस्त्रीलम्पटः कामी कुत्रापि नास्ति ते जयम् ।
मरिष्यस्यधुना दुष्ट चेत्युक्ता सन्मुखोऽभवत् ।।38 ।।
तयोर्जातं महायुद्धं भूरि प्राणिक्षयप्रदम् ।
रावणेन तया शक्त्या निहतो रिपुवक्षसि ।।39 ।।

पीडितोऽसौ तया शक्त्या पतितो भूतले तदा।
तादृशं लक्ष्मणं दृष्ट्वा रामोऽभूद्रावणं प्रति।।40।।
रामरावणयोर्युद्धं तत्र जातञ्च दारुणम्।
तदा क्रोधेन रामेण षड्वारं विरथीकृतः।।41।।
पद्माभश्चेतसि प्राहाऽद्याप्यस्य जीवितं क्रियत्।
दिनानि वर्तते काले ततोऽसौ न मृतोऽधुना।।42।।
इत्युक्त्वा बाणवृष्ट्या स रामेणाच्छादितो रिपुः।
रावणो व्याकुलो भूत्वा व्याघुट्य स्वपुरङ्गतः।।43।।
एकस्तावदयं ध्वस्तो मया शत्रुर्मदोत्कटः।
इति किञ्चिद्वृतिं प्राप्तो विवेश भवनं निजम्।।44।।
अन्तःपुरं सभायां स उपविष्टः श्रमान्वितः।
बन्ध्वाद्यान् बन्धनागारे जातान् श्रुत्वा सुशोकधीः।।45।।
हा भ्रात! हा सुतौ! दुःखाद्बन्धने पतिता कथम्।
भवतामाश्रयद्युद्धे जयं प्राप्याम्यहं सदा।।46।।
अधुना सकलं कार्यं नाशं जातं परं मम।
इत्यादि विविधं दुःखं करोति रावणप्रभुः।।47।।
लक्ष्मणं पतितं श्रुत्वा दुःखपीडितमानसा।
करोति जानकी शोकं बहुधालापभाषणैः[1]।।48।।
अथ गतेषु सर्वेषु राक्षसेषु रथाद् भुवि।
रामश्चोत्तरितो यत्र मूर्च्छितोऽस्ति स लक्ष्मणः।।49।।
मूर्च्छितं लक्ष्मणं दृष्ट्वा मृतमिव नरोत्तमम्।
मूर्च्छां सम्प्राप्य रामोऽपि पतितो गतसञ्ज्ञकः।।50।।
सञ्ज्ञां प्राप्योपचारैः स शोकं करोति राघवः।
हा हा वत्स विदेशे त्वं त्यक्त्वा मृतोऽसि मां कथम्।।51।।
कुतः सीता कुतो माता कुतस्तातः कुतो धनम्।
गते भाग्ये[2] च तत्सर्वं गतं भ्रातस्त्वया समम्।।52।।

भो भो विद्याधराश्चित्तां सञ्चयन्तु त्वरान्विताः।
संज्वालय मां समं भ्रात्रा यूयं गच्छन्तु स्वगृहम्।।53।।
यूयं हि दुःखिनो जाताः पापिनो मम हेतवे।
क्षान्तव्यं यत्कृतं किञ्चिन्मया दुष्टेन भो नृपाः।।54।।
लक्ष्मणं तं ततः स्पृष्टुं वाञ्छन् रामो निवारितः।
जाम्बूनदेन चेत्युक्ता ज्ञात्वा शस्त्रं[3] सुबुद्धिना।।55।।
शक्तिबाणेन सम्मूर्च्छा प्राप्तोऽस्ति लक्ष्मणो विभुः।
स्पर्शिते म्रियते चाऽयं तस्मात्स्पृष्टुं न चार्हसि।।56।।
भविष्यति खेर्यावदुदयो लक्ष्मणः सुधीः।
तावज्जीवेन्न सन्देहस्तस्मादत्र शुचं त्यज।।57।।
कुरु यत्नं महाभाग लक्ष्मणं जीवितुं प्रति।
ततः शोकं परं त्यक्ता रामोऽवोचदिदं वचः।।58।।
भवद्भिः क्रियतां यत्नं जीवितुं लक्ष्मणस्य च।
ततो विद्याधरैः सर्वैः प्रारब्धं जीविकारणम्।।59।।
अथोत्सार्यकबन्धादीन् निमिषार्द्धेन सा मही।
पवित्र्य विहितास्तुङ्गा दूष्य प्राकारमण्डपाः।।60।।
सप्तकक्षादिसम्पन्नाः[4] कृतविक्रियनिर्गमाः[5]।
बहिः कतिचितैर्योद्धैर्युक्ताः कार्मुकधारिभिः।।61।।
प्रथमे गोपुरे नीलश्चापपाणिः प्रतिष्ठितः।
द्वितीये तु नलस्तस्थौ गदाहस्तो घनोपमः।।62।।
विभीषणस्तृतीये तु शूलपाणिमहात्मना।
स्रग्माल्य रत्नचित्रांशु[6] ईशानवदशोभनः।।63।।
सन्नद्धबद्धतूणीरस्तुरीये कुमुदः स्थितः।
सुषेणः पञ्चमे ज्ञेयः कुन्तहस्तः प्रतापवान्।।64।।
सुपीवरभुजो वीरः सुग्रीवः स्वयमेव च।
रराज भिण्डिमालेन षष्टे वज्रधरोपमः।।65।।

प्रवेशे सप्तमे राजन् महारिपुबलान्तकः।
मण्डलाऽग्रं समाकृष्य स्वयं भामण्डलः स्थितः।।66।।

पूर्वद्वारेऽप्यसञ्चारे शरभः शरभध्वजः।
रराज पश्चिमे द्वारे कुमारो जाम्बवो यथा।।67।।

प्रदेशमुत्तरद्वारं व्याप्याऽमात्यौघसङ्कुलम्।
स्थितश्चन्द्रमरीचिश्च बालिपुत्रो महाबलः।।68।।

एवं विरचिता क्षोणी खेचरेशैः प्रयत्निभिः।
रराज द्यौरिवाऽत्यर्थं निर्मलोरुडुमण्डलैः[7]।।69।।

एतस्मिन्नन्तरे कश्चिन्नरो गगनमण्डलात्।
आगत्योवाच चोदारं भामण्डलप्रभुं प्रति।।70।।

भो प्रभो रामदेवस्य दर्शनं माञ्च कार्यताम्।
लक्ष्मणजीवितोपायं तत्र गत्वा वदाम्यहम्।।71।।

इत्युक्ते तं करे धृत्वा नीतो यत्रास्ति राघवः।
रामस्य चरणौ नत्वा चोपविष्टो महीतले।।72।।

रामो जगाद कस्मात्त्वं को वा किमर्थमागतः।
सोऽवोचद्देव रम्येऽत्र विजयार्द्धे नगोत्तमे।।73।।

नगरे देवगीताख्ये राजाऽस्ति शशिमण्डलः।
सुप्रभा नामतो देवी तत्पुत्रोऽहं शशिप्रभः।।74।।

मासमेकं भ्रमाम्यत्र तवदर्शनलालसः।
अधुना तत्तु सञ्जातं श्रूयतां कारणं परम्।।75।।

शक्त्या सम्मूर्च्छितो वीरो जीविष्यति न संशयः।
तस्मात्कुरु प्रभो यत्नं चौषधन्तु वदाम्यहम्।।76।।

कदाचिद्विहरन्पूर्वं भूतलेऽहं च वैरिणा।
शक्त्या मेघस्य[8] पुत्रेण विजयाख्येन संहतः।।77।।

ततोऽहं मूर्च्छितो भूत्वा पतितश्च वनान्तरे।
अयोध्याया महोद्याने मृतामिव च भो प्रभो।।78।।

शक्त्या हतं च मां दृष्ट्वा भरताख्येन भूभृता।
गन्धोदकेन संसिञ्च्य शक्तिविद्या निराकृता।।79।।
शक्तिबाणे गते क्वापि निरोगोऽहं तदाऽभवत्।
पूर्ववद्देहसंयुक्तः प्रोत्थितो भो नरेश्वरः।।80।।
रामोऽपृच्छद्धि चन्द्राभ कुत्राऽस्ति तज्जलं परम्।
तदाऽऽनयामि वेगेन यतः स्वास्थ्यं भविष्यति।।81।।
सोऽवोचद्देव साकेतपुरे जाता महारुजा।
कदाचिद्दैवयोगेन बहुप्राणिक्षयङ्करा:।।82।।
तदा भरतभूपेन पृष्ठोऽमात्यो गणाभिधः।
केनोपायेन शान्तिश्च व्याधेरत्र भविष्यति।।83।।
अमात्यः प्राह भो राजन् ! द्रोणाख्यस्य च भूभृतः।
देशे नास्ति रुजा क्वाऽपि तस्मै चापृच्छतां विधिम्।।84।।
तदाहूय नृपेणाऽस्मै कथितं माम मत्पुरे।
तथा कुरु यथा शान्तिर्भवति सर्वदेहिनाम्।।85।।
द्रोणाख्येन तदानीय जलेन तेन सिञ्चिता:।
लोकास्ते निरुजा जाता नृपाद्याः पशुभिः समम्।।86।।
भरतेन पुनः पृष्टो द्रोणनामा महीपतिम्।
कस्येदमुदकं माम समानीतं कुतस्त्वया।।87।।
सोऽवोचन्मद्गृहे दासी चन्द्रावत्यभिधा वरा।
सा जानाति जलवार्तां ततस्तां पृच्छतां प्रभो।।88।।
साकारिता तदा तेन पृष्टा जलविधिः तदा।
सोऽवोचद्देव द्रोणस्य विशल्याख्या सुताऽजनि।।89।।
सा दत्ता पोषितुं प्रीत्या मत्करे राजकन्यका।
एकदा सा जलैः स्नातुं स्थापिता विष्टरे मया।।90।।
तस्याः स्नानजलेनापि नदीवाह इवाऽवभत्।
तदैक कुर्करो व्याधी वर्णी कृमिकुलावृतः।।91।।

कृशो दुःखी समायातो महद्रोगेण पीडितः।
पपात तज्जले शीघ्रं जातो हेममयश्च सः।।92।।

तदा लब्धं मया राजन् सर्वव्याधेश्च भैषजम्।
ततस्तेन जलेनाऽहं करोमि व्याधिवारणम्।।93।।

देशे सर्वत्र सुख्यातिं प्राप्ताऽहं देव वैद्यताम्।
द्रोणकन्याप्रसादेन सर्वव्याधिविनाशिना।।94।।

सर्पवृश्चिकशाकिन्यो ग्रहरोगाश्च दूरतः।
तस्याः पादोदकेनाशु पलायन्ते नरेश्वरः।।95।।

तच्छ्रुत्वा विस्मयीभूत्वा द्रोणेन भरतेश्वरः।
गतो वने मुनीन्द्रस्य पादौ वन्दनहेतवे।।96।।

सर्वहितं मुनिं नत्वा समाविष्टो महीतले।
श्रुत्वा धर्मं जिनेन्द्रोक्तं ततोऽपृच्छन्नरेश्वरः।।97।।

भो स्वामिन् केन पुण्येन विशल्या नाम कन्यका।
सर्वव्याधिहरा जाता द्रोणस्य परमा सुता।।98।।

मुनिराह विदेहेऽस्मिन् पुण्डरीकपुरेऽभवत्।
चक्री त्रिभुवनानन्दः श्रीरूपाख्याऽस्य वल्लभा।।99।।

नाम्नाऽनङ्गशरा[9] पुत्री तयोः रूपादिभूषिता।
एकदा सा गृहोपर्यामुपविष्टाऽस्ति[10] भूतले।।100।।

तां प्रतिष्ठपुराधीशः सामन्तोऽस्य पुनर्वसुः।
दुर्धीराऽऽहरदारोप्य विमानं स्मरपीडितः।।101।।

क्रुद्धाच्चक्रधरादाज्ञां सम्प्राप्य मुख्यकिङ्करैः।
चिरं कृतवतो युद्धं विमानं चूर्णितं भृशम्।।102।।

चूर्ण्यमान विमानेन मुक्ता तेनाकुलात्मनाम्।
पपात नभसः कान्तिरवि[11]चन्द्रस्य शारदी।।103।।

विद्यया पर्णलब्धाऽसौ पुनर्वसु नियुक्तया।
अटवीमागता स्वैरं नाम्ना स्वापदरौरवम्।।104।।

सिंहव्याघ्रादिसंयुक्तं वनं दृष्ट्वा भयानकम्।
बाला रोदिति दुःखेन पित्रादिभिर्वियोगिनी ।।105।।

हा तात जननी बन्धो कस्मादुःखस्य भूमिकाम्।
कृत्वा मां त्यजिताऽरण्ये भवद्भिः प्राणसत्प्रियैः ।।106।।

इत्यादि विविधालापं करोति बालिका परम्।
नदीतीरञ्च सम्प्राप्य चोपविष्टा शिलातले ।।107।।

अन्यस्मिन् दिवसे बाला युग्मोपवाससंयुता।
वनफलैर्नदीतीरैरकरोत्साऽथ पारणम् ।।108।।

जैनमार्गस्य तत्त्वज्ञा कर्मस्थितिप्रबोधिनी।
किञ्चित्दुःखञ्च वैराग्यं भाविनी तत्र संस्थिता ।।109।।

द्वित्र्यादि प्रोषधैर्युक्ता गिरिगह्वरमध्यगाः।
अदृष्टमानवाकारा[12] करोति तपमुत्तमम् ।।110।।

एकभुक्त्या सदाचारा प्रासुकाहारकारिणी।
सम्यक्त्वव्रतसंयुक्ता भावदीक्षादिभूषिता ।।111।।

वृष्टि शीतोष्णकालस्य बाधां संसह्य दुःखतः।
वस्त्रादिरहिता बाला स्थिता वैराग्यपूरिता ।।112।।

त्रीणिवर्षसहस्राणि कृत्वैव तपसां विधिम्।
अन्त्ये संन्यासमादाय सुप्ता शुद्धमहीतले ।।113।।

बाह्यं हस्तशताद्भूमिं न गन्तव्यं मयेति च।
जग्राह नियमं पूर्वं श्रुतं जैनेन्द्रशासनात् ।।114।।

नियमावधितोऽतीते षड्रात्रेऽथ[13] नभश्चरः।
लब्धिदास इति ख्यातो वन्दित्वा मेरुमाव्रजन् ।।115।।

तामपश्यत्ततो नेतुमारेभे तां समुद्यतः।
पितुः स्थानं निषिद्धश्च तथा सल्लेखनोक्तितः ।।116।।

लब्धिदासो लघुप्राप्तः सकाशं चक्रवर्त्तिनः।
समं तेन समायातस्तमुद्येशमसौ ततः ।।117।।

अथ तामतिरौद्रेण शयुनाऽतिस्थवीयसा।
भक्षमाणामसौ दृष्ट्वा समाधानप्रदोऽभवत्[14] ।।118।।
प्राप्तसल्लेखनां क्षीणां संवृत्तामपरामिव।
तादृशीं तां सुतां दृष्ट्वा चक्री निर्वेदमागतः।।119।।
समं पुत्रसहस्राभ्यां द्वाविंशत्या गतस्पृहः।
महावैराग्यसम्पन्नः श्रमणत्वमुपागतः।।120।।
कन्यात्वथ क्षुधार्त्तेन प्राप्तेनाऽतिस्थवीयसा।
भक्षिताजगरेणाऽगात्सतीशानकुमारताम्[15]।।121।।
जानात्यापि तया मर्तुं न समुत्सारितः शयुः।
माऽभूत्स्वल्पाऽपि पीडाऽस्य काचिदित्यनुकम्पया।।122।।
उत्सार्य खेचरान् युद्धे स समस्तान् पुनर्वसुः।
तदाऽनङ्गशरामिष्टामपश्यन्विरहाऽवनौ ।।123।।
द्रुमसेनमुनेः पार्श्वे गृहीतश्रमणव्रतः।
अत्यन्तदुःखतस्तप्त्वा तपः परमदुश्चरम्।।124।।
कृत्वा निदानमेतस्याः कृतेयं प्राप्तपञ्चताम्।
सुरो जातश्च्युतश्चाऽयं जातो लक्ष्मणसुन्दरः।।125।।
प्रभ्रष्टा सुरलोकाच्च जाताऽनङ्गशराचरी।
सुतेयं द्रोणमेघस्य विशल्येति प्रकीर्तिता।।126।।
सैतस्मिन्नगरे देशे भरते वा महागुणा।
पूर्वकर्मानुभावेन सञ्जाताऽत्यन्तमुत्तमा।।127।।
तस्याः पादजलेनाशु दुष्टव्याधिः पलायिता।
जाता ते विषये शान्तिः प्रजानां सुखदायिनी।।128।।
भरत प्राह भो स्वामिन् ! केन पापेन सा रुजा।
आगतो मम देशेऽस्मिन् ततः प्राह मुनीश्वरः।।129।।
हस्तनागपुरादेकश्चागतो वणिकः सुतः।
विन्ध्यो नाम्नाथ साकेतां महिषाणां स वाहकः ।।130।।

महिषो दुर्बलश्चैकस्तेषां मध्ये निशक्तितः।
पतितः कर्दमे मार्गे पुरमध्ये क्षुधाहतः॥131॥
तस्य शिरसि संस्थाप्य पादान् व्रजन्ति मानवाः।
मृत्वा दुःखेन किञ्चिच्च समाधिना सुरोऽभवत्॥132॥
महिषा सुरदैत्योऽभूत्तेन व्याधिः प्रयोगितः।
गन्धोदकेन सा नष्टा जना जाता निरोगिणः॥133॥
मुनेर्वाक्यं तदा श्रुत्वा सन्तुष्टा भरतादयः।
सा लक्ष्मणाय दातव्या चेत्युक्ता ते गृहङ्गताः॥134॥
शशिप्रभमुखात्सर्वं श्रुत्वा रामो जगाद सः।
गच्छन्तु भो खगाधीशाश्चाऽऽनेतुं तज्जलं परम्॥135॥
तच्छ्रुत्वा निर्गतौ वीरौ श्रीशैलजनकात्मजौ।
अङ्गदेन समं वेगात्प्राप्ताः साकेतकं पुरम्॥136॥
भरतस्य गृहद्वारे स्थित्वा मध्यरात्रिके।
सद्गुणान् रामदेवस्य गायन्ति ते वरैः स्वरैः॥137॥
तच्छ्रुत्वा भरतो राजा तानाकार्षीत् सुसम्भ्रमात्।
के यूयमागताः कस्मात्कुत्रस्तौ रामलक्ष्मणौ॥138॥
हनूमता ततः प्रोक्तं सीताहरणसम्भवम्।
तच्छ्रुत्वा शोकसन्तप्तो रुरोद भरतेश्वरः॥139॥
संताड्य तोरणभेरीं भरतो गन्तुमुद्यतः।
तच्छ्रुत्वा नगरं सर्वं महाभयेन पीडितम्॥140॥
किंवाऽऽगतोऽतिवीर्यस्य पुत्रः किं वाऽत्र दुर्जनाः।
आगताः पूर्वका म्लेच्छा देशं हन्तुं हि कौशलम्॥141॥
अमात्यैः सह शत्रुघ्नः शीघ्रं तत्र समागतः।
देव्योऽपराजिताद्याश्च भटास्तत्पदसेविनः॥142॥
सीताया हरणं श्रुत्वा शक्तिबाणञ्च लक्ष्मणे।
रुदन्ति बान्धवाः सर्वे शोकव्याकुलमानसः॥143॥

भरतः प्राह शत्रुघ्नं सज्जीयतां बलं निजम्।
गन्तव्यं राक्षसीं लङ्कां हन्तुं रावणदुर्जनम्।।144।।
ततो जगाद श्रीशैलः श्रूयतां भरतेश्वर।
तत्र नास्ति भवत्कार्यं खेचरैः सह सङ्गरे।।145।।
किन्तु पादोदकं देयं विशल्यायाः सुनिर्मलम्।
येन लक्ष्मणदेहस्य भवेच्छान्तिः सुखप्रदा।।146।।
भरतः प्राह नीरैः किं स्वल्पजीवसुखङ्करैः।
विशल्यैव महाकन्या भवद्भिस्तत्र नीयते।।147।।
लक्ष्मीधराय पूर्वं सा कल्पिताऽस्ति नृपेण च।
इत्युक्त्वा भरतो राजा भामण्डलहनूमतौ।।148।।
अङ्गदः केकामतीश्च विमानस्थाश्च निर्गताः।
कौतुकमङ्गले पत्ने प्राप्ता द्रोणस्य मन्दिरम्।।149।।
पूर्ववद्गीतगानेन चोत्थाय द्रोणभूपतिः।
कथित्वा सर्ववृत्तान्तं विशल्यां तैश्च याचिता।।150।।
ततो द्रोणनरेन्द्रेण कन्या सहस्रसंयुता।
तेभ्यो दत्ता विशल्या सा गुणरूपेण भूषिता।।151।।
ततस्तास्तैः समारोप्य विमानं स्वर्गसन्निभम्।
प्रणम्य भरतपादौ निर्गता गगने पथि।।152।।
भरतोऽपि समं मात्रा साकेतपुरमागतः।
चिन्तां करोति रामस्याऽयोध्यायाः सकलो जनः।।153।।
क्षणात्छ्रीशैलमुख्यास्ते प्राप्ताः सङ्गरमेदिनीम्।
ततो नभश्चरैः सर्वै गन्धपुष्पैस्तु पूजिताः।।154।।
विशल्याकरनीरेण सिञ्चितेन भयातुराः।
निर्गता शक्तिविद्या सा लक्ष्मीधरस्य वक्षतः।।155।।
ततः श्रीशैलवीरेण धृता स्त्रीवेषधारिणी।
हता मुष्टिप्रघातेन प्राणनाशो यथा भवेत्।।156।।

साऽवोचन्मुञ्च मां धीरं कृपां कृत्वा दयापर।
नागराजेन दत्ताहं लग्ना रावणप्रेरिता ।।157।।
यच्च लग्ना त्वहं वीर[16] तस्य नाशं करोमि हि।
विशल्याकरनीरेण मद्बलं तु गतं क्वचित् ।।158।।
स्वस्थानं देव गच्छामि क्षम्यतां मम चेष्टितम्।
इत्युक्त्वा वायुपुत्रेण मुक्ता कारुण्यभाविना ।।159।।
शक्तिरोगे गते वेगान्निरोगी वीरलक्ष्मणः।
क्व गतो दशवक्त्रोऽसावित्युच्चरन् समुत्थितः ।।160।।
रामेणालिङ्गितो वीरो शैलश्चापि नमस्कृतः।
पूजितो देवदेवीभिर्लक्ष्मणः शुभलक्षणः ।।161।।
रामपादौ प्रणम्यातो विशल्यां शल्यवर्जितां।
स्वस्य पार्श्वे स्थितां दृष्ट्वा केयं स इति पृष्टवान् ।।162।।
रामेणातः सविस्तारं लक्ष्मणाय निवेदितम्।
विशल्याचरितं रम्यं शक्तिबाणप्रभेदनम् ।।163।।
विशल्याकरनीरेन पद्मस्याऽनुज्ञया पुनः।
सिञ्चिता कुम्भकर्णाद्या गतविषाः समुत्थिताः ।।164।।
अन्ये योद्धाश्च पश्चाद्या जलेन तेन सिञ्चिताः।
सर्वे ते निरुजा जाता यथापूर्वं तथास्थिताः ।।165।।
सुप्रभातं ततो जातं दृष्ट्वा वानरखेचरैः।
ताडिता जयघोषाद्या नानावाद्यसमुच्चयाः ।।166।।
ततश्च वानरास्तुष्टाः केचिन्नृत्यन्ते देवताः।
केचिद् गायन्ति गीतानि रमन्ति तत्र खेचराः ।।167।।
विशल्यालक्ष्मणादीनां विवाहमङ्गलं परम्।
तत्र जातं महाभूत्या रामसाक्षीजगद्धितम् ।।168।।
धर्मेण रोगाः प्रलयन्ति वेगात्
राज्यस्य सौख्यानि भवन्ति धर्मात्।
ततः प्रयत्नं कुरु धर्मकार्ये
यतो भवेन्मोक्षपदस्य लब्धिः ।।169।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते लक्ष्मणस्य शक्तिबाधा इन्द्रजित्कुम्भकर्णमेघनादादीनां बन्धनं विशल्याऽऽगमनं शक्तिरोगनिराकरणवर्णनो नाम चतुर्विंशतितमोऽधिकारः ।।24।।

1. जानकशि बहुधालथभाषणै इति ग प्रतौ
2. मत्तभाग्यं इति ख प्रतौ
3. शास्त्रं इति ख प्रतौ
4. सप्तकक्षावृसम्पन्ना: इति ख प्रतौ,
   सप्तकक्षादसम्पन्ना: इति ग प्रतौ,
   सप्तकक्ष्याट्टसम्पन्ना इतिपद्मपुराणे द्वितीयभागे 63/29
5. कृतविक्रियनिर्गमा: इति ग प्रतौ, कृतदिक्चयनिर्गमा इति पद्मपुराणे द्वितीयभागे 63/29
6. रमिचित्रांशु इति ख प्रतौ
7. रुद्रमंडलै: इति क प्रतौ
8. मे यस्य इति क प्रतौ
9. अनंगसरा इति क/ख प्रतौ
10. स गृहोमुपविष्टास्ति इति ख प्रतौ, स गृहोपर्यामुविष्टास्ति इति ग प्रतौ
11. कान्तिरवै इति ग प्रतौ, कान्तिरिव इति पद्मपुराणे द्वितीयभागे 64/54
12. अदृष्टमानवारा इति ख प्रतौ
13. तिद्गात्रेथ इति क प्रतौ
14. समाधानप्रदाभवत् इति ख प्रतौ
15. भक्षिताजगरेणागात् सती सानकुमारतां इति क प्रतौ,
    भक्षिताजगरेणासौ सतीसानकुमारतां इति ग प्रतौ,
    ईशानस्वर्गे गतत्वात् सतीशानकुमारताम् भवितव्यम्।
16. देवी इति क/ग प्रतौ

❖❖❖

पञ्चविंशतितमोऽधिकारः

लक्ष्मणं जीवितं श्रुत्वा मारीचप्रमुखा नृपाः।
वदन्ति रावणं नत्वा दृष्ट्वा स्वस्य निशक्तिताम्।।1।।

देव लक्ष्मीधरो राजा शक्त्या मृत्वा च जीवितः।
अन्ये च विरुजा जातास्तेषां सर्वे महाभटाः।।2।।

कुम्भकर्णेन संयुक्तौ शक्रजिन्मेघवाहनौ।
पतितौ बन्धनागारे चाऽस्मत्सैन्यं क्षयङ्गतम्।।3।।

सन्नश्यति यदा पुण्यं तदा नश्यति वैभवः।
यत्र तत्र च सर्वत्रास्माकं क्षयञ्च दृश्यते।।4।।

देवरं जीवितं श्रुत्वा सन्तुष्टा जानकी मुदा।
सा न भवति ते वश्या रामगुणाऽनुरागिणी।।5।।

तस्या हेतोः कथं कार्यं क्षत्रियाणां क्षयं प्रभो।
परस्त्रीसङ्गपापेन वंशनाशो विधीयते।।6।।

तस्मादेव त्वया देया सीता रामाय युक्तितः।
कर्त्तव्यं तेन सन्धि च यतोऽस्माकं सुखं भवेत्।।7।।

समाऽऽश्वास्य च सुग्रीवं विभीषणहनूमतं।
पूर्ववत् स्थाप्यतां राज्ये दत्वा वाजिगजादिकम्।।8।।

इन्द्रजित्कुम्भकर्णौ च मोचनीयौ सुवाक्यतः।
भामण्डलञ्च सम्पूज्य स्वदेशं परिप्रेषताम्।।9।।

सीतां सम्प्राप्य रामोऽपि स्वस्य देशं गमिष्यति।
विद्याधराः समस्तास्ते माननीयाः सुवाक्यतः।।10।।

एवं सति न दोषस्ते गुणा एव न संशयः।
मर्यादाऽभिमुखो राजा भवति सर्वविष्टपे।।11।।

इत्युक्त्वा पादयोस्तस्य धृत्वा सिरांसि ते नताः।
ततः प्राह दशास्योऽसौ तथाऽस्त्विति संसम्भ्रमी।।12।।

सन्तुष्टैः सचिवैः सर्वैराहूय वृद्धदूतकः।
कथित्वा सर्ववृतान्तं प्रेषितो रामसन्निधिम्।।13।।

गच्छन्तं तञ्च विज्ञाय रहसि प्राह रावणः।
सीतावार्ता न कर्त्तव्या सेयं[1] सर्वं प्रकाश्यते।।14।।
ततो वेगेन दूतोऽसौ रणभूमिङ्गतः क्षणात्।
द्वारपालोपदेशेन नत्वा रामं पुरस्थिताः।।15।।
देवाह रावणो धीमान् त्रिखण्डेशो जगत्पतिः।
मुञ्च मे भ्रातरं पुत्रौ कुरु सन्धिं मया समम्।।16।।
जानक्याशां परित्यज्य कन्यकानां शतत्रयम्।
संगृह्यतां मया दत्तमर्द्धराज्यञ्च साम्प्रतम्।।17।।
ततो जगाद पद्माभश्चान्या[2] स्त्रीसम्पदादिभिः।
अन्यद्रव्यैर्विना सीतां नास्ति मेऽत्र प्रयोजनम्।।18।।
तस्मात्प्रयच्छ सीतां मे मोचामि तव बान्धवान्।
अरण्येऽहं गमिष्यामि सुखेन भुञ्ज सम्पदः।।19।।
पुनर्जगाद दूतोऽसौ न कर्त्तव्यंस्त्वया प्रभो।
दुराग्रहो दशास्येन समं त्रिखण्डभूभृता।।20।।
तस्य हस्ते मृता भूरि भूपाला भूरिगर्विणः।
तथा त्वं म्रियसे व्यर्थं ततस्त्यजस्व मूर्खताम्।।21।।
इति श्रुत्वाऽऽह कोपेन भामण्डलः खगेश्वरः।
किं ब्रूषि मूढ दूत! त्वं गुणान् रावणराक्षसः।।22।।
पशुसमो दशास्यः स परस्त्रीलम्पटः सदा।
इत्युक्त्वा चरणे धृत्वा निघृष्य स बहिष्कृतः।।23।।
ततो दूतेन गत्वा तत् रावणाय निवेदितम्।
प्रकोपेन ततः प्राह रावणो मूढमानसः।।24।।[3]
यद्यहं सङ्गरे जित्वा नयामि वानरांश्च तान्।
तदा कोपेन ते दुष्टा हनिष्यन्ति सुतान्मम।।25।।
निशायां सर्वसुप्तायां सञ्छिद्य यदि बन्धनात्।
आनयामि सुताल्लोकस्तस्करं मां वदेत्तदा।।26।।

तस्मात्सर्वं परित्यज्य करोमि कार्यमुत्तमम्।
साधयामि महाविद्यां बहुरूपविधायिनीम्।27।।
तस्यां सिद्धायां मत्कार्यं सर्वं साध्यं भविष्यति।
सञ्चिन्तयेति समाहूय भटानुवाच रावणः।।28।।
भो भटाश्चात्र युष्मद्भिः शान्तिनाथजिनालयम्।
वेगेन क्रियते रम्यं घण्टातोरणभूषितम्।।29।।
गन्धाक्षतैः वरैः पुष्पैश्चारुरत्नैश्च धूपकैः।
फलैश्च क्रियते राशिर्जिनपूजनहेतवे।।30।।
भरतक्षेत्रमध्यस्थे सर्वत्रर्ि जनवेश्मनि।
कर्त्तव्या महती पूजा भव्यैर्मत्कार्यसिद्धये।।31।।
यावन्न सिद्ध्यते विद्या तावज्जीवादिपीडिनम्।
न कर्त्तव्यं मम ग्रामे भवद्भिः करुणाकरैः।।32।।
जलैर्वृक्षरसैः सर्प्पैर्दुग्धैश्च[4] दधिभिर्भृतैः।
घटैश्च क्रियते भक्त्या जिनस्नपनसद्विधिः।।33।।
त्रिकालवन्दनोपेतं सामायिकस्तवैः समम्।
क्रियते तत्र युष्मद्भिर्मम कार्यशिवाप्तये।।34।।
लङ्कापुरं सशृंङ्गारं क्रियते धूपवासितम्।
गन्धपुष्पैः परिच्छाद्यं दानपूजादिमण्डितम्।।35।।
मन्दोदर्यादिदेवीभिः क्रियते परिचारता[5]।
इत्युद्देश्य यथायोग्यमागतः शान्तिमन्दिरे।।36।।
कृत्वा स्नानं धौतवस्त्रं बध्वा चूडां निरागतः।
ईर्यापथञ्च संशोध्य सञ्जातः शुद्धमानसः।।37।।
फाल्गुनशुक्लपक्षस्य चाष्टम्यां शुभवासरे।
संस्थितो मन्त्रसिद्ध्यर्थं रावणः शान्तिसद्मनि।।38।।
यावन्न सिद्ध्यते विद्या तावदनशनं मम।
ध्याने योगिसमानोहमित्युक्त्वा मौनमाश्रितः।।39।।

शुक्लध्यानेन सज्जापं करोति राक्षसाधिपः।
मन्दोदर्यादि देव्योऽस्य कुर्वन्त्युपासना विधिम्।।40।।

तदा नन्दीश्वरद्वीपे गत्वा सुराश्चतुर्विधाः।
अष्टाह्निकमहोत्साहं कुर्वन्ति भक्तिसंयुताः।।41।।

रामोऽप्यत्र दिनान्यष्टौ करोति पूजनं परम्।
नन्दीश्वरव्रतोपेतैर्वानरैः खेचरैः समम्।।42।।

त्रैलोक्येऽपि स्थिता जैनाः पशवो देवमानवाः।
कुर्वन्ति चाऽर्हतां पूजां व्रतोपेताः शिवाप्तये।।43।।

अष्टाह्निके व्रतेऽतीते पद्ममाहुश्च खेचराः।
प्रभो शान्तिगृहे मन्त्रं साधयति स रावणः।।44।।

मन्त्रे सिद्धे दशास्यस्य पुरस्तिष्ठति कः पुमान्।
तस्मात्तत्र प्रकर्त्तव्यं विद्यया विघ्नहेतुकम्।।45।।

अधुना गृह्यते लङ्का चास्मद्भिः सुखमीप्सुभिः।
नो चेच्च सिद्धविद्योऽसौ चास्मान् सर्वान् हनिष्यति।।46।।

ततो जगाद पद्माभो ब्राह्मणः बह्मचारिणः।
योगिनो ध्यानिनो वस्तु न ग्राह्यं[5] शूरबुद्धिना।।47।।

ततो विभीषणोऽवोचत् सत्यं देव त्वयोदितम्।
तथापि बलवान् शत्रुश्च्छलेनैव स गृह्यते।।48।।[6]

तस्मात्कुमारा गच्छन्तु कुर्वन्तु तस्य पीडनम्।
यतो न सिद्ध्यते विद्या तस्य कार्यप्रसाधिनी।।49।।

इत्युक्त्वा निर्गता वीरा नानावाहनसंयुताः।
कुमाराः सोत्सवा क्रूरा लङ्कां पीडनहेतवे।।50।।

नलनीलौ च माहेन्द्रा अङ्गाङ्गदौ च चन्द्रमाः।
इत्यादि बहवो धीरा लङ्कां प्राप्ताः कुमारकाः।।51।।

तत्र रत्नमयं तुङ्गं नानारूपेणचित्रितम्।
शालं दृष्ट्वा कुमारास्ते तदा तुष्टाश्च चेतसि।।52।।

कपाटयुगलं भंक्त्वा प्रविष्टा नगरं तदा।
प्रजासु च महत्त्रसः सञ्जातो भयसंयुतः।।53।।

काश्चिद्रुदन्ति भीतास्ताः[7] काश्चिद् त्यजन्ति भूषणान्।
काश्चिद् पुत्रान् परित्यज्य जीवान् धृत्वा पलायिताः।।54।।

तदा तैर्नगरं सर्वं लुण्ठितं धनपूरितम्।
धृतञ्च वनितायूथं प्रजा दुःखेन पीडिताः।।55।।

पतिता गृहशालाश्च मारितास्तस्य रक्षकाः।
भग्नं शीलञ्च नारीणां दुःशीलैर्दुष्टखेचरैः।।56।।

इति व्याकुलतां श्रुत्वा प्रजानां शोकसम्भवाम्।
क्रुद्धो मयमहादैत्यो वानराणां क्षयङ्करः।।57।।

चतुर्बलेन संयुक्तो योद्धुं वेगेन निर्गतः।
मन्दोदर्या च तत्पुत्र्या सान्तयित्वा निवारिताः।।58।।

तात नाऽस्ति दशास्यस्याऽऽदेशः कर्तुं स सङ्गरम्।
कर्तव्या प्राणिनां रक्षा लङ्कायां सर्वसौख्यदा।।59।।

इत्युक्ते मयदैत्योऽसौ समाधानं समाश्रितः।
ततश्च वानरैर्दुष्टैः सर्वं भग्नं पुरं तदा।।60।।

शान्तिजिनेन्द्रगेहस्य रक्षका भूतदेवताः।
क्रुद्धा मारितुमारब्धा कुमारान् दुष्टमानसान्।।61।।

कुमारैरपि ते भूता मारिताः शस्त्रसञ्चयैः।
भीताः पलायनं कृत्वा भूतेशशरणङ्गताः।।62।।

ततः क्रुद्धः सम्भूतेशो मणिभद्रोऽभिधानकः।
मारितास्तेन ते नष्टाः कुमारा भीतमानसाः।।63।।

गताः पलायिता वेगात्कुमारा रामसन्निधिम्।
पृष्ठितो मणिभद्रोऽपि कोपात्तत्र समागतः।।64।।

रामं जगाद देवोऽसौ पश्य त्वं बलिभद्रक:।
कुमारास्तत्र कुर्वन्ति प्रजानां पीडनं परम्।।65।।

तन्निवारय बुद्धीश प्रजानां क्षेमहेतवे ।
ततो जगाद लक्ष्मीशः शृणु यक्षेश युक्तितः ।।66।।
रामस्य रमणी सीता नीता च येन पापिना ।
तस्य पक्षस्त्वया यक्ष क्रियते केन हेतुना ।।67।।
परस्त्रीतस्करः पापी न्यायमार्गविवर्जितः ।
कथं जयेद्दशास्योऽसौ ममाऽग्रे मन्त्रसाधने ।।68।।
तस्य विघ्नं करिष्यामि मन्त्रसाध्यं न जायते ।
सिद्धमन्त्रः स पापिष्ठो बहून् जीवान् हनिष्यति ।।69।।
ततो जगाद यक्षेशः सत्यं वीरं त्वयोदितम् ।
परंतु वस्तु यो यस्य हरते तं हि हन्यते ।।70।।
न्यायिन्यस्तु प्रजा नित्यं श्रावकाचारतत्पराः ।
तासां बाधास्तु किं कार्यं भवद्भिर्न्यायवर्त्मभिः ।।71।।
यदि हृता दशास्येन सीता स एव बाध्यते ।
तु जिनस्य सद्गेहाः प्रजाश्च बाध्यते क्वचित् ।।72।।
ततोऽस्त्विति लक्ष्मीशेन प्रोक्ते स्थानं सुरो गतः ।
ततः पुनः कुमारास्ते रथाऽऽरूढास्तु निर्गताः ।।73।।
प्राप्ता रावणसद्गेहं नीलरत्नैर्विनिर्मितम् ।
क्वचिच्छ्यामं कवचित्श्वेतं रक्तं पीतञ्चपिञ्जरम् ।।74।।
सुवर्णकुट्टिमा भूमिः[8] क्वचिद्रत्नैः प्रकीलिताः ।
सरो वापी जलैः पूर्णा बहूशृङ्गारभूषिता ।।75।।
आकाशस्फाटिकैः स्तम्भैः धृतोऽस्ति मण्डपो महान् ।
अदृष्टैस्तैः कपीनाञ्च भग्ना लग्ना ललाटिका ।।76।।
रत्ननिर्माणमात्तङ्गांस्तुरङ्गान् रत्ननिर्मितान् ।
नरांस्तथाविधान्[9] दृष्टा भीता वानरदेवताः ।।77।।
केनचिद्दर्शितो मार्गः[10] गतास्ते शान्तिमन्दिरम् ।
त्रिपरीत्य जिनं नत्वा जिनेन्द्रस्तैश्च पूजितः ।।78।।

ततस्तु दशवक्रस्य योषितो गुणभूषिताः।
वध्वा[11] वस्त्रैः समानीता रावणाऽग्रे जिनालये।।79।।
स्तनेषु पीड्यमानास्ता रुदन्ति रक्तरञ्जिताः।
शीलस्य भञ्जने भीताः पूत्कुर्वन्त्यस्य योषितः।।80।।
नाना कामविकारेण तस्याऽग्रे तस्य वल्लभाः।
पीडिता अपि दशास्यो न त्यजेद् ध्यानमुत्तमम्।।81।।
एकाग्रध्यानतस्तस्य विद्यासिद्धिरभूत्तदा।
गताः पलायनं कृत्वा कुमारा रामसन्निधिम्[12]।।82।।
ततो रावणराजोऽसौ सिद्धविद्यो नरेश्वरः।
उत्थितः सिंहवन्नत्वा शान्तीशं सुखदायकम्।।83।।
ततोऽस्य चरणौ नत्वा मन्दोदर्यादिवल्लभाः।
स्थिताऽग्रे करद्वन्द्वं संयुज्य भक्तितत्पराः।।84।।
देवात्र वानरैः पुंभिः पीडितास्तव योषितः।
पूर्वपुण्यानुसारेण न भग्नं शीलमुत्तमम्।।85।।
तासां वचनमाकर्ण्य जगाद रावणप्रभुः।
मत्करे वानराः सर्वे मरिष्यन्ति न संशयः।।86।।
इत्यादिवचनैस्तासां सन्तोष्य गृहमागतः।
कृतं स्नानं जलैः शुद्धैर्वनिताभिरुपासनैः।।87।।
पुनः शान्तिजिनेन्द्रस्य गृहं गत्वा जिनप्रभुम्।
पञ्चामृतैश्च संस्नाप्य पूजितोऽष्टविधार्चनैः।।88।।
स्तुत्वा नत्वा च शान्तीशं भुक्त्यर्थं स गृहङ्गतः।
रचितं हेमपात्रे च भुक्तवान् भोजनं वरम्।।89।।
संगृह्य मुखताम्बूलं बद्धं कृत्वा च भूषणैः।
वस्त्रादिकं समाश्रित्य गतो मण्डपमेदिनीम्।।90।।
विद्यापरीक्षणं कर्तुमारब्धं रावणेन तत्।
यत्र खड्गं परिभ्राम्यन् करोति स परिश्रमम्।।91।।

तत्रैकरूपं द्विरूपञ्च त्रिरूपञ्च तथाऽष्टकम्।
षोडशञ्च तथा कुर्याद्विगुणं सङ्ख्यवर्जितम्॥92॥
यथा सूर्यप्रतिबिम्बं दशास्यविकृतिं तथा।
दृष्ट्वाहुः सचिवास्तस्य रावणं वैरिरावणम्॥93॥
त्वां विना नाऽस्ति लोकेऽस्मिन् वैरिणां मानमर्दकः।
तव हस्ते मरिष्यन्ति वानरा रामसंयुताः॥94॥
इत्युक्ते रावणो राजा निर्गतो हर्षपूरितः।
सीतायै दर्शितुं रूपं स्वस्यैवं तद्वनं प्रति॥95॥
पुष्पकाख्यं विमानं स समारूढो गजाग्रकः।
महावाद्यनिनादैश्च चतुर्बलेन संयुतः॥96॥
प्राप्तो यत्रास्ति सीता सा वनं वृक्षघनैर्वृतम्।
सीतां जगाद दास्यैका पश्य देवि दशाननम्॥97॥
बहुरूपकरी विद्या साधिता येन धीमता।
अधुना वैरिनाशोऽसौ सङ्ग्रामेऽत्र करिष्यति॥98॥
दृष्ट्या विमलया दृष्टा सीता तदाह चेतसि।
अस्याऽग्रे रामलक्ष्मीशौ सङ्ग्रामे तिष्ठतः कथम्॥99॥
तदा तत्र समागत्य सीतां प्राह दशाननः।
पश्य मे देवि सामर्थ्यं बहुरूपप्रकाशकम्॥100॥
त्वां हृत्वा पापिना नीता मयाऽत्र दुष्ट चेतसा।
तथापि हि त्वया धीर्यं न मुक्तं शीलसम्भवम्॥101॥
मयाऽपि गृहीतं पूर्वं गुरोरग्रे वरं व्रतम्।
शक्त्या नाहं ग्रहिष्यामि परस्त्रीं पापकारिणीम्॥102॥
ततस्तव व्रतं सारं फलितं देवि सर्वथा।
अद्यप्रभृति मे पुत्री भवेत्त्वं नाऽन्यथा सुते॥103॥
ततो जगाद वैदेही सत्यं तातोऽसि त्वं यदि।
तदा मा हन सङ्ग्रामे मद्बन्धुपतिदेवरान्॥104॥

तथाऽस्त्विति दशास्योऽसौ सम्प्रोच्याथ गृहङ्गतः।
अन्तर्गृहे निशायां स रेमे स्ववल्लभान्वितः।।105।।

अष्टादशसहस्राणां नारीणां वृन्दमध्यगः।
क्रीडां करोति दशास्यो देवीष्ठाखण्डलो यथा।।106।।

सजीवौ रामलक्ष्मीशौ धृत्वा सङ्गरमध्यगौ।
सीतां रामाय दास्यामि तदा कीर्तिर्भवेन्मम।।107।।

अन्यान् भामण्डलादींश्च मृत्युं नेष्यामि चाऽसिना।
पश्चाद्दीक्षां गृहीत्वाऽहं करिष्यामि तपो वरम्।।108।।

मनसीत्यादिसङ्कल्पान् कुर्वन् राजा दशाननः।
पद्मपत्रं यथा नीरे तथा रेमे गृहान्तरे।।109।।

ततो जाते प्रभातेऽथ कृत्वा स्वं देहभूषितम्।
उपविष्टः सभामध्ये रावणः सचिवैः समम्।।110।।

कुम्भकर्णादिकैर्मुक्तां सभां दृष्ट्वा च शून्यताम्।
रुरोद रावणो धीमान् शोकसन्तप्तमानसः।।111।।

शत्रुवर्गं कथं हत्वा तनयान् दुःखपीडितान्।
मोचयिष्यामि केनाहमुपायेनाथ बन्धनात्।।112।।

इति सञ्चिन्त्यमानेऽस्मिन् चोत्पातास्तत्र दुर्दिनाः।
सञ्जाता सद्गृहे तस्य[13] मृत्युमूलप्रसूचकाः।।113।।[14]

खनन्ति पादयुग्मेन दन्तिनः खरमेदिनीम्।
हेषन्ति वाजिनो दुष्टं शब्दं घोरं भयानकम्।।114।।

पतन्ति पादपाः स्वेच्छा विना वातेन सद्वने।
तोरणानि गृहद्वारात्पतन्ति शिखरैः समम्।।115।।

भूमिकम्पोऽपि सञ्जातो भूता रटन्ति दीनताम्।
छत्रभङ्गो विना बाधैः कम्पितं सिंहविष्टरम्।।116।।

प्रतोलिः पतिता रम्याः शुष्कास्यास्तत्र मानवाः।
काकाः कुर्वन्ति दुःशब्दान् शृगालाः प्रहसन्ति च।।117।।

इत्याद्युत्पातकान् दृष्ट्वा लोका वदन्ति दुर्वचः।
स्वल्पैर्दिनैर्दशास्योऽसौ मृत्युं यास्यति सर्वथा ।।118।।

जानकीं यदि रामाय दत्वा सन्धिं करोत्ययम्।
जीविष्यति तदा बुद्ध्या नान्यथाऽस्य शुभं भवेत् ।।119।।

अभिप्रायो दशास्यस्य शृणु श्रेणिक भूपते।
सर्वान् पृथ्वीचरान् जित्वा स्थापयामीह खेचरान् ।।120।।

तदाहूय च दिक्पालान् लोकपालांस्तथा ग्रहान्।
रावणः प्राह सामग्रीं वेगाद्रणस्य कुर्यताम् ।।121।।

वाजिनो वायुवेगाश्च गजाः पर्वतसन्निभाः।
रथाश्च मन्दराकाराः सज्जीयताञ्च किङ्कराः ।।122।।

इत्यादेश्य प्रधानादीन् स्वयं गत्वाऽतिवेगतः।
शस्त्रालयं सुशस्त्राणि तीक्ष्णानि कारयत्यसौ ।।123।।

सङ्गामे तत्परं दृष्ट्वा रावणं क्रोधपूरितम्।
आह मन्दोदरी देवीः सचिवान् बुद्धिशारदान् ।।124।।

कथं न कथ्यते युक्ति रावणाय भवद्विधैः।
येन शान्तिः प्रजायेत राक्षसाणां गृहे सदा ।।125।।

तदाहुः सचिवा देवि नो वाक्यं न शृणोति सः।
तस्माद्भवद्भिरेवाऽस्मै कथनीयं वरं वचः ।।126।।

ततो मन्दोदरी गत्वा सखिभिर्बहुभिर्वृता।
रावणास्याऽन्तिकं वेगादुपविष्टा महीतले ।।127।।

पादौ नत्वा तदा प्राह रावणं विनयान्विता।
देव मुञ्च दुराचारं रामाय देहि जानकीम् ।।128।।

आवाभ्यां या वने त्यक्ता पुत्रीयं सैव जानकी।
प्रसूतिसमये देव ततो योग्या न ते भवेत् ।।129।।

सीताया अधिकं रूपं ममाऽस्ति साम्प्रतं प्रभो।
यदीप्ससि शचीरूपं तदा तां प्रभवाम्यहम् ।।130।।

द्वादशवर्षिका बाला षोडशा वा च विंशतिः।
यादृशं रूपमिच्छामि तादृशञ्च करोम्यहम् ।।131।।

परस्त्रीसङ्गदोषेणाऽपकीर्तिस्ते भवेत्सदा ।
अत्र परत्र श्वभ्रस्य गतिर्भवति नान्यथा ।।132।।

शकुना दृश्यन्ते दुष्टास्तव प्रभो रणं प्रति।
ममात्र चास्ति सन्देहो उभयोः को जयिष्यति ।।133।।

बलिनारायणौ जातौ पद्मलक्ष्मणसञ्ज्ञकौ ।
त्वं प्रतिवासुदेवो हि तस्मात्त्यजाऽभिमानताम् ।।134।।

पूर्वं हि मरणं प्राप्ताः सप्ताऽपि प्रतिकेशवाः।
अष्टमस्त्वं हि विख्यातो बुद्धिवांश्च पराक्रमी ।।135।।

इन्द्रजिन्मेघवाहाख्यौ कुम्भकर्णादि बान्धवाः।
पतिता बन्धनागारे तान् मोक्षस्व प्रयोगतः ।।136।।

ततो जगाद कोपेन रावणो वल्लभां प्रति।
देवि कोऽत्र विचारं ते पृच्छति येन भाष्यसि ।।137।।

कुत्रस्तौ बलिकृष्णौ तौ याभ्यां विभेषि चेतसि।
एतौ तु भिक्षकौ लोके भ्रमत् उदरार्थिनौ ।।138।।

विहस्य पुनराहाऽसौ कथं त्वं क्षत्रियात्मजा।
विभेषि मरणाद्देवि सूरस्त्री वाक् कथं भवेत् ।।139।।

इत्यादिवचनै रम्यैः पुनः सन्तोष्य वल्लभाम्।
तया सार्द्धञ्च संध्यायां क्रीडार्थं स्वगृहङ्गतः ।।140।।

नाना गीतविनोदेन क्रीडां करोति रावणः।
अष्टादशसहस्रेषु नारीषु भ्रमरो यथा ।।141।।

भोगेन पीडिताः काश्चिन्नखैर्दन्तैश्च चित्रिताः।
ताम्बूलदानतोषेण तुष्टाः काश्चिच्च वल्लभाः ।।142।।

धर्मं सर्वसुखङ्करोति सततं धर्मं करोति सुधी।
धर्मेण प्रभवन्ति राज्यविभवा धर्माय दानं कुरु ।।
धर्मान्मोक्षफलं लभन्ति मनुजाः धर्मस्य मूलं तपो।
धर्मो देहि मनः सदा सुखकरो भो धर्म रक्षस्व माम् ।।143।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते रावणस्य बहुरूपिणीविद्यासिद्धिः संग्रामनिश्चयकारणनलनीलोपद्रववर्णनो नाम पञ्चविंशतितमोऽधिकारः ।।25।।

❖❖❖

1. सेषं इति क/ग प्रतौ
2. अश्वा इति ग प्रतौ
3.1- ततो दूतः स भीतात्मा गतो रावणसन्निधिम्।
    पृष्टतो वानरा सर्वे गता लंकां मदोद्गता ।।24।। इति ग प्रतौ श्लोकपुनरावृत्तिः।
3.2- ग प्रतौ 24 श्लोकतः 54 श्लोकपर्यन्तं, 51 श्लोकतः 81 श्लोकक्रमाङ्का लिखिताः।
    अनेन प्रकारेण क्रमभङ्गो विद्यते।
4. सर्प्पिर्दुग्धैश्च इति ख/ग प्रतौ
5. परिवारतां इति ख/ग प्रतौ
6. तद्ग्रह्यं इति ख/ग प्रतौ
7. ग प्रतौ अनुपलब्धश्लोकः।
8. त्रासिता नागरी नार्य: इति ग प्रतौ
9. सुवर्णकटिमाभूमि इति क प्रतौ, सुवर्णकूटिमा भूमि इति ख प्रतौ
10. विधीन् इति क/ख प्रतौ
11. केनचिछ्दर्शिते मार्गे इति क/ग प्रतौ
12. वानरा: शीघ्रगामिन इति ग प्रतौ
13. सज्जाता सद्गृहे तस्य इति ख प्रतौ नास्ति
14. एष: श्लोक: ग प्रतौ नास्ति।

❖❖❖

षड्विंशतितमोऽधिकारः

प्रभातसमये चाऽथ सन्तोष्य सर्ववल्लभाः।
क्षमयित्वा कुटम्बादीनिदं प्राह दशाननः।।1।।
समालिङ्ग्य स्वनारीभिर्गद्गदवचसा परम्।
जीविते संशयं मत्वा सर्वप्रेमविभूषितः।।2।।
को जानाति पुनर्देव्यो दर्शनन्तु भवेन्न वा।
तस्मात्क्षेमेन स्थातव्यं भवद्भिः प्रियविभ्रमैः।।3।।
नानाभोगविनोदेषु गीतहास्यनटादिषु।
यदुक्तं क्रोधवाक्यं तत् क्षन्तव्यं प्रेमबन्धनैः।।4।।
चिन्तयामास सर्वासां स्त्रीणां स्नेहाऽश्रुसज्जलैः।
ममाशाञ्च परित्यज्य यूयं तिष्ठन्त्यहो प्रियाः।।5।।
ततः प्राहुश्च देव्योऽस्य मन्दोदर्यादयश्च तं।
एवं मा ब्रूषि नाथ त्वं सर्वक्षेमं भविष्यति।।6।।
ततश्चालिङ्ग्य भार्याभिः सम्पृच्छ्य स पुनः पुनः।
जयरवैश्च सर्वेषां ताडितवान् रणध्वनिः।।7।।
रणभेरीरवं श्रुत्वा सामन्तास्तस्य सन्निधिः।
सम्पृच्छ्य स्वकुटम्बेभ्यः शीघ्रं तत्र समागताः।।8।।
विद्यया बहुरूपिण्या निर्माप्य रथमुत्तमम्।
सहस्रहस्तिभिर्धार्यमेकविंशतिभूमिकम्।।9।।
तमारूढो दशास्योऽसौ निर्गतः सचिवैः समम्।
मयमारीचसाराख्यसुकाख्यप्रमुखैर्नरैः।।10।।
हस्तिवृन्दागिरेन्द्राभा वाजिनो वायुरंहसाः।
समावृतास्तु सन्नाहैर्निर्गता नरप्रेरिताः।।11।।
विमानानि वृकाः सिंहा केकिहंसास्तु[1] सारसाः।
वृषभा महिषा नागा राजभारस्य वाहनाः।।12।।
धारबन्धादि भैषज्यं मन्त्रयन्त्ररसायनैः।
अयोभिर्देहरक्षान्तु कृत्वा ते निर्गता भटाः।।13।।

सधूमवह्निरण्डैको तैलभाण्डं सकर्दमम् ।
मुक्तकेशा नरा नीचाः[2] शकुनाः शोकसूचकाः ।।14।।
जातास्तस्य प्रयाणेऽथ[3] तथापि स न निर्वृतः ।
सूरत्वपरिगर्वेण जानतोऽपि दशाननः ।।15।।
परबलं समायातं श्रुत्वा रामोऽपि निर्गतः ।
सिंहरथं समारूढो नानाशस्त्रसमन्वितः ।।16।।
ततो लक्ष्मणवीरोऽसौ भामण्डलप्रभुस्तथा ।
नलनीलौ च सुग्रीवौ वायुपुत्रादयोऽपि च ।।17।।
उभयोर्दलयोस्तत्र सञ्जातं दर्शनं परम् ।
ततो जगाद लक्ष्मीशं चाऽङ्गदो वानरध्वजः ।।18।।
पश्य विद्यामयं जातं रथारूढं दशाननम् ।
सहस्रगजसंयुक्तं रणभूमिं समागतम् ।।19।।
तच्छ्रुत्वा गारुडं स्थूलं रथामारुह्य लक्ष्मणः ।
तस्यैव सन्मुखं प्राप्तो भूरिवस्त्रसमन्वितः ।।20।।
उभयोर्दलयोस्तत्र सञ्जातं कदनं महत् ।
मृता केचिच्च सम्मूर्च्छां प्राप्ताः केचिन्महीतलम् ।।21।।
मारीचशुभचन्द्राभवज्राभवज्रसारणैः ।
राक्षसैर्मारिता सेना वानराणां पलायिताः ।।22।।
ततः श्रीशैलनीलाभ्यां मारितं राक्षसं बलम् ।
श्रीजम्बूमालिनातश्च विध्वस्तं वानरं बलम् ।।23।।[4]
श्रीशैलो गजमारुह्यागतोऽथ रणमूर्द्धनि ।
तं दृष्ट्वा जम्बुमालीति भग्नो रणस्य मध्यतः ।।24।।
तं दृष्ट्वा मयदैत्योऽथ क्रोधेन प्रोत्थितस्त्वरम् ।
स श्रीशैलेन षड्वारं बाणेन विरथीकृतः ।।25।।
दशास्येन पुनर्दत्ते रथे च बहुरूपके ।
समारुह्य मयेनाऽपि श्रीशैलो विरथीकृतः ।।26।।

ततो भामण्डलो राजा समायातोऽथ तं प्रति।
सोऽपि मयेन बाणेन पातितो रथमस्तकान्।।127।।

सुग्रीवोऽथ समायातो रणस्य सन्मुखं तदा।
मयेन ताडितः सोऽपि सञ्जातो रथवर्जितः।।28।।

अथ विभीषणो राजा रणं प्रति समागतः।
मयेन बाधितः सोऽपि प्राप्तो व्याकुलचित्तताम्।।29।।

वानराणां बलं छिन्नं दृष्ट्वाऽथ रघुनन्दनः।
रणमध्ये समायातो यथा गजेषु केशरी।।30।।

तदा तयोर्महायुद्धं जातं भीरुभयप्रदम्।
वाजिगजनरास्तत्र पतिताः प्राणवर्जिताः।।31।।

हस्तिभिर्मारिता भूमौ पतिता गजभूधराः।
भग्नदन्ता गतप्राणाश्चीत्कारकृतगर्जिताः।।32।।

छिन्नशुण्डा गजा छिन्नपुञ्छकर्णा हतोदराः।
बाणव्रातैः परिछिन्नाः पतन्ति मूर्च्छयान्विताः।।33।।

वायुवेगाः सशृङ्गाराः स्वर्णरत्नैः परिष्कृताः।
संयुद्ध्य कदने भूमौ चिरं पतन्ति वाजिनः।।34।।

नानारूपपताकाभिर्युता हयगजैस्तथा[5]।
शस्त्रसारथिसम्पन्नाः पतिता रथराशयः।।35।।

छिन्नकर्णा गतघ्राणाच्छिन्नबाहूदरांघ्रयः[6]।
छिन्नौष्टशिरसः केचित्पेतुर्वीरा रणाञ्जिरे।।36।।

गजवाजिमनुष्याणां रक्तपूरपयोनिधौ।
किञ्चित्श्वाससमायुक्ता मीनायन्ते[7] भटोत्तमाः।।37।।

देहोत्थरक्तधाराभिर्हेषाबृंहितगर्जनैः।
शस्त्रसन्दीप्त विद्युद्भिर्वर्षाकालायते रणम्।।38।।

गजभटाऽश्वमीनाद्या रथपोता भटद्विजाः।
रक्तपूर्णा सुशस्त्राब्जा[8] नदीव राजते रणम्।।39।।

शिरच्छिन्नाः कबन्धाश्च युद्धयन्ति शस्त्रपाणयः।
उत्थिता भूमितः सुप्ता भीता[9] इव रणाञ्जिरे।।40।।
गजमुक्ताफलैश्चूर्णैश्चर्मरक्ताऽस्थिसंयुतैः।
रङ्गावलीव भूभागो दृश्यते चित्रितास्त्रिया।।41।।
अन्तर्जालबहिर्भूता पुनः संक्षिप्य सूदरे।
बध्वा गाढं तु युद्धन्ति स्वामिभक्तिपरायणाः।।42।।
हस्तहीना भटाः केचित्केचिच्च रणवर्जिताः।
टुटाः खञ्जाः शिरोमुण्डा[10] युद्धन्ति रणचापलाः।।43।।
अश्वादुत्तीर्य हस्तिस्था गजादुतीर्य भूमिगाः।
रथाद्रथान्तरारूढा मारयन्ति भटान् बहून्।।44।।
स्वामिभक्ता भटाः केचित्केचित्स्वर्गाभिलाषिणः।
केचिल्लज्जातुराः केचिद्युद्धन्ति धनलालसाः।।45।।
पृष्टिस्थाः स्वामिनो वीरान् प्रेरयन्ति रणं प्रति।
संदर्श्य सुयशो लक्ष्मीं स्वर्गं देशं धनादिकम्।।46।।
नरहस्तितुरङ्गाणां[11] शवैर्जाता नगोपमाः।
रक्तनदीप्रवाहैश्च गर्ता जाता प्रवाहितैः।।47।।
अश्वखुरैर्नगा भग्ना नद्यो पानीय वर्जिताः।
चूर्णिता वृक्षपाषाणा[12] वह्निधूमायितं जगत्।।48।।
मयपद्माभयोर्युद्धे श्रुत्वा हुङ्कारजानवरान्[13]।
पाताले चकितः शेषो नाके नाकपतिः सुराः।।49।।
अष्टौ दिग्दन्तिनो भीताः सदिक्पालास्तदङ्गनाः।
व्यन्तरा दूरदेशस्था ज्योतिष्का गगने स्थिताः।।50।।
रणभेरीरवं श्रुत्वा वीराः सुवीरतां ययुः।।
कायरा मृत्युतां प्राप्ताः श्वभ्रं भीत्या रणाञ्जिरे।।51।।
मृतान् स्वस्वभटान्दृष्ट्वा द्विगुणोत्साहहर्षिताः।
वीराः युद्धन्ति सङ्गामे प्रभुणा धनपोषिताः।।52।।

धन्यास्ते पुरुषा वीरा रणे त्यजन्ति जीवितम्।
ये प्राप्नुवन्ति स्वर्लक्ष्मी इति वदन्ति भट्टकाः।।53।।

एवं महति सङ्ग्रामे भूरिजीवक्षयङ्करे।
मृता बहुत्तरा भूपा रामरावणसेवकाः।।54।।

मयो मुञ्चति बाणौघान विद्यासहजसम्भवान्।
रामे ते[14] निष्फला जाता तेन जर्जरितो मयः।।55।।

रामबाणेन संछिन्नं मयं दृष्ट्वा दशाननः।
स्वयं योद्धुं समुत्तस्थौ राक्षसो राक्षसोपमः।।56।।

ततो लक्ष्मणवीरेण संरुद्धोऽत्र दशाननः।
भो पापिष्ट क्व यासि त्वं ममाऽग्रे प्राणसंयुतः।।57।।

रामेणाथाद्य भूपेन ममोक्तं धर्मबुद्धिना।
शिरच्छेदं दशास्यस्याऽन्यस्त्रीचौरस्य वै कुरु।।58।।

दशाननस्ततः प्राह किं ब्रूषे व्यर्थकारणं।
सिंहस्याऽग्रे कथं श्वावतिष्ठति किं बली यदि।।59।।

त्वं कुर्क्करसमो ज्ञेयश्चाऽहं सिंहपराक्रमी।
सारं यदस्ति लोकेऽस्मिन् तत्सर्वञ्च भवेन्मम।।60।।

इत्युक्त्वा बाणवृष्ट्याऽवच्छादितो लक्ष्मणप्रभुः।
बाणैस्तेनाऽपि सङ्ग्रामे रावणो व्याकुलीकृतः।।61।।

पूर्णे शस्त्रेऽथ विद्याया शस्त्रैर्युद्धति रावणः।
जलबाणेन लक्ष्मण्यं प्लावितं सकलं बलम्।।62।।

लक्ष्मणेनाऽपि वाताऽस्त्रैर्जलबाणं निवारितम्।
अग्निबाणप्रयोगेण सन्दग्धं रावणं बलम्।।63।।

मेघास्त्रेण दशास्येन वह्निविद्या निराकृता।
नागपाशेन सम्बद्धं सैन्यं लक्ष्मणसुंयतम्।।64।।

गरुडास्त्रेण ते नागा लक्ष्मणेन निराकृताः।
पापशस्त्रेण निर्युक्ताः श्वभ्रं गच्छन्ति राक्षसाः।।65।।

धर्मास्त्रेण दशास्येन पापबाणं निवारितम्।
तामसेनापि बाणेनान्धीकृतं लक्ष्मणं बलम्।।66।।
ततः प्रकाशबाणेन लक्ष्मणेन प्रकाशितम्।
स्वापितं निद्राबाणेन राक्षसं सकलं बलम्।।67।।[15]
प्रबोधिन्या दशास्येन जाग्रितं स्वस्य सैन्यकम्।
एवं विद्याप्रयोगेण युद्धन्तौ तौ परस्परम्।।68।।
तृषार्तिभ्योऽथ सन्नीरं दीयते गन्धवासितम्।
क्षुधार्तिभ्यश्च सिद्धान्नमर्प्यते किङ्करै नरैः।।69।।
परिश्रमं निराकर्तुं शीतलं शीर्षचन्दनम्।
तालवृन्तादिना वायुः क्रियते तत्र भृत्यकैः।।70।।
मृत्युकालेऽथ केषाञ्चित् नमस्कारो हि दीयते।
तेन गच्छन्ति ते स्वर्गं शुभध्यानस्य योगतः।।71।।
रौद्रध्यानेन केचिच्च मृत्वा व्रजन्ति नारकम्।
आर्तध्यानेन तिर्यक्तां[16] लभन्ति सङ्गरे भृताः।।72।।
उभयोर्वीरयोर्युद्धं पश्यन्ति तत्र देवताः।
भूताश्च विस्मयं प्राप्ता दृष्ट्वा मृतकसन्ततिम्।।73।।
नारदाः किन्नरा देवा गन्धर्वा तुम्बरास्तथा[17]।
दृष्ट्वा युद्धं जयारावं कुर्वन्ति गगने स्थिताः।।74।।
अष्टौ कुमारिकास्तत्र रक्षन्ति गगनाङ्गणात्।
लक्ष्मणं युद्ध्यमानं तं प्रीत्या सर्वशरीरकम्।।75।।
ततो देवीभिस्ताः पृष्टाः का यूयमाऽऽगताः कुतः।
ता ऊचुः श्रूयतां वार्तां यदि कौतुकमस्ति वः।।76।।
विजयार्द्धे गतिग्रामे राजाऽस्ति चन्द्रवर्द्धनः।
सुताश्चाऽष्टौ वयं तस्य बाललीलाविराजिताः।।77।।
सीताया वरणे पूर्वमस्माभिः सहितः पिता।
विनोदार्थं समायातो मिथिलायां विनोदवान्।।78।।

दृष्ट्वाऽथ लक्ष्मणं तत्र ददावस्मै धियै वचः।
तत आरभ्य नश्चित्ते[18] वर्तते[19] लक्ष्मणप्रभुः।।79।।

श्रुत्वा युद्धं दशास्येन सहास्य दारुणं परम्।
या गतिरस्य[20] साऽस्माकमित्युक्ताऽत्र समागताः।।80।।

मनोहरं वचस्तासां श्रुत्वा चोर्द्धञ्च चक्षुषा।
पश्यन्तं[21] लक्ष्मणं दृष्ट्वा तुष्टाः कन्याः स्वचेतसि।।81।।

सिद्धार्थाख्या महाविद्या दत्ता ताभिः सुसिद्धये।[22]
लक्ष्मीधराय कार्यस्य सङ्गरे शत्रुनाशने।।82।।

तयाऽथ[23] विद्यया तत्र लक्ष्मणो रावणस्य च।
चिच्छेद सकलां विद्यां शत्रुवर्गविनाशिकाम्।।83।।

विद्यया बहुरूपिण्या कृत्वा रूपं भयङ्करम्।
युद्धं करोति दशास्यः सन्दीप्तः क्रोधमानसः।।84।।

रावणस्य शिरोच्छेदं लक्ष्मणेन कृतं तदा।
द्वे मस्तकेऽस्य सञ्जाते मुकुटकुण्डलान्विते।।85।।

ते छेदिते पुनर्जातं मस्तकानां चतुष्टयम्।
भुजौ च छेदितौ[24] तस्य जातं भुजचतुष्टयम्[25]।।86।।

एकरूपं द्विरूपञ्च चतुरूपं तथाऽष्टकम्।
षोडशञ्चाऽभवद्रूपमेव द्विगुणसङ्ख्यकम्।।87।।

यद्रूपं कुर्याद्दशास्यस्तच्छिनोति स लक्ष्मणः।
सहस्रकोटिसङ्ख्याताश्च्छेदितास्तत्र रावणाः।।88।।

एकादशाऽह्निपर्यन्तं दिवानक्तं महद्रणम्।
सञ्जातमेतयोर्दुष्टं भीरूणां प्रभयप्रदम्।।89।।

लक्ष्मीधरस्य बाणौघैर्विद्या जाताऽथ जर्जरी।
तस्याः सर्वं तनुर्जातं छिन्नभिन्नं भयप्रदम्।।90।।

पीडिता तीव्रबाधाभिर्गता कृत्वा पलायनम्।
बहुरूपकरी विद्या नत्वा रावणसम्प्रभुम्।।91।।

विद्यागतेऽथ दशास्यः स्वस्य रूपेण संस्थितः।
तदा क्रोधेन दीप्तोऽसौ चक्रे दृष्टिञ्चकार सः।।92।।
सहस्रधारसंयुक्तं मध्याह्नरविणा समम्।।
सहस्रदेवैः संसेव्यं शत्रुवर्गक्षयङ्करम्।।93।।
बहुरत्नैः परावृत्तं गन्धद्रव्यैर्विलेपितम्।
भृंगैश्च कृतहङ्कारं[26] पुष्पामोदं सुनिर्मलम्।।94।।
स्मरणानन्तरं चक्रं तस्य हस्ते सुदर्शनम्।
समागत्य स्थितं वेगाद्रावणस्य महात्मनः।।95।।
दशाननस्ततः प्राह लक्ष्मणं शुभलक्षणम्।
प्रणामं कुरु चागत्य नोचेन्मृत्युं हि प्राप्स्यसि[27]।।96।।
ततः प्रोवाच लक्ष्मीशः किं गर्जसि निरर्थकम्।
चक्रं प्राप्य कुलालस्य कुर्करवच्च सङ्गरे।।97।।
तच्छ्रुत्वा क्रोधदीप्तेन रावणेन सुदर्शनम्।
सम्पूज्य प्रेरितं शीघ्रं शत्रुमस्तकछेदने।।98।।
एतस्मिन्नन्तरे पद्मो बध्वा मयनरेश्वरम्।
संक्षिप्य तं रथं स्वस्य वेगात्तत्र समागतः।।99।।
आगच्छन्तञ्च तच्चक्रं दृष्ट्वा वह्निसमं प्रभम्।
गता देवगणाः क्वाऽपि पश्यन्ति ये रणं तदा।।100।।
अभिमुखं समायातं चक्रं दृष्ट्वाऽथ लक्ष्मणः।
निवारयितुमुद्युक्तः शरैर्वज्रमुखैस्तदा।।101।।
वज्रावर्तेन रामोऽपि धनुषा च हलेन च।
सुग्रीवो गदया वेगात् खड्गेन जनकात्मजाः।।102।।
विभीषणोऽथ शूलेन मुद्गरेण मरुत्सुतः।
वज्राभ्यां नलनीलौ च सोग्रीवौ च कुठारकैः।।103।।
एवं खगैश्च तच्चक्रं वारितमपि नो स्थितम्।
देवाऽधिष्ठितमाहात्म्यात्सर्वाऽनुल्लङ्घ्य चागतम्।।104।।

त्रिःपरीत्याऽथ लक्ष्मीशं तस्य हस्ते च संस्थितम्।
स्वैरं पुण्यानुसारेण खेचराणां सुखप्रदम्।।105।।
चक्ररत्नेन संयुक्तं लक्ष्मणं चक्रिणं परम्।
दृष्ट्वा तुष्टाः खगाधीशा नृत्यन्ति सङ्गरे स्थिता।।106।।
सत्यमेतौ च लोकेऽस्मिन् सञ्जातौ बलिकेशवौ।
तद्दृष्ट्वा रावणोऽवोचच्चिन्तायुक्तः स्वचेतसि।।107।।
धिग्लक्ष्मीयं क्षणस्थायी वेश्यावज्जनवल्लभा।
धन्यास्ते भरताद्यास्तु त्यक्ता राज्यं शिवङ्गताः।।108।।
अहं तु विषयासक्तः पतितः पापसागरे।
न ज्ञातं परमं तत्त्वं जिनदेवेन भाषितम्।।109।।
अथ पार्श्वस्थितं दृष्ट्वा विभीषणमुखं परम्।
लक्ष्मणः प्राह दशास्यं शृणु रावण धीधन।।110।।
अद्यापि देहि पद्माय सीतां संत्यज्य गर्वकम्।
नत्वा रामं मया दत्तं कुरु राज्यं नभश्चर[28]।।111।।
ततः क्रोधेन दशास्यो जगाद लक्ष्मणं प्रति।
कुलालस्य गते चक्रे मे शक्तिः किं गता कुतः।।112।।
ततः क्रोधेन सम्पूज्य चक्रं सम्भ्राम्य लक्ष्मणः।
अग्निज्वालासमं दीप्तं विक्षेप रावणं प्रति।।113।।
आगच्छन्तञ्च तं दृष्ट्वा निवारयति रावणः।
शस्त्रौघैर्जीवरक्षार्थं गते पुण्ये कुतः सुखम्।।114।।
चक्रेणोल्लङ्घ्य चागत्य दशवक्रस्य चक्रिणः।
सम्भिन्नं हृदयस्थानं पुष्पसादृश्यकोमलम्।।115।।
वज्रसमं दृढं गाढं चन्द्रकान्तिसमुज्ज्वलम्।
पूरितञ्च सुविद्याभिर्बहुर्भूषणभूषितम्।।116।।
सम्भिन्ने हृदये वीरः पतितोऽसौ दशाननः।
भूमौ यथा च कन्दर्पो रतिदेव्या उरुस्थले।।117।।

सुवर्णपुरुषाकारं मृतं दृष्ट्वा दशाननम्।
गताः पलायनं कृत्वा सुभटास्तस्य पक्षिणः।।118।।
ततः श्रीशैलवीराद्यैस्ताडितो जयघोषणः।
वस्त्राञ्चलं परिभ्राम्य रक्षिताः सुभटा जनाः।।119।।
न भेतव्यं न भेतव्यं भटै रावणसेवकैः।
धृत्वा शिरसि रामाज्ञां स्थातव्यं सकलैर्जनैः।।120।।
दशवक्त्रं महावीरं मृतं दृष्ट्वाऽथ बान्धवम्।
स्वयं मर्तुं क्षुरिकायां करञ्चक्रे विभीषणः।।121।।
तदागत्य च रामेण धृत्वा हस्ते निवारितः।
मूर्च्छां सम्प्राप्य भूपीठे पतितोऽसौ विभीषणः।।122।।
सुशैत्येनोपचारेण सञ्ज्ञां प्राप्य पुनः पुनः।
शोकं करोति यत्रास्ति रावणस्य कलेवरम्।।123।।
अथ मृत्युं दशास्यस्य श्रुत्वाऽन्तःपुरयोषितः।
महाशोकेन सन्तप्ता वेगात्तत्र समागताः।।124।।
मन्दोदरीमुखा देव्यो दृष्ट्वा पतिं दशाननम्।
पतिता मूर्च्छतां प्राप्य मृता इव महीतले।।125।।
पुनः सञ्ज्ञाञ्च सम्प्राप्य कुर्वन्ति शोकसंकथाः।
हे नाथ त्वं त्रिखण्डेश कथं सुप्तोऽसि भूतले।।126।।
पूर्वविद्याधरा सर्वे रणे भग्ना तवाग्रतः।
अधुना भूचर हस्ते कथं मृतोऽसि खेचरः।।127।।
भोगेन लालितं देहं कथं चक्रेण बाधितम्।
सेवका वानरास्तेऽपि कथं जातास्तु द्रोहिणः।।128।।
उत्तिष्ट नाथ मां देहि वचनं चारुकोमलम्।
कथं मौन्यं गृहीत्वाऽत्र सुप्तोऽसि कठिनस्थले।।129।।
अस्माभिर्वचनैर्नाथ दुःखितोऽसि कदापि न।
अस्माकमुपरि देव कुपितोऽसि कथं प्रभो।।130।।

देहि स्वालिङ्गनं नाथ वद वाक्यं विवेकदम्।
परिहासकथां ब्रूहि चेष्टां कुरु सुखप्रदाम्।।131।।
त्वया विरहितानां त्वस्माकं नास्ति समाश्रयः।
अष्टादशसहस्राणां मुखानि पश्य भूपते।।132।।
पश्य घोटकयूथानि रथहस्तिसमूहकान्।
तव दर्शनतृष्णार्तान् पश्य भूपान् खगेश्वरान्।।133।।
नाथ त्वया विना लङ्का दृश्यते प्रेतभूमिवत्।
व्यर्थीभूतं बलं सर्वं लोकभूपे मृते त्वयि।।134।।
व्यर्थं कर्पूरकस्तूरीगन्धतैलविलेपनम्।
हेममाणिकभूषाद्या रूपं नो वस्त्रभूषितम्।।135।।
इत्यादिशोकजां वार्तां सम्भाष्य तस्य योषितः।
पीडन्ति[29] मस्तकं स्वस्य काश्चिन्मुष्टादिताडनैः।।136।।
काश्चिन्मूर्च्छां सुसम्प्राप्य पतन्ति च पुनः पुनः।
काश्चिद्रुधिरशङ्काशं मुञ्चन्ति चक्षुषा जलम्।।137।।
मन्दोदरी तथा रम्भा चन्द्राननोर्वशी वरा।
श्रीमाला रूपिणी सूक्ष्मी पद्मा पद्मावती प्रभा।।138।।
सुभद्रा च यशोभद्रा लक्ष्मीश्च कनकावती।
रत्नमाला च श्रीकान्ता कमला च वसुन्धरा।।139।।
अष्टादशभिरेभिश्च मुख्याभिस्तस्य सूत्रमाः।
अष्टादशसहस्राणि शोकं कुर्वन्ति वल्लभाः।।140।।
अन्याश्च बान्धवादीनां वनिताः सङ्ख्यवर्जिताः।
कुर्वन्ति शोकसन्तापं महादुःखेन पीडिताः।।141।।
शोकं तेषामथ श्रुत्वा रामस्तत्र समागतः।
समस्तैः खेचरैसार्द्धं लक्ष्मणेन समं तदा।।142।।
विभीषणादीन् सम्भाष्य रामो जगाद सुन्दरम्।
अलं दुःखेन भो वीर रोदने कारणं न हि।।143।।

धन्यस्तु रावणो वीरो मृतोऽपि कञ्चनोत्तमः[30]।
लोकेऽत्र सर्वथा मानी मानो हि महतां धनम्।।144।।
ते धन्या ये च सङ्ग्रामे त्यजन्ति नाऽभिमानताम्।
तेषां लक्ष्मीः स्वयं दासी भवेदत्र परत्र वा।।145।।
सर्वेषां मरणं चाऽस्ति यावत्संसारवर्तिनाम्।
मृताः मरन्ति केचिच्च मरिष्यन्ति रुजा हताः।।146।।
अन्येषां मरणं लोका गणन्ति ज्ञानवर्जिताः।
स्वस्य मृत्युं न पश्यन्ति मोहवाहितलोचनाः।।147।।
यदुत्पन्नञ्च संसारे तत्सर्वं नश्यति ध्रुवम्।
तस्माच्छोको न कर्तव्यः सज्जनैर्ज्ञानवेदिभिः।।148।।
ततो भामण्डलोऽवोचच्छृणु राजन् विभीषण।
यत्र गच्छेद् गतो जीवो सुखं तत्रैव मन्यते।।149।।
अत्र ब्रूहि कथां[31] रम्यां शुभाक्षनगरे वरे।
सिंहध्वजोऽत्र भूपालो लक्ष्मीनामाऽस्य वल्लभा।।150।।
अरिंदमस्तयोः पुत्रः कमलाख्याऽस्य भामिनी।
कदाचित्स गतो दूरं जयार्थं शत्रुवर्गकम्।।151।।
जित्वा शत्रून् स एकाकी भार्यादर्शनलालसः।
आगतः स्वपुरं रम्यं ध्वजातोरणभूषितम्।।152।।
दृष्ट्वा रामां निशाकाले पृच्छति स नरेश्वरः।
किमर्थं नगरं रम्यं तोरणाद्यैस्त्वया कृतम्।।153।।
साऽवोचन्मुनिना नाथ प्रोक्तमद्य तवागमम्।
चर्यार्थमागतेनापि मम प्रश्नवशादिदम्।।154।।
ततो मया पुरं रम्यं कृतं तोरणभूषितम्।
तच्छ्रुत्वा स प्रभातेऽथ गतो मुनीन्द्रसन्निधिम्।।155।।
नत्वा मुनिं जगादेदं त्वं ज्ञानी चेद्वद प्रभो।
मे मरणं कदा भावी का गतिर्मे भविष्यति।।156।।

मुनिः प्राहाऽद्य मृत्युस्ते[32] सप्तमेऽह्नि भविष्यति।
खञ्जकर्बुरवर्णाद्यः शूकरस्त्वं भवेद् गतौ।।157।।

ततः प्रीतिङ्कराभिख्य[33]मागत्य तनयं जगौ।
त्वयाऽहं नगरे जातो हन्तव्यो ग्रामशूकरः।।158।।

तथाभूतं स दृष्ट्वा तं तनयं हन्तुमुद्यतम्।
पलायति स दूरं हि मृत्युभीत्युपरिद्रुतः।।159।।

मुनिं प्रीतिङ्करो गत्वा पप्रच्छ भगवान्कुतः।
संदिश्यमार्यमाणोऽसौ शुक्रो दूरं पलायते।।160।।

उवाच वचनं साधुर्विषादमिह मा कृथाः।
योनिं यामश्नुते जन्तुस्तत्रैव रतिमेति सः।।161।।

एवं भवस्थितिं श्रुत्वा परमां सुखकारिणीम्।
प्रीतिङ्करो महायोगी बभूव विगतस्पृहः।।162।।

एवं संसारवैचित्र्यं ज्ञात्वा राजन् विभीषण।
त्यज शोकञ्च पापस्य कारणं नरकप्रदम्।।163।।

इत्यादि बोधकैर्वाक्यैः सम्बोध्य राक्षसाधिपम्।
मन्दोदर्यादिसद्देव्यः सुवाक्यैः प्रतिबोधिताः।।164।।

ततश्चन्दनकर्पूरैः रावणस्य कलेवरम्।
पद्माख्यसरसस्तीरे दग्धं खेचरराक्षसैः।।165।।

सरोवरस्य तीरेऽस्मिन् कृत्वा स्नानं नरोत्तमाः।
उपविष्टाः सभां कृत्वा रामाद्या रत्नकम्बले।।166।।

ततो जगाद पद्माभः शक्रजितादिराक्षसान्।
मुच्यतां बन्धनागारात्त्यक्त्वा वैरं परस्परम्।।167।।

कैश्चिच्च खेचरैः प्रोक्तं त्यक्तुं योग्या न राक्षसाः।
कुपितास्ते करिष्यन्ति चाऽस्माकं प्रलयं परम्।।168।।

विभीषणोऽपि तान् दृष्ट्वा स्मृत्वा बान्धवरावणम्।
विक्रियां गमिष्यन्त्यत्र सर्वे चैकं भविष्यति।।169।।

रामोऽवोचच्च किं कार्यं करिष्यन्ति च निर्धनाः।
तस्मात्सर्वान् दयाहेतोर्मुच्यतां राक्षसांश्च तान्।।170।।
इति श्रुत्वा भटैस्तस्य गत्वा शस्त्रैः समन्वितैः।
आनीता बन्धनैर्युक्ता इन्द्रजितादिराक्षसाः।।171।।
कुम्भकर्णेन्द्रजिन्मेघवाहनसुमयादयः।
रामेण मुञ्चिता वीरा बन्धनाद्राक्षसास्तदा।।172।।
ततो जगाद पद्माभो भो भो राक्षसभूभृत्।
स्वराज्यं भुज्यतां नित्यं युष्मद्भिर्राक्षसाऽधिपैः।।173।।
अहं गच्छामि देशं स्वं सीतया सहितो मुदा।
यूयं तिष्ठन्तु द्वीपेऽस्मिन् कृत्वा राज्यं मनोहरम्।।174।।
इति वाक्यैस्तु सन्तुष्टा ऊचुस्ते राक्षसाधिपाः।
अस्माकं न हि राज्येऽस्मिन्पापकार्ये प्रयोजनम्।।175।।
ईदृशो रावणो राजा लोकेऽत्र भस्मताङ्गतः।
करपात्रैर्वयं तस्मात्करिष्यामः सुभोजनम्।।176।।[34]
रामोऽवोचदहो धन्या यूयं कर्मनिबन्धनात्।
मोक्षमिच्छथ कृत्वाऽत्र तपः घोरं निरन्तरम्।।177।।
ततः सर्वे सरो नीरे स्नात्वा चोक्ता च राघवम्।
मन्दोदर्यादिभिः सार्द्धं गता लङ्का च राक्षसाः।।178।।
रावणस्य महाशोकं कुर्वन्ति नागराजनाः।
एते च शोकसन्तप्ताः स्वं स्वं निलयमागताः।।179।।
पद्मोऽपि वानरैः साकं गतः स्वस्यैव मण्डपम्।
केचिद्रुदन्ति गायन्ति केचिच्च समताङ्गताः।।180।।
तस्मिन्नेव दिने योगी सुबलाख्यः समागतः।
षट्पञ्चाशत्सहस्रैस्तु चारणैर्मुनिभिर्वृत्तः।।181।।
कुसुमाख्ये वने रम्ये निर्मले सुशिलातले।
शुक्लध्यानेन संयुक्त उपविष्टो महामुनिः।।182।।

तदैव केवलज्ञानमस्योत्पन्नं सुयोगिनः।
समवशरणं देवैर्निशायां तत्र निर्मितम्।।183।।
प्रातिहार्याऽष्टकं रम्यं देवदुन्दुभिसंयुतम्।
कृतं जयजयारावैर्देवैः परमभक्तिकैः।।184।।
तच्छुत्वा कुम्भकर्णाद्या आगतास्तत्रराक्षसा।
रामोऽपि वानरै युक्तस्तत्र वेगात्समागतः।।185।।
स्तुत्वा नत्वा च तं नाथं पूजित्वा च पुनः पुनः।
स्वस्थानं ते समाविष्टाः सभायां कपिराक्षसाः।।186।।
विचार: सप्ततत्त्वानां षड्द्रव्याणाञ्च विस्तरः।
पञ्चास्तिकायमुख्यानां भेदाः प्रोक्ता मुनीशिना।।187।।
तच्छुत्वा शक्रजित्प्राह वद स्वामिन् दयापर।
अस्माकं भवसम्बन्धं योऽत्र[35] जातोऽस्ति संसृतौ।।188।।
ततः प्राह मुनीन्द्रोऽसौ कौशाम्बीनगरे वरे।
पूर्वपश्चिमनामानौ निस्वौ तत्र स्तः सद्विजौ।।189।।
श्रीधरस्य मुनेः पार्श्वे श्रुत्वा धर्मं जिनोदितम्।
सञ्जातौ क्षुल्लकौ तत्र ब्रह्मचर्यादिभूषितौ।।190।।
तस्य पुरस्य भूपस्य नाम्नः शक्रद्युतेर्महत्।
भूतिं दृष्ट्वा च पूर्वेण निदानबन्धनं कृतम्।।191।।
तपसोऽस्य सुसामर्थ्यं यद्यस्ति चेदहं तदा।
राज्ञोऽस्यैव भवेत्पुत्रो धनधान्यसमन्वितः।।192।।
निदानस्य बलेनाऽसौ मृत्वा जातोऽसि पुत्रकः।
नन्दादेव्युदरे भोगी रतिवर्द्धन नामकः।।193।।
पश्चिमोऽथ तपस्तप्त्वा जातः सुधर्मनामनि।
देवो यशोधराभिख्यः सम्यक्तगुणभूषितः।।194।।
तेनागत्य च कौशाम्ब्यां रतिवर्द्धनभूपतिः।
बोधितो ज्ञानबोधेन पूर्वस्नेहेन भाविना।।195।।

रतिवर्द्धनभूपोऽपि कृत्वा योग्यं परं तपः।
स्वर्गे जातः सुधर्माख्यो देवो ललितनामकः।।196।।
ततश्च्युत्वाऽत्र सञ्जातौ विजयाख्ये पुरे वरे।
जयविजयनामानौ भ्रातरौ क्षितिपौ वरौ।।197।।
तत्रापि च तपः कृत्वा स्वर्गे जातौ महेन्द्रके।
ततश्च्युत्वाऽत्र सञ्जातौ शक्रजिन्मेघवाहनौ।।198।।
रतिवर्द्धस्य या माता पूर्वं नन्दाऽभिधानिका।
सात्र मन्दोदरी जाता पूर्वस्नेहपरायणा।।199।।
एवं भवान्तरं श्रुत्वा शक्रजिन्मेघवाहनौ।
सञ्जातौ दीक्षितौ तत्र बाह्याभ्यन्तरनिर्मलौ।।200।।
कुम्भकर्णश्च मारीचो मयदैत्यादयस्तथा।
सहस्रद्वादशसङ्ख्याता[36] सञ्जाता यतयो वराः।।201।।
मन्दोदर्यादिदेव्योऽत्र वैराग्यगुणभूषिताः।
दीक्षिता आर्यिका जाता निर्मलैः संयमैर्युताः।।202।।
चत्वारिंशत्सहस्राणि चाऽष्टाधिक्यानि चार्यिकाः।
भूत्वा कुर्वन्ति योग्यानि तपांसि रक्षसां स्त्रियः।।203।।
केवलज्ञानमुत्पाद्य शक्रजिन्मेघवाहनौ।
चूलगिरौ[37] च सम्प्रातौ मोक्षस्थानं निरञ्जनम्।।204।।
रेवायां मेघतीर्थे च विन्ध्याद्रौ मेघवाहनः।
यतः स्थितस्ततो नाम्ना मेघतीर्थं प्रकीर्तितम्।।205।।
कुम्भकर्णो महायोगी रेवातीरे शिवङ्गतः।
मारीचः कल्पवासित्वं सम्प्राप्तः परमौजसा।।206।।
वंकिगिरौ[38] च शक्रत्वं जम्बूमाली तु प्राप्तवान्।
ऐरावते शिवस्थानं तपः कृत्वा गमिष्यति।।207।।
मयोऽथ विहरन् योगी प्राप्तः सम्मेदपर्वतम्।
एकाग्रयोगयुक्तोऽसौ स्थितः शिलातले शुभे।।208।।

अस्ति वाणारसीग्रामे विप्रो नोदननामकः।
भार्या तस्याभिमानाख्या वह्निनाम्ना तयोः सुता।।209।।
दुर्भिक्षे पतिते देशे निर्गतो भार्ययाऽन्वितः।
गजाख्यो गहने विप्रो मृतः क्षुधादिपीडितः।।210।।
अभिमाना समं पुत्र्या रोदति कानने तदा।
सा नीता पाटलिपन्नं पुष्पाख्येन च भूभृता।।211।।
विवाहेन स्वयं वह्निकन्या तेन स्वयीकृता।
पादेन मस्तके जातु तयाऽसौ ताडितौ रतौ[39] ।।212।।
आसनस्थः[40] प्रभातेऽसौ पर्यपृच्छद् बहुश्रुतान्।
पादेन हन्ति यो राजशिरस्तस्य किमिष्यते।।213।।
तस्मिन्सुबहवः प्रोचुः सभ्याः पण्डितमानिनः।
यथाऽस्य छिद्यते पादः प्राणैर्वा स वियोज्यते।।214।।
हेमाङ्को नाम तत्रैको विप्रोऽभिप्रायकोविदः।
जगाद तस्य पादोऽसौ पूजां सम्प्राप्यतां परम्।।215।।
कोविद कथमीदृक्त्वमिति पृष्टः स भूभृता।
इष्टस्त्रीदन्तशस्त्रेण क्षतमिष्टं तं स्वमैक्षयत्[41]।।216।।
अभिप्रायविदित्यैष हेमाङ्कस्तेन भूभृता।
प्रापितः परमामृद्धिं सर्वेभ्यश्चान्तरङ्गताम्।।217।।
हेमाङ्कस्य गृहे तस्य नाम्ना मित्रयशाः सती।
अमोघशरसञ्ज्ञस्य भार्गवस्य प्रियाऽवसत्।।218।।
विधवा दुःखिनी तस्मिन् वसती भवने सुतम्।
अशिक्षयदसावेवं स्मृतभर्तृगुणोत्करा।।219।।
सुनिश्चिन्तात्मना येन बालो विद्यागमः कृतः।
हेमाङ्कस्य द्युतिं तस्य विदुषः पश्य पुत्रकः।।220।।
शरविज्ञाननिर्धूत सर्वभार्गवसम्पदः।
पितुस्तथाविधस्य त्वं तनयो बालिशोऽभवत्।।221।।

वाष्पविश्रुतनेत्रायाः श्रुत्वा मातुर्वचस्तदा।
प्रशाम्यताङ्गतो विद्यां शिक्षितुं सोऽभिमानवान्।।222।।

ततो व्याघ्रपुरे सर्वाः कलाः प्राप्य गुरोर्गृहे।
तत्पुरेशसुकान्तस्य सुतां हृत्वा विनिर्गतः।।223।।

तस्याः शीलाऽभिधानायाः कन्यकायाः सहोदरः।
सिंहेन्दुरिति निर्यातो युद्धार्थी पुरुविक्रमः।।224।।

एकैको बलसम्पन्नं जित्वा सिंहेन्दुमाहवे।
श्रीवर्द्धितोऽन्वितो मात्रा सम्प्राप्तः परमां धृतिम्।।225।।

महाविज्ञानयुक्तेन तेन प्रख्यातकीर्तिना।
लब्धं पुष्पनृपाद्राज्यं नगरे पोदनाह्वये।।226।।

सुकान्ते पञ्चतां प्राप्तो सिंहेन्दुर्जितशत्रुणा।
हरिचन्द्रः समं देव्या निरैद्गेहात्सुरङ्गया।।227।।

सम्भ्रान्तः शरणं गच्छन् भगिनीं खेदवान् भृशम्।
प्राप्तस्ताम्बूलिकैर्भारं वाहितः सह भार्यया।।228।।

भानावस्तङ्गते मार्गे पोदनस्य स संगतः[42]।
मुक्तो राजभटै रात्रौ त्रासितो गहनं श्रितः।।229।।

महोरगेन संदष्टस्तं देवी परिदेविनी।
कृत्वा स्कन्धे परिप्राप्ता देशं यत्र मयः स्थितः।।230।।

वज्रस्तम्भसमानस्य प्रतिमास्थानमीयुषः।
महालब्धेः समीपस्य पादयोस्तमतिष्टपत्।।231।।

पादौ मुनेः परामृश्य पत्युर्गात्रं समस्पृशत्।
देवी ततः परिप्राप्तः सिंहेदुर्जीवितं पुनः।।232।।

चैत्यस्य वन्दनां कृत्वा भक्त्या केशरिचन्द्रमाः।
प्रणनाम मुनिं भूयो भूयो दयितया समम्।।233।।

उद्गते भास्करे साधुः समाप्तनियमोऽभवत्।
प्राप्तो विनयदत्तस्तं वन्दनार्थमुपासकः।।234।।

सन्देशात्छ्रावको गत्वा पुरं श्रीवर्द्धिताय तम्।
सिंहेन्दु प्राप्तमाचख्यौ श्रुत्वा सन्नद्धमुद्यतः।।235।।
ततो यथावदाऽऽख्याते प्रीतिसङ्गतमानसः।
महोपचारसेमुख्यात्[43] श्यालं[44] श्रीवर्द्धितोऽगमत्।।236।।
ततो बन्धुसमायोगं प्राप्तः परमसम्पदः।
श्रीवर्द्धितः सुखासीनं पपृच्छेति मयं नतः।।237।।
भगवन् ज्ञातुमिच्छामि पूर्वजननमात्मनः[45]।
स्वजनानाञ्च सत्साधुस्ततो वचनमब्रवीत्।।238।।
आसीच्छोभपुरे नाम्ना भद्राचार्यो दिगम्बरः।
अमलाख्यपुरे राजा अमलाख्यः[46] पराक्रमी।।239।।
स तं प्रत्यहमाचार्यं सेवितुं याति सन्मनाः।
अन्यदा भार्ययां गन्तुं सुमत्या वारितो नृपः।।240।।
तत्पापात्कुष्टिनी[47] जाता दुर्गन्धा दुष्टविग्रहा।
पत्या निःकाषिता गेहात् भ्रमति विजने वने।।241।।
अन्यदा कुष्टिनी सा तु प्राप्ता चैत्याऽन्तिके तदा।
विश्रान्तासीद्व्रणेभ्योऽस्या दुर्गन्धोऽसौ विनिर्ययौ।।242।।
अणुवृतानि सा प्राप्य भद्राचार्यसकाशतः।
देवलोकङ्गता च्युत्वाऽसौ कान्ता शीलवत्यभूत्।।243।।
यस्त्वसावमलो[48] राजा पुत्रे न्यस्तनृपश्रियः।
सन्तुष्टः सोऽष्टभिर्ग्रामैः श्रावकत्वमुपाचरत्।।244।।
देवलोकमसौ गत्वा च्युतः श्रीवर्द्धितोऽभवत्।
अधुना पूर्वकं जन्म मातुस्तव वदाम्यहम्।।245।।
एको वैदेशिको[49] भ्राम्यन् ग्रामं क्षुद्बाधितोऽविशत्[50]।
स भोजनगृहे भुक्तिमलब्धो कोपसङ्गतः।।246।।
सर्वग्रामं दहामीति निगद्य कटुकस्वरम्[51]।
निष्क्रान्तः सृष्टितोऽसौ[52] च ग्रामः प्राप्तः प्रदीपनम्।।247।।

ग्राम्यैरानीय[53] संक्रुद्धैः क्षिप्त्वाऽसौ तत्र पावके।
मृतो दुःखेन सम्भूता सूपकारी[54] नृपालये।।248।।
ततो मृता परिप्राप्ता नरकं घोरवेदनम्।
तस्मादुत्तीर्य माताऽभूत्तव मित्रयशाऽभिधा।।249।।
बभूव पोदनस्थाने नाम्ना गोवाणिजो[55] महान्।
भुजपत्रेति तद्भार्या सिंहेन्दुःसोऽभवन्मृतः।।250।।
भुजपत्राऽपि जाताऽस्य कामिनी रतिवर्द्धना।
पीडनाद्दर्दभादीनां पुरा भारञ्च वाहितौ।।251।।
श्रुत्वैवं संसृते धर्मं तोषं श्रीवर्द्धितोऽगमत्।
सर्वकुटम्बयुक्तोऽसौ पोदनाख्यं पुरङ्गतः।।252।।
मयस्य वचनं श्रुत्वा जैना जाताश्च पोदने।
पुरे जनाः समस्ते ते स्वर्गमोक्षसुखाप्तये।।253।।
मयो मुनीश्वरस्तत्र कृत्वा घोरतरं तपः।
ऐशानेऽथ सुरो जातो मदनाख्यो महर्द्धिकः।।254।।
इन्द्रजितादियोग्यानां चरित्रं पावनं परम्।
यः शृणोति शिवं गच्छेत् स भुक्ता स्वर्गसम्पदः।।255।।
यो विद्याधरभूपसेवितपदो रक्षोगणानां प्रभु
र्गेहे यस्य वहन्ति नीरघटकान् दिक्पालमुख्या नृपाः।
नारीवृन्दसरोजषट्पदसमः शोभाऽन्वितो मस्तकैः
सोऽयं रावणभूपतिः प्रलयतां प्राप्तस्तदाऽन्यश्च कः।।256।।
संसारेऽत्र न चास्ति सारविभवो नित्यः कदापि क्वचिद्
देहं चापि न शाश्वतं न च सुखं नित्यं परं दुखदम्।
एवं तत्त्वविचारणं कुरु सदा नित्यं न किञ्चिद् भवेत्
एको जैनवृषो भवेच्च सततं मोक्षप्रदः शाश्वतः।।257।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते रावणमरणप्राप्ति इन्द्रजितादीनां मोक्षप्राप्ति वर्णनो नाम षड्विंशतितमोऽधिकारः।।26।।

❖❖❖

1. केकिहिंसा इति क प्रतौ
   केकि हि सा स्क्त इति ख प्रतौ
2. नी इति ख प्रतौ
3. प्रयाणेष्व इति क प्रतौ
4. एष: श्लोक: ख प्रतौ अनुपलभ्यते।
5. हयगजैर्वृता: इति ख प्रतौ
   हयगजैधृता: इति ग प्रतौ
6. ह्रय: इति ग प्रतौ
7. मीनायंतो इति ख प्रतौ
8. सुशस्त्रज्या इति ख प्रतौ
9. भूता इति ख/ग प्रतौ
10. टुण्टा: खञ्जा: शिरोमुक्ता इति ख/ग प्रतौ
11. शूरहस्तितुरंगाणां इति क प्रतौ
12. चूर्णिता वृक्षपाषाणौ इति ख प्रतौ
    चूर्णितो वृक्षपाषाणौ इति ग प्रतौ
13. जान्स्वरान् इति क प्रतौ
14. रामेति इति क प्रतौ
15. एष: श्लोक: इति ग प्रतौ अनुपलभ्यते।
16. तीर्यत्कं इति क/ख प्रतौ
17. तुबरा इति ख प्रतौ
18. तश्चिते इति ग प्रतौ
19. ते इति क प्रतौ
20. या गतिरपि इति ख प्रतौ
21. पश्यतं इति क प्रतौ
22. सिद्धाख्या महाविद्या रता ताभिः सुसिद्धये इति ख प्रतौ
23. तथाहि इति क प्रतौ
24. भुजौ च छेदिते इति ख प्रतौ
    भुजौ च छेदितं इति ग प्रतौ
25. भूजचतुष्टयम् इति क प्रतौ
26. कृतजंकारं इति क प्रतौ
    कृतऋकारं इति ग प्रतौ
27. प्राप्यसि इति क प्रतौ
    प्राप्यतेय इति ग प्रतौ
28. नरेश्वर: इति क प्रतौ
29. पीडिति इति क/ख प्रतौ

30. कं च नो नतः इति क/ख प्रतौ
31. ब्रूहि मेकां इति ख प्रतौ
32. मृत्फस्ते इति ख प्रतौ, मृत्पस्ते इति ग प्रतौ
33. प्रीतिङ्करोभिख्य इति क/ख प्रतौ
34. एष: श्लोक: ख प्रतौ अनुपलभ्यते।
35. यो न इति क प्रतौ
36. सहस्रदससंदयाता इति क प्रतौ
37. चूलिगिरौ इति ख/ग प्रतौ
38. वंकगिरौ इति ख/ग प्रतौ
39. ताड़ितो रथः इति ख प्रतौ
    ताड़ितौ रतौ इति ग प्रतौ
40. आस्थानस्थः इति क प्रतौ
    आसानस्यः इति ग प्रतौ
41. क्षतमौष्टं इति ग प्रतौ
42. संसप्तसु इति क प्रतौ
43. महोपचारमुख्यात् इति ख प्रतौ
    महोपचारमुख्यात: इति क प्रतौ
44. शालं इति क प्रतौ
45. पूर्वजन्ममतात्मन: इति क प्रतौ
    पूर्वजन्ममात्मन: इति ख प्रतौ
46. विमलाख्य: इति क प्रतौ
47. तत्पापात्कुष्टनी इति क प्रतौ
48. विमलो इति क प्रतौ
49. वैदेशिक इति क प्रतौ
50. क्षुद्बाधितोऽविसत् – त्रयौ प्रतौ
    क्षुद्बाधितोऽविशत् प.पु. भाग–3/80/166
51. कटुकस्तरां इति क/ख प्रतौ
52. पृष्टितोऽसौ इति क/ग प्रतौ
53. ग्राम्यैः स नीय इति क प्रतौ
    ग्राम्यैः शनीय इति ख प्रतौ
54. सूर्पकारी इति ख प्रतौ
55. गोवणिज इति क/ग प्रतौ

❖❖❖

सप्तविंशतितमोऽधिकारः

पद्मनाभो पुरीं लङ्कां प्रविष्टुं स समुद्यतः।
त्रिलोक्यडम्बरं नागमारूढः खेचरैः समम्॥1॥

नानावाद्यस्य निर्घोषैः पात्रनाद्यसमन्वितैः।
हर्षेणापूरितो रामः प्रविष्टो राक्षसीं पुरीम्॥2॥

तदा गवाक्षमार्गस्था विलोक्य[1] तं स बान्धवम्।
परस्परमिदं प्राहुर्जनाः सन्तोषनिर्भराः॥3॥

रामोऽयं पश्य दन्तिस्थं सीतायाः पतिमुत्तमम्।
पश्य लक्ष्मणवीरोऽयं हतो येन दशाननः॥4॥

पश्य भामण्डलं वीरमग्रस्थञ्च खगेश्वरम्।
पश्य बाले हनूमन्तं विशल्या येन त्वागता॥5॥

पश्य विभीषणं येन त्यक्तो रावणबान्धवः।
विशल्यां शिविकारूढां लक्ष्मणो जीवितो यया॥6॥

सुग्रीवोऽयं विमानस्थो गच्छति वानराऽधिपः।
नलनीलौ गजारूढावङ्गाङ्गदौ च पश्यताम्॥7॥

विराधितः कुमारोऽयं पश्य रामस्य मित्रकः।
सहायित्वं कृतं येन खरदूषणसङ्गरे[2]॥8॥

पौराः प्रसंसुराशीभिर्वर्द्धितं पुण्यसम्पदा।
अथाऽऽरात्सुसतीं एवं राजमार्गे समागताम्॥9॥[3]

सीतां समागतां दृष्ट्वा धूलिधूसरदेहिकाम्।[4]
अवतीर्णो गजाद्रामः सीतासङ्गमनोत्सुकः॥10॥

रामस्य चरणौ नत्वा समालिङ्ग्य पुनः पुनः।
करयुग्मञ्च संयुज्य स्थिताऽग्रे तत्र जानकी॥11॥

लक्ष्मणस्तत्र चागत्य सीतायाश्चरणौ नतः।
सीतयाऽऽशीर्वचोभिः स तोषितो दृढशीलया॥12॥

भामण्डलादिसद्वीराः खेचराः नरनायकाः।
जानक्याः पादयोर्नत्वा संस्थिता विनयान्विताः॥13॥

भामण्डलस्ततः प्राह पश्य भग्नि खगेश्वरान्।
विभीषणोऽयं सुग्रीवो नलनीलौ तथाङ्गदः।।14।।
हनूमानङ्गदो जम्बूवान्महेन्द्रो विराधितः।
एते पराक्रमैर्युक्ता रामकार्ये समागताः।।15।।
आशीर्दानेन सन्तोष्य सर्वांस्तान् जानकी तदा।
जगाद विनयं वाक्यं पद्माभ भक्तितत्परान्।।16।।
यूयं भो खेचराधीशाः कष्टिता मम हेतवे।
इह बन्धु समाना मे रणे सहायताङ्गताः।।17।।
ततः प्रोचुः खगाधीशा भो मातस्तव दर्शनात्।
अस्माकं सकलं कष्टं वेगाद्दूरे पलायितम्।।18।।
तया समं पुनः रामः समारूढो गजाधिपम्।
स्वं स्वं वाहनमन्येऽपि चारूढा गन्तुमुद्यताः।।19।।
प्राप्तः क्रमेण सद्गेहं दशाननस्य हेमजम्।
रत्नैर्विभूषितं रम्यं ध्वजातोरणमण्डितम्।।20।।
हेमस्तम्भसहस्रेण धृतं रत्नशिलादिभिः।
छादितं शान्तिनाथस्य तत्र चैत्यालयं वरम्।।21।।
घण्टातोरणछत्राद्यैरलङ्कृतं विशेषतः।
दृष्ट्वा पद्मश्च तद्गेहं गजादुत्तरितः क्षणात्।।22।।
कृत्वा स्नानं पवित्रञ्च धौतवस्त्रं समाश्रितः।
जानक्या सह पद्माभः प्रविष्टो जिनमन्दिरम्।।23।।
लक्ष्मणप्रमुखा वीरा अन्तर्बाह्येषु निर्मलाः।
प्रविष्टा जिनगेहन्ते शान्तरसैरलङ्कृताः।।24।।
नग्नरूपं निरातंकमाभरणादिवर्जितम्।
महारूपधरं देवं कोटिसूर्यसमप्रभम्।।25।।
अष्टादशमहादोषैर्मुक्तं शान्तिप्रभुं जिनम्।
दृष्ट्वा तुष्टाः खगाधीशाः पूजयन्ति स राघवः।।26।।

पञ्चामृतैश्च संस्नाप्य जिनमष्टविधाऽर्चनैः।
पूजित्वा च पुनः स्तुत्वा स्तोत्रैः खगास्ततो नताः।।27।।
सीतासमन्वितो रामः कृत्वा वीणारवं परम्।
गीतान् गीत्वा नृत्यति स्म हर्षपूरितमानसः।।28।।
गन्धोदकञ्च पुष्पाणि गृहीत्वा मस्तके कृतम्।
बहिर्मण्डपसंस्थानमुपविष्टा नराधिपाः।।29।।
ततो विभीषणो राजा गत्वा रावणवेश्मनि।
सुमालिमालिवद्रत्नस्रवप्रभृतिबान्धवान्।।30।।
वैराग्यैर्विविधैर्वाक्यैः सम्बोध्य तांश्च दुःखितान्।
समानीताः सभामध्ये यत्रास्ति रघुनन्दनः।।31।।
तदा रामेण सन्मान्य समालिङ्ग्य च राक्षसाः।
रत्नकम्बलमारोप्य सुवाक्यैः प्रतिबोधिताः।।32।।
परस्परं सुखालापं यावत्कुर्वन्ति ते नृपाः।
तावत्तत्र समायातो वेगाद्राजा विभीषणः।।33।।
उत्तिष्ठ देव गच्छामो भोजनार्थञ्च मद्गृहम्।
इत्युक्ते उत्थितो रामो राक्षसैर्वानरैः समम्।।34।।
महावाद्यस्य निर्घोषैर्नर्तकीगीतमङ्गलैः[5]।
बन्दिवृन्दैश्च संयुक्तो गच्छति रघुनन्दनः।।35।।
विभीषणस्य सद्गेहं प्रविष्टः खेचरैः समम्।
रामो गजादवतीर्य सीताहस्तकरस्थितः।।36।।
पद्मप्रभजिनेन्द्रस्य तत्र सारजिनालयम्।
गत्वा तत्रापि रामाद्यैः सुभक्त्या पूजितो जिनः।।37।।
स्तुत्वा नत्वा च तं पद्मप्रभं देवञ्च पूर्ववत्।
यथायोग्यञ्च संस्थानमाश्रितास्तत्र खेचराः।।38।।
विद्याधर सुनारीणां मर्दनै[6] रामलक्ष्मणौ।
स्नातौ सीतासमायुक्तौ दिवसैर्बहुभिश्च तैः।।39।।

धौतवस्त्रं परीधाय[7] धृत्वाऽलङ्करणानि च।
पूजित्वा जिननाथञ्च भोजनार्थं समागताः।।40।।

हेमपात्राणि रम्याणि रत्नकुटिमभूतले।
स्थापितानि तदग्रे च मानवैर्विनयान्वितैः।।41।।

सकलैः खेचरैः सार्द्धं ससीतौ रामलक्ष्मणौ।
हस्तौ प्रक्षालनं कृत्वा संस्थितौ च यथायथम्।।42।।

विभीषणस्य नारीभिर्भूषिताभिश्च प्रेषितम्।
अन्नं बहुविधं भुक्तं रामाद्यैः खेचरैः समम्।।43।।

ततो गन्धविलेपाद्यैस्ताम्बूलैश्च सुगन्धिभिः।
विभीषणेन सन्मान्यं भूषणाद्यैस्तु पूजिताः।।44।।

रामलक्ष्मणसुग्रीवभामण्डलहनूमतः।
नलनीलाङ्गाङ्गदान्ताद्याः परं तुष्टाश्च चेतसि।।45।।

आवासाश्च यथायोग्या दत्तास्तेभ्यः सुखाप्तये।
स्वस्वस्थाने स्थितास्ते च गत्वा स्वपरिवारकैः।।46।।

सीतया सह पद्माभो भोगान् भुञ्जति लीलया।
सप्तभूमिगृहे रम्ये धूपगन्धैः सुवासिते।।47।।

विशल्यया समायुक्तो लक्ष्मणोऽपि सुखंस्थितः।
एवं सर्वे खगाधीशाः यथायोग्येन संस्थिताः।।48।।

मिलित्वाऽथ खगाः सर्वे त्रिखण्डराज्यविष्टरे।
रामलक्ष्मीधरौ वीरौ स्थापितुमुद्यतास्तदा।।49।।

रामो जगाद मे पित्रा पूर्वं राज्यो[8] निवेशितः।
भरताख्यो मम भ्राता तस्याज्ञां प्रवहाम्यहम्।।50।।

सोऽस्माकं चाप युष्माकं प्रभुरेव न संशयः।
तस्मात्पट्टाभिषेकेण नास्त्यस्माकं प्रयोजनम्।।51।।

इत्युक्तेऽपि खगाधीशैस्त्रिखण्डानां नरेश्वरौ।
बलनारायणावैवेत्युक्ता छत्रं धृतं तयोः।।52।।

ततो लीलाविनोदेन सकलैः खेचरैः समम्।
भ्रातरौ कुरुतो राज्यं लङ्कायां सुखभोगिनौ।।53।।[9]

ततो लक्ष्मणवाक्येन विराधितेन भूभृता।
गत्वा नार्योऽस्य चानीता पूर्वं पित्रादिकल्पिता।।54।।

दशपुराद्वज्रकर्णनृपस्य कन्यका परा।
रूपवतीति नाम्ना सा त्रिंशत्कन्यकान्विता।।55।।

बाललीलस्य या कन्या नाम्ना कल्याणमालिका।
पुत्री पृथ्वीधरस्यापि वनमालाभिधा वरा।।56।।

जितशत्रोर्नरेन्द्रस्य जितपद्मा प्रकीर्तिता।
रूपिण्यनन्तवीर्यस्य पुत्री परमसुन्दरी।।57।।

एवं यत्रस्थिताः कन्यास्तस्मात्सर्वाः समागताः।
बहुभिः सखिभिः सार्द्धं विमानस्थाः सुमङ्गलाः।।58।।

ताभिः सार्द्धं विवाहोऽत्र सञ्जातो लक्ष्मणस्य वै।
अन्याभिः सह पद्मस्य जातं विवाहमङ्गलम्।।59।।

एवं सुखविनोदेन षट्वर्षाण्येव तत्र वै।
सकलैः खेचरैः साकं संस्थितौ रामलक्ष्मणौ।।60।।

अथाऽयोध्यापुरे रम्ये दशरथस्य सद्मनि।
आगतो नारदो मौनी जटाभस्मविभूषितः।।61।।

तं दृष्ट्वा चरणौ नत्वा राममाताऽपराजिता।
मणिपीठे तमाविश्य तस्याग्रे संस्थिता स्वयम्।।62।।

नारदोऽपृच्छत् भो मात ! सुसमाधानमस्ति ते।
तच्छ्रुत्वा रोदनं कृत्वा देवी जगाद तं प्रति।।63।।

कुत्राऽस्ति नारदास्माकं सुखं पुत्रवियोगतः।
सोऽवोचत्कुत्र ते पुत्रो गतो देवि स सन्मतिः।।64।।

अहं तु धातकीखण्डे भ्रमितो जिनसद्मसु।
त्रयोविंशतिवर्षाणि कर्तुं तीर्थस्य वन्दनाम्।।65।।

कल्याणानि जिनेन्द्रस्य दृष्ट्वा तोषं परं गतः।
विस्मृतोऽहञ्च वार्तां ते किं जातमत्र कारणम्॥66॥
ततो जगाद सा देवी देवर्षे शृणु कारणम्।
दत्वा राज्यं भरताय दशरथोऽभवत्सन्मुनिः॥67॥[10]
सीतालक्ष्मणसंयुक्तौ रामो देशान्तरङ्गतः।
दशवक्त्रेण दुष्टेन सीता तत्र समाहृता॥68॥
तेन स मरणे जाते शक्त्या[11] लक्ष्मणबाधितः।
नीताऽत्रागत्य विशल्या तत्र वेगाद्धनूमता॥69॥
ततो न ज्ञायते देव किं जातं तत्र कारणम्।
को मृतो जीवितो को वा दूरदेशाब्धिमध्यगे॥70॥
इत्युक्ते नारदस्याऽग्रे रोदति दुःखिनी पुनः।
कृत्वा शोकं महादुःखं देवी नाम्नाऽपराजिता॥71॥
इति श्रुत्वा च देवर्षिः शोकपीडितमानसः।
जगाद वचनं सारं दुःखं मा कुरु चाम्बिके॥72॥
गत्वा तत्रैव पद्मस्य सद्वार्तामानयाम्यहम्।
इत्युक्त्वा निर्गतो मानी विमानस्थे नभस्तले॥73॥
द्वीपेऽथ राक्षसे प्राप्तो लङ्कायाश्च बहिस्सरः।
वानराणां कुमाराश्च तत्र क्रीडन्ति लीलया॥74॥
पृच्छति नारदो मौनी रावणोऽस्ति सुखेन भो।
इति श्रुत्वा कुमारास्ते क्रुद्धा प्राहुश्च नारदम्॥75॥
कस्त्वं पृच्छसि वार्तां भो रावणीयां कुपापदाम्।
इत्युक्त्वा मुष्टिघातेन पीडितस्तैश्च नारदः॥76॥
बध्वा करौ च पश्चात्स नीतो रामस्य सन्निधिम्।
ततो रामेण दृष्ट्वा तं मोचितस्तत्करान्मुनिः॥77॥
नत्वा पादौ च देवर्षिः स्थापितः सिंहविष्टरे।
उपविष्टौ च तस्याऽग्रे सखगौ बलकेशवौ॥78॥[12]

ततो जगाद देवर्षि: श्रूयतां रघुनन्दनौ।
युवयोर्मातरस्तत्र कुर्वन्ति शोकमुत्कटम्।।79।।
यूयं सुखाब्धिमध्येऽत्र स्थितास्तासां कथामपि।
विस्मृतास्तास्तु[13] दुःखेन[14] मरिष्यन्ति न संशयः।।80।।
एतच्छ्रुत्वाऽथ पद्माभश्चित्ते व्याकुलतामभूत्।
विभीषणं समाहूय जगादेदं वचस्तदा।।81।।
भवद्गृहे सुखेनाहं संस्थितः सज्जनैर्वृतः।
समं लक्ष्मणसीताभ्यां रत्नकूटिमभूतले।।82।।
अधुना मे मनो जातमयोध्यां गमनं प्रति।
तस्माद्भवद्भिः कर्त्तव्यं शृङ्गारञ्च गजादिषु।।83।।
विभीषणस्ततोऽवोचदेवमस्तु तथा शृणु।
भवद्भिः षोडशाह्नानि स्थातव्यं मम सद्मनि।।84।।
एवमस्त्विति पद्माभः सम्प्रोच्य तत्र संस्थितः।
विभीषणेन साकेतं वेगाद्दूतस्तु प्रेषितः।।85।।
आगत्य तेन दूतेन भरताय निवेदितम्।
षोडशाह्नि च रामस्य समागमो भविष्यति।।86।।
तच्छ्रुत्वा भरताद्यास्तु सन्तुष्टाः चेतसि त्वरा।
कुर्वन्ति सदने वार्तां यावत्सङ्गरसम्भवम्।।87।।
तावद्रत्नानि संगृह्य पञ्चवर्णानि खेचराः।
समागता अलङ्कर्तुं पुरं राक्षसप्रेरिताः।।88।।
प्रजागृहेषु रत्नानां वृष्टिः कृता नभश्चरैः।
ततः शृङ्गारितं पत्नं पताका छत्रतोरणैः।।89।।
खेचरशिल्पिभि:[15] रम्या जिनगेहाश्च निर्मिताः।
लङ्काया अधिका शोभा साकेतायां कृता तदा।।90।।
षोडशाह्नौ गते तस्मान्निर्गतौ रामलक्ष्मणौ।
बहुभिर्खेचरैः सार्द्धं नानावाद्यसमन्वितैः।।91।।

रामो विमानमारुह्य पुष्पकं सीतया समम्।
लक्ष्मणाद्यैः खगाधीशैस्तदा गच्छति संवृत्तः।।92।।

विभीषणहनूमन्तौ नलनीलौ विराधितः।
प्रभामण्डलसुग्रीवावङ्गाङ्गदौ समं भटाः।।93।।

केचिद्विमानमारूढाः केचिच्च गजवाहनाः।
तदा जगाद पद्माभो जानकीं गगने स्थले।।94।।

दूरतो दृश्यते पश्य सीते मेरुं सुदर्शनम्।
एतान् कूलनगान् पश्य पश्य नद्यश्चतुर्दश।।95।।

दण्डकाख्यमिदं पश्य यत्र त्वं पापिना हृता।
पश्येदं तटनीतीरं यत्र दानं मुनौ कृतम्।।96।।

पश्य वंशगिरिं यत्र ज्ञानिनौ पूजितौ त्वया।
क्षेमाख्यं नगरं पश्य पश्य विजयकं पुरम्।।97।।

बालिलीलपुरं पश्य पश्य चोज्जयिनीं पुरीम्।
दशपुरञ्च पश्य त्वं चित्रकूटं सुलक्ष्मणम्।।98।।

एवमुच्चार्यमानोऽसौ सीतां पद्मः समागतः।
अयोध्याया वनं बाह्ये सकलैः खेचरैर्वृतः।।99।।

गजमारुह्य सन्तोषादागतो भरतेश्वरः।
शत्रुघ्नेन समं तत्र चतुर्बलसमन्वितः।।100।।

आगतं भरतं दृष्ट्वा रामस्तत्र नभस्तलात्।
उत्तरितः खगैः सार्द्धं भूरिहर्षेण पूरितः।।101।।

गाढं तत्र समालिङ्ग्य सर्वैः सर्वे परस्परम्।
क्षेमकुशलं सम्पृच्छ्य सन्तुष्टाः सज्जना जनाः।।102।।

शत्रुघ्नभरताभ्याञ्च ससीतौ रामलक्ष्मणौ।
समारूढौ विमानं तौ बहुभिः खेचरैः समम्।।103।।

नानावाद्यविनोदेन गच्छन्ति राजवर्त्मनि।
गवाक्षस्थैर्जनैस्तत्र दृश्यमाना नभश्चराः।।104।।

बन्दिभिः स्तूयमानास्तु पूज्यमाना जनैर्घनैः।
गजाश्वरथपादान्ते मार्गो न लभते क्वचित्।।105।।
रत्नवृष्टिं प्रकुर्वन्ति पुष्पवृष्टिं पदे पदे।
जयं नन्देति सद्वाक्यैः पूरयन्ति जना नभः।।106।।
नृत्यन्ति नर्तकी वृन्दा गर्जन्ति सिंहहस्तिनः।
हेषन्ति वाजिनः शूराः कम्पयन्ति महीतलम्।।107।।
एवं विभवसंयुक्ता राजद्वारं क्रमाद्गताः।
दशरथस्य भार्यादिनार्यस्तत्र समागताः।।108।।
नभसस्तत उत्तीर्य विमानात् रघुनन्दनः।
मातॄणां चरणौ नत्वा परिष्वक्ताः पुनः पुनः।।109।।
सीताऽपि चरणौ तासां प्रणम्य संस्थिता पुरः।
सम्पृच्छ्य क्षेमकुशलं सन्तोषं परमं गताः।।110।।
विशल्या प्रमुखा देव्यः सर्वास्तयोश्च वल्लभाः।
सन्नताः स्वसृणां पादौ विनयीभूतमानसाः।।111।।
आशीर्वादसहस्रेण ताभि:[16] रघुसुताः सुताः[17]।
गता अन्तर्गेहं रम्यं विद्याधरसमन्विताः।।112।।
स्नात्वा भुक्त्वा च सन्तुष्टा उपविष्टाः सभास्थले।
पुण्येन सर्वबन्धूनां सञ्जातं मेलनं परम्।।113।।
शृणु रामस्य पुण्येन विभवास्तस्य वेश्मनि।
नन्द्यावर्ताभिधं गेहं बहुभूम्यं मनोहरम्।।114।।
शालाचन्द्रमतिर्नाम्ना प्रकारश्च चतुर्मुखः।
गोपुराणि सुरम्याणि प्रेक्षागृहं मनोहरम्।।115।।
मुकुटं कुण्डले द्वे च कवचं खड्गमुत्तमम्।
कैलाशसदृशं सिंहपीठं तस्य मनोहरम्।।116।।
पञ्चाशत्सहस्रकोट्यो हलानां तस्य वेश्मनि।
एककोटिर्गवां सङ्ख्या वाटानां भवनेऽस्य च।।117।।

सप्ततिकोटिसङ्ख्याता कुटुम्बिनः सुखावहाः।
चतुर्विधं महासैन्यं खेचरैर्भूचरैर्युतम्।।118।।
निधानबहुयुक्तानि रत्नानि तस्य भूरिशः।
प्रधानदण्डनाथौ च पुरोधा सूत्रधारकः।।119।।
देशग्रामपुराकारा गिरिदुर्गवनानि च।
वाजिनो नवकोट्याश्च वायुवेगाः प्रकीर्तिताः।।120।।
द्विचत्वारिंशल्लक्षाणि गजाः पर्वतसन्निभाः।
स्पन्दनास्तस्य तावन्तो ज्ञेया विमानसङ्गताः।।121।।
द्विचत्वारिंशत्कोट्याश्च भूमिकम्पाः पदातयः।
भार्या अष्टसहस्राणि पद्मस्याप्सरसां समाः।।122।।
सप्तदशसहस्राणि वल्लभाः लक्ष्मणस्य च।
चत्वारो भ्रातरो ज्ञेयाः स्तम्भास्त्रिलोक्यमण्डपे।।123।।
त्रिखण्डसम्भवं राज्यं कुरुतौ रामलक्ष्मणौ।
चक्ररत्नं गृहे यस्य सहस्रदेवसेवितम्।।124।।
पादौ सेवन्ति भूपालाः सङ्ख्या सहस्रषोडशः।
तावन्त एव देशाः स्युः सिंहासनपुरान्विताः।।125।।
एवं वैभूत्यसंयुक्तौ राजतौ रामलक्ष्मणौ।
खेचरास्तत्र देशेषु रमन्ति स्वेच्छया मुदा।।126।।
चैत्यगेहेषु संपूजां कुर्वन्ति वाद्यसंयुताः।
मुनिभिश्च महादानं ददाति रघुनन्दनः।।127।।
वैराग्यगुणयुक्तोऽसौ भरतो राजसद्मनि।
तिष्ठत्यप्राप्यदीक्षाया प्रस्तावं मोक्षहेतुकम्।।128।।
एतस्मिन्नन्तरे सीता विशल्या चोवर्शी तथा।
उर्वी कल्याणमाला च जितपद्मा वसुन्धरा।।129।।
एवमाद्यास्तयोर्भार्या उचुस्तं भरतं प्रति।
आगच्छ देवर क्रीडां कुर्वामः सुखसङ्गताम्।।130।।

बहुभिरादरैर्वाक्यैः प्रार्थितो भरतेश्वरः।
चतुर्णांबान्धवादीनां वल्लभाभिर्विवेकतः।।131।।
तासां वचो निराकर्तुमशक्तो भरतप्रभुः।
ताभिः सार्द्धङ्गतास्तीरे जलक्रीडाप्रहेतवे।।132।।
सुगन्धिवासिते नीरे प्रविष्टा रघुवल्लभाः।
भरतेन समं क्रीडां कर्तुं सन्तोषपूरिताः।।133।।
परस्परं विनोदास्ते कृत्वा स्नात्वा सुगन्धिभिः।
जलैर्वस्त्राणि संधार्य चोपविष्टाः सरस्तटे।।134।।
जिनपूजाञ्च कुर्वन्ति भरताद्याश्च भूभृताः।
वीणावाद्यञ्च नृत्यञ्च चक्रिरे रघुयोषितः।।135।।
एतस्मिन्नन्तरे दन्ती त्रिलोक्यडम्बराभिधः।
आलानबन्धनं छित्वा साकेतायां परिभ्रमन्।।136।।
विनाशयति रम्याणि गृहाणि च वनानि च।
घनं गर्जति निर्घोषं त्रासयति जनान् बहून्।।137।।
तद्ध्वनिना गजा अन्ये बन्धान् छित्वा पलायिताः।
वाजिनो वाजिशालायां कम्पिता भयत्रासिताः।।138।।
तच्छ्रुत्वा खेचरास्तत्र श्रीशैलाद्याः समागताः।
रामोऽपि लक्ष्मणोपेतः शत्रुघ्नेन समं तदा।।139।।
आगतः[18] सुभटैर्युक्तो गजं धर्तुं समुत्सकाः।
जनानां स्फाल्यमानन्तं न शक्योऽभूत्तथाऽपि सः।।140।।
स्वेच्छया चलितो मार्गे सरसो यत्र योषितः।
क्रीडन्ति भरतोपेता कृतान्तमिव दन्तिकः।।141।।
आगच्छन्तं गजं दृष्ट्वा भीता राघवयोषितः।
भरतशरणं प्राप्य स्थिता व्याकुलचेतसा।।142।।
भरताभिमुखं दृष्ट्वा गतं रामादयः खगाः।
हा हेति वचनं प्रोच्य प्रकुर्वन्ति जना घनाः।।143।।

भरतं जिनपूजन्तं दृष्ट्वा तत्र गजोत्तमः।
संस्मरन् पूर्वजन्मानि स शान्तरसमागतः[19] ।।144।।

शुण्डादण्डमधःकृत्वा तस्याग्रे संस्थितस्तदा।
भरतः प्रोचे कस्मात्त्वं कुद्धोऽसि गजनायकः।।145।।

तच्छ्रुत्वाऽत्यन्तशान्तत्वं सम्प्राप्य परमं गजः।
चित्ते चिन्तातुरो भूत्वा रोदति करुणारसम्[20] ।।146।।

रामाद्याः खेचरास्तत्र पुरस्थाः सकला जनाः।
शान्तं दृष्ट्वा गजं वेगात्कौतुकाय समागताः।।147।।

हतो येन दशवक्त्रो राक्षसेशः स लक्ष्मणः।
कथं शक्तो न नागेशं धर्तुमितीह कौतुकम्।।148।।

ततः सीताविशल्याभ्यां तं नागं भरतेश्वरः।
समारुह्य गतो गेहं सुवाद्यविभवैर्युतः।।149।।

स्नात्वा भुक्त्वा स शत्रुघ्नः सभायां भरतेश्वरः।
समाविष्टः खगैः सार्द्धं रामलक्ष्मणसंयुतः।।150।।

कथं क्रुद्धः कथं शान्तो गजो जातो जनान्प्रति।
वदन्ति कौतुकं मत्वा पश्यति शान्तसंस्थितिम्।।151।।

विनयैः शतशैर्वाक्यैर्यो न गृह्णाति भुक्तिकम्।
सः कथमद्य सञ्जातो निराहारश्चतुर्दिनम्।।152।।

तदा तन्नगरोद्याने केवली देशभूषणः।
कुलभूषणसंयुक्त आगतो यतिभिर्वृतः।।153।।

समवशरणं तस्य दृष्ट्वाऽऽगतं वने घने।
वनपालेन चागत्य पद्मनाभे निवेदितम्।।154।।

दत्वा तस्मै शरीरस्थं वस्त्रादिकञ्च राघवः।
सन्ताड्यानन्दभेरी च निर्गतो विभवैर्युतः।।155।।

रामलक्ष्मणशत्रुघ्नभामण्डलविभीषणाः।
निर्गता वन्दनाहेतोः स्वस्ववाहनसंयुताः।।156।।

नलनीलहनूमन्तः सुग्रीवाङ्गाङ्गदा नृपाः।
स्वस्वविभवसंयुक्ता निर्गता वानरध्वजाः॥157॥

त्रिलोक्यडम्बरं नागमारुह्य भरतेश्वरः।
वैराग्यगुणयुक्तोऽसौ निर्गतो वरवाहनैः॥158॥

चतुर्णां मातरो देव्योऽपराजिता सुमित्रिका।
सुप्रभा केकयीमत्यः शिविकास्थाः समागताः॥159॥

सीता पद्मा विशल्याद्या रघूनां योषितो वराः।
गजारूढाः सश्रृङ्गारा मुनिदर्शनलालसाः॥160॥

सुरेन्द्रा इव सम्प्राप्ता मुनेः सभां सुनिर्मलाम्।
सम्पूज्य चरणौ तस्य स्तुत्वा स्वसदसि स्थिताः॥161॥

श्रुतं धर्मं जिनेन्द्रोक्तं द्विविधं गृहियोगिनोः।
सप्ततत्त्वानि द्रव्याणि षट्कं पञ्चास्तिकायकम्॥162॥

ततः प्रस्तावमासाद्य जगाद प्रभुलक्ष्मणः।
स्वामिन्नयं गजाधीशो दुश्चित्तः केन हेतुना॥163॥

सम्प्राह केवलज्ञानी विख्यातो देशभूषणः।
अस्त्ययोध्यापुरे राजा वृषभाख्यो जिनेश्वरः॥164॥

तस्मिन् काले च तत्रैव सुप्रजाख्यो नराधिपः।
प्रह्लादाख्या भार्या स्यात्सूर्यचन्द्रौ तयोः सुतौ॥165॥

वृषभे गृहीते योगे तौ जातौ वेषधारिणौ।
क्षुधाभिः पीडितौ तौ च तदा जातौ कुलिङ्गिनौ॥166॥

कृत्वा मिथ्यामतं पापं भ्रान्तौ संसारसागरे।
सूर्यचन्द्रौ कुमारौ तौ कुलिङ्ग्यौ कर्मणो बलात्॥167॥

तयोश्चन्द्रो गजाभिख्ये पुरे कुलङ्कराभिधः।
सिंहपतेर्मनोलूताकुक्षौ जातः कुमारकः॥168॥

तत्रैव नगरे जातः सूर्योऽपि च पुरोहितः।
विश्वाग्नेरग्निकुण्डायां[21] पुत्रः श्रुतिरताभिधः॥169॥

कुलङ्करोऽन्यदा गोत्रसन्तत्या कृतसेवनात्।
तापसान् सेवितुं गच्छन्नपश्यन्मुनिपुङ्गवम्।।170।।

तं नत्वाऽसौ च तस्याऽग्रे स्थितस्तदा मुनीश्वरः।
जगादावधिनेत्रेण सर्वलोकहितप्रियम्।।171।।

यत्र त्वं प्रस्थितस्तत्र भवतां हि पितामहः।
तापसः सर्पतां प्राप्तः काष्ठमध्येऽवतिष्ठते।।172।।

पञ्चाग्निसाधकैर्दुष्टैः काष्ठं तदैव दह्यते।
ततो गत्वा नृपेणाऽसौ वह्नेः सर्पस्तु रक्षितः।।173।।

[22]कदागमसमापन्नान् दृष्ट्वाऽसौ तापसांस्ततः।
प्रबोधमुत्तमं प्राप्तः श्रावण्यं[23] कर्तुमुद्यतः।।174।।

वसुपर्वतकश्रुत्या[24] मूढः श्रुतिरतस्ततः।
तममोहयदेवञ्च[25] पापकर्मोपदेशकः।।175।।

गोत्रक्रमाऽऽगतो राजन् धर्मोऽयं तव वैदिकः।
ततः सिंहपतेः पुत्रो यदि त्वं तत्तमाऽऽचर[26]।।176।।

राजन् वेदविधिं कृत्वा सुतं न्यस्य निजे पदे।
करिष्यसे तपः पश्चात्प्रसादः क्रियतां मम।।177।।

एवमेतदथाभीष्टा श्रीदामेति प्रकीर्तिता।
महिष्यचिन्तयत्तस्य नूनं राज्ञाऽन्यसङ्गता।।178।।

ज्ञाताऽस्मि येन वैराग्यात् प्रव्रज्यां कर्तुमिच्छति।
प्रव्रजेदयं किं नो वा को जानाति मनोगतिम्।।179।।

तस्माद् व्यापादयाम्येनं विषेणेत्यनुचिन्त्य सा[27]।
पुरोहितान्वितं पापं कुलङ्करममारयत्।।180।।

ततोऽनुध्यातमात्रेण पशुघातेन पापतः।
कालप्राप्तावभूतां[28] तौ निकुञ्जे शशकौ वने।।181।।

भेकत्वं मूषकत्वञ्च बर्हिणत्वं पृदाकुताम्।
रुरुत्वञ्च पुनः प्राप्तौ कर्मानिलजवैरितौ।।182।।

पूर्वश्रुतिरतो हस्ती दुर्दुर[29]श्चेतरोऽभवत् ।
तस्याक्रान्तः स पादेन चकाराशुविमोचनम् ।।183।।
वर्षाभूत्वं पुनः प्राप्तः शुष्के सरसि भक्षितः ।
काकैः कुर्कुटतां[30] प्राप्तो मार्जारत्वं तु हस्त्यसौ ।।184।।
कुलङ्करचरो जन्मत्रितयं कुर्कुटोऽभवत् ।
भक्षितो द्विजपूर्वेण मार्जारेण त्रिजन्मना ।।185।।
[31]राजद्विजचरौ मत्स्यशिशुमारत्वमागतौ ।
बद्धौ जालेन कैवर्तैः कुठारेणाऽऽहतौ मृतौ ।।186।।
शिशुमारस्तयोरुल्काबह्वाशतनयोऽभवत् ।
विनोदो रमणो मत्स्यो द्विजो राजगृहे तयोः ।।187।।
निस्वत्वेनाक्षरत्वे च सति[32] जन्तुर्द्विपात्पशुः ।
रमणः सम्प्रधार्यैवं वेदार्थी निःसृतो गृहात् ।।188।।
क्षोणीं पर्यटता तेन[33] गुरुवेश्मसु शिक्षिताः ।
चत्वारः साङ्गका वेदाः प्रस्थितश्च पुनर्गृहम् ।।189।।
मागधं नगरं प्राप्तो भ्रातृदर्शनलालसः ।
भास्करेऽस्तङ्गते चाऽसौ व्योम्नि मेघान्धकारिते ।।190।।
नगरस्य बहिर्यक्षनिलये वासमाश्रितः ।
जीर्णोद्यानस्य मध्यस्थे तत्र चेदं[34] प्रवर्तते ।।191।।
विनोदस्याङ्गना तस्य समिध्याख्या कुशीलिका[35] ।
अशोकदत्तसङ्केतं यक्षालयं समागता ।।192।।
अशोकदत्तको मार्गे गृहीतो दण्डपाशिकैः ।
विनोदोऽपि गृहीत्वासिं भार्ययाऽनुपदमागतः ।।193।।
सद्भावमन्त्रणं श्रुत्वा समिधा क्रोधसङ्गिना ।
सायकेन विनोदेन रमणः प्रासुकीकृतः ।।194।।
विनोदो दयितायुक्तो हृष्टः प्रच्छन्नपापकः ।
गृहङ्गतः पुनस्तौ च संसारपुरमाटत[36] ।।195।।

महिषत्वमितोऽरण्ये विनोदो रमणः पुनः।
ऋक्षो बभूव निश्चक्षुर्दग्धौ शालवने च तौ।।196।।
जातौ गिरिवने व्याघ्रौ मृतौ च हरिणौ पुनः।
तयोर्बन्धुजनस्त्रासाद्दिशो जातौ यथायथम्।।197।।
गृहीतौ जीविताावेतौ निषादैः कान्तलोचनौ।[37]
स्वयंभूतिरथो राजा[38] विमलं वन्दितुङ्गतः।।198।।
सुराऽसुरैः समं नत्वा जिनेन्द्रं समहर्द्धिकः।
प्रत्यागच्छन् ददर्शे तौ स्थापितौ च जिनालये।।199।।
संयुतास्तत्र[39] पश्यन्तौ भक्षयन्तौ यथेप्सितम्।
अन्नं राजकुले प्राप्तौ हरिणौ परमां धृतिम्।।200।।
आयुष्येकः परिक्षीणे लब्धमृत्युः समाधिना।
सुरलोकं मृतोऽन्योऽपि तिर्यक्षु पुनरभ्रमत्।।201।।
ततः कथमपि प्राप कर्मयोगान्मनुष्यताम्।
विनोदचरसारङ्गश्च[40] स्वप्ने राज्यमिवोदितम्।।202।।
द्वीपेऽस्मिन् भरते नाम्ना कांपिल्यनगरे धनी।
द्वाविंशतिप्रमाणाभिर्हेमकोटिभिरूर्जितः।।203।।
अस्यैव धनदाह्वस्य वणिजो रमणोवरः[41]।
च्युतो भूषणनामाऽभूद्वारुण्यां तनयः शुभः।।204।।
नैमित्तेनाऽयमुद्दिष्टं प्रव्रजिष्यत्ययं ध्रुवम्[42]।
श्रुत्वैवं धनदो लोकादभूदुद्विग्नमानसः।।205।।
सत्पुत्रप्रेमसक्तेन तेन वेश्मनि स्थापितम्।
योग्यं सर्वक्रियायोगे यत्र तिष्ठति भूषणः।।206।।
नैक्षिष्ट भानुमुद्यन्तं नाऽस्तं जातं न चोडुतम्[43]।
स्वप्नेऽप्यसौ गतो भूमिं गृहशैलस्य पञ्चमी।।207।।
मनोरथशतैर्लब्धः पुत्रोऽसावेक एव हि।
पूर्वस्नेहानुबन्धेन दयितो जीवितादपि।।208।।

धनदः सोदरः पूर्वं भूषणस्य पिताऽभवत्।
विचित्रं खलु संसारे प्राणिनां वद[44] चेष्टितम्।।209।।

तावत्क्षपाक्षये श्रुत्वा देवदुन्दुभिनिःस्वनम्।
दृष्ट्वा देवागमं श्रुत्वा शब्दं चाऽभूद्विबुद्धवान्।।210।।

स्वभावान्मृदुचेतस्कः सद्धर्माचारतत्परः।
महाप्रमोदसम्पन्नः करकुड्मलमस्तकः।।211।।1

श्रीधरस्य मुनीन्द्रस्य वन्दनार्थं त्वराऽन्वितः।
सोपानेऽवतरन् दष्टः[45] सोऽहिना तनुमत्यजत्।।212।।

माहेन्द्रस्वर्गमारूढश्च्युतो द्वीपे च पुष्करे।
चन्द्रादित्यपुरे जातः प्रकाशयशसः सुतः।।213।।

माताऽस्य माधवीत्यासीत् सजगद्युतिसञ्ज्ञितः।
राजलक्ष्मीं परिप्राप्ताः[46] परमां यौवनोदये।।214।।

संसारात्परमं भीरुरसौ स्थविरमंत्रिभिः।
उपदेशं प्रयच्छद्भिः राज्यं कृच्छ्रेण कार्यते।।215।।

कुलक्रमागतं वत्स राज्यं पालय सुन्दरम्।
पालितेऽस्मिन्समस्तेयं सुखिनी जायते प्रजा।।216।।

तपोधनात्स राज्यस्थः साधून्संतर्प्य सङ्गतम्।
गत्वा देवकुरुं काले कल्पमैशानमाश्रितः।।217।।

पल्योपमा बहूंस्तत्र देवीजनसमावृतः।
नानारूपधरो भोगान् बुभुजे परमद्युतिम्।।218।।

च्युतो जम्बूमतिद्वीपे विदेहे मेरुपश्चिमे।
रत्नबालुपुरे रम्भा महिषी बलचक्रिणः।।219।।

बभूव तनयस्तस्य सर्वलोकसुखप्रदः।
अभिरामोङ्गनामाभ्यां महागुणसमुच्चयः।।220।।

महावैराग्यसम्पन्नं प्रव्रज्याभिमुखञ्च तम्।
ऐश्वर्यं यो जयच्चक्री कृतविवाहकं बलात्।।221।।

त्रीणिनारीसहस्राणि सततं गुणवर्त्तिनम् ।
लालयन्ति स्म यत्नेन वारिस्थमिव वारणम् ।।222।।
गृहस्थेन कुमारेण कृतं घोरतरं तपः ।
षष्टिसहस्रवर्षाणि कञ्जिकाहारसङ्गतैः[47]।।223।।
मृत्वा समाधिना प्राप्तो बह्मोत्तरं सुरालयम्।
नाना भोगविनोदेन तत्र तिष्ठति सोत्सवः।।224।।
असौ धनदपूर्वेस्तु जीवः संसृत्य योनिषु।
पोदने नगरे यज्ञे जम्बूभरतदक्षिणे।।225।।
शकुनाऽग्निमुखात्तस्य[48] माहनौ[49] जन्मकारणम्।
नाम्ना मृदुमतिश्चाऽसौ व्यर्थेन परिभाषितः।।226।।
द्यूताविनयसक्तात्मा[50] रथ्यारेणुसमुत्थितः ।
नानाऽपराधविद्वेष्यः[51] स बभूव दुरीहितः।।227।।
लोकोपालम्भखिन्नाभ्यां[52] पितृभ्यां स निराकृतः।
पर्यट्य धरणीं प्राप यौवनो पौदनं पुनः।।228।।
प्रविष्टो भवनं किञ्चिज्जलं पीतुमयाचत्[53]।
[54]अददान्माहनी तस्मै जलं निपतदश्रुका।।229।।
सुशीतलाम्बुतृप्तात्मा पपृच्छाऽसौ कुतस्त्वया।
रुद्यते[55] करुणायुक्तमित्युक्ते माहनी जगौ।।230।।
भद्र त्वदाकृति बालो मया पतिसमेतया।
करुणोज्झितया[56] गेहात्पुत्रकः हा निराकृतः।।231।।
स त्वया भ्राम्यता देशे यदि स्यादीक्षितः क्वचित्।
नीलोत्पलप्रतीकाशस्ततो वेदय तद्गतम्।।232।।
ततोऽसावश्रुवानूचे[57] सवित्रि रुदितं त्यज।
समाश्वसिहि सोऽहं[58] ते चिरं दुलक्षकः सुतः।।233।।
शकुनाग्निमुखस्तातः पुत्रप्राप्तिमहोत्सवम् ।
परिप्राप्तः सुखं तस्थौ तत्क्षणप्रस्नुतस्तनी।।234।।

तेजस्वी सुन्दरो धीमान्नानाशास्त्रविशारदः ।
सर्वस्त्रीदृगमनोहारी धूर्तानां मस्तके स्थितः ।।235 ।।
दुर्व्यसने सदा जेता सुविदग्धः कलालयः[59] ।
कामोपभोगसक्तात्मा रेमे मृदुमतिः पुरे ।।236 ।।
वसन्तडमरानामा गणिकानामनुत्तमा[60] ।
द्वितीयाऽमरनारीव तस्याऽभूत्परमेप्सिता ।।237 ।।
पितरौ बन्धुभिः सार्द्धं दारिद्र्यात्तेन मोचितौ ।
राजलीलां परिप्राप्तौ लब्धसर्वसमीहितौ ।।238 ।।
शशाङ्कनगरे राजगृहं चौर्यरतोऽन्यदा ।
विष्टो मृदुमतिः शब्दमशृणोन्नन्दिवर्द्धनम् ।।239 ।।[61]
शशाङ्कमुखसञ्ज्ञस्य गुरोश्च रणमूलतः ।
मयाऽद्य परमो धर्मः श्रुतः शिवसुखप्रदः ।।240 ।।
विषया विषवद्देवि परिणामे सुदारुणाः ।
तस्माद्व्रजाम्यहं दीक्षां न शोकं कर्तुमर्हसि ।।241 ।।
शिक्षयन्तं नृपं देवीमेवं श्रीनन्दिवर्द्धनम् ।
श्रुत्वा मृदुमतिर्बोधिं निर्मलां स समाश्रितः ।।242 ।।
संसारभावनिर्विग्नः सुसाधोश्च वरश्रुतेः ।
पादमूलेऽभजद्दीक्षां सर्वग्रन्थविमोचनाम् ।।243 ।।
अथ दुर्गगिरे मूर्द्ध्नि नाम्ना गुणनिधिर्मुनिः ।
चकार चतुरो मासान् वर्षाकालान्तमुक्तवान् ।।244 ।।
सुरासुरस्तुतो धीरः समाप्तनियमोऽभवत् ।
उत्पपात् मुनिः क्वापि विधिना गगनायनः ।।245 ।।
अथ मृदुमतिर्भिक्षाकरणार्थं सुचेष्टितः ।
आलोकनगरं प्राप्तो युगमात्राहितेक्षणः ।।246 ।।
ददर्श सम्भ्रमेणैतं पौरलोकः सपार्थिवः ।
शैलाग्रेऽवस्थितः सोऽयमिति ज्ञात्वा सुभक्तिकः ।।247 ।।

भक्ष्यैर्बहुप्रकारैस्तं तर्पयन्ति स्म पूजितम् ।
जिह्वेन्द्रियरतो मायां स च भेजे कुकर्मतः ।।248।।

स त्वं यः पर्वतस्याग्रे यतिनाथो व्यवस्थितः ।
वन्दितस्त्रिदशैरेवमुक्तः स न मयास्थिर: ।।249।।

अज्ञानादभिमानेन दुःखबीजमुपार्जितम् ।
स्वादगौरवसक्तेन तेनेदं स्वस्य वञ्चनम्[62] ।।250।।

एतत्तेन गुरोरग्रे न मायाशल्यमुद्धृतम् ।
दुःखभाजनतां तेन सम्प्राप्तः परमामिमाम् ।।251।।

ततो मृदुमतिः कालं कृत्वा तं कल्पमाश्रितः ।
अभिरामोऽमरो यत्र वर्तते महिमान्वितः ।।252।।

पूर्वकर्मानुभावेन तयोरतिनिरन्तरा ।
त्रिविष्टपेऽभवत्प्रीतिः परमर्द्धिसमेतयोः ।।253।।

अभिरामः सुरश्च्युत्वाऽभूत्त्वं दशरथात्मजः ।
भरताख्यः शिवं यासि मृदुमतिरभूद्गजः ।।254।।

मायातपःफलेनाऽत्र सम्प्राप्तो गजयोनिकम् ।
आलोक्य भरतं भूपं जातिस्मरोऽभवद्गजः ।।255।।

स्वस्य भवान्तरान् श्रुत्वा सन्तुष्टो भरतेश्वरः ।
उत्थाय केवलिपादौ नत्वा दीक्षां प्रयाचतः ।।256।।

जगाद भरतं पद्मः कथं किं ब्रूषि बान्धवः ।
तातेन राज्यभारस्ते दत्तोऽस्ति स्नेहपूर्वतः ।।257।।

कस्मै दत्वा च तद्राज्यं दीक्षां ग्रहीतुमिच्छसि ।
तातस्य वचनं कार्यं मया त्वया महीतले ।।258।।

चक्ररत्नमिदं वीर त्वदीयं प्रतिपालय ।
अस्माभिः साधिता भूमिः केवलं तव हेतवे ।।259।।

वयं समागता अत्र तव दर्शनलालसाः ।
त्वं त्वस्मारकमुदासीस्त्वं कृत्वा निर्गन्तुमुद्यतः ।।260।।

पित्रा दत्तं कुरु राज्यं त्रिखण्डसम्भवं परम्।
अस्मद्भ्यो यच्छ ग्रामादिपोषणञ्च यथोचितम्।।261।।
दशरथे गते नाथे पुत्र त्वमपि गच्छसि।
भर्तृपुत्रवियोगेन केकामती मरिष्यति।।262।।
इत्यादिबहुभिर्वाक्यैः पद्मेनाऽसौ प्रबोधितः।
ततश्च भरतः प्राह विनयं शृणु राघव।।263।।
एतावत्कालपर्यन्तं पितुर्वाक्यं मया कृतम्।
अद्यप्रभृति युष्मद्भिः पालनीयं नृपास्पदम्।।264।।
इत्युक्त्वा केवलिपार्श्वे सहस्रनृपसंयुतः।
जग्राह भरतो दीक्षां मुक्तिसाधनहेतवे।।265।।
सकाशे पृथिवीमत्या: केकामती तदाऽभवत्।
त्रिंशत्सुवधूटीभिः सहार्यिका सुनिर्मला।।266।।
गजोऽपि श्रावकाचारं गृहीत्वा च तपो वरम्।
करोति शुभचित्तेन सुध्यानं श्रीजिनेशिनः।।267।।
चत्वारि वर्षपर्यन्तं कृत्वा घोरतपो गजः।
मृत्वा समाधिना प्राप्तो बह्मोत्तरं सुरास्पदम्।।268।।
केवलज्ञानमुत्पाद्य भरतोऽपि शिवङ्गतः।
अन्येऽपि मुनयो ध्यानात् गतिं प्राप्ता यथायथम्।।269।।
भरतस्य कथां रम्यां शृण्वन्ति ये निरन्तरम्।
ते लभन्ते शिवस्थानं रागद्वेषविवर्जितम्।।270।।
कालेऽस्मिन् प्रथमे जिनेन्द्रवृषभे जाते यतीनां पतौ
चन्द्रादित्यकुमारकौ शुभतरौ जातौ विनोदान्मुनी।
निःशक्त्या परिभज्य संयमपरं भ्रान्त्वा चिरं संसृतौ
दन्ती तत्र शशी रविश्च भरतो भूत्वा गतिं तौ गतौ।।271।।
अनुपमचरितं गुणगणगुणितं ये शृण्वन्ति भव्यजनाः।
नृपपदमनुपमसुखं प्रतिदिनं भुक्त्वा ते लभन्ति मोक्षपदम्।।272।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते रामसीतासङ्गमं ततोऽयोध्यापुरागमनं भरतदीक्षाग्रहणं शिवप्राप्तिः त्रिलोक्यडम्बरगजस्वर्गप्राप्तिवर्णनो नाम सप्तविंशतितमोऽधिकारः।।27।।

❖❖❖

1. विलोक्यं इति ग प्रतौ
2. एवं चसूसमूहेन राजमार्गे स गच्छति ।। इति ख/ग प्रतौ
3. अशोककानेन दृष्ट्वा रामं सखीजनावृता ।
पद्मस्यानुज्ञया सीता देवी तत्र समागता ।।9।। इति ख/ग प्रतौ
4. चमू समूहेन दृष्ट्वा धूलिधूसरदेहिकाम् । इति क प्रतौ
5. नर्तका गीतमङ्गलैः इति क प्रतौ, निर्घोषैर्नर्त्तकर्गीतमङ्गलैः इति ख प्रतौ
6. मर्द्दनि इति ग प्रतौ
7. पराधाय इति ग प्रतौ
8. पूर्वं राज्ये इति क प्रतौ, भूता इति ग प्रतौ
9. एषः श्लोकः ख प्रतौ अनुपलब्धते ।
10. एषः श्लोकः ख प्रतौ अनुपलब्धते ।
11. सीता इति ख प्रतौ
12. एषः श्लोकः क प्रतौ अनुपलब्धते ।
13. विस्मृतास्तास्त इति क/ख प्रतौ
14. दुरकेन इति ग प्रतौ
15. खेचरै शिल्पिभी इति ख प्रतौ
16. ताभी इति क/ख प्रतौ
17. रघुसुता सुता इति ग प्रतौ
18. आगता इति ग प्रतौ
19. ससान्तरसमागतः इति क/ग प्रतौ
20. करुणाकरे इति क प्रतौ
21. विश्वाग्नेरपि कुण्डयां इति ख प्रतौ
22. कदा गत्वा इति ग प्रतौ
23. श्रावण्यं इति त्रयौ प्रतौ किन्तु मुनिदीक्षायै उद्यतार्थे श्रामण्यं पद स्यात् ।
24. वसुपर्वतकश्चयुत्वा इति ख प्रतौ
25. तमसो हयदेवो च इति ख प्रतौ
26. तत्त्वमाचरः इति क प्रतौ, तत्रमाचर इति ग प्रतौ

27. मा इति ख प्रतौ
28. कालप्राप्तो र्वभूतां इति ख प्रतौ
29. दुर्दुर इति क प्रतौ
30. कुर्क्कुट इति त्रयौ प्रतौ किन्तु कुक्कुटः भवेत्।
31. राजन् इति ख प्रतौ
32. सीत इति ख प्रतौ
33. पर्यटतोनेन इति क प्रतौ, पर्यटतो तेन इति ख प्रतौ
34. वेदं इति क/ख प्रतौ
35. कुत्सशीलिका इति क प्रतौ, कुंशालिका इति ग प्रतौ
36. मटतु: इति क प्रतौ
37. जीवन्तावेव तावेतौ निषादै: कान्तलोचनौ: इति ख/ग प्रतौ
38. जाता इति ख प्रतौ
39. संयुतौस्तत्र इति क प्रतौ, संयुतास्तत्र इति ग प्रतौ
40. विनोद च रकुरंगश्च इति क प्रतौ
41. रमणो चर: इति क प्रतौ
42. प्रव्रजित्यक्षयं इति क/ख प्रतौ
43. चोद्रुतम् इति ख प्रतौ, चोद्रुपम् इति ग प्रतौ।
44. वाद इति ख/ग प्रतौ
45. द्दष्टः इति त्रयौ प्रतौ परन्तु दष्टः इति भवेत्।
46. पारं प्राप्ता: इति क प्रतौ
47. कंजिकाहारसंगत: इति क प्रतौ
48. शकुमाग्निमुखाख्यस्य इति क प्रतौ, शकुनाग्निमुखा कृष्ण इति ग प्रतौ
49. माहिन्या इति क प्रतौ, महीन्यो इति ख प्रतौ
50. द्यूतविसनशक्तात्मा इति क/ग प्रतौ
51. नाना पराद्धविद्वेष्य इति क/ख प्रतौ
52. कालोषालंभ खिन्नाभ्यां इति ख प्रतौ , लोकोपालं न खिन्नाभ्यां इति ग प्रतौ
53. अयाचत: इति क प्रतौ, अयाचित: इति ग प्रतौ
54. आददान् इति ख/ग प्रतौ

55. रुद्यन्ते इति क/ग प्रतौ
56. करुणोज्जितयो इति क प्रतौ, करुणोप्सितयो इति ग प्रतौ
57. ततोसावश्रुत्वानुचे इति क प्रतौ, ततोसावश्रुवामूचे इति ग प्रतौ
58. साहं इति क/ख प्रतौ
59. कुलालः इति ख प्रतौ
60. गणिकानाममुत्तमा इति ख प्रतौ
61. एषः श्लोकः ख प्रतौ अनुपलब्धः।
62. वंदनं इति ख प्रतौ , बंधनं इति ग प्रतौ

❖❖❖

अष्टाविंशतितमोऽधिकारः

भरते दीक्षिते रामः किञ्चिच्छोकसमन्वितः।
समागतो गृहं स्वस्य कुटुम्बैः सकलैर्वृतः।।1।।

अखिलैः खेचरैस्तत्र कृत्वा परं निमन्त्रणम्।
लक्ष्मीधराय साम्राज्यपट्टबद्धः कृतो वरः।।2।।

त्रिखण्डनाथकृष्णोऽयं बलिभद्रोऽयमुत्तमः।
इत्युक्त्वा कलशर्नीरैः स्नापितौ तौ नराधिपौ।।3।।

सपद्मलक्ष्मणस्याऽस्य मस्तकोपरि संधृतम्।
आतपत्रं शशाङ्काभं खेचरैः प्राप्तसंमदैः।।4।।

जानकीविशल्ये देव्यौ पट्टदेव्यौ कृते तयोः।
रामलक्ष्मणयोः रम्ये सर्वभोगस्य हेतवे।।5।।

हेमसिंहासने स्थित्वा रामेण बन्धुना समम्।
विभीषणाय साम्राज्यं रक्षो द्वीपस्य चार्पितम्।।6।।

सुग्रीवाय च कैष्कन्धं दत्तं साम्राज्यमुत्तमम्।
हनूरुहगिरे राज्यं संदत्तं श्रीहनूमते।।7।।

अलङ्कारपुरस्वामी विराधितः कृतस्तदा।
किष्कुपुरे कृतौ वीरौ नलनीलौ नराधिपौ।।8।।

रथनूपुरसञ्ज्ञेऽथ भामण्डलप्रभुः कृतः।
देवगीतपुरे रम्ये रत्नजटी नृपः कृतः।।9।।

शेषास्तत्र यथायोग्ये स्थाने संस्थापिताः नृपाः।
तदा जगाद पद्माभः शत्रुघ्नं भ्रातरं मुदा।।10।।

तव यद्रोच्यते पत्नं तद्गृहाणात्र बान्धव।
अर्द्धभागमयोध्यायाः पोदनं वाथ हस्तिनम्।।11।।

वाराणसीं च कौशाम्बीं पाटलि वा शिवं पुरम्।
ततो जगाद शत्रुघ्नो देहि मे मथुरां पुरम्।।12।।

पुनर्जगाद पद्माभस्तत्रास्ति मधुभूपतिः।
जामाता स दशास्यस्याऽस्माकं महत्तरो रिपुः।।13।।

त्रिशूलरत्नमस्यास्ति नागदत्तं सुदारुणम्।
सार्द्धं तेन रणे कोऽपि रणं कर्तुं न शक्तिवान्।।14।।
लक्ष्मीधरोऽपि तं जेतुं सदा शङ्कति चेतसि।
स कथं भवता ग्राह्यो हरिवंशस्य भूषणम्।।15।।
तच्छुत्वोचे च शत्रुघ्नस्तदेव गृह्यते मया।
यदि न हन्मि तं शत्रुं शत्रुघ्नो न भवाम्यहम्।।16।।
ततो रामेण तत्तस्मै संदत्तं मथुरापुरम्।
मातृणां चरणौ नत्वा चतुर्बलेन निर्गतः।।17।।
लक्ष्मणेन तदा तस्मै चाब्धिवर्तं[1] शरासनम्।
दत्तं कृतान्तवक्राख्यः सेनापतिः समं कृतः।।18।।
पुण्यभागानदीतीरं प्राप्तं क्रमेण तद्बलम्।
निवेशितम् तदा तत्र चोभयोः सिन्धुदेशयोः[2]।।19।।
मथुराञ्च रमत्र्योऽत्र गत्वागत्य निवेदति।
सभास्थितञ्च शत्रुघ्नं मन्त्रिवर्गसमन्वितम्।।20।।
भो देव मथुरायाश्च पूर्वदिक् नन्दने वने।
मधुराजो गतस्तत्र क्रीडां कर्तुं दिनानि षट्।।21।।
सर्वकुटुम्बसंयुक्तो बहुक्षत्रियसंवृत्तः।
एकचित्तो विनोदान्स[3] करोति विकलात्मकः।।22।।
योजनानि पुरा त्रीणि दूरमस्ति च तद्वनम्।
अस्ति धनजनैः पूर्णं पुरं क्षत्रियवर्जितम्।।23।।
तच्छुत्वा निर्गतो वीरो रात्रौ सेनासमन्वितः।
योजनानि शतान्येव गतोऽसौ मथुरापुरम्।।24।।
यथा कोऽपि न जानाति तथा रात्रौ पुरं वरम्।
स्वीकृतं तद्वनैः पूर्णं प्रजादिभिश्च सम्भृतम्।।25।।
शस्त्रागारं धनागारं सर्वस्वञ्च मधोर्गृहम्।
गृहीत्वा तत्र शत्रुघ्नो नृपो भूत्वा स्थितः सुखम्।।26।।

मथुरायामरिघ्नस्य शासनं वर्त्तितं परम्।
सुभटैः परमाः तत्र जयभेर्यश्च ताडिताः।।27।।

प्रभाते तद्वने गत्वा केनाप्यऽत्र निवेदितम्।
मधवे सर्व वृतान्तः क्रीडासक्ताय धर्मिणे।।28।।

शत्रुघ्नेन पुरं सर्वं श्रुत्वाऽथ स्वीकृतं तदा।
महाकोपेन दीप्तोऽसौ वेगात्तत्र समागतः।।29।।

शत्रुघ्नाः सुभटा वेगादाच्छाद्य नगरस्य च।
द्वाराणि च स्वयं योद्धुमुद्यता बलपूरिताः।।30।।

शूलरत्नविमुक्तेन मधुना वेष्टितं पुरम्।
बहिर्देशस्थितेनाऽपि समारब्धं महद्रणम्।।31।।

किञ्चिद् बलञ्च शत्रुघ्नं युद्धार्थञ्च बहिर्पुरम्।
निर्गतं शस्त्रसंयुक्तं गजवाजिरथैर्युतम्।।32।।

उभयोर्दलयोस्तत्र रणं जातं सुदारुणम्।
मधोर्दलं तदा भग्नं शत्रुघ्नबलताडितम्।।33।।

तद् दृष्ट्वा मधुपुत्रोऽथ लवणार्णावनामकः।
स्वयं योद्धुं समायातः क्रोधपूरितमानसः।।34।।

तेन हतञ्च शत्रुघ्नं बलं भग्नं पलायितम्।
कृतान्तवक्रसेनानी तद् दृष्ट्वा योद्धुमागतः।।35।।

अन्योऽन्यञ्च तयोर्युद्धं सेनापतिकुमारयोः।
जातं प्राणिवधकारि भीरूणाञ्च भयप्रदम्।।36।।

तदा कृतान्तवक्रेण लवणस्ताडितो हृदि।
गदया पतितो भूमौ तत्क्षणे गतजीवितः।।37।।

पतितं लवणं दृष्ट्वा कुमारं प्राणवर्जितम्।
मधुराजा स्वयं योद्धुमुद्धतः कोपसंयुतः।।38।।

तेन सम्बाधितो वीरः सेनापतिः पलायितः।
उत्थितोऽसौ तदा राजा शत्रुघ्नः सेनयान्वितः।।39।।

मधुशत्रुघ्नयोस्तत्र सञ्जातं रणमुद्धतम् ।
शत्रुघ्नेन तदा बाणैः छेदछिन्नो मधु कृतः ।।40।।

तदा वैराग्यभावेन भावदीक्षां गृहीतवान् ।
मधुर्मृत्वा सुरो जातः स्वर्गे सनत्कुमारके ।।41।।

शत्रुघ्नोऽपि ततस्तस्य देहं संस्कृत्य वह्निना ।
पूजित्वा चरणौ पश्चात्प्रविष्टः पुरमुत्तमम् ।।42।।

मधोः सद्मसभास्थानमुपविष्टो नरेश्वरः ।
शत्रुघ्नं शासनं तस्मिन्सर्वदेशे प्रवर्त्तितम् ।।43।।

शस्त्रागारे स्थितं रम्यममोघं शूलरत्नकम् ।
व्यर्थीभूतं सुपर्णस्य स्थानङ्गतमधस्तले ।।44।।

सुपर्णः प्राह तद् दृष्ट्वा मधुं त्यक्त्वा कथं त्वया ।
कृतमागमनं चात्र कृत्वा विश्वासभञ्जनम् ।।45।।

पूर्वजन्मनि मे येन संदत्ता स्वस्य वल्लभा ।
स च कथं त्वया त्यक्तः शत्रुमुखे निरादरात् ।।46।।

ततो जगाद शूलस्य रक्षकः सुपर्णं प्रति ।
शत्रुघ्नेन सुदण्डेन मधुराजो निपातितः ।।47।।

तच्छ्रुत्वाऽथ सुपर्णाख्यः क्रोधपूरितमानसः ।
वेगात्तत्र समागच्छन् शत्रुघ्नं मारितुं तदा ।।48।।

सुमन्त्रिस्तं सुरं प्रोचे कुत्र गच्छसि देवराट् ।
येन हतो मधुर्भूपः स कथं हन्यते त्वया ।।49।।

राक्षसस्य महद्युद्धे किं न श्रुता कथा त्वया ।
विशल्यया यया शक्तिर्व्यर्थीकृता च रावणी ।।50।।

सैवानीता विवाहेन येन तस्यैव बान्धवः ।
शत्रुघ्नोऽयं त्वया हन्तुं शक्यते न कदापि सः ।।51।।

इत्युक्तेऽप्यतिकोपेन संयुक्तश्च सुपर्णकः ।
दर्शनार्थं मधोश्चित्तां मथुरायां समागतः ।।52।।

प्रजा सात्र सुखीभूतां दृष्ट्वानन्देन पूरिताः।
प्रकोपेन सुपर्णेन कुरोगास्तत्र प्रेरिताः।।53।।

तै रोगैः सकलो देशः पीडितः प्राणनाशकैः।
ततो भीताः प्रजास्तस्माद्यत्र कुत्र पलायिताः।।54।।

उद्वसं विषयं दृष्ट्वा शत्रुघ्नश्चित्तव्याकुलः।
अयोध्यायां समायातः स्वस्य सेनासमन्वितः।।55।।

रात्रौ न लभते निद्रां सुभुक्तिञ्च कदाचन।
मथुरायां गतश्चित्तो भीतो हास्याज्जनस्य सः।।56।।

श्रेणिकः प्रोचु[4] भो स्वामिन् शत्रुघ्नेन कथं तदा।
सर्वान् देशान् परित्यज्य मथुरैव प्रयाचिता।।57।।

गौतमोऽसौ ततोऽवोचच्छृणु तस्य भवान्तरान्।
पोदनाद्वृषभश्चैको[5] मथुरां श्रेष्ठिना पुरीम्।।58।।

समानीतोऽतिभारेण कटीभग्नो मृतस्ततः।
सञ्जातो महिषस्तत्र षट्वारान् जलवाहकः।।59।।

कथमपि मनुष्यत्वं प्राप्तो नीचकुलेषु सः।
पञ्चवारान् मृतो दुःखात्तत्रैव धनवर्जितः।।60।।

विप्रो जातो मथुरायां केनापि पुण्यकर्मणा।
कुलधराऽभिधो रूपी सदाचारपराङ्मुखः।।61।।

तत्र चन्द्रमुखो राजा ललिता तस्य भामिनी।
गते भर्तरि दूरे सा कामबाणेन पीडिता।।62।।

दृष्ट्वा कुलधरं विप्रं तयाऽऽनीतः स्ववेश्मनि।
एकासने स्थितौ यावत्तावद्राजा समागतः।।63।।

समागतं नृपं ज्ञात्वा कपटञ्च तया कृतम्।
पश्य कोऽयं च मे मञ्चे स्थितोऽसि धूर्तमानसः।।64।।

बध्वा नृपाज्ञया गाढं सुभटैः करयुग्मकम्।
नीतो वने वधार्थं स तत्र दृष्टो मुनीशिना।।65।।

मुनिर्जगाद तं विप्रं यदि ग्रहसि संयमम्।
त्वां तदा मोचयिष्यामि कथित्वा नृपपुङ्गवम्।।66।।
तथाऽस्त्विति द्विजः प्राह तदा तेन मुनीशिना।
मोचितोऽसौ च भूपालाद्विप्रो मुनिरभूत्तदा।।67।।
सुरो[6] कृतुविमानेऽभूत्कृत्वा घोरतरं तपः।
मथुरायां महत् वित्तश्चन्द्रभद्र इति प्रभुः।।68।।
तस्य भार्या धरा नाम्ना त्रयस्तस्याः सहोदराः।
सूर्याऽब्धियमुनाशब्दैर्देवान्तैर्नामभिः स्मृताः।।69।।
शक्रचन्द्रार्कश्रीमत्स्यप्रभुहेमसुदादिकाः।
मुखान्तास्तनयास्तस्या अष्टौ विज्ञानसंयुताः।।70।।
चन्द्रभद्रस्य भार्याऽस्ति द्वितीया कनकप्रभा।
आगत्यर्तु विमानात्स तस्यां जातोऽचलाभिधः।।71।।
अथाऽन्यः कश्चिदङ्काख्यः कृत्वा धर्माऽनुमोदनम्।
श्रावस्त्यामङ्गिकागर्भे कम्पेनाऽपाभिधोऽभवत्।।72।।
कबाडजीविना तेन कपेनाऽविनयान्वितः।
अपो निर्घाटितो गेहादुद्राव भयदुःखितः।।73।।
अथाऽचलकुमारोऽसौ नितान्तं दयितः पितुः।
धराया भ्रातृभिस्तैश्च मुखान्तैरष्टभिः सुतैः।।74।।
ईर्ष्यमाणैरहो हन्तुं मात्रा ज्ञात्वा पलायितः।
महता कण्टकेनाऽसौ[7] ताडितस्तिलके वने[8]।।75।।
गृहीतदारुभारेण तेनापेनाऽथ[9] वीक्षितः।
अतिकष्टं क्वणत्खेदादचलो निश्चलस्थितः।।76।।
दारुभारं परित्यज्य तेन तस्याऽसिकन्यया[10]।
आकृष्टः कण्टको[11] दत्वा कटकञ्चेति[12] भाषितः।।77।।
यदि नामाऽचलं[13] किञ्चिच्छ्रुणुयाल्लोकविश्रुतम्।
त्वया तस्य ततोऽभ्याशं गन्तव्यं संशयोज्झितम्।।78।।

अपो यथोचितं यातो राजपुत्रोऽपि दुःखवान्।
कौशाम्बीबाह्यमुद्देशं प्राप्तः सत्वसमुन्नतः।।79।।

तत्रेन्द्रदत्तनामानं कोशावत्ससमुद्भवम्।
ययौ कलकलशब्दाद्धन्ध्यमानं वरूलिकैः[14]।।80।।

विजित्य मोचितस्तेन लब्धपूजोऽथ भूभृता।
प्रवेश्य नगरीमिन्द्रदत्ताख्यां[15] लम्भितां सुताम्।।81।।

क्रमेण चाऽनुभावेन चारुणा पूर्वकर्मणा[16]।
अचलाख्य इति ख्यातो वीरोऽसौ पार्थिवोऽभवत्।।82।।

अङ्गाद्यान् विषयान् जित्वा प्रतापी मथुराश्रितः।
बाह्योद्देशे कृतावासः स्थितः कटकसंयुतः।।83।।

चन्द्रप्रभनृपपुत्रोऽचलोऽयमिति भाषितैः।
सामन्ताः सकलास्तस्य भिन्नास्तेनार्थसङ्गतैः[17]।।84।।

एकाकी चन्द्रभद्रश्च विषादं परमं भजन्।
शालान्[18] सम्प्रेषयद्देवं शब्दान्तान् सन्धिवाञ्छया।।85।।

दृष्ट्वा तं ते परिज्ञाय विलक्षास्त्रा समागताः।
अदृष्टसेवकाः साकं धरायास्तनयैः कृताः।।86।।

अचलस्य समं मात्रा सञ्जातः परमोत्सवः।
राज्यञ्च प्रणताऽशेषराजकं गुणपूजितम्।।87।।

अन्यदा नटरङ्गस्य मध्ये तमपमागतम्।
हन्यमानं प्रतिहारैर्दृष्ट्वाऽभिज्ञातवान्नृपः।।88।।

तस्मै संयुक्तमासाद्य श्रावस्त्यां जन्मभूमिकाम्।
कृताऽपरङ्गसञ्ज्ञाय ददावचलभूपतिः।।89।।

तावुद्यानं गतौ क्रीडां विधातुं पुरुसम्पदौ।
यशः समुद्रमाचार्यं दृष्ट्वा नैर्ग्रन्थ्यमाश्रितौ।।90।।

संयमं परमं कृत्वा सम्यग्दर्शनभावितौ।
मृतौ समाधिना जातौ देवेशौ कमलोत्तरे।।91।।

ततश्च्युतः समानोऽसावचलः पुण्यशेषतः ।
सुप्रजा लोचनानन्दः शत्रुघ्नोऽयमभून्नृपः ।।92।।
परिच्युतापरङ्गोऽपि पुण्यशेषादभूदसौ ।
कृतान्तवक्रविख्यातः सेनायाः पतिरूर्जितः ।।93।।
अनेकजन्मनि पूर्वं यतोऽवतरितो नृपः ।
शत्रुघ्नोऽयं ततः प्रीतिर्मथुरायां प्रवर्तते ।।94।।
वक्ष्येऽथ प्रकृतं राजन् शृणु नागपुरे शुभम् ।
राजा श्रीनन्दनस्तस्य श्रीधरा नामवल्लभा ।।95।।
सप्तपुत्रास्तयो रम्याः कलाविज्ञानभूषिताः ।
आद्यो विबुधमन्युः स्याच्छ्रीमन्युश्च द्वितीयकः ।।96।।
श्रीनिचयस्तृतीयः[19] स्यादुत्तरीयः सर्वसुन्दरः ।
जयाख्यः पञ्चमो ज्ञेयः षष्ठो विनयलालसः ।।97।।
सप्तमो जयमित्राख्य एवं सप्तगुणाज्ज्वलाः ।
राज्यलीला समायुक्ता धनधान्यैश्च पूरिताः ।।98।।
प्रीतिङ्करमुनेः पार्श्वे सप्तपुत्रसमन्वितः ।
श्रीनन्दनो मुनिर्जातो वैराग्यगुणभूषितः ।।99।।
केवलज्ञानमुत्पाद्य श्रीनन्दनशिवङ्गतः ।
सप्तर्द्धिगुणसंयुक्ता विहरन्ति मुनीश्वराः ।।100।।
क्रमेण मथुरां प्राप्तः प्रजादिभिर्विवर्जिताम् ।
चातुर्मासं स्थितास्तत्र वृक्षमूले दिगम्बराः ।।101।।
पोदनादिषु पत्नेषु चतुरङ्गुलचारिणः ।
गत्वाऽऽहारं[20] पुनस्तत्र कृत्वा यान्ति निशामुखे ।।102।।
तेषां तपःप्रभावेन गता रोगाश्च कुत्रचित् ।
शनैः शनैः प्रजास्तत्र देशान्तरात्समागताः ।।103।।
मेघवृष्टिरभूत्तत्र सर्वधान्यानि भूमिषु ।
समुद्गतानि सर्वत्र प्रजानां सुखसम्पदः ।।104।।
षष्टोपवासयुक्तास्ते मुनयो जंघचारणाः ।
पारणार्थं समायाता अयोध्यानगरेऽन्यदा ।।105।।

दृष्टिं युगान्तरे क्षिप्त्वा प्रविष्टा नगरं तदा।
अर्हदत्तस्य गेहं ते सम्प्राप्ताः शुद्धसंयताः।।106।।
गुहाकन्दरवृक्षेषु जिनगेहेषु ये स्थिताः।
अस्य ग्रामस्य तान्सर्वानहं जानामि संयतान्।।107।।
ऋषीन् दृष्ट्वाऽर्हद्दत्तोऽसौ तदा जगाद चेतसि।
चातुर्मासस्य कालेऽस्मिन् कस्मादेते समागताः।।108।।
मुक्ता एते सदाचारैराचार्य सूत्रवर्जिताः।
वर्षाकालेऽपि सर्वत्र चरन्ति ज्ञानवर्जिताः।।109।।
एभ्यो दत्ते सुदानेऽपि किं साध्यं किं फलं भवेत्।
इत्युदासीनभावेन श्रेष्ठिना रक्षिता न ते।।110।।
अर्हद्दत्तस्यपुत्रस्य भार्यया ते मुनीश्वराः।
तर्पिता अन्नदानेन कालेऽपि च समागताः।।111।।
रत्नवृष्टिरभूत्तस्या अङ्गणे मुनिदानतः।
दातृपात्रविशेषेण पञ्चाश्चर्यं भवेत्सदा।।112।।
कृत्वाहारं मुनीन्द्रास्ते चन्द्रनाथजिनालये।
आगता वन्दितुं देवं चतुरङ्गुलचारणाः।।113।।
पद्भ्यां प्रविश्य गेहन्ते वन्दित्वा जिनबिम्बकम्।
नभो मार्गे गता स्वस्य स्थानन्ते मथुरापुरम्।।114।।
तत्सर्वमर्हद्दत्तोऽसौ श्रुत्वा चेतसि व्याकुलः।
पापिनाऽहो मया साधुतपोधनास्तु निन्दिताः।।115।।
तेन पापेन गच्छामि नरकस्याऽधमां गतिम्।
मत्समो नाऽस्ति लोकेऽस्मिन् निन्दकः पापबन्धकः।।116।।
मुनीनां दर्शनं दृष्ट्वा न ये नमन्ति पापिनः।
तेषां श्वभ्रगतिर्नित्यं भवति दुःखदायिनी।।117।।
यावन्नश्चरणौ तेषां पश्यामि शुद्धचेतसाम्।
तावन्मे षड्रसानान्तु नियमोस्तु गतिप्रदः।।118।।
अथ कार्तिकमासस्य सप्तम्यां सुशुभे दिने।
शत्रुघ्नेन समं श्रेष्ठी सम्प्राप्तो मथुरापुरम्।।119।।
चतुर्विधेन सङ्गेन समं श्रेष्ठार्हद्दत्तवाक्।
सप्तर्षीणां महत्पूजां करोति नृपसंयुतः।।120।।

कृत्वा पूजा मुनीन्द्राणां प्राह शत्रुघ्नभूपतिः।
स्वामिनोऽत्र मम देशे यूयं तिष्ठन्तु तापसाः ।।121।।
यतो रोगाः प्रजानां हि प्रभवन्त्यत्र नो कदा।
सर्वक्षेमञ्च कल्याणं शुभं देशे भविष्यति ।।122।।
तत ऊचुर्मुनीन्द्रास्ते शृणु शत्रुघ्नभूपते।
कुरु गेहान् जिनेन्द्रस्य शिखरैस्तोरणैर्वरान् ।।123।।
जिनेन्द्रप्रतिमास्तत्र स्थापय त्वं महोत्सवैः।
प्रतिष्ठादि च सत्कार्यमत्र देशे कुरु प्रभो ।।124।।
सप्तर्षीणाञ्च बिम्बानि कारय लक्षणान्वितैः।
ततो विघ्ना न ते देशे भवन्ति न प्रभो कदा ।।125।।
इत्युपदेशनं कृत्वा मुनयोऽरिघ्नभूपतिम्।
आकाशवर्त्मनि वेगादयोध्यानगरङ्गताः ।।126।।
मुनिभ्यो रामसीताभ्यामन्नदानं सुनिर्मलम्।
दत्तं त्रिगुप्तिसंशुद्ध्या पुण्यराशिरुपार्जिता ।।127।।
कृत्वाहारं मुनीन्द्रास्ते यथास्थानङ्गतास्तदा।
मथुरायामरिघ्नेन कारिता जिनमन्दिराः ।।128।।
मथुरा विषये जातं ततः कल्याणमङ्गलम्।
प्रजा तु सुखिनी जाता रोगपीडादिवर्जिता ।।129।।
आरोग्यं धनधान्यकीर्तिविशदा राज्यञ्च सौख्यं यशः
कल्याणशुभगोत्रपुत्रवनिता ज्ञानं तपो भावना।
चक्रित्वं सुरराजदेवपदवीं सर्वज्ञमोक्षास्पदम्।
भूयात्सप्तमहर्षिपूजनतया सप्तर्द्धयो वैभवाः ।।130।।
श्रीमद्योगिपदारविन्दविशदं संसेव्यमानो जनः
संसारोरुगकालकूटविषकैर्नाऽऽक्रम्यते कर्हचित्।
डाकिन्यादिमहाग्रहाऽहिविविधैः पीडादिभिर्मुच्यते।
तच्छ्रीपादसरोजकं शिवकरं श्रीसोमसेनैः स्तुतम ।।131।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते मधुराज्ञः मथुराराज्यशत्रुघ्नप्राप्तिः राजादीनां स्वस्वस्थाननिवेशनवर्णनो नाम अष्टाविंशतितमोऽधिकारः ।।28।।

❖❖❖

1. चाब्धिवर्ती इति क प्रतौ
   चाब्धिवर्ता इति क प्रतौ
2. सन्धिदेशयोः इति ख प्रतौ
   सन्धदेशयोः इति ग प्रतौ
3. एकचित्तो विनोदांस्स इति क प्रतौ
4. प्रोच इति क/ग प्रतौ
5. पोदनाम्कलभश्चैकौ इति क/ख प्रतौ
6. सुरकृतु इति ख प्रतौ
   सुररंतु इति ग प्रतौ
7. कण्टकेनाद्रौ इति क प्रतौ
   कण्टकेनाह्वौ इति ग प्रतौ
8. तलके वने इति ख प्रतौ
   शूलके वने इति ग प्रतौ
9. तेनापि नाथ इति ख प्रतौ
10. स्वस्यासिकंपया इति क प्रतौ
    सत्पासिकन्यया इति ख प्रतौ
11. आकृष्टःकंदको इति क प्रतौ
    आहृष्टःकंदको इति ख प्रतौ
12. कंटकं चेति इति त्रयौ प्रतौ किन्तु कटकं इति स्यात्।
13. नाथाचलं इति ख/ग प्रतौ
14. कलकलशब्दाद्वध्यमानं वरुलिकैः इति क/ग प्रतौ
15. नगरीसिन्द्रदत्ताख्यां इति क प्रतौ
    नगरीसीन्द्रदत्ताख्यां इति ख प्रतौ
16. चारुणां पूर्वकर्मणः इति क प्रतौ
17. तेनाथ संगताः इति क प्रतौ
    तेनार्थसंगतौ इति ख प्रतौ
18. जालान् इति ग प्रतौ
19. श्रीनित्यया इति क प्रतौ
    श्रीनिलयस्तृतीयः इति ख प्रतौ
20. गत्वादारं इति ग प्रतौ

❖❖❖

एकोनत्रिंशत्तमोऽधिकारः

विजयार्द्धेऽथ रत्नाख्ये पुरे रत्नरथो नृपः।
पूर्णचन्द्रास्यभार्या स्यान्मनोरमा तयोः सुता।।1।।
एकदा नारदो मौनी राजसभां समागतः।
नृपादि पुरुषैस्तत्र पूजितोऽसौ सुयुक्तितः।।2।।
संस्थितः सिंहपीठेनोवाच[1] रत्नरथं नृपम्।
लक्ष्मीधराय ते पुत्रीं देहि राजन् मनोरमाम्।।3।।
रत्नरथस्य संप्रोचुस्तनया नारदं प्रति।
को मूर्खो भूचरो हीनो लक्ष्मणः शक्तिवर्जितः।।4।।
कथं सा दीयते तस्मै कन्या सौभाग्यशालिनीम्।
विद्याधरां नृपांस्त्यक्ता सुरेन्द्रसमवैभवान्।।5।।
इत्युक्ते कोपसंयुक्तो नारदो गगने पथि।
समुत्पत्य समाजातः साकेतनगरं तदा।।6।।
लक्ष्मीधराय वृतान्तो नारदेन निवेदितः।
तच्छ्रुत्वा कोपसंयुक्तौ निर्गतौ रामलक्ष्मणौ।।7।।
विराधितश्च सुग्रीवः श्रीशैलश्च विभीषणः।
इत्याद्याः खेचरा वीरास्ताभ्यां समञ्च निर्गताः।।8।।
चतुर्बलेन संयुक्तौ विमानस्थौ नभः पथि।
रत्नपुरं पुरं प्राप्तौ[2] बलिनौ रामलक्ष्मणौ।।9।।
प्राप्तं परबलं श्रुत्वा रत्नरथः सुतैः समम्।
युद्धार्थो निर्गतो वीरो विद्याबलस्य गर्वतः।।10।।
उभयोर्दलयोस्तत्र सञ्जातं रणमुद्धतम्।
नारदप्रेरिता वीराः मृताः सङ्ख्यविवर्जिताः[3]।।11।।
ततो लक्ष्मणवीरेण बद्धो रत्नरथो नृपः।
नागपाशेन जम्बूको यथा भीमान्तके वने।।12।।
नगरात्स्वयमागत्य सखिवृता मनोरमा।
विनम्य लक्ष्मणं नाथं मोचितः स्वपिता तया।।13।।

ततो विवाहसत्कार्यं तत्र जातं तयोः परम्।
सकलैः खेचरैस्तौ च पूजितौ कन्यकावरौ।।14।।
विजयार्द्धं नगं सर्वं सुश्रेण्युभयसंयुतम्।
म्लेच्छखण्डभवां भूमिं साधयामास लक्ष्मणः।।15।।
मागधादिसुरान् सर्वान् साधित्वा रामलक्ष्मणौ।
त्रिखण्डनायकौ भूत्वा साकेतपुरमागतौ।।16।।
त्रिखण्डसंभवं राज्यं सम्प्राप्य बलकेशवौ।
साकेतनगरे सौख्यं भुञ्जतः खेचरैर्वृताः।।17।।
अथ वक्ष्ये शृणु राजन् लवणाङ्कुशयोः कथाम्।
सप्तदशसहस्राणि लक्ष्मीधरस्य वल्लभाः।।18।।
अष्टौ तासां महादेव्यः शृङ्गाररसभूषिताः।
विशल्यारूपिणी ख्याता वनमाला तृतीयका।।19।।
ततः कल्याणमालाख्या रतिमालेति पञ्चमी।
षष्टी च जितपद्माख्या भगवती च सप्तमी।।20।।
मनोरमेति विख्याता अष्टदेव्यो मनोहराः।
द्वे शते शतमर्द्धञ्च लक्ष्मणस्य सुता वराः।।21।।
विशल्यायाः सुतः ख्यातः श्रीधराख्यो गुणोज्ज्वलः।
साकेतयुवराज्यं सः करोति बाललीलया।।22।।
रूपवत्याः सुतः पृथ्वीतिलकः पृथवीपुरे।
पुत्रः कल्याणमालाया मङ्गलो मङ्गले पुरे।।23।।
पद्मावत्याः सुतो रम्यो विमलो विमले पुरे।
तनयो वनमालाया अर्जुनश्चाऽर्जुने पुरे।।24।।
बालको रतिमालायाः श्रीकेशः केशवे पुरे।
भगवत्याः श्रुतो नाम्ना सत्यकीर्तिस्तथा पुरे।।25।।
पुत्रो मनोरमायाश्च सुपार्श्वाख्यः शुभे पुरे।
एवमष्टौ सुता मुख्याः कुर्वन्ति राजसम्पदाम्।।26।।

भार्या अष्टसहस्राणि रामस्य शुभलक्षणाः।
सीता प्रभावती चाऽन्या श्रीदामा रतिमण्डिनी।।27।।

एता मुख्याश्च पद्मस्य वल्लभा रूपभूषिताः।
सीता तासाञ्च सर्वासां ज्ञेया मुख्या सती सदा।।28।।

अथैकदा सुखं सुप्ता सीता मन्दिरमध्यगा।
निशायाः पश्चिमे यामे स्वप्नौ ददर्श चोत्तमौ।।29।।

ततः तूर्यनिनादेन प्रबुद्धा कृतमण्डना।
बहुभिः सखिभिः सार्द्धं पद्माभस्याऽन्तिकङ्गता।।30।।

अर्द्धासनं ददौ तस्यै रामः सन्मान्यप्रीतितः।
विनम्याह तदा सीता करयुग्मं शिरःस्थितः।।31।।

नाथाऽद्य पश्चिमे यामे दृष्टौ स्वप्नौ सुकौतुकौ।
वर्द्धयन्तौ समुद्रं द्वौ दृष्टौ चन्द्रौ नभःस्थितौ।।32।।

मारयन्तौ गजान् सिंहौ प्रविष्टौ तौ च मे मुखम्।
तत्फलं ब्रूहि मे स्वामिन् कृपां कृत्वा दयापर।।33।।

ततो जगाद पद्माभो देवि ते तनयौ वरौ।
भविष्यतो न सन्देहः सिंहसमौ सविक्रमौ।।34।।

त्यागिनौ भोगिनौ लोके मुक्तिमार्गप्रवर्तकौ।
ते पुत्रौ भवितौ ज्ञेयौ कर्मशत्रून् हनिष्यतः।।35।।

इत्यादिवचनैस्तुष्टा गता देवी स्ववेश्मनि।
पुष्पोत्तरात् च्युतौ तस्या गर्भाऽवतरितौ सुरौ।।36।।

गतेष्वह्निषु केष्वस्याः शरीरं कृष्णताङ्गतम्।
मुखे च पाण्डुरच्छाया कृष्णवन्तौ पयोधरौ।।37।।

दृष्ट्वा तां तादृशीं पद्मोऽपृच्छत्ते देवि चेतसि।
चिन्ता का वर्तते ब्रूहि ताञ्च सम्पादयाम्यहम्।।38।।

सीताऽवोचत्ततो नाथ पूजयामि सुभक्तितः।
जिनबिम्बानि सर्वत्र गत्वा सुचैत्यवेश्मनि।।39।।

ततः पद्मेन भृत्यान् स्वानाहूय कथितं त्विदम्।
महेन्द्रोद्यानमध्येऽत्र जिनगेहानि कुर्यताम्।।40।।
ध्वजातोरणघण्टाभिः प्रासादाः श्रीजिनेशिनाम्।
भूष्यतामष्टधा द्रव्यपूजाहेतोश्च सज्ज्यताम्।।41।।
इति श्रुत्वा भटैः सर्वं कृतं तत्र वने तदा।
सीतया सहितो रामो महोत्साहैर्वनङ्गतः।।42।।
कृत्वा पूजां जिनेन्द्राणां दत्वा दानं यथेप्सितम्।
वसन्तक्रीडनं कृत्वा प्रासादमण्डपे स्थितः।।43।।
मध्ये जिनेन्द्रबिम्बानि सीता यावच्च पूजति।
दक्षिणं लोचनं तस्यास्तावच्च स्फूर्कित तदा।।44।।
सीता जगाद कस्मान्मे स्फूर्कितं लोचनम् सखे।
किञ्चिदत्राऽशुभं ब्रूयान्महासंक्लेशकारणम्।।45।।
भर्त्ता सह वियोगो वा किं वा गर्भनिपातनम्।
मृत्युर्वा बन्धवादीनां किं वा लक्ष्मीविनाशनम्।।46।।
सत्यं चाह पुनश्चित्ते दानं विघ्नविनाशनम्।
तस्मात्करोमि सद्दानं पात्रेभ्य: सततं मुदा।।47।।
भाण्डागाराधिपं प्राह सीता स्वस्य सुखेप्सया।
देहि दानञ्च सर्वेभ्यो याचकेभ्यश्च मद्गृहात्।।48।।
जीवरक्षाञ्च सर्वत्र कारय विषये मम[4]।
मद्देशे कारयेज्जैनप्रासादाः शिखराऽन्विताः।।49।।
अभिषेकाय बिम्बानां जिनानां धनं[5] बहु।
देहि चैत्यालयेषु त्वं कारय पूजनं परम्।।50।।
नाट्यशाला जिनेन्द्रस्य सदा कारय सद्मसु[6]।
तच्छ्रुत्वा तेन तत्सर्वं कृतं परञ्च तत्क्षणात्।।51।।
सीताऽथ रथमारुह्य सखिजनपरिवृत्ता।
गीतवाद्यविनोदेन समं स्वस्य गृहङ्गता।।52।।

महेन्द्रोद्यानमध्येऽत्र प्रासादमण्डपे तदा।
समाविष्टोऽपि पद्माभः सज्जनैः परितो मुदा।।53।।
द्वारपालस्ततः प्राह नत्वा रामं नराधिपम्।
प्रजाः समागता द्वारे तव दर्शनलालसाः।।54।।
पद्मस्याऽनुज्ञया तत्र प्रजाः सर्वाः समागताः।
उपविष्टा यथायोग्यं स्थानं नत्वा च राघवम्।।55।।
ततो जगाद पद्माभः किमर्थं यूयमागताः।
भवतां मम देशेऽस्मिन् किं सुखं वर्तते न वा।।56।।
एतच्छ्रुत्वाऽपि तं वक्तुमशक्ता दुर्जना जनाः।
संस्थिता मौन्यमाश्रित्य भित्तौ चित्रितबिम्बवत्।।57।।
पुनरुवाच पद्माभः किं भीता भो सुखप्रजाः।
चित्ते यदस्ति युष्माकं तद्वदन्तु तु निर्भयाः।।58।।
अभयं प्राप्य पद्माभान्निर्भयस्तासु युक्तिवि-
ज्जयाख्यो जगादेदं कृताञ्जलिस्थमस्तकः।।59।।
श्रूयतां नाथ विज्ञप्तिं कृपां कृत्वा ममोपरि।
अनाचारं प्रकुर्वन्ति त्वद्देशे सकलाः प्रजाः।।60।।
एकस्य वनितैकेन ह्रियते पापबुद्धिना।
स्थित्वा मासान् द्वित्रीण्यत्रायाति सा स्वं गृहं पुनः।।61।।
कथ्यते यदि केनाऽपि परनररतास्त्रियाम्।
कथं रक्षसि ते गेहे दुष्टां तां पापचारिणीम्।।62।।
सोऽवोचद्रामदेवेन कथं सीता स्ववेश्मनि।
रक्षिताया दशास्यस्य षट्मासान्संस्थिताः गृहे।।63।।
स्वभावेन स्थिताः नारी गृहे नरस्य कस्यचित्।
स न मुञ्चति तां नारीमिन्द्रितस्करवाहितः।।64।।
सीता रूपं समालोक्य संहृता रावणेन सा।
कथं मुक्ताऽस्ति शीलाद्या तेन दुष्टेन सत्यपि।।65।।

संभुक्ता[7] दशवक्रेण सीता षट्मासमावधिः।
सा कथं रामदेवेन रक्षिता स्वस्य वेश्मनि।।66।।

रामात्परोऽद्यलोकेऽस्मिन्नास्ति धर्मधुरन्धरः।
कथं करोति सोऽन्यायं[8] स्त्रियां यद्यस्ति कालुषम्।।67।।

इत्युक्ता दुर्जना लोकाः सदाचारविवर्जिताः।
कुर्वन्ति ते कुकर्माणि त्यक्ताचारं सुखप्रदम्।।68।।

सर्वदोषेषु दोषौ द्वौ महान्तौ हि जगत्त्रये।
ज्ञेयौ मतेषु सर्वेषु परस्त्रीसङ्गतस्करौ।।69।।

रघुवंशे कदाचिच्च नाऽस्ति कलङ्ककारणम्।
तत्त्वधुनाऽत्र सञ्जातं सीतारावणसङ्गमात्।।70।।

यथा प्रजायते स्वास्थ्यं प्रजानां त्वं तथा कुरु।
इत्युक्त्वा सर्ववृत्तान्तमागता मौन्यमाश्रिताः।।71।।

तच्छ्रुत्वा रामदेवोऽसौ क्षणात्संभग्नमानसः।
चेतसि व्याकुलो भूत्वा जगाद वचनञ्च तान्।।72।।

यूयं गच्छन्तु गेहं स्वं वः करिष्यामि चिन्तितम्।
इति श्रुत्वा प्रजास्तस्माद् गताः स्वस्यैव वेश्मनि।।73।।

अचिन्तयदहो पद्मो महाकष्टं समागतम्।
यस्या विरहदुःखेन पीडितोऽहं पुरा बहु।।74।।

यस्या हेतोः समुद्रं तमुत्तीर्य सेनयान्वितः।
गतोऽहं रावणं हन्तुं रणं कर्तुं कुपापदम्।।75।।

विना सीतां तु मे जन्म लोकेऽस्मिन्निष्फलो भवेत्।
रूपलावण्यशीलाद्यां कथं त्यजामि जानकीम्।।76।।

तदा विरहितः शक्तः स्थातुं न घटिकामपि।
कथं स्थास्यामि जन्मान्तपर्यन्तशोकपूरितः।।77।।

न चेत्यजामि तां सीतां तदा लोके भवेन्मम।
वंशे कलङ्क एवात्र यावच्चन्द्रदिवाकरौ।।78।।

इति सञ्चिन्त्य लक्ष्मीशमाहूयोवाच राघव।
लोकापवादतो वीर सीतां त्यजामि कानने।।79।।

ततो जगाद लक्ष्मीशो वदन्ति के जनाः खलाः।
तस्या दोषान् शिरस्तेषां करोमि खड्गछेदितम्।।80।।

सीता समाऽत्र काऽपि स्त्री नाऽस्ति लोके पतिव्रता।
तस्यां वदति यो दोषं जिह्वां छिन्दामि तस्य वै।।81।।

तस्या वियोगदुःखेन निश्चयात्त्वं मरिष्यसि।
वाक्याद् दुर्जनलोकस्य पतिव्रतां कथं त्यजेत्।।82।।

ततोऽवोचत्पुनः पद्म एवं न क्रियते त्वया।
अस्मद्वंशे भवेद्दोषो लोकपीडां कृते सति।।83।।

स्त्रीचरित्रञ्च को लोके जानाति चपलस्थितिम्।
अन्याऽपि कृतं तत्र किं कृत्यं दुष्टचिन्त्यताम्।।84।।

रावणरूपमालोक्यासक्ता जाताऽस्ति जानकी।
ततः कलङ्किता लोकैर्नाऽन्यथा दूषणं भवेत्।।85।।

तस्मात् त्यजामि तां सीतां व्यभिचारसमन्विताम्।
मौन्यं त्वं कुरु लक्ष्मीश यदि प्रीतोऽसि मां प्रति।।86।।

कृतान्तवक्रमाहूय सेनान्यं राघवोऽवदत्।
यत्र नास्ति जनः कोऽपि तत्र त्वं नय[9] जानकीम्।।87।।

तीर्थयात्राप्रवाक्येन रथमारोप्य जानकीम्।
वने त्यक्त्वा समागच्छ शीघ्रं त्वं मम वाक्यतः।।88।।

तथाऽस्त्विति वचः प्रोच्य सेनानी यमवक्रकः[10]।
चतुरश्वरथारूढः सीतायाः सदनङ्गतः।।89।।

मातरुतिष्ठ नेष्यामि त्वाञ्च सम्मेदपर्वतम्।
यात्रां कर्तुं जिनेन्द्राणां रामदेवस्य वाक्यतः।।90।।

ततः सीताप्रमोदेन पूर्णोत्थिता सती तदा।
सर्वान्सम्भाष्य सन्तोष्य निर्गता वन्दितुं जिनम्।।91।।

विशल्या प्रमुखा देव्यः शीघ्रं तत्र समागताः।
नत्वा पादौ च सीताया विनयात्ताः पुरः स्थिताः।।92।।

ततोऽपि स्वसृणां पादौ नत्वा विनयपूर्वकम्।
सीता जगाद ताभिश्च सर्वाभिः सह वाक्यकम्।।93।।

सम्मेदपर्वतं गत्वा वन्दित्वा श्रीजिनेश्वरम्।
आगमिष्यामि वेगेन युष्मद्दर्शनलालसा।।94।।

गर्भस्थशुभपुण्येन वाञ्छा जाताऽस्ति मे शुभा।
दानपूजादिधर्मेषु तीर्थयात्रासुनिर्मला।।95।।

मार्गे कष्टं न जाने किं किं भवेन्मम भाग्यतः।
युष्मद्भिः क्षम्यतां सर्वं यत्कृतं दूषणं मया।।96।।

इत्युक्ता स्वसृमुख्यानां पादौ नत्वा यथाविधि।
समारूढा रथं देवी राममाऽऽपृच्छ्य निर्गता।।97।।

वायुवेगं रथाऽऽरूढा समुल्लङ्घ्य नदीगिरीन्।
कुशकुनेऽपि सञ्जाते गच्छति जिनभक्तितः।।98।।

क्षणाद्योजनद्वित्रीणि शतानि च रथो गतः।
गङ्गानदीं समुत्तीर्य कृतस्नानं च घोटकैः।।99।।

क्रमेण सिंहकाख्यञ्च वनं प्राप्तो रथस्तदा।
सिंहव्याघ्रगजैर्वृकैर्भयशब्दैश्च पूरितम्।।100।।

वनं दृष्ट्वा भयाक्रान्तं स्थितं कृत्वा रथं ततः।
अकरोद्रोदनं गाढं तत्र कृतान्तवक्रकः।।101।।

तदा जगाद सीता तं कथं रोदसि बान्धव।
प्रस्तावेऽस्मिंश्च हर्षस्य तीर्थधर्मप्रवर्तके।।102।।

ऊचे कृतान्तवक्रोऽतो मातः किङ्करजीवितम्।
विज्ञेयं ग्रामशार्दूलसमानं पापजं फलम्।।103।।

कृत्वाऽधुना महापापं पराधीनाच्च किङ्करः।
गच्छेत्श्वभ्रं पुनर्जन्मचाण्डालादिकुले भवेत्।।104।।

सीतोचेऽत्र किमर्थं त्वमेवं ब्रूषि यमानन।
ततोऽवोचदसौ मातः पद्मेन मां निरूपितम्।।105।।
लोकापवादभीत्यात्र कानने जहि जानकीम्।
यद्यपि रूपशीलाद्या तथापि मे न रुच्यते।।106।।
लोकानां वाक्यतस्तेन पद्मेन प्रीतिरुत्तमा।
त्यक्ता तवोपरि देवि यावज्जन्म प्रवर्त्तते।।107।।
तव समां सती नास्ति लोकेऽस्मिन् धर्मवत्सला।
त्वामेकाकीं वने त्यक्त्वा गच्छामि कथमम्बिके।।108।।
चेन्न त्यजामि मातस्त्वां तदा कुप्यतिराघवः।
इति चिन्तातुरो भूत्वा रोदनं प्रकरोम्यहम्।।109।।
इति तद्वचनं श्रुत्वा मूर्च्छां सम्प्राप्य जानकी।
पतिता स्यन्दने तत्र गतप्राण इवाजनि।।110।।
यमाननेन शैत्येनोपचारेण च जानकीम्।
जागृता सा तदा शोकं कुवर्ती प्राह तं प्रति।।111।।
मां नेहि नगरं वीर पादौ पश्यामि राघवौ।
नाथं सम्भाष्य वृत्तान्तमागमिष्यामि कानने।।112।।
जगाद यमवक्रान्तो दूरं देविपुरं स्थितम्।
किं त्वं पश्यसि पद्माभं सक्रोधञ्चण्डशासनम्।।113।।
एवं चेत्किं त्वया वीर तत्रैव कथितं न माम्।
रामपादौ प्रणम्योच्चैर्निःसरिष्येदहं वनम्।।114।।
यतो मे जायते जन्म सफलत्वं मृतेऽपि च।
सिंहव्याघ्रवृर्केर्भक्ष्या का गतिर्मे भविष्यति।।115।।
अश्रुधारापतद् दृष्टिः सीतोचे गद्गदं वचः।
वद त्वं रामदेवं त्वं सम्प्रीत्या मम भाषितम्।।116।।
लोकवाक्यात्प्रभो स्नेहः कथं त्यक्तो ममोपरि।
प्रजां पालय न्यायेन न्यायमार्गप्रवर्त्तकः।।117।।

लोकोक्त्याहं यथा त्यक्ता तथा मा त्यज राघव।
जैनधर्मं सुनिर्दोषं स्वर्गमोक्षसुखप्रदम् ।।118।।
विनोदेन कृतं किञ्चिदपराधं मया प्रभो।
क्षान्तव्यं त्वया सर्वं गृह्यतां महती च धीः ।।119।।
लोके यदस्ति सद्बुद्धिस्तत्सर्वा तव विद्यते।
अहं तु स्वल्पबुद्ध्यात्मा किं वदामि च ते सुधीः[11] ।।120।।
एतावत्कालपर्यन्तमाशास्ति तव दर्शने।
तत्तु दैवनियोगेन जातं निष्फलचिन्तितम् ।।121।।
अन्याभिर्वनिताभिश्च सुखी भव नरेश्वर।
अहन्तु मरणं प्राप्ता वद त्वमिति सारथि ।।122।।
इत्युक्त्वा सा रथात्सीता पतिता भुवि मूर्च्छिता।
तादृशीं तां सतीं मुक्ता व्याघ्रुट्य यमवक्रकः ।।123।।
अश्रुपातजलैर्युक्तो रथस्थो रथवाहकः।
अयोध्यापुरमायाति व्याकुलश्चित्तदुःखितः ।।124।।
इतः सम्प्राप्य सत्सञ्ज्ञां सीता शीतलवायुना।
करोति शोकसन्तापं वने मानववर्जिते ।।125।।
अहो राम जगत्स्वामिन् कथं जातोऽसि निर्दयः।
रक्षकोऽसि च सर्वांस्त्वं देहि मे वचनं वने ।।126।।
भो भो देवर लक्ष्मीश भो भामण्डल बान्धव।
भो जनक जनकस्त्वं मां रक्षस्वाऽजने वने ।।127।।
भो जननि[12] विदेहे मां देहि त्वं सुखदं वचः।
माम् दशरथ राजन्[13] भरतारिघ्नदेवरौ ।।128।।
कथं न क्रियते नाशो मम दुःखस्य कानने।
सकला खेचराधीशाः कुर्वन्तु मम रक्षणम् ।।129।।
इत्यादि वचनैः शोकं कृत्वा मूर्च्छां पुनः पुनः।
प्राप्य करोति संलापं पशुभ्योऽपि च शोकदम् ।।130।।

अहो मातरहो तात भो गुरो भो रघुपते।
अहो जिनं सुराधीशं रक्षन्तु मां वने घने।।131।।
तैर्वा किङ्क्रियते कार्यं यत्कृतं मम कर्मणा।
मया कृतं कुकर्माणि मयैव भुज्यते सदा।।132।।
गुरुनिन्दा कृता पूर्वं मया कुज्ञानभावतः।
देवपूजाञ्च पादेन स्फोटिता गर्वतो मया।।133।।
सतीनां शीलयुक्तानां दोषा आरोपिता मया।
वा सौभाग्यवतीस्त्रीणां वियोगो हि सुनिर्मितः।।134।।
तस्करितं परद्रव्यं जीवनाशोऽथवा कृतः।
कन्दमूलानि सर्वाणि भक्षितानि मया पुरा।।135।।
अगालितं जलं पीतं भुक्तं वा निशिभोजनम्।
तत्सर्वं फलितं चात्र मम पापवशादिदम्।।136।।
पुनर्मूर्च्छां पुनर्सञ्ज्ञां पुनर्दुःखञ्च रोदनम्।
प्राप्य सीता महाशोकं मृगीव भ्रमति वने।।137।।
उपविष्टा क्वचिद्देशे शिलायां करगल्लका।
विलापान् विविधानुक्ता जगादेदं वचः पुनः।।138।।
मम हेतोः समुद्रं तमुत्तीर्य राम आगतः।
अधुना सः कथं जातः प्राणनाशकरो रिपुः।।139।।
दोषो नास्ति रघुनाथो[14] लोका दुर्जनवाचकाः।
तदाऽपवादतो भीतः साधुनामीदृशी गतिः।।140।।
इत्यादिरोदनं श्रुत्वा मृगादिपशुजातयः।
कुर्वन्ति रोदनं कष्टं देवानामपि दुःखदम्।।141।।
राजाऽथ वज्रजंघाख्यः पुण्डरीकपुराधिपः।
हरिवंशकुलोद्भूतो जनकस्य च गोत्रजः।।142।।
सम्यग्दृष्टि सदाचारी परनारीसहोदरः।
दाता भोक्ता गुणैर्युक्तो भव्यजीवस्य वत्सलः।।143।।

शरणागतजीवानां सदाऽसौ वज्रपञ्जरः।
गजबन्धार्थमायातश्चतुर्बलेन तद्वने ।।144।।
प्रतिगच्छन् गजान् धृत्वा श्रुत्वा शब्दं प्रदुःखदम्।
सैन्यं समागतं तत्र यत्र सीताऽस्ति दुःखिनी।।145।।
दृष्ट्वा सैन्यं समासीनं भीता सीता स्वचेतसि।
गाढं रुदतुमारब्धा कम्पमानशरीरिका।।146।।
सैनिका जानकीं तत्र वनदेवीमिव स्थिताम्।
दृष्ट्वा समीपमायाताः सम्प्राप्य कौतुकं परम्।।147।।
भीत्या मनसि तान् दृष्ट्वा भूषणानि तदा सती।
दातुं तेभ्यः समारब्धा दुकूला छादितानि वै।।148।।
ते प्रोचुरम्बिके कस्माद्भीताऽसि सुखचेतसि।
पुण्डरीकपुरस्वाम्यागतोऽयमस्ति धार्मिकः।।149।।
यत्तयोर्वतेते वार्ता यावत्तावत्समागतः।
समारूढः करेणुं स वज्रजंघो नरेश्वरः।।150।।
दृष्ट्वा सीतां करेणोश्चावतीर्य तत्र चागतः।
सीतायां सन्निधौ राजा समाविष्टो महीतले।।151।।
स्वभावविनयीभूपः प्रोचे स जानकीं प्रति।
कस्माद्रोदसि पुत्रि त्वं वनेऽत्रैकाकिनी कथम्।।152।।
वनिता कस्य पुत्री वा सत्यं ब्रूहि सुते वचः।
ततो जगाद सीताऽसौ चक्षुरश्रुजलैर्युता[15] ।।153।।
शृणु बान्धव वृत्तान्तं पृच्छसि चेत्सविस्तरम्।
स्नुषा दशरथस्याहं दुहिता जनकस्य च।।154।।
भार्याऽहं रामदेवस्य स्वसा भामण्डलस्य च।
साम्राज्ये भरते दत्ते रामो देशान्तरङ्गतः।।155।।
तेन सार्द्धमहं चापि सङ्गता दण्डके वने।
तस्माद्दशमुखेनाहं संहृता पापिना तदा।।156।।

सङ्गरे स च रामेण हतो गर्वी दशाननः।
आनीताऽहं महाप्रीत्या साकेतायां स्ववेश्मनि।।157।।

महाभोगेन गर्भस्य सम्भवो मे तदाऽभवत्।
या या वांछा ममोत्पन्ना सा सा रामेण पूरिता।।158।।

पुष्पकाख्यं विमानं सः समारुह्य मया समम्।
पञ्चमेरुषु याः सन्ति प्रतिमास्तास्तु पूजिता।।159।।

कूलनगेषु[16] चैत्यानि यानि सन्ति च तानि वै।
पूजितानि मया साकं रामेण पूर्णभक्तितः।।160।।

कैलाशे वृषभो देवश्चम्पायां वसुपूज्यतः।
ऊर्जिते नेमिनाथश्च पावायां पूजितोऽन्तिमः।।161।।

सम्मेदे विंशतिदेवाः पूजिताः पुण्यहेतवेः।
अन्यानि जिनबिम्बानि पूजितानि च तानि वै।।162।।

महेन्द्रोद्यानमध्ये च जिनबिम्बानि भक्तितः।
पुनः सम्पूज्य तेनाहं प्रेषिता स्वस्य सद्मनि।।163।।

दुर्जनलोकवाक्येन त्यक्ताऽहं पतिना वने।
इत्युक्ता विस्तरं तस्मै पुना रोदति जानकी।।164।।

सीताया रोदनं श्रुत्वा वज्रजंघादिसैन्यकाः।
शोकाद्रुदन्ति ते कष्टं कारुण्यरसपूरितम्।।165।।

ततो जगाद भूपालस्त्वं भग्नी मेऽभवत्ततः।
भ्राताऽहञ्च तवोत्तिष्ठ गच्छामः नगरं मम।।166।।

मद्गृहे सति ते देवि रामेण सह सङ्गमः।
पुनर्भवेच्च तस्मात्त्वं सुखिनी हि भविष्यसि।।167।।

इत्यादिवचनैः सीतां सन्तोष्य प्रीतिपूर्वकम्।
शिविकायां समारोप्य प्रस्थितोऽसौ गृहं प्रति।।168।।

महावाद्यस्य निर्घोषैः सेनामध्यं सतीश्रिता।
गच्छति वज्रजङ्घेन प्राप्य पूजां पदे पदे।।169।।

यत्र ग्रामे पुरे देशे मार्गे गच्छति भूपतिः।
लोकाः पूजन्ति तत्रस्थाः सतीं सीतां नृपाज्ञया।।170।।
क्रमेण नगरीं प्राप्तो भूपाल पुण्डरीकिणीम्।
ध्वजातोरणसद्भूषां चतुर्बलेन संयुतः।।171।।
सन्मुखमागतैर्लोकैर्दृश्यमाना गृहे गृहे।
पूजामङ्गलसद्दीपैः पूजिता तत्र जानकी।।172।।
महाविभवसंयुक्ता प्रविष्टा नगरं तदा।
राजमन्दिरसद्वारं सीता प्राप्ता नृपैर्वृता।।173।।
वज्रजङ्घनृपस्यास्य वनितास्तत्र चागताः।
ताश्च सम्पूज्य सीतायाः पादौ नतास्तु भक्तितः।।174।।
तास्तूचे वज्रजंघोऽसौ भग्नीयं मम जानकी।
अस्य अनुज्ञया यूयं स्थीयन्ते मम सद्मनि।।175।।
तथास्त्विति च ताः प्रोचु कृत्वाज्ञां मस्तके तदा।
सुखेन संस्थिता सीता वज्रजंघस्य सद्मनि।।176।।
सेव्यमाना सुनारीभिर्नर्त्तक्यो नृत्यसंभ्रमैः।
कालो गच्छति सीताया गर्भिण्या जिनपूजनैः।।177।।
सर्वमस्त्यत्र सीतायाः कल्याणसुखहेतुकम्।
तथापि मन्यते नैव सुखं रामवियोगतः।।178।।
अथ कृतान्तवक्त्राख्यः प्राप्तोऽयोध्यापुरं प्रति।
नत्वा रामं स्थितोऽस्याऽग्रे चेतसि व्याकुलात्मकः।।179।।
ऊचे सेनाधिपं रामः किमुक्तं तत्र सीतया।
तस्या उक्तिस्ततस्तेन सर्वा तं प्रतिभाषिता।।180।।
तच्छ्रुत्वा रघुनाथोऽसौ मूर्च्छां प्राप्य सभूतले।
पतितो व्याकुलो भूत्वा मृत इव गतस्मृतिः।।181।।
शत्रुघ्नलक्ष्मणादिभ्य उपचारैः शतैरपि।
सञ्ज्ञा सम्प्राप्तितो रामः कुटम्बैर्बहुभिर्वृतः।।182।।

हा सीते कानने चैका कथं स्थिताऽसि दुःखिनी।
अब्धिमुत्तीर्य ते हेतोरागतोऽहं वनान्तरम्[17]।।183।।
मया मूर्खेन देवि त्वं कथं त्यक्ता जनाननात्[18]।
त्वद्विरहेन मे जन्म कथमत्र गमिष्यते।।184।।
देहि मे वचनं कान्ते सर्वाङ्गवरसुन्दरि।
विदेशेऽहं गतो देवि तदा त्यक्तो न च त्वया।।185।।
व्याघ्रादिभक्षिता देवि मृताऽसि दुष्टकानने।
गर्भभारेण संयुक्ता पीडिता पापिना मया।।186।।
इत्यादिविलपान् कृत्वा मूर्च्छां सम्प्राप्य राघवः।
पतितो भूतले चिन्ता दुःखराशिभिरावृतः।।187।।
तदा लक्ष्मणवीरेण प्रेषिताः सुभटास्त्वरा।
सीतामानेतुमेवाशु[19] सिंहकाख्यं वनं प्रति।।188।।
इतस्ततः समालोक्य सीता न दृश्यते क्वचित्।
गत्वाऽऽगताश्च ते देवीं लक्ष्मणस्यान्तिकं तदा।।189।।
मृतां ज्ञात्वा सतीं सीतां व्याघ्रादिभक्षितां पराम्।
दुःखं कुर्वन्ति ते सर्वे रामाद्याः सकला नृपाः।।190।।
निमित्तज्ञानिना प्रोक्तं चिन्तां मा कुरु राघव।
सुखेन सीतया सार्द्धं सङ्गमस्ते भविष्यति।।191।।
ततो लक्ष्मणवीरेण प्रतिबोध्योपशान्तिताम्।
नीतो रामः क्रमेणाऽसौ वनितादि शुभोक्तिभिः।।192।।
अष्टसहस्रनारीभिः रेमे रामस्तथापि सः।
सीतावियोगदुःखेन सुखं न लभते क्वचित्।।193।।
सुखं कदाचिल्लभते मनुष्यः
पुण्येन लोके विभवैः प्रयुक्तम्।
दुःखी क्वचित्पापफलेन जीवो
भवेत्ततो मुञ्चतु पापबुद्धिम्।।194।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते षट्खण्डविजयः सीतावनवासो वज्रजङ्घगृहप्राप्तिवर्णनो नाम एकोनत्रिंशत्तमोऽधिकारः।।29।।

1. सिंहपीठेम्नावाच इति ख प्रतौ
2. पुरं प्राप्तो इति ख प्रतौ
   पुरः प्राप्तो इति ग प्रतौ
3. सुभटाः सर्वसंमृताः इति क प्रतौ
4. सम इति ख प्रतौ
5. गोधनं इति क/ग प्रतौ
6. पद्मसु इति ख प्रतौ
7. सुभुक्ता इति ख प्रतौ
8. सोन्योयं इति क प्रतौ
   सोनायं इति ग प्रतौ
9. नेय इति ख प्रतौ
10. सेनानीर्यमवक्रकः इति क प्रतौ
11. मुधा इति क प्रतौ
12. जनकनि इति ख प्रतौ
13. स्वामिन् इति ग प्रतौ
14. रघुनाथे इति क/ख प्रतौ
15. चक्षुरस्नुजलैर्युता इति क/ग प्रतौ
16. कुलनगेषु इति क/ग प्रतौ
17. वनान्तरे इति ख/ग प्रतौ
18. वने जनात् इति ख प्रतौ
    नाननात् इति ग प्रतौ
19. सीतामानीतुं इति क प्रतौ

❖❖❖

त्रिंशत्तमोऽधिकारः

मासेऽथ नवमेऽतीते रत्नकीलितमन्दिरे ।
हेमपल्यङ्कसुप्ताऽसौ सीताऽसूतसुतद्वयम् ।।1 ।।
श्रवणर्क्षे स्थिते चन्द्रे शुक्ले श्रावणमासके ।
पूर्णिमायां सुतौ रम्यौ जातौ भौमे शुभे दिने ।।2 ।।
संपूर्णलक्ष्मणौ वीरौ सूर्यचन्द्राविव प्रभौ ।
तयोर्मुखे जना दृष्ट्वा सन्तुष्टाः सीतयान्विताः ।।3 ।।
वज्रजङ्घेन जैनेन्द्रीपूजां कृत्वा महोत्सवैः ।
दानं यथेप्सितं दत्तं याचकेभ्यो गजादिकम् ।।4 ।।
प्रथमस्य कृतं नाम चानङ्गलवणः शुभम् ।
द्वितीयस्याभिधानञ्च मदनाङ्कुश ऊचितम् ।।5 ।।
तौ क्रमेण कुमारौ द्वौ सम्वृद्धिं व्रजतस्तयोः ।
मुखे दृष्ट्वा तदा सीता विस्मृता शोकपूर्वजम् ।।6 ।।
क्रीड्यमानौ कुमारौ द्वौ वीक्ष्य सीता सुचेतसि ।
ऊचे कोऽत्र भवेद्धीमान् तयोः पाठको गुरुः ।।7 ।।
एतस्मिन्नन्तरे बह्मचारी सिद्धार्थनामकः ।
आगतो भ्रामरी हेतोः सीतायाः पुण्यतो गृहम् ।।8 ।।
जिनभक्तो महाज्ञानी श्रुतसागरपारगः ।
क्षमावान् शीलसम्पन्नः कलाविज्ञानभूषितः ।।9 ।।
एकवस्त्रधरो धीरो लुञ्चितमस्तकः सदा ।
करपात्री कृपायुक्तो ध्यानाध्ययनतत्परः ।।10 ।।
तस्मै दत्तं तया दानं सीतया प्रासुकं वरम् ।
भुक्त्वाऽसौ क्षुल्लकस्तत्र मणिपीठे समाविशत् ।।11 ।।
कृत्वा तस्मै नमस्कारं सीता तस्याऽग्रसंस्थिता[1] ।
तावत्तत्र[2] समायातौ कुमारौ लवणाङ्कुशौ ।।12 ।।
दृष्ट्वा तौ बह्मचारी चाऽपृच्छत्सीतां स्वभावतः ।
एतौ कस्य कुमारौ द्वौ कामाकारौ मनोहरौ[3] ।।13 ।।

तच्छुत्वा सीतया सर्ववृतान्तं साऽश्रुनेत्रया।
उक्तो रामवियोगादिविस्तरो बह्मचारिणम्।।14।।

क्षुल्लकः प्रोच्यतां सीतां दुःखं मा कुरु बालिके।
तव पुत्रौ नृपौ भूत्वा मोक्षस्थानं गमिष्यतः।।15।।

सर्वशास्त्रस्य विज्ञानमेतौ द्वौ पाठयाम्यहम्।
इत्युक्तैकान्तगृहाव[4]संस्थितः क्षुल्लकोऽत्र वै।।16।।

कुमारौ स्वल्पकालेन पाठितौ बह्मचारिणा।
शस्त्रशास्त्रस्य विज्ञानं कलाकुशलचातुरी।।17।।

महाशास्त्रे[5] च ज्योतिष्के धर्मशास्त्रे सुवेदिके।
युक्त्यागमे च शब्दाख्ये निष्पन्नौ तौ कुमारकौ।।18।।

रूपेण मन्मथस्ताभ्यां विद्यया च सरस्वती।
त्यागेन कल्पवृक्षाश्च जिताः स्वरेण कोकिला।।19।।

षोडशाभरणौ वीरौ भूषितौ मन्मथाकृतौ।
गजारूढौ पुरीमध्ये क्रीडन्तौ लीलयान्वितौ।।20।।

अनङ्गलवणं वीरं दृष्ट्वा यौवनभूषितम्।
वज्रजंघोऽस्य चोद्वाहं कर्तुं चिन्ताऽऽतुरोभवत्।।21।।

भार्यायां स्वस्य लक्ष्मिण्यां चन्द्रकलाभिधां सुताम्।
द्वात्रिंशत्कन्यकायुक्तां ददावस्मै नरेश्वरः।।22।।

विवाहमङ्गलं जातं तूर्यत्रिकादिसंयुतम्।
सीता देवी तदा तुष्टा दृष्ट्वा पुत्रविवाहनम्।।23।।

मदनाङ्कुशवीरस्य विवाहहेतवे नृपः।
पश्यति कन्यकां लोके रूपलावण्यभूषणाम्।।24।।

अथ पृथ्वीपुरे राजा प्रवरः पृथु नामकः।
भार्यास्याऽमृतवत्यास्ते सुतास्याः कनकावली।।25।।

तां याचितुं कुमाराय वज्रजङ्घेन प्रेषितः।
अमात्यो जयपद्माख्यो गत्वा च पृथिवीपुरम्।।26।।

प्रवरं पृथुभूपं तं जगाद सचिवाग्रणी।
सुतां ते देहि भूपाल! कामाङ्कुशाय मङ्गलैः।।27।।
सोऽवोचन्मे सुता तस्मै कुलजा दीयते कथम्।
अज्ञाते कुलपुत्राय मार्गस्थाय दरिद्रिणे[6]।।28।।
वज्रजंघोऽपि मूर्खोऽस्ति[7] तस्मै यो याचते मम।
कुलीनस्य सुतां रम्यां विद्याविनयभूषिताम्।।29।।
कुलं शीलं धनं रूपं समानत्वं बलं वयः।
देशो विद्यापरञ्चेति नवगुणा वरे स्मृताः।।30।।
एकोऽपि नास्ति तस्मिंश्च वरे कदापि कुत्रचित्।
कथं हि याचिता कन्या त्वया तस्मै कुजातये।।31।।
गच्छ वेगेन भोऽमात्य! नो चेत्त्वं किङ्करान्मम।
मरणं यासि कष्टेन चाऽयुक्तप्रतिभाषणात्।।32।।
इत्युक्ते सचिवेनाऽशु चागत्य स्वपुरं तदा।
कथितं वज्रजंघाय सर्वं पृथोः विचेष्टितम्।।33।।
तच्छ्रुत्वाऽथ पृथोर्देशं भङ्क्तुं[8] बलेन संयुतः।
निर्गतो वज्रजङ्घोऽसौ वेगात्पृथ्वीपुरं प्रति।।34।।
[9]शत्रुपुरेऽर्द्धमार्गे च पृथुपक्षविधायकः।
अस्ति व्याघ्ररथो नाम्ना नरेन्द्रः परमो बली।।35।।
वज्रजङ्घेन सङ्ग्रमे जित्वा स बन्धने कृतः।
जिते व्याघ्ररथे राज्ञि प्रथमं स जयङ्गतः।।36।।
ततः कुलीशजङ्घेन वेष्टितं पृथवीपुरम्।
तच्छ्रुत्वा पृथुभूपेण प्रेषितो दूत उत्तमः।।37।।
पोदनपुरभूपालमानेतुं स्वस्य सौहृदम्।
अतिमैत्र्यादसौ वेगाच्चतुर्बलेन निर्गतः।।38।।
पोदनपुरनाथेन वज्रजङ्घस्य तद्बलम्।
भग्नं समागतेनाशु यावत्स्वसीमसङ्गमः।।39।।

ततश्च वज्रजङ्घेन पुण्डरीकपुरन्तदा।
समानेतुञ्च पुत्रान् स्वान् दूतः सुमुखप्रेषितः।।40।।
जनकपत्रतः पुत्राः सनद्धच सकलं बलम्।
निर्गताः पृथिवीपन्नं लुण्टितुं वाद्यसंयुताः।।41।।
तेषां बाद्यरवं श्रुत्वा सीतापुत्रौ स्वमातरम्।
पृच्छतः कस्य वाद्यस्य ध्वनिरत्र प्रजायते।।42।।
सीता जगाद भो पुत्रौ युवयोर्मातुलो नृपः।
पृथुं जेतुं गतस्तत्र भग्नोऽसौ तेन पापिना।।43।।
तस्य पुत्राश्च तच्छ्रुत्वा गच्छन्ति सङ्गरं प्रति।
पितुः सहायतां कर्तुं महाबलेन संयुताः।।44।।
युष्मद्धेतोः सुता तस्य वज्रजङ्घेन सा पृथोः।
याचिता स ददात्यत्र नाऽतः कोपं समागतः।।45।।[10]
अतस्तयोर्महायुद्धं जातं रणं सुदारुणम्।
भग्नो वज्रनृपस्तावदग्रे किं तु भविष्यति।।46।।
एतच्छ्रुत्वा स्वयं गन्तुं समुद्युक्तौ कुमारकौ।
दृष्ट्वा जगाद सीता तौ भवन्तौ बालकौऽमलौ[11]।।47।।
भवद्भ्यां नैव युज्याते गन्तुं सङ्गरमेदनीम्।
खड्गघातप्रशब्देन प्राणान् मुञ्चन्ति प्राणिनः।।48।।
ऊचतुर्मातरं वीरौ कुमारौ लवणाङ्कुशौ।
वह्निकणस्तु स्वल्पोऽपि दहति तृणराशयः।।49।।
आवां वह्निसमौ ज्ञेयौ शत्रवस्तृणसन्निभाः।
तांश्च सुक्षणमात्रेण नेष्यामो रणभङ्गताम्।।50।।
इत्युक्त्वा निर्गतौ वीरौ स्नात्वा भुक्त्वा सुखात्मकौ।
प्रणम्य जननीपादौ क्षान्त्वा कुटुम्बसज्जनान्।।51।।
वाद्यैर्युक्तौ गजारूढौ श्वेतच्छत्रैर्विभूषितौ।
मित्रमातुलपुत्रादिबन्धुभिः परिवेष्टितौ।।52।।

जनाशीर्वादसन्तुष्टौ चतुर्बलेन संयुतौ ।
गच्छतस्तौ कुमारौ द्वौ प्राप्तौ मातुलसन्निधिम् ।।53।।
आगतौ जानकीपुत्रौ बन्धुजनपरिवृतौ ।
दृष्ट्वा तौ वज्रजङ्घोऽसौ तुष्टश्चेतसि सादरः ।।54।।
आलिङ्ग्य तौ कुमारौ द्वौ सम्पृच्छ्य कुशलादिकम् ।
अग्रेऽथ निर्गता वीरा नेतुं पृथ्वी पुराधिपम् ।।55।।
आगतैस्तैः पुरं सर्वं वेष्टितं बलसंयुतैः ।
युद्ध्यमानः पृथुर्भूपो वेगात्तैर्बन्धने कृतः ।।56।।
पोदनभूपतिस्तत्र बध्वा तैः स्वरथे धृतः ।
ततस्तयोर्भटास्तस्मात्कृत्वा पलायनङ्गताः ।।57।।
पोदनस्वामिना साकं पृथुराजोऽतिगर्वतः ।
लवणाङ्कुशयोः पादौ नतावोचदिदं वचः ।।58।।
ज्ञानवन्तौ कुलोद्भूतौ भवन्तौ नन्दितौ[12] मया ।
तत्क्षान्तव्यं भवद्भ्यां च यत्कृतं पापिनाऽत्र वै ।।59।।
इत्युक्त्वा चरणौ नत्वा दत्वा कनकमालिनीम् ।
तयोश्च किङ्करो भूत्वा स्थिताग्रे विनयान्वितः ।।60।।
कुमाराभ्यां ततो मुक्तो बन्धात्पृथुभूपतिः ।
पोदनपुरनाथेन समं गर्वपरीक्षयात् ।।61।।
मदनाङ्कुशवीरस्य कनकमालया समम् ।
विवाहस्योत्सवो जातस्तत्रैव सर्वसाक्षतः ।।62।।
महोत्सवेन ते सर्वे प्रविष्टा पृथिवीपुरम् ।
मासमात्रं स्थितास्तत्र पृथुना पूजिताः परम् ।।63।।
सकलां पृथिवीं जेतुं ततस्तौ लवणाङ्कुशौ ।
निर्गतौ पृथुना सार्द्धं पोदनाधिपसंयुतौ ।।64।।
वज्रजङ्घो नरेन्द्रोऽपि मातुलो हर्षपूरितः ।
गच्छति पुरतः पुत्रैर्युक्तः सीतासुतैः समम् ।।65।।

पोदनाख्यं पुरं तावत्प्राप्तं सैन्यं महोद्धतम्।
तत्पतिना सुता अष्टौ दत्ताः कामाङ्कुशाय वै।।66।।

ततो लौकान्तिकं पत्नं गतं सैन्यं कुमारयोः।
तत्र कुबेरकान्ताख्यं नृपं जित्वा रणाञ्जिरे।।67।।

बन्धित्वा च पुनर्मक्तस्तेन दत्ताः स्वकन्यकाः।
शतत्रयं विवाहेन लवणाय महोत्सवैः।।68।।

तत्रस्ताभ्यां कुमाराभ्यां साधिताः बलिनो नृपाः।
सहस्रैकप्रमाणास्ते तवो किंकरताङ्गताः।।69।।

मालवावन्तिकाश्मीरतिलिङ्गदक्षिणादयः।
साधिताः विषया रम्याः कुमाराभ्यां स्वलीलया।।70।।

गङ्गामुत्तीर्य कैलाशनगस्य पूर्वदेशके।
जानकीतनयौ भूपैर्वृतौ वीरौ गतौ तदा।।71।।

तत्रस्था भूमिपा वीराः साधिता रणमण्डले।
कुमाराभ्यां सुतास्तेषां परिणीता महोत्सवैः।।72।।

पश्चिमस्था नृपाः सर्वे स्वबलेन वशीकृताः।
विजयार्द्धसमीपे तौ भूत्वा सिन्धुतटं गतौ।।73।।

तत्रस्थाः सकलाः भूपाः स्वस्य ते सेवकाः कृताः।
विजित्य सकलां पृथ्वीं निवृत्तौ स्वपुरं प्रति।।74।।

वैरिणां कन्यका रम्या गृहीत्वा सारवस्तुकम्।
पुण्डरीकपुरं प्राप्तौ कुमारौ भूमिपैर्वृतो।।75।।

ध्वजातोरणघण्टादिभूषितं नगरं तदा।
वज्रजंघः कुमाराभ्यां प्रविष्टो बलसंयुतः।।76।।

गजाः पर्वतसंकाशा अश्वाः पवनरंहसाः।
रथा विमानसंतुल्याः सुरैः समाः पदातयः।।77।।

नृत्यद्भिर्नर्तकीवृन्दैर्वाद्यनिर्घोषसंयुतैः।
बन्दिभिर्वृन्दसंयुक्तैः प्रविष्टो नगरं नृपः।।78।।

गवाक्षस्थैर्जनैस्तत्र दृश्यमानौ कुमारकौ।
राजमार्गे गजारूढौ गच्छतौ लीलयान्वितौ।।79।।

राजद्वारं परीप्राप्तौ कृतमङ्गलसत्क्रियौ।
अवतीर्य गजात्तौ च प्रविष्टौ राजमन्दिरम्।।80।।

वज्रजङ्घेन सार्द्धं तौ कुमारौ वनितादिभिः।
पूजितौ मङ्गलद्रव्यैर्वस्त्रादिवरवस्तुभिः।।81।।

भ्रात्रा सीता समालिङ्ग्य ततः पुत्रौ च पादयोः।
सीतायाः सन्नतौ भक्त्या कुलिनौ विनयान्वितौ।।82।।

आशीर्दानेन ते सर्वे तोषिताः सीतया मुदा।
पुत्रयोर्वदनं प्रीत्या चुम्बितं स्पर्शितं करैः।।83।।

सन्तुष्टा बान्धवान्दृष्ट्वा कुमारौ लवणाङ्कुशौ।
स्नात्वा भुक्त्वा सुखासीना मण्डपे मणिमण्डिते।।84।।

ततो गत्वा गृहं स्वस्य भोगान् भुञ्जन्ति भूरिशः।
संस्थिताः सुखिनो भूत्वा पुण्डरीकपुरे नृपाः।।85।।

अथैकदा गतोऽयोध्यानगरं नारदो मुनिः।
अन्तर्गृहं गतः प्रीत्या रामाद्यैर्मानितो मुदा।।86।।

वैशल्यादिमहादेव्यो दृष्ट्वाऽथ नारदोऽवदत्।
सीता न दृश्यते कस्मान्मन्दिरे रामसत्प्रिया।।87।।

कृतान्तास्यस्ततोऽवोचन्नारदं कलहप्रियम्।
सीता सिंहवने त्यक्ता रामस्यानुज्ञया मया।।88।।

तच्छ्रुत्वा नारदो दुःखङ्कृत्वा निःसृतस्तद्गृहात्।
जानक्यन्वेषणं कर्तुं देशान् भ्रमति भ्रान्तितः।।89।।

पुण्डरीकपुरं प्राप्तो भ्रमन्कदापि नारदः।
वज्रजङ्घेन सम्पूज्य मानितः परमादरात्।।90।।

भूपं सम्पृच्छ्य देवर्षि गतोऽभ्यन्तरमन्दिरम्।
दृष्ट्वा सीताञ्च सन्तुष्टो गोवत्सो मातरं यथा।।91।।

आगतं नारदं दृष्ट्वा सीता भक्तिसमन्विता।
नत्वा पादौ मणेः पीठं दत्वाऽस्याग्रे स्वयंस्थिता।।92।।
नारदः प्राह हे सीते सुखमस्ति तवाधुना।
तस्याग्रे सीतया सर्वं कथितं साश्रुनेत्रया।।93।।
तावत्तत्र समायातौ कुमारौ लवणाङ्कुशौ।
देवर्षेश्चरणौ नत्वा समाविष्टौ तदाऽग्रतः।।94।।
रामलक्ष्मणयोस्तुल्यं सम्पद् भूयाच्च युवयोः।
इत्युक्ता नारदो ताभ्यां दत्ताशीर्वचनक्रिया।।95।।
एतच्छुत्वा कुमाराभ्यां पृष्ठः कोपेन नारदः।
कौ तौ लक्ष्मणपद्माभौ वाञ्छावः सम्पदां ययोः।।96।।
सोऽवोचत्किं भवद्भ्यां तौ न श्रुतौ बलिकेशवौ।
याभ्यां हतो दशवक्त्रः सीता त्यक्ता वने घने।।97।।
कौशले कुरुते राज्यं त्रिखण्डनृपसेवितम्।
पद्माभस्य भवन्तौ द्वौ पुत्रौ जातौ पुरेऽत्र च।।98।।
तच्छ्रुत्वा जननी ताभ्यां पृष्टा विश्वासकारिणी।
सीतयाऽतस्तयोरग्रे मूलादारभ्य भाषितम्।।99।।
विना दोषेण रामेण त्यक्ताऽहं जनवाक्यतः।
रक्षिता वज्रजङ्घेन ततो दृष्टं भवन्मुखम्।।100।।
ततस्तावतिकोपेन प्रोद्यतौ लवणाङ्कुशौ।
चतुर्बलेन संयुक्तौ मारितुं बलिकेशवौ।।101।।
तदा प्राहाङ्कुशः पश्य कथं पद्मेन नारदः।
त्यक्ता सीता जनवाक्यात्कानने जनवर्जिते।।102।।
अयोध्यायां न कोऽप्यस्ति पण्डितो न्यायवेदकः।
सतीनामग्रणी सीता यतस्त्यक्ताऽस्ति कानने।।103।।
कतियोजनदूरेऽस्ति साकेतनगरं मुने।
यत्रास्ति रामदुष्टात्मा व्यर्थं गर्वेण पूरितः।।104।।

वज्रजङ्घेन सीताऽसौ रक्षिताऽस्ति न चेत्तदा।
मृताऽस्ति दुष्टजीवैश्च पीडिता गर्भिणी परा।।105।।
ततो जगाद देवर्षिरतो योजनषष्टिकम्।
शतेन सहितं दूरं साकेतपुरमस्ति भो।।106।।
नारदोक्तिं लवः श्रुत्वा वज्रजङ्घमिदमवदत्।
माम त्वं सज्जतां सैन्यं जेष्याम्याऽऽर्यस्थभूमिपान्।।107।।
तच्छुत्वा वज्रजङ्घेन गजाश्वस्यन्दनादयः।
अलङ्कृताः शुभै रत्नैः शस्त्रैर्नानाविधैर्भृताः ।।108।।
जगाद तनयं सीता बलिनौ रामलक्ष्मणौ।
ताभ्यां सार्द्धं न युक्तं ते युद्धितुं रणमण्डले।।109।।
त्रिखण्डेशो दशास्यो यो राक्षसो विद्यया युतः।
सोऽपि रणे हतो याभ्यां तौ कथं हन्यते त्वया।।110।।
लवणः प्राह सीतां नाऽहं परस्त्रीषु लम्पटः।
त्वत्साक्षी सङ्गरेऽहं तौ नेष्यामि रणभङ्गताम्।।111।।
इत्युक्तौ निर्गतौ वीरौ महाबलेन संयतौ ।
ताभ्यां समं नृपा लग्ना बलिनौ बलसंयुताः।।112।।
सिन्धुदेशाऽधिपः पोदनपुरभूपतिस्तथा।
वज्रजङ्घादयः पञ्चसहस्राणि सुसङ्गताः।।113।।
बहुदेशान् समुल्लङ्घ्य जित्वाऽनेकनराधिपान्।
कौशलविषयं प्राप्तं सैन्यं तयोः कुमारयोः।।114।।
संलुण्ट्य सकलं देशं धृत्वा बन्धे च दुर्जनान्।
अयोध्यासन्निधिं सैन्यं स्थापितं समहोत्सवम्।।115।।
कुमारौ ददतौ दानं याचकेभ्यो यथेप्सितम्।
दुःखी न वर्तते कश्चित्तत्सैन्ये बहुदानिभिः[13] ।।116।।
अभ्यर्णमागतं श्रुत्वा परबलं बलान्वितम्।
लक्ष्मणं प्रोचे पद्माभः सज्यताञ्चातुरं बलम्।।117।।

येषामुपरि चावाभ्यां गन्तव्यं [14]हेतुसङ्गरे ।
स्वयं ते त्वत्र पापेन चाऽऽगता मृत्युप्रेरिताः ।।118।।
वज्रजंघः कियन्मात्रः पुण्डरीकपुराधिपः ।
जम्बूकः सिंहतां प्राप्तः सम्प्राप्य मृगपार्थिवान् ।।119।।
ततो जगाद लक्ष्मीशः समाहूय विराधितम् ।
वेगादाहूयतां भूपान् सुग्रीवादीन् खगेश्वरान् ।।120।।
ततस्ते दूतमात्रेण विभीषणादिखेचराः ।
ससैन्या भूचरश्चापि साकेतपुरमागताः ।।121।।
सज्जिताः स्यन्दनाः स्थूलाः गजाश्च रत्नभूषिताः ।
अश्वा मुक्तादिमालाभिरङ्गरक्षादिकैस्तथा ।।122।।
रणभेरीं सुसंताड्य समाहूतास्तदा भटाः ।
ततः कलकलो जातो भटानान्तु परस्परम् ।।123।।
सिंहिकरथमारूढो रामः प्रथमनिर्गतः ।
गरुडस्यन्दनारूढो लक्ष्मणश्चक्रसंयुतः ।।124।।
सुग्रीवो वानराधीशो राक्षसेशो विभीषणः ।
हनूमान् विद्यया युक्तो भामण्डलः सुराधिपः ।।125।।
नलनीलाङ्गदा वीरा विराधितादिखेचराः ।
स्वस्य वाहनसंयुक्ताश्चतुर्बलेन संयुताः ।।126।।
अग्निशिखः सुमेरुश्च बालिलीलस्तथाऽरिजित् ।
वज्रकर्णो रौद्रभूतिर्हरिवाहनभूपतिः ।।127।।
लक्ष्मणतनया रमयास्तथा रामात्मजाः पराः ।
शत्रुघ्नस्तस्य पुत्राश्च तथाऽन्ये रघुवंशजाः ।।128।।
इत्यादिबहवो भूपा निर्गता भूचरास्तदा ।
महावाहनशस्त्रादिबहुभूषणभूषिताः ।।129।।
उभयोः सेनयोस्तत्र सञ्जातं दृष्टिमेलनम् ।
रणभेर्यश्च सङ्ग्रामसूचिकाः ताडिताः परा ।।130।।

राघवस्य बलं दृष्ट्वा विमानस्थाह जानकी।
ससिद्धार्था च देवर्षि किमाऽऽरब्धं त्वया मुने।।131।।
कुमारौ कोमलौ चोभौ भूचरभूमिपैर्युतौ।
जयिष्यतः कथं वीरौ सङ्गामे राक्षसोपमे।।132।।
बहुभिः खेचरैर्युक्तौ बलिनौ बलकेशवौ।
हनिष्यतोऽत्र मत्पुत्रौ मे तद्दुःखं[15] भविष्यति।।133।।
तच्छ्रुत्वा नारदोऽवोचत् सीते मा भैषि चेतसि।
मुक्तिगामिनौ ते पुत्रौ वज्रदेहसमन्वितौ।।134।।
इत्युक्त्वा नारदः सीतां स्वयं भामण्डलान्तिकम्।
गत्वोचे सर्ववृतान्तं जानकीपुत्रयोर्भवम्।।135।।
भामण्डलोऽथ तच्छ्रुत्वा तुष्टस्तदा स्वचेतसि।
हनूमता समं वेगात्सीतायाः सन्निधिङ्गताः।।136।।
दृष्ट्वा सीतां सुखासीनां नत्वा पादौ पुरः स्थितौ।
आशीर्वादेन जानक्या तोषितौ साऽश्रुनेत्रया।।137।।
क्षेमादिकं ततः पृष्ट्वा तुष्टास्तेऽथ परस्परम्।
तावत्तत्र समायातौ कुमारौ लवणाङ्कुशौ।।138।।
तेषां मेलापकं जातं परमं तुष्टिकारणम्।
वज्रजंघादिका भूपास्तुष्टाश्चित्ते महादराः।।139।।
भामण्डलहनूमन्तौ स्वसैन्येन समन्वितौ।
लवणाङ्कुशयोः पक्षं रामं त्यक्त्वा समाश्रितौ।।140।।
तद् दृष्ट्वा खेचराः शेषा माध्यस्थभावमाश्रिताः।
स्वस्य सैन्यसमायुक्ताः स्थिताः सङ्गरवर्जिताः।।141।।
तदा भूचरयोः सैन्यं युद्धत्यत्र परस्परम्।
लवणस्य भटैर्वीरैर्मारिता राघवी चमूः।।142।।
तदाऽरिघ्नो नृपो रोषादुत्थितो बलविक्रमी।
तेन प्रबाधितं सैन्यं पलायितं कुमारयोः।।143।।

तद् दृष्ट्वा प्रोत्थितौ वीरौ स्वयं तौ लवणाङ्कुशौ।
ताभ्यां बाणेन शत्रुघ्नः पातितो रथमस्तकात्।।144।।
ततः पद्माभलक्ष्मीशौ रथारूढौ रणाञ्जिरे।
आगतौ बलसम्पन्नौ कुर्वन्तौ तौ नृणां क्षयम्।।145।।
लवेन सह पद्माभः कुशेन सह लक्ष्मणः।
वज्रजङ्घेन शत्रुघ्नो युद्धन्ति ते परस्परम्।।146।।
पार्थिवाः कोटिसङ्ख्याताः पद्मस्य पक्षवर्त्तिन:[16]।
पञ्चाशल्लक्षभूपालाः कुमारपक्षसङ्गताः।।147।।
तेषां जातं महद्युद्धं बहुप्राणिक्षयङ्करम्।
गजाः पर्वतसङ्काशाः[17] पतिता: मणिभूषिताः।।148।।
रथा: भग्ना: विमानाश्च मृता रम्यास्तुरङ्गमाः।
भटाः प्राणविनिर्मुक्ता रत्नकुण्डलभूषिताः।।149।।
रक्तनदीप्रवाहेन प्लावितं सकलं बलम्।
तुरङ्गखुररेणुभिस्तत्पुनः[18] कर्दमीकृतम्।।150।।
अन्तर्जालं दृढं बध्वा युद्धन्ति सुभटाः पुनः।
शिरोभिर्वजिताः केचिन्मारन्ति जीवितान्नरान्।।151।।
बाणराशिः प्रयोक्ताऽपि लवेण निष्फलीकृताः।
पुनः प्रयोक्तं रामेण लाङ्गुलं लवणं प्रति।।152।।
तदापि लवणेनाशु छेदितं बाणघातनैः।
पुनर्मुशलं रामेण लवं[19] हन्तुं प्रयोगितम्।।153।।
लवेण तच्च दण्डेन भग्नं मुशलमायुधम्।
लवेण बाणघातेन भग्नो रामस्य स्यन्दनः।।154।।
अन्यं रथं समारूढो रामो व्याकुलताङ्गतः।
पश्याहो दैवयोगेन सर्वं मे निष्फलङ्गतम्।।155।।
खेचरा ये परं [20]भक्तास्तेऽपि दुर्जनताङ्गताः।
देवाधिष्टितमस्त्रमेतदप्यनेन छेदितम्।।156।।

भूचरा ये नृपाः सन्ति ते चाऽप्यनेन मारिताः।
मेऽप्यनेन रथो भग्नस्त्रिवारं बलवर्तिना[21]।।157।।
इति चिन्तयतस्तस्य रामस्य हृदयस्थलम्।
भिन्नं लवेन दण्डेन शरेण कदली यथा।।158।।
मूर्च्छां सम्प्राप्य पद्माभः पतितो भूतले तदा।
स्वबले भूमिपैश्चाऽसौ नीतो रथेन संयुतः।।159।।
तथा च सागरावर्तं[22] धुनरादाय लक्ष्मणः।
दधाव चाङ्कुशं हन्तुं कोपपूरितमानसः।।160।।
शरवृष्टिः कृता तेनाङ्कुशेन ततो कुशेन सा।
निवारिताऽसिघातेन महाविज्ञानकारिणा।।161।।
लक्ष्मणेन गदाशस्त्रं प्रेरितं मदनाङ्कुशे।
तदप्यङ्कुशवीरेण धनुर्दण्डेन वारितम्।।162।।
एवं तयोर्महायुद्धं जातम्भूतविचित्रितम्।
ततोऽङ्कुशेन व्रजेण ताडितो लक्ष्मणो हृदि।।163।।
मूर्च्छां प्राप्यं रथे चाऽसौ पतितो लक्ष्मणस्तदा।
निवर्तितो रथोऽयोध्यां प्रतिविराधितेन सः।।164।।
अर्द्धमार्गे ततो गत्वा सञ्ज्ञां सम्प्राप्यः लक्ष्मणः।
किं भो निवर्तितो मूढ रथो रणस्य भूमितः।।165।।
पृष्टिं क्वचिन्न दातव्या शत्रोरग्रे मृतेष्वपि।
वरं प्राणं परित्यागो न तु पृष्टेः प्रदर्शनम्।।166।।
विराधितेन व्याघ्रुट्य रथो नीतो रणं प्रति।
पुनरङ्कुशवीरेण समं युद्धति लक्ष्मणः[23]।।167।।
बाणवृष्टाङ्कुशेनाऽसौ छादितो रणवेदिना।
सप्तवारां रथाच्चापि पतितस्तेन लक्ष्मणः।।168।।[24]
ततस्तीव्रप्रकोपेन लक्ष्मणेनाङ्कुशं प्रति।[25]
प्रेरितं चक्ररत्नं तं परीत्य पुनरागतम्।।169।।

क्षिप्तं[26] क्षिप्तं प्रकोपेन लक्ष्मणेन त्वरावता।
चक्रमन्तिकमस्यैव प्रत्यायाति पुनः पुनः ।।170।।
सप्तवारान् प्रयोक्तं तत् गोत्रबाधां करोति न।
मुक्तिगामिनमेनं वा छिन्नत्ति न सुदर्शनम् ।।171।।
ततोऽङ्कुशेन हर्षेण धनुर्दण्डश्च भ्रामितः।
तं दृष्ट्वा सकला भूपाः सम्प्राप्ताः कौतुकं परम् ।।172।।
किं जातोऽयं प्रतिचक्री किं वा रावण आगतः।
जातो वा सकलश्चक्री वदन्तीतीह मानवाः ।।173।।
ततो जगाद लक्ष्मीशः सत्यमेतौ च भारते।
क्षेत्रे जातौ बलोपेतौ बलाढ्यौ बलकेशवौ ।।174।।
वा जिनवचनं क्वापि मृषावादं न जायते।
चक्रिणामुपरि चक्री जायते न कदापि वै ।।175।।
एतौ तु बलिनौ कौचित्समुद्भूतौ नरौत्तमौ।
मम पुण्यक्षयं प्राप्तं रणेऽहं भङ्गताङ्गतः ।।176।।
इत्यादिवचनैः शोकं कृत्वा निष्क्रियलक्ष्मणः।
स्थितो दुश्चित्तभावेन काष्ठनिर्मितबिम्बवत् ।।177।।
ततो नारद सिद्धार्थौ लक्ष्मणस्याऽन्तिकङ्गतौ।
कस्मात्करोषि दुःखं त्वं रामस्य तनयाविमौ ।।178।।
या त्यक्ता कानने सीता गर्भभारसमन्विता।
सा नीता वज्रजङ्घेन भगिनीत्युक्ता स्ववेश्मनि ।।179।।
तस्या एतौ कुमारौ द्वावागतौ कोपसंयुतौ।
मातुर्दुःखतरं श्रुत्वा कानने गर्भसम्भवम् ।।180।।
भवद्भ्यां सा यतस्त्यक्ता तत एतौ समागतौ।
भवतामुपरि वीरौ सङ्गरे प्राणिनां क्षये ।।181।।
तच्छ्रुत्वा लक्ष्मणो वीरो दुःखं कृत्वा रथात्तदा।
उत्तीर्यत रथात्तस्मात्पद्माभस्यान्तिकङ्गतः ।।182।।

गन्धादिशीतलद्रव्यैः सिञ्च्यमानोऽथ राघवः।
सञ्ज्ञां प्राप्तस्ततस्तस्मै कथितः सर्ववृत्तकः।।183।।

तदाऽऽगतौ कुमारौ द्वौ रामस्य चरणौ नतौ ।
ततः पुत्रौ परिष्वज्य सन्तुष्टौ रामलक्ष्मणौ ।।184।।

हा ! गर्भस्थौ मया त्यक्तौ पुत्रौ दुष्टवनाऽन्तरे।
पुण्येन वृद्धितां प्राप्तौ वज्रजङ्घस्य वेश्मनि।।185।।

निर्दोषा जानकी लोकवाक्यात्त्यक्ता मया वने।
पुण्याच्च वज्रजङ्घेन रक्षिता स्वगृहे च सा।।186।।

इत्यादि वचनैः रामः करोति लपनं बहु।
तच्छ्रुत्वा मनुजाः सर्वे रुदन्ति करुणारसम्।।187।।

तदाऽत्र खेचराः सर्वे रामस्यान्तिकमागताः।
शत्रुघ्नादिनृपा भूपा आगताः कौतुकात्परा।।188।।

त्यक्तवैरा रणं त्यक्ता सैनयोरुभयोर्भटाः।
सम्प्राप्तमित्रबन्धुत्वं परमं तोषकारणम्।।189।।

दृष्ट्वाऽथ पुत्रमाहात्म्यं विमानेन गता तदा।
पुण्डरीकपुरं सीता परमहर्षपूरिता।।190।।

तया सार्द्धं गता नार्यो भामण्डलस्य प्रेमदा।
ततो भामण्डलो नीलो सुग्रीवश्च विभीषणः।।191।।

नलाङ्गाऽङ्गदहनूमांस्तथाऽन्ये च खगेश्वराः।
वेगात्पुण्डरीकं प्राप्ताः सीतादर्शनलालसाः।।192।।

दृष्ट्वा सीतां नताः पादौ परमं प्रेमनिर्भराः।
तथाशीर्वाददानेन तोषिताः खेचराधिपाः।।193।।

सुखदुःखादिजां वार्तां सीतोक्तां परमां खगाः।
श्रुत्वा तुष्टाः स्थितास्तत्र याममेकं सुखावहाः।।194।।

अयोध्यायां पुनः प्राप्ता जानक्यनुज्ञया खगाः।
केचिन्नृत्यन्ति गायन्ति समुच्छलन्ति खाङ्गणे।।195।।

पुत्रयोः सङ्गमं प्राप्य सन्तुष्टौ रामलक्ष्मणौ।
खेचरा भूचराः सर्वे परमं तोषमागताः ।।196।।

ततो घण्टापताकाद्यैः साकेतं भूषितं पुरम्।
प्रविष्टौ पुत्रसंयुक्तौ सभूपौ बलकेशवौ।।197।।

विमानपुष्पकारूढौ पुत्राभ्यां रामलक्ष्मणौ।
स्वस्वविमानमारूढा भामण्डलादिखेचराः।।198।।

गजारूढा अरिघ्नाद्या भूचरा वाद्यसंयुताः।
नृत्यद्भिर्नर्त्तकीवृन्दैर्बन्दिभिर्वृन्दजल्पितैः ।।199।।

प्रेक्ष्यमाना गवाक्षस्थैर्नरनारीभिरावृताः।
प्राप्ता नृपगृहद्वारं पूज्यमानाः पदे पदे।।200।।

रघूनां वनिताभिश्च कृता मङ्गलसत्क्रिया।
आर्त्तिकादि सुपूजाभिः पूजिता राघवादयः।।201।।

क्षणैकं मण्डपे स्थित्वा ततश्चाऽन्तर्महङ्गताः।
स्नात्वा भुक्त्वा नराः सर्वे संस्थितास्ते यथायथम्।।202।।

रामलक्ष्मणवीराभ्यां वज्रजङ्घोऽथ पूजितः।
गन्धभूषणसद्वस्त्रैस्ताम्बूलैर्वरवस्तुभिः ।।203।।

पुण्येन लक्ष्मीर्महतीगृहे स्यात्
संयोगभोगाः प्रभवन्ति पुण्यात्।
स्वर्गादिसम्पद्भवतीह लोके
मुक्तेश्च सौख्यं क्रमतो विधेहि।।204।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
लवणाङ्कुशाभ्यां रामलक्ष्मणयोर्मेलापकवर्णनो नाम त्रिंशत्तमोऽधिकारः।।30।।

❖❖❖

१. तस्याग्रसंस्थिताः इति क प्रतौ
२. ततौवत्तत्र इति ख प्रतौ
३. कामसममनोहरौ इति क प्रतौ
कामकरौ मनोहरौ इति ख प्रतौ
४. इत्युक्तैकान्तगृहावासे इति क/ख प्रतौ
५. कामशास्त्रे इति ख/ग प्रतौ
६. दरिद्रिणः इति क प्रतौ
दरिद्रिणेः इति ख प्रतौ
७. मूर्खोसि इति ख प्रतौ
८. भक्तुं इति ख प्रतौ
९. वंशपुरे इति ख/ग प्रतौ
१०. एषः श्लोक क प्रतौ न वर्तते।
११. वातकोमलौ इति क प्रतौ
बालकोमलौ इति ख प्रतौ
१२. नन्दितौ इति त्रयौ प्रतौ, प्रसङ्गवशात् 'निन्दितौ' उचितं स्यात्।
१३. बहुदानिनः इति ख प्रतौ , बहुदानिनि इति ग प्रतौ
१४. हन्तु इति क/ग प्रतौ
१५. मे तो इति क प्रतौ , मता दुरकं इति ग प्रतौ
१६. पद्मपक्षवर्तिनः इति ख प्रतौ
१७. गजा पर्वत शंकाशाः इति क प्रतौ
१८. तुरङ्गखरवेणुभित्पुनः इति ख प्रतौ
१९. लवणं इति ख प्रतौ
२०. भक्त्या इति क/ख प्रतौ
२१. लववर्तिना इति ख प्रतौ
२२. सागरावृतं इति ख/ग प्रतौ
२३. एषा पङ्क्तिः ग प्रतौ अनुपलब्धा।
२४. एषः श्लोकः ग प्रतौ अनुपलब्धा।
२५. एषा पङ्क्तिः ग प्रतौ अनुपलब्धा।
२६. क्षिप्रं इति क प्रतौ

❖❖❖

एकत्रिंशत्तमोऽधिकारः

एकस्मिन् दिवसे रामं विज्ञप्ता खेचराधिपाः।
विभीषणश्रीशैलाद्याः करयुग्मशिरः कृताः।।1।।
स्थिता दुःखे सती सीता पुण्डरीकपुरे शुभे।
आज्ञां देहि समानेतुं नाथ त्वं करुणाकरः।।2।।
तच्छ्रुत्वा वाष्पनेत्राश्रुपूरितः प्राह राघवः।
वेद्मि शीलवतीं सीतां परन्तु दूषिता जनैः[1]।।3।।
यदि तया समं गेहे वसामि दुर्जनाः जनाः।
अपवादं वदिष्यन्त्यनाचारतत्पराः स्वयम्।।4।।
तस्मात्सकललोकानां प्रत्ययं क्रियते तया।
दिव्यं वह्निप्रवेशादि[2] तिष्ठाम्यतस्तया समम्।।5।।
तथाऽस्त्विति खगाः प्रोच्य विमानस्थाश्च निर्गताः।
सुग्रीवाद्या समस्तास्ते पुण्डरीकपुरङ्गताः।।6।।
सीतायाश्चरणौ नत्वोपविष्टा विनयान्विताः।
ऊचे विभीषणो राजा श्रृण्वंते विनयं मम[3]।।7।।
कुरु प्रत्याय लोकस्य प्रमाणं जनसाक्षिकम्।
ततो रामेण साकं त्वं शचीव तिष्ठ तद्गृहे।।8।।
ततो जगाद सा सीता वाष्पोष्णजललोचना।
अलं भोगेन भो बन्धो पापिन्या मम संसृतौ।।9।।
अस्मिन् जन्मनि भो[4] राजन् ! न च दृष्टं सुखं क्वचित्।
कृतं पापघनं पूर्वं तदेव भुञ्ज्यते मया।।10।।
येनाहं कानने त्यक्ता निर्वाक्यात्गर्भसंयुता।
दर्शामि किं मुखं तस्मै कलङ्कदोषदूषितम्।।11।।
राक्षसेशः पुनश्चाहं दुःखं मा कुरु जानकि।
सर्वं कर्मानुभावेन दुःखं जातं तवाम्बिके।।12।।
प्रमाणं कुरु लोकस्य प्रत्याय[5] परमेश्वरि।
तथा कृते च ते कीर्त्तिर्भविष्यति त्रिविष्टपे।।13।।

त्वं स्वभावेन शीलाद्या रामस्य प्राणसन्निभा।
तवोपरि महाप्रीतिरद्याऽपि तस्य वर्तते।।14।।

अयोध्या च त्वया मुक्ता शोभां न दधते क्वचित्।
अतो रामेण पुष्पाख्यं विमानं त्वाञ्च प्रेषितम्।।15।।

तथास्त्विवति जनसाक्षं प्रमाणं प्रकरोम्यहम्।
इत्युक्त्वा जानकी वेगाद्विमाने संस्थिता मुदा।।16।।

महेन्द्रोद्यानं वैदेही[6] समागता खगैर्वृताः।
बहुभिः खगनारीभिः समं स्थिताऽत्र मण्डपे[7]।।17।।

पद्माज्ञया तदा तत्र विराधितेन रंहसा।
कृता मण्डपशालाश्च प्रासादास्तोरणान्विताः।।18।।

स्तम्भा रत्नकृता रम्या दानशालाश्च भूरिशः।
द्वादशक्रोशपर्यन्तं रत्नकूटिमभूकृताः।।19।।

मण्डपेषु मणिस्तम्भा हैमशिलादिच्छादिताः।
मुक्तामाला परा बन्धा रम्भास्तम्भविराजिता।।20।।

इत्यादिमण्डपे शोभा कृता योजनद्वादश।
सर्वत्र पत्रिका लोकमाह्वयितुञ्च प्रेषिताः।।21।।

द्व्यर्द्धद्वीपस्थिता भूपाः सकुटुम्बा नभश्चराः।
आगताः कौतुकं द्रष्टुं स्वस्वविभवसंयुताः।।22।।

भूचरा नरनार्योऽपि बालवृद्धसमन्विताः[8]।
सीतायाः कौतुकं द्रष्टुं भारतस्था समागताः।।23।।

केचिद् गायन्ति नृत्यन्ति केचित्पश्यन्ति कौतुकम्।
केचित् खेलन्ति वाजिस्था गजारूढास्तथाऽपरे।।24।।

एवं महेन्द्रनाम्नीह वने जनैः सुसम्भृते।
चन्द्रप्रभजिनेन्द्रस्य पद्माभो मण्डपे स्थितः।।25।।

लक्ष्मणाऽरिघ्नबुद्धीश लवाङ्कुशजयादिकाः।
त्रिखण्डस्था नृपाः सर्वे रामस्य सन्निधिं स्थिताः।।26।।

तथा विभीषणाद्याश्च खगा राममिदं जगुः।
देवाज्ञां दीयतेऽस्मांश्च सीतऽऽनेतुं तवान्तिकम्।।27।।

तथास्त्विति ततो गत्वा चानीता जानकी खगैः।
गजारूढा शचीरूपा शीलभूषणभूषिता।।28।।

अहोरूपमहो धैर्यमहोशीलमहो गुणाः।
इति वदन्ति सीतां तां दृष्ट्वा लोकाः सुकौतुकाः।।29।।

आगच्छन्तीं सतीं दूरे सीतां दृष्ट्वाऽथ भूमिपाः।
उत्थिता लक्ष्मणाद्याश्च वन्दितुं तत्पदौ मुदा।।30।।

धावमाना गतास्तत्र सीतायाश्चरणौ नताः।
लवणाऽङ्कुशशत्रुघ्नलक्ष्मणप्रमुखा नृपाः।।31।।

गजादुत्तीर्य सा सीता रामदर्शनलालसा।
आगच्छत्यतिवेगेन हर्षपूरितमानसा।।32।।

तां दृष्ट्वा चेतसि प्रोचे पद्म ऊदास्यभावतः।
मयेयं कानने त्यक्ता कथमत्र च साऽऽगता[9]।।33।।

लज्जया रहिता सीता दुष्टेयं गर्वपूरिता।
मां न जहाति चाद्यापि कृत्वा वैराग्यदीक्षितम्[10]।।34।।

पुनर्नायाति लज्जा वाऽनेकवारं[11] न निराकृता।
इयन्तु कानने त्यक्ता कस्माच्च[12] पुनरागता।।35।।

पद्माभस्याङ्गितं ज्ञात्वा सीता व्याकुलचेतसा।
तथापि रामदेवस्य पादौ नत्वा पुरस्थिताः।।36।।

पादाऽङ्गुष्ठेन भूमिं सा खनन्ती लज्जयान्विता।
चित्ते चिन्तयति सीता कस्मादहं समागता।।37।।

यदि प्राणं त्यजाम्यत्र तदा मे दुर्गतिं भवेत्।
पुण्डरीकं गमिष्यामि तदा मे लज्जनं भवेत्।।38।।

ततो जगाद पद्माभो गच्छ सीते पुरः कथम्।
स्थिताऽसि लज्जया मुक्ता किञ्चिदादरवर्जिता।।39।।

षण्मासान् दशवक्त्रस्य गृहेस्था व्यभिचारतः।
मुखं दर्शयितुं स्वस्य समागताऽसि मे पुरम्।।40।।
जानाम्यहं न ते दोषान् लोकः सर्वविचक्षणः।
तेषां वचनमात्रेण ज्ञाता दोषास्तु ते मया।।41।।
सीता प्राह ततः पद्मं दुष्टस्त्वं रघुनन्दन।
अद्याऽपि नाथ चित्तं ते न सञ्जातं तु निर्मलम्।।42।।
मे चित्ते स्तश्च त्वत्पादौ तव चित्तं तु निष्ठुरम्।
मया सार्द्धं कदाचित्ते नास्ति सद्भाववेदनम्।।43।।
कुरु नाथ कृपां मे त्वं कृपासागर राघव।
दरिद्रिणाञ्च नारीणां शरणं त्वञ्च दुःखिनाम्।।44।।
एवं गतेऽपि पद्माभः प्रसीद किमहोरुणा[13]।
कथितो न प्रयच्छाज्ञामित्युक्ता दुःखिताऽरुदत्।।45।।
पद्मनाभस्ततोऽवोचन्निर्मलीभूतमानसः।
वेद्मि त्वां देवि शीलाढ्यां परनरपराङ्मुखाम्[14]।।46।।
तथापि लोकप्रत्याय कुरु दिव्यं जनाग्रतः।
तथाऽस्त्वित्यूचे[15] सा सीता पद्माभे प्रीतिसङ्गता।।47।।
सर्पमुखे करं क्षिप्त्वा तुभ्यं दास्यामि मुद्रिकाम्।
दारुणं वा विषं देहि भक्षिष्यामीति निश्चयात्।।48।।
लोहस्य गोलकं तप्तं धरिष्यामि करद्वये[16]।
सरोजले प्रविश्यामि तप्तवङ्गं पिबामि[17] वा।।49।।
पद्मोऽवोचच्क्षणं स्थित्वा वह्नौ कुरु प्रवेशनम्।
साह देव प्रविशामि क्रियतां वह्निकुण्डकम्।।50।।
नारदः प्रोच पद्माभं तथाकृते मरिष्यति।
जानकी वह्निना दग्धा शीलवत्यस्ति यद्यपि।।51।।
मातुर्मृत्त्युं विनिश्चत्य रुदतौ[18] लवणाऽङ्कुशौ।
भामण्डलोऽपि तत् ज्ञात्वा परमव्याकुलोऽभवत्।।52।।

श्री शैलाद्याः खगाः सर्वे रुदन्ति करुणाकरम्।
ततो जगाद सिद्धार्थः सो केनाऽस्त्यत्र कारणम्।।53।।

शीलवती सदा सीता[19] वह्नौ प्रविश्य दारुणे।
आगमिष्यति क्षेमेन प्राप्य पूजां सुरेन्द्रतः।।54।।

तपः कृतं मया पूर्वं यात्रा वा भूरिशः कृताः।
तन्मे निष्फलतां[20] यातान् सीतां विघ्नोऽभवद्यदि।।55।।

इत्युक्ते तत्र सिद्धार्थे तुष्टाः सर्वे नरेश्वराः।
वह्निं प्रवेशनं सर्वैः सीताया निश्चितं दृढम्।।56।।

तदा रामाज्ञया वह्नेः कुण्डो भटैश्च निर्मितः।
अधो द्वौ पुरुषौ ज्ञेयस्त्रिंशतकरविस्तरः।।57।।

चतुष्कोणैः समं भागः खादिरकाष्ठसम्भृतः।
वह्निना ज्वालितो ज्वालात् प्रसरन्ति नभाङ्गणे।।58।।

गगनस्थाः खगा वीरा भूमिस्था भूचरा नराः।
पश्यन्ति कौतुकं सर्वे कृत्वा कलकलं महत्।।59।।

तस्यां रात्रौ महेन्द्राख्ये वने ध्यानबलात्परम्।
उत्पन्नं केवलज्ञानं सर्वभूषणयोगिनः।।60।।

अपृच्छत् श्रेणिकश्चाऽथ गौतमं गणनायकम्।
तस्यामेव निशायाञ्च ज्ञानं जातं कथं मुने।।61।।

ततोऽवोचद् गणाधीशो विजयार्द्धोत्तरतटे।
गुञ्जाऽभिधानपत्ने च राजाऽभूत्सिंहविक्रमः।।62।।

तस्य श्रीरित्यभूद्भार्या पुत्रः सकलभूषणः।
अष्टौ शतानि तत्कान्ता अग्रा किरणमण्डला।।63।।

सपत्नीभिः कदाचित्स[21] चैत्रे नृपाय दर्शिता।
मैथुनिकेन सार्द्धं हेमशिखाख्येन क्रीडति[22]।।64।।

तां राजा सहसा वीक्ष्य परमं कोपमागतः।
पत्नीभिश्चोच्यमानश्च प्रसादं पुनरागतः।।65।।

सम्मदेनाऽन्यदा[23] सुप्ता साध्वी किरणमण्डला।
मुहुर्हेमशिखेनाऽत्र प्रमादात्समुपाददे ।।66 ।।
दृष्ट्वा तं सुतरां कुद्धो राजा[24] वैराग्यमागतः।
प्राव्रजीत्साऽपि मृत्वाऽभूद्विद्युदास्येति राक्षसी।।67।।
तस्य सा भ्रमतो भिक्षां कृत्वा त्रुटितबन्धनम्[25]।
मतङ्गजं परिक्रुद्धाः प्रत्यूह निरताऽभवत्[26]।।68।।
गृहद्वारे[27] रजोवर्षमश्वोक्ष्यभिमुखागमम्[28]।
कण्टकावृतमार्गत्वं तथा चक्रे दुरीहिता।।69।।
छित्वाऽन्यदा[29] गृहे सन्धिमेतं[30] प्रतिमयास्थितम्।
स्थापयत्यानने तस्य स चोर इति गृह्यते।।70।।
मुच्यते च पराभूय परमार्थपराङ्मुखैः।
महता जनवृन्देन स्वनता[31] बद्धमण्डलः।।71।।[32]
कृतभिक्षास्य[33] निर्यातः कदाचिद्भितक्षयाश्रितः।
हारं गलेऽस्य वध्वाऽति सा चोर[34] इति गृह्यते।।72।।[35]
अतिक्रूरमनाः पापा एवमादीनुपद्रवान्।
चक्रे सा तस्य निर्वेद[36]रहिता सततं परान्।।73।।
ततोऽस्य प्रतिमास्थस्य महेन्द्रोद्यानगोचरे।
उपसर्गं परञ्चक्रे पूर्ववैराऽनुबन्धतः।।74।।
वेतालैः करिभिः सिंहैर्व्याघ्रैरुग्रैर्महोरगैः[37]।
नानारूपैर्गुणैर्दिव्यं नारीदर्शनलोचनैः।।75।।
उपलवैर्यदाऽमीभिश्चलितं[38] नाऽस्य मानसम्।
तदा तस्य मुनीन्द्रस्य ज्ञानं केवलमुद्गतम्।।76।।
समवशरणं तस्य निर्माप्य सुरनायकाः।
स्वस्ववाहनमारूढा पूजां कर्तुं समागताः।।77।।
कृत्वा केवलिनः पूजां श्रुत्वा धर्मं जिनोदितम्।
प्रत्यागत्य स्थिता यत्र वह्निकुण्डः प्रदीप्यति।।78।।

नभस्थेषु विमानेषु स्थिता: शक्राः सुराः खगाः।
पश्यन्ति कौतुकं तत्र सीतायाः शीलसम्भवम्।।79।।

अथाङ्गारैर्भृतं कुण्डं दृष्ट्वा राम इदमवदत्।
ईदृशेऽहं कथं कुण्डे क्षिपामि जानकीं सतीम्।।80।।

सीतायाः सदृशी नारी नास्ति लोके कदापि च।
अनया रहितश्चाहं कथं स्थास्यामि विष्टपे।।81।।

यदि क्षिपामि नो सीतां वह्नौ तदा कुले मम।
स्यात्कलङ्कञ्च चन्द्रार्कौ यावत्तिष्ठतो भूतले।।82।।

मरिष्यति यदा सीता दग्धाऽग्निना तदा च माम्।
रुष्यन्ति भामण्डलाद्याः सीतायाः पक्षवर्तिनः।।83।।

यस्य वा मरणं वह्नौ लिखितमस्ति तस्य वै।
भवेन्नित्यमवाक्यञ्च किमत्र बहुजल्पनैः।।84।।

वह्निकुण्डसमीपस्थां सीतां दृष्ट्वा खगेश्वराः।
रुदन्ति नरनार्यश्च कृत्वा कारुण्यसंलपम्।।85।।

अहो साक्षाद्यमागारं वह्निकुण्डं कथं सती।
प्रविशति सुतौ त्यक्त्वा मुक्ताशां सर्ववस्तुनि।।86।।

तदा स्मृत्वा नमस्कारान् वृषभादीन् जिनानपि।
एकाग्रमनसा सीता स्मरती मुनिसुव्रतम्।।87।।

ततोऽवोचत्पुनः सीता मनसा वचसा यदि।
वाऽन्यं नरञ्च कायेन चोच्छितोऽस्ति तदा मम।।88।।

शरीरं क्रियते वह्नेर्भस्मिभावं तवाननात्।
मिथ्यादृशाङ्गतिर्या स्यात्तदेव वा भवेच्च माम्।।89।।

रामं विनाऽन्यमानुष्यो मनसाऽपि मया यदि।
चिन्तितोऽस्ति विकारेण तदा दहतु मे तनुम्।।90।।

मिथ्यादृशां निशाहारकारिणां मांसभक्षिणाम्।
गतिर्मे च भवेद्यन्यपुरुषश्चिन्तितो मया।।91।।

इत्युक्त्वा जानकी कुण्डे पतिता दृढमानसा।
यद्दृष्ट्वा योजनमात्रं पलायन्ति भयान्नराः ।।92।।
कुण्डधूमेन सर्वत्र व्याप्तं गगनमण्डलम्।
जानकी दृश्यते नैव कैरपि मनुजैस्तदा ।।93।।
प्रभामण्डलसुग्रीवश्रीशैललवणाङ्कुशाः।
लक्ष्मणाऽरिघ्नदेवर्षिसिद्धार्थप्रमुखाजनाः ।।94।।
कुर्वन्ति शोकसन्तापमहो रामेण जानकी।
पूर्वजन्माऽनुवैरेण संदग्धा वह्निकुण्डके ।।95।।
यद्यपि सद्व्रती योगी सञ्जयन्तमुनीश्वरः।
तथापि बाधितो लोकैः किं न मृतोऽस्ति सागरे ।।96।।
इत्युक्त्वा नरनार्योऽत्र रुदन्ति व्याकुलात्मकाः।
अहो सीते कथं कुण्डे मृताऽसि शीलसंयुता ।।97।।
वने गिरौ गुहादेशे सेवितः सीतया पतिः।
तथाऽप्यनेन संदग्धा वह्निकुण्डेऽत्र जानकी ।।98।।
गगनास्थास्तदा शक्राः प्रोचुः चेतसि सादराः।
माहात्म्यं यदि शीलस्य दर्शयिष्यामि नो जनान् ।।99।।
अनाचारं करिष्यन्ति लुप्त्वा शीलव्रतं जनाः।
इति सञ्चिन्त्य कुण्डेऽस्मिन् कृता जलस्य निर्झराः।।100।।
जानुमात्रं क्षणान्नीरं ततः स्तनसमं गतम्।
कण्ठमात्रं निमेषेण जलं तत्र समागतम् ।।101।।
ततो जलेन मञ्चस्थाः प्लाविताः सकलाः प्रजाः।
बालादयश्च पूत्कारान् कुर्वन्ति व्याकुलात्मकाः ।।102।।
अहो जननि भो तात भो भो पुत्राश्च बान्धवाः।
रक्षन्तु मां जले दुःखात् प्लावितं कोमलं परम् ।।103।।
ततो रामादिभूपेन्द्राः संयुज्य करयुग्मकम्।
इदं जगुः कुरु शान्तिं प्रजासु देवि जानकि ।।104।।

इत्यादिविनयैर्वाक्यैः शान्तं जातं क्षणाज्जलम्।
वापीमात्रजलं तत्र स्थितं निर्मलपूरितम्।।105।।
कुमुदैरुत्पलैः पद्मैश्चन्दनादिसुगन्धिभिः।
पानीयं छादितं भृङ्गैः शब्दितं मधुरैः स्वरैः।।106।।
हंसैः क्रौञ्चैश्चक्रवाकैः[39] शोभते जलमुत्तमम्।
काञ्चनरत्नसोपानैर्गोपुरे रत्नकूटिमैः।।107।।
सहस्रदलसंयुक्तं पद्ममेकं मनोहरम्।
तस्य मध्ये मणिचित्र्यं काञ्चनं सिंहविष्टरम्।।108।।
तत्र सेव्या सुरस्त्रीभिः स्थिता सीताऽथ निर्भया।
पुष्पवृष्टिरभूत्तत्र महावाद्याश्च शब्दिताः।।109।।
गन्धनीरस्य संवृष्टिः क्षिपन्ति चामराणि च।
नृत्यन्ति नर्तकीवृन्दा जयशब्देन संयुताः।।110।।
सतीयं सतीयं सीता चेति शब्दा नभस्तले।
खगाः सुराः प्रकुर्वन्ति पूजन्ति तत्र जानकीम्।।111।।
नभस्थाः खेचराः सर्वे नृत्यन्ति हर्षपूरिताः।
लक्ष्मणाद्या नरेन्द्राश्च कुर्वन्ति जयशब्दकान्।।112।।
जलं तीर्त्वा गतौ तत्र मातुः स्नेहाल्लवाङ्कुशौ।
संवन्द्य जननीपादौ सीतायाः पार्श्वयोः स्थितौ।।113।।
पद्मोऽपि खेचरैः सार्द्धं सीतायाः सन्निधिङ्गतः।
उत्तिष्ठ देवि गेहं स्वं गच्छाम प्रेमनिर्भरम्[40] ।।114।।
क्षान्तव्यञ्च त्वया देवि यत्कृतं दूषणं मया।
सतीनामग्रणी त्वं हि सती सर्वत्र विष्टपे।।115।।
अष्टसहस्रनारीषु भूत्वा मुख्यं सदा प्रिये।
तिष्ठ त्वं सदसि प्रीत्या मम प्राणस्य रक्षिणि।।116।।
ततो जगाद सा सीता देवाऽलं भोगसङ्गमैः।
तत्करिष्यामि येनात्र स्त्रीजन्म न भवेत्पुनः।।117।।

नाथ तव प्रसादेन भुक्त्वा भोगा अनेकशः।
अधुनाऽलञ्च संसारे कष्टेन स्त्रीषु जन्मना।।118।।

इत्युक्त्वा स्वशिरः केशानुत्पाद्य[41] स्वकरेण वै।
दत्ताः पद्मस्य हस्तेऽत्र वैराग्यात्सीतया तदा।।119।।

भ्रमरपृष्टिशङ्काशान् दृष्ट्वा केशान् सुगन्धिकान्।
मूर्च्छां सम्प्राप्य पद्माभः पतितोऽत्र महीतले।।120।।

यावदाश्वासनं तस्य प्रारब्धं चन्दनादिना[42]।
पृथ्वीमत्यार्यया तावद्दीक्षिता जनकात्मजा।।121।।

ततो दिव्यानुभावेन सा विघ्नपरिवर्जिता।
संवृत्ता श्रमणा साध्वी वस्त्रमात्रपरिग्रहा।।122।।

महाव्रतपवित्राङ्गा महासंवेगपूरिता।
देवाऽसुरसमायोगं ययौ चोद्यानमुत्तमम्।।123।।

पद्मो मौक्तिकगोशीर्ष[43] तालवृन्तानिलादिभिः।
सम्प्राप्तस्पष्टचैतन्यस्तङ्ग्न्यस्तनिरीक्षणः।।124।।

अपश्यन् राघवः सीतां शून्यभूतदशांशकः[44]।
शोककोपकषायात्मा समारुह्य महागजम्।।125।।

समुच्छ्रितसितछत्रश्चामरोत्करवीजितः[45]।
नरेन्द्रैरिन्द्रवद्देवैर्वृतो हस्तितलाङ्गलः।।126।।

केन मे च हृता सीता रक्षिता केन पापिना।
दण्डं तस्य करिष्यामि जीवनाशेन वा हनेत्[46]।।127।।

इतस्ततः सतीं यावत्पश्यति क्रोधपूरितः।
तावत्दृष्टं मुनीन्द्रस्य समवशरणं शुभम्।।128।।

क्रोधं त्यक्ता गजाद्वेगादुत्तीर्य रघुनन्दनः।
शुचिर्भूत्वा गतो यत्र केवली सर्वभूषणः।।129।।

पीठत्रयस्य मध्येऽधोऽशोकवृक्षस्य शोभिनः।
दिव्यत्रिछत्रसंयुक्तश्चामरैर्मण्डितः परम्।।130।।

अष्टसत्प्रातिहार्येण भूषितः शक्रपूजितो ।
द्वादशसुसभायुक्तः शोभते केवलीजिनः ।।131।।

अष्टप्रकारपूजाभिः रामेण पूजितो जिनः ।
स्तुत्वा स्तोत्रैः सहर्षैश्च मनुष्यसदसि स्थितः ।।132।।

लक्ष्मणाऽरिघ्नसुग्रीवभामण्डललवाङ्कुशाः ।
विभीषणहनूमन्तौ तथाऽन्येऽपि[47] नरेश्वराः ।।133।।

जिनं स्तुत्वा च सम्पूज्य रामस्य निकटे स्थिताः ।
देवमनुष्यतिर्यञ्चो यथायोग्यञ्च संस्थिताः ।।134।।

ततो भयनिनादाख्यगणेशस्तं जिनेश्वरम् ।
अपृच्छत्तत्वसामस्त्यं जीवाऽजीवादिभेदतः ।।135।।

जिनोऽवोचत्ततस्तत्त्वं[48] जीवो द्विविध उच्यते ।
संसारिमुक्तभेदेन संसारी च चतुर्विधः ।।136।।

तिर्यन्नरकमानष्यसुरगतिप्रभेदतः ।
नारकिनां महादुःखं शूलादिरोपणादिकम् ।।137।।

पशुषु च पराधैन्यं[49] क्षुत्तृग्मुखादिबाधनम्[50] ।
मनुष्याणां वियोगादि धनपुत्रादिवर्जितम् ।।138।।

देवानाञ्च महादुःखं काले मरणसम्भवे ।
परस्परञ्च गर्वेण दुःखं चात्यन्तमानसम् ।।139।।

अनन्ते लोकमध्येऽस्ति लोको वातत्रिभिर्वृतः ।
अधोमध्योपरिभेदात्स लोकस्त्रिविधो मतः ।।140।।

रत्नशर्कराबालूकपङ्कधूममहातमः ।
सुप्रभाश्चेति सप्ताऽधोऽधोभागे नरकालयाः ।।141।।

तदन्तराले देवानामावासा दशधा स्मृताः ।
मध्यलोकस्ततो मध्ये द्वीपसागरसम्भृतः ।।142।।

द्व्यर्द्धद्वीपेषु मानुष्या वसन्ति कर्मवेष्टिताः ।
शेषेषु व्यन्तरावासा अथवा पशुजातयः ।।143।।

ततश्च ज्योतिषां लोकश्चन्द्रसूर्यादिमण्डितः ।
मेरुं भ्रमन्ति नित्यं ते प्रकाशकरणोद्यताः[51] ।।144।।
ततः सुधर्म ईशानस्तथा सनत्कुमारकः ।
माहेन्द्रस्तुरीयः स्वर्गो ब्रह्मब्रह्मोत्तरौ तथा ।।145।।
लान्तवाख्यश्च कापिष्टो देवदेवीभिरावृत्तः ।
तथा शुक्रमहाशुक्रौ शतारः स्वर्ग उत्तमः ।।146।।
सहस्रारस्तथाऽनत प्राणतश्चारुणाच्युतौ ।
इति षोडशकल्पाख्यास्तत्र वसन्ति देवताः ।।147।।
ततो नवविधा ज्ञेया ग्रैवेयका मनोहराः ।
पञ्चोत्तरविमानानि तत उपरि लक्ष्यते ।।148।।
अहमिन्द्रा वसन्त्यत्र ब्रह्मचर्यगुणैर्युताः ।
तत्त्वचिन्तां प्रकुर्वन्ति बहुसौख्यसमन्विताः ।।149।।[52]
ततो मुक्तिशिला ज्ञेया चन्द्रमण्डलसन्निभा ।
तत्र तिष्ठन्ति सिद्धाश्च जरामृत्युविवर्जिताः ।।150।।[53]
एवं तु त्रिविधो लोकः षट्द्रव्यैः सम्भृतः परः ।
जीवपुद्गलकालाश्च धर्माधर्मनभस्तथा ।।151।।
जीवाऽजीवास्रवा: बन्धः संवरनिर्जरे शिवः ।
तत्त्वानि सप्तलोकेऽस्मिन् नित्याऽनित्यानि तानि च ।।152।।
युक्तानि पापपुण्याभ्यां पदार्थाश्च नवोच्यते ।
संसारः पञ्चधा ज्ञेयः क्षेत्रकालादिभेदतः ।।153।।
रत्नत्रयञ्च संधृत्य संसार: छिद्यते जिनैः ।
महाव्रतानि पञ्चैव तावन्त्यश्च समितयः ।।154।।
गुप्तित्रयेण संयुक्तं चारित्रञ्च त्रयोदशम् ।
निःशङ्कितादिसंयुक्तं सम्यक्त्वं दर्शनं मतम् ।।155।।
व्यञ्जनोर्जितसन्मुख्यमष्टधा ज्ञानमुच्यते ।
एकादशैव सङ्ख्याताः प्रतिमाः श्रावकादिषु ।।156।।

इत्यादिकेवलिनोक्तं धर्मं श्रुत्वा सभास्थिताः।
सन्तुष्टाः मानवाः देवाः तिर्यञ्चोऽपि विशेषतः॥157॥
चक्रिरे दीक्षितां केचित्केचिच्छ्रावकसद्व्रतम्।
सम्यक्त्वधारिणः केचिज्जाताः संसारपारगाः॥158॥
अथोऽवोचत्खगाधीशो जिनभक्तो विभीषणः।
भो स्वामिन् केन पुण्येन दशाननोऽभवद् बली॥159॥
गुणाधारः सदाचारी परस्त्रीषु पराङ्मुखः।
न शक्यतेऽत्र केनाऽपि हन्तुं रावणराक्षसम्॥160॥
इन्द्रादयो गृहे यस्य जलकुम्भान् वहन्ति ते।
स कथं भूचरैरङ्कैर्मारितो रणमूर्द्धनि॥161॥
शचीरूपामप्यन्यस्त्रीं नेच्छेत्स्वप्नेऽपि रावणः।
सीतां दृष्ट्वा कथं जातः कामव्याकुलमानसः॥162॥
रामेण किं कृतं पुण्यं येनेदृशोऽभवत्प्रभुः।
केन पापेन सीतायां कलङ्कमभवत्परम्॥163॥
ततोऽवोचज्जिनाधीशः शृणु राजन् विभीषण।
अनयोर्वैरमस्त्यत्र चिरन्तनस्य जन्मनः॥164॥
क्षेमपुरे भरतेऽत्र नयदत्तो[54] वणिग्वरः।
सुनन्दा गेहिनी तस्य वसुदत्तोऽभिधः सुतः॥165॥
द्वितीयो धनदत्तस्तु सुहृद् यज्ञबली द्विजः।
वणिक् सागरदत्ताख्यस्तत्रैव नगरेऽपरः॥166॥
पत्नी रत्नप्रभा तस्य नाम्ना गुणवती सुता।
अनुजो गुणवान्नाम्ना तस्या आसीत्सुचेतनः॥167॥
पित्रा कृतं परिज्ञाय प्रीतेन कुलकांक्षिणा।
दत्ता प्रौढकुमारी सा धनदत्ताय सूरिणा॥168॥
श्रीकान्त इति विख्यातो वणिक्पुत्रोऽपरो धनी।
स तां सततमाकांक्षद्रूपेन जितमानसः[55]॥169॥

वित्तस्याल्पतयाऽवज्ञां धनदत्ते विधाय च।
श्रीकान्तायोद्यता दातुं माता तां क्षुद्रमानसा।।170।।
विचेष्टितमिदं ज्ञात्वा वसुदत्तः प्रियाऽग्रजः।
यज्ञवल्युपदेशेन श्रीकान्तं हन्तुमुद्यतः।।171।।
मण्डलाग्रं समुद्यम्य रात्रौ तमसि गह्वरे।
निःशब्दपदविन्यासो नीलवस्त्रावगुण्ठितः।।172।।
श्रीकान्तं भवनोद्याने[56] प्रमादिनमवस्थितम्।
गत्वा प्राहरदेषोऽपि[57] श्रीकान्तेनाऽसिना हतः।।173।।
एवमन्योऽन्यघातेन मृत्युं तौ समुपागतौ।
विन्ध्याचलमहारण्ये समुद्भूतौ कुरङ्गकौ।।174।।
दुर्जनैर्धनदत्ताय कुमारी वारिता ततः।
क्रुध्यन्ति ते हि निर्व्याजनप्रदेशे[58] तु किं पुनः।।175।।
तेन दुर्मृत्युना भ्रातुः कुमार्यापगमेन तु।
धनदत्तो गृहात् दुःखी देशानभ्रमदाकुलः।।176।।
धनदत्तापरिप्राप्त्या साऽपि बाला सुदुःखिता।
सज्जनान्निन्द्यता प्राप्ता कुत्सिताचारवर्तिनी।।177।।
ततः कालाऽवसानेन सार्त्तध्यानपरायणा।
जाता तत्र[59] मृगी यत्र वसतस्तौ कुरङ्गकौ।।178।।
पूर्वानुबन्धदोषेण तस्या एव कृते पुनः।
मृगावन्योन्यमुद्वृत्तौ[60] हत्वा सूकरताङ्गतौ।।179।।
द्विरदौ महिषौ गावौ प्लवङ्गौ द्वीपिनौ वृकौ।
रूपवन्तौ[61] समुत्पन्नावन्योन्यञ्च हतस्तथा।।180।।
जले स्थले च भूयोऽपि वैराऽनुसरणोद्यतौ[62]।
भ्राम्यतः पापकर्माणौ म्रियमाणौ तथाविधम्।।181।।
परमं दुःखितः सोऽपि धनदत्तोऽध्वखेदितः।
अन्यदाऽस्तं गते भानौ श्रमणाऽऽश्रममाश्रितः[63]।।182।।

तत्र साधूनभाषिष्ट तृषितोऽस्म्युदकं मम।
प्रयच्छत्ताऽध्वखिन्नस्य[64] यूयं हि सकृतप्रियाः।।183।।
तत्रैकश्रमणोऽवोचन्मधुरं परिसान्तयन्।
रात्रावप्यमृतं युक्तं न पातुं किं पुनर्जलम्।।184।।
चक्षुर्व्यापारनिर्मुक्ते काले पापैककारणे।
अदृष्टसूक्ष्मजन्त्वाद्या मासीर्वत्स विभास्करे।।185।।
आतुरेणाऽपि भोक्तव्यं विकाले भद्र न त्वया।[65]
मुनेर्वचनमाराध्य सन्तोषं कृतवान्स्तदा।।186।।
कालधर्मञ्च सम्प्राप्य सौधर्मे स सुरोऽभवत्।
मौलिकुण्डलकेयूरहारानुद्यंगदोज्ज्वलः।।187।।
ततश्च्युत्वा समुत्पन्नः पुरश्रेष्टमहापुरे।
धारण्यां श्रेष्ठिनो मेरौजैनात्पद्मरुचिः सुतः।।188।।
तत्रैवञ्च पुरे नाम्ना छत्रच्छायो नरेश्वरः।
महिषीगुणमञ्जूषा श्रीदत्ता तस्य भामिनी।।189।।
आगच्छदन्यदा गोष्ठं गत्वा तुरगपृष्टतः।
अपश्यद्भुवि पर्यस्तं मैरवो[66] जीर्णकं वृषम्।।190।।
सुगन्धिमाल्यवस्त्रोऽसावावतीर्य तुरङ्गतः।
आदरेण तमुक्षाणं[67] दयावानातुरंगकः[68]।।191।।
दीयमाने जपे तेन कर्णे पञ्चनमस्कृते।
शृण्वन् रूष्यशरीरी सः शरीरान्निरतस्ततः।।192।।
श्रीदत्तायाञ्च सञ्जज्ञे तनुजो वृषभध्वजः।
छत्रच्छायोऽभजत्तोषं दुर्लभे पुत्रजन्मनि।।193।।
उदारानगरे शोभा जनिता द्रव्यसम्पदा।
महोत्सवो महाजातो वादित्रवधरीकृतः।।194।।
ततः कर्मानुभावेन पूर्वजन्म स संस्मरन्।
गोदुःखं दारुणं तच्च वातशीताऽऽतपादिजम्।।195।।

श्रुतिपञ्चनमस्कारं चेतसा च सदा वहन्।
बाललीलाप्रसक्तोऽपि महासुभगविभ्रमः ।।196।।
कदाचिद्विहरन् प्राप्तः स तां वृषमृतिक्षितिम्।
पर्यज्ञासीत्प्रदेशांश्च[69] पूर्वमाचरितान् स्वयम्।।197।।
वृषभध्वजनामाऽसौ कुमारो वृषभूमिकाम्।
अवतीर्य गजात्स्वैरमपश्यत् दुःखिताशयः।।198।।
बुधन् समाधिरत्नस्य दातारं श्लाघ्यचेष्टितम्[70]।
अपश्यन् दर्शने तस्य दध्यौ चौपायिकं ततः।।199।।
अथ कैलाशशृङ्गाभं कारयित्वा जिनालयम्।
चरितानि पुराणानि पट्टकेष्वलेखयत्।।200।।
द्वारदेशे च तस्यैव पट्टं स्वभवचित्रितम्।
पुरुषैः पालनन्यस्तैरधिष्टितमधिष्ठिपत्[71]।।201।।
वन्दितुं[72] चैत्यभवनं तत्पद्मरुचिराऽऽगमत्।
अपश्यच्च प्रहृष्टात्मा तच्चित्रं विस्मितस्ततः।।202।।
''तद्वलावर्दरूपञ्च निरीक्षतेऽसौ पुनः पुनः'' ।[73]
वृषभध्वजस्य पुरुषैस्तावत्संवादितं द्रुतम्।।203।।
ततो महर्द्धिसम्पन्नः समारुह्य द्विपोत्तमम्।
इष्टसंगमनाकांक्षी राजपुत्रः समागमत्।।204।।
अवतीर्यात्र नागेन्द्रादविक्षज्जिनमन्दिरम्।
पश्यन्तञ्च सदाशक्तं[74] धारणेयं निरैक्षत[75]।।205।।
नेत्रास्यहस्तसञ्चारसूचितोत्तुङ्गविस्मयः।
आनंसीत्पादयोरेनं[76] परिज्ञाय वृषध्वजः।।206।।
गोदुःखमरणं तस्मै धारणीसूनुरब्रवीत्।
राजपुत्रोऽगदत्सोहमिति विस्तारिते क्षणम्।।207।।
संभ्रमेण च सम्पूज्य गुरुं शिष्यवरो यथा।
तुष्टः[77] पद्मरुचिं राजतनयः समुदाहरन्।।208।।

मृत्युव्यसनसम्बद्धे[78] काले तस्मिन्भवान्मम।
प्रियबन्धुरिव प्राप्तः समाधेः प्रापकोऽभवत्।।209।।

समाध्यमृतपाथेयं त्वया दत्तं दयालुना।
संपश्य तृप्तिसम्पन्नः सम्प्राप्तोऽहमिमं भवम्।।210।।

नैव तत् कुरुते माता न पिता न सहोदराः।
न बान्धवा[79] न गीर्वाणाः प्रिये यन्मे त्वया कृतम्।।211।।

नैक्षे पञ्चनमस्कारं स्तुतिदानविनिष्क्रियम्।
तथापि मे परा भक्तिस्त्वयि कारयतीरितम्।।212।।

आज्ञां प्रयच्छ[80] मे नाथ ब्रूहि किं करवाणि[81] ते।
आज्ञादानेन मां भक्तं भजस्व पुरुषोत्तमः।।213।।

गृहाण सकलं राज्यमहं ते दासरूपकः।
नियुज्यतामयं देहः कर्मणाभिसमीहते।।214।।

एवमादि[82] सुसम्भाषं तयोः प्रेमाभवत्परम्।
सम्यक्त्वञ्चैव राज्यञ्च सम्प्रयोगश्च सङ्गतः।।215।।

अस्थिमज्जाऽनुरक्तौ तौ सागारव्रतसङ्गतौ।
जिनबिम्बानि चैत्यानि भुव्यतिष्टिपतां[83] स्थिरौ।।216।।

रूपैश्च धवलाम्भोज मुकुलप्रतिमामितैः[84]।
समपादयतां क्षोणीं शतशः[85] कृतभूषणाम्।।217।।

ततः समाधिमाराध्य मरणे वृषभध्वजः।
त्रिदशोऽभवदीशाने पुण्यकर्मफलानुभूः।।218।।

काले पद्मरुचिः प्राप्य समाधिमरणं तथा।
ईशाने एव गीर्वाणः कान्तवैमानिकोऽभवत्।।219।।

च्युत्वाऽपरविदेहे तौ विजयार्द्धस्य मस्तके।
नन्द्यावर्तपुरेशस्य राज्ञो नन्दीश्वरो श्रुतेः।।220।।

उत्पन्नः कनकाभायां नयनानन्दसञ्ज्ञकः।
खेचरेन्द्रश्रियं प्राप्तः पद्मरुचिचरः सुरः।।221।।

ततः श्रामण्यमास्थाय कृत्वा सुविकटं तपः।
कालधर्मं समासाद्य माहेन्द्रकल्पमाश्रयत्।।222।।

च्युतस्ततो गिरेर्मेरोर्भागे पूर्वदिशि स्थिते।
क्षेमायां पुरिसञ्जातः श्रीचन्द इति विश्रुतः।।223।।

माता पद्मावती तस्य पिता विपुलवाहनः।
तत्र स्वर्गोपभुक्तस्य निष्पन्दं[86] कर्मणोऽभजत्।।224।।

तस्य पुण्याऽनुभावेन कोशो[87] विषयसाधनः।
दिने दिने परां वृद्धिमसेवत समं ततः।।225।।

त्रीणि सहस्रनारीभि भुङ्क्ते भोगाननेकशः।
वर्षसहस्रपञ्चाशच्छ्रीचन्द्रोऽसौ च शक्रवत्।।226।।

समाधिगुप्तियोगीन्द्रात्श्रुत्वा धर्मं दयापरम्।
धृतिकांताय पुत्राय दत्वा राज्यमभून्मुनिः।।227।।

तपो घोरतरं कृत्वा कृशः सर्वशरीरकः।
श्रीचन्द्रः कालमासाद्य ब्रह्मलोकाधिपोऽभवत्।।228।।

जिनपूजाविनोदेन गीतशास्त्रेण सर्वदा।
कालो गच्छति शक्रस्य परमां गतिसाधकः।।229।।

त्रिदशत्वान्मनुष्यत्वं सुरत्वं मनुजत्वतः।
एवं मनोहरं प्राप्तो धनदत्तो निवेदितः।।230।।

वक्ष्याम्यतः समासेन वसुदत्तादि संसृतिम्।
कर्मणां चित्रतायोगाच्चित्रत्वमनुविभ्रतीम्।।231।।

पुरे मृणालखण्डाख्ये प्रतापी यशसोज्ज्वलः।
राजा विनयसेनाख्यो[88] रत्नचूलाऽस्य भामिनी।।232।।

वज्रकम्बुः सुतस्तस्य हेमवत्यास्य[89] भामिनी।
श्रीकान्ताख्यचरो जातः शम्भुनाम्ना तयोः सुतः।।233।।

वसदत्तचरोऽस्याऽभूच्छ्रीभूताख्यः पुरोहितः।
तस्य पुत्री गुणैर्युक्ता रम्या नाम्ना सरस्वती।।234।।

आसीद्गुणवती याऽसौ तिर्यग्योनिषु सा चिरम्।
भ्रान्त्वा कर्मानुभावेन सम्यग्धर्मविवर्जिता।।235।।
मोहनैर्निन्दनैः स्त्रैणैर्निदानैरभिगूहनैः।
स्त्रीत्वं परमदुःखाक्तं भ्रममानाः[90] पुनः पुनः।।236।।
साधुष्ववर्णवादेन[91] दुखस्था साखलीकृता[92]।
परिप्राप्ता करेणुत्वमासीन्मन्दाकिनी तटे।।237।।
सुमहापङ्कनिर्मग्ना परायत्तस्थिराङ्गिका।
विमुक्तमन्दपूत्कारा मुकुलीभूतलोचना।।238।।
ममूर्षतीं[93] समालोक्य खेचरेण कृपावता[94]।
तरङ्गवेगनाम्नाऽसौ कर्णे जपमुपाहृता।।239।।
ततस्तनुकषायत्वात्तत्क्षेत्रे गुणतोषिता।
व्रताद्वेदवती नाम्ना[95] श्रीभूतेः सा सुताऽभवत्।।240।।
भिक्षार्थिनं मुनिं गेहं प्रविष्टमवलोक्य सा।
उपहास्यात्ततः पित्रा शमिता श्राविकाऽभवत्।।241।।
तस्याः परमरूपायाः सुकन्यायाः कृतेऽवनौ।
उत्कण्ठिता महीपालाः शम्भुस्तेषु विशेषतः।।242।।
मिथ्यादृष्टिः कुबेरेण समो भवति यद्यपि।
तथापि नास्मै देयेयं प्रतिज्ञेति पुरोधसः।।243।।
ततः प्रकुपितेनासौ शम्भुना मारितो निशि।
मृत्वा स सुरतां प्राप्तो माहेन्द्रधर्मतोऽपरः।।244।।
ततो वेदवतीमेतां प्रत्यक्षां देवतामिव।
अनिच्छन्तीं प्रभुत्वेन बलादुद्वोढुमुद्यतः[96]।।245।।
मनसा कामतप्तेन तामालिङ्ग्योपचुम्ब्यताम्।
विस्फुरन्तीं रतिसाक्षान्मैथुनेनोपचक्रमे।।246।।
ततः प्रकुपिताऽत्यर्थं चण्डा वह्निशिखेव सा।
विरक्तहृदया बाला वेपमानशरीरिका।।247।।

आत्मनः शीलनाशेन वधेन जनकस्य च।
विभ्रती[97] परमं दुःखं प्राह लोहितलोचना।।248।।
व्यापाद्य पितरं पापिन् कामिताऽस्मि बलेन यत्।
भवद्वधार्थमुत्पत्स्ये[98] सुताऽहं ते नराधम।।249।।
परलोकगतस्याऽपि पितुर्नाऽहं मनोरथम्।
लुम्पामि तेन दुर्दृष्टि कामनान्मरणं वरम्।।250।।
हरिताख्यार्यिकायाश्च पार्श्वे गत्वा ससंभ्रमा।
प्रव्रज्या साऽकरोद्बाला तपः परमदुष्करम्।।251।।
कालधर्मं परिप्राप्य ब्रह्मलोकमुपागता।
पुण्योदयसमानीतं सुरसौख्यमसेवत[99]।।252।।
शम्भुरपि च पापेन मृत्वा तिर्यक्कुयोनिषु।
चिरं भ्रान्तोऽत्र दुःखेन जन्ममृत्योः पुनः पुनः।।253।।
अथोपशमनात्किञ्चित्कर्मणः क्लेशकारिणः।
कुशध्वजस्य विप्रस्य सावित्र्यां तनयोऽभवत्।।254।।
प्रभासकुंदुनामाऽसौ[100] प्राप्य बोधिं सुदुर्लभाम्।
पार्श्वे विचित्रसेनस्य मुनेर्दीक्षामसेवत[101]।।255।।
सम्मेदपर्वते कुर्वन् तपः कदाचिदुत्तमम्।
हेमप्रभखगेशस्य दृष्ट्वा भूतिमसौ मुनिः।।256।।
निदानमकरोदज्ञः खेचरं सम्पदं प्रति।
रत्नं त्रैलोक्यमूल्यं यद्विक्रीतं शाकमुष्टिना।।257।।
निदानदूषितात्माऽसौ कृत्वाऽतिविकटञ्तपः।
सनत्कुमारमारुह्य तत्र भोगानसेवत।।258।।
च्युतः पुण्याऽवशेषेण भोगसंसर्गमानसः।
रत्नस्रवः सुतो जातः केकस्यां रावणाभिधः।।259।।
असौ तु ब्रह्मलोकेशो दशसागरसस्मितम्[102]।
स्थित्वा कालच्युतो जातो रामो दशरथात्मजः।।260।।

धनदत्तोऽभवद्योऽसौ सोऽयं पद्मो मनोहरः।
यशसा चन्द्रकान्तेन समाविष्टब्धविष्टपः[103] ।।261।।
श्रीभूतिः स्वर्गतश्च्युत्वा प्रतिष्ठनगरे वरे।
भूत्वा पुनर्वसुः शोकात्सनिदानतपोऽन्वितः।।262।।
सनत्कुमारमारुह्य च्युत्वा दशरथात्मजः।
अभूद्रामाऽनुजस्तीव्रस्नेहो लक्ष्मणचक्रभृत्।।263।।
वसुदत्तोऽभवद्यश्च श्रीभूतिश्च द्विजः क्रमात्।
जातो नारायणः सोऽयं सौमित्रिः श्रीलतातरुः।।264।।
श्रीकान्तः कर्मयोगेन योऽसौ शम्भुत्वमागतः।
अभूत्प्रभासकुंदुश्च सञ्जातः स दशाननः।।265।।
योऽसौ गुणवती भ्राता गुणवानभवत्तदा।
सोऽयं भामण्डलो जातः सहल्लाङ्गुललक्ष्मणः।।266।।
यत्राऽमृतवती देवी बह्मलोकनिवासिनः।
च्यवतेऽद्यैति तत्रैव काले कुण्डलमण्डितः।।267।।
आसीद्गुणवती या तु श्रीभूतेश्च सुता क्रमात्।
सेयं जनकराजस्य सीताऽभूत्पतिता सुता।।268।।
योऽसौ यज्ञबली विप्रः भ्रान्त्वा संसारसागरे।
कुत्रचिद्धर्ममाराध्य सुधर्मेऽभूत्सुरोत्तमः।।269।।
सुखं भुक्त्वा चिरं च्युत्वा स त्वं जातो विभीषणः।
असौ वृषभकेतुश्च च्युत्वेशानाच्छुभे पुरे।।270।।
धर्मनृपात्सुधर्मिण्यां पुत्रोऽभूत्कनकाभिधः।
लान्तवं प्राप्य च्युत्वाऽतः सुग्रीवोऽयंकपिध्वजः।।271।।
पूर्वमाजननं बालेर्यदपृच्छद्विभीषणः।
केवली च समाचख्यत् शृणु भो श्रेणिकाधुना।।272।।
रत्यरत्यादिदुःखौघै संसारे चतुरङ्गके।
वृन्दारण्यस्थले जन्तुरेकः कृष्णमृगोऽभवत्।।273।।

साधुस्वाध्यायनि:स्वानं श्रुत्वायुर्विलये मृगः।
ऐरावते रतिस्थाने[104] प्राप नृत्वमनिन्दितम्।।274।।

सम्यग्दृष्टिः पिताऽस्यासीद्द्विहीताख्यः सुचेष्टितः।
माता शिवमतिः पुत्रो मेघदत्तस्तयोरयम्।।275।।

अणुव्रतधरः सोऽयं जिनपूजासमुद्यतः।
वन्दारुः कृतसत्कालः कल्पमैशानमाश्रयत्।।276।।

च्युत्वा जम्बूमतिद्वीपे विदेहेपूर्वभूमिके।
ग्रामोऽस्ति विजयावत्याः समीपः सततोत्सवः।।277।।

सुग्रामः पतनाकारो नाम्नाऽसौ मत्तकोकिलः।
कान्तशोकः प्रभुस्तत्र तस्य रत्नाकिनी प्रिया।।278।।

तयोः सुप्रभनामाऽभूत्तनयश्चारुदर्शनः।
बहुबन्धुजनाकीर्णः शुभैकचरितप्रियः।।279।।

संसारे दुर्लभां प्राप्य बोधिं जिनमताऽनुगाम्।
अगृहीत्संयमं पार्श्वे संयतस्य महामुनेः।।280।।

विकषायसितध्यानसिद्धः स्यात्स महामुनिः।
पर्याप्तं केवलं नायुरतः सर्वार्थसिद्धिमत्।।281।।

त्रयस्त्रिंशत्समुद्रायुस्तत्र भुक्त्वा महासुखम्।
बालिर्नाम्नाऽजनिष्टाऽसौ सुग्रीवस्याऽग्रबान्धवः।।282।।

केन पापेन सीतायामपवादोऽभवत्प्रभो।
ततोऽवोचज्जिनाधीशः शृणु राजन् विभीषण।।283।।

ग्रामो मण्डलिको नामा तमायातः सुदर्शनः।
मुनिमुद्यानमायातं वन्दित्वा तं गता जनाः।।284।।

सुदर्शनां स्थितां तत्र स्वसारं सद्वचो ब्रुवन्।
ईक्षितो वेदवत्यासौ सत्या श्रवणया तया।।285।।

ततो ग्रामीणलोकाय सम्यग्दर्शनदुर्बला।
जगाद पश्यते दृक्षं श्रवणं ब्रूथ सुन्दरम्।।286।।

मया सुयोषिता साकं स्थिता रहसि वीक्षितः।
ततः कैश्चित्प्रतीतं तु न हि कैश्चिद् विचक्षणैः।।287।।

अनादरो मुनेर्लोके कृतश्चाऽवग्रहोऽमुना।
वेदवत्या मुखं शून्यं देवताया नियोगतः।।288।।

अपुण्यया मया लोकं वेदितं भवतामिति।
पुनः प्रत्यापितो लोक इत्याद्यात्र कथास्मृतो[105]।।289।।

एवं सद्भ्रातृयुगलं निन्दितं यत्तदा तया।
अवर्णवादमीदृक्षं प्राप्तेयं वितथं ततः।।290।।

दृष्टः सत्योऽपि दोषो न वाक्यो जिनमताश्रितैः।
उच्यमानोऽपि चाऽन्येन वार्यः सर्वप्रयत्नतः।।291।।

ब्रुवाणो लोकविद्वेषकारणशासनाश्रितम्।
प्रतिपद्य चिरं दुःखं संसारमवगाहते।।292।।

एवं भवावलीं श्रुत्वा रामादीनां सविस्तराम्।
सुराऽसुरा नराः सर्वे तुष्टास्तदा स्वचेतसि।।293।।

पापात्दुर्गतिदुःखमेव सततं जीवा लभन्ते चिरम्
संसारेऽत्र ससूक्ष्मबादरगतं पश्वादिजातं तथा।
तस्मात्त्वं त्यज पापकर्मजनकं कार्यं कुहिंसादिकम्
धर्मं त्वं कुरु मोक्षसौख्यसुकरं जीवस्य रक्षादिकम्।।294।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते सकलभूषणकेवलज्ञानं सीतादिव्यदीक्षाग्रहणं रामादीनां भवावलिवर्णनं नाम एकत्रिंशत्तमोऽधिकारः।।31।।

1. दुःखिता जनैः इति ख प्रतौ
2. वह्निप्रदेशादि इति क/ग प्रतौ
3. श्रृण्वं वे विनयं मम इति क प्रतौ
   श्रृणू वे वचनं मम इति ग प्रतौ
4. नौ इति ख प्रतौ
   नो इति ग प्रतौ
5. प्रत्यायं इति क प्रतौ
6. वैदेहा इति ख प्रतौ
   विदेहा इति ग प्रतौ
7. बहुभिः समं स्थितात्र मंडपे परमोत्सवे इति क प्रतौ
8. बालवृद्धसमाश्रिताः इति क प्रतौ
9. मया या कानने त्यक्ता कथमत्र त्वमागता इति ग प्रतौ
10. वैराग्यदीक्षितं इति ग प्रतौ
11. वा नयैव न इति क प्रतौ
12. कथं त्वं इति ग प्रतौ
13. किमहोरुना इति ग प्रतौ
14. परनरपरान्मुखां इति क प्रतौ
15. तथास्त्वित्पूच इति ग प्रतौ
16. करद्वयो इति क प्रतौ
17. पिबामि इति क/ख प्रतौ
18. रुदते इति क प्रतौ
19. महासीता इति क प्रतौ
20. निष्फलं इति ग प्रतौ
21. स इति ग प्रतौ
22. क्रीडती इति क/ख प्रतौ
23. सम्मदेनान्यदा इति क प्रतौ
    सम्मेदनान्यदा इति ग प्रतौ
24. राज्ञो इति क प्रतौ
25. त्रूटितबन्धनम् इति क प्रतौ, नृटितबन्धनम् इति ग प्रतौ
26. निरतोभवत् इति ग प्रतौ
27. गृहद्वारं इति ख/ग प्रतौ

28. अभिमुखागतं इति ख प्रतौ
    अभिमुखं गमं इति ग प्रतौ
29. बिन्नान्यदा इति ग प्रतौ
30. सिंधिमेतं इति क प्रतौ
    सिधिमेतं इति ख प्रतौ
31. समन्तात् इति क प्रतौ
32. एष श्लोकः ग प्रतौ अनुपलब्धः।
33. कृतदिक्षास्य इति ख प्रतौ
34. सा चोर इति क/ख प्रतौ
35. एष श्लोकः ग प्रतौ अनुपलब्धः।
36. निर्बन्ध इति क प्रतौ
37. मनोरगै इति ख प्रतौ
38. उपलवैर्यदासीभिस्खलितं इति ख प्रतौ
39. क्रौंचैश्चक्रवाक्यैः इति ख प्रतौ
40. प्रेमनिर्भरे इति क/ख प्रतौ
41. केशा उत्पाद्य इति क/ख प्रतौ
42. चन्देनादना इति ग प्रतौ
43. मौक्तिगोशीर्ष इति क प्रतौ
44. दशांसकः इति क/ग प्रतौ
45. विंजतः इति ग प्रतौ
46. हनत् इति ख प्रतौ
    हनात् इति ग प्रतौ
47. तथापिन्ये इति ग प्रतौ
48. जिनोवोचकृतस्तत्वं इति ग प्रतौ
49. पराधीनां इति ग प्रतौ
50. क्षुत्तृट्मुखादिबाधितं इति क/ख प्रतौ
51. करने द्युताः इति ख प्रतौ, करनोद्यताः इति ग प्रतौ
52. एष श्लोकः ख प्रतौ अनुपलब्धः।
53. ख प्रतौ श्लोकपुनरावृत्ति वर्तते।
54. मयदत्तो इति ख प्रतौ
55. सुतां सततमाकांक्षद्रूपे तनितमानसः इति ख प्रतौ,
    स तां संततमांकाद्रूपस्तनितमानसः इति प. पु. 3/106/15

56. भवनोपांते इति क प्रतौ
57. गत्वा हरदेषोपि इति ख प्रतौ
58. निर्व्यामपदे इति ख प्रतौ
    नृषवाज्यमुपदेशे इति ग प्रतौ
59. जातात्र इति क प्रतौ
60. मृगावन्योन्यसद्वृतौ इति ख प्रतौ
    मृगावन्योन्यमद्वृतौ इति ग प्रतौ
61. रुरूपतौ इति क प्रतौ
    रूरूपतौ इति ख प्रतौ
62. वैराणुस्मरणोद्यतौ इति क प्रतौ
63. श्रवणाश्रममाश्रितः इति क प्रतौ
    श्रावणाश्रममाश्रितं इति ख/ग प्रतौ प्राप्यते किन्तु श्रमणाश्रममाश्रितः इति स्यात्।
64. प्रयच्छ तनु खिन्नस्य इति क/ख प्रतौ
65. आतुरेणापि भोक्तव्यं नापि काले भद्र त्वया इति ख प्रतौ
66. पद्माभो इति ग प्रतौ
67. आदरेणैव मुक्षाणं इति क प्रतौ, आदरे तमुक्षाणं इति ग प्रतौ
68. गकंः इति ग प्रतौ, गतः इति प. पु. 3/106/41
69. पर्यज्ञसीत्प्राग्दृशांश्च इति ख/ग प्रतौ
70. श्लाघ्यकवेष्टितम् इति क/ग प्रतौ
71. पालनन्यनन्यस्तैरधिष्टितमधिष्टयत् इति ग प्रतौ
72. वन्दारु इति क/ख प्रतौ
73. तन्निबद्धे क्षणो यावदसौ तच्चित्रमीक्षते इति क/ख प्रतौ
74. तदासक्तं इति प. पु. 3/106/105
75. निरिक्षतः इति ग प्रतौ
76. आनसीत् इति ख प्रतौ
77. दुष्टः इति ख प्रतौ
78. मृत्युवासनसंबद्धे इति क प्रतौ
    मृत्युवसनसंबद्धे इति ख प्रतौ
79. वध्वा इति क प्रतौ
80. अज्ञाप्रियछ इति ग प्रतौ
81. करवामि इति क/ख प्रतौ
82. एवमादे इति क प्रतौ

83. भुव्यतिष्टषयतां इति ख प्रतौ
84. मुकुटप्रतिमासितैः इति क प्रतौ
85. सततं इति क प्रतौ
86. निष्पदं इति क प्रतौ, निप्फदं इति ग प्रतौ
87. कोसौ इति क/ग प्रतौ
88. विजयसेनाख्ये प. पु. 3/106/133
89. हेमवत्यास्य इति क/ख प्रतौ
90. सोभमानाः इति क प्रतौ, मजमाना इति ग प्रतौ
91. साधुथावर्णवादेन इति ख प्रतौ, साधुकुवर्णवादेन इति ग प्रतौ
92. दुखस्था सुखलीकृता इति क प्रतौ, दुःखस्था खलीकृता इति ख प्रतौ
93. मूमूर्खतां इति ग प्रतौ
94. कृतावता इति ग प्रतौ
95. वृतावेगवतीनाम्ना इति ग प्रतौ
96. वलादुद्दूढुमुद्यतः इति क प्रतौ, बलादुद्वेढिमुद्यता इति ग प्रतौ
97. विभ्रता वलादुदूढुमुद्यतः इति ख/ग प्रतौ
98. भवद्वधार्थमुत्पश्य इति ख/ग प्रतौ
99. असेवतः इति क प्रतौ
100. प्रभासकुटुनामासौ इति ख/ग प्रतौ
101. असेवतः इति क/ग प्रतौ
102. दशसागरसम्मित इति ख प्रतौ
103. समाविष्ट त्रिविष्टपे इति क प्रतौ, समाविष्टच्च विष्टपः इति ख प्रतौ
104. रपिस्थाने इति ख प्रतौ
105. स्मृतः इति ख प्रतौ, स्मृताः इति ग प्रतौ

❖❖❖

द्वात्रिंशत्तमोऽधिकारः

अथ कृतान्तवक्रोऽसौ श्रुत्वा धर्मजिनोदितम्।
रामस्याऽनुज्ञया दीक्षां जग्राह शिवलालसः ।।१ ।।

केचिच्च मुनयो जाताः केचिज्जातः सुश्रावकाः।
सम्यक्त्वधारिणः केचिज्जाताः शक्त्यनुसारतः ।।२ ।।

एवं श्रुत्वा नरा देवा जिनं नत्वा सुभक्तितः।
स्वस्थानं ते गताः सर्वे जिनगुणाः हृदिस्थिताः ।।३ ।।

पद्मोऽपि खेचरैर्युक्तो जिनेशं सर्वभूषणम्।
नतः सुभक्तिभारेण तुष्टश्चेतसि निर्मलः ।।४ ।।

शेषान्मुनीन् तथा सर्वान् भक्त्या नतः शिवाप्तये।
ततश्च व्रतिकामध्ये स्थितां सीतां सुनिर्मलाम् ।।५ ।।

एकवस्त्रधरां धीरां शृङ्गारपरिवर्जिताम्।
क्षमाशान्तगुणोपेतां पञ्चमहाव्रतान्विताम् ।।६ ।।

दृष्ट्वा रामः सशोकाद्यो रुरोद स्नेहनिर्भरात्।
सीता जगाद तं पद्मं दुःखं मा कुरु भूपते।।७।।

कस्य पत्नी पतिः को वा कस्य माता सती क्व च।
सर्वे व्यामोहिता जीवा अज्ञानेन नरेश्वर ।।८ ।।

इत्यादिवचनैस्तेऽत्र तोषिताः सीतया मुदा।
ततो नताश्च सीतायाः पादौ रामादिभूभृतः ।।९ ।।

महावैभवसंयुक्तो रामः स्वनगरं प्रति।
चचाल खेचरैर्युक्तो गजस्थः सलवाङ्कुशः ।।१० ।।

पश्यमानो गवाक्षस्थैः स्त्रीजनैः कौतुकान्वितैः।
अनेन हारिता सीता मृषालोकापवादतः ।।११ ।।

जानक्यपीदृशं पद्मं मुक्ता जातात्र सार्यिका।
विना पुण्येन सौख्यञ्च कुतोऽस्ति नरजन्मनि ।।१२ ।।

इति त्रिविधवाक्यौघान् शृण्वन् रामो गृहङ्गतः।
सुखेन नीयते कालं नरैः सुरैश्च सेवितः ।।१३ ।।

अथाऽवोचद् गणाधीशं गौतमं श्रेणिको नृपः।
भो स्वामिन् केन पुण्येन सञ्जातौ लवणाङ्कुशौ।।१४।।

गौतमः प्राह काकुन्द्यामधिपो[१] रतिवर्द्धनः।
पत्नी सुदर्शना तस्य पुत्रौ प्रियहितङ्करौ।।१५।।

अमात्यः सर्वगुप्ताख्यो राज्यलक्ष्मीधुरन्धरः।
ज्ञेयः प्रभोः प्रतिस्पर्द्धी बद्धपापपरायणः।।१६।।

अमात्यवनितारक्ता राजानं विजयावली।
शनैरबोधयद् गत्वा पत्या कार्यं[२] समीहितम्।।१७।।

परस्त्रीविरतो राजा तां प्रतीदं वचोऽवदत्।
स तु मम परं भक्तः छद्म करोति न क्वचित्।।१८।।

तां सम्प्रेष्य गृहं राजा सावधानतया स्थितः।
अमात्येनास्य सामन्ता दत्वा द्रव्यं वशीकृताः।।१९।।

राजावासगृहं रात्रौ ततोऽमात्यो महेन्धनैः।
अदीपयन्महीशस्तु प्रमादरहितः सदा।।२०।।

प्राकारपुरगुह्येन प्रदेशेन सुरङ्गया।
भार्यां पुत्रौ पुरस्कृत्य निःससार शनैः सुधीः।।२१।।

यातश्च कशिपुं तस्मात्काशिपुर्यो महीपतिः।
न्यायशीलं स्वसामन्तमुग्रवंशधुरन्धरम्।।२२।।

कानने काशिदेशस्थं स्थितोऽसौ रतिवर्द्धनः।
न तं जानाति कोऽप्यत्र गुप्तवृत्या स्थितो यतः।।२३।।

राजस्थः सर्वगुप्तोऽथ इतः सम्प्राहिणोद्यथा।
कशिपो मां नमस्येति ततोऽसौ प्रत्यभाषत।।२४।।

स्वामिघातकृतो हन्ता दुःखदुर्गतिभाक् खलः।
एवं विधो न नाम्नाऽपि कीर्त्यते सेव्यते कथम्।।२५।।

स योषित्तनयो दग्धो येनेशा रतिवर्द्धनः।
स्वामिस्त्रीबालघातं तं न स्मर्तुमपि युज्यते।।२६।।

पापस्याऽस्य शिरः स्थित्वा सर्वलोकस्य पश्यतः।
नत्वद्यैव करिष्यामि रतिवर्द्धननिष्क्रियाम् ।।२७।।

एवं दूतममात्यस्य क्रूर[3]वाक्यमपास्य सः।
अमूढो दुर्मतं यद्वत् स्थितः कर्तव्यवस्तुनि ।।२८।।[4]

स्वामिभक्तिपरस्याऽस्य कशिपोर्बलशालिनः।
अभूदक्षिप्र गन्तव्यममात्यं प्रति सर्वदा ।।२९।।

सर्वगुप्तो महासैन्यसमेतः सह पार्थिवैः।
दूतं प्रचोदितः प्राप चक्रवर्तीव मानवान् ।।३०।।

काशीदेशं सुविस्तीर्णं प्रविष्टः सागरोपमः।
सन्धानं कशिपुर्नेच्छेद्योद्धव्यमिति निश्चितः ।।३१।।

रतिवर्द्धनराजेन प्रेषितः कशिपुं प्रति।
दण्डपाणिर्युवाप्राप्तः प्रविष्टश्च निशागमे ।।३२।।

जगौ च वर्द्धिसे दिष्ट्या दैवेतौ रतिवर्द्धनः।
क्वाऽसौ क्वाऽसाविति स्फीतः प्रष्टः कशिपुरभ्यदधात् ।।३३।।

उद्याने स्थितः इत्युक्ते सुतरां प्रमदान्वितः।
निर्ययावर्घपाद्येन सोन्तःपुरः पुरस्सरः ।।३४।।

जयत्यजेयराजेन्द्रो रतिवर्द्धन इत्यभूत।
उत्सवो दर्शने तस्य कशिपोर्दानमानतः ।।३५।।

संयुगे सर्वगुप्तस्य जीवतो ग्रहणं परम्।
रतिवर्द्धनराजस्य काकन्द्यां राज्यसंगमः ।।३६।।

विज्ञाय ते हि जीवन्तं स्वामिनं रतिवर्द्धनम्।
सामन्ताः सङ्गताः मुक्त्वा सर्वगुप्तं रणान्तरे ।।३७।।

पुनर्जन्मोत्सवं चक्रे रतिवर्द्धनभूभृत्।
महद्भिर्दानसन्मानैर्देवतानाञ्च पूजनैः ।।३८।।

नीतः प्रत्यन्तवासित्वं मृततुल्यममान्यकः।
दर्शने नेत्सितः प्रापः सर्वलोकविगर्हितः ।।३९।।

कशिपुः कशिराजोऽसौ वाराणस्यां महाद्युतिः।
रेमे परमया लक्ष्म्या लोकपाल इवापरः।।४०।।

अथ भोगादिनिर्विण्णः कदाचिद्रतिवर्द्धनः।
श्रमणत्वं[५] तव तस्य भानोरन्तिकमग्रहीत्।।४१।।

आसीत्तया कृतो भेदः सर्वगुप्तेन निश्चितः।
ततो विद्वेषिता प्राप्ता परमं तस्य भामिनी।।४२।।

नाहं जाता नरेन्द्रस्य न पत्युरिति शोकिनी।
अकामतपसा जाता राक्षसी विजयावली।।४३।।

उपसर्गे तयोदारे[६] क्रियमाणेऽतिवैरतः।
सुध्याने केवलज्ञानं सम्प्राप्तो रतिवर्द्धनः।।४४।।

प्रियहितङ्कराभ्याञ्च पिता पृष्टो भवावलीम्।
मुनिर्जगाद पुत्रौ तौ शृणुतो युष्मदोर्भवान्।।४५।।

काकन्द्यामत्र शामल्यां वामदेवस्य नन्दनौ।
वसुदेवसुदेवाख्यौ गुणावस्थामिमौ द्विजौ।।४६।।

विश्वाप्रियङ्गुनामानौ ज्ञेये सुवनिते तयोः।
आसीद्गृहस्थभावश्च संशनीयौ मनीषिणाम्।।४७।।

साधौ श्रीतिलकाभिख्ये दानं दत्वा सुभावनौ।
त्रिपल्यभोगितां प्राप्तौ सस्त्रीकावुत्तरे कुरौ।।४८।।

साधुसद्दानवृतोत्थमहाफलसमुद्भवम्।
भुक्त्वा भोगं परं तत्र प्राप्तावीशानवासिताम्।।४९।।

भुक्ता भोगान् ततश्च्युत्वा बोधिलक्ष्मीसमन्वितौ।
क्षीणदुर्गतिकर्माणौ जातौ प्रियहितङ्करौ।।५०।।

इति श्रुत्वा कुमारौ तौ सन्तुष्टौ चेतसि स्फुटम्।
पितुरन्ते मुनी जातौ प्राप्य वैराग्यकारणम्।।५१।।

चतुः कर्ममयारण्यं सुशुक्लध्यानवह्निना।
निर्दह्य निवृत्तिं प्राप्तो मुनीन्द्ररतिवर्द्धनः।।५२।।

तपश्च विमलं कृत्वा प्रियङ्करहितङ्करौ ।
ग्रैवेयकस्थितिं प्राप्तौ महावैभवसंयुतौ ।।५३ ।।

कथितौ यौ समासेन प्रियङ्करहितङ्करौ ।
ग्रैवेयकाच्च्युतावेतौ भव्यौ तौ लवणाङ्कुशौ ।।५४ ।।

राजन् सुदर्शनादेवी तनयात्यन्तवत्सला ।
भर्तृपुत्रवियोगार्ता स्त्रीस्वभावानुभावतः ।।५५ ।।

निदानशृङ्खलां बद्धा भ्रमन्ती दुःखसङ्कटम् ।
कृच्छं स्त्रीत्वं विनिर्जित्य भुक्त्वा विविधयोनिषु ।।५६ ।।

अयं क्रमेण सम्पन्नो मनुष्यः पुण्ययोगतः।
सिद्धार्थो धर्मशक्तात्मा विद्याविधिविशारदः ।।५७ ।।

तत्पूर्वस्नेहेन संसक्तौ बालकौ लवणाङ्कुशौ ।
अनेन संस्तुतौ जातौ त्रिदेशैरपि दुर्जयौ ।।५८ ।।

अथ तपांसि घोराणि करोति जानकी मुदा ।
द्वाषष्टिवर्षपर्यन्तं स्त्रीलिङ्गं येन भिद्यते ।।५९ ।।

अन्ते संन्यासमादाय त्रयस्त्रिंशद्दिनावधिः ।
सुध्यानेऽच्युतशक्रत्वं प्राप्ता स्त्रीलिङ्गच्छेदनात् ।।६० ।।

तपसा किं न लोकेस्मिन् प्राप्यते मोक्षजं सुखम् ।
स्त्रीलिङ्गच्छेदने किं स्यादाश्चर्यं प्राणिनां सदा ।।६१ ।।

द्वाविंशत्यब्धिरायुष्को देवीवृन्दसमावृतः ।
नानाक्रीडनसंयुक्ता जिनपूजनतत्परः ।।६२ ।।

मधुकैटभनामानौ प्रतीन्द्रावस्य वर्ततः ।
तस्मिन् काले महाभाग्यौ भाविनौ मुक्तिगामिनौ[७] ।।६३ ।।

अथोचे श्रेणिको राजा कौ तौ गौतम भो प्रभो ।
ततोऽवोचद् गणाधीशः शृणु श्रेणिक भूपते ।।६४ ।।

मगधेऽत्रैव पत्नस्य राजगृहस्य सन्निधिम् ।
शालिग्रामाभिधं पत्नं नित्यालोकोऽभवन्नृपः ।।६५ ।।

सोमदेवोऽत्र विप्रोऽस्ति चाऽग्निलाख्याऽस्य भामिनी।
अग्निमारुतभूताख्यौ तयोः पुत्रौ सुखाकरौ ।।६६ ।।

वेदवेदार्थतत्वज्ञौ तर्कशास्त्रविशारदौ।
गर्वोद्धतौ धनैर्युक्तौ विवेकपरिवर्जितौ ।।६७ ।।

एतस्यैव सुपत्नस्य समीपे नन्दने वने।
आगतो यतिभिः सार्द्धं मुनीन्द्रो नन्दिवर्द्धनः ।।६८ ।।

अवधिज्ञाननेत्रोऽसौ लोकवार्ताविचक्षणः।
ध्यानमौनसमायुक्तः स्थितस्तत्र गुणाकरः ।।६९ ।।

ततश्चागमनं श्रुत्वा श्रमणानां महात्मनाम्।
शालिग्रामजनो भूत्या सर्व एव विनिर्ययौ।।७० ।।

अपृच्छतां ततो वह्निवायुभूती विलोक्य तान्।
क्वायं जनपदो याति सुसङ्कीर्णः परस्परम् ।।७१ ।।

ताभ्यां कथितमेकेन मुनिः प्राप्तो निरम्बरः।
तस्यैनं वन्दनां कर्तुमखिलः प्रस्थितो जनः।।७२ ।।

अग्निभूतिस्ततः क्रुद्धः सह भ्रात्रा विनिर्गतः।
विवादे श्रमणान् सर्वान् जयामीति वचोऽवदत् ।।७३ ।।

अर्द्धमार्गे मुनिश्चैकः स्थितोऽस्ति ध्यानतत्परः।
तं दृष्ट्वोवाच विप्रौ तावेकोऽत्र श्रावकोत्तमः।।७४ ।।

अनेन मुनिना सार्द्धं भवद्भ्यां क्रियतां मुदा।
वादो यद्यस्ति संशक्तिर्युवयोर्गर्वसङ्गयोः ।।७५ ।।

एवमस्त्विवति सामर्षौ[8] मुनीन्द्रस्य पुरःस्थितौ।
ऊचतुश्च समुन्नद्धौ किं वेत्सीति पुनः पुनः ।।७६ ।।

सोऽवधि भगवानाह भवन्तावागतौ कुतः।
ऊचतुर्न त्वया ज्ञातौ शालिग्रामात्किमागतौ ।।७७ ।।

मुनिराहावगच्छामि शालिग्रामादुपागतौ।
अनादिजन्मकान्तारे भ्रमन्तावागतौ कुतः ।।७८ ।।

तौ समूचतुरन्योऽपि को जानाति ततो मुनिः।
जगाद शृणुतां विप्र चाऽधुना कथयाम्यहम् ।।७९ ।।

ग्रामस्यैतस्य सीमान्ते वनस्थल्यामुभौ[९] समौ।
अन्योऽन्यानुरतावास्तां शृगालो विकृताननौ ।।८० ।।

आसीदत्रैव च ग्रामे चिरवासः कृषीवलः।
ख्यातः प्रामरको[१०] नाम्ना गतो क्षेत्रमन्यदा ।।८१ ।।

पुनरेमीति सञ्चिन्त्य नानावस्त्वभिलाषिणि।
त्यक्तोपकरणं क्षेत्रे सङ्गतः क्षुधितो गृहम् ।।८२ ।।

तावदञ्जनशैलाभाः प्लावयन्तो महीतलम्।
अकस्मादुन्नता मेघा ववर्षुर्नक्तवासरम् ।।८३ ।।

प्रशान्ताः सप्तरात्रेण रात्रौ तमसिभीषणे।
जम्बूकौ तौ विनिष्क्रान्तौ गहनाद्दर्शितौ क्षुधा ।।८४ ।।

अथोपकरणं क्लिन्नं कर्दमोपमसङ्गतः।
तत्ताभ्यां भक्षितं सर्वं प्राप्तौ चोदरवेदने ।।८५ ।।

अकामनिर्जरायुक्तौ वर्षानिल[११]समाहितौ।
ततः कालङ्गतौ जातौ सोमदेवस्य नन्दनौ ।।८६ ।।

स च प्रामरकः प्राप्तान्वेषकोऽपश्यदेतकौ।
निर्जीवौ जम्बूकौ तेन गृहीत्वा जनितो दृती ।।८७ ।।

अचिरेण मृतश्चाऽसौ सुतस्यैवाऽभवत्सुतः।
जातिस्मरत्वमासाद्य मूकीभूय व्यवस्थितः[१२] ।।८८ ।।

पुत्रं पितुरिति ज्ञात्वा व्याहरामि कथं त्वहम्।
स्नुषाञ्च मातरं तस्माद्धेतौ मौनमुपाश्रितः ।।८९ ।।

यदि नः प्रत्ययः सम्यक् ततस्तिष्ठत्यसावयम्।
मध्ये स्वजनवर्गस्य द्विजो मां द्रष्टुमागतः ।।९० ।।

आहूय गुरुणा चोक्तः स त्वं प्रामरकस्तदा।
आसीत्त्वमधुना जातस्तोकस्यैव शरीरजः ।।९१ ।।

एवं पिताऽपि तोकत्वमिति तोकञ्च तातताम्।
माता पत्नीत्वमायाति[१३] पत्नी व्रजति मातृताम्।।९२।।

उद्घाटनघटीयन्त्रसदृशेऽस्मिन् भवात्मनि।
उपर्यधरतां यान्ति जीवाः कर्मवशङ्गताः।।९३।।

इति ज्ञात्वा भवावस्थां नितान्तं वत्स निन्दितम्।
अधुना मूकतां मुञ्च कुरु वाचां क्रियां सतीम्।।९४।।

इत्युक्तः परमं हृष्ट उत्थाय विगतज्वरः।
उद्भूतो घनरोमाञ्चः प्रोत्फुल्लनयनाननः।।९५।।

गृहीत इव भूतेन परिभ्रम्य प्रदक्षिणाम्।
निपपातोत्तमाङ्गेन छिन्नमूलतरुर्यथा।।९६।।

उवाच विस्मितश्चोच्चैस्त्वं सर्वज्ञपराक्रमः।
इहस्थ सर्वलोकस्य सकलां पश्यसि स्थितिम्।।९७।।

संसारसागरे घोरे कष्टमेव निमज्जतः।
सत्त्वानुकम्पया बोधिस्त्वया मे नाथ दर्शिता।।९८।।

मनोगतं मम ज्ञातं भवता दिव्यबुद्धिना।
इत्युक्त्वा जगृहे दीक्षां सर्वान् सन्त्यज्य बांधवान्।।९९।।

तस्य प्रामरकस्यैतच्छ्रुत्वोपाख्यानमीदृशम्।
संवृता बहवो लोके श्रमणाः श्रावकास्तथा।।१००।।

गत्वा च ते दृती[१४] दृष्टे सर्वलोकेन तद्गृहे।
ततः कलकलो जातो विस्मयंश्च समं ततः।।१०१।।

अथोपहसितौ राज्यंस्तौ जनेन द्विजात्मकौ।
इमौ तौ पशुमांसादौ जम्बूकौ द्विजताङ्गतौ।।१०२।।

इति जनमुखाच्छ्रुत्वा निन्दनं पूर्वमात्मनः।
रहः स्थितौ विलक्षौ च विमानौ विगतप्रभौ।।१०३।।

गते च सवितर्यस्तं प्रकाशनसुदुःखितौ[१५]।
अन्विष्यन्तौ गतौ स्थानं यत्राऽसौ भगवान् स्थितः।।१०४।।

निस्सङ्गः संघमुत्सृज्य वनैकान्तेति गह्वरे।
करंकैः सङ्कटेऽत्यन्तं विचित्रचित्तकाञ्चिते ॥१०५॥

क्रव्यादौ स्वपदादाद्यो पिशाचभुजगाकुले।
सूचीभेदतमच्छिन्ने महावीभत्सदर्शने ॥१०६॥

एवंविधे श्मशानेऽसौ निर्जन्तुनि शिलातले।
पापाभ्यामीक्षितस्ताभ्यां प्रतिमास्थानमास्थितः ॥१०७॥

आकृष्टखड्गहस्तौ च क्रुद्धौ जगदतुः समम्।
जीवं रक्षतु ते लोकः क्व यासि श्रमणाधुना ॥१०८॥

पृथिव्यां ब्राह्मणाः श्रेष्ठा वयं प्रत्यक्षदेवताः।
निर्लज्ज त्वं महादोषो जम्बूका इति भाषसे ॥१०९॥

ततोऽत्यन्तप्रचण्डौ तौ दृष्टौष्ठौ रक्तलोचनौ।
जातौ कृपाविनिर्मुक्तौ सुयक्षेण निरीक्षितौ ॥११०॥

सुमना चिन्तयामास पश्य निर्दोषमीदृशम्।
हन्तुमभ्युद्यतौ साधुं मुक्ताङ्गं ध्यानतत्परम् ॥१११॥

ततः संस्थानमास्थाय तौ चोद्गिरतामसी।
यक्षेण च तदग्रेण स्तम्भितौ निश्चलौ स्थितौ ॥११२॥

विकर्म कुर्तमिछन्तावुपसर्गं महामुनेः।
प्रतीहाराविव क्रूरौ तस्थतुः पार्श्वयोरिमौ ॥११३॥

ततः सुविमले काले प्रभा जाताब्जबान्धवे।
संहृत्य सन्मुनिर्योगं निःसृत्यैकान्ततः स्थितः ॥११४॥

सङ्घश्चतुर्विधः सर्वः शालिग्रामजनस्तथा।
प्राप्तः परमयोगीशमिति विस्मयवान् जगौ ॥११५॥

कावेतावीदृशौ पापौ धिक्कष्टं कर्तुमीहितौ।
अग्निवायुदुराचारावेतौ तावाततायिनौ ॥११६॥

तौ च चिन्तयतामुच्चैः प्रभावोऽयं महामुनेः।
आवां येन बलोद्धृतौ स्तम्भितौ स्थावरीकृतौ ॥११७॥

अनयाऽवस्थया मुक्तौ जीविष्यामो वयं यया।
तदा सम्प्रति श्रद्धामो दर्शनं मौनिसत्तमाम् ।।११८ ।।

अत्रान्तरे परिप्राप्तः सोमदेवः ससम्भ्रमः।
भार्ययाऽग्निलया साकं प्रसादयति तं मुनिम् ।।११९ ।।

भूयोभूयः प्रणामेन बहुभिश्च प्रियोदितैः।
दम्पती चक्रतुश्चाटुं पादमर्दनतत्परौ ।।१२० ।।

जीवतां देव दुःपुत्रावेतौ नः कोपमुत्सृज।
सम्प्रेष्य बान्धवानाथ वयमाज्ञाकरास्तव ।।१२१ ।।

संयतो वक्ति कः कोपः साधूनां यद्ब्रवीष्पदः।
वयं सर्वस्य सदयास्समममित्रारिबान्धवाः ।।१२२ ।।

प्राह यक्षोऽतिरक्ताक्षो वृहद्गम्भीरनिस्वनः।
माभाख्यानं गुरोरस्य जनमध्ये प्रवर्त्तिकम् ।।१२३ ।।

साधून् वीक्ष्य जुगुप्स्यन्ते सद्योऽनर्थं प्रयान्त्यतः।
न पश्यन्त्यात्मनो दौष्ट्यं दोषं कुर्वन्ति साधुषु ।।१२४ ।।

यथाऽऽदर्शतले[१६] कश्चिदात्मानमवलोकयत्।
यादृशं कुरुते वक्त्रं तादृशं पश्यति ध्रुवम् ।।१२५ ।।

तद्वत्साधुं समालोक्य प्रस्थानादिक्रियोद्यतः।
यादृशं कुरुते भावं तादृशं लभते फलम् ।।१२६ ।।

प्ररोदनं प्रहास्येन कलहं पुरुषोक्तितः।
वधेन मरणं प्रोक्तं विद्वेषेण च पातकम् ।।१२७ ।।

इति साधोर्नियुक्तेन परिनिन्द्येन वस्तुना।
फलेन तादृशेनैव कर्ता योगमुपाश्नुते[१७] ।।१२८ ।।

एतैः स्वोपचितैर्दोषैः प्रेर्यमाणौ स्वकर्मभिः।
तव पुत्रौ मया विप्र स्तम्भितौ न हि साधुना ।।१२९ ।।

वेदाभिमाननिर्दग्धावेतौ छद्मवनीपकौ[१८]।
स्थीयेतां[१९]धिक्क्रियाचारौ संयतस्याततायिनौ ।।१३० ।।

इति जल्पन्तमत्युग्रं यक्षं प्रतिविभीषणम्।
प्रसादयन्ति साधुं च[20] विप्रः प्राञ्जलिमस्तकः।।१३१।।

उर्द्धबाहुः परिक्रोशं निर्दयन्ताडयच्छिरः[21]।
सममग्निलया विप्रो विप्रकीर्णात्मकोऽभवत्।।१३२।।

गुरुराह ततः कान्त हे यज्ञ कमलेक्षणा।
मृश्यतामनयोर्दोषो मोहप्रजडचित्तयोः।।१३३।।

जिनशासनवात्सल्यं कृतं सुकृतिना त्वया।
नैतं[22] प्राणिवधं भद्रमदर्थे कर्तुमर्हसि।।१३४।।

यथा ज्ञापयसीत्युक्त्वा गुह्यकेन विसर्जितौ।
आश्वास्यौपसृतौ भक्त्या पादमूलं गुरोस्ततः।।१३५।।

लग्नौ प्रदक्षिणां कृत्वा शिरस्थः करकुड्मलौ।
साधवीयां महाचर्यां ग्रहीतुं शक्तिवर्जितौ।।१३६।।

अणुव्रतानि गृह्णीतां सम्यग्दर्शनभूषितौ।
अमूढौ श्रावकौ जातौ गृहधर्मसुखे रतौ।।१३७।।

पितरावनयोः सम्यग्श्रद्धया परिवर्जितौ।
कालङ्गतौ विना धर्माद्भ्रमितौ भवसागरे।।१३८।।

तौ तु सन्त्यक्तसन्देहौ जिनशासनभावितौ।
हिंसार्थं लौकिकं मार्गं वर्जयन्तौ विषं यथा।।१३९।।

कालं कृत्वा समुत्पन्नौ सौधर्मे विबुधोत्तमौ।
सर्वेन्द्रियमनोह्लादं यत्र दिव्यं महत्सुखम्।।१४०।।

एत्यायोध्यां समुद्रस्य धारण्याः कुक्षिसम्भवौ।
नन्दनौ नयनानन्दौ श्रेष्टिनस्तौ बभूवतुः।।१४१।।

पूर्णकाञ्चनभद्राख्यौ भ्रातरावेव तौ सुखम्।
पुनः श्रावकधर्मेण गतौ सौधर्मदेवताम्।।१४२।।

अयोध्यानगरीन्द्रस्य हेमनाभस्य कामिनी।
नाम्नाऽमरावती तस्यां समुत्पन्नौ दिवश्च्युतौ।।१४३।।

जगतीह प्रविख्यातौ सञ्ज्ञया मधुकैटभौ।
अजय्यौ भ्रातरौ चारुकृतान्तसमविभ्रमौ।।१४४।।

ताभ्यामियं समाक्रान्ता मही सामन्तसङ्कटा।
स्थापिता स्ववशे राजन् प्रजाभ्यां शेमुषी यथा।।१४५।।

नेच्छत्याज्ञां नरेन्द्रैको भीमो नाम महाबलः।
शैलान्तः पुरमाश्रित्य चमरो नन्दनं यथा।।१४६।।

वीरसेनेन लेखश्च प्रेषितस्तस्य भूपतेः।
उद्वासितानि धामानि पृथिव्यां भीमवह्निना।।१४७।।

ततो मधु क्षणं क्रुद्धो भीमकस्योपरि द्रुतम्।
ययौ सर्वबलौघेन युक्तो योद्धैः समन्ततः।।१४८।।

क्रम्यमार्गवशात्प्राप्तो न्यग्रोधनगरञ्च तत्।
वीरसेनो नृपस्तत्र प्रीतियुक्तो विवेश च।।१४९।।

चन्द्राभा चन्द्रकान्तास्या वीरसेनस्य वल्लभा।
देवी निरीक्षिता तेन मधुना जगदिन्दुना।।१५०।।

अनया सह संवासो वरं विन्ध्यवनान्तरे।
चन्द्राभया विना भूतं न राज्यं सार्वभौमिकम्।।१५१।।

इति सञ्चिन्तयन् राजा भीमं निर्जित्य संयुगे।
आस्थापयद्वशे शत्रूनन्यांश्च तत्कृताशया।।१५२।।

अयोध्यां पुनरागत्य सपत्नीकान्नराधिपान्।
आहूय विपुलैर्दानैर्विसर्जयति मानितान्।।१५३।।

आहूतो वीरसेनोऽपि सह पत्न्या ययौ द्रुतम्।
अयोध्याबहिरुद्याने मध्येऽस्थात्सरयूतटे।।१५४।।

देव्या सह समाहूतः प्रविष्टो भवनं मधोः।
उदारदानसन्मानो वीरसेनो विसर्जितः।।१५५।।

अद्याऽपि मान्यता नेयमिति रुध्वा मनोहरा।
चन्द्राभा नरचन्द्रेण प्रेषितान्तःपुरं ततः।।१५६।।

महादेव्याभिषेकेण प्रापिता चाभिषेचनम् ।
आरूढा सर्वदेवीनामुपकारिस्थमास्पदम् ।।१५७ ।।

श्रियेव सा तया साकं निमग्नः सुखसागरे ।
स्वं सुरेन्द्रसमं मेने भोगान्धीकृतमानसः ।।१५८ ।।

वीरसेननृपः सोऽयं विज्ञाय विटतां[२३] प्रियाम् ।
उन्मत्तत्वं परिप्राप्तो रतिं क्वापि न विद्यते ।।१५९ ।।

मण्डवस्याऽभवच्छिष्यस्तापसोऽसौ जलप्रियः ।
मूढं विस्मापयन् लोकं तपः पञ्चाग्निकं श्रितः ।।१६० ।।

अन्यदा मधुराजेन्द्रो धर्मासनमुपागतः ।
करोति मन्त्रिभिः सार्द्धं व्यवहारविचारणम् ।।१६१ ।।

भूपालश्चारुसम्पन्नं सत्यं समसताङ्गतम् ।
प्रविष्टोऽन्तःपुरं धीर स्वपत्न्यामभिलाषुकः[२४] ।।१६२ ।।

खिन्ना तं प्राह चन्द्राभा किमित्यद्य चिरायतम् ।
वयं क्षुदर्दिता नाथ दुःखवेलामिमां स्थिताः ।।१६३ ।।

सोऽवोचत् व्यवहारोयमरालः परदारकः ।
छेत्तुं न शक्यते यस्मात्तस्मादद्य चिरायते ।।१६४ ।।

विहस्योवाच चन्द्राभा को दोषोऽन्यप्रियारतौ ।
परभार्या प्रिया यस्य तं पूजय यथेप्सितम् ।।१६५ ।।

तस्यास्तद्वचनं श्रुत्वा क्रुद्धो मधुविभुर्जगौ ।
ये पारदारिका दुष्टा निग्राह्यास्ते[२५] न संशयः ।।१६६ ।।

दण्ड्याः पञ्चकदण्डेन निर्वास्याः पुरुषाऽधमाः ।
स्पृशन्तोऽप्यबलामन्यां भाषयन्तोऽपि दुर्मताः ।।१६७ ।।

सम्मुखाः[२६] परदारेषु ये पापादानवर्त्तिनः ।[२७]
अधो प्रपतनं येषां ते पूज्याः कथमीदृशाः ।।१६८ ।।

देवी पुनरुवाचेदं सहसा कमलेक्षणा ।
अहो धर्मपरो राजा भवान् भूपालनोद्यतः ।।१६९ ।।

महान् यद्येष दोषोऽस्ति परदारैषिणां नृणाम्।
एतं निग्रहमुर्वीश न करोषि किमात्मनः ॥१७०॥[२८]

प्रथमस्तु भवानेव परदाराभिगामिनाम्।
कोऽन्येषां क्रियते दोषो यथा राजा तथा प्रजा॥१७१॥

स्वयमेव नृपो यत्र नृशंसः पारदारिकः।
तत्र किं व्यवहारेण कारणं स्वच्छतां प्रजाम्॥१७२॥

उपलभ्येदृशं वाक्यं प्रतिबुद्धोऽभवन्मधुः।
एवमेवेति तां देवीं पुनः पुनरभाषत॥१७३॥

तथाऽप्यैश्वर्यपाशेन वेष्टितौ दुर्मुखोदधेः[२९]।
भोगसम्वर्तनी येन कर्मणा नावमुञ्च्यते॥१७४॥

द्राधीयसी गते काले सुप्रबोधसुखान्विते।
सिंहपादाह्वयः साधुः प्राप्तोऽयोध्यां महागुणः॥१७५॥

सहस्रारवनैकान्ते मुनीन्द्रं समवस्थितम्।
श्रुत्वा मधुः समा यासीत् सपत्नीकः सहानुगः॥१७६॥

गुरुं प्रणम्य विधिना सम्विश्य धरणीतले।
धर्मं श्रुत्वा जिनेन्द्रोक्तं भोगेभ्यो विरतोऽभवत्॥१७७॥

मधुकैटभभूपेन्द्रौ मुनी जातौ मनोहरौ।
देव्या समञ्च वैराग्यान्मोक्षसौख्याभिलाषिणौ॥१७८॥

तपो घोरतरं कृत्वा मृत्वा प्राप्तौ समाधिना।
आरणाऽच्युतस्वर्गे तौ प्रतीन्द्रत्वं मनोहरम्॥१७९॥

[३०]द्वाविंशत्यब्ध्यायुष्कौ देवीवृन्दैश्च सेवितौ।
भरतेऽत्र ततश्च्युत्वा द्वारावती पुरे शुभे॥१८०॥

कृष्णभूपेन तौ देवौ तनयौ च भविष्यतः।
रुक्मण्यां जाम्बूवत्याञ्च हरिवंशशिरोमणी॥१८१॥

प्रद्युम्नशम्बुकौ ख्यातौ नामानौ भव्यसुन्दरौ।
घोरतरं तपस्तप्त्वा शिवस्थानङ्गमिष्यतः॥१८२॥

षष्टिवर्षसहस्राणि लक्षः सप्त ततः परम् ।[३१]
रामायणस्य विज्ञेयमन्तरं भारतस्य च ।।१८३ ।।

सम्यग्दर्शनज्ञानचारित्रेण
लभन्ति शिवपदं सौख्यम् ।
यावदनन्तकालं तावद्भुक्त्वा
सिद्धपरेमष्ठिपरमगुरुः ।।१८४ ।।

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते रामस्यायोध्यागमन-
लवाङ्कुशयोर्भवान्तरकथनं सीतायाः षोडशम स्वर्गेंद्रैश्वर्यप्राप्ति मधुकैटभभवान्तर
कथनवर्णनो नाम द्वात्रिंशत्तमोऽधिकारः ।।३२ ।।

१. कष्कन्धा इति क/ख प्रतौ
२. पत्यं कार्ये इति क प्रतौ
३. दूरं इति क/ख प्रतौ
४. अमूढो दुर्मतं यद्वस्तुनि स्मर्त्तव्यं वस्तुनि इति ख प्रतौ
५. श्रवणत्वं इति प्रतित्रयेषु उपलभ्यते परन्तु श्रमणत्वं इति स्यात्।
६. तयौदारे इति ख प्रतौ
७. कामसम्भवौ इति क प्रतौ
८. सौ मूर्षौ इति ख प्रतौ, सामूर्षो इति ग प्रतौ
९. उतौ इति क प्रतौ, उतै इति ग प्रतौ
१०. प्रस्तरको इति क प्रतौ
११. वर्षानल इति प्रतित्रयेषु उपलभ्यते परन्तु वर्षानिल इति स्यात्।
१२. जातिस्मरणसद्वेतो स्ततो मौनमुपाश्रितः इति क प्रतौ
१३. माता पत्नीञ्च वृजति इति क प्रतौ
१४. दृशी इति ग प्रतौ
१५. प्रकाश संदुःखितौ इति क प्रतौ
    प्रकाशसंगदुखितौ इति ख प्रतौ
१६. यथादर्पनले इति ख प्रतौ, यथादर्शनलोकदात्मा इति ग प्रतौ
१७. योगमुपाश्रितेः इति ख प्रतौ, योगमुपाश्रितः इति ग प्रतौ
१८. छद्मवनापकौ इति ख प्रतौ
१९. स्तेयतां इति ख प्रतौ
२०. साधुत्वं इति क/ख प्रतौ।
२१. ताडयन्नर इति ख/ग प्रतौ
२२. मैतु इति क प्रतौ, मैतं इति ख प्रतौ
२३. विहतां इति ख प्रतौ, विहतां इति ग प्रतौ
२४. स्वपतेस्त्रयभिलाषुके इति क प्रतौ,
    नयनेस्वाभिलाषुके इति ग प्रतौ
२५. दुष्टातिग्राह्या इति ग प्रतौ
२६. सन्मूढाः इति ख/ग प्रतौ
२७. पापवशवर्तिनः इति ख प्रतौ, पापादानवर्तिनः इति ग प्रतौ
२८. ग प्रतौ श्लोकानुपलब्धः।
२९. दुःसुखोदधेः इति ख/ग प्रतौ
३०. शुद्धा इति क/ख प्रतौ
३१. षष्टिवर्षसहस्राणि लक्ष सप्त तनः परं इति ग प्रतौ।
    षष्टिवर्षसहस्राणि चत्वारि च ततः परम् इति प.पु.३/१०९/२८

त्रयस्त्रिंशत्तमोऽधिकारः

काञ्चनाख्ये पुरे राजा नाम्ना हेमरथो महान्।
शतह्रदाभिधा भार्या द्वे सुते स्तस्तयोर्वरे।।१।।

आद्या मन्दाकिनी नाम्ना द्वितीया मृगलोचना।
स्वयंवरार्थम्भूपालास्तयोस्तत्र समागताः।।२।।

रामलक्ष्मणयोः पुत्रास्तेऽपि तत्र समागताः।
मञ्चस्थानेषु ते सर्वे यथायोग्यं नृपा स्थिताः।।३।।

सर्वान् विहाय कन्याभ्यां कुमारौ लवणाङ्कुशौ।
स्वीकृतौ पुष्पमालाभ्यां क्रमेण बहुभूषणौ।।४।।

तं दृष्ट्वाऽथ नृपास्तुष्टाः स्वस्वस्थानङ्गता मुदा।
स्वपुरमागताः पुत्राः पद्मलक्ष्मणयोर्वराः।।५।।

लवणाङ्कुशयोर्भूतिं दृष्ट्वा लक्ष्मणनन्दनाः।
मनस्ते चक्रिरे वीरा दीक्षां ग्रहीतुमुत्तमाम्।।६।।

वार्यमाणा अपि सर्वे रामाद्यैः रघुपुङ्गवैः।
वने गताः स्ववैराग्यान्मोक्षहेतोर्हरेः सुताः।।७।।

महाबलमुनेः पार्श्वे श्रुत्वा धर्मं जिनोदितम्।
तत्रैव दीक्षिता जाता वैराग्याद्धरिनन्दनाः।।८।।

तपः घोरतरं कृत्वा शिवस्थानं समाश्रिताः।
शान्तिं कुर्वन्तु ते युष्मान् सिद्धनारायणात्मजाः।।९।।

अथ भामण्डलो राजा सौधाग्रे चैकदा स्थितः।
तदा स्वमनसि प्राह वैराग्यादात्मनं प्रति।।१०।।

यद्यहं कानने गत्वा ग्रहिष्यामि जिनोदिताम्।
दीक्षां तदा तु मे भार्याः करिष्यन्ति किमाकुलाः।।११।।

विजयार्द्धस्य संसाध्य श्रेणयोरुभयोर्मुदा।
पुराणि सकलान्येव स्थापयिष्यामि मत्सुतान्।।१२।।

भार्यादिकांश्च पुत्रांश्च करिष्यामि सुखास्पदे।
पश्चाद्दीक्षां ग्रहिष्यामि शिवस्थानसुखाप्तये।।१३।।

इति चिन्तयतस्तस्य भामण्डलस्य मूर्द्धनि।
पतितोऽशनिपातोऽत्र कुतो राज्यं कुतस्तपः।।१४।।

मृत्वा भोगभुवं प्राप्तः स्वल्पपुण्येन भूपतिः।
दीर्घसूत्रविचाराणां नास्ति सौख्यं कदापि च।।१५।।

संसारेऽनित्यतां ज्ञात्वा क्रियते धर्मसाधनम्।
त्वरितं तपसा दानैः क्षमया सर्वजन्तुषु।।१६।।

अथ श्रीशैलराजोऽसौ मेर्वादीनां वनेषु च।
पञ्चसहस्रनारीभिः क्रीडति लीलयाऽन्वितः।।१७।।

यात्राञ्करोति सर्वत्र सिद्धिक्षेत्रेषु भक्तितः।
पूजादौ तत्परो वीरः शुभकार्ये दिनं प्रति।।१८।।

एकदा नन्दनस्यास्य[१] शिलादेशे स संस्थितः।
मन्त्रिवर्गेण संयुक्तो विनोदविषये मनः।।१९।।

नभस्तले तदावीक्षदभ्रमण्डलमुत्तमम्।
पञ्चवर्णगजाकारं बहुभूषणभूषितम्।।२०।।

ततः प्रोवाच हनूमान् पश्यन्तु भो नराधिपाः।
कीदृशं दृश्यते चाभ्रमण्डलं बहुवर्णकम्।।२१।।

यद्यस्ति दृग्विधो दन्ती मम गेहं तदा वरम्।
साम्राज्यं दृश्यते लोके पद्मादिषु नृपेषु च।।२२।।

एतस्मिन्नन्तरे चाभ्रमण्डलं प्रलयङ्गतम्।
तद्दृष्ट्वा वायुपुत्रोऽतः प्राप्तो वैराग्यमुत्तमम्।।२३।।

कस्य लक्ष्मीर्भवेन्नित्या कस्य वा धनयौवनम्।
तस्मात्सर्वं परित्यज्य करोमि मुक्तिसाधनम्।।२४।।

इत्युक्त्वा स्वगृहं वेगादायातः सचिवैर्वृतः।
मनोहरवचोभिश्च तोषिता वनितादयः।।२५।।

पुत्रादिभ्यो यथायोग्यं दत्तं राज्यं नृपार्चितम्।
धर्मरत्नमुनेः पार्श्वे जग्राह संयमं परम्।।२६।।

सप्तशतनृपैः सार्द्धं मुनिरभून्निरम्बरः।
श्रीशैलो जातवैराग्यान्मुक्तिसाधनहेतवे।।२७।।

तपो दुश्वरमाराध्य छित्वा कर्मप्रबन्धनम्।
तुङ्गिगिरौ च सम्प्राप्तः शिवस्थानं निरञ्जनम्।।२८।।

करोतु भवतां शान्तिं श्रीशैलः सिद्धसत्तमः।
ददातु मे शिवस्थानं कलङ्कदोषवर्जितम्।।२९।।

अथैकदा सुधर्माख्ये स्वर्गे सदसि संस्थितः।
शक्रो देवगणैर्सार्द्धं करोति जिनसत्कथाम्।।३०।।

तदा जगाद शक्रोऽसौ नास्त्यत्र भरते कदा।
कस्यापि प्रीतिरन्यस्य यथा लक्ष्मणरामयोः।।३१।।

एकैकं विना तौ च मरिष्यतो वियोगतः।
मोहेन मोहितौ मूढौ संसारेऽज्ञानभावतः।।३२।।

योऽभवद् ब्रह्मलोकेऽत्र सुरेन्द्रः परमो महान्।
स प्राप्य संसृतेर्भावं करोति न हि संयमम्।।३३।।

इत्युक्त्वा मण्डलः स्वस्थ गतोऽन्तः सदनं मुदा।
सुरा अपि स्वस्थानङ्गताः सम्यक्त्वधारिणः।।३४।।

एकोऽमरस्तु मिथ्यात्वी कृत्वा शक्रस्थजल्पिते।
संशयमागतोऽयोध्यापुरङ्गतौ च परीक्षितुम्।।३५।।

तदा लक्ष्मणवीरोऽत्र स्थित एकाकिको भुवि।
मुखप्रक्षालनं सौम्यं करोति सुखहेतवे।।३६।।

तदा रामस्य गेहेऽस्मिन् देवेन माययाकृतः।
कोलाहलोऽतिदुःखार्त्तः सम्भवतः पुराननात्।।३७।।

मन्त्रिरूपं स्वयं भूत्वा लक्ष्मणस्य पुरःस्थितः।
तदा जगाद लक्ष्मीशः किं भो कोलाहलो महान्।।३८।।

रामस्य श्रूयते गेहे तदाह मन्त्रिविकृतिः।
पद्माभो मरणं प्राप्तः केन रोगेण पीडितः।।३९।।

तद्दुःखेन प्रकुर्वन्ति शोकं रामस्य वल्लभाः।
मन्त्रिवर्गः स्थितस्तत्रागतोऽहं त्वां निवेदितम्।।४०।।

इत्युक्ते निश्चयं कृत्वा चित्तव्याकुललक्ष्मणः।
हा हेति वचनं प्रोच्य मृतः प्राणविसर्जनात्।।४१।।

मृतं तं लक्ष्मणं ज्ञात्वा देवो मनसि व्याकुलः।
अहो मया विनोदेन कथं प्रोक्तञ्च पापिना।।४२।।

शक्रेण कथितुं यत्तु निरर्थं तत्कथं भवेत्।
लक्ष्मणमरणं पापं मे जातं दुष्टदोषिणः।।४३।।

इत्युक्त्वा स सुरो दुःखी लज्जितः स्वगृहङ्गतः।
तदाऽत्र लक्ष्मणो वीरः पतितः प्राणवर्जितः।।४४।।

तद् दृष्ट्वा तस्य भार्याश्च विशल्याप्रमुखास्तदा।
शोकञ्च कर्तुमारब्धा प्राणेशस्य वियोगतः।।४५।।

हा नाथ ! हा हि जीवेश ! हा चक्रिन् ! हा नरेश्वर।
रोगेण रहितो देवः कथं मृतोऽसि निष्कलः।।४६।।

अत्राऽस्मांश्च निराधारं मुक्त्वा नाथ कथङ्गतः।
त्वया विनाऽत्र नो गेहं दृश्यते मृत्युकास्पदम्।।४७।।

काश्चित्पतन्ति पादाऽग्रे प्रसादयितुं लक्ष्मणम्।
काश्चित्स्वहृदयस्थानं ताडयन्ति शिलादिभिः।।४८।।

ते कुर्वन्त्यालिङ्गनं काश्चित्पूर्वस्नेहानुसारतः।
भूषणानि तनुस्थानि काश्चित्क्षिपन्ति दूरतः।।४९।।

तच्छ्रुत्वाऽवोचत्पद्माभो लक्ष्मणस्य गृहे कथम्।
श्रूयते दुःखसंभूतः कलकलो विषङ्करः।।५०।।

इत्युक्त्वा धावमानोऽसौ मन्त्रिवर्गसमन्वितः।
वेगात्समागतो यत्र लक्ष्मणो जीववर्जितः।।५१।।

मृतं तं लक्ष्मणं दृष्ट्वा तेजस्विनं गुणाकरम्।
रामोऽपि मूर्च्छतां प्राप्तो मृत एवेति दुःखतः।।५२।।

ततो लवाङ्कुशौ दृष्ट्वा संसारेऽनित्यतां पराम्।
यदीदृशां नराणाञ्च जायते मरणं ध्रुवम्।।५३।।

तदा चाऽस्मद्दृशां पुंसां का सङ्ख्येति विचिन्तनात्।
प्राप्तो वैराग्यभावं तौ चन्दनाख्यं वनं गतौ।।५४।।

तत्राऽमृतस्वराभिख्यं मुनिं नत्वा कुमारकौ।
मोक्षार्थिनौ मुनी जातौ तपः श्रिया विभूषितौ।।५५।।

क्रमेण तौ तपः घोरं कृत्वा कर्मविनाशनम्।
केवलज्ञानमुत्पाद्य पावागिरौ शिवङ्गतौ।।५६।।

अथ शैत्योपचारेण सञ्ज्ञाप्राप्तोऽत्र राघवः।
हा वीर ! हा हि लक्ष्मीश ! हा भ्रात!हा सुखास्पदम्।।५७।।

मां विना न च कुत्रापि त्वङ्गतोऽसि कदापि च।
इत्यादिर्विविधैर्वाक्यैः शोकङ्करोति राघवः।।५८।।

रामस्याऽन्तःपुरं सर्वं वेगात्तत्र समागतम्।
अयोध्यायां स्थिताः सर्वाः प्रजाः दुःखेन पूरिताः।।५९।।

तदा रामोऽस्य देहं तत्कृत्वा स्वाङ्के स्वयं महत्।
रोदति हृदये शून्यो दुःखपूरितमानसः।।६०।।

एतस्मिन्नन्तरे श्रुत्वा सुग्रीवाद्या नराधिपाः।
पद्माभस्यान्तिकं प्राप्ताः कृत्वा दुःखात्प्ररोदनम्।।६१।।

ततो जगाद पद्माभं नयवाक्यं विभीषणः।
कथं रुदसि देवात्र संसारे नास्ति नित्यता।।६२।।

अन्येषां मरणं दृष्ट्वा रुदन्ति मुग्धमानसाः।
स्वस्य मृत्युं न पश्यन्ति पादाऽधः साम्प्रतं स्थितम्।।६३।।

इत्यादि बहुधा वाक्यैर्बोधितो रघुनन्दनः।
पुनरुचुः खगाधीशाः शृणु राम दयापरः।।६४।।

लक्ष्मणस्य शरीरस्य प्रभोः संस्कारहेतवे।
चिताया रचने देह्यास्माकमाज्ञां नराधिपः।।६५।।

तच्छ्रुत्वा प्राह पद्माभः पीडितो मोहकर्मणा।
युष्मत्पितृसुतादींश्च वह्नौ दह्यन्तु भो नृपाः।।६६।।

लक्ष्मीधरस्तु सुप्तोऽस्ति धृत्वा कोपं ममोपरि।
उत्थिष्यति क्षणं स्थित्वा त्यक्त्वा कोपञ्च साम्प्रतम्।।६७।।

वीरोतिष्ठ प्रगच्छामः स्थानं दुर्जनवर्जितम्।
अत्र तु खेचरा दुष्टा वर्तन्तेऽहितचिन्तकाः।।६८।।

इत्युक्त्वोत्थाय लक्ष्मीशं जग्राह स्वहृदपुरः[२]।
निर्गतो विषये रन्तुं पद्मो मूर्खत्वपीडितः।।६९।।

पृष्टतः खेचरा लग्ना रक्षितुं रघुनन्दनम्।
द्वित्रिदिनेषु पद्माभ किंकरान् प्राह मोहतः।।७०।।

क्षुधार्त्तोऽस्त्यत्र लक्ष्मीशः शुभाऽन्नं क्रियतां त्वरम्।
सग्रीवाद्यैस्ततो वेगात्कृतमन्नं सुनिर्मलम्।।७१।।

तदन्नं तन्मुखे रामः क्षिपत्यज्ञानपीडितः।
न गृह्णाति तदन्नं स गतप्राणस्तु लक्ष्मणः।।७२।।

मायया खेचरा वीरा भुक्तं संदर्श्य लक्ष्मणम्।
भुञ्जयन्ति च पद्माभं कृत्वा विनयवत्सलम्।।७३।।

एवं दिनानि गच्छन्ति कानिचिच्च परिभ्रमात्।
ततो लक्ष्मीधरस्याऽस्य मरणं वैरिभिः श्रुतम्।।७४।।

इन्द्रजित्कुम्भकर्णानां दूषणाद्यन्य राक्षसाम्।
तनयाः प्रबला जाताः छिद्रं[३] प्राप्याऽत्र राघवे।।७५।।

अस्माकं जनका एभ्यां मारिता रणमूर्द्धनि।
तद्वैरञ्च ग्रहिष्यामोऽधुना हत्वाऽत्र राघवम्।।७६।।

इत्युक्त्वा बलसंयुक्ताः प्राप्ताः साकेतकं पुरम्।
तद्दृष्ट्वा राघवः कोपादुत्थितो रणहेतवे।।७७।।

पृष्टे बध्वाऽथ लक्ष्मीशं करे धृत्वा च कार्मुकम्।
रणं कर्तुं समुद्युक्तो रणविक्रमराघवः।।७८।।

सुग्रीवाद्या नृपास्तत्र राघवपक्षवर्त्तिनः।
उत्थिताः कदनं कर्तुं शोकव्याकुलमानसाः॥७९॥

आगतैः राक्षसैर्वीरैर्भग्नं सैन्यञ्च राघवम्।
ततो भीताऽथ साकेतपुरस्थाः सकलाः प्रजाः॥८०॥

एतस्मिन्नन्तरे स्वर्गे जातौ स्तो निर्जरौ पुरा।
जटायुयमवक्राख्यो फलात्पञ्चनमस्कृतेः॥८१॥

तयोरासनकम्पेन कलकलो महानभूत्।
विमानेष्वपि देवेषु किं किमिति प्रजल्पवात्॥८२॥

तदा स्वावधिनेत्रेण ज्ञात्वा ताभ्यां स्वस्वामिनः।

पद्मस्य दुःखसञ्जातं लक्ष्मणमरणादिजम्॥८३॥

ततः कृतान्तवक्राख्यः प्राह जटायुनिर्जरम्।
आत्मनोः स्वामिनस्तस्य दुःखं जातं महीतले॥८४॥

लक्ष्मीधरस्य सञ्जातं मरणमायुषः क्षयात्।
अज्ञानमोहितः पद्मस्तं धृत्वा भ्रमति क्षितौ॥८५॥

हिताहितं न जानाति सुखं दुःखं न वा क्वचित्।
आत्मवर्गं परिवर्गं न वेत्ति मोहपीडितः॥८६॥

षण्मासाश्चाधुना जातास्तस्य दुःखेन पीडितः।
शत्रुभिः सकलो देशो बाधितो लुण्टनादिकैः॥८७॥

तत्सहायं करिष्यावो नो चेत्तदाऽत्र भूतले।
जायते नरकावासः स्वामिद्रोहत्वमावयोः॥८८॥

पक्षिरूपोऽपि पापी त्वं यत्प्रसादात्सुरोऽभवत्।
सेनान्यहं प्रसादाच्च तस्यैव देवताङ्गतः॥८९॥

इत्युक्त्वा स्वर्गमाहेन्द्रान्निर्गतौ तौ सुरौ तदा।
जटायुर्विप्ररूपेण पद्माभस्याऽन्तिकङ्गतः॥९०॥

दैत्यो भूत्वा यमवक्रः सैन्यं प्राप्तश्च शात्रवम्।
पर्वतादिभिरास्फाल्य मारिता राक्षसी चमूः॥९१॥

ततो भीतास्तु पापिष्ठा राक्षसा दैत्यमारिताः।
गताः पलायनं कृत्वा स्वस्वस्थानं यथागताः।।९२।।

मानभङ्गत्वमासाद्य शक्रजितः सुतो महत्।
विरोष इति नाम्ना स प्राप्तो वैराग्यलज्जितः।।९३।।

बहुभिः राक्षसैः सार्द्धं जग्राह संयमं परम्।
रतिवेगमुनेः पार्श्वे सदासौख्यशिवाप्तये।।९४।।

अथ सञ्जित्य सङ्ग्रामे राक्षसान् पुष्टमानसान्।
जयं प्राप्तो यमवक्रो रामस्याऽन्तिकमागतः।।९५।।

शुष्कवृक्षस्य रूपं स कृत्वा पद्मपुरः स्थितः।
जटायुर्जलकुम्भैस्तं सिञ्चति फलहेतवे।।९६।।

पद्मस्तदोचे भो विप्र किं त्वं करोसि सिञ्चनम्।
शुष्कवृक्षे फलावाप्तिर्भवेत्किं वा तवाधुना।।९७।।

तदा जगाद विप्रोऽसौ परोपदेशकौशलाः।
बहवः सन्ति लोकेऽस्मिन्न वेत्ति स्वात्मनं स्वयम्।।९८।।

मृतं वहसि लक्ष्मीशं तस्य किं जीवनं भवेत्।
ततो रुष्टश्च पद्माभः प्रोचे तं ब्राह्मणं प्रति।।९९।।

हितं वाक्यं न मूर्खेषु दुष्टाऽमङ्गलवादिषु।
तस्मान्मौन्यं वरं कर्तुं सर्वजीवसुखप्रदम्।।१००।।

इत्युक्त्वा स पुरो गच्छन्स्तदा शिलातले बहून्।
बीजान् वपति विप्रोऽसौ कुम्भे मथति सज्जलम्।।१०१।।

सिकता घाणके क्षिप्त्वा मूढस्नेहाय पीडति।
इत्यादिदर्शितं तस्मै रामाय बोधहेतवे।।१०२।।

तं दृष्ट्वा प्रोचे पद्माभः शिलायां किम्भवेद्विधिः।
नवनीतञ्जले किम्वा स्नेहं वा बालुकाचये।।१०३।।

कष्टं भविष्यति व्यर्थं विचाररहितस्य ते।
ततः कृतान्तवक्रोऽसौ प्रोचे किं वहसि मृतम्।।१०४।।

एवं यावत्तयोर्वादो वर्तते सुररामयोः।
तावन्मृत्युकस्कन्धस्थो जटायुस्तत्र चागतः।।१०५।।

पद्मो जगाद भो विप्र मृतं किं वहसि वृथा।
मृते नरे फलं नास्ति वार्तादि सुखदं क्वचित्।।१०६।।

ब्राह्मणः प्राह मे ब्रूषि त्वं न जानासि राघव।
यतो वहसि लक्ष्मीशं गतं जीवकलेवरम्।।१०७।।

इत्युक्ते विप्रे पद्मस्य मोहकर्मङ्गतं क्वचित्।
मुखं पश्यति पद्माभो लक्ष्मणस्य मृतस्य वै।।१०८।।

जीवेन रहितं बन्धुं दृष्ट्वा लक्ष्मीधरं तदा।
संसारेऽनित्यतां ज्ञात्वा वैराग्याभिमुखोऽभवत्।।१०९।।

कस्य माता पिता कस्य बान्धवा धनयौवनम्।
सर्वं विनश्वरं लोके तस्मात्त्याज्यं महात्मभिः।।११०।।

इति वैराग्यसम्पन्नं पद्मं ज्ञात्वा च तौ सुरौ।
स्वरूपं प्रकटीकृत्वा पद्मस्य पुरतः स्थितौ।।१११।।

ततो जगाद पद्माभः कौ भवन्तौ क्व वागतौ।
ततः प्रोचे यमवक्रः सेनान्यहं तव प्रभो।।११२।।

त्वत्प्रसादात्तपः कृत्वा माहेन्द्रेहं सुरोऽभवत्।
तथाऽयं जटायुः पक्षी तत्रैवं सुरताङ्गतः।।११३।।

सञ्ज्ञायावधिनेत्राभ्यां त्वयि दुःखस्य कारणम्।
आवाञ्चाऽत्रागतौ देवौ त्वाञ्च बोधयितुं प्रभो।।११४।।

इत्युक्ते प्रबुधो रामो जगाद तौ सुरौ प्रति।
लक्ष्मणस्य शरीरस्य क्रियतां दहनक्रियाम्।।११५।।

सुग्रीवाद्यैर्नृपैस्तत्र चितायाः सञ्चनङ्कृतम्।
चन्दनादिमहाकाष्ठैस्तत्र दग्धस्तु लक्ष्मणः।।११६।।

स्नानादिशौच्यतां भूत्वा ततः प्रोवाच राघवः।
शत्रुघ्न गृह्यतां राज्यं प्रजां त्वं सुखिनीं कुरु।।११७।।

ततो जगाद शत्रुघ्नो नास्ति राज्ये प्रयोजनम्।
गृहिष्यामि वरां दीक्षां गमिष्यामि शिवास्पदम्।।११८।।

अनङ्गलवणं पौत्रं कृत्वा राज्ये नृपार्चिते।
दीक्षाया हेतवे रामो निर्गतः काननं प्रति।।११९।।

सुभूषणाय पुत्राय लङ्काराज्यं विभीषणः।
सुग्रीवोऽपि निजं राज्यमङ्गदस्याऽङ्गये ददौ।।१२०।।

एतस्मिन्नन्तरे श्रेष्ठी चार्हददास इति श्रुतः।
रामं जगाद नत्वाऽथ श्रूयतां विनयं प्रभो।।१२१।।

योगी सुव्रतनामाश्च चारणोऽवधिलोचनः।
आगतोऽस्ति वने रम्ये वन्दने मुनिभिर्वृतः।।१२२।।

तच्छ्रुत्वानन्दसम्पन्नो खेचरैर्भूचरैर्युतः।
गतो यत्र वने योगी ध्यानाऽध्ययनतत्परः।।१२३।।

पूजित्वा चरणौ तस्य नत्वा स्तुत्वा च राघवः।
उपविष्टः युतो भक्त्या वैराग्यगुणभूषितः।।१२४।।

श्रुत्वा धर्मं मुनीन्द्रोक्तं सञ्छिद्य मोहबन्धनम्।
जग्राह संयमं रामः शत्रुघ्नेन समन्वितः।।१२५।।

भूषणानि च वस्त्राणि शिरकेशान् परीहृतान्।
दृष्ट्वा प्रजा: रुदन्ति स्म मेघधारा जलैरिव।।१२६।।

विभीषणोऽथ सुग्रीवो नीलश्चन्द्रनखो नलः।
क्रव्यो[४] विराधितो वीरश्चाङ्गाङ्गदखगेश्वरौ।।१२७।।

त्यक्त्वा सुखं तु साम्राज्यं धनं धान्यञ्च सम्पदम्।
भार्या पुत्रेषु मोहञ्च खेचरा मुनिताङ्गताः।।१२८।।

एवं श्रीमतिनिष्क्रान्ते रामे जातानि षोडशः।
श्रमणानां सहस्राणि शताधिकानि भूपतेः।।१२९।।

सप्तविंशसहस्राणि प्रधानवरयोषिताम्।
श्रीमतीश्रमणीपार्श्वे बभूवुः परमार्यिकाः।।१३०।।

अथ पद्माभनिर्ग्रन्थो गुरोः प्राप्यानुमोदनम्।
एकाकी विहितद्वन्द्वो विहारं प्रतिपन्नवान्।।१३१।।

दशदिनसुपर्यन्तं कृत्वोपवसनं मुनिः।
पारणार्थं परिप्राप्तो नन्दस्थलीं पुरीं शुभाम्।।१३२।।

मुने रूपं समालोक्य पुरनार्योऽतिचञ्चलाः।
विस्मृताश्च स्वपुत्रादीन् कामव्याकुलमानसाः।।१३३।।

व्यसनपीडिता नार्यो मुनिं प्राहुः प्रभो मम।
आगच्छ पारणाहेतोः सद्मनि बहुभूषिते।।१३४।।

अन्नं बहुविधं पक्वं गृहाण मे गृहे प्रभो।
इत्युक्त्वा वनिता वृन्दाः पतन्ति रामपादयोः।।१३५।।

दुःमनांसि कुनारीणां ज्ञात्वा स्वावधिनेत्रतः।
कृताऽन्तरायं योगीन्द्रो व्याघुट्य स वनङ्गतः।।१३६।।

अद्य प्रभृति यत्तेषु न गन्तव्यं मया क्वचित्।
कदाऽपि किमर्थञ्चैव चेत्युक्त्वा योगसंस्थितः।।१३७।।

अस्मिन् वने यदा भुक्तिं लभिष्यामि च प्रासुकाम्।
करिष्यामि तदा नोचेदनशनं भवेन्मम।।१३८।।

इत्युक्त्वा द्वादशाहानि कृत्वोपवासनं पुनः।
कायोत्सर्गे स्थितो योगी मन्दर इव धीरधीः।।१३९।।

पारणास्याऽस्य रम्येऽस्मिन् दिवसे भूपतिर्महान्।
प्रतिनन्दीति विख्यात आनीतो दुष्टवाजिना।।१४०।।

वनेऽस्मिन् यत्र रामोऽस्ति तपस्वी ध्यानतत्परः।
तं च द्रष्टुं प्रजा रम्या आगता वल्लभान्विता।।१४१।।

नृपं दृष्ट्वा प्रजास्तुष्टा क्रीडां कर्तुं समुद्यताः।
परस्परं विनोदेन ततस्ते सुखताङ्गताः।।१४२।।

स्वयं पाकविधिञ्चक्रे भोजनार्थं महद्वरम्।
मध्याह्नसमये तत्र जनः सुखस्य हेतवे।।१४३।।

तदा मुनीन्द्ररामोऽसौ चर्यार्थञ्च समागतः।
तं दृष्ट्वा नृपतिस्तुष्टस्तत्राऽसौ भार्ययान्वितः।।१४४।।

भार्यया दत्तनीरेण प्रासुकेन मुनीश्वरः।
रक्षितो भक्तिपूर्वेण नृपेण प्रतिनन्दिना।।१४५।।

प्रक्षाल्य चरणद्वन्द्वं सम्पूज्याष्टविधार्चनैः।
दत्तं दानं मुनीन्द्राय सुखदं प्रासुकं वरम्।।१४६।।

निरन्तरे मुनौ जाते तुष्टैर्देवैः कृतं मुदा।
पञ्चाऽश्चर्यञ्च रत्नानां वृष्टादिश्च प्रभावना।।१४७।।

प्रजाभिः सकलाभिश्च पूजितो मुनिरुत्तमः।
आशीर्वादादिकं दत्वा तेभ्यो मुनिर्वनङ्गतः।।१४८।।

कायोत्सर्गे स्थितो योगी ध्यानाऽध्ययनतत्परः।
एवं देशान् वनान् रम्यान् भ्रमति धर्महेतवे।।१४९।।

क्वचिन्मासं क्वचिद्वर्षं क्वचित्पक्षं क्वचिद्दिनम्।
तिष्ठति ध्यानसंलीन्नः कर्मछेदनहेतवे।।१५०।।

अथाऽसौ विहरन् योगी प्राप्तः कोटिशिलां वराम्।
कर्माणि संक्षयं कर्तुं स्थितो ध्यानाऽग्रदृष्टितः।।१५१।।

तदा स्वाऽवधिनेत्रेण सीतेन्द्रेण स्वचेतसि।
ज्ञात्वा रामे मुनीन्द्रत्वं नारकत्वञ्च लक्ष्मणे।।१५२।।

रामः छित्वाऽद्य कर्माणि शिवस्थानं गमिष्यति।
लक्ष्मणस्तु महद्दुःखं भुञ्जति नरकालये।।१५३।।

सुखं दुःखञ्च संसारे भोक्तव्यं समभागतः।
अस्माभिश्च त्रिभिर्जीवैरित्युक्त्वाऽत्र समागतः।।१५४।।

दृष्ट्वा रामं महद्वीरं तुष्टोऽच्युतेन्द्रनामभाक्।
सम्यक्दृष्टी तथाऽप्यत्रोद्युक्तो तं परीक्षितुम्।।१५५।।

सीताया रूपमाश्रित्य पद्माभस्यान्तिकङ्गतः।
कोकिलारवसंयुक्ते वसन्ते मासि कानने।।१५६।।

शिलातलस्थितस्याऽग्रे कृत्वा स्वविकृतिं मुदा।
करोति विविधां चेष्टां ध्यानभङ्गस्य हेतवे।।१५७।।

हावभावविलासादीन्नानाकामविकारजान् ।
दर्शयति मुनीन्द्राय कृत्वा गानादिसत्क्रियाम्।।१५८।।

तथाऽपि मुनि पद्माभो ध्यानतश्चलितो न च।
ध्यानेन तेन पद्मस्य सञ्जातं कर्मणां क्षयम्।।१५९।।

घातिकर्माणि चत्वारि गतानि प्रलयं तदा।
सञ्जातं केवलज्ञानं लोकालोकप्रकाशकम्।।१६०।।

विकृतिं त्यक्तसीतेन्द्रो गतो यत्राऽस्ति लक्ष्मणः।
चतुर्थे नरके[५] घोरे महादुखस्य चास्पदे।।१६१।।

शम्बूकेनाऽरिणा तत्र हन्यमानञ्च लक्ष्मणम्।
अन्यैश्च नारकैर्दुःखैः पीड्यमानञ्च पञ्चधा।।१६२।।

केचिच्छेदन्ति भेदन्ति दहन्ति वह्निनाऽपरे।
क्षिपन्ति वैतरण्याञ्च पायन्ति तप्तशिंशकम्।।१६३।।

रावणो दशरूपेण व्याघ्रसिंहादिना तदा।
भक्षति लक्ष्मणं देहं स्मृत्वा वैरञ्च पूर्वजम्।।१६४।।

परस्परैर्महाघातैर्घातयन्ति च नारकाः।
एवं विधञ्च तं दृष्ट्वा सीतेन्द्रो दुःखमानसः।।१६५।।

होहेति वचनं चोक्ता जगाद लक्ष्मणं प्रति।
हा देवर! हा लक्ष्मीश! कुतः सुखं नृपादिजम्।।१६६।।

कुतः कष्टं तव श्वभ्रं धिग् धिग् च कर्मणां गतिः।
पञ्चेन्द्रियाहितो जीवः करोति पापसङ्ग्रहम्।।१६७।।

पापात् श्वभ्रं महादुःखं जीवेन भुज्यते परम्।
न कर्तव्यं ततः पापं संसारदुःखवर्द्धकम्।।१६८।।

आगच्छ चाऽधुना वीर नाकं नयामि चारुणम्।
इत्युक्त्वा तं विमाने स्वे स्थापितुमुद्यतस्तदा।।१६९।।

पिण्डीभूत्वा च तत्रैव पतति लक्ष्मणं तनुः।
तदा ज्ञात्वा स्थितिं श्वाभ्री सीतेन्द्रः प्राह तं ततः।।१७०।।

कुरु त्वं वीर सम्यक्त्वं श्वभ्रदुःखनिवारकम्।
इति शम्बूकलक्ष्मीशरावणाः प्रतिबोधिताः।।१७१।।

ततः सन्तोष्य सर्वांस्तान् क्षान्त्वा तेषां परस्परम्।
सीतेन्द्रश्चागतो यत्र रामोऽस्ति केवली जिनः।।१७२।।

समवशरणं तस्य निर्माप्य भक्तितो मुनेः।
सभाद्वादशमध्यस्थं पूजयन्ति जिनं सुराः।।१७३।।

जलं गन्धाक्षतैः पुष्पैश्चरुभिर्दीपधूपकैः।
फलैरर्घै जिनेन्द्रं तमर्चयन्ति सुराधिपाः।।१७४।।

स्तुवन्ति विविधैः स्तोत्रैर्नृत्यन्ति भक्तिचोदिताः।
संस्थितास्ते यथायोग्यं पशवो मानवाः सुराः।।१७५।।

सीतेन्द्रोऽसौ ततोऽवोचद् ब्रूहि स्वामिन् वृषं वरम्।
तच्छ्रुत्वा च भविष्यामो वयं हि सुखिनो जनाः।।१७६।।

सप्ततत्त्वानि पञ्चाऽस्तिकायाः षट्जीवजातयः।
षड्द्रव्यैर्भरितो लोकः पापात्दुःखी वृषा सुखी।।१७७।।

एवं जिनोदितं धर्मं श्रुत्वा तुष्टाः सुराऽसुराः।
ततो जगाद सीतेन्द्रो नाथ त्वं ब्रूहि मां प्रति।।१७८।।

दशरथनृपो यस्तु मुनिर्जातो दिगम्बरः।
स मृत्वा का गतिः प्राप्तोऽपराजितादयोऽपि वा।।१७९।।

सोऽवोचदानते स्वर्गे देवो दशरथोऽभवत्।
जनकः कनकश्चैव सुप्रजा चाऽपराजिता।।१८०।।

कैकया केकसी चैवं तत्र जाताः सुरोत्तमाः।
लवाङ्कुशौ मुनीन्द्रौ तौ प्राप्तौ मोक्षपदं परम्।।१८१।।

भामण्डलस्य वक्ष्येऽथ शृणु सीतेन्द्र सद्गतिम्।
अयोध्यायाञ्च वज्राङ्को नाम्नाऽस्ति श्रेष्टिनां वरः।।१८२।।

मकरी दयिता तस्य अशोकतिलकौ[६] सुतौ।
सीताया वनवासञ्च दृष्ट्वा वज्राङ्कवाणिजः।।१८३।।

प्राप्य वैराग्यसद्भावं मुनिर्जातो निरम्बरः।
द्युतिसङ्गमुनेः पार्श्वे नित्यसौख्यशिवाप्तये।।१८४।।

अशोकतिलकौ पुत्रौ क्वचिज्जनकदर्शनात्।
पितुः पार्श्वे मुनी जातौ स्नेहवैराग्यभावतः।।१८५।।

तपस्तप्त्वा मुनीन्द्रौ तौ प्राप्तौ ग्रैवेयकं परम्।
एकदा ताम्रचूडाख्ये नगरे वन्दितुं जिनम्।।१८६।।

आगतौ तौ सुरौ रम्यौ वन्दित्वा श्रीजिनं तदा।
बालुकामण्डलं तत्र कृतं ताभ्यां मनोहरम्।।१८७।।

पञ्चाशद्योजनं वृत्तं[७] कृत्वा स्वस्थानकङ्गतौ।
वर्षाकालेऽथ तत्रैक उद्गतो वटवृक्षकः।।१८८।।

वटं भामण्डलो दृष्ट्वा कदाचित्तुष्टवान् हृदि।
तेनाऽपि तत्र पुष्पाणां कृता रम्याश्च वाटिका।।१८९।।

तत्रैकदा मुनीन्द्राय वज्राङ्काय सुभक्तितः।
भामण्डलेन भूपेन दत्तं दानं सुनिर्मलम्।।१९०।।

तुष्टश्चेतसि भूपोऽसौ चागतः स्वगृहं मुदा।
विद्युत्पातेन मृत्वा स भोगभूमिं गतो वरम्।।१९१।।

त्रिपल्यमायुषं भुक्त्वैशानतोसावतरिष्यति।
ततश्च्युत्वा मनुष्यत्वं प्राप्य मोक्षं गमिष्यति।।१९२।।

शृणु सीतेन्द्र निस्तीर्य दुःखं नरकसम्भवम्।
भविष्यतः स्वकर्मस्थौ तौ[८] रावणलक्ष्मणौ।।१९३।।

चतुर्थनरकादेत्य स्वानुपूर्वस्य मन्दरात्।
नगर्यां विजयावत्यां मनुष्यत्वमवाप्स्यताम्।।१९४।।

गृहिणी रोहिणीनाम्ना सुनन्दस्य कुटुम्बिनः।
सम्यग्दृष्टेः प्रियौ पुत्रौ क्रमेण तौ भविष्यतः।।१९५।।

अर्हद्दासर्षिदासाख्यौ विदितौ तौ च सद्गुणैः।
अत्यन्तमहच्चेतस्कौ श्लाघनीयौ क्रियापरौ।।१९६।।

गृहस्थविधिनाभ्यच्र्य देवदेवं जिनेश्वरम्।
अणुव्रतधरौ काले तौ गीर्वाणौ भविष्यतः।।१९७।।

पञ्चेन्द्रियसुखन्तत्र चिरम्भुक्त्वा मनोहरम् ।
च्युत्वा भूयश्च तत्रैव जनिष्यतः महाकुले ।।१९८ ।।

सत्दानेन हरिक्षेत्रं सम्प्राप्य त्रिदिवङ्गतौ ।
प्रच्युतौ पुरि तत्रैव नृपपुत्रौ भविष्यतः ।।१९९ ।।

पिताकुमारकीर्त्याख्यो लक्ष्मी सुजननी तयोः ।
वीरौ कुमारकावेतौ जयकान्तजयप्रभौ ।।२०० ।।

ततः परं तपः कृत्वा लान्तवं कल्पमाश्रितौ ।
विबुद्धोत्तमतां प्राप्तौ भोक्ष्ये तद्भवनं सुखम् ।।२०१ ।।

त्वमत्र भरतक्षेत्रे च्युतः सन्नारणाऽच्युतात् ।
सर्वरत्नपतिः श्रीमान् चक्रवर्ती भविष्यति ।।२०२ ।।

तौ च स्वर्गच्युतौ देवौ पुण्यनिस्पन्दतेजसाम् ।
इन्द्राम्भोजरथाभिख्यौ तव पुत्रौ भविष्यतः ।।२०३ ।।

आसीत्प्रतिरिपु योऽसौ दशवक्रो महाबलः ।
सोऽयमिन्द्ररथाभिख्यो भवेद्धर्मपरायणः ।।२०४ ।।

प्राप्य श्रेष्ठान् भवांश्चाऽपि नरत्वञ्च लभिष्यति ।
तीर्थकृत्कर्मसंघातमर्जयिष्यति पुण्यवान् ।।२०५ ।।

ततोनुक्रमतः पूजामवाप्य भुवनत्रयात् ।
मोहादिशत्रुसंघातं निहत्यार्हन्त्यमाप्स्यति ।।२०६ ।।

रत्नस्थलपुरे कृत्वा राज्यञ्चक्रधरस्त्वसौ ।
वैजयन्तेऽहमिन्द्रत्वमवाप्स्यसि तपो बलात् ।।२०७ ।।

स त्वं तस्य जिनेन्द्रस्य प्रच्युतः स्वर्गलोकतः ।
आद्यो गणधरः श्रीमान् बुद्धिप्राप्तो भविष्यसि ।।२०८ ।।

ततः परमनिर्वाणं यास्यसीत्यमरेश्वरः ।
श्रुत्वा प्रायोपरां तुष्टिं भावितेनाऽन्तरात्मना ।।२०९ ।।

अयं तु लाक्ष्मणो भावः सर्वज्ञेन निवेदितः ।
अम्भोजरथनामाऽसौ भूत्वा चक्रधरात्मजः ।।२१० ।।

चारून् कांश्चिद् भवान् भ्रान्त्वा धर्मसङ्गतचेष्टितः ।
अत्रैव भरते भूत्वा जिनो मोक्षं गमिष्यति ।।२११ ।।

एवं पद्मजिनाधीशाच्छ्रुत्वा धर्मं सुनिर्मलम्।
अच्युतेन्द्रादयो देवास्तुष्टाः स्वस्थानकङ्गताः।।२१२।।

अथ देशान् बहून् रामो विहत्य धर्महेतवे।
तुङ्गीगिरिं वरं प्राप्तः श्रीजिनेन्द्रः शिवाप्तये।।२१३।।

सञ्छिद्य शेषकर्माणि ध्यानयोगाज्जिनेश्वरः।
प्राप्तः शिवास्पदं रामः शाश्वतं सुखसागरम्।।२१४।।

सप्तदशसहस्राणि वर्षाणि राघवस्य वै।
ज्ञेयं हि परमायुश्च सुखसन्ततिसम्पदम्।।२१५।।[९]

सुद्वादशसहस्राणि वर्षाणि लक्ष्मणस्य च।
आयुष्यं परमं सौख्यं भोगसम्पतिदायकम्।।२१६।।[१०]

रामस्य चरितं रम्यं शृणोति यश्च धार्मिकः।
लभते सः शिवस्थानं सर्वसुखाकरं परम्।।२१७।।

विक्रमस्य गते शाके षोडशशतवर्षके।
षट्पञ्चाशत्समायुक्ते मासे श्रावणिके तथा।।२१८।।

शुक्लपक्षत्रयोदश्यां बुद्धवारे शुभदिने।
निष्पन्नं चरितं रम्यं रामचन्द्रस्य पावनम्।।२१९।।

महेन्द्रकीर्तियोगीन्द्रप्रसादाच्च कृतं मया।
सोमसेनेन रामस्य पुराणं पुण्यहेतवे।।२२०।।

यदुक्तं रविषेणेन पुराणं विस्तराद् वरम्।
तदैवात्र च सङ्कोच्य किञ्चिद्धि कथितं मया।।२२१।।

गर्वेण न कृतं शास्त्रं नापि कीर्तिफलाप्तये।
केवलं पुण्यहेत्वर्थं स्तुता रामगुणा मया।।२२२।।

नाहं जानामि शास्त्राणि न छन्दो न च नाटकम्।
तथापि च विनोदेन कृतं रामपुराणकम्।।२२३।।

ये सन्ति विदुषा लोके शोधयन्तु च ते मम।
शास्त्रं परोपकाराय ते कृता बह्मणा भुवि।।२२४।।

कथामात्रञ्च पद्मस्य वर्तते वर्णनां विना।
अस्मिन् ग्रन्थे तु भो भव्याः शृण्वन्तु सावधानतः।।२२५।।

विस्ताररुचिनः शिष्या ये सन्ति शुद्धमानसाः।
ते शृण्वन्तु पुराणं हि रविषेणस्य निर्मितम्।।२२६।।

रविषेणकृते ग्रन्थे कथा यावत्प्रवर्तते।
तावच्च सकलाऽत्राऽपि वर्तते वर्णनां विना।।२२७।।

वराटविषये रम्ये जितुर[11]नगरे वरे।
मन्दिरे पार्श्वनाथस्य सिद्धो ग्रन्थः शुभे दिने।।२२८।।

सेनगणेति विख्याते गुणभद्रोऽभवन्मुनिः।
पट्टे तस्यैव सञ्जातः सोमसेनो यतीश्वरः।।२२९।।

तेनेदं निर्मितं शास्त्रं रामदेवस्य भक्तितः।
स्वस्यनिर्वाणहेत्वर्थं संक्षेपेण महात्मनः।।२३०।।

यस्मिन्निदं पुरे शास्त्रं शृण्वन्ति च पठन्ति वा।
तत्र सर्वे सुखं क्षेमं परं भवति मङ्गलम्।।२३१।।

धर्माल्लभन्ते शिवसौख्यसम्पदः
स्वर्गादिराज्याणि भवन्ति धर्मात्।
तस्मात्कुरु त्वं जिनधर्ममेकम्
विहाय पापं नरकादिकारकम्।।२३२।।

सेनगणे यतिपरमपवित्रे
वृषभसेनगणधरसुवंशे[12]।
पण्डितवर्गसुखङ्करजातः
सोमसुसेन यतिवरमुख्यः।।२३३।।

श्रीमूलसङ्घे वरपुष्कराख्ये
गच्छे सुजातो गुणभद्रसूरिः।
पट्टे च तस्यैव सुसोमसेनो
भट्टारकोऽभूद्विदुषां शिरोमणिः।।२३४।।
सहस्रासप्तशतं त्रीणि वर्तन्ते भुवि विस्तरात्।
सोमसेनमिदं वक्ष्ये चिरञ्जीविरजीवितम्।।२३५।।[13]

इति श्रीरामपुराणे भट्टारकश्रीसोमसेनविरचिते
रामस्वामिनो निर्वाणवर्णनो नाम त्रयस्त्रिंशत्तमोऽधिकारः।।३३।।

१. मंदरस्यास्य इति ख प्रतौ, मंदिरस्यास्य इति ग प्रतौ

२. स्वहृदी पुरः इति ख प्रतौ

३. क्षिद्रं इति ख प्रतौ, क्षिप्रं इति ग प्रतौ

४. कृव्यो इति ख प्रतौ

५. तिलोयपण्णति चतुर्थमहाधिकारे गाथा १४५० पद्मपुराणे/१२३/१
तृतीय बालुकाप्रभाया वर्णनं प्राप्यते

६. विशोकतिलकौ सुतौ इति त्रयौ प्रतौ परन्तु अग्रे १८५
श्लोके अशोकतिलकौ इति लिखितम्।
पद्मपुराणे ३/१२३/९० श्लोके अपि अशोकतिलकौ इत्येव लिखितम्।
अतः अत्रापि अशोकतिलकौ भवेत्।

७. पञ्चाशद्योजनं कृतं इति क/ख प्रतौ।

८. स्वकर्माणांमंते इति ग प्रतौ।

९-१०. सप्तदशसहस्राणि वषर्णि लक्ष्मणस्य च।
आयुष्यं परमं सौख्यं भोगसंपत्ति दायकं ।।२१३।।
इति ग प्रतौ एकमेव श्लोकं लिखितम्।

११. जित्वरे इति ख प्रतौ

१२. गणधरस्तु वंशे इति ख प्रतौ

१३. सप्तसहस्रसंख्यातः नवशताधिकास्तथा ।
ज्ञेया अनुष्टुपश्लोकां अस्मिन् ग्रन्थे मनोहरे।। इति ग प्रतौ

❖❖❖

तृतीयोऽध्यायः

परिशिष्टात्मकः

परिशिष्टक्रमः १

अकारादिश्लोकानुक्रमणिका

[ई]

[उ]

****

परिशिष्टक्रमः २

सन्दर्भग्रन्थसूचिका

1. जैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस — डॉ. रमाकान्त शुक्ल, वाणी परिषद् नई दिल्ली, प्र. सं. 1974
2. पद्मपुराण परिशीलन — प्रधान सम्पादक अरुण कुमार जैन, सम्पादक विजय कुमार जैन भगवान् ऋषभदेव ग्रन्थमाला, दिगम्बर जैन अतिशय क्षेत्र मन्दिर संघीजी, सांगानेर, जयपुर 2005
3. जैन श्री राम कथा — कविरत्न पं. गुणभद्र जैन, श्रीमति सुधा देवेन्द्र जैन, सन्मति ट्रस्ट मुम्बई
4. मुनि सभाचन्द एवम् उनका पद्मपुराण — डॉ. कस्तूरचन्द कासलीवाल श्री महावीर ग्रन्थ अकादमी जयपुर, प्र.सं. 1984
5. श्रीरामयशोरसायन (जैन रामायण) — यति केशराज जैन विश्व भारती संस्थान लाडनूं , प्र. सं. 2010
6. पउमचरिउ – वस्तुगत एवं शिल्पगत प्रवृत्तियाँ – डॉ. रामनिवास गुप्त, पीयूष प्रकाशन दिल्ली, 1998
7. सूर्य साहित्य भाग–6 श्री जैन रामायण — श्री सूर्य मुनिजी म. सा. कविवर्य पूज्य श्री नन्दाचार्य साहित्य समिति, झाबुआ – च. सं. 2008
8. पद्मपुराण आकृति एवं विश्लेषण परक अध्ययन — डॉ. अशोक चटर्जी शास्त्री, परिमल पब्लिकेशन, दिल्ली प्र. सं. 1989
9. पउमचरिउ — कविराज स्वयभूदेव विरचित, सिंधी जैन ग्रन्थमाला, भारतीय विद्या भवन, बम्बई, प्र. सं. 1953
10. पुराण विमर्श (पुराण विषयक महत्व पूर्ण समस्याओं का प्रामाणिक समाधान) — बलदेव उपाध्याय, चौखम्बा विद्याभवन, वाराणसी, तृ. सं. 1987
11. पुराणों में ऐतिहासिक परिवर्तन युग — डॉ. कुवरलाल जैन, व्यास शिष्य,इतिहास विद्या प्रकाशन, दिल्ली 1990
12. पुराण संहिता –श्रीमद्द्वैपायनार्थं वेद शिवाभयामाविर्भाविता — जयकृष्णदास हरिदास गुप्तः, चौखम्बा संस्कृत सीरिज ऑफिस 1957
13. पौराणिक साहित्य और संस्कृति — आचार्य भास्करानन्द लोहनी, शास्त्री रमा प्रकाशन, लखनऊ(नजीराबाद) 1963

14. पुराणों में इतिहास — कुंवरलाल जैन, इतिहास विद्या प्रकाशन, दिल्ली 1988
15. पुराणों में वंशानुक्रमिककालक्रम — इतिहास विद्या प्रकाशन, दिल्ली 1989
16. पुराणपर्यालोचनम् — डॉ. श्रीकृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, द्वि. सं. 1994
17. सामान्य पाण्डुलिपि विज्ञान — डॉ. महावीर प्रसाद शर्मा ,अपभ्रंश साहित्य अकादमी, जैन विद्या संस्थान, श्रीमहावीरजी, प्र. सं. 2003
18. पाण्डुलिपियां री आलेख अर अंवेर — डॉ. किरण नाहटा, सम्पादक – मुनि सुखलाल आचार्य तुलसी राजस्थानी शोध संस्थान, बीकानेर, राज. प्र. सं. 2007
19. पाण्डुलिपि विज्ञान — डॉ. सत्येन्द्र, राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर, द्वि. सं. 1989
20. छन्दोऽलंकार विवेचन — डॉ. राकेशमणि त्रिपाठी व सोहनराज तातेड़, लिटरेरी सर्किल, जयपुर, प्र. सं. 2012
21. अलंकार कौस्तुभम् — श्री विश्वेश्वर पण्डित, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1987
22. साहित्य दर्पण, विश्वनाथ कविराज — चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. 2058
23. जैन साहित्य का इतिहास भाग 1-2 — सिद्धान्ताचार्य पण्डित कैलाशचन्द्र शास्त्री, गणेश प्रसाद वर्णी जैन ग्रन्थमाला, वाराणसी, प्रथम संस्करण–वी. नि. सं. 2502
24. तीर्थंकर महावीर और उनकी आचार्य परम्परा भाग–1,2,3,4 — डॉ. नेमिचन्द्र शास्त्री ज्योतिषाचार्य आचार्य शान्तिसागर दाणी ग्रन्थमाला, मुजफ्फरनगर, द्वि. सं. 1992
25. जैनेन्द्रसिद्धान्त कोष – भाग – 1 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली द. सं. 2009
26. जैनेन्द्रसिद्धान्त कोष – भाग – 2 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली न. सं. 2010
27. जैनेन्द्रसिद्धान्त कोष – भाग – 3 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली न. सं. 2009
28. जैनेन्द्रसिद्धान्त कोष – भाग – 4 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली न. सं. 2009
29. जैनेन्द्रसिद्धान्त कोष – भाग – 5 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली छ. सं. 2009
30. पद्मपुराण भाग–1,2, 3 — रविषेणाचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, च. सं. 1992
31. हरिवंशपुराण — जिनसेनाचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, तृ. सं. 1994
32. आदिपुराण भाग1-2 — जिनसेनाचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, तृ. सं. 1988
33. उत्तरपुराण — गुणभद्राचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, तृ. सं. 1989
34. शांतिपुराण — श्रीमद् असगमहाकवि, जैन संस्कृति संरक्षण संघ, सोलापुर

35. जैनकथा संग्रह भाग-४ — बाबूलाल जैन, सम्पादक- पं. रमेशचन्द जैन शास्त्री, श्री भा.दि.जैन सा.प्रकाशन एवं प्रचार समिति, प्र. सं. 2012

36. संस्कृत हिन्दी कोश — वामन शिवराम आप्टे, मोतीलाल बनारसीदास पब्लिशर्स दिल्ली, 2001

37. पौराणिक संदर्भ कोश — किरण प्रकाशन हैदराबाद, डॉ. एन.पी. कुट्टन पिल्लै, प्र.सं. 1984

38. काव्यालंकार, — आचार्य भामहकृत, सम्पादक-डॉ. रमण कुमार शर्मा, विद्यानिधि प्रकाशन, दिल्ली, प्र.सं. 1994

39. संस्कृत साहित्य का इतिहास — प्रो. हंसराज अग्रवाल, चौखम्बा विद्या भवन वाराणसी, पं.सं. 1987

40. जैन संस्कृति कोश — प्रो. भागचन्द भास्कर, कला एवं धर्म शोध संस्थान, वाराणसी द्वि. सं. 2002

41. तिलोयपण्णति — यतिवृषभाचार्य, सम्पादक- डॉ. चेतनप्रकाश पाटनी जोधपुर तृ. सं. 2008

42. हिन्दुत्व (हिन्दु धर्म एवं संस्कृति का विश्वकोश) — रामदास गौड़, नीता प्रकाशन, नई दिल्ली

43. हिन्दू धर्मकोश — डॉ. राजबली पाण्डेय, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ प्र.सं. 2010, द्वि.सं. 1988

44. Jain Ramayan - — Shri Priyadarshan, Shri Vishvakalyan Prakashan Trust, First Edition 1989.

45. The Story of Rama in Jain Literature - — V. M. Kulkarni, Saraswati Pustak Bhandar, Ahmedabad, 1st edition 1990

46. Paumacariyam — Achrya Vimal Suri's, Prakrit Text Society, Varanasi 1962

47. A Critical Study of the Geographical Data in the Early Puranas — Dr. M.R. Singh, Punthi Pustak, Calcutta, 1st edition 1972

48. Puranic Chronology — D.R. Mankad, Ganggata Prakashan, 1st edition 1951

परिशिष्टक्रमः २

सन्दर्भग्रन्थसूचिका

1. जैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस	डॉ. रमाकान्त शुक्ल, वाणी परिषद् नई दिल्ली, प्र. सं. 1974
2. पद्मपुराण परिशीलन	प्रधान सम्पादक अरुण कुमार जैन, सम्पादक विजय कुमार जैन भगवान् ऋषभदेव ग्रन्थमाला, दिगम्बर जैन अतिशय क्षेत्र मन्दिर संघीजी, सांगानेर, जयपुर 2005
3. जैन श्री राम कथा	कविरत्न पं. गुणभद्र जैन, श्रीमति सुधा देवेन्द्र जैन, सन्मति ट्रस्ट मुम्बई
4. मुनि सभाचन्द एवम् उनका पद्मपुराण	डॉ. कस्तूरचन्द कासलीवाल श्री महावीर ग्रन्थ अकादमी जयपुर, प्र.सं. 1984
5. श्रीरामयशोरसायन (जैन रामायण)	यति केशराज जैन विश्व भारती संस्थान लाडनूं , प्र. सं. 2010
6. पउमचरिउ – वस्तुगत एवं शिल्पगत प्रवृत्तियाँ –	डॉ. रामनिवास गुप्त, पीयूष प्रकाशन दिल्ली, 1998
7. सूर्य साहित्य भाग–6 श्री जैन रामायण	श्री सूर्य मुनिजी म. सा. कविवर्य पूज्य श्री नन्दाचार्य साहित्य समिति, झाबुआ – च. सं. 2008
8. पद्मपुराण आकृति एवं विश्लेषण परक अध्ययन	डॉ. अशोक चटर्जी शास्त्री, परिमल पब्लिकेशन, दिल्ली प्र. सं. 1989
9. पउमचरिउ	कविराज स्वयभूदेव विरचित, सिंधी जैन ग्रन्थमाला, भारतीय विद्या भवन, बम्बई, प्र. सं. 1953
10. पुराण विमर्श (पुराण विषयक महत्व पूर्ण समस्याओं का प्रामाणिक समाधान)	बलदेव उपाध्याय, चौखम्बा विद्याभवन, वाराणसी, तृ. सं. 1987
11. पुराणों में ऐतिहासिक परिवर्तन युग	डॉ. कुवरलाल जैन, व्यास शिष्य,इतिहास विद्या प्रकाशन, दिल्ली 1990
12. पुराण संहिता –श्रीमद्द्वैपायनार्थं वेद शिवाभयामाविर्भाविता	जयकृष्णदास हरिदास गुप्तः, चौखम्बा संस्कृत सीरिज ऑफिस 1957
13. पौराणिक साहित्य और संस्कृति	आचार्य भास्करानन्द लोहनी, शास्त्री रमा प्रकाशन, लखनऊ(नजीराबाद) 1963

14. पुराणों में इतिहास — कुंवरलाल जैन, इतिहास विद्या प्रकाशन, दिल्ली 1988
15. पुराणों में वंशानुक्रमिककालक्रम — इतिहास विद्या प्रकाशन, दिल्ली 1989
16. पुराणपर्यालोचनम् — डॉ. श्रीकृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, द्वि. सं. 1994
17. सामान्य पाण्डुलिपि विज्ञान — डॉ. महावीर प्रसाद शर्मा ,अपभ्रंश साहित्य अकादमी, जैन विद्या संस्थान, श्रीमहावीरजी, प्र. सं. 2003
18. पाण्डुलिपियां री आलेख अर अंवेर — डॉ. किरण नाहटा, सम्पादक – मुनि सुखलाल आचार्य तुलसी राजस्थानी शोध संस्थान, बीकानेर, राज. प्र. सं. 2007
19. पाण्डुलिपि विज्ञान — डॉ. सत्येन्द्र, राजस्थान हिन्दी ग्रन्थ अकादमी जयपुर, द्वि. सं. 1989
20. छन्दोऽलंकार विवेचन — डॉ. राकेशमणि त्रिपाठी व सोहनराज तातेड़, लिटरेरी सर्किल, जयपुर, प्र. सं. 2012
21. अलंकार कौस्तुभम् — श्री विश्वेश्वर पण्डित, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1987
22. साहित्य दर्पण, विश्वनाथ कविराज — चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. 2058
23. जैन साहित्य का इतिहास भाग 1-2 — सिद्धान्ताचार्य पण्डित कैलाशचन्द्र शास्त्री, गणेश प्रसाद वर्णी जैन ग्रन्थमाला, वाराणसी, प्रथम संस्करण–वी. नि. सं. 2502
24. तीर्थंकर महावीर और उनकी आचार्य परम्परा भाग–1,2,3,4 — डॉ. नेमिचन्द्र शास्त्री ज्योतिषाचार्य आचार्य शान्तिसागर दाणी ग्रन्थमाला, मुजफ्फरनगर, द्वि. सं. 1992
25. जैनेन्द्रसिद्धान्त कोष – भाग – 1 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली द. सं. 2009
26. जैनेन्द्रसिद्धान्त कोष – भाग – 2 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली न. सं. 2010
27. जैनेन्द्रसिद्धान्त कोष – भाग – 3 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली न. सं. 2009
28. जैनेन्द्रसिद्धान्त कोष – भाग – 4 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली न. सं. 2009
29. जैनेन्द्रसिद्धान्त कोष – भाग – 5 — क्षु. जिनेन्द्र वर्णी भारतीय ज्ञानपीठ दिल्ली छ. सं. 2009
30. पद्मपुराण भाग–1,2, 3 — रविषेणाचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, च. सं. 1992
31. हरिवंशपुराण — जिनसेनाचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, तृ. सं. 1994
32. आदिपुराण भाग1-2 — जिनसेनाचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, तृ. सं. 1988
33. उत्तरपुराण — गुणभद्राचार्य, सम्पादक–डॉ. पन्नालाल जैन साहित्याचार्य, भारतीय ज्ञानपीठ दिल्ली, तृ. सं. 1989
34. शांतिपुराण — श्रीमद् असगमहाकवि, जैन संस्कृति संरक्षण संघ, सोलापुर

35. जैनकथा संग्रह भाग–४ — बाबूलाल जैन, सम्पादक– पं. रमेशचन्द जैन शास्त्री, श्री भा.दि.जैन सा.प्रकाशन एवं प्रचार समिति, प्र. सं. 2012
36. संस्कृत हिन्दी कोश — वामन शिवराम आप्टे, मोतीलाल बनारसीदास पब्लिशर्स दिल्ली, 2001
37. पौराणिक संदर्भ कोश — किरण प्रकाशन हैदराबाद, डॉ. एन.पी. कुट्टन पिल्लै, प्र.सं. 1984
38. काव्यालंकार, — आचार्य भामहकृत, सम्पादक–डॉ. रमण कुमार शर्मा, विद्यानिधि प्रकाशन, दिल्ली, प्र.सं. 1994
39. संस्कृत साहित्य का इतिहास — प्रो. हंसराज अग्रवाल, चौखम्बा विद्या भवन वाराणसी, पं.सं. 1987
40. जैन संस्कृति कोश — प्रो. भागचन्द भास्कर, कला एवं धर्म शोध संस्थान, वाराणसी द्वि. सं. 2002
41. तिलोयपण्णति — यतिवृषभाचार्य, सम्पादक– डॉ. चेतनप्रकाश पाटनी जोधपुर तृ. सं. 2008
42. हिन्दुत्व (हिन्दु धर्म एवं संस्कृति का विश्वकोश) — रामदास गौड़, नीता प्रकाशन, नई दिल्ली
43. हिन्दू धर्मकोश — डॉ. राजबली पाण्डेय, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ प्र.सं. 2010, द्वि.सं. 1988
44. Jain Ramayan - Shri Priyadarshan, Shri Vishvakalyan Prakashan Trust, First Edition 1989.
45. The Story of Rama in Jain Literature - V. M. Kulkarni Saraswati Pustak Bhandar, Ahmedabad, 1st edition 1990
46. Paumacariyam — Achrya Vimal Suri's, Prakrit Text Society, Varanasi 1962
47. A Critical Study of the Geographical Data in the Early Puranas — Dr. M.R. Singh, Punthi Pustak, Calcutta, 1st edition 1972
48. Puranic Chronology — D.R. Mankad, Ganggata Prakashan, 1st edition 1951

प्रतिज्ञापत्रम्

स्वातिजैन इत्याख्येन मया **''सोमसेनविरचितस्य रामपुराणस्य पाठसमीक्षात्मकं सम्पादनम्''** इति शीर्षकान्वितश्शोधप्रबन्धोऽयं पूर्वं मया कस्मैचिदुपाधये न क्वाप्यर्पितः। ऐदम्प्राथम्येन राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्वविद्यालयस्य) जयपुरपरिसरस्य जैनदर्शनविभागे आचार्याणां प्रो. श्रीयांशकुमारसिंघईमहोदयानां मार्गनिर्देशने मया स्वीयपरिश्रमेणापेक्षितास्सकला-स्सामग्रीः सङ्कलय्य नवदेहलीस्थस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्व-विद्यालयस्य 'विद्यावारिधिः' (Ph.D) इत्युपाधये शोधप्रबन्धोऽयं मूल्याङ्कनाय प्रस्तूयते।

दिनाङ्कः –

स्थानम् – जयपुरम्

शोधसन्धात्री

स्वातिजैनः

मार्गनिर्देशकस्य प्रमाणपत्रम्

प्रमाणीक्रियते यदत्र शोधच्छात्रया स्वातिजैनाभिधेयया **''सोमसेनविरचितस्य रामपुराणस्य पाठसमीक्षात्मकं सम्पादनम्''** इति शोधप्रबन्धोऽयं स्वपरिश्रमेण शोधा-नुसन्धानसरिणीमनुसृत्य सन्दर्भग्रन्थादिसामग्रीः सङ्कलय्य सुविचिन्त्य च स्वकीयकौशलेन मम निर्देशने सज्जीकृतो वर्तते। अतो मयेदानीं शोधप्रबन्धोऽयं राष्ट्रियसंस्कृतसंस्थान-मानितविश्वविद्यालयस्य 'विद्यावारिधिः' (Ph.D) इत्युपाधये परीक्षणार्थं प्रस्तोतुमग्रेसार्यते।

शोधनिर्देशकः

दिनाङ्कः –

स्थानम् – जयपुरम्

प्रो. श्रीयांशकुमारसिंघई

आचार्योऽध्यक्षश्च जैनदर्शनविभागः

अनुशंसापत्रम्

स्वातिजैन इति नाम्नी शोधच्छात्रा राष्ट्रियसंस्कृतसंस्थानस्य मानित-विश्वविद्यालयस्य 'विद्यावारिधिः' (Ph.D) इत्युपाधये **"सोमसेनविरचितस्य राम-पुराणस्य पाठसमीक्षात्मकं सम्पादनम्"** इति शोधप्रबन्धमिमं प्रपूर्य राष्ट्रियसंस्कृत-संस्थानस्य जयपुरपरिसरे परीक्षणार्थमद्य प्रस्तुतवतीति प्राचार्यत्वेन प्रमाणीकृत्य शोध-प्रबन्धोऽयं परीक्षणार्थमनुशंसामि।

प्राचार्यः

दिनाङ्कः –

स्थानम् – जयपुरम्

राष्ट्रियसंस्कृतसंस्थानम्
जयपुरपरिसरः

कृतज्ञताज्ञापनम्

गुरोः कृपां विना न किमपि कार्यं सफलतामेति।

तदर्थमहं गुरोः कृपामाजीवनं काङ्क्षे।

"**कृते च प्रति कर्तव्यम् एषः धर्मः सनातनः**" इति न्यायशास्त्रोक्त्यनुसारं सर्वान् गुरुजनान् प्रति आभारनिवेदनं शोधकर्त्र्याः मम परमकर्तव्यमस्ति। स्वकार्तज्ञ्यभावानां प्रकटीकरणं न केवलमा-भारप्रदर्शनं भवत्यपितु व्यक्तेः चारित्र्यलक्षणमपि। येन ज्ञायते खलु तद्व्यक्तेश्चिन्तनं स्वभावश्च। तदनुगुणमेवाहमत्र तान् सर्वान् प्रणम्य तेषां कार्तज्ञ्यं स्वीकरोमि विनिवेदयामि चागामिनिकालेऽपि मामुपकुर्युः कृपया।

प्रस्तुतशोधकार्यं विधातुं मम शोधकर्त्र्याः परिश्रमस्त्वस्त्येव तत्र बहूनां योगदानमपि लब्धं ततस्तेषां समेषां शोधनिदेशकादिगुरुजनानां परिवारजनानामुपकारं स्वीकरोमि यतः मे परिश्रमोऽद्य सफलीभूतः। सर्वेऽपि गुरुजनाः सविनयं प्रणम्याः एव सन्ति तान् प्रति कार्तज्ञ्यज्ञापनं त्वौपचारिकमेव ज्ञातव्यम्। तेषां छत्रच्छायायामेवाहं विद्यार्जनरता भविष्यामीति कामये। शोधकार्यमिदमहं राष्ट्रियसंस्कृतसंस्थानस्य नवदेहलीस्थस्य मानितविश्वविद्यालयस्य जयपुरपरिसरे विश्वविद्यालयानुदानायोगविनियमानुसारेण कृतवती। ततो कार्यस्यामुष्य कनिष्ठशोधाध्येतृवृत्तिरपि मया लब्धा। शोधकार्यस्य सम्पादने मे शोधनिर्देशकाः प्रो. श्रीयांशकुमारसिंघईमहोदयाः सर्वथा माम् समुत्साहितवन्तः समग्ररूपेण च निर्देशितवन्तः। शोधप्रबन्धलेखने ममेप्सितं विषयं प्रदाय समुचितं निदेशनञ्च विधायात्यन्तमुपकृतवद्भ्यः संस्कृतैकनिष्ठेभ्यः कर्तव्योत्तरदायित्वपरायणेभ्यः छात्रवत्सलेभ्यः पितृतुल्येभ्यः शास्त्रमर्मज्ञेभ्यः जयपुरपरिसरस्य जैनदर्शनविभागाचार्योऽध्यक्षेभ्यश्च डॉ. श्रीयांशकुमार-सिंघईवर्येभ्यो धन्यवादं ज्ञापयामि। येषां यथोचितज्ञानवारिसेचनेनेदं शोधप्रबन्धरूपं सुपुष्पं पुष्पितं यैश्च

पदे पदे समुत्पन्नानां जटिलतराणां समस्यानां समाधानं सरलरीत्या कृतं तान् सर्वान् प्रत्यहं साम्प्रतमाभारं स्वीकरोमि।

जयपुरपरिसरस्य प्राचार्याः डॉ. जी. गंगन्नामहोदयाः, डॉ. प्रकाशपाण्डेयमहाभागाः, प्रो. अर्कनाथचौधरीमहाशयाश्च क्रमशः माम् शोधप्रबन्धलेखने प्रोत्साहितवन्तः एव। यतोऽहं शोधग्रन्थमिमं शोधप्रबन्धकार्यसम्पूर्णतां प्रति नीत्वा प्रस्तौमि अद्य। तस्मादेव सर्वानेतान् नमस्कृत्याहं विनिवेदयामि सर्वान् गुरुजनान् संप्रार्थनया यत्ते सविद्यया माम् संपोषयन्तु भृशमग्रे च सारयन्तु कृपया।

मम शोधकार्येऽस्मिन् मदीयपरिवारस्य महती भूमिका वर्ततेऽतोऽहं सर्वप्रथमतया स्वपित्रोः परिवारजनानाञ्च धन्यत्वं स्मरामि यतः कृपया साम्प्रतमस्य शोधकार्यस्य कृतेऽहं सक्षमाऽस्मि। विविधभावेनोपकृतवद्भ्यः सदैव मे शिवं कामयमाने पितृभ्यः समस्तपरिवारजनेभ्यः नमो नमः यथानुयोगेन।

एवमेव नानाविचारसहाय्यप्रदातृभ्यो परितोषवर्द्धनः–संजयजैनः–शिवशङ्करमहोदयेभ्यः मित्रेभ्यस्सहपाठिभ्यश्च भीमराजनायकः–हार्दिकराजगुरुः–चर्चितजैनेत्यादिभ्यश्चापि धन्यवादं विनिवेदयामि।

अन्यच्च शोधकर्मण्यस्मिन् प्रत्यक्षाप्रत्यक्षविधानेन ये चोपकृतिनस्सन्ति तेभ्यः सर्वेभ्यो हृदयेनाहं धन्यवादान् विनिवेदयामि।

दिनाङ्कः –
स्थानम् – जयपुरम्

स्वातिजैनः
शोधसन्धात्री